यत्र—यस्मिन्देशे ओषधीरोषध्यः समग्मत—संगच्छन्ते राजानः—समिताविव—सङ्ग्रामे यथा तत्र तथा संगता भवन्ति तद्वत् तासां नानाविधानामोषधीनां संगमनं यस्मिन्देशे अस्ति तत्र विप्रः—प्राज्ञो ब्राह्मणः स भिषगुच्यते रक्षोहा—रक्षोहन्ता अमीवचातनः—अमीवा व्याधिः तस्य चातनश्चातयिता च भवति तदानीम् ॥६॥वा० सं० १२।८०

He who hath store of herbs at hand—like kings amid a crowd of men.
Physician is that sage's name, fiend slayer, chaser of desease.

११—अश्वावतीं सोमावतीमूर्जयन्तीमुदोजसम् । आवित्सि सर्वा ओषधीरस्मा अरिष्टतातये ॥

अश्वावत्यादयः प्रधानभूताः ओषध्यश्चतस्रः ताः सर्वा ओषधीराविस्सि—आजाने स्तौमीत्यर्थः अस्मा—अरिष्टतातये—अस्मै रोगाय अमुं रोगं विनाशयितुमित्यर्थः ॥ ७ ॥ वा० सं० १२।८१

Herbs rich in Soma, rich in steeds, in nourishment, in strengthening power,
All these have I provided here, that this man may be whole again.

(The words 'rich in steed' etc. do not convey any meaning concerning any medicinal qualities. The meaning of these words seems to be here as follows:—

अश्वावतीं=वाजीकरणम् Vajikarana. सोमावतीं=आयुर्वर्धकम् Ayurvardhaka. ऊर्जयन्तीं=वृष्यम् Vrishya. उदोजसम्=रसायनम् Rasayana.

The above mentioned qualities are well-known in the Ayurveda, of the medicines.)

१२—उच्छुष्मा ओषधीनां गावो गोष्ठादिवेरते । धनं सनिष्यन्तीनामात्मानं तव पूरुष ॥

ओषधीनां शुष्मा—बलानि उदीरते–उद्गच्छन्ति रुग्णे सवीर्यं प्रोद्गमयन्तीत्यर्थः । गावोगोष्ठादिव—ता तथा ततः सकाशादुदीरते तद्वत् कीदृशानामोषधीनां उच्यते धनं—स्वसामर्थ्यलक्षणं सनिष्यन्तीनां—गातुमिच्छन्तीनां किं प्रतीति उच्यते हे पूरुष—पुरुष रोगग्रस्त तवात्मानं शरीरं प्रति । यद्वा प्ररोहन्तीरोषधी दृष्ट्वा वदति हे पुरुष प्रियगव्योषधिस्वामिन् तव आत्मानं वर्धयितुं धनं सनिष्यन्तीनां मीलायोषधीनां शुष्मा उदीरते ॥ ८ ॥ वा० स० १२।८२

The healing virtues of the Plants stream forth like cattle from the stall.
Plants that shall win me store of wealth, and save thy Vital breath, O man.

१३—इष्कृति र्नाम वो माताथो यूयं स्थ निष्कृतीः । सीराः पतत्रिणीः स्थन यदामयति निष्कृथ ॥

हे ओषधयो वो माता—जननी इष्कृतिर्नाम–सर्वेषां रुग्णानां निष्कर्त्रीति प्रसिद्धा यस्मात्सा रुग्णं निष्करोति अथो–अतो यूयमपि निष्कृतीः–निष्कृतयः स्थ–भवथ किंच यूयं सीराः–सरणशीलाः पतत्रिणीः–पतनवत्यश्च स्थन–भवथ तप्तनबिति–थनादेशः । किंच पुरुषो यद्यदि आमयति–व्याधितोभवति तं निष्कृत–संस्कुरुथ ॥ ९ ॥
वा० सं० १२।८३

Reliever is your mother's name, and hence Restorer are ye called,
Rivers are ye with wings that fly, keep for whatever brings disease.

१४—अतिविश्वाः परिष्ठाः स्तेन इव व्रजमक्रमुः । ओषधीः प्राचुच्यवु र्यत्किञ्च ॥

विश्वा—व्याप्ताः परिष्ठाः परितः स्थिताः ओषधयः अस्थक्रमुः—व्यापीन् अतिक्रान्तवत्यः स्तेन इव व्रजं—यथास्तेनो व्रजं आयक्रमीत् तद्वत् तथा कृत्वा ओषधीः—ओषधयः प्रचुच्यवुः-प्रच्यावयन्ति यत्किंच तन्व—स्वशरीरस्य रपः पापं व्याधिलक्षणमस्ति तदिति ॥ १० ॥ वा० सं० १२।८४

Over all fences have they passed, as steals a thief into the fold,
The Plants have driven from the frame, whatever malady was there.

१५—यदि मा वाजयन्नहमोषधी र्हस्त आदधे । आत्मा यक्ष्मस्य नश्यति पुरा जीवगृभो यथा ॥

अहं यदीमा ओषधीर्हस्ते आदधे—आधारयामि किं कुर्वन् वाजयन् रूपं बलिनं कुर्वन् ततः यक्ष्मस्य रोगस्याऽऽत्मा नश्यति । जीवगृभो—यथा जीवानां शकुन्यादीनां ग्राहकात् व्याधात् यथा जीवा नश्यन्ति तद्वत् । यद्वा जीवगृभः—मृत्योः सकाशात् जीवो रक्ष्यते तद्वत् ॥ ११ ॥ वा० सं० १२।८५

When, bringing back the vanished strength, I hold these herbs within my hand,
The spirit of disease departs ere he can seize upon the life.

१६—यस्यौषधीः प्रसर्पथाङ्गमङ्गं परुष्परुः । ततो यक्ष्मं विबाधध्व उग्रो मध्यमशीरिव ॥

हे ओषधीः—ओषधयो यस्य रुग्णस्याऽङ्गमङ्गं यदङ्गं परुः परुः यत्पर्व प्रसर्पथ प्रकर्षेणाश्रयथ ततोऽङ्गात् पर्वणः यक्ष्मं व्याधिं विबाधध्वे उग्र उद्गूर्णबलो मध्यमशीः मध्यमस्थाने वर्तमानो राजा यथोपद्रवकारिणः शत्रून् पदेशे विबाधते तद्वत् ॥ १२ ॥ वा० सं० १२।८६

He through whose frame, O plant ye creep member by member, joint by joint
From him ye drive away disease like some strong arbiter of strife.

१७—साकं यक्ष्म प्रपत चाषेण किकिदीविना । साकं वातस्य ध्राज्या साकं नश्य निहाकया ॥१३॥

हेऽस्मदीयस्य पुरुषस्य शरीराधिष्ठायिन् यक्ष्म—व्याधे त्वम् साकं सहैव प्रपत—प्रकर्षेण शीघ्रं गच्छ केन साकमिति उच्यते—चाषेण अतिशीघ्र पतता चाषाख्येन पक्षिणा सह तथा किकिदीविना—पक्षिणा च सह तथा वातस्य शीघ्रं गच्छतो वायो ध्राज्या—प्रजवी गत्या वेगेन सह गच्छ तथा निहाकया गोधिकया साकं नश्य नाशं प्राप्नुहि ॥ १३ ॥ वा० सं० १२।८७

Fly, spirit of disease, be gone, with the blue joy and kingfisher,
Fly with wind's impetuous speed, vanish together with the storm.

१८—अन्या वो अन्यामवत्वन्यान्यस्या उपावत । ताः सर्वाः संविदाना इदं मे प्रावता वचः ॥ १४

हे ओषधयो वो युष्माकं मध्ये अन्या ओषधिरन्यामोषधिमवतु प्राप्नोतु अवतिरत्र गत्यर्थः । तथान्यान्यस्याः समीपमुपावत उपागच्छत एवं याः सन्ति क्षितामोषधयः ताः सर्वाः संविदानाः परस्परमैकमत्यं प्राप्ताः सत्य इद मे मदीयं यत्प्रार्थनालक्षणं वचनं प्रावत प्ररक्षत ॥ १४ ॥ वा० सं० १२।८८

Half every one the other, lend assistance each of you to each,
All of you be accordant, give furtherance to this speech of mine.

१९—याः फलिनी र्या अफला अपुष्पा याश्च पुष्पिणीः । बृहस्पतिप्रसूतास्ता नो मुञ्चन्त्वंहसः ॥१५॥

याः फलिनीः—फलवत्यः याः अफलाः—फलवर्जिता या अपुष्पाः पुष्परहिता याश्च पुष्पिणीः पुष्पवत्यः बृहस्पतिप्रसूताः बृहस्पति र्मन्त्राभिमानी देवः तेनाऽनुज्ञातास्ता नोऽस्मान् अंहसो मुंचन्तु मोचयन्तु ॥१५॥ वा० सं० १२।८

Let fruitful plants, and fruitless, those that blossom, and blossomless,
Urged onward by Brihaspati, release us from our pain and grief,

२०—मुञ्चन्तु माशपथ्या ३ दथो वरुण्यादुत । अथोयमस्य पड्वीशात्सर्वस्माद्देवकिल्बिषात् ॥१६॥

मा—मां ओषधयः शपथ्यात्—शपथसंजातादेनसः पापान्मुञ्चन्तु अथो—अपिच वरुण्यात्—वरुणसम्भवात् मां मुञ्चन्तु वरुणोऽपि स्वपाशेन जातमात्रं पुरुषं बध्नाति उतेति—पूरणः अथोअपिच यमस्य पड्वीशात् पादबन्धनात् निगडात् मुञ्चन्तु न केवलं वरुणादेः पापात् सर्वस्मात् देवकिल्बिषात्—देवैः कृतात्पापात् मुञ्चन्तु ॥ १६ ॥
वा० सं० १२।९०

Release me from the curses, plague and who that comes from 'Varuna';
Free me from Yama's father, from sin and offence against the Gods.

२१—अवपतन्तीरवदन्दिव ओषधयस्परि । यं जीवमश्नवामहै न स रिष्याति पूरुषः ॥ १७ ॥

दिवो—द्युलोकादवपतन्तीरवपतन्त्य ओषधय इत्थं पर्यवदन् किमिति उच्यते यं जीवं जीवन्तमश्नवामहै व्याप्नुमो न स पूरुषः पुरुषो रिष्याति—रिष्यति न हिंस्यते ॥ १७ ॥
वा० सं० १२।९१

What time descending from the sky, the Plants flew earthward, thus they spake,
No evil befall the man whom, while he liveth we pervade.

२२—या ओषधीः सोमराज्ञी र्वह्वीः शतविचक्षणाः । तासां त्वमस्युत्तमारं कामाय शं हृदे ॥१८॥

या ओषधीरोषधयः सोमराज्ञीः सोमो राजा स्वामी यासां तास्तथोक्ताः वह्वीः—असङ्ख्याताः शतविचक्षणाः वहुदर्शनाः हे सोमाख्य ओषधे तासामोषधीनां त्वमुत्तमासि यस्मादेवं तस्मात् आरमलं पर्याप्तं कामाय—कान्ताय हृदे हृदयाय शं सुखकरी भवेति शेषः ॥ १८ ॥
वा० सं० १२।९२

Of all the many Plants whose king is Soma, Plants of hundred forms,
Thou art the plant most excellent, prompted to the wish, sweet to the heart.

२३—या ओषधीः सोमराज्ञी र्विष्ठिताः पृथिवीमनु । बृहस्पतिप्रसूता अस्यै संदत्त वीर्यम् ॥ १९ ॥

या ओषधीः सोमराज्ञीः पृथिवीमनुविष्ठिताः विविधं स्थिता दिवः सकाशात् आगत्य पृथिव्या नानाभेदेन स्थिताः बृहस्पतिप्रसूता बृहस्पतिनाऽनुज्ञाताः सत्यो यूयं अस्यै रुग्णतनवे वीर्यं सन्दत्त सन्धत्त ॥ १९ ॥ वा० सं० १२।९३

O all ye various herbs, whose king is Soma, that overspread the earth,
Urged onward by Brihaspati, combine your virtue in this plant.

२४—मा वो रिषत्खनिता यस्मै चाऽहं खनामि वः । द्विपच्चतुष्पदस्माकं सर्वमस्त्वनातुरम् ॥ २० ॥

हे ओषधयो—वो युष्मान् मारिषत् मा हिंस्यात् कः खनिता भूमेः खननकर्ता यस्मै रुग्णाय चाहं खनामि वो युष्मान् किंवाऽस्माकं सम्बन्धि द्विपत् पुत्रभृत्यादिकं चतुष्पत् गोमहिष्यादिकं यदस्ति तत्सर्वमनातुरमरोगमस्तु ॥ २० ॥
वा० सं० १२।९५

Unharmed he be, who digs you up, unharmed the man for whom I dig
And let no malady attack biped or quadruped of ours.

२५—याश्चेदमुपशृण्वन्ति याश्च दूरं परागताः । सर्वाः सङ्गत्य वीरुधोऽस्यै संदत्त वीर्यम् ॥२१॥

याश्चौषधयः इदं स्तोत्रमुपशृण्वन्ति याश्चौषधयो दूरं परागताः सर्वा वीरुधः सङ्गत्य सङ्गताःसत्यो हे वीरुधोऽस्यै रुग्णतन्वे वीर्यं सन्दत्त ॥ २१ ॥ वा. सं. १२।९४

All plants that hear this speech, and those that departed far away,
Come all assembled and confer your healing power upon this herb.

२६—ओषधयः संवदन्ते सोमेन सह राज्ञा । यस्मै कृणोति ब्राह्मणस्तं राजन् पारयामसि ॥२२॥

ओषधयः सर्वाः सोमेन राज्ञा सह संवदन्ते संवादं कुर्वन्ति किमिति तदुच्यते–यस्मै–रुग्णाय ब्राह्मणः–ओषधिसामर्थ्यज्ञो ब्राह्मणो वैद्यः कृणोति–करोति चिकित्सां तं रुग्णं हे राजन् पारयामसि–पारयाम इदंतोमधिः ॥ २२ ॥

With Soma as their Sovereign Lord, the Plants hold colloquy and say :
O King, we save from death whose cure a Brahman uadertakes.

२७—त्वमुत्तमास्योषधे तव वृक्षा उपस्तयः । उपस्तिरस्तु सो ३ स्माकं यो अस्माँ अभि दासति ॥२३॥

हे ओषधे–सोमाख्ये त्वं ओषधीनामन्यासामुत्तमासि तव वृक्षाः सर्वे उपस्तयः–अधः शायिन एव तथा सति स उपस्तिरस्तु–अधःशायी भवतु योस्मानभिदासति–अभिहिनस्ति भ्रातृव्य इति ॥ २३ ॥

Most excellent of all art thou, O Plant : thy vessels are the trees.
Let him be subject to our power, the man who seeks to injure us.

२८—उत देवा अवहितं देवा उन्नयथा पुनः । उतागश्चकुषं देवा देवाजीव यथा पुनः ॥ २४ ॥

उतापि च हे देवाः अवहितमुन्नयथ उतापि च हे देवाः आगः–अपराधं चक्रुषं कृतवन्तं मां तस्मादगसो रक्षत हे देवाः रक्षित्वा च पुनः पश्चाज्जीवयथ चिरजीविनं कुरुत ॥ १ ॥

Ye Gods, raise up once more the man whom ye have humbled and brought low.
O Gods, restore to life again the man who hath committed sin.

२९—यदान्त्रेषु गवीन्यो यद्वस्तावधि संस्रुतम् । एवाते मूत्रं मुच्यतां बहि र्बालिति सर्वकम् ॥ ६ ॥

आन्त्रेषु उदरान्तर्गतेषु पुरीतत्सु । यत्–मूत्रं संश्रितं समवस्थितं रोगवशाद् यथाकालं बहिरनिर्गच्छत् निरुद्धम् अभूत् तथा गवीन्योः । आन्त्रेभ्यो विनिर्गतस्य मूत्रस्य मूत्राशयप्राप्तिसाधने पार्श्वद्वयस्थे नाड्यौ गवीन्यौ इत्युच्येते । तयोरपि यत् मूत्रं संश्रितम् तथा वस्तौ । धनुराकारो मूत्राशयो वस्तिरुच्यते । तत्रापि यत् मूत्रं संश्रितम् अस्ति ते–तव उक्तस्थानेषु निरुद्धं तत् मूत्रम् एव–एवम् । यथापूर्वं मुच्यतां निर्गच्छतु । निर्गमनप्रकारमेवाऽऽह । सर्वकं–सर्वं तत् मूत्रम् । तत् मूत्रं बाल्–अनुकरणशब्दोऽयम् । इति–एवमात्मकं शब्दं कुर्वत् बहिः शरीराद् बाह्यप्रदेशे मुच्यताम् इति सम्बन्धः ॥ अथर्व १।३।६ ॥

Griffith's Translation—

> Whatever hath gathered, as it flowed, in bowels, bladders, or in groins,
>
> By this may I bring health unto thy body : let the channels pour their burthen freely as gold.

Whitney's Translation.—

> What in thine entrails, thy (two) groins (Gavinis), what in thy bladder has flowed together, so be thy urine released, out of thee with a splash, all of it.

३०—प्र ते भिनद्मि मेहनं वर्त्रं वेशन्त्या इव । एवा ते मूत्रं मुच्यतां बहिर्बालिति सर्वकम् ॥अथर्व १।३।७॥

हे मूत्रव्याधिपीडित ते–तव मेहनम् । मिह्यति सिञ्चति अनेनेति मेहनं मूत्रनाळः । तत् मेहनं प्रभिनद्मि लोहशलाकया मूत्रनिर्गमनार्थं विदारयामि । तत्र दृष्टान्तः । वर्त्रम्–वर्तते प्रवहति जलम् अत्रेति वर्त्रो–मार्गः । तं वेशन्त्या इव । विशन्ति तिष्ठन्ति अस्मिन् आप इति वेशन्तः पल्वलम् । तत्र भवा आपो वेशन्त्याः । ता यथा सुनिर्गमनमार्गं विदारयन्ति तथेत्यर्थः । एव–एवम् इत्थम् मूत्रनिरुद्धनिःसरणाय मार्गस्य कृतत्वात् ते मूत्रं मुच्यताम् इत्यादि पूर्ववद् व्याख्येयम् ॥७॥

Griffith's Translation—

I lay the passage open as one cleanses the dam that bars the lake :
Thus let the channels &c.;

Whitney's Translation—

I split up thy urinator, like the weir of a tank.
So be thy etc., etc.

३१—विपितं ते वस्तिविलं समुद्रस्योदधेरिव । एवा ते मूत्रं मुच्यतां बहि र्बालिति सर्वकम् ॥ ८ ॥

हे मूत्ररोगार्त ते-तव वस्तिविलं वस्तिद्वारं व्याधिवशात् निरुद्धं मूत्रवर्त्म विपितं विमुक्तं मूत्रनिःसरणयोग्यं अस्तु । तत्र दृष्टान्तः । **समुद्रस्य**-समुनत्ति स्वकीयेन जलेन कृत्स्नं जगत् क्लेदयतीति समुद्रः । **उदधेः**-उदकानि धीयन्ते धार्यन्तेऽस्मिन्निति उदधिः । अनेन विलवदवस्थितेषु नदीमुखेषु समुद्रजलस्य निःसरणयोग्यता उक्ता । उदकपूर्णसमुद्रस्य नदीमुखपूर्णलक्षणं जलनिःसरणद्वारं यथा विवृतं भवति एवं वस्तिबिलमपि विवृतं भवत्वित्यर्थः । **एव**-एवम् । उक्त प्रकारेण वस्तिबिले विपिते सतीत्यर्थः । शेषं पूर्ववद् व्याख्येयम् ॥ अथर्व १।३।८ ॥

Griffith's Translation—

Now hath portal been unclosed as of the sea that holds the flood :
Thus let etc. :

Whitney's Translation—

Unfastened (be) thy bladder-orifice, like that of water-holding sea.
So be thy etc.

३२—यथेषुका परापतदवसृष्टाधिधन्वनः । एवाते मूत्रं मुच्यतां बहि र्बालिति सर्वकम् ॥ ९ ॥

अज्ञाता इषुः इषुका । **अधिधन्वनः**-आनतज्याद् धनुषः सकाशाद् **अवसृष्टा**-विमुक्ता सती **यथा**-येन प्रकारेण परापतत् **परापतति**-अनिरुद्धवेगा शीघ्रं लक्ष्योद्देशं गच्छति । **एव**-एवम् । शेषं पूर्ववत् ॥ अथर्व १।३।९ ॥

Griffith's Translation—

Even as the arrow flies away when loosened from the archer's bow,
Thus let the burthen be discharged from channels that are checked no more.

Whitney's Translation—

As the arrow flew forth let loose from the bow—So be thy etc., etc.

३३—अमूर्या यान्ति योषितो हिरा लोहितवाससः । अभ्रातर इव जामयस्तिष्ठन्तु हतवर्चसः ॥ १ ॥

योषितः—स्त्रियः संबन्धिन्यः **अमूः**—एताः पुरतो दृश्यमानाः **लोहितवाससः**—लोहितवर्णवस्त्राः । लोहितवर्णा इत्यर्थः । यद्वा लोहितस्य रुधिरस्य निवासभूताः, ईदृश्यो या हिराः सिराः रजोवहननाड्यः **यान्ति**—गच्छन्ति । व्याधिवशात् सर्वदा प्रवहन्तीत्यर्थः । ताः सिराः क्रियमाणेन अनेन भैषज्यकर्मणा **हतवर्चसः**—हततेजस्काः प्रणष्टरोगवीर्याः सत्यः तिष्ठन्तु स्थेयासुः । मा प्रवाक्षुरित्यर्थः । तत्र दृष्टान्तः । **अभ्रातर इव** न विद्यन्ते भ्रातरो यासां ता अभ्रातरः । यथा अभ्रातृकाः जामयः भगिन्यः ता यत उत्पन्नास्तत्रैव पितृकुले सन्तानकर्मणे पिण्डदानाय च तिष्ठन्ति तद्वद् इत्यर्थः ॥१॥

अ० वे० १।१७।१

Griffith's Translation—

Those maidens there, the veins, who run their course in robes of ruddy blues,
Must now stand quiet, reft of powers, like sisters who are brotherless.

Whitney's Translation—

You women (Yośit) that go, veins with red garments, like brotherless sisters, (Jami)—let them stop with their splendour smitten.

३४—तिष्ठाऽवरे तिष्ठऽपर उत त्वं तिष्ठ मध्यमे। कनिष्ठिका च तिष्ठति तिष्ठादिद्धमनिर्मही ॥२॥

इदानीं धमनीः प्रार्थ्यन्ते। हे अवरे-शरीरस्य अधोभागवर्तिनि सिरे त्वं तिष्ठ शस्त्रादिनिपातजनितरुधिरस्रावात् निवृत्ता भव। तथा हे परे-ऊर्ध्वाङ्गवर्तिनि सिरे त्वमपि तिष्ठ—। उत अपि च हे मध्यमे। मध्ये भवा मध्यमा। शरीरस्य मध्यभागवर्तिनि सिरे त्वमपि तिष्ठ। पूर्वार्धे प्रत्यक्षेण धमनीनां स्थानभेदभिन्नानां प्रार्थना कृता। अधुना परिमाणतो भिन्नानां तासामेव पारोक्ष्ये प्रार्थना क्रियते। कनिष्ठिका सूक्ष्मतरा च नाडी तिष्ठति। तत्र यत्नविशेषो न कर्तव्य इत्यर्थः। अस्मिन् पक्षे चकारः स्वर्थे। यद्वा पञ्चमलकारोऽयम्। कनिष्ठिका च तिष्ठतु महती चेति। मही महती स्थूलतरा धमनिः सिरा तिष्ठादित् तिष्ठत्येव। अनेन प्रयोगेण निवृत्तरुधिरस्रावा अवतिष्ठताम्॥ २॥

Griffith's Translation—

Stay still, thou upper vein, stay still, thou lower, stay thou midmost one,
The smallest one of all stands still, let the great vessel e'en be still.

Whitney's Translation—

Stop, lower one ! stop upper one ! do thou too stop midmost one ! if smallest stops, shall stop for sooth the great tube (Dhamani).

३५—शतस्य धमनीनां सहस्रस्य हिराणाम्। अस्थुरिन्मध्यमा इमाः साकमन्ता अरंसत ॥ ३ ॥

शतस्य-शतसंख्यानाम् धमनीनां हृदयगतानां प्रधाननाडीनाम्। तथाच मुण्डकोपनिषदि अग्रे समाम्नायते। "शतं चैका च हृदयस्य नाड्यस्तासां मूर्धानम् अभिनिःसृतैका" (क. उ. ६-१६) इति। तथा सहस्रस्य-सहस्रसंख्याकानां हिराणां-सिराणां शाखानाडीनाम्। सहस्रशब्दस्य अपरिमितपर्यायत्वात् श्रुतिप्रसिद्धानां सर्वासां शाखानाडीनाम् एतद् उपलक्षणम्। तथा च प्रश्नोपनिषदि वक्ष्यति। "अत्रैतद् एकशतं नाडीनां तासां द्वासप्तति द्वासप्तति प्रति शाखानाडीसहस्राण्यासु व्यानश्चरति" (प्र. उ. ३-६) इति। आचार्यैरपि प्राधान्यविवक्षया काश्चन नाड्यः परिगणिताः—

मध्यस्थायाः सुषुम्णायाः पर्वपञ्चकसम्भवाः। शाखोपशाखतां प्राप्ताः सिरा लक्षत्रयात्परम्॥
अर्धलक्षं इति प्राहुः शरीरार्थविचारकाः॥ इति।

तासां उभयविधानां नाडीनां मध्यमाः मध्ये भवाः इमाः पूर्वं व्याधिवशात् स्रवन्त्यो नाड्यः अस्थुरित्-इच्छब्दः अवधारणे अतिष्ठन्नेव अधुना मन्त्रप्रभावात् निवृत्तरुधिरस्रावा भवन्त्येवेत्यर्थः। अतः परं निवृत्तरुधिरस्रावाभिर्नाडीभिः साकम्-सार्धम् अन्ताः-अन्तिमाः अवशिष्टाः सर्वा नाड्यः अरंसत-यथा पूर्वं रमन्ते स्म ॥ ३ ॥

Griffith's Translation—

Among the thousand vessels charged with blood, among a thousand veins,
Even these the middlemost stand still and their extremities have rest.

Whitney's Translation—

Of the thousand tubes, of the thousand viens, have stopped for sooth.
These midmost ones : the end have rested (ram) together.

३६—परिवः सिकतावती धनूर्बृहत्यक्रमीत्। तिष्ठते लयता सु कम् ॥ ४ ॥

हे नाड्यः वः-युष्मान्। सिकतावती-सिकताः रजांसि तद्वती तदाधारभूता नाडी। यद्वा अश्मर्याख्यो व्याधिविशेषो यस्माद् उत्पद्यते सा नाडी सिकतावती। धनूः-धनुर्वद् वक्रो मूत्राशयो नाडीविशेषः। स्मर्यतेहि—

मूत्राशयो धनुर्वक्रो वस्तिरित्यभिधीयते ॥ इति ॥

तथा बृहती=महती । उक्ता सा नाडी पर्यक्रमीत्=परितो व्याप्नोत् । सर्वान् रुधिरप्रवहणमार्गान् निरुध्य वर्तत इत्यर्थः । अस्माद्धेतोः हे नाड्यो यूयं तिष्ठत=निवृत्तस्रावा भवत । कम्=सुखम् अस्य जनस्य सु=सुष्ठु इलयत=प्रेरयत । स्रावव्याधिविनिर्मुक्ताः सुखं प्रयच्छतेत्यर्थः ॥ ४ ॥

(G) A mighty rampart built of sand hath circled and encompassed you:
Be still and quietly take rest.

(W) About you hath gone (Kram) a great gravelly sand-bank (Dhanu); stop (and) be quiet, I pray (Sukam).

अथ हृद्रोगकामलादिरोगनिवर्त्तकं सूक्तम् ॥

पञ्चमे अनुवाके सप्त सूक्तानि । तत्र "अनुसूर्यम्" इत्येतत् प्रथमं सूक्तम् । तेन हृद्रोगकामलादिरोगोपशान्तये रक्तवृषभरोममिश्रोदकं पाययेत् । तथा तेनैव रक्तगोचर्मच्छिद्रमाणि गोक्षीरे प्रक्षिप्य सम्पात्य अभिमन्त्र्य तन्मणिबन्धनम् तत्क्षीरपानञ्च कारयेत् । तथा रोहिणं हरिद्रौदनं भोजयित्वा तदुच्छिष्टानुच्छिष्टेन आप्रपद प्रलिप्य खट्वायाम् उपवेश्य तदधः शुककाष्ठशुकगोपीतनकाख्यानाम् त्रयाणां पक्षिणां सव्यजङ्घाया हरितसूत्रेण आबन्धनम् इत्येवमादिकं सूत्रोक्तं कुर्यात् । सूत्रं च—" अनुसूर्यमिति मन्त्रोक्तस्य लोममिश्रम् आचामयति० " इत्यादि " जातरूपेण०–पिधाप्य बध्नाति " इत्यन्तम् (कौ० ४–२)"

३७—अनुसूर्यमुदयतां हृद्द्योतोहरिमा च ते । गो रोहितस्य वर्णेन तेन त्वा परि दध्मसि ॥ १ ॥

हे व्याधितपुरुष ते=तव हृद्द्योतः=हृदयं द्योतयति दीपयति संतापयतीति हृद्द्योतः हृद्रोगः यद्वा हृद्रोगजनितः सन्तापो हृद्द्योतः । तथा हरिमकामिलादिरोगजनितः शारीरो हरिद्वर्णः । व्याधिद्वयमपि सूर्यम् गच्छन्तं भानुं अनु=लक्षीकृत्य उदयताम् । उद्गच्छतु । उक्तः सन्तापो हरिद्वर्णश्च अस्माच्छरीरादुत्क्रम्य सन्तापकं हरिद्वर्णं सूर्यमेव प्राप्नोतु इत्यर्थः । अनभिमतरोगजनितवर्णाऽपगमानन्तरम् इष्टवर्णसंयोजनमाह=गोरिति रोहितस्य लोहितवर्णस्य गोः गोजातीयस्य वर्णेन लौहित्येन तेन प्रसिद्धेन तस्मात् पृथक् कृतेन हे रुग्ण त्वा=त्वां परिदध्मसि=परिदध्मः आच्छादयामः तव शरीरं प्रकृष्टवर्णोपेतं कुर्म इत्यर्थः । अथर्व० १।२२।१

(G) As the Sun rises let thy sore disease and yellowness depart.
We compass and surround thee with the colour of a ruddy ox.

(W) Let them (both) go up toward the sun, thy heart-burn (dyota) and yellowness; with the colour of the red bull, with that we enclose (paridhā) thee.

३८—परि त्वा रोहितै र्वर्णै र्दीर्घायुत्वाय दध्मसि । यथायमरपा असदथो अहरितो भुवत् ॥ २ ॥

उक्तमेव लोहितवर्णपरिधानफलप्रकटनार्थं पुनराह—हे व्याधित त्वा=त्वां रोहितैः लोहितैर्वर्णैः प्रागुक्तै गोसम्बन्धिभिः परि दध्मसि=परिदध्मः । किमर्थम् इति तदाह । दीर्घायुत्वाय=दीर्घं शतसंवत्सरपरिमितं आयुर्जीवनकालो यस्याऽसौ दीर्घायुः । तस्य भावस्तत्त्वम् । तदेव कथम् इत्यत आह । यथा=येन प्रकारेण अयम् चिकित्सितः पुरुषः अरपाः=रप इति पापनाम । अपगतपापः असत्=भवेत् । अथो पापक्षयानन्तरमेव अहरितः=कामिलादिरोगजनितहरिद्वर्णरहितः भुवत्=भवेत् । रोगनिदानभूतपापक्षये सति तच्छान्तौ सत्याम् यथा दीर्घायुर्भवति तथा परिदध्म इति वाक्यार्थः ॥ २ ॥

(G) With ruddy hues we compass thee that thou mayest live a lengthened life:
So that this man be free from harm, and cast his yellow tint away.

(W) With red colours we enclose thee, in order to length of life; that this man may be free from complaints (-rapas), also may become not yellow.

३९—या रोहिणी देवत्या३ गावो या उत रोहिणीः । रूपंरूपं वयोवयस्ताभिष्ट्वा परि दध्मसि ॥ ३॥

देवत्याः=देवतासु भवाः । देवसम्बन्धिन्यो रोहिणीः=रोहिण्यः लोहितवर्णाः । उच्चवर्णा याः कामधेन्वादयो गावः सन्ति । उत=अपि च याः मनुष्यसम्बन्धिन्यो रोहिणी=रोहिण्यः लोहितवर्णा गावः सन्ति ताभिः उभयविधाभिः गोभिः रूपंरूपं सर्वगोव्यक्तिगतं कृत्स्नम् अवयवरूपं तथा वयोवयः=सर्वव्यक्तिगतं कृत्स्नं यौवनम् । तत्सर्वम् आहृत्य हे रुग्ण त्वा=त्वां परिदध्मसि=परिदध्मः । गोगतवर्णवद् उज्ज्वलवर्णं वयोविशेषं त्वदीय शरीरे संयोजयाम इत्यर्थः । यद्वा । ताभिः उक्तवर्णोपेताभिर्गोभिः हे रुग्ण त्वां परिदध्मसि । परिधानप्रकारभेदमाह । रूपंरूपम् रोगविशेषदूषितं सर्वशरीरगतं रूपं वयोवयः=उक्तप्रकारं वयश्च परिदध्मसि । अथर्व० १।२२।३

(G) Devatyas that are red of hue, yea, and the ruddy-coloured kine,
Each several form, each several age,—with these we compass thee about.

(W) They that have the red one for divinity, and the kine that are red—form after form, vigour (Vayas) after vigour, with them we enclose thee.

४०—शुकेषु ते हरिमाणं रोपणाकासु दध्मसि । अथो हारिद्रवेषु ते हरिमाणं नि दध्मसि ॥ ४ ॥

पूर्वं गवादिगतस्य उज्ज्वलस्य रक्तवर्णस्य रुग्णशरीरे प्रवेशोऽभिहितः । तच्छरीरे पूर्वम् अवस्थितस्य रोगजनितस्य हरिद्वर्णस्य का तर्हि गतिरिति तदुच्यते । हे रोगार्त ते=तव शरीरगतं हरिमाणम्=रोगजनितं हरिद्वर्णम् । तद्वर्णं शुकेषु-कीरेषु तथा रोपणाकासु=काष्ठशुकाऽऽख्येषु हरिद्वर्णेषु पक्षिषु निदध्मसि=निदध्मः । वर्णतः समानाकृतिषु पक्षिविशेषेषु स्थापयाम इत्यर्थः । अथो=अपि च हारिद्रवेषु गोपीतनकाख्येषु हरिद्वर्णेषु पक्षिविशेषेषु ते=त्वदीयं हरिमाणं-हरिद्वर्णं निदध्मसि=निदध्मः स्थापयामः । अथर्व० १।२२।४ ऋ० १।५०।१२। पाठभेदेन

(G) To parrots and to starlings we transfer thy sickly yellowness:
Now in the yellow-coloured birds we lay this yellowness of thine.

(W) In the parrots, in the ropanākās, we put thy yellowness; likewise in the hāridravas we deposit thy yellowness.

अथ श्वेतकुष्ठपलितादिनाशनाय सूक्तम् ॥

"नक्तं जाता" "सुपर्णो जातः" इति सूक्तद्वयेन श्वेतकुष्ठाऽपनोदाय भृङ्गराजहरिद्रेन्द्रवारुणीनीलिकाः पिष्ट्वा शुष्कगोमयेन श्वित्रप्रदेशम् आलोहितदर्शनं प्रघृष्य लेपयेत् । पलितनाशनेऽपि पलितानि आच्छिद्य सूक्तद्वयेन पूर्ववद् विलिम्पेत् । उक्तरोगद्वयशान्तये अनेनैव सूक्तद्वयेन आज्यहोमादीनि मारुतकर्माणि च शुष्ककर्मोक्तवत् । सूत्रितं च । "नक्तं जाता (१।२३) सुपर्णो जातः (१।२४) इति मन्त्रोक्तं शकृता आलोहितं घृष्य आलिम्पति पलितान्याच्छिद्य मारुतान्यपिहिताः" इति (कौ. ४. २.)

४१—नक्तं जातास्योषधे रामे कृष्णे असिक्नि च । इदं रजनि रजय किलासं पलितं च यत् ॥१॥

हे ओषधे-ओषः फलपाकः अस्यां धीयत इति ओषधिः । हे ओषधे हरिद्राख्ये त्वं नक्तं—रात्रौ जाता-उत्पन्ना असि-भवसि । अतस्त्वं श्वैत्यनिवर्तनेन कार्ष्ण्यं आपादयितुं शक्ता भवसीत्यर्थः । तथा हे रामे-तथा हे कृष्णे-कृष्णवर्णे-कृष्णवर्णोपादिके वा इन्द्रवारुणि हे असिक्नि असितवर्णे असितवर्णाऽऽपादिके वा नीलि । एवं ओषधिनामकेन निर्दिष्टया [illegible] अत्र [illegible] त्वं नक्तं जातासि [illegible] ते रजनी । हे रामाद्योषधे स्वम् इदम् [illegible] म् आह । किलासः-कुष्ठरोगः । स [illegible] । ईदृशं यद् अङ्गम् अस्ति इति पूर्वेण सम्बन्धः । अथर्व का० १।२३।१

(G) O Plant, thou sprangest up at night, dusky, dark-coloured, black in hue!
So, Rajani, re-colour thou these ashy spots, this leprosy.

(W) Night-born art thou, O herb, O dark, black (and) dusky one; O colourer (Rajani) do thou colour this leprous spot and what is pale (palita).

४२—किलासं च पलितं च निरितो नाशया पृषत्। आ त्वा स्वो विशतां वर्णः परा शुक्लानि पातय॥२॥

किलासम् पलितम् उक्तलक्षणम्। परस्परसमुच्चयार्थौ चकारौ। इतः=अस्मात् व्याधिदूषितात् शरीरात् पृथक्= पृथक्कृत्य हे ओषधे त्वं निर्णाशय=निरवशेषं घातय। अनन्तरम् हे व्रण त्वा=त्वां स्वः=स्वकीयः प्राग् अवस्थितो वर्णः लौहित्यादिरूपः आ विशताम् प्रविशताम्। शौक्ल्यस्य पुनरुद्भवपरिहाराय आह। शुक्लानि=शरीरकेशगतशुक्ल-रूपाणि परापातय=पराचीनं दूरं प्रेरय। यथा पुनरेनं पुरुषं न स्पृशन्ति तथा कुरु इत्यर्थः॥ अथर्व० १।२३।२॥

(G) Expel the leprosy, remove from him the spots and ashy hue:
Let thine own colour come to thee; drive far away the specks of white.

(W) The leprous spot, what is pale, do thou cause to disappear from hence, the speckled; let thine own colour enter thee; make white things (śukla) fly away.

४३—असितं ते प्रलयनमास्थानमसितं तव। असिक्न्यस्योषधे निरितो नाशया पृषत्॥ ३॥

अनया नीलीमेव अवयुत्य प्रार्थयते। हे नीलि ते=तव प्रलयनम्=प्रकर्षेण लीयते संश्लिष्यते अत्रेति प्रलयनम् उत्पत्तिस्थानम् असितम्=कृष्णवर्णं भवति। तथा तव आस्थानम्=प्रक्षेपणभाजनादिरूपमसितं=कृष्णं भवति कुत एतद् इत्यत आह। हे ओषधे=नीलि त्वं असिक्नी=असितवर्णा असि=भवसि। यतस्तव अयं स्वभावः अतः इतः=अस्मात् श्वित्रादिरोगदूषिताङ्गात् आलेपादिना त्वत्सम्बन्धात् पृथक् किलासं पलितं च पृथक् कृत्य निर्णाशय-निःशेषेण विनष्टं कुरु॥ अथर्व० १।२३।३॥

(G) Dark is the place of thy repose, dark is the place thou dwellest in:
Dusky and dark, O Plant, art thou: remove from him each speck and spot.

(W) Dusky is thy hiding-place, dusky thy station (āsthāna), dusky art thou, O herb; make the speckled disappear from hence.

४४—अस्थिजस्य किलासस्य तनूजस्य च यत् त्वचि। दूष्याकृतस्य ब्रह्मणा लक्ष्म श्वेतमनीनशम्॥

अनया अस्थ्यादिधातुगतस्य उत्साद्यस्य किलासस्यैव निवृत्तिम् आह। अस्थिजस्य तथा तनूजस्य। अत्र तनू-शब्देन त्वगस्थ्नोर्मध्यवर्ती मांसधातुः उच्यते। तस्माद् यज्जातं तस्य। तथा त्वचि त्वग्धातौ यद् वर्तमानं तस्य सर्वस्य किलासस्य कुष्ठव्याधेः तथा दूष्या=दूषयति प्राणिनं हिनस्तीति दूषिः शत्रूत्पादिता कृत्या। तया कृतस्य उत्पादितस्य च किलासस्य लक्ष्म=लक्ष्मभूतं चिह्नं श्वेतं शरीरावयवगतं श्वैत्यम्। ब्रह्मणा=अनेन प्रयुज्यमानेन मन्त्रेण अनीनशम् नाशितवान् अस्मि॥ अथर्व० १।२३।४॥

(G) I with my spell have chased away the pallid sign of leprosy.
Caused by infection, on the skin, sprung from the body, from the bones.

(W) Of the bone-born leprous spot, and of the body-born that is in the skin, of that made by the spoiler (dushi)-by incantation have I made the white (s'veta) mark disa----

" सुपर्णो जातः " इति सूक्तस्य पूर्वसूक्तेन सह उक्तो विनियोगः

४५—सुपर्णो जातः प्रथमस्तस्य त्वं पित्तमासिथ । तदासुरी युधा जिता रूपं चक्रे वनस्पतीन् ॥ १ ॥

अस्य औषधस्य वीर्यातिशयं प्रकटयितुं आख्यायिकया उत्पत्तिम् आह सुपर्णः=शोभनपक्षोपेतो गरुत्मान् । प्रथमः=आदिभूतः सन् जातः=उत्पन्नः । हे नील्याद्योषधे त्वं तस्य=गरुत्मतः पित्तम्=शरीरगतः पित्ताख्यो दोषः अथवा धातुः आसिथ=पूर्वं बभूविथ । तत्=तथाविधं पित्तम् आसुरी=असुराणां माया कापि स्त्री । सा युधा=युद्धेन सुपर्णेन सह संग्रामं कृत्वा जिता=जितवती । जयेन लब्धं तत् पित्तं रूपं चक्रे=आत्मनो पद्धाननाम् आकारम् अकार्षीत् । तदेव रूपमाह । वनस्पतीन्=नील्यादीन् । एवेषां नील्यादीनां सुपर्णपित्तकार्यत्वप्रतिपादनेन अमोघवीर्यत्वम् उक्तं भवति ॥ १ ॥ अथर्व १।२४।१

(G) First, before all, the strong-winged Bird was born; thou wast the gall thereof. Conquered in fight, the Asuri took then the shape and form of plants.

(W) The eagle (suparna) was born first; of it thou wast the gall; then the Asura-woman, conquered by fight (yúdh), took shape as forest-trees.

४६—आसुरी चक्रे प्रथमेदं किलासभेषजमिदं किलासनाशनम् । अनीनशत् किलासं सरूपामकरत्त्वचम्

आसुरी=पूर्वमन्त्रोक्ता असुरमायारूपा स्त्री प्रथमा श्वित्रचिकित्सकानां आदिभूता सती इदं सुपर्णपित्तेन निर्मितं नील्यादिकं किलासभेषजम् किलासस्य श्वित्रस्य निवर्तकम् औषधम् चक्रे=कृतवती । अतः इदम्=नील्यादिकं इदानीमपि लोके किलासनाशनम्=किलासस्य रोगस्य निवर्तकं भवति तद्=नील्याद्यौषधं प्रयुज्यमानं सत् किलासम् श्वित्ररोगम् अनीनशत्=नाशयति स्म । तथा त्वचम्=त्वग्धातुं श्वित्रदूषितां सरूपाम्=समानरूपाम् श्वित्ररहितत्वचा समानवर्णाम् अकरत्=अकार्षीत् ॥ अथर्व० १।२४।२ ॥

(G) The Asuri made, first of all, this medicine for leprosy, this banisher of leprosy. She banished of leprosy, and gave one general colour to the skin.

(W) The Asura-woman first made this remedy for leprous spot, this effacer of leprous spot; it has made the leprous spot disappear, has made the skin uniform (sarúpa).

४७—सरूपा नाम ते माता सरूपो नाम ते पिता । सरूपकृत् त्वमोषधे सा सरूपमिदं कृधि ॥ ३ ॥

हे ओषधे ते=तव माता=जननी भूमिः सरूपा=त्वया समानरूपा कृष्णवर्णैव । तथा ते=तव पिता=द्यौः । "द्यौः पिता पृथिवी माता" (तै. ब्रा. ३-७-५-४) इति हि निगमः । बीजविशेषो वा पितृशब्देन विवक्षितः सोऽपि सरूपः=समानवर्णः । उभयत्राऽपि नामशब्दः प्रसिद्धिपरः । हे ओषधे=नील्यादिरूपे त्वम् सरूपकृत्=स्वसंसृष्ट पदार्थम् आत्मना समानवर्णं करोति सा सरूपकृत् । तादृश्यसि । सा समानरूपमातापितृजाता त्वम् इदम् श्वित्ररोगदूषितम् अङ्गं सरूपं कृधि=त्वया समानवर्णं कुरु । अथर्व० १।२४।३

(G) One-coloured is thy mother's name, One-coloured is thy father called: One-colour maker, Plant ! art thou: give thou one colour to this man.

(W) Uniform by name is thy mother; uniform by name is thy father; uniform making art thou, O herb; (so) do thou make this uniform.

४८—श्यामा सरूपङ्करणी पृथिव्या अध्युद्भृता । इदं सु प्रसाधय पुना रूपाणि कल्पय ॥ ४ ॥

श्यामा=श्यामवर्णा सरूपङ्करणी=तादृशी त्व पृथिव्या अधिभूमेरुपरि उद्भृता आसुर्या मायया उत्पादिता । अतः कारणात् हे ओषधे त्वम् इदम्=किलासाक्रान्तम् अङ्गं सु प्रसाधय=सुष्ठु रोगविनिर्मुक्तं कुरु तथा रूपाणि व्याधिसम्भवात् पूर्वम् अवस्थितानि पुनः=व्याधिनिबर्हणानन्तरमपि कल्पय=संपादय ॥ अथर्व० १।२४।४

(G) Syāmā who gives one general hue was formed and fashioned from the earth: Further this work efficiently. Restore the colours that were his.

(W) The swarthy, uniform-making one (is) brought up off the earth; do thou accomplish this, we pray; make the forms right again.

९—शं नो भवन्त्वाप ओषधयः शिवाः। इन्द्रस्य वज्रो अपहन्तु रक्षस आराद्विसृष्टा इषवः पतन्तु रक्षसाम्॥ ६ ॥

औषधार्थं प्रयुज्यमाना आपः ओषधयश्च शिवाः=सुखहेतवः सत्यः नः=अस्माकं शम्=रोगाणां शमनाय भवन्तु। रक्षसः=राक्षसान् रोगोत्पादकान् इन्द्रस्य वज्रः अपहन्तु=हिनस्तु। विसृष्टा=मनुष्याणां पीडनाय प्रयुक्ता रक्षसाम् इषवः=रोगादिरूपा आरात्=अस्मत्तो दूरे पतन्तु ॥ अथर्व २।३।६॥

(G) Bless us the Waters ! be the Plants auspicious !
May Indra's thunderbolt drive off the demons. Far from us fall the shafts they shoot against us.

(W) Weal be to us the waters, propitious the herbs; let Indra's thunderbolt smite away the demoniacs (Rakshas); far away let the discharged arrows of the demoniacs fly.

"अक्षीभ्याम्" इतिसूक्तेन अक्षिनासाकर्णशिरोजिह्वाग्रीवादिसर्वाऽवयवजरोगभैषज्यकर्मणि बाह्वादिपर्वसु बद्धं व्याधितं सम्पातितोदकेन पर्वग्रन्थीन् विमुच्य अवसिञ्चेत्। सूत्रितं हि। "अक्षीभ्यां त इति विवर्हम् उदपात्रेण संपातवताऽवसिञ्चति" इति (कौ. ४-२)॥

तथा अस्य सूक्तस्य अंहोलिङ्गगणे पाठात् तस्य गणस्य यत्र यत्र सर्वरोगभैषज्यादिषु विनियोग उक्तस्तत्र सर्वत्र अस्य विनियोगोऽनुसंधेयः। सूत्रितं हि—"औषधिवनस्पतीनाम् अनुक्तान्यप्रतिषिद्धानि भैषज्यानाम् अंहोलिङ्गाभिः"इति (कौ. ४-८) अत्र अक्षीभ्यांते (२-३३) मुञ्चामि त्वा (३-११) उत देवाः (४-१३) आवतस्ते (५-३०) शीर्षक्तिम् (९-५) इति पञ्चप्रतीको गणो विवक्षितः।

तथैव अश्वमेधादिषु दीक्षावतो यजमानस्य भैषज्यकर्मणि एतत् सूक्तं विनियुक्तं वैताने। "अथ भैषज्याय यजमानम् अक्षीभ्यां ते मुञ्चामि त्वा" इति (वै. ७-२)

१०—अक्षीभ्यां ते नासिकाभ्यां कर्णाभ्यां छुबुकादधि। यक्ष्मं शीर्षण्यं मस्तिष्काज्जिह्वाया विवृहामि ते॥१॥

हे यक्ष्मगृहीत ते=तव अक्षीभ्याम्=चक्षुर्भ्यां यक्ष्मम्=रोगं विवृहामि=उद्धरामि विश्लेषयामीत्यर्थः। तथा नासिकाभ्यां=घ्राणेन्द्रियाऽधिष्ठानाभ्यां कर्णाभ्याम्=श्रोत्राभ्यां च छुबुकाद्=ओष्ठस्याधः प्रदेशाच्च। अधिः अनर्थकः। अपि च शीर्षण्यम्=शिरसि भवो रोगः शीर्षण्यः। ईदृशं यक्ष्मं रोगं ते=तव मस्तिष्कात्=शिरसोऽन्तरवस्थितो मांसविशेषो मस्तिष्कः तस्मात् जिह्वाया=रसनायाश्च सकाशाद् विवृहामि=उद्धरामि पृथक् करोमीत्यर्थः ॥ अथर्व॰ २।३३।१ ऋ॰ वे. १०।१६३।१ इत्यत्राप्येषर्क् वर्तते।

(G) From both thy nostrils, from both eyes, from both thine ears, and from thy chin,
Forth from thy brain and tongue I root Consumption seated in thy head.

(W) Forth from thy (two) eyes, (two) nostrils, (two) ears, chin, brain, tongue, I eject (vi-vṛu) for thee the yakshma of the head;

ग्रीवाभ्यस्त उष्णिहाभ्यः कीकसाभ्यो अनूक्यात्। यक्ष्मं दोषण्य १ मंसाभ्यां बाहुभ्यां विवृहामि ते ॥२॥

हे व्याधिगृहीत ते=तव ग्रीवाभ्यः । अत्र ग्रीवाशब्देन तदवयवभूतानि चतुर्दश सूक्ष्माण्यस्थीनि उच्यन्ते बहुवचननिर्देशात् । तद् उक्तं शतपथब्राह्मणे । " ग्रीवाः पञ्चदशः । चतुर्दश वा एतासां करूकराणि वीर्यं पञ्चदशम् । तस्माद् एताभि रण्वीभिः सतीभि गुरुं भारं हरति " (श. ब्रा. १२-२-४-१०) इति । ताभ्यो यक्ष्मं विवृहामि इति उत्तरत्र सम्बन्धः । तथा उष्णिहाभ्यः=ऊर्ध्वं स्निग्धाभ्यः रक्तादिना उत्स्नाताभ्यो वा नाडीभ्यः तद् उक्तं यास्केन उष्णिग् उत्स्नाता भवति स्निह्यतेर्वा स्यात् कान्तिकर्मणः इति (नि. ७-१२) । उष्णिगेव उष्णिहा । तथा चाऽपि अन्यत्र श्रूयते । " उष्णिहा छन्दः " इति (तै. सं. ४-३-५-१ ।) " सयुग्वोष्णिहया सविता संबभूव " (ऋ. १०-१३०-४) इति च । अत्र प्रकरणाद् व्युत्पत्तिसामान्येन उष्णिहाशब्दो धमनीवाचकः । तथा **कीकसाभ्यः**=जत्रुवक्षोगताऽस्थिभ्यः । **अनूक्यात्** अनु क्रमेण उच्यन्ति समवयन्ति अस्थीनि अस्मिन्निति अनूक्यम् तत्सन्धिः तस्मात् । तथा च वाजसनेयकम् " अनूकं त्रयस्त्रिंशः । द्वात्रिंशद् वा एतस्य करूकराण्यनूके-त्रयस्त्रिंशम् " इति (श. ब्रा. १२-२-४-१४) । विवृहामीति सर्वत्र सम्बन्धः । तथा **दोषण्यम्**=दोष्णोर्भवम् । तथाविधं ते=त्वदीयं यक्ष्मम् रोगं **अंसाभ्यां**=बाहुशिरोभ्यां **बाहुभ्यां**=हस्ताभ्यां **विवृहामि**=उन्मूलयामि ॥ अथर्व० २।३३।२ (ऋ. वे. १०।१६३।२ इत्यत्राऽप्येषर्क् वर्तते ।)

(G) Forth from the neck and from the nape, from dorsal vertebrae and spine,
From arms and shoulder-blades I root Consumption seated in thine arms.

(W) From thy neck (grivâs), nape (ushnihãs), vertebrae (Kikasã), back-bone (two) shoulders, (two) fore-arms, I eject for thee the yakshma of the arms.

हृदयात्ते परि क्लोम्नो हलीक्ष्णात् पार्श्वाभ्याम्। यक्ष्मं मतस्नाभ्यां प्लीह्नो यक्नस्ते वि वृहामसि ॥३॥

हे रुग्ण ते=तव **हृदयात्**=हृदयपुण्डरीकाद् यक्ष्मं विवृहामसीति उत्तरत्र सम्बन्धः । तथा **परिक्लोम्नः**=हृदयसमीपस्थो मांसपिण्डविशेषः क्लोमा तस्मात् । **हलीक्ष्णात्**=एतत्संज्ञकात् तत्संबन्धात् मांसपिण्डविशेषात् । **पार्श्वाभ्यां** दक्षिणोत्तराभ्यां । **मतस्नाभ्यां**=उभयपार्श्वसम्बन्धाभ्यां वृक्याभ्यां तत्समीपस्थपित्ताधारपात्राभ्यां वा । **प्लीह्नः**=उदरपार्श्वस्थितात् श्येनपत्राकारात् मांसपिण्डात् यक्नः=हृदयसमीपस्थाद् एतत्संज्ञकात् कालखण्डात् । हे रुग्ण ते=त्वदीयं यक्ष्मं तेभ्योऽवयवेभ्यो विवृहामसि-विवृहामः ॥ अथर्व० २।३३।३

(G) Forth from thy heart & from thy lungs, from thy gall-bladder & thy sides,
From kidneys, spleen, and liver thy Consumption we eradicate.

(W) Forth from thy heart, lung (kloman), halıkshna, (two) sides, (two) matasnas, spleen, liver, we eject for thee the yakshma.

५३—आन्त्रेभ्यस्ते गुदाभ्यो वनिष्ठोरुदरादधि । यक्ष्मं कुक्षिभ्यां १प्लाशेर्नाभ्या वि वृहामि ते ॥ ४ ॥

हे यक्ष्मगृहीत ते=तव **आन्त्रेभ्यः**=पुरीतद्भ्यः **गुदाभ्यः**=एतत्संज्ञकाभ्यः आन्त्रसमीपस्थेभ्यो मलमूत्रप्रवहणमार्गेभ्यः **वनिष्ठोः**=स्थविरान्त्रात् **उदरात्**=एतत्सर्वाऽऽधारभूताज्जठरात् । **अधिः**=अनर्थकः । यक्ष्म वि वृहामि=नाशयामि । एतन्मन्त्रद्वयप्रतिपादितानाम् अवयवानाम् विभागो माध्यन्दिनब्राह्मणे सौत्रामण्यां यज्ञाङ्गैः पुरोडाशादिभिः सत्कार्यत्वेन स्पष्ट आम्नातः । " हृदयमेवास्यैन्द्रः पुरोडाशः । यकृत् सावित्रः । क्लोमा वारुणः । " " मतस्ने एवाऽस्याश्वत्थं च पात्रम् औदुम्बरं च । पित्तं नैयग्रोधम् । आन्त्राणि स्थाल्यः " । गुदा उपशयानि । श्येनपत्रे प्लीहा । आसन्दी नाभिः । कुम्भो वनिष्ठुः । प्लाशिः शतातृण्णा तद् यत् सा बहुधा वितृण्णा भवति तस्मात् प्लाशिर्बहुधा विकृत्तः " इति (श. ब्रा. १२-९-१-...) अथर्व० २।३३।४ (ऋ. वे. १०।१६३।३ इत्यत्राऽप्येषर्क् पाठभेदेन वर्तते) टि० १ कुम्भसादृश्येन उण्डुकोग्राह्यः । टि० शिश्नमूलनाड्यः प्लाशिरिति नहीधरभाष्यम् । उपान्त्रमिति केचिदाहुः । अथर्वणि प्लाशयः पर्वता इत्यत्र पर्वतसादृश्यात् प्लाशिः शतातृण्णा इति शतपथे व्याख्यातत्वाच्च फुप्फुसग्रहणमुचितम् । अ० २।३३।४

(G) From bowels and intestines, from the rectum and the belly, I
Extirpate thy Consumption, from flanks, navel, and mesentery.

(W) Forth from thine entrails, guts, rectum, belly, (two) paunches, plāśi, navel, I eject for thee the yakshma.

५४–ऊरुभ्यां ते अष्ठीवद्भ्यां 'पार्ष्णिभ्यां' प्रपदाभ्याम्। यक्ष्मं भसद्यं श्रोणिभ्यां भासदं भंससो वि वृहामि ते

हे रोगार्त ते=तव ऊरुभ्याम् अष्ठीवद्भ्यां=जानुभ्याम्। पार्ष्णिभ्यां=पादयोरपरभागाभ्यां प्रपदाभ्यां=पादाग्राभ्यां यक्ष्मम्। विवृहामीति सर्वत्र सम्बन्धः। तथा भसद्यम्=भसत् कटिप्रदेशः तत्र भवं यक्ष्मं रोगम् श्रोणिभ्याम्=कट्योरधरभागाभ्यां विवृहामि। एवं ते=त्वदीयं भासदम्=गुह्यप्रदेशभवम् रोगं भंससः=भासमानात् गुह्यस्थानात् विवृहामि ॥ अथर्व० २।३३।५ ॥ (ऋ० वे० १०।१६४।४ इत्यत्राऽप्येषर्क् पाठभेदेन वर्तते)

(G) Forth from thy thighs & from thy knees, heels & the foreparts of thy feet,
Forth from thy loins and hips, I draw Consumption settled in thy loins.

(W) From thine two thighs, knees, heels, front feet, hips, fundament (bhansas), I eject for thee the yakshma of the rump.

५५—अस्थिभ्यस्ते मज्जभ्यः स्नावभ्यो धमनिभ्यः। यक्ष्मं पाणिभ्यामङ्गुलिभ्यो नखेभ्यो विवृहामि ते॥६॥

भाष्यम्–अस्थिमज्जशब्दौ सर्वधातूपलक्षकौ। सूक्ष्माः सिराः स्नावशब्देन उच्यन्ते। धमनिशब्देन स्थूलाः। शिष्टं निगदसिद्धम्। अथर्व० २।३३।६

(G) Forth from thy marrows and thy bones, forth from thy tendons and thy veins
I banish thy Consumption, from thy hands, thy fingers, and thy nails.

(W) From thy bones, marrows, vessels, (two) hands, fingers, nails, I eject for thee the Yakshma.

५६-अङ्गे अङ्गे लोम्निलोम्नि यस्ते पर्वणिपर्वणि। यक्ष्मं त्वचस्यं तव यं कश्यपस्य विबर्हेण विष्वञ्चं विवृहामसि

इत्थं प्रसिद्धावयवेभ्यो रोगस्याऽपनोदनं प्रतिपाद्य अप्रसिद्धावयवेभ्योपि अपनोदनं प्रतिपाद्यते। हे रुग्ण ते=तव अङ्गेअङ्गे=अनुकेषु सर्वेष्ववयवेषु लोम्निलोम्नि=सर्वेषु रोमकूपेषु पर्वणिपर्वणि=सर्वेषु सन्धिषु यो यक्ष्मो जातः। तं यक्ष्मं विवृहामसीत्युत्तरत्र सम्बन्धः। तथा ते=तव त्वचस्यम्=त्वचि भवं यक्ष्मम्। वयं विवृहामः। सूक्तार्थम् उपसंहरति। विष्वञ्चम्=चक्षुरादिसर्वाऽवयवव्याप्तं रोगजातं कश्यपस्य महर्षे र्विबर्हेण=विवृहत्यनेनेति विबर्हं सूक्तम्। तेन वयं विवृहामसि=विवृहामः। मन्त्रद्रष्टुर्महर्षेः सङ्कीर्तनेन इदानीं प्रयुज्यमानस्यापि मन्त्रस्य अमोघवीर्यत्वं सूचितं भवति॥ अथर्व० २।३३।७ (ऋ० १०।१६४।६ इत्यत्राऽप्येषर्क्–पाठभेदेन वर्तते)

(G) In every member, every hair, in every joint wherein it lies,
We with exorcising spell of Kaśyapa drive far away Consumption settled in thy skin.

(W) What Yakshma is in thine every limb, every hair, every joint—the Yakshma of thy skin do we, with Kaśyapa's ejector (vibruha) eject away (viśvan).

५७–द्वाविमौ वातौ वात आसिन्धोरापरावतः। दक्षं ते अन्य आवातु पराऽन्यो वातु यद्रपः। ऋ० १०।१३७।२

इमौ–दृश्यमानौ द्वौ वातौ=पुरोवातः पश्चाद्वातश्च आसिन्धोः=आसमुद्रात् मर्यादायामाकारः यद्वा आपरावतः=समुद्रादपि यो दूरदेशः तं देशमवधीकृत्य वातः=गच्छतः। "वा" गतिगन्धनयोः आदादिकः। तयोर्वातयोः अन्य एकः हे स्तोतः ते=तव, दक्षं=बलं आवातु=आगमयतु अन्यश्च त्वदीयं यद्रपः=पापं, तत्परावातु=परागमयतु ॥ २ ॥

Two several winds are blowing here, from Sindhu, from a distant land.
May one breathe energy to thee, the other blow disease away.

५८—आ वात वाहि भेषजं वि वात वाहि यद्रपः । त्वं हि विश्वभेषजो देवानां दूत ईयसे ॥ ३ ॥

हे वात भेषजं=सुखं व्याध्युपशमनमौषधं वा आवाहि=आगमय हे वात यद्रपोऽस्मदीयं पापं तद्विवाहि=विगमय अस्मत्तो विश्लेषय त्वं हि खलु देवानां दूतः विश्वभेषजः=विश्वानि भेषजानि यस्मिन् बहुव्रीहौ विश्वं संज्ञायामिति पूर्वपदान्तोदात्तत्वं ईदृश सन् ईयसे=सततं गच्छसि ईङ्गतौ दैवादिकः श्यनो नित्वात् "ञ्नित्यादिर्नित्य" मित्याद्युदात्तत्वं । हि चेति निघातप्रतिषेधः ॥ ऋ॰१०।१३७।३ ॥

Hither, O Wind, blow healing balm, blow all disease away, thou Wind;
For thou who hast all medicine comest as envoy of the Gods.

५९—आ त्वा गमं शंतातिभिरथो अरिष्टतातिभिः । दक्षं ते भद्रमाभार्षं परा यक्ष्मं सुवामि ते ॥४॥

हे स्तोतः त्वा=त्वां शंतातिभिः=सुखकरैः अथो=अपि च अरिष्टतातिभिः=अहिंसाकरैश्च रक्षणैः आगमं=आगतवानस्मि "शिवशमरिष्टस्य करे" इति उभयत्र तातिल् प्रत्ययः "लितीति" प्रत्ययात्पूर्वस्योदात्तत्वं । अपि च भद्रं कल्याणं ते=तव दक्षं=बलं आभार्षं=आहार्षं वायुसकाशादानैषं तथा ते=तव यक्ष्मं रोगं च परासुवामि=विनाशयामि ।

I am come nigh to thee with balms to give thee rest and keep thee safe.
I bring thee blessed strength, I drive thy weakening malady away.

६०—त्रायन्तामिह देवास्त्रायन्तां मरुतां गणः । त्रायन्तां विश्वा भूतानि यथा यमरपा असत् ॥ ५

इहाऽस्मिन्देशे सर्वे देवाः त्रायन्तां=अस्मान् पालयन्तां तथा मरुतां गणः=संघः स त्रायन्तां विश्वा=विश्वानि सर्वाणि अन्यानि च भूतानि=भूतजातानि त्रायन्तां=अस्मान् रक्षन्तु यथा अयमस्मदीयः शरीरादि ररपा असत्=पापरहितो भवति तथेत्यर्थः रप इति पापनाम नञा बहुव्रीहौ "नञ् सुभ्या" मित्युत्तरपदान्तोदात्तत्वं असतेर्लेट्यडागमः यावद्यथाभ्यामिति निघाताऽभावः ॥ ऋ॰१०।१३७।५ ॥

Here let the Gods deliver him, the Maruts' band deliver him:
All things that be deliver him that he be freed from his disease.

६१—आप इद्वा उ भेषजीरापो अमीवचातनीः । आपः सर्वस्य भेषजीस्तास्ते कृण्वन्तु भेषजम् ॥६॥

आप इद्व—आप एव खलु भेषजीः=भेषजभूताः स्नानपानादिना सुखहेतवः यद्वा ओषधिरूपेण परिणता रोगोपशमनहेतवो भवन्ति केवलमामकेत्यादिना भेषजशब्दात् उदात्तनिवृत्तिस्वरेण ङीप् उदात्तत्वं "जसिवा छन्दसीति" पूर्वसवर्णदीर्घः यत एवमतः कारणात् आपः—अमीवचातनीः अमीवचातन्यः रोगाणां नाशयित्र्यो भवन्ति चातयति वधकर्मा किंच आपः=सर्वस्य प्राणिजातस्य भेषजी=भेषजभूता भवन्ति न कतिपयस्य तास्तथाविधा आपः ते=तव भेषजं कृण्वन्तु=कुर्वन्तु ॥ ऋ॰१०।१३७।६ ॥

The Waters have their healing power, the Waters drive disease away.
The Waters have a balm for all: let them make medicine for thee.

६२-हस्ताभ्यां दशशाखाभ्यां जिह्वा वाचः पुरोगवी । अनामयित्नुभ्यां त्वा ताभ्यां त्वोपस्पृशामसि ।७।

दशशाखाभ्यां=दशाङ्गुलयः शाखाभूता ययोस्तादृशाभ्यां प्रजापतेर्हस्ताभ्यां सृज्यमाना जिह्वा=रसना वाचः=शब्दस्य पुरोगवी=पुरतोगन्त्री जाता यत्र यत्र शब्दः तत्र सर्वत्र तस्य शब्दस्योच्चारणाय पुरतो व्याप्रियते इत्यर्थः । अनामयित्नुभ्यां=सम्यगारोग्यहेतुभ्यां ताभ्यां=हस्ताभ्यां हे स्तोतः त्वा=त्वां उपस्पृशामसि=उपस्पृशामः "इदन्तो मसिः" त्वेति पुनरुक्तिः पूरणार्था ॥ ऋ॰ १०।१३७।७ ॥

The tongue that leads the voice precedes. Then with our ten-fold branching hands,
With these two chasers of disease we stroke thee with a gentle touch.

६३—ब्रह्मणाऽग्निः संविदानो रक्षोहा बाधतामितः । अमीवा यस्ते गर्भं दुर्णामा योनिमाशये ॥ १ ॥

ब्रह्मणा=मन्त्रेण सह संविदानः ऐकमत्यं प्राप्तो रक्षोहा=रक्षसां हन्ता अग्निः इतः अस्मात् स्थानात् रांक्षसादिकं बाधतां हिनस्तु यो राक्षसः अमीवा रोगरूपः सन् ते तव गर्भमाशये आशेते "लोपस्त आत्मनेपदेष्विति" तलोपः हन्तुं प्राप्नोति, दुर्नामा आख्यो रोगः तद्रूपः सन् यश्च ते=तव योनिं रेतस आधानं गर्भस्थानं आशेते तं बाधतामित्यन्वयः ॥ ऋक्० १०।१६२।१

May Agni, yielding to our prayer, the Rakshas-slayer, drive away—
The malady of evil name that hath beset thy labouring womb.

६४—यस्ते गर्भममीवा दुर्णामा योनिमाशये। अग्निष्टं ब्रह्मणा सह निष्क्रव्यादमनीनशत् ॥ २ ॥

गतः पूर्वोऽर्धर्चः तं क्रव्यादं=मांसाशिनं रक्षसादिकं ब्रह्मणा=सहितोऽग्निः निःशेषेण अनीनशत्=नाशयतु ॥२॥

Agni, concurring in the prayer, drive off the eater of thy flesh,
The malady of evil name that hath attacked thy babe and womb.

६५—यस्ते हन्ति पतयन्तं निषत्स्नुं यः सरीसृपम्। जातं यस्ते जिघांसति तमितो नाशयामसि॥

हे योषित् ते=तव गर्भाशये पतयन्तं=पतन्तं रेतोरूपेण गच्छन्तं तदनन्तरं तत्र निषत्स्नुं=निषीदन्तञ्च गर्भं यो राक्षसादिर्हन्ति=हिनस्ति ततो मासत्रयादूर्ध्वं प्राप्तसर्वावयवं सरीसृपं=सर्पणशीलञ्च गर्भं यो हन्ति जातं=दशसु मासेषूत्पन्नं ते=तव शिशुं यो राक्षसादि जिघांसति=हन्तुमिच्छति तमितः=स्थानान्नाशयामसि=नाशयामः ॥ ३ ॥

That which destroys the sinking germ, the settled, moving embryo.
That which will kill the babe at birth—even this will we drive far away.

६६—यस्तऊरू विहरत्यन्तरादम्पती शये। योनिं यो अन्तरा रेह्नि तमितो नाशयामसि ॥ ४ ॥

हे योषित् ते=तव ऊरू=पादमूलौ यो राक्षसादि विहरति=गर्भघाताय विश्लिष्टौ करोति दंपती अन्तरा जायापत्योर्मध्ये गर्भहननार्थं यश्च शये=शेते यश्च योनिमन्तः प्रविश्य आरेह्नि=निषिक्तं रेतो जिह्वया आस्वादयति भक्षयतीत्यर्थः। लिह् आस्वादने आदादिकः कपिलकादित्वाल्लत्वविकल्पः तं=सर्वमितो=नाशयामः ॥ ऋक्० १०।१६२।४

That which divides thy legs that it may lie between the married pair,
That penetrates and licks thy side—even this will we exterminate.

६७—याभिः शचीभि र्वृषणा परावृजं प्रान्धं श्रोणं चक्षस एतवे कृथः।
याभि र्वर्तिकां ग्रसितामुमुञ्चतं ताभिरू षु ऊतिभिरश्विनागतम् ॥ ऋक्० १।११२।८

हे वृषणा=कामानां वर्षिताराचश्विनौ याभिः शचीभिः कर्मभिः प्रज्ञाभिर्वा परावृजं=एतन्नामकमृषिं पङ्गुं सन्तमपङ्गुमकुरुतम् तथा अन्धं=दृष्टिरहितं सन्तमृज्राश्वमृषिं चक्षसे=प्रकाशाय सम्यक् चक्षुषा दर्शनाय याभिरूतिभिः प्रकृथः प्रकर्षेण कुरुथः याभिश्च श्रोणं विगुणजानुकमेव सन्तमृषिं एतवे गन्तुं प्रकृथः प्रकर्षेण कृतवन्तौ अपिच याभिरूतिभिः वर्तिकां=चटकसदृशस्य पक्षिणः स्त्रियं ग्रसितां=वृकेण ग्रस्ता अमुञ्चतं=वृकास्यान्निर्मुक्तामकुरुतम् यास्कपक्षे तु वृकेण विवृतज्योतिष्केण सूर्येण याभिर्ग्रस्तां वर्तिकां प्रत्यहमावर्तमानामुषसं तस्मादमोचयतमिति योज्यम्। ताभिः सर्वाभिरूतिभिरस्मानप्यागच्छतम्। वृषणा 'वृष'सेचने 'कनिन्युवृषी' त्यादिना कनिन्। परावृजम्='वृजी'वर्जने परावृणक्ति तपसा पापं विनाशयतीति परावृक् क्विप् चेति क्विप् कृदुत्तरपदप्रकृतिस्वरत्वम्। एतवे 'तुमर्थेसेसेनिति' एतेस्तवेन्प्रत्ययः। कृथः डुकृञ् करणे बहुलं छन्दसीति विकरणस्य लुक्। ऋक्० १।११२।८

Mighty ones, with what powers ye gave Parāvrij aid what time ye made the blind and lame to see and walk;
Wherewith ye set at liberty the swallowed quail,—come hither unto us, O Aśvins, with those aids.

६८—जुजुरुषो नासत्योत वव्रिं प्रामुञ्चतं द्रापिमिव च्यवानात्।
प्रातिरतं जहितस्यायुर्दस्रादित्पतिमकृणुतं कनीनाम् ॥ ऋक्० १।११६।१०

अत्रेदमाख्यानम्—वलीपलितादिभिरुपेतो जीर्णाङ्गः पुत्रादिभिः परित्यक्तश्च्यवनाख्य ऋषिः अश्विनौ तुष्टाव स्तुताव-श्विनौ तस्मै ऋषये जरामपगमय्य पुन र्यौवनं अकुरुतामिति तदेतदाह—हे नासत्यावश्विनौ

च्यवानात्=च्यवनाख्यादृषेः सकाशात् वव्रिं=कृत्स्नं शरीरं आवृत्यावस्थितां जरां प्रामुञ्चतं=प्रकर्षेणामोचयतम् तत्र दृष्टान्तः—द्रापिमिव=द्रापिरिति कवचस्याख्या यथा कश्चित्कवचं कृत्स्नशरीरव्यापकं धृत्वा पश्चात् शरीरात् पृथक्करोति तद्वत्। उत=अपिच हे दस्रा=एतत्संज्ञौ दर्शनीयौ वाश्विनौ जहितस्य=पुत्रादिभिः परित्यक्तस्य तस्य आयुर्जीवनं प्रातिरतम्=प्रावर्धयतम् प्रपूर्वस्तिरतिर्वर्धनार्थः आदित्=अनन्तरमेव युवानं सन्तं कनीनां=कन्यानां पतिं=भर्तारं अकृणुतं=अकुरुतम्। जुजुरुषः 'जॄष्' वयोहानौ लिटः क्वसुः बहुलं छन्दसीत्युत्वम् द्विर्भावः पञ्चम्येकवचने वसोः संप्रसारणमिति सम्प्रसारणम् "शासिवसिघसीनाञ्चेति" षत्वम्। वव्रिं वृञ् वरणे आदृगमहनजन इति किः प्रत्ययः। जहितस्य "ओहाक्" त्यागे कर्मणि निष्ठा तस्य छन्दस्युभयथेति सार्वधातुकत्वाच्छ्लुः तस्य बहुलं छन्दसीति श्लुः जहातेश्चेतीत्वम्। कनीनाम् "ऋदेनेत् बहुलमिति" बहुलवचनात्कन्याशब्दस्याऽत्र सम्प्रसारणम् ॥ १० ॥

Ye from the old Chyavâna, O Nâsatyas, stripped as 'twere mail, the skin upon his body,

Lengthened his life when all had left him helpless, Dasras! and made him lord of youthful maidens.

६९—चरित्रं हि वेरिवाच्छेदि पर्णमाजा खेलस्य परितक्म्यायाम्। सद्यो जङ्घामायसीं विश्पलायै धने हिते सर्तवे प्रत्यधत्तम् ॥ ऋ० १।११६।१५

अगस्त्यपुरोहितः खेलो नाम राजा तस्य सम्बन्धिनी विश्पला नाम स्त्री सङ्ग्रामे शत्रुभिश्छिन्नपादासीत्। पुरोहितेनागस्त्येन स्तुतौ अश्विनौ रात्रावागत्य अयोमयं पादं समधत्ताम् तदेतदाह—आजा=आजौ सङ्ग्रामे अगस्त्यपुरोहितस्य खेलस्य सम्बन्धिन्या विश्पलाख्यायाः चरित्रं=चरणं वेरिव=वेः पक्षिणः पर्णं पतत्रमिव आच्छेदि हि पुराछिन्नमभूत्खलु हे अश्विनौ युवां अगस्त्येन स्तुतौ सन्तौ परितक्म्यायाम् परितक्म्या रात्रिः परित एनां तक्मेति यास्कः। एतामुभयतः सूर्यो गच्छतीति तस्यार्थः रात्रावागत्य सद्यस्तदानीमेव हि ते शत्रुषु निहिते धने जेतव्ये विषयभूते सति सर्तवे सर्तुं गन्तुं आयसीं अयोमयीं जङ्घां जङ्घोपलक्षितं पादं प्रत्यधत्तम् सन्धानमेकीकरणं कृतवन्तावित्यर्थः। चरित्रम् "अर्तिलूधूसूखनसहचर इत्र" इति करणे इत्रः। आजा=सुपांसुलुगिति विभक्तेर्डादेशः। आयसीम् अयःशब्दाद्विकारार्थे प्राणिरजतादिभ्योऽञ् टिड्ढाणञिति ङीप् ॥ १५ ॥

When in the time of night, in Khela's battle, a leg was severed like a wild bird's pinion,

Straight ye gave Vishpalâ a leg of iron that she might move what time the conflict opened.

७०—शतं मेषान्वृक्ये चक्षदानमृज्राश्वं तं पितान्धं चकार। तस्मा अक्षी नासत्या विचक्ष आधत्तं दस्रा भिषजावनर्वन् ॥ ऋ० १।११६।१६

वृषागिरः पुत्रो ऋज्राश्वो नाम राजर्षिः तस्य समीपे अश्विनो र्वाहनभूतो रासभो वृकीभूत्वावसत्स च तस्य आहारार्थं एकोत्तरं शतसङ्ख्यान् पौरजनानां स्वभूतान्मेषान् शकलीकृत्य प्रददौ ऋज्राश्वः शतमेकं च मेषानिति मन्त्रान्तरे दर्शनात्। एवं पौराणामहिते प्रवृत्तं पिता शापेन नेत्रहीनमकरोत् तेनस्तूयमानावश्विनौ अस्मद्वाहननिमित्तमस्यान्धता जातेति जानन्तौ तस्मै अक्षिणी प्रायच्छतामिति तदेतदाह—अत्र तच्छब्दश्रुतेर्यच्छब्दाध्याहारः य ऋज्राश्वः शतं=शतसङ्ख्याकान् मेषान् वृक्ये आत्मना पोषितायै वृक्स्त्रियै शकलीकृत्य प्रादात् तं चक्षदानं–क्षदतिरत्तिकर्मा अत्र शकलीकरणार्थः शकलीकृत्य दत्तवन्तं ऋज्राश्वं पिता शापेन अन्धं=दृष्टिहीनं चकार=कृतवान्। हे नासत्या=सत्यस्वभावौ सत्यस्य नेतारौ वा भिषजौ देवानां वैद्यभूतौ अश्विनौ वै देवानां भिषजाविति श्रुतेः। दस्रा=दर्शनीयौ एतत्सञ्ज्ञौ वा हे अश्विनौ अनर्वन्=अनर्वणौ द्रष्टव्यं प्रति पितृशापात् गमनरहिते अक्षी=चक्षुषी विचक्षे=विविधं द्रष्टुं समर्थे तस्मै ऋज्राश्वाय आधत्तं व्यधत्तं अकुरुतम्। वृक्ये वृकोरण्यश्वा तस्य स्त्री वृकी जातेरस्त्रीविषयादिति ङीष् "जसादिषु छन्दसि वा वचनमिति" चतुर्थ्येकवचनस्याऽऽङभावे यणादेशे "उदात्तस्वरितयो र्यणः" इति परस्यानुदात्तस्य स्वरितत्वम्। चक्षदानम् क्षदेर्लिटः कानच् चित्स्वरः। अक्षी ईच द्विवचने इति परत्वादक्षशब्दस्य ईकारान्तादेशः सचोदात्तः तस्मिन्कृते सकृद्गतौ विप्रतिषेध इति परिभाषया पुन र्नुम् न भवति। विचक्षे संपदादिलक्षणो भावे क्विप्। अनर्वन् ऋगतौ अस्मादन्येभ्योऽपि दृश्यन्त इति दृशिग्रहणस्य विध्यन्तरोपसंग्रहार्थत्वाद्भावे वनिप् अर्वंगमनं विषय प्रत्यनयो र्नास्तीति बहुव्रीहौ नञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वम्, सुपां सुलुगिति द्विवचनस्य लुक् छान्दसो नलोपाभावः ॥ १६ ॥

His father robbed Rijrāśva of his eye-sight who for the she-wolf slew a hundred wethers.

Ye gave him eyes, Nāsatyas Wonder-Workers, Physicians, that he saw with sight uninjured.

७१—अमाजुरश्चिद्भवथो युवं भगो नाशो श्चिदवितारापमस्य चित्। अन्धस्य चिन्नासत्याकृशस्य चिद्युवामिदाहुर्भिषजा रुतस्य चित् ॥ ऋ० म. १०।३९।३

हे नासत्या=नासत्यौ युवं=युवां अमाजुराश्चित् पितृगृहे जूर्यन्त्या अपि दुर्भगाया घोषायाः भगो भवथः शोभनरूपेणात्मानं परिणमय्य पतिं दत्तवन्तौ स्थ इत्यर्थः तथाच निगमान्तरं—घोषायै चित्पितृषदे दुरोणे पतिं जूर्यन्त्या अश्विनावदत्तमिति । अनाशोश्चित् अनशनस्याप्यवितारा रक्षितारौ युवां भवथः अपमस्य चित् जात्यादिनिकृष्टस्यापि रक्षितारो भवथः अन्धस्य चित् चक्षुर्विकलस्यापि रक्षितारौ भवथः कृशस्य चित् दुर्बलस्यापि रक्षितारौ भवतः किं च युवामित्=युवामेव ऋतस्य चित्=गन्तस्यापि भिषजा भिषजौ वैद्यावाहु विद्वांसः ॥ ३ ॥

Ye are the bliss of her who groweth old at home, and helpers of the slow although he linger last.

Men call you too, Nāsatyas healers of the blind, the thin and feeble, and the man with broken bones.

७२—युवं विप्रस्य जरणामुपेयुषः पुनः कलेरकृणुतं युवद्वयः। युवं वन्दनमृश्यदादुदूपथु युवं सद्यो विश्पलामेतवे कृथः ॥ ऋक्० १०।३९।८

हे अश्विनौ युवं=युवां विप्रस्य=मेधाविनः जरणां=जरां उपेयुषः=उपगतवतः कलेः=कलिनामधेयस्य ऋषेः वयः=पुनरपि युवत्=युवत्वयुक्तं अकृणुतं अकुरुतम् तथाच निगमान्तरं=कलिं याभि र्वित्तजानिं दुवस्यथ इति । किं च युवं=युवां वंदनं=जायावियोगसन्तापेन कूपपतितं वन्दनाख्यमृषि मृश्यदात्=कूपादुद्वपथुः उदैरयतम्। तथाच निगमान्तरं=उद्वन्दनमैरयतं स्वर्दृश इति । किं च युवं युवां विश्पलां=खेलस्य राज्ञः सेनायां योध्री विश्पला नाम काचित्स्त्री तां सङ्ग्रामे शत्रुभिः छिन्नजङ्घां सद्यस्तदैव एतवे=गमनाय कृथः=अकुरुतं । तथाच निगमान्तरं=चरित्रं हिवेरिवाच्छेदि पर्णमाजाखेलस्य परितक्म्यायां । सद्यो जङ्घामायसीं विश्पलायै धने हिते सर्तवे प्रत्यधत्तमिति ॥ ८ ॥

Ye gave again the vigour of his youthful life to the sage Kali when old age was coming nigh.

Ye rescued Vandana and raised him from the pit, and in a moment gave Vishpalā power to move.

७३—युवं हरेभं वृषणागुहाहितमुदैरयतं ममृवांसमश्विना । युवमृबीसमुत तप्तमत्रय ओमन्वन्तं चक्रथुः सप्तवध्रये ॥ ऋक्० १०।३९।९

हे वृषणा=वर्षितारावश्विना=अश्विनौ युवं—युवां गुहा=गुहायां हितं=आसुरैर्निहितं ममृवांसं=म्रियमाणं रेभं—रेभाख्यमृषिं उदैरयतं उत्तारितवन्तौ स्थः । तथाच निगमान्तरं=दशरात्रीरशिवेनानव द्यूनवनद्धं श्नथितमप्स्वंतः । विप्रुतं रेभमुदनि प्रवृक्तमुन्निन्यथुः सोममिव स्रुवेणेति। उत=किं च युवं=युवां तप्तमृबीसं=अग्निकुंड अत्रये=अत्रेरर्थाय ओमन्वन्तं=अवनवन्तं चक्रथुः=वृष्ट्या विशमय्य शीतं कृतवन्तौ स्थ इत्यर्थः । तथाच निगमान्तरं हिमेनाग्निं घ्रंसमवारयेथां पितुमतीमूर्जमस्मा अधत्तं । ऋबीसे अत्रिमश्विनाऽवनीतमुन्निन्यथुः सर्वगणं स्वस्तीति । किं च युवां सप्तवध्रये अश्वमेधेन राज्ञा केनचिदपराधेन काष्ठमयमञ्जूषायां निहितस्य सप्तवध्रिनामधेयस्य ऋषेरर्थाय चक्रथुः—मञ्जूषोद्घाटनं कृतवन्तौ स्थ इत्यर्थः । तथा च निगमान्तरं—विजिहीष्व वनस्पते योनिः सूष्यन्त्या इव । श्रुतं मे अश्विना हवं सप्तवध्रीं च मुञ्चतमिति ।

स्मान्यत्वञ्च दर्शयति । आहारपरिणामादिदर्शकानि भोजनविधिशास्त्राणि रोगनिदानानाञ्च विवरणानि तेषां तद्विषये सूक्ष्मविचारान्दर्शयति । शल्यतन्त्रे च भारतीया विशिष्टां योग्यतामधुः । अद्याप्यस्मिन्विषये पाश्चात्यास्तेषां शिष्या इव सन्ति । नूनं नासारोगविशेषे तु (Rhinoplasty) शल्यचिकित्सां तेभ्योऽवगत्य ते साम्प्रतमपि तेषामधमर्णाः । स्थावरजङ्गमौषधविषये धातूपधात्वौषधविषये च तेषामुपदेशो महार्घः । नूनमेव द्रव्यगुणविवृतिस्तेषां प्रकृतिक्षेत्रेऽतीव तत्तत्त्वदर्शितां विज्ञापयति । गवाश्वादीनामपि रोगादिविज्ञाने तत्रासीद्विशेषता । " ब्रेट (Brett) महोदयश्च ब्रूते " कुष्ठरोगौषधज्ञाने वयं भारतीयानामधमर्णाः" इति । हार्नले (Hoernle)महोदयोऽपि स्वकीये ' प्राचीनभारतीयाऽऽयुर्वेदाभ्यास ' (The Study in the Medicine of Ancient India) नामनि ग्रन्थ इत्थमुल्लिखति "सम्भवत एतद्वहुँश्वकितीकरिष्यति यदहमपि प्राचीनभारतीयग्रन्थेषु शारीरविषयं यदा गवेषितुमारब्धवांस्तदा चकितोऽभूवम् । अस्य विषयस्य तत्र वास्तविकभावो विस्तारश्चाऽऽश्चर्यप्रदौ । विशेषतश्च यदा वयं तेषां तत्कालोत्पत्तिं पश्यामः प्रायेण खीष्टात् (Christ) षष्ठ्यां पूर्वशताब्द्याम्- (वस्तुतस्तु स समयो भारतीयगौरवस्य निर्वाणकाल आसीत् । बौद्धादीनां समये भारतकीर्तिरुच्छ्वसन्त्येवाऽभवन्न तरुणी, किन्तुमुमूर्षन्त्यपि साऽऽश्चर्यकीर्तिर्वैजयन्ती पाश्चात्येभ्यो विस्मयजननी समभवत्—ग्रन्थकर्ता) एषा चानुमितिः केनाऽपि न प्रत्याख्यायेत खीष्टजन्मनः पूर्वं चतुर्थशताब्द्यां टेसियसः (Ktesias) तृतीयस्याञ्च शताब्द्यां मेगस्तनीजः (Megasthenes) उभावपि ग्रीसीयौ स्वदेशे यशस्विनौ वैद्यौ भारतस्योत्तरस्यां भुवि स्वविषयं दृढयितुं चिरमुषितवन्तौ " इति ॥ यद्यपि प्रयत्नशीलैः पाश्चात्यैरतीव श्रमं कृत्वा प्राचीनसंस्कृतग्रन्थावबोधाय साधुसाधनान्युपपादितान्युपपाद्यन्ते च किन्तु—अनभिज्ञबुभुक्षितहस्ते कठोरावरणाऽऽवृतनारिकेलवत् तेभ्यस्तथापि गीर्वाणगीरद्यावधि दुरधिगमैव । अस्या गिरोविस्तृताऽनेकार्थशब्दवत्त्वादनेकव्यवहारभिन्नतायाश्च ते तथ्यमर्थं प्रायो नैवाऽजानन् ।—यथा संस्कृतव्याकरणन्तु सर्वविषयद्वारीभूतं किन्तु तदाचार्या एव तस्य दीर्घकालापेक्षकत्वं वेदयन्ति । एतस्यां भाषायां ये विषयास्सन्ति ते प्रायेण सर्वेषामेव दुरधिगमाः । येषां देशभाषाऽस्याः सुदूरवर्तिनी तेषान्तु किमुत ? । अथच कतिपयेष्ववसरेषु पक्षपातो दुराग्रहश्च यथार्थज्ञानज्ञापनप्रतिद्वन्द्विनौ, अत एव केचित्पाश्चात्या विवेकाऽपेतां स्वसम्मतिं भारतीयविद्याविषये दर्शितवन्तः । यथा व्हिटनी (Whitney)र्ब्रूते—' यद्यपि भारतीयाऽऽयुर्वेदस्याऽऽरम्भो वेदमप्यन्तर्भावयति । वेदेष्वपि यतो मन्त्रोपचारैः सहौषधीनामुपयोगा दृश्यन्ते किन्तु तेषां नोल्लेखनीयता । भारतीयानां वास्तविक आयुर्वेदो नातिप्राचीनः' इति । व्हिटनी रथर्ववेदस्यांग्लभाषानुवादकस्तेन तत्राऽपि सम्यग्विचार्यैत्थं मतमित्यतीव विस्मयो जायते । यत्किमपि कोऽपि मन्येत मन्यताम् वयन्तु सोपपत्ति ब्रूमः । शारीरं—शल्यतन्त्रं—रसशास्त्रं, धातुवादोऽन्यश्च विज्ञानराशिर्वेदे वरीवृत्सत इति । एतत्सर्वं समासेनाऽस्मिन्नेव निबन्धे यथाप्रकृतमुपरिष्टान्निर्देक्ष्यामः ।

नूनं प्राचीना ऋषयः सर्वानेव विषयानतिसङ्क्षेपेण स्वकृतिषु निहितवन्तः । यथैकस्यामेवर्च्यथर्ववेदे बह्व्यः शल्यक्रिया दर्शिताः । तद्यथा—

वि ते भिनद्मि मेहनं वि योनिं वि गवीनिके ।

वि मातरं च पुत्रं च वि कुमारं जरायुणाऽव जरायु पद्यताम् ॥ अथर्व० १ । ११ । ५

अत्र प्रकृतमनुसृत्य 'वि ते भिनद्मि मेहनं' एतावता वाक्येन हे गर्भिणि=गर्भग्रहणयाग्ये तव मूत्रमार्गं विभिद्य तत्र तिष्ठन्तीमश्मरीं वहिर्निष्कासयामीत्याशयितं सूच्यते । यतोऽश्मरी रोगोऽतिभयङ्करः तस्य प्रतीकारे नातिकालोऽपेक्षणीयः । यथा—"अश्मरी दारुणोव्याधिरन्तकप्रतिमो मतः । औषधैः

स्तरणः साध्यः प्रवृद्धश्छेदमर्हति ॥ तस्य पूर्वेषु रूपेषु स्नेहादिक्रम इष्यते । तेनास्याऽपचयं यान्ति व्याधेर्मूलान्यशेषतः ॥" सु. चि. ७।३–४ यद्यपि गर्भावस्थायां त्रासविधायिकाः सर्वा एव क्रिया वर्ज्याः, किन्तूपस्थिते महाकष्टे यदाऽकृतायां शस्त्रादिक्रियायां मृत्युर्नियतो दृश्यते कृतायाञ्च मृत्युविकल्पः स्यात्तदा मृत्युपरिहारं लक्ष्यीकृत्य नूनं क्रियाः कर्तव्याः तद्यथा—" अक्रियायां ध्रुवो मृत्युः क्रियायां संशयो भवेत्। तस्मादापृच्छ्य कर्तव्यमीश्वरं साधुकारिणा ॥" अस्यत्र व्याख्यानं सुश्रुते यथा—" घृतैः क्षीरैः कषायैश्च क्षीरैः सोत्तरबस्तिभिः । यदि नोपशमं गच्छेच्छेदस्तत्रोत्तरो विधिः ॥ कुशलस्याऽपि वैद्यस्य यतः सिद्धिरिहाऽध्रुवा। उपक्रमो जघन्योऽयमतः स परिकीर्तितः ॥" सु. चि. ७।२७-२८ ॥ अथच:— " अथ रोगान्वितमुपस्निग्धमपकृष्टदोषमीषत्कर्शितमभ्यक्तस्विन्नशरीरं भुक्तवन्तं कृतबलिमङ्गलस्वस्तिवाचनमग्रोपहरणीयोक्तेन विधानेनोपकल्पितसम्भारमाश्वास्य, ततो बलवन्तमविक्लवमाजानुसमे फलके प्रागुपवेश्य पुरुषं, तस्योत्सङ्गे निपण्णपूर्वकायमुत्तानमुन्नतकटीकं वस्त्राधारकोपविष्टं सङ्कुचितजानुकूर्परमितरेण सहावबद्धं सूत्रेण शाटकै र्वा, ततः स्वभ्यक्तनाभिप्रदेशस्य वामपार्श्वं विमृद्य मुष्टिनाऽवपीडयेदधोनाभे र्यावदश्मर्यधः प्रपन्नेति, ततः स्नेहाऽभ्यक्ते क्लृप्तनखे वामहस्तप्रदेशिनीमध्यमे पायौ प्रणिधायाऽनुसेवनीमासाद्य प्रयत्नबलाभ्यां पायुमेढ्रान्तरमानीय, निर्व्यलीकमनायतमविषमं च बस्तिं सन्निवेश्य, भृशमुत्पीडयेदङ्गुलिभ्यां यथा ग्रन्थिरिवोन्नतं शल्यं भवति ॥ ३० ॥

स चेद्गृहीतशल्ये तु विवृताक्षो विचेतनः। हतवलम्बशीर्षश्च निर्विकारो मृतोपमः ॥ ३१ ॥
न तस्य निर्हरेच्छल्यं निर्हरेत्तु म्रियेत सः। विना त्वेतेषु रूपेषु निर्हर्तुं समुपाचरेत् ॥ ३२ ॥

सव्ये पार्श्वे सेवनीं यवमात्रेण मुक्त्वाऽवचारयेच्छस्त्रमश्मरीप्रमाणं, दक्षिणतो वा क्रियासौकर्यहेतोरित्येके, यथा न भिद्यते चूर्ण्यते वा तथा प्रयतेत। चूर्णमल्पमप्यवस्थितं हि पुनः परिवृद्धिमेति, तस्मात् समस्तामग्रवक्रेणाऽऽददीत, स्त्रीणां तु बस्तिपार्श्वगतो गर्भाशयः सन्निकृष्टः, तस्मात् नासामुत्सङ्गवत् शस्त्रं पातयेत्, अतोऽन्यथा खल्वासां मूत्रस्रावी व्रणो भवेत्, पुरुषस्य वा मूत्रप्रसेकक्षणनान्मूत्रक्षरणम्, अश्मरीव्रणादृते भिन्नो बस्तिरेकधा न भवति, द्विधाभिन्नबस्तिराश्मरिको न सिध्यति, अश्मरीव्रणनिमित्तमेकधाभिन्नबस्ति र्जीवति क्रियाऽभ्यासात् शास्त्रविहितच्छेदात् निःस्यन्दपरिवृद्धत्वाच्च शल्यस्येति। उद्धृतशल्यं तूष्णोदकद्रोण्यामवतार्य स्वेदयेत्, तथाहि बस्तिरसृजा न पूर्यते, पूर्णे वा क्षीरवृक्षकषायं पुष्पनेत्रेण विदध्यात् ॥ ३३ ॥

क्षीरवृक्षकषायं तु पुष्पनेत्रेण योजितम्। निर्हरेदश्मरीं तूर्णं रक्तं बस्तिगतन्तथा ॥ ३४ ॥

ननु सुश्रुतसंहिता कथमथर्ववेदस्य भाष्यभूता मन्येतेति चेन्न, सुश्रुतसंहितायामेवाऽस्य सन्देहस्य निराकृतत्वात् तद्यथा:—" इह खलु आयुर्वेदमष्टाङ्गमुपाङ्गमथर्ववेदस्याऽनुत्पाद्यैव प्रजाः श्लोकशतसहस्रमध्यायसहस्रं च कृतवान् स्वयम्भूः, ततोऽल्पायुष्ट्वमल्पमेधस्त्वं चाऽऽलोक्य नराणां भूयोऽष्टधा प्रणीतवान् ॥ सु. सू. १।५ ॥" उपाङ्गानि खलु वेदस्यानेकदेशीयानेव स्वविषयान् व्याख्यान्ति वर्तन्ते।

'**वि योनिम्**,—हे गर्भिणि (गर्भग्रहणयोग्ये) तत्राऽतिसङ्कुचिता या योनिस्तां शस्त्रयन्त्रादिभिर्भिनद्मि विकसितीकरोमीत्यर्थः। यथा सुखेन गर्भस्थोऽर्भको बहिरेतुं शक्नुयात्। अन्यच्च:—तव गर्भाशये यो गुल्मस्तं क्षारादिप्रयोगैरपनयामि। तथाच—

यः स्पन्दते पिण्डित एव नाङ्गैश्चिरात्सशूलः समगर्भलिङ्गः।
स रौधिरः स्त्रीभवएव गुल्मो मासे व्यतीते [illegible] चिकित्स्यः ॥ च. चि. ५। १८

अस्य व्याख्यानं तत्रैव द्रष्टव्यम् । तथाच—

रौधिरस्य तु गुल्मस्य गर्भकालव्यतिक्रमे । स्निग्धस्विन्नशरीरायै दद्यात्स्नेहविरेचनम् ॥
पलाशक्षारपादे द्वे द्वे पादे तैलसर्पिषोः । गुल्मशैथिल्यजननीं पक्त्वा मात्रां प्रयोजयेत् ॥
प्रभिद्येत न यद्येवं दद्याद्योनिविशोधनम् । क्षारेण युक्तं पललं सुधाक्षीरेण वा पुनः ॥

व्या० मेहन्ति अनेनेति व्युत्पत्त्या आन्त्रगतसूक्ष्ममूत्रवाहिस्रोतो मर्यादीकृत्य शरीराद्बहिर्निर्गमनमार्गं यावन्मेहनशब्देन मूत्राऽऽशयशब्देन च मूत्राऽऽकर्षणप्रवहणसञ्चयनबहिर्निर्गमनस्थानानि गृह्यन्ते । तस्य (भागस्य) कुत्रचिदेकः कुत्रचिद्द्वौ कुत्रचित्त्रयः कुत्रचिच्चत्वारो विभागा वर्णनसौकर्यार्थं प्रकल्प्यन्ते । 'कार्यो बस्तिगते चापि विधिर्बस्तिविशोधनः' सु० चि० ३।६, इत्यनेन एकस्मिन्नेव भागे समस्तमूत्राशयो दर्शितः "वस्तौ वाऽप्यथवा नाले मणौ वा यस्य देहिनः । मूत्रं प्रवृत्तं सज्जेत सरक्तं वा प्रवाहतः ॥ सु० उ० ५८।१५" इत्यत्र वृक्कद्वयाऽऽवद्धगवीनीपर्यन्तो भागः प्रथमः प्रकल्पितः, वस्तिर्द्वितीयः, वस्तिद्वारमारभ्य मणिपर्यन्तस्तृतीय इति कृत्वा मूत्रस्थानं त्रिधा विभज्य दर्शितम् ।

"पक्वाशयगतास्तत्र नाड्यो मूत्रवहास्तु याः । तर्पयन्ति सदा मूत्रं सरितः सागरं यथा ॥ सूक्ष्मत्वान्नोपलभ्यन्ते मुखान्यासां सहस्रशः । नाडीभिरुपनीतस्य मूत्रस्याऽऽमाशयान्तरात् ॥ जाग्रतः स्वपतश्चैव निःस्यन्देन पूर्यते । आमुखात्सलिले न्यस्तः पार्श्वेभ्यः पूर्यते नवः । घटो यथा तथा विद्धि वस्तिर्मूत्रेण पूर्यते सु० नि० ३।२१-२२-२३ ॥" पक्वाशयगताः याः सहस्रशो नाड्यः सन्ति ताः सरितो गङ्गाद्या नद्यो यथा—येन प्रकारेण सागरं तर्पयन्ति पूरयन्ति तथा—तेनैव प्रकारेण मूत्रं—मूत्राऽऽशयं सदा तर्पयन्ति पूरयन्ति। अत्र मूत्रेण मूत्रस्य तर्पणकर्तृत्वाऽभावान्मूत्राऽऽशयशब्दस्य "विनापि प्रत्ययं पूर्वोत्तरयोः पदयो र्वा लोपो वाच्यः" इति पाणिनीय ५।३।८३ सूत्रे पठितवार्तिकेनोत्तरपदस्य लोपो द्रष्टव्यः । अत एव 'जाग्रतः स्वपतश्चैव स निस्यन्देन पूर्यते, इत्यत्र 'स' इत्यनेन पूर्वं मूत्रशब्देन निर्दिष्टो मूत्राशयः परामृश्यते । सोऽपि वृक्कद्वयोपेतगवीनीसहितभागावबोधकस्तावन्मात्रो भागश्चाऽत्र वस्तिशब्दवाच्यः । अत एव प्रायशो वैद्यकसिद्धान्ते तथा प्रयोगा दृश्यन्ते । तासां नाडीनां सहस्रशो विद्यमानान्यपि मुखानि सूक्ष्मत्वात् स्थूलदृष्ट्या न दृश्यन्ते। अमुमेवाऽर्थं दृष्टान्तान्तरेण दृढयति नवः—पूर्वं जलसम्पर्करहितः । आमुखात्—गलाऽवधि जले न्यस्तः—निमज्जितः पार्श्वेभ्यः पार्श्वच्छिद्रेभ्योऽत्राप्युत्तरपदलोपो द्रष्टव्यः, यथा येन प्रकारेण पूर्यते—सम्भृतो भवति तथा—तेनैव प्रकारेण आमाशयान्तरात्—आमपक्वाशयाऽन्तरादत्राऽप्युत्तरपदलोपो द्रष्टव्यः । नाडीभिः पूर्वोक्ताभिः उपनीतस्य वृक्कद्वये प्रापितस्य मूत्रस्य निस्यन्देन सततप्रवाहेण जाग्रतः स्वपतश्च पुरुषस्य पूर्वोक्तो वस्तिः पूर्यत इति विद्धि । अत्र मूत्रस्थानं स्थानद्वयं विभज्य प्रदर्शितम् । इदं सूत्रमसम्बद्धमिति केचित्स्थूलवादिनो वदन्ति तत्तु विचाराऽभावप्रयुक्तमित्यभ्युपगन्तव्यम् ।

यदान्त्रेषु गवीन्यो र्यद्वस्तावधि संस्रुतम् ।
एवाते मूत्रं मुच्यतां बहिर्बालिति सर्वकम् ॥ अथर्वकां. १।३।६

सा० भाष्यम्—आन्त्रेषु—उदरान्तर्गतेषु पुरीतत्सु । यत्—मूत्रं संश्रितं समवस्थितं रोगवशाद्यथाकाले बहिरनिर्गच्छत् निरुद्धम् अभूत् तथा गवीन्योः । आन्त्रेभ्यो विनिर्गतस्य मूत्रस्य मूत्राशयप्राप्तिहेतू पार्श्वद्वयस्थे नाड्यौ गवीन्यौ इत्युच्येते । तयोरपि यत् मूत्रं संश्रितं तथा वस्तौ । धनुराकारो मूत्रा

वास्तिरुच्यते । तत्रापि यत् मूत्रं संश्रितम् अस्ति ते तत्र [illegible]
पूर्वं मुच्यतां निर्गच्छतु । निर्गमनप्रकारमेव आह । सर्वकं सर्वं [illegible]
एवमात्मकं शब्दं कुर्वत् बहिःशरीराद् बाह्यप्रदेशे । मुच्यतामिति [illegible]

अस्मिन्मन्त्रे आन्त्राणि गवीन्यौ वस्तिः वहिर्निर्गमन[illegible]
प्रदर्शितः । वृक्कद्वयस्य तु गवीनीसम्बद्धत्वात्तत्रैवान्तर्भावो [illegible]
भवति यथा यजुर्वेदे " **मतस्नाभ्यां** दिवं वृक्काभ्यां गिरीन् [illegible]
शब्दो गृहीतः । यद्यपि वाजसनेय्यां **उव्वटमहीधराभ्यां** [illegible]
मतस्ने इति व्याख्यातं । परन्तु तन्न समीचीनम् । प[illegible]
कृतविभागत्वात् । तत्र चतुर्थपञ्चममन्त्राभ्यां प्रतिपार्श्वं [illegible]
पदेवताभागत्वेन पक्षतिनाम्ना कृतोपयोगत्वात् । हृदयस्य [illegible]
मतस्नाशब्दश्च प्रायो देवतोद्देशेऽस्थिरहितपेशीमयाऽवय[illegible]
हृदयाग्रेण पशुपतिं कृत्स्नहृदयेन भवं यक्ना । मतस्ना[illegible]
वनिष्ठुना वसिष्ठहनुः शिङ्गीनि कोश्याभ्याम् । वा० सं० [illegible]
पुरोडाशेन सविता जजान । यकृत् क्लोमानं वरुणो भि[illegible]
ये च ते मतस्ने यदान्त्रं याश्च ते गुदाः अ० १०।२।१[illegible]
बहुसमयात्स्वाऽर्थग्रहे किमेतदिति शङ्कास्थानमासीत् । अत्र [illegible]
ख्याने **मतस्नाभ्यां**-उभयपार्श्वसम्बद्धाभ्यां वृक्काभ्यां [illegible]
"आम्यां वा भावितान् दद्याद्योनौ कटुकमत्स्यकान् । [illegible]
श्चोर्ध्वहरै र्भावितान्वा समाक्षिकान् । किण्वं वा सगुडक्षारं [illegible]
सर्पिषा । लशुनं मदिरां तीक्ष्णां मत्स्यांश्चास्यै प्रदापयेत् ॥ [illegible]
माने रुधिरे दद्याद्गुल्मप्रभेदनम् ॥ प्रवृत्तमाने रुधिरे [illegible]
सुराम् ॥ रुधिरेऽतिप्रवृत्ते तु रक्तपित्तहराः क्रियाः ।

'विगवीनिके'—भिनद्मीति पूर्वेण सम्बन्धः [illegible]
वृक्कद्वयादागतयो र्वस्तिसम्बद्धयो र्मूत्रवहयोः स्रोतसो [illegible]
ततश्चाऽत्र मेहने गवीनिके चेति मूत्राशयो द्विधा [illegible]
तत्रैव तन्निराकरणाय शस्त्रादिक्रिया विधेया । एतावान्[illegible]
नालशब्देन उपर्युक्तमङ्गं व्यवह्रियते यतस्तत्रैव मूत्रा[illegible]

वस्तौ वाऽप्यथवा नाले मणौ वा यस्य दे[illegible]
स्रवेच्छनैरल्पमल्पं सरुजं वाऽथ नीरुजम् । [illegible]

अस्य व्याख्याने डल्हणविवरणायां [illegible]
कुत्रचिद्वातजनितगुल्मोऽश्मरीलक्षणो [illegible]

अभ्यन्तरे वस्तिमुखे वृत्ताल्पः स्थिर एव च । वेदनावानतिसदा मूत्रमार्गनिरोधनः ॥
जायते सहसा यस्य ग्रन्थिरश्मरिलक्षणः । स मूत्रग्रन्थिरित्येवमुच्यते वेदनादिभिः ॥ सु. उ. ५८।१२–१९

'वि' इत्युपसर्गः प्रायेण विकारवाचकः । अतो 'वियोनिम्'=विकृता सविकारा सरोगा वा योनिस्तामिति मध्यमपदलोपिसमासं कृत्वाऽर्थोऽवगन्तव्यः । भेदनशब्दस्य च पृथक्करण, विस्तृतीकरण, कर्तन-च्छेदनादयोऽर्था बोद्धव्याः । एतेषामर्थानां ऋग्वेदसुश्रुतसंहितयो र्नोऽप्रसिद्धिः ।

'विमातरम्' (च भिनभि=निर्शेषाऽवस्थायां यदा तत्कालमेव मातुर्मृतिर्भवेत्, गर्भाशयस्पन्दादिना तत्स्थोऽर्भको जीवतीत्यनुमीयेत तदा)—केनाऽपि कारणेन मातुः प्राणान्तः स्यात्तदा गर्भाशयः सम्यक् परीक्षणीयः । यदि गर्भः स्पन्दमानो दृश्येत तदाऽचिरादेवोदरं पाटयित्वा स बहिर्निष्कास्यः । यदुक्तं सुश्रुतेन—
वस्तमारविपन्नायाः कुक्षिः प्रस्पन्दते यदि । तत्क्षणाज्जन्मकाले तं पाटयित्वोद्धरेद्भिषक्॥ सु० नि० ८।१४

'विपुत्रं' च भिनभि,=यदा गर्भो विपन्नो माता च जीवति मृतो गर्भश्च केनाऽप्युपायेन न बहिरायाति तदा गर्भमुत्कृत्य बहिरानयेत्कुशलो भिषक् । यथाऽऽह सुश्रुतः—" अथातो मूढगर्भचिकित्सितं व्याख्यास्यामः सु० चि० ॥१–२॥ नाऽतः कष्टतममस्ति यथा मूढगर्भशल्योद्धरणम्, अत्रहि योनियकृत्प्लीहान्त्रविवरगर्भाशयानां मध्ये कर्म कर्तव्यं स्पर्शेन, उत्कर्षणाऽपकर्षणस्थानाऽपवर्तनोत्कर्तनभेदनच्छेदनपीडनर्जूकरणदारणानि च एकहस्तेन गर्भं गर्भिणीं चाऽहिंसता, तस्मादधिपतिमापृच्छ्य परं च यत्नमास्थायोपक्रमेत् ॥ ३ ॥ तत्र समासेनाऽष्टविधा मूढगर्भगतिरुद्दिष्टा, स्वभावगता अपि त्रयः सङ्गा भवन्ति शिरसो वैगुण्यादंसयो र्जघनस्य वा ॥ ४ ॥

जीवति तु गर्भे सूतिकागर्भनिर्हरणे प्रयतेत । निर्हर्तुमशक्ये च्यावनान् मन्त्रानुपश्शृणुयात् तान् वक्ष्यामः
'इहामृतं च सोमश्च चित्रभानुश्च भामिनि । उच्चैःश्रवाश्च तुरगो मन्दिरे निवसन्तु ते ॥ ६ ॥

इदममृतमपां समुद्धृतं वै तव लघु गर्भमिमं प्रमुञ्चतु स्त्री ।
तदनलपवनार्कवासवास्ते सह लवणाम्बुधरै र्दिशन्तु शान्तिम् ॥ ७ ॥

मुक्ताः पाशा विपाशाश्च मुक्ताः सूर्येन्दुरश्मयः । मुक्तः सर्वभयाद्गर्भ एह्येहि माचिरं स्वाहा ॥ ८ ॥

औषधानि च विदध्यात् यथोक्तानि । मृते चोत्तानाया आभुग्नसक्थ्या वस्त्राधारकोन्नमितकट्या धन्वननगवृत्तिका शाल्मलीमृत्स्नाघृताभ्यां म्रक्षयित्वा हस्तं योनौ प्रवेश्य गर्भमुपहरेत् । तत्र सक्थिभ्यामागत-मनुलोममेवाञ्छेत्, एकसक्थ्ना प्रपन्नस्येतरसक्थि प्रसार्याऽपहरेत्, स्फिग्देशेनाऽऽगतस्य स्फिग्देशं प्रपीड्यो-र्ध्वमुत्क्षिप्य सक्थिनी प्रसार्याऽपहरेत्, तिर्यगागतस्य परिघस्येव तिरश्चीनस्य पश्चादर्धमूर्ध्वमुत्क्षिप्य पूर्वार्ध-मपत्यपथं प्रत्यार्जवमानीयाऽपहरेत्, पार्श्वाऽपवृत्तशिरसं सम्पीड्योर्ध्वमुत्क्षिप्य शिरोऽपत्यपथमानीयाऽपहरेत्, बाहुद्वयप्रतिपन्नस्योर्ध्वमुत्पीड्यांसौ शिरोऽनुलोममानीयापहरेत्, द्वावन्त्यावसाध्यौ मूढगर्भौ, एवमशक्ये शस्त्र-मवचारयेत् ॥९॥ सचेतनं च शस्त्रेण न कथञ्चन दारयेत् । दार्यमाणोहि जननीमात्मानं चैव घातयेत् ॥१०॥

तत्र म्रियमाणस्य मण्डलाग्रेण अङ्गुलीशस्त्रेण वा शिरो विदार्य, शिरः कपालान्याहृत्य शङ्कुना गृही-त्वोरसि कक्षायां वाऽपहरेत्, अभिन्ने शिरसि चाक्षिकूटे गण्डे वा, अंससंसक्तस्यांसदेशे बाहुं छित्त्वा, दृति-मिवाऽऽततं वातपूर्णोदरं वा विदार्य निरस्यान्त्राणि शिथिलीभूतमाहरेत्, जघनसक्तस्य वा जघनकपालानीति

यद्यदङ्गं हि गर्भस्य तस्य सजति तद्भिषक् । सम्यग् विनिर्हरेच्छित्वा रक्षेन्नारीं च यत्नतः ॥ १२ ॥
गर्भस्य गतयश्चित्रा जायन्तेऽनिलकोपतः । तत्राऽनल्पमति र्वयो वर्तेत विधिपूर्वकम् ॥ १३ ॥

नोपेक्षेत मृतं गर्भं मुहूर्तमपि पण्डितः । स ह्याशु जननीं हन्ति निरुच्छ्वासः पशुं यथा ॥ १४ ॥
मण्डलाऽग्रेण कर्तव्यं छेद्यमन्तर्विजानता । वृद्धिपत्रं हि तीक्ष्णाऽग्रं नारीं हिंस्यात्कदाचन ॥ १५ ॥
अथाऽपतन्तीमपरां पातयेत्पूर्ववद्भिषक् । हस्तेनाऽपहरेद्वाऽपि पार्श्वाभ्यां परिपीड्य वा ॥ १६ ॥
धुनुयाच्च मुहुर्नारीं पीडयेद्वांसपिण्डिकाम् । तैलाक्तयेनिरेवं तां पातयेन्मतिमान्भिषक् ॥ १७ ॥
एवं निर्हृतशल्यां तु सिञ्चेदुष्णेन वारिणा । ततोऽभ्यक्तशरीराया योनौ स्नेहं निधापयेत् ॥ १८ ॥
एवं मृद्वी भवेद्योनिस्तच्छूलं चोपशाम्यति ॥ " इति सु. चि. १५ अत्र मूढगर्भस्यैव शल्यत्वम् । शल्यनिष्कासनोपायाश्च साधारण्येन—' हस्तशक्यं यथामार्गेण हस्तेनैवाऽपहर्तुं प्रयतेत ॥ ११ ॥ हस्तेनाऽपहर्तुमशक्यं विशस्य शस्त्रेण यन्त्रेण वाऽपहरेत् सु० सू० २७ । १२

' वि कुमारं च जरायुणाभिनद्मि '=(यदाकेनापि कारणेन गर्भो न बहिरेति तदा किं विधेयमित्ये-तद्वाक्यं दर्शयति) जरायोः कुमारं विश्लेषयामीत्यर्थः । यथा—" **गर्भसङ्गे** तु योनिं धूपयेत् कृष्णसर्पनिर्मोकणपिण्डीतकेन वा । बध्नीयाद्धिरण्यपुष्पीमूलं हस्तपादयोः धारयेत्सुवर्चलां विशल्यां वा ॥ सु. शा. १०।११ ॥" इत्याद्यष्टाङ्गसङ्ग्रहादिष्वपि बहव उपायाः दर्शिताः ते तत्रतत्र द्रष्टव्याः । प्रसवादनन्तरमुल्वपाते यदा विलम्बः स्यात्तदा '**जरायुअवपद्यताम्**' इति जरायो र्बहिरानयनाय सुश्रुतादिषूपाया दर्शिताः ।

" अथापराऽपतन्त्यानाहाध्मानौ कुरुते, तस्मात् कण्ठमस्याः केशवेष्टितयाऽङ्गुल्या प्रमृजेत्, कटुकालाबुकृतवेधनसर्षपसर्पनिर्मोकैर्वा कटुतैलविमिश्रैर्योनिमुखं धूपयेत्, लाङ्गलीमूलकल्केन वाऽस्याः पाणिपादतलमालिम्पेत्, मूर्ध्नि वास्या महावृक्षक्षीरमनुपेचयेत्, कुष्ठलाङ्गलीमूलकल्कं वा मद्यमूत्रयोरन्यतरेण पाययेत्, शालमूलकल्कं वा पिप्पल्यादिं वा मद्येन, सिद्धार्थककुष्ठलाङ्गली महावृक्षक्षीरमिश्रेण सुरामण्डेन वाऽऽस्थापयेत्, एतैरेव सिद्धेन सिद्धार्थकतैलेनोत्तरबस्तिं दद्यात्, स्निग्धेन क्लृप्तनखेन हस्तेनाऽपहरेत् ॥ सु. शा. १०।२१ ॥

यद्यप्यनेकाऽनुचितोचितव्याख्यानपटुरपि **सायण** इमं मन्त्रं स्तोकं यथार्थमिव व्याख्यात् । **ह्विटनी**-प्रभृतयस्तु पाश्चात्यास्तद्व्याख्यानेऽसम्बद्धमिव प्रालपन्, भारतीयस्तु न कोऽपि तथा व्याख्यास्यत् ।" अहं तव मूत्रकमङ्गं पृथग्विदारयामि, पृथक् तवयोनिं, उभयं मातरं शिशुं च (विदारयामि) जरायो र्बालं पृथक् (किम् ?) । जरायुरवतरतु । " इति **ह्विटनी**महोदयस्याशय एतन्मन्त्रानुवादे ।

एकस्मिन्नेवास्मिन्मन्त्रे कति हस्तलाघवमपेक्षिण्यः सूक्ष्मतमाश्च शस्त्रक्रियाः प्रदर्शिता येन वैदिकर्षीणां शल्यतन्त्रेऽतीवपाटवं दृश्यते।अस्य मन्त्रस्य व्याख्यानविस्तरःपाठकानामस्माकञ्चाल्पेतरं कालमपेक्षतेऽतो दिङ्मात्रमेव दर्शितम् । प्राचीनानामृषीणां यावच्छक्यमल्पसङ्ख्यैश्शब्दैरनल्पानां गूढानाञ्च विचाराणां विन्यासपद्धतिः सुप्रसिद्धैव । एतत्तु नाऽविदितं संस्कृतव्याकरणं सर्वभाषाव्याकरणेभ्यो विस्तृततरं सुनियमश्चेति । किन्तु पाणिनिविरचिताऽष्टाध्यायी, इयत्यविस्तृता यथा यामद्वयेन प्रवक्तुं शक्यते नच क्रेतुं महार्घा । तस्याश्च व्याख्यानभूता ग्रन्थाः सुदीर्घकालाधिगम्या व्याकरणस्याऽतिविस्तरदर्शकाश्च । वेदास्तु सर्वेषामेव ज्ञानविज्ञानानां राशयस्तेषु चातीव सङ्क्षेपेण सर्वे एव विषया वरीवृत्यन्तेऽतो न केवलं पाणिनिव्याकरणस्य किन्तु सर्वव्याकरणानां राद्धान्तास्तत्र द्विचत्वारिंशदक्षरैरेव (Syllables) दर्शिताः । तद्यथा—" चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य । त्रिधा बद्धो वृषभो रोरवीति महोदेवो मर्त्यां आविवेश ॥ " इति । चत्वारि शृङ्गाणि । चत्वारि पदजातानि नामाख्यातोपसर्गनिपाताश्च । त्रयो अस्य पादाः । त्रयः काला भूतभविष्यद्वर्तमानाः । द्वे शीर्षे द्वौ शब्दात्मानौ नित्यः कार्यश्च । सप्तहस्तासो अस्य सप्त विभक्तयः । त्रिधा बद्धः—त्रिषु

अभ्यन्तरे बस्तिमुखे वृत्तास्थः स्थिर एव च । वेदनावाननितसदा मूत्रमार्गनिरोधनः ॥
जायते सहसा यस्य ग्रन्थिरश्मरिलक्षणः । स मूत्रग्रन्थिरित्येवमुच्यते वेदनादिभिः ॥ सु. उ. ५८।१२–१९

'वि' इत्युपसर्गः प्रायेण विकारवाचकः । अतो 'वियोनिम्'=विकृता सविकारा सरोगा या योनिस्तामिति मध्यमपदलोपिसमासे कृत्वाऽर्थोऽवगन्तव्यः । भेदनशब्दस्य च पृथक्करण, विस्तृतीकरण, कर्तनच्छेदनादयोऽर्था बोद्धव्याः । एतेषामर्थानां ऋग्वेदसुश्रुतसंहितयो र्नाऽप्रसिद्धिः ।

'विमातरम्' (च भिनद्मि=विशेषाऽवस्थायां यदा तत्कालमेव मातुर्मृतिर्भवेत्, गर्भाशयस्पन्दादिना तत्स्थोऽर्भको जीवतीत्यनुमीयेत तदा)—केनाऽपि कारणेन मातुः प्राणान्तः स्यात्तदा गर्भाशयः सम्यक् परीक्षणीयः । यदि गर्भः स्पन्दमानो दृश्येत तदाऽचिरादेवोदरं पाटयित्वा स बहिर्निष्कास्यः । यदुक्तं सुश्रुतेन—
वस्तमारविपन्नायाः कुक्षिः प्रस्पन्दते यदि । तत्क्षणाज्जन्मकाले तं पाटयित्वोद्धरेद्भिषक्॥ सु० नि० ८।१४

'विपुत्रं' च भिनद्मि,=यदा गर्भो विपन्नो माता च जीवति मृतो गर्भश्च केनाऽप्युपायेन न बहिरायाति तदा गर्भमुत्कृत्य बहिरानयेत्कुशलो भिषक् । यथाऽऽह सुश्रुतः—" अथातो मूढगर्भचिकित्सितं व्याख्यास्यामः सु० चि० ॥१–२॥ नाऽतः कष्टतममस्ति यथा मूढगर्भशल्योद्धरणम्, अत्र हि योनियकृत्प्लीहान्त्रविवरगर्भाशयानां मध्ये कर्म कर्तव्यं स्पर्शेन, उत्कर्षणाऽपकर्षणस्थानाऽपवर्तनोत्कर्तनभेदनच्छेदनपीडनर्जूकरणदारणानि च एकहस्तेन गर्भं गर्भिणीं चाऽहिंसता, तस्मादधिपतिमापृच्छ्य परं च यत्नमास्थायोपक्रमेत् ॥ ३ ॥ तत्र समासेनाऽष्टविधा मूढगर्भगतिरुद्दिष्टा, स्वभावगता अपि त्रयः सङ्गा भवन्ति शिरसो वैगुण्यादंसयो र्जघनस्य वा ॥ ४ ॥

जीवति तु गर्भे सूतिकागर्भनिर्हरणे प्रयतेत । निर्हर्तुमशक्ये च्यावनान् मन्त्रानुपश्रृणुयात् तान् वक्ष्यामः
'इहामृतं च सोमश्च चित्रभानुश्च भामिनि । उच्चैःश्रवाश्च तुरगो मन्दिरे निवसन्तु ते ॥ ६ ॥

इदममृतमपां समुद्धृतं वै तव लघु गर्भमिमं प्रमुञ्चतु स्त्री ।
तदनलपवनार्कवासवास्ते सह लवणाम्बुधरै र्दिशन्तु शान्तिम् ॥ ७ ॥

मुक्ताः पाशा विपाशाश्च मुक्ताः सूर्येन्दुरश्मयः । मुक्तः सर्वभयाद्गर्भ एह्येहि माचिरं स्वाहा ॥ ८ ॥

औषधानि च विदध्यात् यथोक्तानि । मृते चोत्तानाया आभुग्नसक्थ्या वस्त्राधारकोन्नमितकट्या धन्वननगवृत्तिका शाल्मलीमृत्स्नावृताभ्यां प्रक्षयित्वा हस्तं योनौ प्रवेश्य गर्भमुपहरेत् । तत्र सक्थिभ्यामागतमनुलोममेवाञ्छेत्, एकसक्थ्ना प्रपन्नस्येतरसक्थि प्रसार्याऽपहरेत्, स्फिग्देशेनाऽऽगतस्य स्फिग्देशं प्रपीड्योर्द्ध्वमुत्क्षिप्य सक्थिनी प्रसार्याऽपहरेत्, तिर्यगागतस्य परिघस्येव तिरश्चीनस्य पश्चादर्धमूर्ध्वमुत्क्षिप्य पूर्वार्धमपत्यपथं प्रत्यार्जवमानीयाऽपहरेत्, पार्श्वाऽपवृत्तशिरसं सम्पीड्योर्ध्वमुत्क्षिप्य शिरोऽपत्यपथमानीयाऽपहरेत्, बाहुद्वयप्रतिपन्नस्योर्ध्वमुत्पीड्यांसौ शिरोऽनुलोममानीयापहरेत्, द्वावन्त्यावसाध्यौ मूढगर्भौ, एवमशक्ये शस्त्रमवचारयेत् ॥९॥ सचेतनं च शस्त्रेण न कथञ्चन दारयेत् । दार्यमाणोहि जननीमात्मानं चैव घातयेत् ॥१०॥

तत्र ध्रियमाश्वास्य मण्डलाग्रेण अङ्गुलीशस्त्रेण वा शिरो विदार्य, शिरः कपालान्याहृत्य शङ्कुना गृहीत्वोरसि कक्षायां वाऽपहरेत्, अभिन्ने शिरसि चाक्षिकूटे गण्डे वा, अंससंसक्तस्यांसदेशे बाहुं छित्त्वा, दृतिमिवाऽऽततं वातपूर्णोदरं वा विदार्य निरस्यान्त्राणि शिथिलीभूतमाहरेत्, जघनसक्तस्य वा जघनकपालानीति

यद्यदङ्गं हि गर्भस्य तस्य सजति तद्भिषक् । सम्यग् विनिर्हरेच्छित्वा रक्षेन्नारीं च यत्नतः ॥ १२ ॥
गर्भस्य गतयश्चित्रा जायन्तेऽनिलकोपतः । तत्राऽनल्पमति र्वैद्यो वर्तेत विधिपूर्वकम् ॥ १३ ॥

कानस्थापयन् । राज्ञा नागार्जुनेन पुराणी प्रकृतसम्बन्धापेता, इतस्ततो विकीर्णेव सुश्रुतसंहिता प्रतिसंस्कृतेति तु निर्मूलैव जनश्रुतिरस्ति । हार्नले महोदयोऽप्यास्मिन् विषय इत्थं स्वमतं दर्शयति—" निश्चितमेवैतत् सुश्रुतसंहिता गच्छति कालेऽसम्बद्धेवाऽजनि, जातायाञ्चाऽवश्यतायां सा बहून्वारान् पुनः प्रतिसंस्कृता । प्रथमश्च प्रतिसंस्कार उत्तरतन्त्ररूपेण साम्प्रतमपि वर्तते । स च खीष्टद्वितीयशताब्द्यां नागार्जुनकृत इति वृद्धकिंवदन्ती " इत्यादि ।

आर्यावर्तः पुरा समुन्नतेः परां सीमानमधिगतवान् । तस्य च सर्वेऽन्येऽज्ञानबहुला देशाः ज्ञानरश्मिप्रकाशं तस्माद्गृहीत्वाऽधमर्णाः । भारतगौरवाऽन्तकर्तृणो महाभारतीययुद्धादत्यर्वागन्येषां देशानां ज्ञानोन्नती विकसितुं समारब्धे । भारतस्य च प्राग्गौरवं महाभारतीययुद्धादारम्य क्षयोन्मुखमभवत् । तच्च युद्धमितः प्रायः पञ्चसहस्रवर्षपूर्वमभवदिति वृद्धाः । युधिष्ठिरविहितस्य संवत्सरगणनाक्रमस्य स्थूलसरणिमनुसृत्याऽद्यावधि शतोत्तरपञ्चसहस्रमिता वत्सरा अयुरिति प्रायोवादः । युधिष्ठिरस्य वर्षक्रमः (Era) कलिवर्षक्रमो वा कुरुपाण्डवयुद्धसमाप्तेरेवारब्ध इत्युच्यते किन्तु **'प्राचीनलिपिमाला'** निर्माता **गौरीशङ्कर** शर्मा मन्यते—' खिष्टीयद्वितीयमासस्याऽष्टादशेऽहनि द्व्युत्तरैकत्रिंशच्छततमे खीष्टजन्मनः पूर्ववत्सरे (18th February 3102 B. C.) कलिवर्षगणनारम्भोऽजनि, इति । विक्रमार्कवर्षक्रमे चतुश्चत्वारिंशदुत्तरत्रिसहस्रवर्षाणि संयोज्य च कलिवत्सरा भवन्तीति । एवञ्चाऽद्यावधि षड्विंशदुत्तरपञ्चसहस्रमिता वत्सराः कलेर्जाताः (3044+1982=5026) । स एव शर्मा महोदयः पुनर्ब्रूते—' दक्षिणदेशे **अहोलि पूलकेशी** स्थानयोश्चालुक्यवंशीयानां राज्ञां समयकृताः शिलालेखा वर्तन्ते मन्दिरभग्नावशेषेषु । दृश्यते च तत्र तन्मन्दिरं कलेः पञ्चत्रिंशदुत्तरसप्तत्रिंशच्छततमे वत्सरे; षट्पञ्चाशदुत्तरपञ्चशततमे च शकवत्सरे निर्मितमासीदिति । एतेन च कलिवत्सराः शकवत्सराऽऽरम्भे सप्तनवत्युत्तरैकत्रिंशच्छतमिता भवन्ति, इति । बहवस्तु कलेः प्रथमवर्ष एव भारतीययुद्धमभवदिति मन्यन्ते, किन्तु राजतरङ्गिणीरचयिता **कल्हणो**ऽन्यदेव दर्शयति यथा—" **भारतं** द्वापरान्तेऽभूद्वार्तयेति विमोहिताः । केचिदेतां मृषा तेषां कालसङ्ख्यां प्रचक्रिरे ॥ " " शतेषु षट्सु सार्धेषु त्र्यधिकेषु च भूतले । कलेर्गतेषु वर्षाणामभवन् कुरुपाण्डवाः " इति । एतन्मते तु भारतीययुद्धात्प्राक् त्रिपञ्चाशदुत्तरषट्शततमे वत्सरे कलिप्रारम्भोऽजनीति सिद्ध्यति । यत्किमप्येतेषां मतानां साधीयः स्यात्, प्रायः पञ्चसहस्रं वत्सराः महाभारतयुद्धकालादद्यावधि गता इति निर्विवादम् । यद्यपि युधिष्ठिरकालात्कलेरारम्भोऽजनि तथाप्याबौद्धकालं भारतगौरवं पूर्वां स्वां छायां न जहौ । पाश्चात्याः प्रायेण बौद्धकालादेवेतिहासवृत्तं प्रमाणत्वेन मन्यन्ते । ततः पूर्वेतिहासस्य प्रमाणार्हतायाः सम्यगनुपलब्धिश्च तैर्मता । वयं तत्र विषये न किमपि स्वमतं दर्शयामः । एषां पाश्चात्यानां मते महाभारतकालोऽतीतेतिहासविषयः (Pre-historic) । ततोऽपि सिद्ध्यत्येवम्—सर्वेषां देशानामितिहासकालाऽऽरम्भात् प्रागेव भारतगौरवैर्लोकान्तरप्रस्थानोन्मुखमभवदिति । बौद्धानां समयात्पूर्वमितिहासप्रमाणाऽलब्धे वयमप्यर्वाचीनाऽऽयुर्वेदेतिहासं बौद्धकालादेव गणयामः । ततश्चाऽर्वाचीनाऽऽयुर्वेदकालः खीष्टजन्मनः षष्ठीं पूर्वशताब्दीमारभ्य तत एवार्वाङ् नवम्यां शताब्द्यां निवर्तते बौद्धकालश्चाऽस्य प्रारम्भाच्छङ्कराचार्यकालावधि गण्यतेऽतोऽर्वाचीनाऽऽयुर्वेदसमयोऽपि स एव । अस्मिन्नेव समये यथा भारतवर्षप्रभवा बौद्धधर्मसिद्धान्ता अन्यदेशप्रवेशमापुस्तथैवाऽन्येऽपि विज्ञानविचारा मिश्र (Egypt) ग्रीस (Greece) प्रभृतिषु देशेषु प्रसारमलभन्त । आयुर्वेदप्रचारोऽपि तेन सह भारताद्बहिरभूत् । सविश्वासमेतन्निश्चीयते च मिश्रदेशीयानां सभ्यताऽनेकदेशविस्तृतसन्तानवती भारतीयसभ्यतैव । मिश्रीयाणां पूर्वजास्तु भारतीया एवाऽऽसन् ।

स्थानेषु वद्ध उरसि कण्ठे शिरसीति । वृषभो वर्षणात् । रोरवीति शब्दं करोति । कुत एतत् ? रौतिः शब्दकर्मा । महोदेवो मर्त्यां आविवेशेति महान्देवः शब्दो मर्त्या मरणधर्माणो मनुष्यास्तानाविवेश ॥ महाभाष्यम् १।१।१ ॥ अनेन नैतदनुमीयेत यत्पाणिनिसमये वर्तमानकालवद् वेदसमये च पाणिनिकालवन्नासीद्व्याकरणस्तरो व्यवहारो वा । किन्त्वेषा शैलीपूर्वाचार्याणां निसर्गसिद्धं यदल्पाऽक्षरैर्बहुगभीरभावदर्शकं नियमं ज्ञापयति ।

भारतीया ग्रीसीयाश्च

दूरस्थिता बह्व्यो मनुष्यजातयो या मध्यकाले भारतवर्षेण सह सम्बन्धं बभ्रुस्तासां मिस्रीया (Egyptians) **ग्रीसीयाश्च** (Greeks) प्रधानतमत्वेनोल्लेखनीयाः । यद्यप्याऽऽयुर्वेदमधिकृत्याऽऽरबीया (Arabians) अपि भारतस्याधमर्णाः किन्तु तेषां तां प्रवृत्तिं भूयो वक्ष्यामः । यतोऽर्वेदोत्थानतः प्रागेव ग्रीसीया विजिगीषयाऽपिजिगीषया च भारतवर्षं प्रविविशुः । अयं देशश्च सदा चिराय स्वतन्त्रतया विभवितया चाऽतीव प्रसिद्धोऽभवत्प्रागपि खीष्ट— (Christ) जन्मतः । अलक्षेन्द्र (Alexander The Great) कृतादुपप्लवादपि पूर्वं खीष्टजन्मतः षट्शतसंवत्सरं प्राक् **पायेगोरस** (Pythagoras) नाम कश्चिद्ग्रीसीयो ज्ञानपिपासोपशान्तये देशेऽस्मिन्नभ्राम्यत् । **मेगस्थनीजो**ऽपि (Megasthenes) भारतीयानां राजनीतिमवलोकितुं **सेल्यूकसेन** (Selucus Necatar) मौर्यसम्राजश्चन्द्रगुप्तस्य राजसंसदि खीष्टजन्मतो द्वादशोत्तरत्रिशतवर्षपूर्वं प्रेषित आसीत् । अयञ्च ग्रीसीयो राजदूतः स्वसमयसमयदर्शकं भारतवृत्तं व्यलिखचन्द्रगुप्तराजसंसदञ्च कतिपयवारानगात् । सकलग्रन्थेन देशानपस्तत् कश्चिच्च ब्राह्मणः कल्याणाऽभिधोऽलक्षेन्द्रचाटुकृतिकैतवेन विश्वासितो भारताद्ग्रीसदेशमयास्तत्र च पश्चात्तापं विधायाऽऽत्महननमकरोत् । उणादिसूत्रसिद्धस्य दीनारशब्दस्य ग्रीसदेशे व्यवहारोऽपि ग्रीसभारतवर्षयोः सम्बन्धं ज्ञापयति (दीङोनुडचि+दीनारः सुवर्णाभरणम्). भट्टोजिदीक्षितादिमते दीनारः सुवर्णाभरणम् । मनुस्मृतौ दण्डिमते पञ्चतन्त्रादौ च दीनारः सुवर्णमुद्राविशेषः । यद्यपि रोमग्रीसयो रौप्यमुद्राया दिनेरियस इति सञ्ज्ञा भारते तु सुवर्णमुद्रायास्तथापि भारतस्योभाभ्यां देशाभ्यां सहैतत् सम्बन्धं ज्ञापयति ।

दक्षिणदेशे च पाण्ड्या राजान आसन् । तैस्सह रोमराजस्याऽऽगष्टसस्य (Augustus the Emperor of Rome) मैत्र्याऽऽसीत् । पञ्चाशीत्यधिकैकशततमे क्रीडामहोत्सवप्रसङ्गे (Olympiad) भारतीयः पाण्ड्यराज अगस्टसस्य समीपं सन्धीच्छया शिष्टगणं प्राहिणोदिति **जोर्जियससिंसेलसः** (Georgius Syncellus) ब्रूते । खीष्टजन्मनस्तृतीयशताब्द्यां पेरिप्लसमेरिस इरिथ्रीकि कथनानुसारं मदुरापत्तनं पाण्ड्यानां राजधानी बभूव । तत्र च नद्याः पुलिनतले लब्धेभ्यो बहुभ्यो रोमराजमुद्राङ्किततान्रकार्षापणेभ्यस्तत्रैव रोमकाणामपि पूर्वमुपनिवेश आसीदिति **सैवेल** (Sewell) महोदयस्य मतम् ।

वर्तमानाऽऽयुर्वेदस्येतिहासकालो बौद्धधर्मप्रादुर्भावकालादारभ्यते । यदि वयमुपर्युक्तानीतिहासप्रमाणानि सूक्ष्मतया विचारयामस्तदोपर्युक्तपाश्चात्यजातिद्वयस्य ज्ञानविज्ञानविचारव्यवहारा भारतीयैः सहाऽभवन्नित्यद्युग इति नूनमवगम्यत एव । बौद्धानां धर्मस्तु बहिरेव विस्तारमवाप्नोत्ततश्चाऽस्याऽनुयायिनां स्वजन्मभूमिं प्रति प्रवृत्तिमुदपादयत् । धर्मक्षेत्रदर्शका अन्ये च भारतीयानां धर्मक्षेत्राणि विद्याकेन्द्राणि च द्रष्टुमारब्धवन्तस्ते तक्षशिला (Taxile) नालन्दा (Nalanda) प्रभृतीनि विद्याकेन्द्राणि ददृशुः । यद्यपि बौद्धा राजानः शारीरज्ञानाय चिकित्साया अपि शल्यक्रियां प्रतिषिध्याऽऽयुर्वेदस्यैतन्मुख्याङ्गं सत्रुटि विदधुस्तथाप्यशोक, **बिम्बसार, नागार्जुना**दयो बौद्धा राजान आयुर्वेदमुपकृत्य मनुष्याणां पशूनाञ्च हिताय चिकित्सालयानने-

नाऽसम्भवाः । अपूर्णता चाऽऽवश्यकी । किन्तु स्वोपपत्तिपर्याप्ततायां स्वसत्यत्वे च नूनं विश्वसिमि । भारतीयेतिहासज्ञा आयग्रीसदेशस्थापनेतिहासं प्राप्य तदा प्रसत्स्यन्ति यदा ते तत्रापि जैनन्यायवादं पूर्णतया द्रक्ष्यन्ति । यद्यप्ययं विदुषां मतभेदस्य नाऽविषयः किन्तु सर्व एव सन्देहा इतिहाससत्यत्वे परिणता भविष्यन्ति' इति । उभाभ्यामुपर्युक्ताभ्यां जातिभ्यां तयोश्चाऽऽचारादिसम्पदा सह भारतीयानां यः सम्बन्धः स केवलं कल्पनारूढो न, न च शब्दशास्त्रलब्धमनोभावपरिणामः किन्तु बहूनां विदुषां शब्दशास्त्र (Philology) पुराणाऽध्यात्मशास्त्रेषु गवेषितमतानां संहतेश्चरमः परिणामोऽयम् । यद्यप्यत्र वयं शब्दशास्त्र—(Philology) लब्धान्येव प्रमाणानि मुख्यतया दर्शयितुं यतामहे तथापि तथ्यमन्यत्राऽपि लब्धमस्माभि र्नोपेक्षिष्यते । स्ववक्तव्येऽस्मिन् तदपि न हास्यामो यज्ज्ञानज्योतिः संस्कृतभाषया विश्वस्मै प्रदत्तम् । सर्वस्य जगतो ज्ञानज्योतिर्मूलमन्विष्यन्यदि कोऽपि प्रमाणार्हं साफल्यं लिप्सेत स भारतीयानामध्यात्मशास्त्रं, धर्मशास्त्रं पुराणानि साहित्यञ्च मूलभाषायामेवा (संस्कृते) ऽधील्य तेषां सद्योविचारजान् राद्धान्तान् दृष्ट्वा सत्यं परीक्षेत । सर्वमेव स्थूलं सूक्ष्मञ्च जगदुन्नतेः कारणं भारत एवोत्पन्नमिति यद्युच्येत तर्हि नैवैतदत्यनुचितम् । सर्वेषामेव विषयाणां मूलान्वेषणं यदि कोऽप्यारभेत तदैव स तदुत्पत्तिस्थानं तन्मूलभाषां, तत्प्रथमव्यवहर्तॄणां विचारान् सम्यक् परीक्षेत । समयनिर्धारणञ्चाऽत्रात्युपयोगि । न च वयमेतदुपेक्षामहे यच्छब्दपठनमात्रमितिहासतथ्यज्ञानाय नाऽलम् । तत्तु विश्वसनीयतापेतमनावश्यकमनर्घञ्च । किन्त्वन्यप्रमाणोपस्थितौ तदेवाऽऽचारव्यवहारेतिहासज्ञानायाऽसाधारणसाधनं भवति । यत अध्यात्मधर्माचारवादाभ्यां विना शब्दशास्त्रमनुपयोगि ।

कथं भारतीया एव विद्वांसोऽन्यदेशान् गत्वा समस्तजगतो मानवजाती र्ज्ञानाचारान् शिक्षयित्वोन्नता अकुर्वन्निति पाश्चात्यैरेव स्वमतं दर्शितम् । यद्यपि पौकाक् (Pococke) महोदयेन दर्शिता युक्तयोऽनेकैतिहासिकविरोधविरोधाऽक्षमास्तथाप्यस्माकमत्र वक्तव्यं पोषयितुं तासां पर्याप्तता स्वपद्धतौ च ता उत्तमाः ।

"किन्तु सम्भवत ईदृङ् न कुत्रापि समजनि यथा गुरुपरिणामभाञ्जि दीर्घकालवर्तीनि विस्तृतदेशव्यापीनि धर्मयुद्धानि भारतवर्षे प्रादुरभवन् । तेषां युद्धानां बहुयोद्धृगणनिर्वासनावधि नाजायत विरतिः । ये च तदा निर्वासितास्तेषां बहवो युद्धजीविनो वीरा अन्ये च भारतीयधर्माऽऽचारप्रचारकुशला उत्तरस्यां दिशि हिमालयाद् दक्षिणस्याञ्च सिंहलद्वीपात् (Ceylon) पश्चिमायाञ्च दिशि सिन्धुतीरमुत्तः पारं गत्वा यत्रयत्राऽऽनुकूल्यममन्यन्त तत्रतत्राऽवसन् । भारतीयविद्याकलाविज्ञानादीनाञ्च बीजवापं विदधिरे । यतश्च वर्तमानपाश्चात्य (European) विज्ञानकलाद्यङ्कुरितं पल्लवितं पुष्पितं फलितञ्च दृश्यते । महानदपूर इव भारतीयजनगणः पञ्चनद (Punjab) देशात्परं भारतसीमानमुल्लङ्घ्य कुल्याद्वारेव 'एशिया' (Asia) 'यूरोप' (Europe) महाद्वीपयोः स्ववंशबीजमावाप्य सर्वस्यैव जगतो भुवं सदाचारोर्वरां कर्तुं स्वविधेयमादर्शयत् । ततश्च भारते ब्राह्मणानुयायिनो बुद्धाऽनुयायिनश्चास्य दीर्घजीविनो मिथोविरोधस्य वीराः प्रतिद्वन्द्विनोऽभवन् । बौद्धधर्मिणां नेतारश्च तद्विरोधिभिः साधारणस्वत्वलसीम्नो बहिर्निष्क्रामिताः । आर्या हि तान् विजिग्यिरे । आर्यै र्विजिता बहिष्कृताश्च बौद्धाः स्वधर्मविश्वासं स्वाचार्यभक्तिं ज्यौतिषस्थापत्याभ्यां सह युद्धवाणिज्यादिषु च चमत्कारि कौशलं बैक्ट्रिया (Bactria), पर्शिया (Persia,), लघ्वेशिया (Asia minor), ग्रीस (Greece), फिओनीशिया (Pheonicia), आंग्ल (Great Britain), देशेषु नीतवन्तः । भारते तु मिथो धर्मद्वेषो दृढतामविन्दत । तदानीन्तनाश्चाऽऽर्याऽऽचार्याः स्वधर्मविरोधिनां (बौद्धानां) विरोधे निबन्धान् रचयित्वा जगुलेषु चाऽप्राकृतं वन्यकल्पं व्याख्यानं विधाय बौद्धनिष्क्रामणरूपं स्वपौरुषं बह्वमन्यन्त । तद्विज-

ते ततोऽप्यनेकेषु देशेषु विजित्य तांस्तान्देशान् भारतगौरवं दर्शयन्तो न्यवसन् । यो देशस्साम्प्रतं इंजिप्ट (Egypt) इति प्रसिद्धस्तस्य प्राचीनं नाम Mysser इत्यासीत् तच्च संस्कृतभाषायां मिश्र इति प्रसिद्धम् ।

अधोनिहितप्रमाणयुक्तिभ्यः समीचीनमवगतं भविष्यति यद्ग्रीसीयानां सर्वासाञ्च पाश्चात्यजातीनां सभ्यता ज्ञानविज्ञाने च भारत एव जन्म लेभिरे । ततश्च ते सर्वेऽपि भारतीयानामधमर्णाः । **पोकाक**नामकः कश्चित्पाश्चात्यपण्डितः स्वकृतौ (in India in Greece by E. Pococke) एतत्सविस्तरं दर्शितवान् । पाश्चात्यज्ञानविज्ञानमूलभूता ग्रीसीयानां विद्यासम्पद्भारतीयविद्यासम्पदो दुहितेति स आशेते । अस्माभिः पूर्वमुक्तमेव यन्मिश्रीयास्तिद्देशज्ञानकीर्तिसम्पदश्च भारतमूला एवेति ।

ग्रीसीया मिश्रीयेभ्यो विद्या गृहीतवन्त इति सर्वेषामेव पाश्चात्यानां विदुषां मतम् । किन्तु Pococke महोदयोऽन्यदेव स्वमतं दर्शयति यथा—"अहं ता मानवजातीरुल्लिखिष्यामि या भारतपश्चिमदेशादन्तर्धाय पुनर्ग्रीसदेश उदिताः । येषां राजवंशानां युद्धकौशलजनितानि यशांस्यद्यापीतिहासग्रन्थेषु साभिमानमुल्लिख्यन्ते । ये च भारतस्य पश्चिमोत्तरदेशवासिन आसन् । येषाञ्च योद्धृगणः ट्रोयीययुद्धे (The Battle of Troy) पराक्रममदर्शयत् । वस्तुतश्च **पौसीडन** (Poseidon) **ज्यूस** (Zeus) योः कल्पितदेवत्वादारभ्य ट्रोयीय युद्धावधि (Trojan war) तेषां भाषा-स्वभावः—धर्मः सन्धिविग्रहादिनियमाश्च साक्षाद्भारतीया एवाऽभवन् । एतत्प्रमाणीकरणे बहुदं स्वमतं स्थापयिष्यामि—बहु च भविष्यद्विचाराऽधीनम् । तथापि यावन्मया सम्यगन्वेषितं तावदपि मम मतस्थिरीकरणायाऽलम्, तस्मादेवाऽयं निश्चयो मे जायते **इभिमेरसो** (Evemerus) मन्यते—*'पूर्वं केऽपि मनुष्या जेतारो राजानो मानवजातिहितकृतश्च भूत्वा (भारतीयाः) हीनतामाप्नुवन् । इति तस्य नाऽतथ्यकल्पनम् । यद्यस्मिन्विषये [illegible]

[illegible] (Athenians) आटाकृथोनियानां (Authocthons) घासजीविनामन्येषाञ्च वास्तविकरूपदाने यत्नमकरवम् । ते हि साधारण्येन भारतीयाऽऽचारप्रतिभुव इव दृश्यन्ते । वर्तमानशार्मण्य (German) साम्प्रदायिकेश्वरवाद (Theology) वत्, **पैलीफेटस** (Paleaphatus) विकासवादवच्च न मत्कथनममूलमिति पाठकैः समीचीनं दृश्यताम् । मदुक्तिः सम्भवद्राद्धान्तान्नैव विशदीकरोति । तस्यास्तु निश्चितवृत्तमूलतायास्तत्र चोत्तमतया सोपपत्त्यनुवादाज्जटिलविचाराणाम् । विद्वान् **जैकबः** (Jacob Bryant) सपाण्डित्यमिममेव विचारमव्यवहार्यसाधनेन साधयितुं (भारतीयानां पाश्चात्यानामेकमूलत्वं) प्रकटयितुं बहु यतनमक्षपयत् । स विविधासु भाषासु तमेव निश्चयममार्गयत एकस्यामेव भाषायां (संस्कृते) लभ्यते । स्वचिकीर्षितमलब्ध्वैव स्वमतनिर्णयमसमाप्य चैतदितिहासवृत्तगवेषणं स उज्झाञ्चकार । अहन्त्वन्यदेशस्थितानां भारतीयानां मूलभाषादर्शितपथो यथाशक्ति स्वमतं दर्शयितुं प्रभविताऽस्मि । इतस्ततो विस्तृत स्वागमं विस्मृतां जनतां तस्याः क्षयवृद्धी च सम्यक् परीक्ष्याऽहं स्वाऽऽशयं प्रकटीकरोमि । येनोदारविचारेणेतिहासगवेषणावतां विदुषां पाश्चात्यराष्ट्रागमनिर्णयः सम्भाव्यते । यद्यपि ममैतस्मिन्नुभयजनतैकीकरणे दोषा

---

* सिसिली (Sicily) द्वीपांतर्गतमेसेनी (Messene) ग्रामवासी इभिमेरसः (Evemerus) स्वभाषायां भारतीयव्यवहारदर्शकानि नव पुस्तकानि **ईपा पेरेपेन**(Iepa Araypain) नाम्नाऽलिखत् तत्र । बहूनां देवानां नामानि वर्तन्ते ते च भारतीया इव भान्ति । स च पञ्चनददेशं यावद्यमव्यवहारादि द्रष्टुमभ्राम्यदिति पुरातत्वविदां मतम् इति **स्मिथ** (Smith) महोदयः स्वपुस्तके (in Greek and Roman Biography) दर्शयति ।

मन्यते । पाथेगोरसः शाक्यमुने र्लोकान्तरप्रस्थानात्परमचिरादेव स्वमतोपदेशं कर्तुमारभत । अतो न दृश्यते तन्मतेऽसङ्गतिः पौकक्महोदयस्य मते भारतग्रीसयो र्देशयोः परस्परं सम्बन्ध आसीदिति तस्योद्दिष्टसिद्धान्तं वयमाद्रियामहे। किन्तु बहुत्र युक्तीरुपेक्ष्य केवलमुत्कण्ठयैव तेन स्वग्रन्थे (India in Greece) यदुल्लिखितं तदुपेक्ष्यमाणा अपि वयं तस्योद्देशमत्र दर्शयामः ।

एतेन ग्रीसीयानां मिश्रीयाणाञ्चायुर्वेदोन्नतौ भारतीयानां प्रधानत्वमासीदिति नूनं वक्तुं शक्यते । इतिहासानभिज्ञा अपि भारतीयानामायुर्वेददिनकर उभयोरेवैनयोरुत्थानात्प्रागेवोदितवानित्यत्र नैव सन्देक्ष्यन्ति ।

वेदसंहितातः पुराणाः केऽपि ग्रन्था अद्यावधि केनापि नैव लब्धाः । आयुर्वेदविषयश्च वेदेषु सम्यग् लभ्यते अत आर्याणामायुर्वेदः सर्वमानवजातिवाङ्मयप्रारम्भादेव सत्तां धत्ते । यच्चदस्माभिरुपरि दर्शितम् तस्य सम्भवत्त्वे पौकक आदीनामितिहासगवेषकाणां मतानि ग्रीसीयादीनां पुराणकथासु भारतीयानामिव पृथग्देवताविशेषेभ्यो ज्ञानविज्ञानादीनामुद्भवश्च प्रमाणार्हतां दृढीकरोति ।

भारतीया रोमीयाश्च ।

के रोमीया (Romans) इति बहोः कालात्कतिपय पाश्चात्यविदुषां मनसि महानयं प्रश्न उदैत् । तैश्चैतस्मिन्विषये बहुपर्यालोचितम् । तेषामेकस्य प्रसिद्धस्य सम्मतिं वयमत्र दद्मः । **गायाकोमोबोनी** (Giacomo Boni) नामकस्य प्रसिद्धभारतीयपुरातत्वविदः स्मृत्युत्सवप्रसङ्गे **विकह्मस्टीड** (Wickham Steed) नामकः कश्चित् पाश्चात्यः (Review of Reviews) नाम्नि मासिकपत्रेऽत्र स्वमतमदर्शयत्—यच्च रोमे फौरम (Forum) विषये सोऽनुसमधात् । कुतो रोमीया जलप्रायामुपत्यकां पौरव्यवहारेभ्यः शवनिखननाय चोपयुक्काममन्यन्त, यत्र च टिबर (Tiber) नद्याः पूरेण सर्वदा अनिष्टशङ्का जायत इति बहोः कालात् सोऽचिन्तयत् । एकदा सहसैव स निरचिनोत्—प्राचीनलातीन (Latins) भाषार्यभाषैवासीदार्याश्च भारतोत्तरप्रदेशात् पर्शिया (Persia) लघ्वेशिया (Asia minor) द्वाराऽत्रागच्छन्निति । अत एव पूर्वे रोमराज्यसंस्थापकाश्च संस्कृतग्रन्थेषु विशेषतश्च धर्माचाराद्यधिकृत्य वेदेषु श्रद्दधुरिति स (Giacomo Boni) निरणयदिति स (Wickham Steed) मन्यते । फौरम (Forum) प्रहेलिकायाश्चोद्घाटनं वेदेष्वेव लप्स्यत इति स आशास्ते स्म । ततश्च स वेदाभ्यास एव चिरं न्यमज्जत् । अन्ते च सोत्कण्ठं स्वगवेषणासुफलं सर्वेभ्योऽघोषयत् तत्र (in Forum) शान्ते नदीजल पूरीभवति स्थले वा शवा निखाता भवेयुरिति तत्रत्यपूर्वपुरोहितानां सम्मतिरासीत् । एतदेव तं (Boni) स्वगवेषितं निर्णेतुं प्राभावयत् । प्रशान्तं जलं पूरीभवत्स्थलं पवित्रवर्त्म (Sacred way तेषां कल्पनैषा पुरासीत्) च कालेन भूगर्भगतान्युपर्युक्तकथनपरिचायकानि तत्रादृश्यन्त । प्राचीनतमलातीनीय (Latins) शवनिखननस्थलान्वेषणमेव तस्य विधेयतमं तदाऽभवत् । कियद्भ्योऽपि दिनेभ्यः पश्चाद्बोनिः (Boni) **स्टीड** (Steed) महाशयं प्रलापयन्त्र-(Telephone) द्वारा न्यवेदयन्मया स्वलिप्सितमलम्भित्वमपि तद्द्रष्टुमेहीति । **स्टीड** (Steed) महाशयस्तत्र गत्वैकं कृष्णमृन्मयं चिताभस्माधारं पवित्रमार्गसमीपे पङ्कसगभीरे दरेऽपश्यत् । अन्यानि च तथाविधान्येव कतिपयानि पुराणमृत्पात्राणि तत्राऽऽसन् । तेषामन्यतमस्मिन् शवभस्माप्यासीत् । निखातशवसूचकानि प्रत्यभिज्ञानानि च तत्रासन् । भारतीयरोमीययोरकमूलत्वप्रमाणीकरणे नव्यमेवैतत्संनादर्शि यतो भारतीयानामेवेयं शवदाहपद्धतिः । अनेन भारतेतिहासगवेषकाणां नव्यमेवोपकरणं दर्शितम् । (The Indian Daily Mail, Saturday the 5th September 1925)

योऽपि तद्विरोधिनिष्कासनात्तानूनयशाः । अत्रैव मिथोविरोधवत उत्साहस्येयं परिणति र्यदेशिया (Asia), महाद्वीपस्योत्तरप्रदेशतः कतिपयवर्षशतकावधि सर्वस्मिञ्जगति (भारत) भक्तेः प्रसरणम् । एतच्च सिन्धुनदपश्चिमप्रदेशात् ' हरक्युलीजस्तम्भावधि, (the Pillars of Hercules) स्वतेजःप्रसाराय प्राभवत् । एतत्सिद्धीकरणाय ग्रीसीयभाषायामेव यद्वा ग्रीकनाम्न्यां विकृतसंस्कृतभाषायां विश्वसनीयतमानि जाज्वल्यमानानि वर्तन्ते । बौद्धधर्मप्रचारक एक एव सिद्धान्त एकस्यामेव भाषायामासीत् । सा च विकृता संस्कृतभाषैवान्यदेशवासित्वादव्यवहृतेर्ग्रीसीये विकृताऽऽकारेणेव गृहीता । यज्जातिनामानि नदीनां पर्वतानाञ्च नामानि विकृतयापि माध्यमभाषया समीचीनं संस्कृतभाषायामनूदितुं शक्यन्ते । तन्ममैतस्मिन् कथने सत्यमतीव प्रमाणयितुं परं साधनम् । ये तु भाषाया रूपपरिवर्तनकारणानि विकारांश्च सम्यङ् जानन्ति ते ममैतन्मतं तत्र सत्यञ्च शब्दविकारान्वेषणशक्तिसारल्याभावाज्जवेन न मंस्यन्ते, इति स मन्यते ।

अयं ग्रन्थकारः कथं भारतीयै ग्रीसदेश उषितमिति प्रमाणयितुं सम्यग्यतत । अथ च शतशस्तत्र व्यक्तीनां नामानि ग्रीसीयदेवानां, तत्रत्यपर्वतनद्यादीनाञ्च नामानि ग्रीसीयभाषायां न कथमपि व्याकर्तुं शक्यन्ते प्रत्युत संस्कृते च सम्यग्व्याकर्तुं शक्यन्त इति स आशंसते । निरुक्तकारवद् व्यक्तिनामानि कमपि यौगिकार्थं नूनं बिभ्रति यतश्च तेषां प्रसिद्धिरिति तस्यापि मतम् । यदि कस्यापि देशस्य कस्या अपि जातेरितिहासः कथमपि नाऽवगम्यते तर्हि तद्देशभाषायां भूविभागनगरादीनां धर्मादिमतानाञ्च वाचकानि पदानि कया व्याकृतभाषया सह सङ्गच्छन्त कस्याश्च भाषाया विकृतानीव तानि पदानि ज्ञायन्ते इत्यन्वेषितव्यम् । एवं देशजातिप्रयुक्तनामदातॄणां तदागमेतिहासश्च सम्यक् भंस्यते । ग्रीसदेशस्य च स्टीम्फा (Stympha) दोनोदा Donoda) केम्बुनी मूटीस (Cembunii-Mootes) हेलोपीस (Hellopes) एथीसीस (Aithices) बोडन (Bodon) फोसीस (Phoces) लोएरी (Loeri) मैगनीसिया (Magnesia) थीसप्रोशिया (Thesprotia) ब्रेटिया (Bretia) आरकेडिया (Arcadia) इत्यादीनां भूभागनगरादिनाम्नां ग्रीसभाषाया व्याकृतिरनुवादश्च नव भवितुं शक्नोति किन्तु गीर्वाणभाषया तद्रूपं नातीव दुष्करम् । यद्यपि अनेन (Pococke) दर्शिताः सर्वा एव युक्तयो जवेन केनापि मानयितुं न प्रमाणवत्यः किन्तु वयमत्र तदुक्तिं सर्वथैव नोपेक्षामहे । पलासीजी (Palasegi) इति ग्रीसीयजातिवाचकः शब्दः पलाशशब्दस्यैवापभ्रंश इति सोऽनुसन्धत्ते । पैलास (Pelasa) शब्दो बूटिया (Butea) फ्रोदोष (Frodosa) शब्दो च पलाशशब्दादतीव विकृतापभ्रंशाः । पेलासका (Pelaska) शब्दस्तु पलाशशब्दस्य न बहुनिकृतोऽपभ्रंशस्ततश्च ग्रीसीयभाषायां पेलासगो (Pelasgos) शब्दो विकृतीभूतः । बौद्धसमये हि मगधदेशो (Modern Bihar) बौद्धधर्मस्य दुर्गायितं केन्द्रमासीद्ब्राह्मणाश्च तं धर्मं जुगुप्साञ्चक्रुः । यं प्रदेशं बौद्धा विहार इति वस्तुतस्य नाम पूर्वं मगध इति बभूव । मगधशब्दादेव मैकडोनिया (Makedonia) इत्यपभ्रंश शब्दस्योत्पत्तिः । महाभारतकाल मघनाम्न ऋषे र्गोत्रजा ब्राह्मणा अस्मिन् प्रदेशे स्ववसतिं स्थापयामासुरिति बहूनां पाश्चात्यानां विदुषां मतम् । पेलास (Pelasa) सिकद (Sikada) मगध (Magadha) विहार (Bihar) इत्येतानि नामान्येकस्यैव प्रदेशस्य पूर्वं व्यवजह्रिरे । बौद्धानां जैनानाञ्च यतिमठानां विहार इति संज्ञा भवति तद्बाहुल्यादस्य प्रदेशस्यैतदभिधानम् ।

पौकक महोदयस्तु सेण्डिनेव्हियस (Scandinavius peninsula) पुथागोरा (Gr. Puthagorás, Eng. Pythagorus) शब्दयोरपि स्कन्धनाभबुद्धगुरु (अत्र बहुव्रीहिसमासः) शब्दाभ्यामुत्पत्तिं

एतादृग्भिरनेकै र्वाक्यैर्नूनं ज्ञायते ग्रीसीया एव भारताद्विद्यां वित्तञ्च लब्धुमचीकमन्त। भारतीयेतिहास-पुराणादिषु ब्रह्मण आरभ्य सुदीर्घाऽऽयुर्वेदाचार्यपरम्परा वर्तते। तद्यथा—ब्रह्मा दक्षं, स चाऽश्विनौ, ताविन्द्रं भरद्वाजं, स आत्रेयं धन्वन्तरिं वा, तौ पृथग्बहूनन्यानाऽऽयुर्वेदमध्यापयामासुः। दक्षः प्रजापतिरदितेः पुत्र इति ऋग्वेदे लभ्यते[1]। आयुर्वेदाऽऽचार्यपरम्परा ब्रह्मदक्षाभ्यामारभ्य नागार्जुनान्ता नापेक्षत एकस्य बाह्लीकस्य बहुर्वाचीनस्य स्वत्रुटिपूर्तये प्रवेशम्। हिपोक्रीटीसः पष्ट्युत्तरचतुःशततमे खिष्टात्पूर्वेऽब्दे जातः। काशी तु ततो बहुपुराणी वर्तते। बुद्धः काश्यामेव प्रथमं स्वमतोपदेशमकरोदतो बुद्धसमये काश्या गौरवाऽवस्था सम्यगनुमीयते। ततोऽपि पुराणेषु पुराणेतिहासेषु हरिश्चन्द्रकथायामपि काश्या वर्णनं वरीवर्ति। अतो हास महोदयस्य रचनं नैव मान्यम्।

भारतीया आरबीयाश्च.

पाश्चात्यविज्ञानसम्पदो मूलं ग्रीसरोमयो र्देशयोरङ्कुरितमभवत्। किन्तु बहवो यूरोपिया आरबीयभाषा-लिखितेभ्यो ग्रन्थेभ्योऽप्यस्माभि र्महार्घं विज्ञानमलम्भीति स्वीकुर्वन्ति। एतत्तु स्पष्टमेवारबीया बहवो विद्वांसो भारतीयविद्याकेन्द्रेषु स्वदेशे वा भारतीयेभ्यो विद्या लेभिरे भारतेन सह सुदीर्घकालस्थाय्यारबीया राजानो वणिजश्च सन्धानं दधुरिति च। बगदादसम्राजो राजसंसदि भारतीया बहवो विद्वांस आमन्त्रिता आसन्। आरबीयैरङ्कबीजगणितशास्त्रे भारतीयेभ्य एवाधात इति तत्रत्य वृद्धदन्तकथा नाऽसत्यमूलाः।

रायमहोदयः (Dr. P. C. Ray. D. Sc.) स्वकृतौ (In The History of Indian Chemistry Ch. VI.) मुहम्मदीया आयुर्वेदमधिकृत्य भारतीयानामधमर्णा इति स्वप्रमाणं प्रकटयति तद्यथा—किताब–उल–फिहरिस्त ग्रन्थकारो यः खिष्टीय दशमशताब्द्या मध्येऽभवत्, हाजी खलीफा, इब्न–अबू–उसे बियाहः, यौ च खिष्टीय त्रयोदश शताब्द्यारम्भे अभूताम्, स्पष्टमेवोल्लिखन्ति—हारुं (Horun) मन्सूर (Mansur) योरनुज्ञया बहव आयुर्वेदग्रन्था द्रव्यगुणग्रन्थाश्च संस्कृतभाषाया आरबीयभाषायामनूदिताः—इति।

बहुना यत्नेन एनेलेक्टामेडिका (Analecta Medica) ग्रन्थकार डिज (Deitz) गेश्चिचूटे डेर अरब अर्जचटे (Geschichte Der Arab Acrzte) ग्रन्थकारः क्यूरेटन (Cureton) फ्लुगल (Flugel) मूलर (Muller) प्रभृतिभ्य आरबीयेतिहासगवेषकेभ्य इदं सर्वं सूचनमलम्भि" इति।

एच. एच. विलसन (H. H. Wilson) नामकः कश्चित्पाश्चात्यपण्डितः "वैद्यकशास्त्रे, निदानतन्त्रं विषचिकित्सा स्त्रीरोगचिकित्साऽन्यच्च यद्यदायुर्वेदविज्ञानमारबीयेषु प्रचलितं व्यवह्रियमाणञ्च पूर्वमासीत्तत्सर्वमेव मूलतोऽनुवादतो वा पार्शीय (Persian) वाङ्मयप्रचारात्पूर्वमेव **हारून्** (Harun) **मन्सूर**-(Mansur) यो राज्यं शासतोरारबीय भाषायामनूदितानीति साक्षाद्बहूनि प्रमाणानि लभ्यन्ते" इत्येकस्मिन् पत्रे स्वाशयं प्रकटयति।

"अरबदेशे हारूं उल्-रसीदनामकः सम्राट् यदा केनापि दुश्चिकित्स्येन रोगेणाऽऽक्रान्त आसीत् तदैकेन मङ्ख (Mankh) नामकेन भारतीयेन नीरोगः कृतस्ततःप्रभृति स तत्रैव (बगदादराजधान्यां) राजकीय-

---

[1] भूर्जज्ञ उत्तानपदो भुव आशा अजायन्त। अदितेर्दक्षो अजायत दक्षाद्वदितिः परिः॥ ऋ० वे० १०। ७२। ४ भूरुत्तानपदोवृक्षान् जज्ञे तथा भुवः सकाशादाशा अजायन्त तथा अदिते दक्षः अजायत उत्पन्नः दक्षाद्व दक्षादपि अदितिः पर्यजायत। सायण भा०

पुराणेतिहासाख्यानजनश्रुत्यनुसारं ब्रह्माऽऽयुर्वेदशास्त्रस्य प्रथम आचार्यो मन्यकारश्च । सुश्रुतचरकसंहिते अपौरुषेयमेव मन्येते मिश्रीयाणामायुर्वेदाचार्यः थौथः (Thoth) आसीत् । स च बहूनां पुरातनमिश्रीयायुर्वेदग्रन्थानां रचयिता समभवत् । मिश्रीयाणां पुराणमते ओसिरिसो राजा (King Osiris) तस्य पुत्रो हार्न्सः (सूर्यदेव इति मतः Horus the Egyptian Sun god) चायुर्वेदाविष्कर्तारौ स्तः। यदि भारतमिश्रयोस्तुलना क्रियेत तर्हि यथाऽत्र ब्रह्मदक्षादयः क्रमेणायुर्वेदाचार्यास्तथा तत्रापि थौथोसिरसहार्न्सास्ते । मिश्रीयाणां थौथस्य ग्रीसीया हेर्मीस (Hermes) इति नामाहुः । ग्रीसीयाश्चेतिहासज्ञा एव हेर्मीसस्य भारतीयप्रभवत्वं मन्यन्ते तस्यैव च नाम्ना देवद्रुमनामन्यपि वदन्ति । भारतीयदेवभाषया वाल्मीकिरिव ग्रीसीयकाव्यस्याद्यो होमरः (Homer) कविः । तस्यैव इलियाड (Iliad) नामनि ग्रन्थे तस्मिन्देशे सर्वतः पूर्वं दृश्यते चिकित्साविषयः । भारते तु ततोऽपि बहुपूर्वभवे महाभारते शल्यतन्त्रस्यान्यस्य च चिकित्साशास्त्रस्य विद्यमानत्वं दृश्यते तद्यथा—

उपातिष्ठन्नथो वैद्याः शल्योद्धरणकोविदाः । सर्वोपकरणैर्युक्ताः कुशलैः साधु शिक्षिताः ।
तान् दृष्ट्वा जाह्नवीपुत्रः प्रोवाच तनयं तव । धनं दत्त्वा विसृज्यन्तां पूजयित्वा चिकित्सकाः ॥
एवं गते मयेदानीं वैद्यैः कार्यमिहास्ति किम् । क्षत्रधर्मे प्रशस्तां हि प्राप्तोऽस्मि परमां गतिम् ॥
नैष धर्मो महीपालाः शरतल्पगतस्य मे । एभिरेव शरैश्चाहं दग्धव्योऽस्मि नराधिपाः ॥
तच्छ्रुत्वा वचनं तस्य पुत्रो दुर्योधनस्तव । वैद्यान् विसर्जयामास पूजयित्वा यथार्हतः ॥

महाभारते भीष्मपर्वणि अ. १२१

इममेव शल्यतन्त्रविषयमधिजिगीषुः कचो दैत्यगुरोरन्तेवासी बभूवेति च पौराणिकी कथाऽत्र प्रमाणम्।

ग्रीसीयानां वृद्धकथाऽनुसारं हीपोक्रीटीसः (Hyppocrates) पाश्चात्यायुर्वेदस्य जनकः । तत्तोपक्रमे निद्रादेव्या मन्दिरे गत्वा तत्र मनोभावपरिवर्तनेन रोगनाशो जायत इति लभ्यते । आर्याश्चिकित्सका अपि मानसोपक्रममित्यमेवाशेरते । साम्प्रतं यो विधिर्नव्य इव पाश्चात्यैः Hypnotism इत्युपयुज्यते सोऽस्माकं प्राचीनानामृषीणामेव सिद्धान्तः । भारतमिश्रयोः प्राङ् नासीचदनभिज्ञता । भगवता धन्वन्तरिणा शल्यतन्त्रप्रधान आयुर्वेदः काश्यामध्यापितः । हीपोक्रीटीसेन (Hyppocrates) तु ग्रीसदेशे कौस-(Cos) नाम्नि मन्दिर आयुर्वेदप्रयोगोऽकारि । अत्र साम्यमिवाऽऽभाति । अत एव हास (Mr. Haas) महोदयो हीपोक्रीटीसं धन्वन्तरेः कौसस्थानञ्च काश्या अपरनामन्येवेत्याशिश्ये । तस्य मतन्तु स्पष्टमेवाऽमान्यम् । यत एकदेशगतं साम्यं न तुलनामर्हति । काशी तु न्यूनतोन्यूनं चतुःसहस्रवर्षपुराणी. नैव कौसस्थानापरनामवती इति सुव्यक्तमेव तस्य काश्या अतीव कनिष्ठत्वात् । शतपथब्राह्मणमहाभारतादिष्वतीव पुराणेषु ग्रन्थेषु काश्या नाम वर्तते । द्वौ ग्रीसीयवैद्यौ टेसियस मेगस्थनीजौ भारतोत्तरदेशान् दृष्टवन्तौ तत्रोषितवन्तौ च । प्रागाचार्याणां कालनिर्णयो बह्वल्पांशयोरनिश्चितरूप एव भारतीयपुराणजनश्रुतिषु. इति मन्यमानोऽपि हार्नले महोदयो न्यूनतोन्यूनं खीष्टाब्दारम्भात् षट्शतवर्षपूर्वं सुश्रुतचरकयोः कालं निरधारयत् तन्मतन्तु—"एवं सति हीपोक्रीटीससम्प्रदाये मानवशरीरशल्याक्रियायाः किमपि प्रमाणं न वयं लभामहे । किन्तु खीष्टाब्दारम्भाच्चतुःशतवर्षपूर्वं टेसियसो (Ktesias) भारतमागच्छत् । अतो ग्रीसीयानां शारीरशास्त्रोद्भवो भारत एवेति नैतदुपेक्षितुं क्षमामहे ।" इतीह वर्तते ।

स्गतिमरुन्धन्। ततः परं मुगल (Moghal) शासका अपि बहून् संस्कृतज्ञान् विदुषो नियोज्य पार्शीयभाषायां बहूनां संस्कृतग्रन्थानां बहूनाञ्च विषयाणामनुवादं कारयित्वा बहुं भारतीयं पुराणं ज्ञाननिधिं स्वोपयोगिनं भावयाम्बभूवुः।

भारतस्य दक्षिणेऽपि प्रदेशे पूर्वमासीद्विस्तृतमार्यक्षत्रियशासितं राज्यम्। तस्य राजधानी विजयनगरपत्तनमभवत्। यदा मुहम्मदीया भारतोत्तरप्रदेशानुपप्लुत्य विजित्य च बह्वीं भारतीयपुराणकला विनाश्य प्रायः सर्वेषामेवोत्तरप्रदेशानां यथा तथा शासनं कर्तुमारभन्त तदा दक्षिणदेशे विजयनगरराजधानी धर्मविद्याकलावाणिज्यादिषु परामुन्नतिं भजन्ती स्वकीर्तिवैजयन्तीमुच्चैर्दीपयन्त्यासीत्।

भारतपश्चिमप्रदेशजाः बह्व्यो जातयो नाविककर्मणि कुशला आसन्। ता नाविककर्मणि नियोज्य बहवो भारतीया अरबदेशेन सह वाणिज्यसम्बन्धमधुः। यदोत्तरप्रदेशेष्वन्वहं भारतीयमुहम्मदीययोः कलहा युद्धानि चाऽजायन्त ततो वाणिज्यमपि विस्तारं नाऽलभत। किन्तु विजयनगरराजधानी तदा परैर्दुरासदाऽऽसीद्यत्र राजानो विद्वांसो वणिजश्च यथास्वं स्वधर्मविद्याकलाविज्ञानवाणिज्ये यशसः परां सीमानमधिगत्याऽऽरबीयान् स्ववाणिज्यविज्ञानादिविस्ताराय भारताभिमुखमाचक्रुषिरे। भारतमाजिगमिषतामयुयुत्सतामारबीयाणां तु शान्त्या स्वेप्सितलाभाय तदेवस्थानं तदोपयुक्तमासीत्। तस्योर्जितस्य राज्यस्य पतनात्पश्चादपीतस्ततो विकीर्णौ धनविज्ञानसम्पदो वाञ्छन्त आरबीयास्तत्र बहुवारमयुः। तदापि सर्वं विनाश्य तत्र विज्ञानकलानां नाऽजायत सर्वथाऽदर्शनम्। स्ववैभवकाले तद्देशशासकैरायुर्वेद उपेक्षित इति तु निसर्गविरुद्धमेव। आसन् हि तत्र बहवो राजकीयचिकित्सालया आयुर्वेदविद्यालयाश्च। यदा वाणिज्यायाऽत्रागता आरबीया पार्शीयाश्च तत्रत्यं राजन्यवहारं दृष्ट्वा तच्छास्त्रमधीत्य स्वदेशमीयुस्तथैव भारतीयमायुर्वेदमप्यधीत्य स्वदेशं गत्वा तत्रैता भारतीयज्ञानसम्पदः प्रचारयामासुः। **सुलेमान**नामको बसरापत्तननिवासी कश्चिन्मुहम्मदीयो नौवणिक् विजयनगरं दृष्ट्वा यदा स्वदेशं गतस्तदा आरबीयभाषायां विजयनगरवृत्तान्तमलिखत्। विजयनगरे आयुर्वेदोन्नतिः कथं स्यादित्युपायचिन्तनं तदनुष्ठानञ्च राज्ञो व्यसनमिवासीदिति।

आयुर्वेदस्य मध्यकालः

आर्याणां सकलविद्यानिधाने वेदे पूर्वतम आयुर्वेदाचार्यो भिषक् च रुद्र आसीदिति "प्रथमो दैव्यो भिषक्, यजु० १६।५" "भिषक्तमं त्वा भिषजां शृणोमि, ऋक्० २।७।१६" एताभ्यां वाक्याभ्यामवगम्यते। एतदादीनि वाक्यानि पुरातना वैदिकर्षयो भिषजामतीवाऽऽदरं व्यधुरिति दर्शयन्ति। पृथक् चैतच्छास्त्रं (चरणव्यूहानुसारमृग्वेदस्याऽऽयुर्वेद उपवेदः सुश्रुतादिमते त्वथर्ववेदस्य) मुपवेदत्वाद्वेददेशीयमेव। किन्तु मध्यकाले वैद्यानामुपयोगित्वे सत्यपि नासीद्वेददर्शित इव समादरः।

बहवश्च तथ्या आयुर्वेदविषया अतीवपुराणे शुद्धवेदयुगे अधीयमाना व्यवह्रियमाणाश्चाऽऽसन्। वेदानामेकदेशिपाण्डित्यं भजतां हस्तगतत्वादुचितानुचितयज्ञादिकर्मपरैर्व्याख्यातत्वादितस्ततोविकीर्णा विरूपीकृताश्च ते विषया अथ श्रमेण वेदेभ्यो लभ्यन्ते। ये ब्राह्मणा यथा कथमपि सदसद्वा यज्ञकर्मैव चरमं वेदोद्देशममन्यन्त तैर्महार्घविश्वोपयोगिचिकित्साविषयदर्शकानामपि वेदमन्त्राणां स्वार्थसाधकान्येव व्याख्यानानि कृतानि। अतो वैदिकाऽऽयुर्वेदज्योतिरपि सीमाधिकानेकयज्ञरजआच्छन्नमभवत्। किन्तु दिव्याऽऽयुर्वेदाचार्यास्तमेव वैदिकं विषयं पृथगुपादिशन् तथापि सूत्रादिग्रन्थनिर्माणसमये चरकसुश्रुतयोः पूर्वं नाऽभवद्यथार्हा आयुर्वेदसम्पदो वृद्धिः। किमत्राऽऽसीत्कारणमिति सोपपत्ति वक्तुं न शक्यते। कर्मकाण्डयुगे (सूत्रग्रन्थनिर्माणयुगे) वैद्यकवृत्ते नासी-

चिकित्सालयाध्यक्षपदे सम्राजा नियोजितस्तेन च सशरद्ग्रन्थः (संस्कृतभाषायाः सुश्रुतशब्दस्याऽपमपभ्रंशः) अरबभाषायामनूदितः" इति किताबुल्फ़हरिस्त (Kitab-al-Fihrist) ग्रन्थकारः फ्लूजलः (Flugel) ब्रूते " इति पी. सी. राय. (Dr. P. C. Ray, D. Sc.) महोदयस्य मतम् । वयं चाऽऽरवीयविदुषां विशेषतश्च हाजीखलीफानामकस्य विस्तृतानि प्रमाणभूतानि वाक्यानि दृष्टो यदारवीयैः सेर्ष्य-सम्राजसंसदि तत्रोपितुं प्रलोभितेभ्यो भारतीयभृतकाध्यापकेभ्यो ज्यौतिषबीजगणिताऽऽयुर्वेदा अधीता इति । मुहम्मदीया विद्यापिपासोत्कण्ठिता भूत्वा भारतीयविद्याकेन्द्राण्यागत्य ज्ञानसुधां पपुः । येनाविकृतभाषया विद्यां लब्धुं तदा भारतयात्राऽकारि स तेषु बहुमानमलभत । मध्यकाले तु भारताऽरबदेशयो नौस्थलमार्गाभ्यां मिथो वाणिज्यव्यवहार आसीत् । सिष्टीयाष्टमशताब्द्या आरम्य प्रायः सहस्रवत्सरावधि मुहम्मदीयाः पुनः पुनः भारतमुपाप्लवन्त । तदारम्य एव चारबीयवाङ्मयस्योपः कालोऽजनि । तदैव च तद्भाषायां बहवो विज्ञानग्रन्था अलिख्यन्त । अयञ्च नव्यः पूर्वदेशसम्बन्धो अरबीयेभ्यो बहून् विज्ञानविषयान् पर्शियातो भारताच्चानूदितुं साहाय्यमदित । तदा च मुहम्मदीयाः सिन्धुतीरदेशावधि भारतं प्रविश्यात्रत्यमूलभाषामध्येतुमारभमाणा आसन्। हारूं-उल्-रसीदः (७८६ खीष्टाब्दात् ८०८ खीष्टाब्यवधि तस्य कालः) बगदादराजधानीमध्यास्त । यत्र च तत्रोद्भूतानां विज्ञानानां केन्द्रमरिष्टशय्या चासीत् । तस्य सम्राजो राजसंसदि मुहम्मदीया भारतीय स्वविद्योन्नत्यै साम्येन साहाय्यमलभन्त । कायचिकित्सा शल्यतन्त्राद्यासु सर्वास्वेव विज्ञानशाखासु ये विद्वांस्ते देशजात्योर्विचारमविधाय समं सम्मानिता आसन् । अस्यैव राजसंसदि कतिपये मुहम्मदीयाः विद्येप्सवः तत्रस्थितेभ्यो भारतीयेभ्यो विद्या लब्ध्वा तत्पूर्णतायै मूलभाषायैवाध्येतुं छात्रा भूत्वा भारतमागच्छन् । अस्य शासनकाल एकस्समय आसीत् । यदा भारते विद्यामलब्ध्वा कोऽप्यारबीयः पण्डितः पण्डितो नाऽमन्यत सर्वैरित्थमनुमीयते आरबीयै ग्रन्थकारैस्सर्व एव संस्कृतशब्दाः स्ववर्णलिप्यो व्यवहृत्य बहु विकृतीकृता इति गच्छति काले विकारपरम्परां भजन्तस्त एव शब्दाः पृथगन्यभाषाया इवाद्याभासन्ते । तदानीञ्च पेल्ह्वि (Pelhvi) इत्याद्याः कत्यपि आरबीयपार्शीयेभ्यः पृथग्भाषा आसन् याः संस्कृताऽपभ्रंशरूपाः भारतपर्शिया रबदेशानां माध्यमिकत्वेन व्यवह्रियन्त । यदि ताभिर्भाषाभि र्भारतीयविद्या आरबैरन्यैर्वा अधीता अभवन् तदा भाषाविकारो नाऽसम्भवः । शब्दा एकभाषातोऽन्यभाषामेकलिपितोऽन्यलिपिमेकदेशादन्यदेशं यदा यान्ति तदाऽविचिकीर्षिता अपि स्वभावत एव विकारमापद्यन्ते ततश्चान्यत्वं भजन्ति । एवमनिवार्येषु हेतुषूपस्थितेष्व-प्यद्यापि तत्रत्याऽऽयुर्वेदविज्ञानशाखावाच्याः बहवः शब्दाः स्वमूलभूतायाः संस्कृतभाषायाः शब्देभ्यो नाऽसङ्गतिं बहुभजन्ति यथा आरबीयभाषायां 'सरक' शब्दश्चरकशब्दस्य, 'सशरद्' शब्दः सुश्रुतशब्दस्य, 'वदान' शब्दो निदानशब्दस्य 'शङ्कुर' शब्दोऽष्टाङ्गशब्दस्य, प्रतिभाव्यं विकृतत्वञ्च सम्यग्दर्शयति । यद्यपि 'राय' महोदयप्रभृतयो निदानवदानशब्दयोरेकमूलत्वमेकार्थत्वञ्च मन्यन्ते तथापि सुश्रुतचरकयोरन्तरेव निदानोपस्थिते-र्र्थवैषम्याच्च पृथङ्निदानस्य कथं विद्यमानतेति नैतत्सन्देहापेतम् ।

पूर्वदर्शितकालात्परमारबीयविद्येप्सूनामन्य एव युगारम्भोऽजनि । ख्रिष्टीयैकादशशताब्द्याः प्रारम्भे गज़नी (Gazni) देशजो मुहम्मदनामको मुहम्मदीयसामन्तो बहूनां विदुषां विद्योन्नत्यै साहाय्यमदात् । स स्वयमपि भारतं विजिगीषु स्ततश्च धनलिप्सु स्तत्रत्या विद्याः स्वयं स्वपोषितविद्येप्सुद्वारा चाधिगन्तुं स्वसम्प्रदायवि-स्तारं चिकीर्षुश्च भारतमुपप्लवमानो कतिपयानि भारतीयविद्याकेन्द्राण्यलुण्ठत् । अस्मिंश्च काले भारतीयमुहम्मदीययो र्मध्ये युद्धानामुपस्थिते र्मुहम्मदीयानाञ्च धनादिलिप्साप्राचुर्यात् सौहृदरामविरहाच्च यद्यपि मुहम्मदीया-भारतीया विद्यास्तथा न ग्रहीतुमशक्नुवन् यथाऽन्येषु कालेषु, तथापि विद्यापरा एव ये तेषामासन् ते विद्याग्रहणेनैव

नाडीनां ' हिराः ' ' धमन्यः ' इति पृथङ्नामद्वयं तत्र वर्तते । अतस्त ऋषय एतत्सिद्धान्ताभिज्ञत्वेन सम्मानमर्हन्ति । हिराशब्दार्थोऽर्वाचीनसंस्कृतवाङ्मये शिराशब्देन बोध्यते । सुश्रुतचरकाभ्यां तु भूयोऽपि तद्व्याख्यानमकारि । यद्यपि सुश्रुतचरकयोराधुनिकपाश्चात्यविवृतिवत् सोपपत्ति सविस्तरञ्च विवरणं नास्ति किन्तु नासीत्तयोस्तज्ज्ञानाऽभावः । एतत्सर्वं सुश्रुते (शारीर अ. ७ इत्यादि) चरके (सू० स्था० अ० ३० इत्यादौ) च द्रष्टव्यम् । येन स्वाङ्ग्लदेशे नूतनतयैषराद्धान्त आविरक्रियत स आसीत्कश्चित्पाश्चात्यो हार्वे नामकः (Prophessór Harvey.1628. A. D.) यद्यपि हार्वेमहोदयस्यास्मिन्विषये भूरि विज्ञानवन्ति विवरणानि वर्तन्ते किन्त्वार्याणां पुराण एव स राद्धान्तस्तेन व्याख्यातो न नव्यः ।

एष राद्धान्तः कमप्यन्यशास्त्रराद्धान्तमाश्रयते नवेत्यालोचयामस्तावत् । रक्तस्य (हृदये) निर्गमप्रवेशावुच्छ्वासनिश्श्वासाभ्यां पृथग् भिन्नां विज्ञानज्ञेयक्रियामाश्रित्य वर्तेते । यद्यपि भौतिकविज्ञानानुसारं निर्गमप्रवेशावुच्छ्वासनिःश्वासौ च भिन्नत्वं भजन्ते तथापि जगदुत्पत्तिवादे (In Cosmology) स्फुरणमभिन्नवदिति मत्वैकरूप्येण प्रकृतिस्फुरणं कारणत्वेन मतम् । हिरण्यगर्भः (भौतिकेऽर्थे स्फुरत्प्रकृतिगोलः) प्राचीनतमभारतीयसर्गवादिभिः सर्वजगत्कारणमिति मतः । वेदर्षीणामपि स्फुरणं, सञ्चारः (रक्तस्यापि शरीरे), हृदये हृदयाच्च रक्ताऽऽगमनिर्गमौ स्फुरणंकर्म, चैतेषां पृथग्भावः समुदायेनैकभावश्च सुविदितावभूताम् । तैः शरीरे ये ये भावाः कर्माणि चाद्दश्यन्त त एव ब्रह्माण्डसर्गेऽपि, शरीरस्य ब्रह्माण्डाऽल्पप्रतिकृतिरूपत्वाद्वर्णिताः । पुरुषोऽयंलोकसम्मितः..........यावन्तो हि लोके भावविशेषास्तावन्तः पुरुषे यावन्तः पुरुषे तावन्तोलोके च० शा० ५. ३ एकस्यैव स्फुरणस्याऽऽकर्षणविक्षेपणकर्मद्वयत्वाद्गुणभेदात् ' अग्नीषोममयंजगत् ' इति जगदुत्पादनस्थापनविधायिकयोः शक्त्यो निदर्शनमकारि पूर्वतमै ऋषिभिः ।

एम्पीडोक्लीसः (Empedokles) यः सर्वपाश्चात्याऽध्यात्मवादजन्मदातु ग्रीसीयाऽध्यात्मवादस्याऽऽचार्यः ख्रीष्टात् चतुश्चत्वारिंशदधिकचतुःशततमे वर्षेऽजनि, स्वमतमित्थमेव प्रदर्शयति—आकर्षणशक्तिः (Love) विक्षेपणशक्तिश्च (Strife) मिलित्वा जगदारम्भकारणमिति । भूयश्चोभे एवैते शक्ती जगत्स्थितिकारणमिति च । **बरनेट** (Burnet) महोदयेनांग्लभाषायां तस्य मतमित्थं दर्शितम् तद्यथा—

" **एम्पीडोक्लीस** श्चतुर्भ्य एतेभ्यो भूतेभ्यः (पृथिव्यप्तेजोवायुभ्यः) अन्यदपि शक्तिद्वयं (Filia and neikos) मन्यते यतश्चोच्छ्वासनिःश्वासाद्यनुमीयते । स चैते शक्ती स्वरूपतः पृथङ्मन्यते । यथा चैतयोः शक्त्योः कर्मोत्पद्यते तत्सर्वमेव तेन क्लेप्सीड्रा (Klepsydra) परीक्षणे दर्शितम् । अस्माकमारम्भः परमाणुसंहतिरूपगोलकवत् (Like the sphere of parmadides) भवति, यत्र च चत्वार्येवभूतानि नीरक्षीर इव समवेतानि । प्रथमशक्त्या द्वितीया शक्तिश्च बहिरावृणोति । यदा द्वितीया शक्तिः शनैः शनैः तद्गोलकं प्रविशति तदा प्रथमा शक्तिश्चतुर्णां भूतानां मध्यतमं केन्द्रं प्रति बलाद्गच्छति येन च चतुर्ष्वेव भूतेषु ते शक्ती युगपत्प्रविश्य तत्तद्भूताऽनुकूलं कर्म तैः कारयतः । भूतानाञ्च पृथक् प्रत्यक्षं भवति । एकशरीरप्रादुर्भावस्य पुराणोऽयं राद्धान्तो ब्रह्माण्डनिर्माणराद्धान्तेन सङ्गच्छते । "

" सः (Empedokles) भूयोऽप्युभयजातीयं श्वसनं हृदयस्य (Systole and diastole) नामिकयोः शक्त्योरधीनमिति ब्रूते अतो ज्ञायते भूतसंहतेरुपमध्यं यदा विक्षेपणशक्ति याति तदाऽऽकर्षणशक्तिस्तस्या मध्यतमे भागे रुद्धा भवति तदा मिथो विरुद्धानां कर्मणामारम्भो जायते । परस्परविरुद्धयोः शक्त्योः कर्मणोर्जायमानयोर्विक्षेपणशक्तिराकर्षणशक्त्या जीयते बहिष्क्रियते च । तदा भूतसंहतिं प्रथमैव शक्ति

त्सम्यगादृतता जनैः । देवभिषजावश्विनौ बहूनां वेदसूक्तानां देवत्वं भजमानौ वेदैः स्तूयमानावपि न यज्ञभागमार्हतामिति वैद्यविरोधिभिराख्यायिका प्रकल्पिता । तौ च्यवनर्षिं वृद्धमपि स्वोपक्रमेण युवानं व्यधुस्ततः प्रभृति यज्ञभागमभजतामिति तत्कथाया उपसंहृतिः । ततोऽपि भिषजां सम्यगादरस्य नाऽऽज्ञायताऽवसरः । सूत्रकालप्रतिसंस्कृतेषु मन्वादिधर्मशास्त्रेषु तु स्वाहास्वधाप्रधानकर्मणो भिषजो निमन्त्रणमपि प्रतिषिद्धं दृश्यते तत्र कारणं त्वन्यदेवाऽनुमीयते । तद्यथा—भिषजो यज्ञकर्मणि वेदेऽदृष्टविधीनि सूत्रकल्पितगोमांसभक्षणसुरापानादिकर्मकाण्डपरकल्पितानि बहून्यन्यान्यप्येतादृंशि कर्माण्यहितानि मत्वा नूनं तन्निषेधं विधास्यन्ति यतो वैद्या हितकराण्येव कर्माणि धर्म इति मन्यन्ते, हिताहितविवेके च सर्वदा स्वचक्षुर्मनसी सावदधते । तादृशयज्ञकल्पश्च स्वकल्पितदेवताः प्रीणयितुं हितमहितं वाऽविचार्येन्द्रियविषयतर्पणं नैव हास्यन्ति ततश्च भिषग्यजमानयो मंत-वैषम्यमाशङ्क्यैव तत्र वैद्यानामामन्त्रणं कल्पितधर्मशास्त्रविरोधि ते मतम् । वयं विश्वस्ततया सूत्रकाले किमायु-र्वेदस्य विकासाभावकारणमिति सप्रमाणं वक्तुं न शक्नुमः । बहूनामायुर्वेदग्रन्थानां तदानीन्तनानामन्यानेक-विविधविज्ञानग्रन्थानामिव केना[illegible] आसन् तेभ्योऽर्वाचीनग्रन्थानां [illegible] । यथा पाणिनीयव्याकरणोत्पत्ते बहूनां पुराणव्याकरणानां लोप इवाऽजनि ।

आयुर्वेदस्य प्राक्कालः

आयुर्वेदमन्तर्भाव्य सर्व एव ज्ञानविज्ञानविषया वैदिकर्षिभिः पूर्वं वेदद्वारा मूलरूपेण विकासरूपेण वा दर्शिता इति सर्व एव वयमार्या विश्वसिमः । अर्वाचीनाऽऽयुर्वेदेतिहासश्च बुद्धकालमारभ्य खिष्टीयाऽष्टमशताब्द्यवधि वर्तत इति प्रायः सर्वेषामितिहासविदां मतम् । तस्मिंश्च काले सुप्रसिद्धाः सर्वसम्मताः सुश्रुत-चरकादयो बहव आयुर्वेदग्रन्थाः प्रतिसमस्क्रियन्त व्यरच्यन्त च । तदैव चाऽन्यानां प्राचीनाऽऽर्षग्रन्थानां प्रतिसंस्करणं सूत्रग्रन्थानाञ्च प्रचारप्राचुर्यमभवत् । ततः पूर्वः काल आयुर्वेदोन्नत्यकरणेन न परिवादभाग-नम् । तदा तु व्याकरणमध्यात्मवादैकदेशविषयश्चान्तरा प्रायेण न किमपि शास्त्रमुन्नतिं लेभ इतीतिहासविदां निर्णयः । प्रायेण सर्व एव विषया अवसरप्राप्तामेवोन्नतिं लभन्ते । तस्मिन् काले तु सुखेन कालं नयन्त आर्या रोगाऽबाहुल्याद्बाह्याभ्यन्तरोपप्लवादिविरहाच्च धर्मादिविषयस्यैव व्याख्यानं स्वविद्याफलं मेनिरे । अत एव तदोपनिषदामारण्यकानाञ्च प्रचारप्राचुर्यवृद्धयोऽजायन्त । एवञ्च गच्छति साङ्ख्यवैशेषिकादिभौतिकविषयाणां बहूनां ग्रन्थानां जन्मविस्तारवृद्धयो जाताः । ततः परमायुर्वेदविस्तरे चैते विषयाः स्तोकं साहाय्यमकुर्वन् ।

वयमत्र भारतीयान् वेदकालप्रसिद्धान् कतिपयानायुर्वेदविषयान् दर्शयामः । सर्वतः पूर्वं रसरक्तसञ्चार-विषये वक्तुमुचितम् । अथर्ववेदद्रष्टार ऋषय इमं सिद्धान्तं सम्यगवागच्छन् । यत उभयविधरक्तवाहिनीन

१. युवं च्यवानं जरसोऽमुमुक्तंनिपेदव ऊहथुराशुमश्वम् । निरंहसस्तमसः स्पर्तमत्रिं निजाहुषं शिथिरे धातमन्तः ॥ ऋ० वे० ७ । ७१ । ५ इत्यादि ।

१ सं वो मनांसि (अ० वे० ३-८ विनियोग) इत्यादि ।

" सं वो मनांसि, संज्ञानं नः " इति साम्मनस्यान्युदकलिजं सम्पातवन्तं ग्रामं परिहृत्य मध्ये निवपत्येवं सुराकुम्भं त्रिहायण्या वत्सतर्याः शकृन्ति पिशितान्याशयति भक्तं सुरां प्रपां सम्पातवत्त करोति इति (कौ० २-३) । अत्र सूक्ते विनियोगदर्शितानां विधीनां लेशोऽपि नास्ति ।

२ अहितान्युपदेक्ष्यामः..............गोमांसं मृगमांसानाम्......महिषवसाऽऽनूपमृगवसानाम् । चरक सू० २५ । ३८

नूतनाऽऽविष्कृतवस्तूनां बहूनाञ्च तत्तद्देशोपयोगितत्रत्यवस्तूनां भिन्नासु पृथग्भूतासु जनतासु व्यवहाराभ्यां गच्छति सुदीर्घकाल एकस्या एव भाषायाः शाखाभूता अनेका भाषा भिन्ना इवाऽऽभासन्ते। शब्दशास्त्रनियमैः प्रमाणीकृते राद्धान्तैः सर्वेषामेकभाषा भाषित्वात्सर्वेषां मूलपुरुषाणां मूलधर्माऽचारव्यवहारज्ञानविज्ञानादीनामेकत्वं निश्चितमेव। अतो वेदा एव सर्वजगद्व्यासविज्ञानानां निधिभूता मूलभूताश्च तेभ्य एव न केवलमस्माकं किन्तु सर्वस्य जगतो वैद्यकशास्त्रेतिहास आरभ्यते, परम्परया साक्षाद्वा॥

आयुर्वेदस्याऽर्वाचीनेतिहासकालो बुद्धकालात् ख्रिष्टीयाऽष्टमशताब्द्यवधि वर्तत इति पूर्वमुक्तमेवाऽस्माभिः। पुराणस्तु कालो वेदकाल एव। धार्मिका आर्या वेदानामनादित्वं मन्यन्ते। आयुर्वेदस्यैकवेदोपाङ्गत्वात्सर्वासां विद्यानां वेदे केनापि रूपेण विद्यमानत्वादायुर्वेदोऽपि वेदवदनादिरेव किन्त्वाऽऽयुर्वेदस्य विकासमधिकृत्य वेदानाञ्च कालं यावद्गति निर्णेतुं यतामहे। पुराणप्रमाणानि विहाय न वेदानां वास्तविकः कालः केनाऽपि निर्णेतुं शक्यते। यद्यपि ब्राह्मणाऽऽरण्यकादयो वेदेभ्योऽर्वाचीना एव ग्रन्थास्तेषामपि कालं कोऽपि निर्णेतुमक्षमः। बहवः पाश्चात्या विद्वांसः वैदिककालनिर्णयचिकीर्षया बहुविकल्पान्विधायाऽर्वाचीनत्वसीमानं प्राचीनत्वसीमानञ्च दर्शयितुमायतन्त। खीष्टकालश्च सर्वेषामेवाऽद्यतनपाश्चात्यविदुषां केन्द्रभूतमिष्टमिव। तेषां निर्णये सहस्राणां वर्षाणामान्तरत्वं दृश्यते। एकस्य च मतमन्यमताद्भेदं वहति। आर्यास्तु वेदान् सनातनान्मन्यमानाः केवलं प्रतिसर्गं प्रतियुगं वर्षिभिस्तेषां दर्शनमेव मन्यन्ते नोत्पत्तिम्। अस्तु तावदासां पुराणतमसंहितानां दर्शनकाल एव निर्णययत्नं भजेत। **वेबराख्यः** (Weber) कश्चित्पाश्चात्यपण्डितो जटिलतममिमं विषयं निर्णेतुं बहु यतित्वाऽन्ते निर्णयनैराश्यं दुष्करत्वञ्चाऽत्राऽपश्यत्। अन्येऽपि बहव इममेव विषयमधिकृत्य यत्किमपि प्रालपन् तत्समासतो दर्श्यते। यथा—(१) मोक्षमूलर—(Max Muller) सिद्धान्ताऽनुसारं खिष्टात्पूर्वं दशमी द्वादशी वा शताब्दी वेददर्शनकालस्याऽर्वाचीनतमसीमा। किन्तु प्राचीनतायां वेदकालस्य कोऽवधिरिति किमपि मतं तेन न दर्शितम्। तन्मते संहिताब्राह्मणग्रन्था आरण्यकग्रन्थाश्चेति यथाक्रममनुमित्या प्रत्येकं वर्षशतद्वयमितं कालं निर्माणायाऽपेक्षते (वेदनिर्माणाद्वर्षशतद्वयपश्चाद् ब्राह्मणग्रन्थनिर्माणं, ततश्च तावदेवकालं पश्चादारण्यकग्रन्थनिर्माणं, तेषां त्रयाणामेव प्रचारः ततश्च तत्सिद्धान्तविरोधोत्पत्तिर्बौद्धधर्माऽपदेशेनाऽजनि) ततश्च तद्विरोधी बौद्धधर्म उत्पन्नः। एतत्सर्वं न्यूनतोन्यूनं प्रत्येकं शतद्वयं वर्षाणामपेक्षते। बौद्धधर्मोत्पत्तिश्च खीष्टात्पूर्वं प्रायः षट्शतवर्षमिते काले जाता। एतेन **मोक्षमूलर**मताऽनुसारं वेदसंहिताकालः प्रायेण खीष्टात्पूर्वं त्रयोदशी शताब्दी एतच्च तस्यानुमानं वेदसंहितानां कालस्याऽर्वाचीनतमा सीमा। एतन्मतं यद्यपीतिहासगवेषणापद्धत्या नैवाऽतिगर्हितं तथाऽप्यन्येऽस्मिन्विषये या उपपत्तीर्दर्शितवन्तस्तदपेक्षया **मोक्षमूलर**स्योक्तयोऽतीव दुर्बलाः। एतादृशि गभीरे विषये नैव बद्धर्घाः। अन्ते **मोक्षमूलरेण**—पृथिव्यां वर्तमाना न काऽपि शक्ति र्या निश्चितं वेदकालं निर्णेतुं शक्नोतीत्यपि प्रकटितम्।

(२) **ल्यूडविग** (Ludwig), **जैकोबी** (Jacobi), **तिलकश्च** (Tilak) इमं विषयं निर्धारयितुं यतितवन्तः किन्तु तत्राऽपि सर्वेषां नैकमत्यम्। **जैकोबी** महोदयस्तिलकमहोदयश्च स्वमतमित्थमदर्शयताम्—विस्तृतज्यौतिषशास्त्रस्याऽऽरम्भात्पूर्वमेव वेदर्षिभिः सौरचान्द्रमासानां नियतीकरणमत्याऽऽवश्यकं मतमासीत्। पूर्णोदितानां नक्षत्रविशेषाणां वर्षस्य प्रथमर्तुसम्बन्धो नियतीकृतः। यदि ऋग्वेददर्शितो नक्षत्रसम्बन्धस्तथ्यो भवेत्तर्हि गणनया वेदकालनिर्णयो नाऽतिदुष्करः। बहुभि र्ऋग्वेदवाक्यै र्मृगशिरोनक्षत्रे सूर्यस्य साम्येनाऽहोरात्रमध्ये स्थितौ वसन्तप्रारम्भ इति ज्ञायते। एवंविधश्च कालोऽतीवपरः। ब्राह्मणादिग्रन्थेषु वसन्तप्रारम्भो मृगशिरःस्थाने कृत्तिकासु दृश्यते। एवं सौरनक्षत्रकालपरिवर्तने वर्षसहस्रद्वयमपेक्षते यदा मृगशिरःसु

व्याप्नोति यथा कस्मिन्नपि पात्राद्यवकाशे प्रवेश्यमाने जले वायुर्भूर्तं वहिर्निष्क्रामति तथैवाऽत्रापिज्ञेयम् । वस्तुत आकर्पणशक्ति (Love) र्विश्लेपणशक्तिश्च (Strife) ब्रह्माण्डेन सह तादृशैव कर्मणा सम्बद्धे स्तो यादृशेन शरीरेण सह रक्तं वायुश्च । सृष्ट्युत्पत्तिशास्त्रेण सह शारीरशास्त्रस्य स्वभावसिद्धं यत्साम्यं तेनैवाऽऽयुर्वेदशास्त्रस्य मूलोत्पत्तिरायुर्वेदाचार्याणां मनस्यजायतेति नैवाऽसङ्गतं भविष्यति । यतो वैद्यकशास्त्राऽऽचार्याणां स्वशास्त्रनिर्माणकाले हृदये हृदयाच्च रक्ताऽऽगमनिर्गमौ समग्राऽऽयुर्वेदविस्तारायोपयोगिनौ नूनं साधनभूतत्वाञ्ज्ञेयावभवताम् । आकर्पणशक्त्याः (Love) इति नाम च शारीरशास्त्रादेवोत्पन्नमिति स ब्रूते । या याः शक्तयः कर्मणि लग्नाः स्वशरीरे मनुष्या अनुभवन्ति ता एव महति ब्रह्माण्डे तथैव कर्मलग्नाः, मनुष्यादिशरीरजीवनाऽऽधारभूता या शक्तिः सैव ब्रह्माण्डस्थितिकारणमिति न केनाप्यद्यावधि दृष्टमिति स भूयो ब्रूते (Fr. 17-26) [1] । भिषजः सृष्ट्युत्पत्तिप्रधानैककारणभूते इमे द्वे शक्ती (Systole and Dastole) शरीरान्तर्यन्त्रसञ्चालनकर्त्र्यावपि स्त इति न जानन्ति । यत एकशरीरस्थिति र्ब्रह्माण्डस्थितिरिव वर्तते ।

नश्वरं जगद्यावदस्माभि र्ज्ञायते आकर्पणविकर्पणशक्त्युपस्थित्यवधि स्थातुं शक्नोति नाऽतः परम् । अतश्च जन्मद्वयं विरतिद्वयञ्च नश्वराणां भावानां भविष्यतः । प्रथमायां तत्र शक्तौ वर्धमानायां यदा सर्वे एव भावा एकरूपा भवन्ति, तदैकम् । यदा च द्वितीया शक्ति र्भूयो भूतगोलकं प्रविश्य सर्वान् भूतान् पृथक् पृथक् करोति तदा द्वितीयं । सूक्ष्मा एव मूलभावा अनादयोऽनन्ताश्च । विशेषाणि वस्तूनि यानि वयं प्रत्यक्षाणि कुर्म स्तान्यनित्यानि केवलमनेकेषां सूक्ष्मभावानां समवायः । स च समवाय एकस्माद्रूपादन्यद्रूपं लभमान एकस्मात्स्थानादन्यत्र तिष्ठतीत्येषा तेषां परिवर्तनपरम्परा । ते चाऽनित्या भावा मरणधर्माणो नश्वराश्च । तेषां जन्म, उत्पत्तिर्वा केवलं सूक्ष्मभावानां समवायोऽस्ति । मृत्यु र्नाशो वा समवेतानामेव विप्रकृष्टता, नाऽन्यत् । नाऽनश्वरं किमपि तेजसो, वायोः, क्षिते, र्जलाच्चाऽन्यत् तानि च भूतान्याकर्पणशक्तिभ्यां सह जगत्कारणानि भवन्ति ।" इति

वेदानामतीव पुराणत्वमद्यापि सर्वेषां पुरातत्वविदां समाज र्न प्रत्याख्यातम् । धार्मिका आर्यास्तु सकलविद्यानिधानं यज्ज्ञानज्योतिः सर्गादौ परमेश्वरेण मनुष्यहितायार्पिद्वारा प्रकाशितमासीत्तदेव वेद इति मन्यन्ते । एप आर्याणां विश्वासः प्रकृतादन्यतोऽपि यदि निधीयेत ततोऽपि वेदानां माहात्म्यं, सकलमानवजातिहिताय द्विगुणं द्विविधश्चाऽस्ति ॥ (१) प्रथमन्तु वेदाः पुराणतमाया मनुष्यजातेराचारान् व्यवहारांश्चाऽऽदर्शवत् दर्शयित्वेतिहासज्ञानेन निगूढं विषयं स्वज्योतिषा प्रकटयति । (२) द्वितीयतस्तु भाषाणां मूलज्ञानाय वेदानामतीवाऽऽवश्यकत्वमस्ति । यतश्च शब्दशास्त्रस्या (Philology) ऽपूर्णता नश्यति । सर्वेषु समाजेषु सर्वासु च पृथङ्मानवजातिषु ये ये शब्दा व्यवह्रियन्ते ते सर्व एव जनताया आचारव्यवहाराणां निखाताऽवशिष्टानि रूपदर्शचिह्नानीव बहुत्रशब्दा एवेतिहासेऽज्ञातविषयज्ञानाय प्रामाण्यमर्हन्ति ज्ञाताऽज्ञातेतिहासविषययोर्दूरहतयोरेकत्वं विधाय जनानुपकुर्वन्ति । शब्दशास्त्रेणैव जगति विस्तृतानां भारतीययुरोपियाणा मेकमूलत्वं प्रमाणीकृत्येतिहासगवेषकै र्गूढोऽयं विषयः सरलीकृतः । सर्वमानवजातिमूलपुरुषाणा (आर्याणां) मेकैव भाषा पूर्वमासीत् । यदा च ते भिन्नासु दिक्षु विकीर्णा स्तत्तद्देशवायुजलजनितस्तेषांभाषाया उच्चारणभेदोऽजायत । भूयश्च पृथग्देशानामनेकभिन्नव्यवहारा अपि देशप्रकृत्यनुकूला आवश्यकाः । अवश्यताया भिन्नत्वेन कालेन बहूनां

१ आर्याऽऽचार्यास्तु वेदकालादपीमं सिद्धान्तं जानन्ति, ग्रीसीयानन्यान्वा स्वप्रातिवेदयान् दृष्ट्वैतत्प्रकटीकृतम् नैवेति ज्ञायते ।

वेदकालवर्तिन आर्याः शल्यक्रियायां पाटवं दधुरितिस्वीकृतिस्तु भ्रान्तिरेवाऽस्ति । नूनं ते क्षतव्रणादिष्वौ-
ालेपबन्धनादीनि विधाय चिकित्सां व्यधुः । किन्तु तेषामुपक्रमः शल्यक्रिया च शैशवदशायामेवाऽऽसीत् ।
वदथर्ववेदे चिकित्साशास्त्रं दर्शितं तत्सर्वमेव समन्त्राणां वनस्पतीनां जलाशादीनां पुराणतम उपयोगो न
ज्ञानदृष्ट्या महार्घः " (वैदिक इण्डैक्स पृ. १०५) । यदा वयं तयोरेव वैदिकाऽऽयुर्वेदविषये स्वविरोधिन
। शब्दान् पश्यामस्तदाऽऽश्चर्यो जायते । यथा—" अथ चाऽश्विभ्यामाथर्वजनिताश्चिकित्सा व्यधायिषत ।
ज्ञाऽन्धाभ्यां स्वोपक्रमेण गतिदृष्टिप्रदानं, च्यवनर्षये पुरन्ध्याः पत्ये च तथैव पुनर्युवत्वप्रदानं, विष्पलाया
ष्टचरणस्थान आयस्या जङ्घाया योजनं तस्याश्चाङ्गविद्धतिरित्यादीनि वैदिकानां भिषजां (अश्विनोः) कर्माणि
स्यन्ते " ॥ अतो वयमश्विनौ शल्यतन्त्रे चिकित्सायाञ्च पटुतमावास्तामिति न वक्तुमर्हामः कश्चित् ।

उपनिषत्स्वपि यज्ञमुख्याङ्गतया भैषज्यकर्म दृश्यते किन्तु तासामध्यात्मविषयत्वान्नाऽऽयुर्वेदविस्तरः ।
मायणेऽपि कुशलानां वैद्यानां परितुष्टानाञ्चोल्लेखो दृश्यते । महाभारते (महाभारतकाले) शल्यक्रियाया
न्यासाञ्च चिकित्सानामतीव पाण्डित्यमासीद्भारतीयभिषक्ष्विति दर्शितमेवाऽस्माभिः । (पृष्ठे १४ द्रष्टव्यम्) ।

दर्शयामस्तावद्वेदेष्वन्येषु च पुराणाऽऽर्षग्रन्थेष्वायुर्वेदग्रन्थेषु च कीदृक् सर्वाङ्गपूर्णं चिकित्साज्ञानं निहि-
मस्ति । वेदास्त्वायुर्वेदवत् सर्वज्ञानविज्ञाननिधानीभूता मूलभूताश्च । अतस्तत्र यथाऽन्यानि ज्ञानविज्ञानानि
र्तन्ते तथैवाऽऽयुर्वेदोऽपि । किन्तु ब्राह्मणाऽऽरण्यकोपनिषत्पुराणेतिहासधर्मशास्त्रादीनां मुख्यो व्याख्यातव्य-
वेषय आयुर्वेदो न तथाप्यानुषङ्गिकरूपेण तत्र बहूनामायुर्वेदविज्ञानविषयाणामस्त्यन्तर्भावः । अतस्तेषामायुर्वेदे-
रशास्त्रसंज्ञां वयं व्यवहरिष्यामः । इतस्ततोविकीर्णमप्यायुर्वेदविज्ञानमेषु ग्रन्थेषु बहु वर्तते । येन विनाऽऽयुर्वे-
शास्त्रं न पूर्णतां भजति यच्चाऽऽयुर्वेदस्य द्वारभूतं तच्छारीरशास्त्रं वेदेषु, आयुर्वेदेतरशास्त्रेष्वायुर्वेदे च कियत्की-
दृक् चाऽस्ति, कियच्च पाश्चात्यविज्ञानविस्तारभाश्च तत्तेन सङ्गच्छत इत्युपोद्घाताऽन्तेऽस्माभि र्दर्श्यते तत्तत्रैव
द्रष्टव्यम् ।

आयुर्वेदपरम्परा ।

सुश्रुतमते " ब्रह्मा प्रोवाच ततः प्रजापतिरधिजगे, तस्मादश्विनौ, अश्विभ्यामिन्द्रः, इन्द्रादहं, मया
त्विह प्रदेयमर्थिभ्यः प्रजाहितहेतोः सु. सू. १।१८ " इत्यायुर्वेदपरम्परा ॥ सा चेत्थम्—

ब्रह्मा
|
प्रजापतिः (दक्षः)
|
अश्विनौ
|
इन्द्रः
|
धन्वन्तरिः (काशिराजो दिवोदासो वा)
|
सुश्रुतः | औपधेनवः | औरभ्रः | पौष्कलावतः | वैतरणः | करवीर्यः
गोपुररक्षितः

सूर्यस्य वसन्ते गतिरासीत्तदा पञ्चचत्वारिंशच्छतं खीष्टाब्दपूर्वं वर्षाणामभवत् । कृत्तिकाकालश्च खीष्टपूर्वं पञ्चविंशतिशतमितेषु वर्षेष्वनुमीयते । एवञ्च प्रायः खीष्टपूर्वं षट्सहस्रवर्षमितः कालो वेदसंहितानिर्माणकालोऽनुमीयत इति ॥ (३) जैकोबीमहोदयस्त्वन्यमेव ज्यौतिषाऽनुसारं वेदकालमनुमिनोति. तद्यथा—आर्याणां विवाहविधौ स्वधर्मस्थिरचलितत्वरूपेण साक्षी ध्रुवनक्षत्रं वध्वै दर्श्यते । एष च विधिः कतिपयेभ्यो गृह्यसूत्रेभ्यो लभ्यते । अद्याऽपि उत्तरदिक्स्थध्रुवनक्षत्रदर्शनमार्येविवाहेषु विहित एव । साम्प्रतमृक्षर्क्षं ध्रुवनक्षत्ररूपेण दृश्यते । किन्तु, इतो द्विसहस्रवर्षपूर्वमितदेव नक्षत्रं पृथिवीतो बहुदूरस्थितत्वाददृश्यमासीत् । तत्स्थाने चान्यत्किमपि....... नक्षत्रमासीत् । तच्च नक्षत्रं खीष्टपूर्वं ख-गिरि-दृग्-वसु-कर-२८२७० मितवर्षपूर्वमेव भूमरदृश्यत तदा च न ततोऽन्यत्किमपि नक्षत्रं गृह्योक्ताऽर्थविवाहविधिपूर्तये उपयोगार्हमासीत् । यद्यपि ऋग्वेदे नैव विधिर्लभ्यते तथापि वेदेभ्योऽत्यर्वाचीनकल्पग्रन्थानामपीत्थं पुराणत्वाद्वेदानां ततोऽपि पुराणत्वं मान्यमेव । एवञ्च वैदिकाऽऽचाराः खीष्टद्युतत्रयवर्षप्राचीना इति ।

अस्य युक्तयो ज्योतिषाऽनुसारं वर्तन्तेऽतो मान्यतराः । एष च कालो वेदानामितिहासज्यौतिषाभ्यामर्वाचीनतमत्वेन दर्शितः । प्राचीनस्तु सर्गादिरेव ।

वेदर्षीणामन्येषाञ्च पूर्वाचार्याणामौषधादिप्रयोगैः सह मन्त्रादिप्रयोगोऽप्युपक्रमेऽवर्तत । कश्चिदौषधोपक्रमं कश्चिन्मन्त्रोपक्रमं ते व्यधुः । भारतेऽद्यापि चिकित्सकेषु त्रयाणामेतेषामुपक्रमाणां नाऽस्त्यभावः । मन्त्रप्रयोगा औषधप्रयोगैः सह विना वा कमपि प्रभावमुत्पादयन्ति न वेतिव्याख्यानं नाऽस्माकमत्र वक्तव्यो विषयः । किन्तु रसशास्त्रं (Medical Chemistry) शल्यतन्त्र (Surgery) मन्ये चाऽऽयुर्वेदविषया वेदे वर्तन्त इत्यस्माकं प्रतिज्ञा न केवलमेते विषया वेदेषु सत्तामात्रभाजः किन्तु तत्र स्वसत्ताया चरमां सीमानमपि नोज्झन्ति । यद्यपि तत्र तेषां विषयाणामल्पैरेव पदै निर्देशः कृतोऽस्ति तथापि तत्कारणं न ज्ञानविस्ताराऽभावः किन्तु तद् द्रष्टृणामृषीणां यावत्सम्भवमल्पशब्दप्रयोगपद्धत्युपस्थितेः । यद्यपि मन्त्रादिभिः महौषधि-रस-शस्त्र-चिकित्सा या या वेदेषु दर्शितास्ता आधुनिकपाश्चात्यसरण्यनुसर्तॄणां सर्वा एव संमता न भविष्यन्ति किन्तु ता गभीरविचाराऽपेक्षिण्यो न च सुकराः । रसशास्त्रविस्तरन्तु वेदादारभ्याऽर्वाचीनाऽऽयुर्वेदावधि पृथक् प्रकरणे दर्शयिष्यामः । ये ये प्रकृता विषया वेदेभ्यो निर्देक्ष्यन्ते तत्सत्ताप्रमाणभूताः कतिपये वेदमन्त्रा अस्माभिराङ्गलभाषोपोद्घाते विहिता स्सन्ति ते तत्रैव द्रष्टव्याः ।

उपरिदर्शिते वेदमन्त्रे वेदकाल आयुर्वेदस्य न केवलं विद्यमानता किन्तु महत्युन्नतिरासीत् । डा. बी. एन. मुखोपाध्यायमहोदयः स्वकृतौ (Surgical Instruments of the Hindus) उद्धरति— " नैतदविदितं संस्कृतग्रन्थकाराणां शैली संक्षिप्ततमैः शब्दैरेव स्वाऽभिप्रेतनिदर्शने प्रसिद्धेति । पुराणतमग्रन्थकारविषये त्वतीवसत्यमेतत् । यथा प्रसिद्धपाश्चात्येतिहासपण्डितथ्यूसीडीडीसस्य (Thucydides) विषयेऽपि जनश्रुतिः प्रसिद्धैव तद्यथा—' तस्य विशेषविषयप्रतिपादने यावच्छक्यमधिकानां भावानां यावच्छक्यमल्पैः शब्दै र्बहूनां भावानामेकस्मिन्भावे च स्वकृतिषु निदर्शने प्रयतनं स्फुटमेव । यतोऽप्येताः स्वमतिमपि व्यतीकृत्य भावस्फुटीकरणपूर्ति विदधीरन् । ततश्च कतिपयेष्ववसरेषु तस्यैव शब्दसङ्कोचोऽन्यथाऽप्यर्थं गमयति " ॥ ईदृशी येषां ग्रन्थपद्धतिस्तेषां शब्दसङ्ख्ययैव भावपरिमापणमनुचितमेव । एषा सरणिर्न केवलं वेदर्षीणामेव किन्तु सर्वेषामेव पुराणग्रन्थरचयितॄणामार्याऽऽचार्याणामासीत् । पाश्चात्यौ तत्र प्रसिद्धौ वैदिकपुरातत्वविदौ मैकडानलकीथौ (Dr. Macdonell and Dr. Keith) स्वकृतावभिप्रेतः । तद्यथा—

" वेदकालवर्तिन आर्याः शल्यक्रियायां पाटवं दधुरितिस्वीकृतिस्तु भ्रान्तिरेवाऽस्ति । नूनं ते क्षतव्रणादिष्वौषधालेपबन्धनादीनि विधाय चिकित्सां व्यधुः । किन्तु तेषामुपक्रमः शल्यक्रिया च शैशवदशायामेवाऽऽसीत् । यावदथर्ववेदे चिकित्साशास्त्रं दर्शितं तत्सर्वमेव समन्त्राणां वनस्पतीनां जलाशादीनां पुराणतम उपयोगो न विज्ञानदृष्ट्या महार्घः " (वैदिक इण्डैक्स पृ. १०५) । यदा वयं तयोरेव वैदिकाऽऽयुर्वेदविषये स्वविरोधिन एव शब्दान् पश्यामस्तदाऽऽश्चर्यो जायते । यथा—" अथ चाऽश्विभ्यामाथर्वजनिताश्चिकित्सा व्यधायिषन्त । खञ्जाऽन्धाभ्यां स्वोपक्रमेण गतिदृष्टिप्रदानं, च्यवनर्षये पुरन्ध्याः पत्ये च तथैव पुनर्युवत्वप्रदानं, विश्पलाया नष्टचरणस्थान आयस्या जङ्घाया योजनं तस्याश्चाङ्गवद्गतिरित्यादीनि वैदिकानां भिषजां (अश्विनोः) कर्माणि दृश्यन्ते " ॥ अतो वयमश्विनौ शल्यतन्त्रे चिकित्सायाञ्च पटुतमावास्तामिति न वक्तुमर्हामः कश्चित् ।

उपनिषत्स्वपि यज्ञमुख्याङ्गतया भैषज्यकर्म दृश्यते किन्तु तासामध्यात्मविषयत्वान्नाऽऽयुर्वेदविस्तरः । रामायणेऽपि कुशलानां वैद्यानां परितुष्टानाञ्चोल्लेखो दृश्यते । महाभारते (महाभारतकाले) शल्यक्रियाया अन्यासाञ्च चिकित्सानामतीव पाण्डित्यमासीद्भारतीयभिषक्ष्विति दर्शितमेवाऽस्माभिः । (पृष्ठे १४ द्रष्टव्यम्) ।

दर्शयामस्तावद्वेदेष्वन्येषु च पुराणाऽऽर्षग्रन्थेष्वायुर्वेदग्रन्थेषु च कीदृक् सर्वाङ्गपूर्णं चिकित्साज्ञानं निहितमस्ति । वेदास्त्वायुर्वेदवत् सर्वज्ञानविज्ञाननिधानीभूता मूलभूताश्च । अतस्तत्र यथाऽन्यानि ज्ञानविज्ञानानि वर्तन्ते तथैवाऽऽयुर्वेदोऽपि । किन्तु ब्राह्मणाऽऽरण्यकोपनिषत्पुराणेतिहासधर्मशास्त्रादीनां मुख्यो व्याख्यातव्यविषय आयुर्वेदो न तथाप्यानुषङ्गिकरूपेण तत्र बहूनामायुर्वेदविज्ञानविषयाणामस्त्यन्तर्भावः । अतस्तेषामायुर्वेदेतरशास्त्रसंज्ञां वयं व्यवहरिष्यामः । इतस्ततोविकीर्णमप्यायुर्वेदविज्ञानमेषु ग्रन्थेषु बहु वर्तते । येन विनाऽऽयुर्वेदशास्त्रं न पूर्णतां भजति यच्चाऽऽयुर्वेदस्य द्वारभूतं तच्छारीरशास्त्रं वेदेषु, आयुर्वेदेतरशास्त्रेष्वायुर्वेदे च कियत्कीदृक् चाऽस्ति, कियच्च पाश्चात्यविज्ञानविस्तारभाश्च तत्तेन सङ्गच्छत इत्युपोद्घाताऽन्तेऽस्माभि र्दर्श्यते तत्तत्रैव द्रष्टव्यम् ।

आयुर्वेदपरम्परा ।

सुश्रुतमते " ब्रह्मा प्रोवाच ततः प्रजापतिरधिजगे, तस्मादश्विनौ, अश्विभ्यामिन्द्रः, इन्द्रादहं, मया त्विह प्रदेयमर्थिभ्यः प्रजाहितहेतोः सु. सू. १।१८ " इत्यायुर्वेदपरम्परा ॥ सा चेत्थम्—

ब्रह्मा
|
प्रजापतिः (दक्षः)
|
अश्विनौ
|
इन्द्रः
|
धन्वन्तरिः (काशिराजो दिवोदासो वा)
|

सुश्रुतः | औपधेनवः | औरभ्रः | पौष्कलावतः | वैतरणः | करवीर्यः | गोपुररक्षितः

चरकमते च " ब्रह्मणा हि यथाप्रोक्तमायुर्वेदं प्रजापतिः । जग्राह निखिलेनादावश्विनौ तु पुनस्ततः ॥ अश्विभ्यां भगवान् शक्रः प्रतिपेदे ह केवलम् । ऋषिप्रोक्तो भरद्वाजस्तस्माच्छक्रमुपागमत् ॥.......... ऋषयश्च भरद्वाजाज्जगृहुस्तं प्रजाहितम् । .... अथ मैत्रीपरः पुण्यमायुर्वेदं पुनर्वसुः । शिष्येभ्यो दत्तवान् षड्भ्यः सर्वभूतानुकम्पया ॥ अग्निवेशश्च भेलश्च जतूकर्णः पराशरः । हारीतः क्षारपाणिश्च जगृहुस्तन्मुनेर्वचः ॥ अ. १ ". इत्यायुऽर्वेदपरम्परा ॥ सा चेत्थम्—

ब्रह्मा
|
प्रजापतिः (दक्षः)
|
इन्द्रः
|
भरद्वाजः
|
आत्रेयः (पुनर्वसुः)
|

अग्निवेशः | भेलः | जतूकर्णः | पराशरः | हारीतः | क्षारपाणिः

चरकदृढबलाद्या अन्ये तत्तन्त्रप्रतिसंस्कर्तारः ।

ब्रह्मपुराणे आयुर्वेदाऽवतारपरम्परैका वर्तते॥ वेदेषु रुद्राऽश्विवरुणेन्द्रसूर्या दिव्यभिषजो मताः । तत्र—

१ रुद्रः—साम्प्रतं यद्यपि न कोऽप्यायुर्वेदग्रन्थो रुद्ररचितः प्रसिद्धः । तान्त्रिकाः प्रायेण सर्वेऽपि रुद्रमताऽनुयायिनः । ते च रसशास्त्रधातुवादयोः कुशला इति सत्यदेस्येव जनश्रुतिः । रसशास्त्रं हि चिकित्साविषयेऽतीव समाद्रियते । किन्तु तद्ग्रन्थाः साम्प्रतं विचेया दुर्लभाश्च । वेदेषु " प्रथमो दैव्यो भिषक् " इति रुद्रो वर्णितः । अर्वाचीनाऽऽयुर्वेदग्रन्थेषु पञ्चसप्ततिरौषधानि रुद्रनाम्ना शिवनाम्ना वा प्रसिद्धानि ।

२ सूर्यः—अयमपि वेदे भिषक्त्वेन मतः । कतिपय औषधप्रयोगा अप्यस्य नाम्नाऽद्यतनाऽऽयुर्वेदग्रन्थेषूक्ताः । साम्प्रतं सूर्यनाम्ना प्रसिद्धः कोऽपि ग्रन्थो नैव प्रचलितो लभ्यते । मुखोपाध्यायकथानुसारं, आंग्लदेशस्य विचित्रवस्त्वागारे (British Museum) स्थिते भारतकार्यालयसम्पद्भूते शर्मदेशराजधान्याः पुस्तकालयस्थपुस्तकनामाङ्कनपत्रे भास्करसंहिताया वैद्यकविषये नाम वर्तते । ततश्च 'आरोग्यं भास्करादिच्छेत्' इति सङ्गच्छते ।

३ इन्द्रः—पूर्वं दर्शितमेव भगवान् धन्वन्तरिरिन्द्रेणाऽध्यापित आसीदिति । सुश्रुतचरकयोरुभयोरपीन्द्र आयुर्वेदाऽऽचार्यत्वेन मतः । इन्द्ररचिताया वलभित्संहिताया नाम **गणनाथसेन**महोदयकृतप्रत्यक्षशारीरग्रन्थे दृश्यते नाऽन्यत्राऽन्यत्र । चरकसंहितायामिन्द्रोक्तरसायनमितीन्द्रप्रोक्तस्यौषधप्रयोगस्य साक्षादेव नामाऽस्ति । कतिपयाऽन्यान्यप्यौषधानीन्द्रनाम्नाऽऽयुर्वेदग्रन्थेषु सुप्रसिद्धानि । ऋग्वेदे सूक्तं पूर्णमेकं राजयक्ष्मचिकित्सकभिषगितीन्द्रं स्तुवद् दृश्यते ।

४ अश्विनौ—वेदब्राह्मणपुराणाऽऽयुर्वेदग्रन्थेषु सर्वत्रैव भैषज्यप्रकरणेऽश्विनो महानादरो वरीवर्ति । प्रसिद्धिश्च महती तयोः । वेदे तु प्रायोऽर्द्धशतं सूक्तानामश्विनोः स्तव एव प्रयुक्तम् । अन्येषु च बहुषु स्थानेषु तयोश्चरित्रं, चिकित्सोत्कर्षो देवतात्वेन स्तुतिश्च दृश्यते । अद्यप्रचलिताऽऽयुर्वेदग्रन्थेषु बहुत्र बहून्यौषधानि तयोर्नाम्ना सह लभ्यन्ते मुखोपाध्यायमहोदयो मद्र (Madras) पत्तनराजकीयपुस्तकालयेऽश्विसंहितानामकस्यैकस्याऽमुद्रितपुस्तकस्य सत्तामपि ज्ञापयति ।

५ वरुणः—वेदेषु वरुणस्य भिषक्तमत्वं भिषगधिष्ठातृत्वं, चिकित्सालयाऽध्यक्षत्वञ्च दृश्यते किन्तु न कोऽपि तन्नाम्ना ग्रन्थो न वा किमप्यौषधमुपलभ्यते ।

सङ्क्षेपेणाऽत्र वेदादिवर्णिताऽऽयुर्वेदाऽऽचार्याणां नामानि दर्शितानि । साम्प्रतं व्यवह्रियमाणानामन्येषाञ्च ग्रन्थानां कालेतिहासावधिकृत्य स्वमतं दर्शयामः ।

१ सुश्रुतसंहिता—कतिपयानां विदुषाम्मते सुश्रुताच्चरकस्य ज्येष्ठत्वमस्ति किन्तु न तदुपपत्तिसहम् । वर्तमानचरकग्रन्थकारो बहून् सुश्रुतीयराद्धान्तान् स्वकृतौ निधत्ते । ये ये सिद्धान्ताः सुश्रुतीयाश्चरके वर्तन्ते परोक्षरूपेण तत्र ' धान्वन्तराः ' एके, इत्यादयः शब्दा दृश्यन्ते * । सुश्रुतसंहितानिर्माणस्य कः काल इति पूर्णतया निश्चेतुमतीव दुष्करम् । अस्मिन्विषये ह्वार्नलेमहोदयः सुश्रुतनिर्माणकालं खीष्टात्पूर्वं षष्ठीं शताब्दीमनुसंदधानः " यदा सुश्रुतनिर्माणकालो निर्णेतुमारभ्यते तदाऽनुमीयते सुश्रुतसंहिताकार श्चरकीयान् राद्धान्तान् पर्यचिनोदिति यतो मनुष्यशरीरस्थाऽस्थिगणनामुपक्रम्य चरकीयराद्धान्तानां स्वेषाञ्च भिन्नत्वं ज्ञापयति । अतः सुश्रुतकारश्चरककारान्न प्राचीन इति प्रमाणीभवति । तथाच वेददेशीयस्य शतपथब्राह्मणस्य रचयिता सुश्रुतीयसिद्धान्ताभिज्ञोऽभवदिति निश्चीयते । अस्य ग्रन्थस्य निर्माणकालस्तथ्यो न ज्ञायते । खीष्टात् पूर्वं षष्ठी शताब्दी भवेदिति नैवोपपत्तिविरोधः । अतः सम्भाव्यते सुश्रुतकारो न केवलमात्रेयस्य किन्तु तच्छिष्यस्याऽग्निवेशस्य समकालीन " इत्यभिधत्ते । भूयश्च 'त्रीणि सषष्ठीन्यस्थिशतानि वेदवादिनो भाषन्ते' इति निर्दिशन् सः " आयुर्वेदवादिनस्त्रीणि सषष्ठीन्यस्थिशतानीति भाषन्त इति सुश्रुतकारस्य लक्ष्यभूत आत्रेयराद्धान्त एव ।"

ह्वार्नलेमहोदयः शतपथब्राह्मणचरकसुश्रुतानामस्थिसङ्ख्यायाः समानत्वेन भ्रान्तिं प्रापितः । अस्मिन्विषये तदुक्तं न समीचीनम् । यतः सर्व एव प्राचीना आर्याऽऽचार्या अभिन्नं वेदमतमवालम्बन्त । प्राचीनार्याऽऽचार्याणां सरणिरेषा— स्वपूर्वेषां वेदस्य वा नाम्ना तदनुकूलमेव स्वसिद्धान्तं त उपादिशन् । वेदानुकूलत्वन्तु सर्वेषामेवाऽऽसीत् । सुश्रुतेन त्रीणि सषष्ठीनीति शतपथब्राह्मणवद्वेदराद्धान्तः साक्षान्निर्दिष्टो न परम्परागतः । तत्र वेदविदो भाषन्त इति न केवलमायुर्वेदविदः किन्तुपूर्णाऽऽम्नायविद एव । अतः सुश्रुतसंहिता चरकसंहितायाः प्राचीनैव । तस्या निर्माणकालश्चरकसंहिताया निर्माणकालाद् द्विशतवर्षपूर्वमिति नाऽसङ्गतम् ।

चरकसंहिता—चरकसंहितामधिकृत्य ह्वार्नलेमहोदयः " नवीनभारतीयाऽऽयुर्वेदसरण्यनुसारमन्यैका जनश्रुतिः प्रसिद्धा । सा च बौद्धानां जातकेषु तेषामेव साधारणधर्मग्रन्थेषु च दृश्यते—बौद्धकाले विश्वविद्यालयद्वयमासीद्यत्राऽऽयुर्वेदमन्तर्भाव्य सर्व एव विज्ञानविषया (सव्वसिप्पाणि=सर्वशिल्पानि) बहुभिरुपाध्यायैर-

* ' सर्वाङ्गनिर्वृत्तिर्युगपदिति धन्वन्तरिः ' चरक. शा. ६।१८ । ' परिदृष्टकर्मणा शल्यहर्त्राऽऽहरणमित्येके (धान्वन्तराः) ' च० शा. ८।२९ । ' दाहे धन्वन्तरीयाणामत्रापि भिषजां बलम् ' च. चि. ५।६४ । ' इदन्तु शल्यहर्तॄणां कर्म स्याद्दृष्टकर्मणाम् ' च० चि. १३।१८२ । ' ताः शल्यविद्भिः कुशलैश्चिकित्स्याः शस्त्रेण संशोधनरोपणैश्च ' च. चि. ६।५८ इत्यादि । चरकात्सुश्रुते पाठा उद्धृता इति तु न युज्यते प्रत्यक्षविरोधात् ।

पाठ्यन्त । तेषाञ्चोपाध्यायाना बौद्धेषु प्रचलितं नाम (दिसप्पमोखा—आचारिअं=दिशाप्रमुख्याऽऽचार्यः) इत्यवर्तत । एतयोश्च विश्वविद्यालययोरेको भारतपूर्वदेशे काश्यामपरश्च भारतपश्चिमदेशे **तक्षशिलायामासीत्**। पश्चिमदेशस्थस्तु (तक्षशिलायां) प्रसिद्धतरोऽभवत् । तक्षशिलीयविद्यालये बुद्धकाले स्तोकं तत्पूर्ववर्तिनि वा काले ' **आत्रेयः** ' आसीदायुर्वेदाऽध्यापकः । तस्य चाऽऽत्रेयस्य शिष्येणाऽग्निवेशेन निर्मिता मूलचरकसंहिता । अतश्च तस्याः कालः खीष्टात्पूर्वं षष्ठी शताब्दी ज्ञायते " इत्याह । एतत्तु पूर्वमपि सुश्रुतप्रकरणेऽस्माभि दर्शितम्—**हार्नले**महोदयो बहुत्र नामसाम्येन भ्रान्तिमवाप्नोदिति । तक्षशिलाविश्वविद्यालये भवेन्नाम कोऽप्यात्रेय आयुर्वेदाऽध्यापको बौद्धजातकदृष्टः किन्तु स एव मूलचरकसंहिताकारस्याऽग्निवेशस्य गुरुरिति तु नितान्तमसङ्गतम् । **तक्षशिला** हि बौद्धानामेवाऽऽसीद्विद्याकेन्द्रं बौद्धकाले । चरके बहुत्र बौद्धमतविरोधदर्शनान्नैव बौद्धविद्यालयाऽध्यापकस्तस्योपदेष्टेत्यनुमातुमपि शक्यते । अस्मन्मते तु पतञ्जलिर्यो व्याकरणमहाभाष्यप्रणेता स एव चरकस्येति यः प्रायोवादः स एव साधीयान् । न केवलं प्रचलितजनश्रुतिरेवैतन्मूलं किन्तु बहूनां पुराणविदुषामपि तत्राऽऽनुकूल्ये सम्मतिः ॥ (१) "सूत्राणि योगशास्त्रे वैद्यकशास्त्रे च संहितामतुलां । कृत्वा पतञ्जलिमुनिः प्रचारयामास जगदिदं त्रातुम् " पतञ्जलिचरिते सर्ग ५।२२ ॥ (२) "योगेन चित्तस्य पदेन वाचां मलं शरीरस्य च वैद्यकेन । योऽपाकरोत्तं वरदं मुनीनां पतञ्जलिं प्राञ्जलिरानतोऽस्मि" ॥ योगवार्तिक० (३) 'इति चरके पतञ्जलिः'—मञ्जूषा (४) "यदा मत्स्याऽवतारेण हरिणा वेद उद्धृतः । तदा शेषश्च तत्रैव वेदं साङ्गमवाप्तवान् । अथर्वान्तर्गतं सम्यगायुर्वेदञ्च लब्धवान् ॥......................................
..............................सञ्चिन्त्य स स्वयं तत्र मुनेः पुत्रो बभूवह । प्रसिद्धस्य विशुद्धस्य वेदवेदाङ्गवेदिनः ॥ यतश्चर इवाऽऽयातो न ज्ञातः केनचिद्यतः । तस्माच्चरकनामाऽसौ विख्यातः क्षितिमण्डले ॥ इत्यादिभिर्महाभाष्यकृतः पतञ्जलेश्चरक इति नामान्तरमेव निर्धार्यते । महाभाष्यनिर्माणकाल एव चरकसंहितानिर्माणकाल इति स्पष्टमेव, अतस्तमेवाऽऽधिकृत्य किमपि ब्रूमः ॥—" चन्द्राऽऽचार्यादिभिर्लब्ध्वा देशं तस्मात्तदाऽऽगमत् । प्रवर्तितं महाभाष्यं स्वञ्च व्याकरणं कृतम् । " राजतरङ्गिण्याः १।१७६ ॥ इत्यभिमन्युराज्यकालमधिकृत्य राजतरङ्गिणीकारेण चन्द्राऽऽचार्यादिभिर्ग्रन्थमात्राऽवशिष्टमेकं महाभाष्यपुस्तकं दक्षिणदेशादानीय काश्मीरदेशे पुनः प्रचारितमिति ज्ञाप्यते । अभिमन्युकालश्च प्रायेण खिष्टीयद्वितीयशताब्द्या अन्ते बहुभिः पाश्चात्यैः मतः । तथा चेदं विचार्यं सम्पन्नम्—एतादृशो महान् ग्रन्थः कियता कालेनाऽप्रचरद्रूपो भूतः ?—ततः क्रमात्कियता च कालेन लुप्तदशां गतः ? इति । एष महाभाष्यकारस्तु गोनर्ददेशीयः । तथा ह्याह स स्वयमेव तत्र बहुत्रैव—' गोनर्दीयस्त्वाह ' इत्येवमादि (पा. १।१।२१) व्याख्यातञ्च तत् तट्टीकाकृता कैयटेन ' महाभाष्यकारस्त्वाह ' इति । कैयटटीकाकृन्नागेशोऽपि तथैव व्याचष्टे—' गोनर्दीयपदं व्याचष्टे भाष्यकार ' इति । गोनर्ददेशवासित्वादेव च पतञ्जले र्गोनर्दीयत्वम् । स च गोनर्ददेशोऽद्यतनीयो ' गोण्डा ' इति प्रसिद्धोऽयोध्याप्रदेशीय इत्यपि निर्णीतमस्मद्देशीयाऽध्यापकविशेषेण रामकृष्णगोपालभण्डारकरेण । एष एव ' गोण्डा ' गोनर्दो भवतु मा भूद्वा । गोनर्दस्तु प्राग् देशविशेषस्तत्र नाऽस्त्येव संशयः । काशिकायाम् ' एङ्प्राचां देशे (पा. १।१।७५) इत्यस्योदाहरणेषु ' गोनर्दीयः ' इतिपदस्याऽपि दर्शनात् । तदानीञ्च नाऽऽसन् खल्विदानीन्तना इव लौहवर्त्मगा अपि धूमयानशकटाः । आसंश्च प्रायः प्रति नगरान्तेषु दुर्लङ्घ्याः कान्ताराश्च, प्रसङ्गतस्तदप्युक्तं महाभाष्ये—' कश्चित्कान्तारे समुपस्थिते सार्थमुपादत्ते ' स यदा निष्कान्तारीभूतो भवति तदा सार्थं जहाति (१ अ. १ पा. ९ आ.), इति । प्रदर्शितवाक्यपदीयवचनात्त्ववगम्यते एवैतत्, चन्द्राऽऽचार्यादिभि र्दाक्षिणात्येष्वेकमेव लुप्ताऽवशिष्टं महाभाष्यपुस्तकमवाप्तमिति । तदय विचार्यते

तावद् धीमद्भिः—तदानीं खलु प्राच्यदेशतो दक्षिणदेशं यावत् भाष्यप्रचलनाय कत्यब्दाः प्रयोजनीयाः सञ्जाता आसन् ? कतिष्वब्देषु च तत्प्रचरद्रूपं स्थितम् ? कियता च कालेन पुनर्लोपदशांगतमलम्भि च चन्द्राऽऽचार्यादिभिरिति ।

अस्मन्मते त्वभिमन्युराज्यकालतोऽन्यूनसार्धद्विशतवर्षपूर्वं प्रणीतमेतन्महाभाष्यम् । अन्तरेण हि सार्धद्विशताऽब्दकालमेतादृशस्य महतो ग्रन्थस्याऽऽर्यावर्तीयप्राच्यदेशाद्दक्षिणदेशं यावत्प्रचारो लुप्तप्रायता च न सम्भवेदिति । तथा च महाप्रभावः खल्वाङ्गेग्जण्डरो दिग्विजयाय यदेमं भारतं प्रविष्टः (इ० ३२७ खी० पू०) तत्पूर्वमेव प्रणीतं महाभाष्यमिति । अतएव दिग्विजयिना तेन ग्रीकनृपतिना कृतः साङ्कलनगरध्वंसो नाऽवगतो महाभाष्यकारस्यैतस्य पतञ्जलेः । सति ह्यवगते तस्मिन् " सङ्कलादिभ्यश्च (पा० ४ । २ । ७५) इति सूत्रेऽवश्यमेवोच्येत ' सङ्कलेन निर्वृत्तः साङ्कलो जनपद इदानीं ध्वस्तः ' इति । कस्य हि नाम ग्रन्थकारस्य शताब्दवृत्तं किञ्चिदधिकशताब्दवृत्तं वा जनपदध्वंसनविवरणमपि न कृतं स्यात् नापि स्मृतिपथमवरोहेत् अथवा सङ्कलेन निर्वृत्तः साङ्कलो जनपदः काऽऽसीदित्येवमप्याशङ्केतैव ।

यद्युच्येत इरावत्याः पश्चिमोपतटस्थितशाकलमेव नगरमासीत्पुरा साङ्कलमिति प्रसिद्धम्, तदेव ग्रीकनृपतिना विध्वस्तमपि पुनः कालात्प्रादुर्भूतं चैनिकपरिव्राजकेन ह्योएन्थसाङ्गेनाऽपि (६२९ खी० पू०) दृष्टमिति ह्योयेन्थसाङ्गतो बहुपूर्वजस्य भाष्यकारस्य न तत्र ध्वंसनकथनाऽवसरो नाऽपि सन्देहाऽवसर इति । तत्र ब्रूमः—शाकलसाङ्कलयोरुभयोरव पाणिनीये गणपाठे पृथगवस्थानान्नैवाऽस्ति तादृशकथनाऽवसरः । किन्तु तेन हि दिग्विजयिना, इरावतीं समुत्तीर्यैव, इरावतीपूर्वोपतटस्थमराजकप्रायं साङ्कलं विध्वस्तमित्येवमेवैतिहासिकम्, चैनिकपरिव्राजकस्य ह्योयेन्थसाङ्गस्य निर्देशतस्त्ववगम्यते तत्तीर्थयात्राकाले शाकलं नाम नगरं त्विरावत्याः पश्चिमोपतटे एव स्थितमिति । तथा च नामभेदात् संस्थानभेदाच्चानयोः पार्थक्यं सुव्यज्यत एव, तदिहाऽवश्यमेव स्वीकार्यम्:—पाणिनिकाले योऽसौ साङ्कलो नामासीत् कश्चन महाजनपदः पूर्वोपतटस्य एवेरावत्याः, स एव कालात् श्रीभ्रष्टः श्रीमता दिग्विजयिना तेन ध्वस्तश्च, शाकलमिति तु तस्माद् विभिन्नमेव स्थानमिरावत्याः पश्चिमोपतटे चिरात् स्थितम् तदेव दृष्ट्वा यथावद्वर्णितं तीर्थयात्रागतेन तेन चैनिकपरिव्राजकेनेति । अपि तेन हि चैनिकपरिव्राजकेन यस्य शाकलस्य नगरत्वं वर्णितं तस्यैव " शाकलं नाम वाहीकग्रामः (४ अ० २ पा० २ आ०)" इति ग्रामत्वेन व्यपदेशो दृश्यते महाभाष्ये, ततश्च ज्ञायते—इह चैनिकपरिव्राजकागमनसमये तस्य स्थितं नगरत्वम् । ततः पुरा भाष्यकारसमये तु ग्रामत्वमेवाऽऽसीत्तस्येति ग्रामो हि नगरत्वमाप्तुं युज्यत एव क्रमोन्नत्येति । एवं चेह चैनिकपरिव्राजकाऽऽगमनाद्बहु पूर्वं, तस्य हि ग्रीक् नरपते र्विजयाऽऽगमनाच्च पूर्वमेव सुतरां खीष्टजन्मतः सार्धत्रिशतवर्षतोऽपि प्राक् प्रणीतं पातञ्जलं महाभाष्यमिति चावाप्यते ।

किञ्चाऽस्य पतञ्जलेः शाक्यबुद्धपरभवत्वनिर्णये हेतुरयम्, अस्ति च सूत्रम्—' इतराभ्योऽपि दृश्यन्ते (पा० ५ । ३ । १४), इति अनेन च तसिलादयो विधीयन्ते ते खलु भाष्यकृता भवदादिभि र्योग एवेष्टाः । भवदादिषु च ' देवानाम्प्रियः' इत्येतदपि समस्तं पदं पठितम् । दृश्यते च बौद्धग्रन्थे बौद्धानां ' देवानांप्रियः ' इति प्रशंसाख्यानम् । अतो ज्ञायत एवास्य भाष्यकारस्य शाक्यबुद्धजन्मपरभवत्वम् । तथैवाऽस्ति " षष्ठ्या आक्रोशे' (६ । ३ । २१) इति पाणिनिसूत्रम् । अत्र च सन्ति कात्यायनकृतानि कतिचिद्वार्तिकानि, तेषु चैकम् " देवानाम्प्रिय इति च मूर्खे" इति । भाष्यकारस्तु तत्र ' मूर्खे' इत्यंशं परित्यज्यैवाऽब्रवीत् ' देवानाम्प्रिय इति चोपसङ्ख्यानं कर्तव्यम्' इति । तथाचेदमपि सुव्यक्तम्—कात्यायनकाले मूर्खोऽभिधानमेवाऽऽसीत् ' देवा-

नाम्प्रिय,' इति । ततोऽतीते बहुतिथे बौद्धमान्याऽभिधानमभूत्तदेव, तात्कालज एवैष पतञ्जलिः सामयिकव्यवहारानुरोधत एव पृथगकरोत् ततो वार्तिकात् 'मूर्खे' इति । वस्तुतो यथेह भारते महम्मदीयराज्यस्थापनात् प्रागप्यप्रदेशे हिन्दुरितिव्यवहार आसीदेवाऽधार्मिकेषु, तत उत्तरं मेव समागता तदाऽनेनोपचारितेवाऽस्मासु च । व्यवाह्रियते ततो वयमपि "हीनञ्च दूषयत्यस्मात् हिन्दुः" इति (मेरुतन्त्रे) व्युत्पादनमभिमन्याऽऽत्मनो हिन्दुनाम कथनेऽपि गौरवमेव मन्यामहे । तथैव पुरा खलु पाणिनिकाले 'देवानाम्प्रियः' इति पदद्वयमसमस्तमेवासीद् व्यवहार्यम्, एतेन चाऽलमल्पपदद्वयेन मज्जीयपशोरेव बोधश्च भवतिस्म । तत उत्तरं कात्यायनकाले मूर्ख एव तत् समस्तमेकपदीभूतं पशुतुल्यत्वाव्यञ्जकं व्यपदिष्टम् । ततोऽनन्तरं बौद्धानां मूर्खत्वमेवाऽभिमन्वाने शर्वैः प्रयुक्तं तत्तेषु । काले तदेव पदं प्रशंसावचनमिति कृत्वा गृहीतं स्वस्वनामसु तैर्बौद्धैरिति तदानीं तात्कालिकव्यवहारानुरोधत एव परित्यक्तो वार्तिकीयो 'मूर्खे' इत्यंशो भाष्यकृतेति । एतावता तु सामान्यतः स्त्रीष्टजन्मतः सार्धत्रिशतवर्षपूर्वम्, शाक्यबुद्धनिर्वाणतश्चाऽप्यूनपञ्चाशद्वर्षोत्तरम् (स्त्री० पू० ३५०–५००) पतञ्जलिसमयोऽनुमीयते ।

यदुच्यते 'वर्तमाने लट्' (पा. ३–२–१२३) इति सूत्रीयभाष्ये "इह पुष्यमित्रं याजयामः" इत्युत्तमपुरुषप्रयोगात्पतञ्जलेः पुष्पमित्रार्त्विज्यमपि स्फुटम्, तदलं तात्कालिकत्वातत्कालिकत्वविचारेणेति, तदपि न विचारसहम् । यद्येवमुत्तमपुरुषप्रयोगदर्शनादेव तस्य याजकत्वमङ्गीक्रियेत तर्हि तत्रैव 'इह वसामः' इति प्रयोगदर्शनादेव तस्य पाटलीपुत्रवासित्वमप्यङ्गीकरणीयं भवेत् । न च पुष्पमित्रयागानुरोधेनैव तदानीं तस्य तत्र वासश्चाऽऽसीदिति वाच्यम्, सति हि तस्य तादृशवक्तव्याभिमते तिष्ठाम इत्येव क्रिया प्रयुज्यते न तु वसाम, इति गोनर्दवासित्वात्तस्य । किञ्च तत्रैव 'इहाधीमहे' इत्यप्युक्तमस्ति, तत्किं तदानीमपि पतञ्जलिस्तत्र पाटलिपुत्रेऽध्ययनार्थं स्थितः? गुरुमुखादर्थग्रहणमेव ह्यध्ययनमाचार्यसम्मतम्, तदिदानीं तत्र पतञ्जले र्न कथमपि सम्भाव्यते केनचिदपि, तथा चाऽवश्यमेव वक्तव्यम्—एवमादिपूत्तमपदप्रयोगदर्शनं न तु पतञ्जलेः स्वस्य तद्व्यापाराश्रयत्वं गमयति, अपि तु वैयाकरणानामुदाहरणप्रत्युदाहरणप्रदर्शनार्थं प्रयोगास्त्ववश्यमेव कल्पनीयाः सदैवेति । तदेवं यथैवोक्तम्—'इह वसामः' इति, यथैव च 'इह अधीमहे' इति तथैव 'इहपुष्पमित्र याजयामः' इति च, नच तेभ्यः किमप्यैतिहासिकं तथ्यं लभ्यमस्ति । वस्तुतः पतञ्जलि र्दृष्टपाटलीपुत्र इति वक्तुं शक्यत एव, परं पाटलीपुत्रस्थ एवेदं भाष्यं व्यरचयदिति तु न कदापि वक्तुं युज्यते, यतो भाषितमेतच्च तेनैव—"यया देवदत्त इह भूत्वा पाटलीपुत्रे भवति, सा नूनं क्रिया (१ अ. ३ पा. १ आ.) इति, पुनस्तत्रैव किञ्चिदग्रे—'स इहस्थः पाटलीपुत्रस्थं देवदत्तमुपदिशति, अङ्गदी कुण्डली व्यूढोरस्को वृत्तबाहुर्लोहिताक्षस्तुङ्गनासिको विचित्राभरण ईदृशो देवदत्त इति (१ अ. ३ पा. १ आ.) इति च । एवमादिप्रयोगदर्शनाच्च कः खलु प्रज्ञावान् मनसापि शङ्कितुं समर्थः पाटलीपुत्रनगरे स्थित एव पतञ्जलिः प्रणिनायैतद्भाष्यमिति । किञ्च प्रदर्शितयोरुदाहरणयो र्यथा किल देवदत्तो भाष्यकृत्कल्पित एव जनः, एवं प्रख्याताश्चाद्यापि दृश्यन्त एव बहवो देवदत्ताः । यथा च—"पश्य देवदत्त कष्टं श्रितो विष्णुमित्रे गुरुकुलम् (२ अ. १ पा. १ आ.)" इत्यत्र च देवदत्तविष्णुमित्रौ कल्पितौ, तथैव तत्र पुष्पमित्र-चन्द्रगुप्तावित्यपीत्यत्र च नास्त्येव सन्देहलेशोऽपीति ।

अद्यप्रचलितमहाभारतात् पूर्वजत्वं त्वेतन्महाभाष्यस्य, तस्माच्च तस्य स्त्रीष्टजन्मतो द्विशताब्दीपूर्वोद्भूतत्वन्तु पाश्चात्यैरपि स्वीकार्यम्, महाभारतस्याऽस्य हि स्त्रीष्टजन्मतो द्विशताब्दीपूर्वप्रणीतत्वे सर्वेषामेव तेषां मतैक्यात् । पुष्पमित्रस्य राज्याऽऽरम्भकालस्तु तैः स्त्रीष्टजन्मतः शताब्दीपूर्वमित्येव निर्णीतम्, तथा च स्वकृतसि-

द्वान्तव्याकोपभियाऽपि तेषां स्वीकार्यमेवाऽस्य पतञ्जलेः तत्पुष्पमित्रतोऽतिपूर्वजत्वम्, तथा तादृशोदाहरणे श्रुतस्य तस्य कल्पितव्यक्तित्वञ्च । स्वीकृते त्वेवं तत्तुल्यतया 'चन्द्रगुप्तसभा' इत्यत्र चोदाहरणे चन्द्रगुप्तेत्याख्यव्यक्तेरपि भाष्यकृत्स्वकपोलकल्पितत्वं सुवचमेवेत्यलमतिजल्पनेनेति ।

अस्ति 'अनद्यतने लङ्'(पा. ३–२–१११) इत्येकं सूत्रम् । तद्भाष्ये च वार्तिकोदाहरणतया द्वे वाक्येऽवलोक्येते—'अरुणद् यवनः साकेतम्, अरुणद् यवनो माध्यमिकान्' इति । अत्र कश्चिद्धीमान् माध्यमिकानिति नागार्जुनमतानुगतबौद्धसम्प्रदायविशेषस्थितानेव मत्वा पतञ्जलिकालनिर्णये यतितवान्, तदपि भ्रमसङ्कुलमिवैवाभाति, राजतरङ्गिणीपर्यालोचनया हि स्फुटमेवाऽवगम्यते नागार्जुनोऽसावभिमन्युसमकालिक एवेति । तथाहि—'अथ निष्कण्टको राजा कण्टकोत्साग्रहारदः । अभीर्वभूवाऽभिमन्युः शतमन्युरिवाऽपरः ॥ स्वनामाङ्कशशाङ्काङ्कशेखरं विरचय्य सः । परार्घ्यविभवं श्रीमानभिमन्युपुरं व्यधात् ॥ चन्द्राचार्यादिभिः × × × × व्याकरणं कृतम् । तस्मिन्नवसरे बौद्धा देशे प्रबलतां ययुः ॥ नागार्जुनेन सुधिया बोधिसत्त्वेन पालिताः । ते वादिनः पराजित्य वादेन निखिलान् बुधान् ॥ क्रियां नीलपुराणोक्तामच्छिन्दन्नागमद्विषः । (रा. त. १–१७४–१७८)" इति । अभिमन्युसमये एव च चन्द्राचार्यादिभि र्बह्वन्वेषणतो ह्येकं महाभाष्यपुस्तकं दक्षिणदेशादानीतमिति तु सर्ववादिसम्मतमेवेत्युक्तम्, तत्कथमभिमन्युतो बहुपुराणस्य पतञ्जलेः किलाभिमन्युसमकालोत्पन्नमाध्यमिकज्ञानसम्भवो यतश्च तादृशानां माध्यमिकानामवरोधदर्शनमपि तस्य सम्भाव्येत नामेति सुधीभिरेव विभाव्यताम् ।

यच्च कथित् "तथाच सूत्र्यते हि भगवता पिङ्गलेन पाणिन्यनुजेन" इति षड्गुरुशिष्योक्तं दृष्ट्वैव पाणिनिसमकालिकत्वं पतञ्जलेः स्वीकर्तुमीष्टे, पतञ्जलेः पिङ्गल इति नामान्तरश्रवणात्, तस्य खल्वनुत्तमधियः प्रशंसावादाः कथन्नु सम्भवेयुरेकमुखेन ? यतोऽनुद्भूतपूर्वमेवैतत्तेन निर्णीतं हिमवद्विन्ध्ययो मिलनमिवाऽतीवचित्रम् । पाणिनिपतञ्जल्योः प्रायोऽष्टादशशताब्द्यन्तरितत्वावगमात् । अत एव भगवता पतञ्जलिना क्वचित्क्वचित् पाणिनिकाले व्यवहृतं लौकिकं किञ्चिद्बोधयितुं 'पुराकल्पे,' इति तदुल्लेखः कृतः । तथाहि—"पुराकल्पे एतदासीत् × × × शब्दा उपदिश्यन्ते × × × एवं विप्रतिपन्नबुद्धिभ्योऽध्येतृभ्यः सुहृद्भूत्वा आचार्य इदं शास्त्रमन्वाचष्टे (१ अ० १ पा० १ आ०) इति" "पुराकल्पे एतदासीत् षोडशमाषा कार्षापणं षोडशपलाश्च माषशंवव्यः (१ अ० २ पा० ३ आ०=सरूपाणामितिसूत्रभाष्यान्ते) इति चैवमादि । यद्यपि पाणिन्यनुजश्च पिङ्गलः, पतञ्जलेश्च नामान्तरं पिङ्गल इति भवितुमर्हतीति सत्यम् । परमनयो र्नैक्यं स्वीकुर्मो वयम्, अपितु बहुभिन्नकालिकत्वमेव । वस्तुतोऽङ्गवर्णानुसारत एव कृष्ण, पिङ्गल, गौरश्यामेति नामानि तदानीमाख्यातानि भवन्तिस्म । छान्दोग्येऽपि श्रूयते चैकत्र पिङ्गलस्तथाहि—" अथ या एता हृदयस्य नाड्यस्ताः पिङ्गलस्याणिम्नस्तिष्ठन्ति (८–६–२) इत्यादि । नचाऽत्रापि पिङ्गलनाम्नः पाणिन्यनुजस्यान्यस्य वा कस्यचिन्मत इत्येवमर्थो गम्यते, 'शुक्लस्य' इत्यादेः 'आदित्यः पिङ्गलः' इत्यादेश्चोत्तरत्र तत्रैव श्रवणात्; छान्दोग्यस्य तस्य पाणिनिपूर्वजत्वात्तधारणाच्च । दृश्यते हि छान्दोग्येऽनेकत्र शौनकः कापेयः (पा० ४–३–५–६, ७) प्रत्युदाहरणञ्च तदेव पदमनुभूयते "कपिबोधादाङ्गिरसे (४–१–१०७)" इति पाणिनिसूत्रस्येतीह दिक् ।

अपि दृश्यते चाऽत्र महाभाष्ये (पा० ४–२–६०) आख्यायिकात्वेन वासवदत्ताया ग्रहणम् । "आख्यायिका–वासवदत्तिकः" इति । सुबन्धुकृतैवाख्यायिका सेति प्रसिद्धा, सुबन्धुश्च कविः रामायणस्य महाभारतस्य, तत्परिशिष्टरूपस्य हरिवंशस्य, विक्रमादित्यस्य च परभव एव । तथाहि—" रामायणेनैव सुन्दरका-

ण्डचारुणा " इति, " भारतेनेवसुपर्वणा " इति, हरिवंशेरिव पुष्करप्रादुर्भावरमणीयैः, इति । 'सा रसवत्ता विहिता नवका विलसन्ति चरति नो कं कः । सरसीव कीर्तिशेषं गतवति भुवि विक्रमादित्ये' इति च । तदेवमस्य हि महाभाष्यस्य वासवदत्तापरभवत्वस्वीकारपूर्वकं रामायणादिपरभवत्वमपि मन्तव्यमित्येवमपि कश्चित् शङ्कितुमुत्सहेतैव । परमवश्यं तस्येमानि च त्रीणि वितर्क्याणि भवेयुः । यदि हि स्वर्गते च विक्रमादित्ये स्थितस्य सुबन्धोः समनन्तरमेव प्रणीतं स्यात् पातञ्जलं नाम महाभाष्यम् । तर्हि काश्मीरराजाभिमन्युसमये विक्रमादित्यजन्मतो बहुपूर्वमपि चन्द्राचार्यादिभिः कथं तद्भाष्यपुस्तकमवाप्तमिति प्रथमम् । सर्वैरेव पुरातत्वमनुसन्धित्सुभि र्महाभाष्यस्यास्य ख्रीष्टजन्मपूर्वप्रणीतत्वमेकवाक्यतो निर्णीतमेव, स सर्वसिद्धान्तोऽपि कथं न व्याकुप्येतैवेति द्वितीयम् । अपि यदि हि नाम महाभाष्यकारः खल्विदानीं प्रचलितान्महाभारतादपि परभवः स्यात्, तर्हि महाभाष्येऽत्र प्रदर्शितं वृद्धकुमार्युपाख्यानं प्रचलितमहाभारतीयानुरूपमेव कथं न दृश्येतेति तृतीयम् ।

अस्मन्मते तु कालान्नष्टाक्षरताङ्गते तन्महाभाष्यपुस्तके सुबन्धुपरज एव कश्चित्तत्र 'वासवदत्तिकप्रभृत्यभिनिवेश्य तस्य नष्टाक्षरत्वमुद्दधारेति । अत एव प्रवादोऽपि " यत्र व्यालायितः फणी " इति ।

भगवतः पतञ्जलेः सुबन्ध्वादिबहुपूर्वभवत्वे, अपरा चैषोपपत्तिः समालोच्या—यो हि नाम वासवदत्ताकृतः सुबन्धोरप्युत्तरभवः, तेन चाऽवश्यं कालिदासस्य कवेरप्युत्तरभवेन भवितव्यम्, स्वीकृते च तथा कालिदासकृतान् प्रयोगानप्यवेक्ष्याऽवश्यं तत्र भाष्ये तथैवेष्टयः प्रणीता दृश्येरन्, न च तथा दृश्यन्ते, नाऽपि तेषु भाष्यकृता कश्चन विचारः कृत इति पश्यामः, प्रत्युत सिद्धान्तकौमुद्यादौ तादृशप्रयोगानामपप्रयोगत्वमेव निर्णीतमवलोक्यते । तथाहि—'अवैहि' इति वृद्धिरसाधुरेव, इति (अ. सं) किञ्च—कथं तर्हि शार्वरस्य तमसो निषिद्धये इति कालिदासः, अनुदितौषधरागा इति भारविः, समानकालीनम्, प्राक्कालीनम्,—इत्यादि च ? अपभ्रंशा एवैते इति प्रामाणिकाः, इति (तद्धि. शै.) । अपरमप्यत्रेदं विवेच्यम्—महाभाष्यप्रयुक्तानां पाणिन्यादिविरुद्धानामपि प्रयोगाणां साधुत्वं मन्यते; कालिदासादीनां तु तत्पूर्वजत्वे तत्तत्प्रयुक्तानां कथमुच्यतेऽसाधुत्वमिति ? यथा दृश्यत एव हि पाणिनीयधातुपाठविरुद्धः प्रयोगोऽसौ भाष्यकारस्य—" आदित्यश्चाभिप्राये सज्जते," इति । न चेदृशप्रयोगस्याऽसाधुत्वमाशङ्कितमपि केनचित् प्रत्युताह च कैयटः—" सज्जते इति, भाष्यकारवचनादात्मनेपदम् (३ अ. १ पा. २ आ.) " इति । तत उत्तरमिदानीन्तु भागवतादपि बहुत्रैव प्रयुक्तं दृश्यते 'सज्जते' इति । ततो वयमपि तथा प्रयोक्तुं सदैव सज्जामहे एव । एवं " भाष्यकारस्तु त्वकत्पितृको मकत्पितृक इति रूपे इष्टापत्तिं कृत्वेदं सूत्रं प्रत्याचख्यौ " इत्येवमादयश्चोक्ता दीक्षितादिभिः । अहो मतप्राबल्यं तस्य भगवतो व्याकरणेषु । अस्ति सूत्रं पाणिनीयम् " अवाद्ग्रः (१-३-५१) इति " एतेन पाणिनिमतेऽनुभूयत एव 'अवगृणीते' इत्येवमादीनामपि प्रयोगाणां साधुत्वं, परमत्र भाष्यकृता—' गृणातिस्त्ववपूर्वो न प्रयुज्यत एव, इत्युक्तम् । तस्मादेव शासनाद 'वगृणीते' इत्येवमादीन् प्रयोक्तुं न क्षमते कश्चिदपि । तदेवं कालिदासादीनामपप्रयोगानवेक्ष्य तेषां साधुत्वाख्यापनाय पातञ्जले महाभाष्ये कस्याप्येकस्य यत्नस्यानुपलम्भात् । पाणिन्यादिमतविरुद्धानामपि भाष्योक्तानां प्रयोगाणां पतञ्जलिवरितानां व्यवहारदर्शनाच्चाऽवश्यमेव महाभाष्यकारस्य भगवतः पतञ्जलेः किल कालिदासादितो बहुप्राचीनत्वं मन्तव्यमेवेति किं तस्य सुबन्धुपूर्वजत्वविचारेणेत्यलम् ।

वेदान्तसूत्राणां प्रणेतुश्चाऽयं परभवः । यदस्त्येतत्सूत्रं पाणिनीयम् " पाराशर्यशिलालिभ्यां भिक्षुनटसूत्रयोः (४–३–११०) " इति । अत्र पाराशर्यशब्देन वेदान्तसूत्रकृतो व्यासस्यैव बोधात् । अद्य वेदान्ते-

तिप्रसिद्धानामेवहि सूत्राणां पाणिनिकाले भिक्षुसूत्रेति व्यपदेश आसीत्, न चाऽन्यत्किञ्चन भिक्षुसूत्रं नामेति । अत एव वेदान्तसूत्रभाष्यवार्तिककृत् बालकृष्णाऽऽनन्दोऽपि सर्वेष्वधिकरणेषु भिक्षुसूत्रकृतमित्याद्युक्त्या पाराशर्यं व्यासमेव प्रणनाम विविधप्रकारेण वर्णयन् । तथाहि—आत्माधिकरणभाष्यवार्तिकारम्भे (सू. ४–१–२ "आत्मेति तूपगच्छन्ति ग्राहयन्ति च")

पाराशर्यः प्रथयतु परं भावमव्याऽऽहतं स्वं, सूत्रे स्वीये सकलविदुषां मोदमूलस्वभावम् ।
शिष्यैर्विश्वैरपि परिवृतः पैलपूर्वैः प्रतीतैः, आचूडं मे सजलजलदाकारदायादमूर्तिः ॥ इति ।

तथाध्यक्षाधिकरणभाष्यवार्तिकारम्भे (सू. ४–२–३ 'सोऽध्यक्षे तदुपगमादिभ्यः')—"भिक्षुयोगकृतं व्यासं शाङ्करञ्च गुरुं परम् । स्मृत्वा व्याकुर्महेऽध्यक्षसूत्रभाष्यस्य वार्तिकम्" इति । एवञ्च यान्यखिलसूत्राणि भिक्षुसूत्राणीति च कथ्यन्त इति स्फुटम् । सङ्ग्रहकारस्तु **व्याडिः** पतञ्जलेरस्मात् पूर्वतन इति तु "सङ्ग्रहेऽस्तमुपागते" इति वाक्यपदीयवचनादिभ्यश्च सिद्धमेव, तस्मिन् व्याडिकालेऽप्यस्य वेदान्तदर्शनस्य ब्रह्मविद्येति प्रसिद्धिरासीत् । तथाहि—विकृतिवल्यारम्भे श्लोकितमेतत्स्वयमेव व्याडिना—"ब्रह्मविद्यागुरुं श्रेष्ठं भारद्वाजं बृहस्पतिम् (१–३)" इति । तदेतस्य ग्रन्थस्य पातञ्जलात् प्राक्तनत्वस्य तु का कथा ? व्याडितः, पाणिनितश्चापि प्राक्तनत्वमेवेति ।

न्यायवैशेषिककाराभ्यामप्ययं पतञ्जलिः परभव एव । दृश्यत एव हि नैयायिकाद्यनुमानप्रणाल्यादिकं तत्कृते महाभाष्ये तथाहि—"धूमं दृष्ट्वा अग्निरत्रेति गम्यते" (२ अ. १ पा. १ आ.) इत्यादि ।

साङ्ख्याचार्यात्कपिलाच्चाऽयं परभवः । अत एवोक्तं दृश्यते कापिलमतम् "अथवा भवति वै कश्चित् जाग्रदपि वर्तमानं कालं नोपलभते, तद्यथा—वैयाकरणानां शाकटायनः रथमार्ग आसीनः शकटसार्थं यान्तं नोपलेभे। किं पुनः कारणं जाग्रदपि वर्तमानं कालं नोपलभते ? मनसा संयुक्तानीन्द्रियाण्युपलब्धौ कारणानि भवन्ति, मनसोऽसान्निध्यात् (३ अ. २ पा. २ आ.) इति। अपरत्र चैवम् "षड्भिः प्रकारैः सतो भावानामनुपलब्धिर्भवति । अतिसन्निकर्षात्, अतिविप्रकर्षात्, मूर्त्यन्तरव्यवधानात्, तमसावृतत्वात्, इन्द्रियदौर्बल्यात्, अतिप्रमादादिति (४ अ. १ पा. १ आ)" इति । तदेवमादीनां दर्शनात् कापिलशास्त्रप्रचारात् परभवत्वं चास्य पतञ्जलेः सुव्यक्तम् । अपि चास्य कपिलपरभवत्वविचारस्तु दूरे आस्ताम्, तत्सम्प्रदायीयद्वितीयपुरुषादासुरेश्चाऽयं पतञ्जलिर्वेद्वर्वाचीन एव, एतत्पूर्वजेनापि हि वार्तिककारेण कात्यायनेन "आसुरे रुपसंख्यानम् (पा. ४–१–१९)" इत्युक्तत्वात् । आसुरि र्हि साङ्ख्याचार्येषु द्वितीय इति दृश्यते । तथा ह्युक्तमीश्वरकृष्णेन—"पुरुषार्थज्ञानमिदं गुह्यं परमर्षिणा समाख्यातम् × × । एतत्पवित्रमग्र्यं मुनिरासुरयेऽनुकम्पया प्रददौ" (सां. त. कौ. ६९–७०) इति 'परमर्षिणा कपिलेन' इति च तत्र वाचस्पतिमिश्रकृता टीका । प्रवचनभाष्येऽप्युक्तम्, "आदिविद्वान् निर्माणचित्तमधिष्ठाय कारुण्याद् भगवान् परमर्षिरासुरये जिज्ञासमानाय तन्त्रं प्रोवाच" १।२५ इति ।

एतैः प्रमाणतर्कैर्महाभाष्यचरकसंहितादिग्रन्थकृतश्चरकपतञ्जल्यीत्यादिनामभृतो महर्षेः प्रादुर्भावः खीष्टात्प्रथमाया श्चतुर्थशताब्द्याः पूर्वमेवाऽनिश्चितोऽपि कालः सर्वसम्मत एव ।

भेलसंहिता—एषा च संहिता चरकसंहितायाः वयस्यभूतैव । एकमेवापूर्णमस्य पुस्तकं मुद्रितं लभ्यते । प्रकरणविभागश्चास्य संहितायाः सुश्रुतचरकयो रिवैवाऽस्ति । बहोः कालादल्पवृद्धतेरेषग्रन्थो न केनाऽपि व्याख्यात इत्यनुमीयते । भगवत आत्रेयस्य शिष्याणामन्यतमेन भेलेनेयं निर्मिता संहिता बहुषु विषयेष्वन्याः स्वसम्प्रदायसंहिता अतिशेते ।

वाग्भटः—वैद्यकशास्त्रे वाग्भटरचितौ द्वौ ग्रन्थौ प्रसिद्धौ अष्टाङ्गसङ्ग्रहोऽष्टाङ्गहृदयञ्च । अष्टाङ्गसङ्ग्रहकारो वाग्भटः न्यूनतो न्यूनं चतुर्दश शतवर्षपूर्वतनः । हार्नलेमहोदयोऽष्टाङ्गसङ्ग्रहकारस्य सप्तम्यां ख्रीष्टशताब्द्यां इत्सिगनाम्नश्चीनीयस्य भारतीययात्रिणो वचनाद्विरचनानतां प्रसिद्धिञ्च दर्शयति । अष्टाङ्गहृदयकारश्चान्य एव वाग्भटः । तदीयग्रन्थपाठा माधवकरेण चक्रपाणिना चोद्धृताः सन्ति । यद्यप्युभयोरेव ग्रन्थकर्त्रोर्वाग्भट इति नाम वर्तते, मूलेऽष्टाङ्गेऽपि मुद्रके लेखकेन सिंहगुप्तसूनोर्वाग्भटस्य कृताविति ग्रन्थः सान्ते समाप्तौ निहितं तथापि नैतयो रैक्यमनुमीयते । यत एकस्मिन्नेव शास्त्रे तादृशिलष्टं ग्रन्थद्वयं न कोऽपि निर्मातुं प्रवर्तेत । अष्टाङ्गसङ्ग्रहस्यैव संक्षेपोऽष्टाङ्गहृदयमित्यपि न, यतो विस्तरोऽष्टाङ्गहृदयस्याप्यष्टाङ्गसङ्ग्रहदेशस्येव । किन्तु ये विषया अष्टाङ्गसङ्ग्रहे वर्तन्तेऽत्रैव संक्षेपेण ते प्रायोऽनुपयोगिन इव दर्शिताः । यथाऽरिष्टविज्ञानादीनि । यद्यपि बहुत्र एक एव पाठः समानो वाऽष्टाङ्गसङ्ग्रहाष्टाङ्गहृदययो र्दृश्यन्ते तथापि वर्णकोऽन्तर्नामसाम्यं स्वपूर्वजगौरवततये तत्पाठग्रहणञ्च नाऽसम्भवम् । रसरत्नसमुच्चयकारस्तु तावानन्य एव वाग्भटः ग्रन्थरचनाशैल्यादौ महदन्तरत्वात् ।

माधवः—माधवनिदानाऽपरपर्यायस्य रोगविनिश्चयनामकस्य प्रसिद्धग्रन्थस्य सङ्ग्रहकारः । यतुक्तं निदाने माधवः श्रेष्ठ इति प्रवृत्ता जनश्रुतिः । सोऽयं वाग्भटापरकालिकः स्वकीयसङ्ग्रहेऽष्टाङ्गहृदयपाठानां प्रायश उद्धरणात् । वृन्दचक्रपाणिभ्यान्तु पूर्वतनो यतस्तद्रचितसङ्ग्रहयो रोगविनिश्चयोक्तक्रमेणचिकित्सोपदेशात् । "नानामतप्रथितदृष्टफलप्रयोगैः प्रस्तावनाक्यसहितैरिह सिद्धयोगः । वृन्देन मन्दमतिनाऽऽत्महितार्थिनाऽयं संलिख्यते गदविनिश्चयजक्रमेण ॥" वृ० श्लो० २ इति स्वयं वृन्देनोक्तत्वात् चक्रदत्तेऽप्येवमेव तथैव दर्शनात् । वृन्दस्य खीष्टीयनवमशताब्दी चक्रपाणेरेकादशी शताऽब्दी निश्चिता इतिहासगवेषकैः । माधवकरस्य तु अष्टाङ्गहृदयकारवृन्दयोर्मध्यकालजातत्वमस्ति ।

भावमिश्रः—भावप्रकाशरचयिता भावमिश्रो नूनं षोडश्यां खीष्टशताब्द्यामभवत् । यतस्तस्य ग्रन्थे फिरङ्गरोग इत्युपदंशविशेषस्य नाम दृश्यते । फिरङ्गाणां भारतप्रवेशस्तु षोडश्या शताब्द्या आरम्भे जातः । अतोऽनुमीयते षोडश्या शताब्द्या मध्ये भावमिश्रो भावप्रकाशमरचयत् ।

अतोऽन्येऽपि शार्ङ्गधरादयो बहवो वैद्यकग्रन्था वर्तन्ते न पौरस्त्यैर्नच पाश्चात्यै र्विद्वद्भिस्तेषां कालनिर्णयाय कोऽपि श्रमः कृतः । मुगलाना राज्यकाले तादृशानामर्वाचीनग्रन्थानां रचना अभूवन्निति निर्विवादमेव ।

अथेदं दर्शयामो बहवो रोगाः पाश्चात्यै र्येषामुत्पत्ति राधुनिकी मता ते प्राचीनतमैरप्यार्यैर्नोऽज्ञाता आसन् । पाश्चात्या हि यदा प्रभृति तांस्तान्रोगाननुभवन्ति जानन्ति च तदाप्रभृत्येव तेषामितिहासाऽऽरम्भमपि कल्पयन्ति । भवन्तु नाम ते रोगाः पुराणाऽऽयुर्वेदग्रन्थेषु नाममात्रसत्ताभाजो जनैरननुभूयमानाश्च न केवलमार्याणां पुराणग्रन्थेषु किन्तु वेदकालेऽप्यार्यास्तानजानन् तद्यथा—(१) Syphilis—पाश्चात्यरोगेतिहासेऽस्य रोगस्य जन्मकालः प्रायेण पञ्चनवत्युत्तरखिष्टीयचतुर्दशशततमे वर्षे मन्यते । यद्यपि सैनिका अमेरिकादेशादिमं रोगमानिन्युरिति ते मन्यन्ते येनचाऽस्य रोगस्य तत्कालपूर्ववर्तित्वं न विहन्यते तथापि तेषां मतेऽज्ञाताऽऽविर्भावकालस्याऽप्यस्य रोगस्य नैव प्राचीनत्वम् । सुश्रुतसंहितायां पञ्चविधा ये उपदंशरोगा वर्णितास्तेषामेव भेदेष्वयमपि सङ्कररूपेणान्तर्भवति । अननुभूतप्रायमदृष्टश्चेमं रोगमार्या आयुर्वेदविषयाणां पूर्णतयाऽभिज्ञत्वादवजग्मुरेव । अस्य रोगस्याऽतीतप्रत्यक्षव्यवहारत्वादेवाऽधुनिकपाश्चात्यग्रन्थेष्विवाऽऽर्याणां पुराणेषु ग्रन्थेषु सुविस्तृता विवृति र्न लभ्यते । अयं हि रोगोऽथर्ववेदे जायान्यशब्देन व्यवहृतः यथा—

पक्षी जायान्यः पतति स आविशति पूरुषम् । तदक्षितस्य भेषजमुभयोः सुक्षतस्य च ॥ अथर्व का. ७।५०।१

अन्यो नाऽऽनेय इति निरुक्ते व्याख्यातत्वान्नीधातोः कर्मणि अचोयदिति यत्प्रत्यये वाहुलकाट्टिलोपे न्य इति निष्पद्यते । जायाभिरर्थवशात्पुंश्चलीस्त्रीभिर्यो न्यः आनेतुं योग्यो रोगो जायान्यः उपदंशाख्यो रोगः, स हि प्रायेण दुष्टस्त्रीसंसर्गात्सङ्क्रामति, अस्य विस्तरः सुश्रुते द्रष्टव्यस्तथाहि—"तत्रातिमैथुनादतिब्रह्मचर्याद्वा तथा ब्रह्मचारिणीं चिरोत्सृष्टां रजस्वलां दीर्घरोमां कर्कशरोमा सङ्कीर्णरोमां निगूढरोमामल्पद्वारां महाद्वारामप्रियामकामामचौक्ष्यसलिलप्रक्षालितयोनिमप्रक्षालितयोनिं योनिरोगोपसृष्टां स्वभावतो वा दुष्टयोनिं वियोनिं वा नारीमत्यर्थमुपसेवमानस्य तथा करजदशनविपशूकनिपातनाद् बन्धनाद्धस्ताभिघाताच्चतुष्पदीगमनादचौक्ष्यसलिलप्रक्षालनादवपीडनाच्छुक्र-मूत्र-वेगविधारणान्मैथुनान्ते चाऽप्रक्षालनादिभिर्मेढ्रमागम्य प्रकुपिताः दोषाः क्षतेऽक्षते वा श्वयथुमुपजनयन्ति, तमुपदंशमित्याचक्षते सु० नि. १२।७ ॥" तस्य रोगस्य द्वौ प्रकारौ भवतः । एको बाह्यो द्वितीयश्चाऽऽभ्यन्तरः । तत्राऽऽद्यः शोथकोथपिडकादिभिर्घोरःखलः परं सिद्धौषधैरुपक्रान्तश्शीघ्रप्रशान्तिशीलः, × द्वितीयस्तु कस्यचिदुपस्थमुखान्तश्चर्मणि सर्षपाऽऽकारा वेदनारहिता अल्पसङ्ख्याकपिडिका भूत्वा ज्ञाताऽज्ञातास्सन्त्यो नश्यन्ति । परमथ कालविपाकेन बद्धमूलो भूत्वाऽऽखुविषमिव नानारूपाणि दर्शयन् दुरुपक्रमः सम्पद्यतेऽयं द्वितीयः पक्षः, इति कृत्वा पक्षी द्विप्रकारकः सन् पतत्यागच्छति । स च पूरुषं आ समन्तात्सप्तधातुपर्यन्तं विशति तत्प्रवेशेन च अक्षितस्य गवाक्षवत् छिद्रसहस्रैर्व्याप्तोपस्थस्याऽस्य च सुक्षतस्य प्रथमत एव क्षतयुक्तस्याऽर्थाद्बाह्याऽऽख्योपदंशस्य एवं कृत्वोभयोरुपदंशयोः कृते पक्षी पक्षीवपक्षी अग्रावुड्डयनशीलः तालक मनःशिला मल्लत्रलि तुत्थक नरसार दरद पारदविपकर्पूरभाण्डकर्पूराऽऽत्मको गणो भेषजमस्ति । तत्रापि रसेन्द्रो विशेषेण-भेषजमस्ति । वर्तमानसमयेऽपि एतेषाम्मिश्रणविशेषैरेव बहुधोपदंशनिवर्तका योगाः सङ्घठिताः दृश्यन्ते । यथा—"दरदतालकमल्लमनःशिलाः, रसविधुं विषदं शिखितुत्थकम् । सममिदं सकलं सुरया समं नवशरावयुगोद्भृतपाचितम् ॥ १७२८ ॥ मुनिमितैश्च कृतै रस पातनै, रसवरोविधुचन्द्रिकयासमः । युवतिदुष्टसमागमसम्भवान्, हरति सोमसमो विधिसेवितः ॥१७२७॥ रसयोगसागरे पृ० १८३ इत्यादि । सायणेनाऽयं मन्त्रो राजयक्ष्मपरत्वेन व्याख्यातस्तस्यमूलं "यो हरिमा जायान्योऽङ्गभेदो विसल्पकः । सर्वं ते यक्ष्ममङ्गेभ्यो बहिर्निर्हन्त्वाञ्जनम्" ॥ अथर्व का. १९।४४।२ इति मन्त्राऽऽगताऽर्थस्मरणम्—कर्मकाण्डनिष्ठस्य च तस्य चिकित्सायामनभिज्ञत्वेन भेषजशब्देन तन्मन्त्राभिमन्त्रितं वीणातन्त्रीखण्डादिरूपं भेषजंनिवर्तनौषधं भवतीति व्याख्यातं तदपि न श्रद्धास्पदं कर्मकाण्डलीनचित्ताः समग्रमपि वेदं विलक्षणाऽदृष्टजनकं मन्यन्ते तत्र नास्ति कश्चिदुपायः येन ते स्वाऽऽग्रहं परित्यजेयुरिति ।

वेदेऽक्षितः सुक्षितश्चेति प्रकारपरत्वेनद्वैविध्यमस्य रोगस्य दर्शितम् । सुश्रुतसंहितायान्तु दोषपरत्वेन पञ्चप्रकारा अस्य दर्शिताः । चरकसंहितायाञ्च ध्वजभङ्गजनितक्लैब्यरोगेऽन्तर्भावितस्तद्यथा—

बीजोपघातजं क्लैब्यं ध्वजभङ्गकृतंशृणु । अत्यम्ललवणक्षारविरुद्धाऽजीर्णभोजनात् ॥
अत्यम्बुपानाद्विषमात्पिष्टान्नगुरुभोजनात् । दधिक्षीरानूपमांससेवनाद् व्याधिकर्षणात् ॥
कन्यानां चैवगमनादयोनिगमनादपि । दीर्घरोगां चिरोत्सृष्टां तथैव च रजस्वलाम् ॥
दुर्गन्धां दुष्टयोनिं च तथैव च परिस्रुताम् । ईदृशीं प्रमदां मोहाद्यो गच्छेत्कामहर्षितः ॥
चतुष्पदाभिगमनाच्छेफसश्चाभिघाततः । अधावनाद्वा मेढ्रस्य शस्त्रदन्तनखक्षतात् ॥
काष्ठप्रहारनिष्पेषाच्छूकानां चाऽतिसेवनात् । रेतसश्च प्रतीघाताद्ध्वजभङ्गः प्रवर्तते ॥
भवन्ति यानि रूपाणि तस्य वक्ष्याम्यतः परम् । श्वयथुर्वेदना मेढ्रे रागश्चैवोपलक्ष्यते ॥
स्फोटाश्च तीव्रा जायन्ते लिङ्गपाको भवत्यपि । मांसवृद्धिर्भवेचास्य व्रणाः क्षिप्रंभवन्त्यपि ॥

पुलाकोदकसंकाशः स्रावः स्यावारुणप्रभः । वल्कपांशुलते चापि फटिनश्च परिग्रहः ॥
ज्वरस्तृष्णा भ्रमो मूर्च्छा च्छर्दिश्चास्योपजायते । रक्तं कृष्णं त्वचंचापि नीलमापिटलोहितम् ॥
अग्निनेव च दग्धस्य तीव्रो दाहः सवेदनः । वस्तौ वृषणयो वापि सीवन्यां वङ्क्षणेषु च ॥
कदाचित्पिच्छिलो वापि पाण्डुस्रावश्च जायते । श्वयथुश्च भवेन्मन्दस्तिमितोऽल्पपरिस्रवः ॥
चिराच्च पाकं व्रजति शीघ्रं वाऽथ प्रमुच्यते । जायन्ते क्रिमयश्चापि क्लिद्यते पूतिगन्धि च ॥
विशीर्यते मणिश्चाऽस्य मेढ्रं मुष्कावथापि च । ध्वजभङ्गकृतं ह्येतल्लिङ्गनिर्वर्तितसमुदाहृतम् ॥
एवं पञ्चविधं केचिद् ध्वजभङ्गं वदन्त्यपि । चरक० चि० अ० ३ । १६२–१७५

Small Pox—अस्यापि रोगस्य नामनिदानरूपचिकित्साः, नाऽतिप्राचीना इति यथापाश्चात्या मन्यन्ते न तथा । एतत्तु पूर्वमेवाऽस्माभिरुक्तम्, देशकालयुगभेदेन रोगाणां स्वरूपादावपि स्तोकं भेदो जायते किन्तु प्राचीना अर्वाचीनाश्च आर्या रोगमेनमजानन् । पुराणेषु तन्त्रग्रन्थेषु चाऽऽस्य रोगस्य शीतलेति नाम, आयुर्वेदग्रन्थेषु त्वनेकक्षुद्ररोगसङ्करभूतोऽयं रोगः । मसूरिकाः स्फोटाधानेन रोगेण प्रायः सङ्गृह्यन्ते यथा "दाहज्वररुजावन्तस्ताम्राः स्फोटाः सपीतकाः । गात्रेषु वदने चाऽन्तर्विज्ञेयास्ता मसूरिकाः"॥ सुश्रुत. नि. १३।३६

(२) Cholera—अयं रोगः पाश्चात्याऽऽधुनिकभिषग्भिरशुद्धपूतिगन्धजलोपयोगादुत्पद्यत इति मन्यते । जलद्वारैवाऽयं रोगः प्रायः सङ्क्रामति जलप्रायेषु च प्रदेशेष्वस्याऽऽधिक्यमिति च तन्मतम् । यद्यप्याधुनिका एनं रोगं सप्तदशोत्तराऽष्टादशशततमे सिस्ताऽब्दे प्रथममेवाऽवतीर्णं मन्यन्ते, किन्तु न केवलमार्याणां वेदादिग्रन्थेषु चाऽऽयुर्वेदग्रन्थेष्वस्य नामसत्ताविस्तरश्च, किन्तु पाश्चात्यानामपि पुराणेषु ग्रन्थेष्वस्य नाम निदानसम्प्राप्तिचिकित्सा दृश्यन्ते । शुक्लयजुर्वेदसंहितायामस्य रोगस्य नाम विषूचिकेति वर्तते (या व्याघ्रं विषूचिकोभौ वृकं च रक्षति । श्येनं पतत्रिणं सिंह सेमं पात्वंहसः ॥ यजु० १९ । १०) आयुर्वेदग्रन्थेष्वस्य रोगस्य विसूचिकेतिनाम । युगे युगे पञ्चमहाभूतानामवस्थाभेदात्सर्वेषामेव रोगाणां यथाभूतावस्थं मन्दता तीव्रता वा जायते यतश्च बहूनां रोगाणां पुरा अद्य च सम्प्राप्तौ भेदो दृश्यते अतएव वेदीयाऽऽयुर्वेदीयविषूचिकाविसूचिकयोरपि वर्तमानकालेऽस्यरोगात्कोऽपि भेदः न ऽसम्भवः । किन्तु निदानमारभ्याऽऽसम्प्राप्ति प्रायेण विसूचिकारोगान्नाऽयं भिद्यते—

अजीर्णमामं विष्टब्धं विदग्धञ्च यदीरितम् । विसूच्यलसकौ तस्माद्भवेच्चापि विलम्बिका ॥
सूचीभिरिव गात्राणि तुदन्संतिष्ठतेऽनिलः । यस्याऽजीर्णेन सा वैद्यै रुच्यतेहि विसूचिका ॥
न तां परिमिताऽऽहारा लभन्ते विदितागमाः । मूढास्तामजितात्मानो लभन्ते कलुषाशयाः ॥
मूर्च्छातिसारौ वमथुः पिपासा शूलं भ्रमोद्वेष्टनजृम्भदाहाः । वैवर्ण्यकम्पौ हृदये रुजश्च भवन्ति यस्यां शिरसश्च भेदः ॥
कुक्षिरानह्यतेऽत्यर्थं प्रताम्यति विकूजति । निरुद्धो मारुतश्चापि कुक्षौ विपरिधावति ॥
वातवर्चो निरोधश्च कुक्षौ यस्य भृशं भवेत् । तस्याऽऽलसकमाचष्टे तृष्णोद्गारावरोधकौ ॥
दुष्टं तु भुक्तं कफमारुताभ्यां प्रवर्तते नोर्ध्वमधश्च यस्य । विलम्बिकां तां भृशदुश्चिकित्स्यामाचक्षते शास्त्रविदः पुराणाः ॥
यत्रस्थमामं विरुजेत्तमेव देशं विशेषेण विकारजातैः । दोषेण येनावततं स्वलिङ्गैः स्तं लक्षयेदामसमुद्भवैश्च ॥
यः श्यावदन्तौष्ठनखोऽल्पसंज्ञः छर्द्यर्दितोऽभ्यन्तरयाततनेत्रः । क्षामस्वरः सर्वविमुक्तसन्धिर्यायान्नरः सोऽपुनरागमाय ॥
साध्यासु पाष्ण्योर्दहनं प्रशस्तमग्निप्रतापो वमनं च तीक्ष्णम् । पक्वे ततोऽन्ने तु विलङ्घनं स्यात्सम्पाचनं चापि विरेचनञ्च
विशुद्धदेहस्य हि सद्य एवं मूर्च्छातिसारादिरुपैति शान्तिम् । आस्थापने चापि वदन्ति पथ्यं सर्वासु योगानपरान्निबोध
सु. उ. ५६।२–१२

तं द्विविधमामप्रदोषमाचक्षते भिषजः—विसूचिकामलसकञ्च । तत्र विसूचिकामूर्ध्वं चाधश्च प्रवृत्तामदोषां यथोक्तरूपां विद्यात् ॥ १४ ॥

अलसकमुपदेक्ष्यामः—दुर्बलस्याल्पाग्नेर्बहुश्लेष्मणो वातमूत्रपुरीषवेगविधारिणः स्थिरगुरुबहुरूक्षशीतशुष्काऽन्नसेविनस्तदन्नपानमनिलप्रपीडितं श्लेष्मणा च विबद्धमार्गमतिमात्रप्रलीनमलसत्वान्न बहिर्मुखीभवति, ततश्छर्द्यतीसारवर्ज्यान्यामप्रदोषलिङ्गानि यथोक्तान्यभिदर्शयत्यतिमात्राणि, अतिमात्रप्रदुष्टाश्च दोषाः प्रदुष्टामबद्धमार्गास्तिर्यग्गच्छन्तः कदाचिदेव केवलमेवास्य शरीरं दण्डवत्स्तम्भयन्ति, ततस्तमलसकमसाध्यं ब्रुवते ॥१५॥

विरुद्धाध्यशनाजीर्णाशनशीलिनः पुनरामदोषमामविषमित्याचक्षते भिषजः, विषसदृशलिङ्गत्वात्, तत्परमसाध्यं, आशुकारित्वाद्विरुद्धोपक्रमत्वाच्चेति ॥ १६ ॥ इत्यादि ॥ चरक वि. अ. २

एवंविधा बहवो रोगाः पाश्चात्यैः केवलं क्रिमिजन्या मन्यन्ते, आयुर्वेदे त्वेतादृशाः सर्वेष्वागन्तुषु यथा सिंहव्याघ्रर्क्षतरक्ष्वादयः स्थूलजन्तवः कारणानि सन्ति तथा नानाऽऽकारा स्सूक्ष्माऽतिसूक्ष्माः क्रिमयो व्याधिकारणेषु निविशन्ते तद्यथा-रोगाणां निदानानि (कारणानि) अपरिसङ्ख्येयानि भवन्ति तेष्वागन्तुषु क्रिमयो विशेषेण कारणानि अदृष्टत्वेन तेषां दुष्परिहार्य्यत्वात् । तेषाञ्च क्रिमीणां परिसर्पणशीलत्वात्सर्पा इति तत्तद्वेदनासमूहस्य कारणत्वाद्यातुधाना इति च नाम यजुर्वेदे स्थापितम् । तथाहि—"**नमोऽस्तु** सर्पेभ्यो ये के च पृथिवीमनु । ये अन्तरिक्षे ये दिवि तेभ्यः सर्पेभ्यो नमः ॥ वा. सं. १३।६ ॥भा०" ये सर्पाः—सर्पणशीलाः क्रिमयः **पृथिवीं** पार्थिवद्रव्यम**नु** लक्षीकृत्य तत्साहाय्येनेत्यर्थः । **ये अन्तरिक्षे** वायुमण्डले **ये च दिवि** द्युलोके आकाशपरमाणुषु सर्पन्ति-सर्वतो भ्रमन्ति तन्मयत्वाल्लोकस्य, तेभ्यो नमोऽस्तु मदीयनमस्कारेण तुष्टास्ते अबाधका भवन्त्वित्यर्थः ॥ ६ ॥ ननु तेभ्यो नमस्करणे किम्प्रयोजनमित्याह—" **या इषवो** यातुधानानां ये वा वनस्पती १ँ॥रनु । ये वाऽवटेषु शेरते तेभ्यः सर्पेभ्यो नमः॥१३।७॥भा०" **याः** क्रिमिसृष्टयो **यातुधानानां** यातुं वेदनां दधतीति यातुधाना विविधवेदनोत्पादकानां यक्षरक्षःपिशाचादीनां **इषवः** बाणा इव दुःखोत्पादकारणानि सन्ति, ननु कथमेतत्स्यादित्यत आह—**ये वनस्पतीः** स्थूल सूक्ष्मप्राणिमात्राऽऽहारसाधनान्य**नु** लक्षीकृत्य वर्तन्ते । अथच **ये अवटेषु** अवनतप्रदेशेषु **शेरते** तेभ्यः सर्पेभ्यो नमोऽस्तु ॥ ७ ॥ तेषां साधारणस्थानानि निर्दिश्योत्कृष्टस्थानानि निर्देष्टुमाह—" **ये ऽमी** रोचने दिवो ये वा सूर्यस्य रश्मिषु । येषामप्सु सदस्कृतं तेभ्यः सर्पेभ्यो नमः ॥ १३।८॥ **दिवो** द्युलोकस्य सम्बन्धिनि **रोचने** प्रकाशमयस्थाने **ये च** सूर्यस्य रश्मिषु वर्तन्ते येषाञ्च अप्सु समस्तजगज्जीवनाऽऽधारेषु **सदस्कृतं** स्थानं वर्तते तेभ्यः सर्वेभ्य स्सर्पणशीलेभ्यो नमोऽस्तु। अत्र **शतपथे** अमावास्यमनि च प्राधान्यं निर्दिश्य लोकास्सर्वे परिभ्रमणशीला स्सन्तीति विज्ञाप्य ते अन्यात्मऽधीना इत्यर्थं निर्दिश्योपरिनिर्दिष्टार्थः प्रतिपादितस्तथाहि—" अथ सर्पनामैरुपतिष्ठते । इमे वै लोकाः सर्पास्ते हाऽनेन सर्वेण सर्पन्ति यदिदं किञ्च सर्वेषामु हैष देवानामात्मा यदग्निस्ते देवा एतमात्मानमुपधायाऽबिभयु र्यद्वै न इमे लोका अनेनाऽऽत्मना न सर्पेयुरिति ॥ २५ ॥ त एतानि सर्पनामान्यपश्यन्। तैरुपातिष्ठन्त तैरस्माऽइमां लोकानस्थापयंस्तै रनमयन्यदनमयंस्तस्मात्सर्पनामानि । तथैवैतद्यजमानो यत्सर्पनामैरुपतिष्ठत ऽइमानेवास्माऽएतल्लोकान्स्थापयतीमां लोकान्नमयति तथो हास्यैत ऽएतेनात्मना न सर्पन्ति ॥ २६ ॥ यद्वेव सर्पनामैरुपतिष्ठतऽइमे वै लोकाः सर्पा यद्धि किं च सर्पत्येष्वेव तल्लोकेषु सर्पति तद्यत् सर्पनामैरुपतिष्ठते । येत्रेषु लोकेषु नाष्ट्रा (अतिक्रूराः) यो व्यद्वरो (व्यदनशीलो दन्दशूकादिः) या शिमिदा (विषहेतुर्वृश्चिकादिः) तदेवैतत्सर्वं शमयति ॥ २७ ॥ नमोऽस्तु सर्पेभ्यो ये के च पृथिवीमनु । येऽन्तरिक्षे ये दिवि तेभ्यः सर्पेभ्यो नम इति । य एवैषु त्रिषु लोकेषु सर्पास्तेभ्य एतन्नमस्करोति ॥ २८ ॥ **या इषवो** यातुधानानामिति-यातुधानप्रे-

पिता हैके दशन्ति ये वा वनस्पतीँरनु ये वाऽवटेषु शेरते तेभ्य एतन्नमस्करोति ॥ २९ ॥ ये वाऽमी रोचने दिवो। ये वा सूर्यस्य रश्मिषु येषामप्सु सदस्कृतं तेभ्यः सर्पेभ्यो नम इति । यत्र यत्रैते तदेवैभ्य एतन्नमस्करोति नमो नम इति । यज्ञो वै नमो यज्ञेनवैनानेतन्नमस्कारेण नमस्यति तस्माद्ध ह नायज्ञियं ब्रूयान्नमस्तऽइति । यथा हैनं ब्रूयाद्यज्ञस्तऽइति तादृक् तत् ॥ ३० ॥ शत० ७ प्र. ३।१।२४ ॥ "

इदं प्रकरणमथर्ववेदे सूक्तत्रयेण स्पष्टतया प्रतिपादितम् तथाहि—

" इन्द्रस्य या मही " इति सूक्तेन शरीरगतविविधक्रिमिरोगेषु तच्छान्तये घृतमिश्रान् कृष्णचणकान् जुहुयात् । तथा गोवालवेष्टितं शरकाण्डं संभिद्य अग्नौ प्रताप्य आदध्यात् । एवमेव रथ्यापांसुं सव्यहस्तेनाऽऽदाय दक्षिणहस्तेन संमृज्य दक्षिणामुखः एतत्सूक्तं जपन् व्याधितस्योपरि किरति ॥

तथैव एतत्सूक्तं जपन् व्याधितो हस्ताभ्यां पांसुं मर्दयेत् । तथा अनेन सूक्तेन पलाशोदुम्बरयोः समिध आदध्यात् । तदुक्तं कौशिकेन । "इन्द्रस्य या महीति खल्वाङ्गान् अलाण्डुहननान् घृतमिश्रान् जुहोति । वालान् असितकाण्डे सव्यं परिवेष्ट्य सम्भिनत्ति प्रतपत्यादधाति सव्येन दक्षिणामुखः पांसुमुपमथ्य परिकिरति सम्मृद्नात्यादधाति " इति (कौ. ४-३) ॥

इन्द्रस्य या मही दृषत् क्रिमे विश्वस्य तर्हणी । तया पिनष्मि सं क्रिमीन् दृषदा खल्वाँ इव ॥ १ ॥

सा०भा० इन्द्रस्य देवस्य सम्बन्धिनी या मही महती। दृषत् शिलास्ति। तामेव विशिनष्टि। विश्वस्य सर्वस्य क्रिमेस्तर्हणी हन्त्री । तया उक्तप्रभावया दृषदा क्रिमीन् शरीरान्तर्गतान् सर्वान् क्षुद्रजन्तून् सम्पिनष्मि संचूर्णयामि । तत्र दृष्टान्तः । दृषदा पेषण्या खल्वान् चणकानिव ॥ १ ॥

दृष्टमदृष्टमतृहमथो कुरूरुमतृहम् । अल्गण्डून्त्सर्वाञ्छलुनान् क्रिमीन् वचसा जम्भयामसि ॥ २ ॥

सा०भा० दृष्टम् चक्षुर्गोचरम् अदृष्टम् तदगोचरम् अन्तरवस्थितं क्रिमिजातम् अतृहम् तृणेह्मि हन्मि। अथो अपि च कुरूरम् जालम् । तद्वद् अन्तरवस्थितं क्रिमिकुलम् अतृहम् । नाशयामीत्यर्थः । तानेव विशेषतो दर्शयति अल्गण्डून् इति । एतन्नाम्नः क्रिमिविशेषान् शलुनान् एतन्नाम्नश्च सर्वान् अन्यानपि क्रिमीन् वचसा मन्त्रेण जम्भयामसि जम्भयामः नाशयामः ।

अल्गण्डून् हन्मि महता वधेन दूना अदूना अरसा अभूवन् ।
शिष्टानशिष्टान् नि तिरामि वाचा यथा क्रिमीणां नकिरुच्छिषातै ॥ ३ ॥

सा० भा० अलाण्डून्=शोणितमांसदूषकान् जन्तून् महता प्रभूतेन वधेन हननसाधनेन मन्त्रौषधादिना हन्मि । ते च दूनाः मन्त्रकृतौषधादि [illegible] निर्जीवा अभूवन् । तथा शिष्टान् कान् । [illegible] निहन्मि । यथा येन प्रकारेण क्रिमीणां नानाविधानां मध्ये कश्चिदपि नकिः उच्छिषातै नैवोच्छिष्यात् । तथा नि तिरामीति सम्बन्धः ॥ ३ ॥

अन्वान्त्र्यं शीर्षण्यमथो पार्ष्टेयं क्रिमीन् । अवस्कवं व्यध्वरं क्रिमीन् वचसा जम्भयामसि ॥ ४ ॥

सा०भा० अन्वान्त्र्यं अनुक्रमेण आन्त्रेषु भवं क्रिमिजातं शीर्षण्यम् शिरसिभवं च। अथो अपि च पार्ष्टेयम् पृष्टिभवं क्रिमिम् । एतान् उक्तान् क्रिमीन् । जम्भयामसीत्युत्तरत्र सम्बन्धः । अवस्कवम् अवागगमनस्वभावम् । अन्तरन्तः प्रविश्य वर्तमानमित्यर्थः । व्यध्वरम् विविधमार्गोपेतम् । नानाद्वाराणि कृत्वा तत्र गच्छन्तमित्यर्थः ।

यद्वा ध्वरो हिंसा विविधैरौषधादिभिरपि न विद्यते ध्वरो यस्य स तथोक्तः । एवं नानाजातीयान् सर्वान् क्रिमीन् वचसा मन्त्रेण जम्भयामसि जम्भयामः ॥ अथर्व० २।३१।४ ॥

ये क्रिमयः पर्वतेषु वनेष्वोषधीषु पशुष्वप्स्वन्तः । ये अस्माकं तन्वमाविविशुः सर्वं तद्धन्मि **जनिम** क्रिमीणाम् ॥

पर्वतादिषु **अन्तः** मध्ये ये क्रिमयः स्थिताः तेऽस्माकं **तन्वः** तनूः शरीराणि आविविशुः व्रणमुखेन अन्नपानादिद्वारेण वा प्रविष्टाः । सर्वं निरवशेषं **तत्** उक्तविधं क्रिमीणां **जनिम** जन्म उत्पत्तिमेव हन्मि नाशयामि ॥ ५ ॥ अथर्व० २।३१ इति प्रथमम् सूक्तम्

षष्ठे अनुवाके पञ्चसूक्तानि । तत्र " उद्यन्नादित्यः " इति प्रथमसूक्तेन गोक्रिमिभैषज्यकर्मणि सन्ध्यात्रयेऽपि क्रिमियुतव्रणमुखं दर्भैस्ताडयेत् । तथा अनेन सूक्तेन साऽऽज्यकृष्णचणकहोमादिकं पूर्वसूक्तोक्तप्रकारेणैव कुर्यात् । सूत्रितं हि । " उद्यन्नादित्य इत्युद्यति गोनामेत्याह असाविति । सूक्तान्ते **ते हता** इति दर्भैरभ्यस्यति मध्यन्दिने च प्रतीचीम् अपराह्ने वाल्स्तुकाम् आच्छिद्य खल्वादीनि " इति (कौ. ४–३) ॥

उद्यन्नादित्यः क्रिमीन् हन्तु निम्रोचन् हन्तु रश्मिभिः । ये अन्तः क्रिमयो गवि ॥ १ ॥

आदित्यः उद्यन् उदयं प्राप्नुवन् **रश्मिभिः** व्यापनशीलैः स्वकिरणैः **क्रिमीन् हन्तु** हिनस्तु । **निम्रोचन् अस्तं** गच्छंश्च रश्मिभिः क्रिमीन् हन्तु । कुत्रत्यान् क्रिमीन् इति तत्राह ये क्रिमयः गवि । जातावेकवचनम् । गोशरीरेषु **अन्तः** मध्ये सन्ति । तान् क्रिमीन् इति पूर्वत्र सम्बन्धः ॥ अथर्व० २।३२।१ ॥

विश्वरूपं चतुरक्षं क्रिमिं सारङ्गमर्जुनम् । शृणाम्यस्य पृष्टीरपि वृश्चामि यच्छिरः ॥ २ ॥

विश्वरूपं नानाकारं **चतुरक्षम्** चतुर्नेत्रम् सारङ्गं=शबलवर्णम् **अर्जुनम्** शुभ्रवर्णम् एवं अनेकाऽऽकारं क्रिमिं शृणामि हन्मि । अस्य उक्तलक्षणस्य क्रिमेः**पृष्टीः**पार्श्वावयवानपि **यच्छिरः** शरीरान्तर्गतमांसादिभक्षकं प्रधानं अङ्गं तदपि वृश्चामि छिनद्मि ॥ अथर्व० २।३२।२ ॥

अत्रिवद् वः क्रिमयो हन्मि कण्ववज्जमदग्निवत् । अगस्त्यस्य ब्रह्मणा सं पिनष्म्यहं क्रिमीन् ॥ ३ ॥

हे क्रिमयः वः=युष्मान् **अत्रिवत् कण्ववत्** । **जमदग्निवत्** ते यथा मन्त्रसामर्थ्यात् क्रिमीन् निघ्नन्ति एवं अहमपि हन्मि । तथा अगस्त्यस्य महर्षे ब्रह्मणा मन्त्रेण अहं क्रिमीन् सर्वान् सम्पिनष्मि पुनरुद्भवो यथा न भवति तथा नाशयामि । एतेषां क्रिमिनिवारकत्वं श्रुत्यन्तरे प्रसिद्धम् । " अत्रिणा त्वा क्रिमे हन्मि कण्वेन जमदग्निना विश्वावसो ब्रह्मणा हतः । " इति ॥ अथर्व० २।३२।३ ॥

हतो राजा क्रिमीणामुतैषां स्थपति र्हतः । हतो हतमाता क्रिमि र्हतभ्राता हतस्वसा ॥ ४ ॥

क्रिमीणां राजा हतः अस्मत्प्रयुक्तमन्त्रौषधादिना नष्टः । **उत** अपि च एषां क्रिमीणां **स्थपतिः** सचिवो एवं **हतमाता** नष्टमातृकः **हतस्वसा** नष्टभगिनीकश्च **क्रिमिर्हतः** नष्टः । सस्वामिकं सामात्यं सबान्धवं कृत्स्नं क्रिमिकुलं निरवशेषं नष्टमित्यर्थः ॥ अथर्व० २।३२।४ ॥

हतासो अस्य वेशसो हतासः परिवेशसः । अथो ये क्षुल्लका इव सर्वे ते क्रिमयो हताः ॥ ५ ॥

अस्य क्रिमिकुलस्य **वेशसः** निवेशनस्थानानि मुख्यगृहा हतासः हताः । एवं **परिवेशसः** परितः स्थिताः समीपगृहाश्च **हतासः** हताः । **अथो** अपिच ये **क्षुल्लका** इव बीजावस्थाः सूक्ष्मरूपा दुर्लक्ष्याः क्रिमयः सन्ति ते सर्वेऽपि क्रिमयः **हताः** नाशिताः ॥ अथर्व० २।३२।५ ॥

प्र ते शृणामि शृङ्गे याभ्यां वितुदायसि । भिनद्मि ते कुषुम्भं यस्ते विषधानः ॥ ६ ॥

पिता हैके दशन्ति ये वा वनस्पतीँरनु ये वाऽवटेषु शेरते तेभ्य एतन्नमस्करोति ॥ २९ ॥ ये वाऽमी रोचने दिवो। ये वा सूर्यस्य रश्मिषु येषामप्सु सदस्कृतं तेभ्यः सर्पेभ्यो नम इति। यत्र यत्रैते तदेवैभ्य एतन्नमस्करोति नमो नम इति। यज्ञो वै नमो यज्ञेनवैनानेतन्नमस्कारेण नमस्यति तस्माद्ध ह नायज्ञियं ब्रूयान्नमस्तऽइति। यथा हैनं ब्रूयाद्यज्ञस्तऽइति तादृक् तत् ॥ ३० ॥ शत० ७ प्र. ३।१।२४ ॥"

इदं प्रकरणमथर्ववेदे सूक्तत्रयेण स्पष्टतया प्रतिपादितम् **तथाहि—**

"इन्द्रस्य या मही" इति सूक्तेन शरीरगतविविधक्रिमिरोगेषु तच्छान्तये घृतमिश्रान् कृष्णचणकान् जुहुयात्। तथा गोवालवेष्टितं शरकाण्डं संभिद्य अग्नौ प्रताप्य आदध्यात्। एवमेव रथ्यापांसुं सव्यहस्तेनाऽऽदाय दक्षिणहस्तेन संमृज्य दक्षिणामुखः एतत्सूक्तं जपन् व्याधितस्योपरि किरति ॥

तथैव एतत्सूक्तं जपन् व्याधितो हस्ताभ्यां पांसुं मर्दयेत्। तथा अनेन सूक्तेन पलाशोदुम्बरयोः समिध आदध्यात्। तदुक्तं कौशिकेन। "इन्द्रस्य या महीति खल्वाङ्गान् अलाण्डुहननान् घृतमिश्रान् जुहोति। वालान् असितकाण्डे सव्यं परिवेष्टय सम्भिनत्ति प्रतपत्यादधाति सव्येन दक्षिणामुखः पांसुमुपमथ्य परिकिरति सम्मृद्नात्यादधाति" इति (कौ. ४-३) ॥

इन्द्रस्य या मही दृषत् क्रिमे विश्वस्य तर्हणी। तया पिनष्मि सं क्रिमीन् दृषदा खल्वाँ इव ॥ १ ॥

सा०भा० इन्द्रस्य देवस्य सम्बन्धिनी या **मही** महती। **दृषत्** शिलास्ति। तामेव विशिनष्टि। **विश्वस्य** सर्वस्य क्रिमेस्त**र्हणी** हन्त्री। तया उक्तप्रभावया दृषदा **क्रिमीन्** शरीरान्तर्गतान् सर्वान् क्षुद्रजन्तून् **सम्पिनष्मि** संचूर्णयामि। तत्र दृष्टान्तः। दृषदा पेषण्या **खल्वान्** चणकानिव ॥ १ ॥

दृष्टमदृष्टमतृहमथो कुरूरुमतृहम्। अल्गण्डून्सर्वाञ्छलुनान् क्रिमीन् वचसा जम्भयामसि ॥ २ ॥

सा०भा० **दृष्टम्** चक्षुर्गोचरम् **अदृष्टम्** तदगोचरम् अन्तरवस्थितं क्रिमिजातम् **अतृहम्** तृणेहि हन्मि। **अथो** अपि च कुरीरम् जालम्। तद्वद् अन्तरवस्थितं क्रिमिकुलम् अतृहम्। नाशयामीत्यर्थः। तानेव विशेषतो दर्शयति अल्गण्डून् इति। एतन्नाम्नः क्रिमिविशेषान् **शलुनान्** एतन्नाम्नश्च सर्वान् अन्यानपि क्रिमीन् वचसा मन्त्रेण जम्भयामसि जम्भयामः नाशयामः।

अल्गण्डून् हन्मि महता वधेन दूना अदूना अरसा अभूवन्।
शिष्टानशिष्टान् नि तिरामि वाचा यथा क्रिमीणां नकिरुच्छिषातै ॥ ३ ॥

सा० भा० अल्गण्डून्=शोणितमांसदूषकान् जन्तून् **महता** प्रभूतेन **वधेन** हननसाधनेन मन्त्रौषधादिना हन्मि। ते च दूनाः मन्त्रौषधादिना परितप्ताः **अदूनाः** अ
अभूवन्। तथा शिष्टान् कान्। **अशिष्टान्** प्राग् अहतान्
यथा येन प्रकारेण **क्रिमीणां** नानाविधानां मध्ये कश्चिदपि **न**.**कः** उच्छिषातै नैवोच्छिष्यात्। तथा नि तिरामीति सम्बन्धः ॥ ३ ॥

अन्वान्त्र्यं शीर्षण्यमथो पार्ष्टेयं क्रिमीन्। अवस्कवं व्यध्वरं क्रिमीन् वचसा जम्भयामसि ॥ ४ ॥

सा०भा० **अन्वान्त्र्यं** अनुक्रमेण आन्त्रेषु भवं क्रिमिजातं **शीर्षण्यम्** शिरसिभवं च। **अथो** अपि च पार्ष्टेयम् पृष्टिभवं क्रिमिम्। एतान् उक्तान् क्रिमीन्। जम्भयामसीत्युत्तरत्र सम्बन्धः। **अवस्कवम्** अवागगमनस्वभावम्। अन्तरन्तः प्रविश्य वर्तमानमित्यर्थः। **व्यध्वरम्** विविधमार्गोपेतम्। नानाद्वाराणि कृत्वा तत्र गच्छन्तमित्यर्थः।

Coming, it kills the unobserved; it kills them as it goes away,
It kills them as it drives them off, and bruising bruises them to death.

शरासः कुशरासोदर्भासः सैर्या उत । मौञ्जा अदृष्टा वैरिणाः सर्वे साकं न्यलिप्सत ॥३॥

अन्वयं विषहेतुमाह—शरासः=शरा वेणुदण्डसदृशा अन्तश्छिद्रास्तृणविशेषाः कुशरासः=कुत्सितशराः अल्पच्छिद्राः शरसदृशाः तृणविशेषाः दर्भासो-दर्भाः—कुशाः सैर्याः तटाकादिप्रान्तोद्भवास्तृणविशेषाः अश्ववाला इति प्रसिद्धाः उतापिच मौञ्जाः-मुञ्जाः प्रसिद्धाः वैरिणाः-वीरणप्रकाराः एतेषु वर्तमानाः अदृष्टाः-उक्तरूपाः सर्वे विषधराः साकं-मिलित्वा न्यलिप्सत=निलिम्पन्ति स्म ॥ ऋ. १।१९१।३ ॥

Sara grass, Darbha, Kuśara, and Sairya, Munja, Virama,
Where all these creatures dwell unseen, with poison have infected me.

निगावो गोष्ठे असदन्नि मृगासो अविक्षत । नि केतवोजनानां न्य१दृष्टा अलिप्सत ॥४॥

गावो गोष्ठे न्यसदन् निषीदन्ति मृगासो=मृगाः न्यविक्षत निविष्टाः स्वस्वस्थाने उपरताः जनानां प्राणिनां केतवः प्रज्ञानानि उपसर्गश्रुतेर्योग्यक्रियाध्याहारः नीचान्यभवन् एतस्मिन् समये अदृष्टा अदृश्यमानरूपाः सन्तो न्यलिप्सत निलिम्पन्ति विशेषेण ॥ ऋ. १।१९१।४ ॥

The cows had settled in their stalls, the beasts of prey had sought their lairs.
Extinguished were the light of men, when things unseen infected me.

एत उ त्ये प्रत्यदृश्रन्प्रदोषं तस्करा इव । अदृष्टा विश्वदृष्टाः प्रतिबुद्धा अभूतन ॥५॥

त्ये-ते एते सर्पाः प्रत्यदृश्रन्=प्रतिदृश्यन्ते रात्रौ श्वासादिलिङ्गेन । उः पूरणः यद्वा ते रात्रौ हन्तारः दिवा एते प्रतिदृश्यन्ते तत्र दृष्टान्तः—प्रदोषं=रात्रिर्दोषा रात्रिं प्रति तमसाभिभूतासु रात्रिषु तस्कराः इव=हिंसकाश्चोरा दृश्यन्ते तथा तद्वत् कीदृशास्ते अदृष्टाः-अपरिदृश्यमानाः विश्वदृष्टाः=विश्वं दृष्टं यैस्ते तादृशाः प्रतिदृश्यन्ते अतो हे नराः प्रतिबुद्धा-अभूतन—भवत ॥ ऋ. १।१९१।५ ॥

Or these, these............are obscured, like lurking thieves at evening time,
Seer of all, themselves unseen: be therefore very Vigilant.

द्यौर्वः पिता पृथिवी माता सोमो भ्राता दितिः स्वसा । अदृष्टा विश्वदृष्टास्तिष्ठतेलयता सु कम् ॥६॥

अतः परं विषचिकित्सा—तत्रतावत् हे सर्पाः वो=युष्माकं द्यौः पिता पृथिवीमाता सोमोभ्राता=अदितिर्देवमाता स्वसा एवं महानुभावा महोरगा अदृष्टाः-अन्यैरदृश्यमानरूपाः स्वयं तु विश्वदृष्टाः-सर्वस्य द्रष्टारो यूयं तिष्ठत स्वस्वस्थाने मांप्रति मागच्छत सु-सुतरां कं-सुखं यथातथा इलयत=ईरयत गच्छत सोमशब्देन सोमाधारो=द्युलोक उच्यते पृथिव्यन्तरिक्षद्युस्थानस्थाः सर्पाः स्वस्वस्थानं प्राप्नुत अस्मद्बाधां माकुरुतेत्यर्थः ॥ ६ ॥

Heaven is your sire, your mother earth, Soma your brother.
Diti your sister, seeing all unseen keep still and dwell ye happily.

ये अंस्या ये अङ्ग्याः सूचीका ये प्रकङ्कताः । अदृष्टाः किञ्चनेह वः सर्वे साकं नि जस्यत ॥७॥

ये अंस्याः=अंसाहाः अंसगाः अंसे भवाः अंसाभ्यां खादन्तोवा तथा ये अङ्ग्याः-अङ्गगाः अङ्गेन शरीरेण हन्तारोवा वृश्चिकादयः सूचीकाः—सूचीदृशः पुच्छरोमाणो वृश्चिकाद्याः येच प्रकङ्कताः=प्रकृष्टविषाः प्रकृष्टगामिनो वा महोरगाः अदृष्टाः=अदृश्यमानाः किञ्चन-यत्किञ्चित्सर्पजातमस्ति इहाऽस्मिन् समीपे वो=युष्माकं किमस्ति अतः यूयं सर्वे साकं-सह नि जस्यत-मुञ्चतास्मान् जसु-मोक्षणे दैवादिकः ॥ ऋ० १।१९१।७ ॥

Biters of shoulder or of limb, with needle-stings, most venomous,
Unseen whatever ye may be, vanish together and be gone.

हे क्रिमे ते त्वदीये शृङ्गे विषाणे प्र भृणामि प्रभिनद्मि याभ्यां शृङ्गाभ्यां वितुदायसि विशेषेण तुदसि व्यथयसे । ते इति सम्बन्धः । ते तव कुषुम्भम् (कुषुम्भम्) अवयवविशेषं भिनद्मि विदारयामि । तदेवाऽवयवं विशिनष्टि । ते तव सम्बन्धी यः असमः विषधानः । विषं धीयतेऽस्मिन्निति विषधानः विषस्थानम् । तम् इति पूर्वेत्र सम्बन्धः ॥ ६ ॥ अथर्व० २।३२ ॥ इति द्वितीयम् ॥

ओतो मे द्यावापृथिवी ओता देवी सरस्वती । ओतौ म इन्द्रश्चाग्निश्च क्रिमिं जम्भयतामिति ॥ अथर्व. ५।२३।१ ॥
अस्येन्द्र कुमारस्य क्रिमीन् धनपते जहि । हता विश्वा अरातय उग्रेण वचसा मम ॥ २ ॥
यो अक्ष्यौ परिसर्पति यो नासे परि सर्पति । दतां यो मध्यं गच्छति तं क्रिमिं जम्भयामसि ॥ ३ ॥
सरूपौ द्वौ विरूपौ द्वौ कृष्णौ द्वौ रोहितौ द्वौ । बभ्रुश्च बभ्रुकर्णश्च गृध्रः कोकश्च ते हताः ॥ ४ ॥
ये क्रिमयः शितिकक्षा ये कृष्णाः शितिबाहवः । ये के च विश्वरूपास्तान् क्रिमीन् जम्भयामसि ॥ ५ ॥
उत पुरस्तात् सूर्य एति विश्वदृष्टो अदृष्टहा । दृष्टांश्च घ्नन्नदृष्टांश्च सर्वांश्च प्रमृणन् क्रिमीन् ॥ ६ ॥
ये वापासः कष्कषास एजत्काः शिपवित्नुकाः । दृष्टश्च हन्यतां क्रिमिरुतादृष्टश्च हन्यताम् ॥ ७ ॥
हतो येवापः क्रिमीणां हतो नदनिमोत । सर्वान् नि मष्मषाकरं दृषदा खल्वाँ इव ॥ ८ ॥
त्रिशीर्षाणं त्रिककुदं क्रिमिं सारङ्गमर्जुनम् । शृणाम्यस्य पृष्टीरपि वृश्चामि यच्छिरः ॥ ९ ॥
अत्रिवद् वः क्रिमयो हन्मि कण्ववज्जमदग्निवत् । अगस्त्यस्य ब्रह्मणा सं पिनष्म्यहं क्रिमीन् ॥ १० ॥
हतो राजा क्रिमीणामुतैषां स्थपति र्हतः । हतो हतमाता क्रिमि र्हतभ्राता हतस्वसा ॥ ११ ॥
हतासो अस्य वेशसो हतासः परिवेशसः । अथो ये क्षुल्लका इव सर्वे ते क्रिमयो हताः ॥ १२ ॥
सर्वेषाञ्च क्रिमीणां सर्वासां च क्रिमीणाम् । भिनद्म्यश्मना शिरो दहाम्यग्निना मुखम् ॥ १३ ॥

अथर्व० का. ५।२३।१—१३ (इति तृतीयम्)

इदमेव प्रकरणं ऋग्वेदेऽपि वर्तते यथा—

कङ्कतो न कङ्कतोऽथो सतीनकङ्कतः । द्वाविति प्लुषी इति न्य१दृष्टा अलिप्सत ॥ ऋ० मं० १।१९१।१

कङ्कतः-अल्पविषः कश्चिन्नकङ्कतः-तद्विपरीतः अनल्पविषो महारोगादिः तकतेर्गत्यर्थस्य वर्णव्यत्ययेन कङ्कत इति अतन् भवति । अथो अपिच सतीनकङ्कतः-सतीनमित्युदकनाम सतीनं गहनमिति तमामसुपाठात् । उदकचारी अल्पविषवान् कश्चित् डुण्डुभादिः एवं द्वाविति अल्पविषमहाविषभेदेन जलस्थलभेदेन वा द्विप्रकारौ इति प्लुषी-इति । प्लोषणमिति प्रकारद्वैविध्यं दाहकत्वयोः प्रतिपादनायेतिद्वयम् तथा अदृष्टाः=अदृश्यमानरूपाः एतत्संज्ञकाश्च केचित् विषधराः एवमुक्तप्रकारा ये सन्ति ते नूनं मां न्यलिप्सत-निःशेषेण लिम्पन्ति सर्वाण्यङ्गानि विषेणाऽऽभ्यन्ति केनैवं कृतमिति न ज्ञायते इति भावः ॥ १ ॥

Venomous, slightly venomous, or venomous aquatic Worms—
Both creatures, stinging, unobscured, with poison have inflicted me.

अदृष्टान्हन्त्यायत्यथो हन्ति परायती । अथो अवघ्नती हन्त्यथो पिनष्टि पिंषती ॥ २ ॥

अनेन विषघ्न्योषधिः स्तूयते आयति=विषदष्टस्य सकाशमागच्छन्ती विषनिर्हरणसाधनौषधिः अदृष्टान्-अदृश्यमानान् विषधरान् हन्ति=हिनस्ति अथो-अपिच परायती-परागच्छन्ती सम्मार्जनसमये वाक् प्रवृत्ता हन्ति नाशयति जलवर्विषधरान् अथो=अपिच अ... [illegible]
दंशकान्मारयत्येव । अथो= [illegible]
वाक्येष्वविशेषेण सर्वविषकारिणां नाश उक्तः ॥ ऋ० १।१९१।२ ॥

इत्यादयो बह्वो मन्त्रा दृष्टाऽदृष्टरोगोत्पादकक्रिमिविषजन्यरोगनाशकाः सन्ति, तत्र च ये क्रिमिविषजन्यरोगास्ते सङ्क्रामकाऽसङ्क्रामकभेदेन बहुविधाः सन्ति परन्तु तेषामायुर्वेदे सङ्क्रमणं शरीरबलापेक्षं भवतीति न परिगणितमन्यथैकसाङ्क्रामिकरोगिणः सम्पर्कात्समस्तजगत उपप्लवः स्यात्, यथा विसूचिकादावेकेनाऽपि रोगिणा समस्तदेशस्य प्रलयः स्यात् पारम्परिकसंसर्गस्य दुर्वारत्वात्। विसूचिकाग्रस्ताया मातुः स्तनन्धयस्याऽपि रोगाऽवस्थायां स्तन्यपानं कुर्वतोऽपि रोगेणाऽग्रस्तस्य दृष्टत्वात्। तस्मात्साङ्क्रामिकरोगाणां सङ्क्रमणे जनानां जठरादिशक्तिबलाऽबलत्वमसाधारणं कारणम्। अतः कीटाणुवादो न साक्षाद्रोगजनकत्वेन निर्दिष्टः किन्तु दोषा एव प्रधानतया कारणत्वेन ऋषिभिर्गणिताः सन्तीति तेषां सूक्ष्मदर्शितां विचार्य हठं हित्वा ते नितरां धन्यवादार्हा इति स्वीकरणीयम्।

शारीरविभागे यथैषां सूक्ष्मदर्शिताऽऽसीत्तथाऽग्रे निहितसन्दर्भेणाऽऽकलनीयम्—

बहोः कालाच्छारीरज्ञानस्य लुप्तप्रायतया कर्मठानां भिषजाञ्च प्रत्यक्षस्य तु का कथा अनुमातुमपि मनो नाऽलम्। पाश्चात्यैश्चीश्वराऽनुग्रहाच्छारीरशास्त्रज्योतिषोऽभ्युदयकालेऽपि वेदीयपदार्थाऽन्वेषणेऽहरहो व्याप्रियमाणेष्वपि नाऽस्ति वेदीयशारीरपदार्थानामिदमित्यन्तया परिचयः। तत्र तेषाञ्च कोऽपि दोषः, वेदानामुद्भवस्थाने (भारतवर्षे) एवाऽज्ञानतमसः प्रसृतत्वात्। संस्कृतभाषायां प्रायः पदार्थवर्णनं सङ्क्षिप्ततया दृश्यते इति भाषासहजस्वभावोऽस्ति। तत्राऽपि वेदेषु सोऽतिमात्रतया स्वीकृतोऽस्ति। तत्र च समस्तसृष्टेर्गुणत्रय—(सत्त्वरजस्तमोरूपस्य) स्याऽवस्थाविशेषैराविर्भावतिरोभावौ वर्णितौ दृश्येते। आयुर्वेदेऽपि स एव सिद्धान्तः स्वीकृतोऽस्ति। गुणेषु साक्षात्तर्पणबृंहणादिक्रियायाः कर्तुमशक्यत्वाद्गुणानां स्थूलपरिणामेषु (पञ्चमहाभूतेषु) प्राधान्येन व्यपदेशा भवन्तीति न्यायमुरीकृत्य शारीरीयपरिणामविशेषञ्चाऽऽश्रित्य वातपित्तश्लेष्माण इति कक्षात्रये समस्तं जङ्गमशरीरं प्रविभक्तम्। पञ्चमहाभूतानाञ्च विचित्रसाङ्कर्येणोत्पन्नत्वाच्छुद्धस्वरूपाणामेकान्ततोऽभावेऽपि व्यवहारार्थं प्राधान्यमनुसृत्य वर्णनं कृतमस्ति, तेनैव च बीजेन चिकित्सा व्यापारिता। गुणगुणिनोश्च भिन्नत्वेनाऽनुपलम्भात्पञ्चमहाभूतस्थगुणकर्मणामपि कथनमेकमुद्रयैव प्रायः समागच्छति, अतोऽयं विषयो जटिलतया परमगहन आसीत्। अत्र च पल्लवग्राहिणः स्थूलसूक्ष्मवर्णनादिभेदमबुद्ध्वाऽऽयुर्वेदीयसिद्धान्ते एवाऽमूलकत्वमध्यवस्यन्तीति विप्लवं विज्ञाय चेतोऽतितरां खिद्यते। अयञ्च दोषो नाऽधुनिकेषु पाश्चात्यपद्धतिचिकित्सकेष्वेव किन्तु शतपथादिब्राह्मणग्रन्थेष्वपि यत्रतत्र दृश्यते। तदर्वाचीननिरुक्तकारादिष्वपि तथैवाऽऽसाद्यते। तदर्वाचीनवेदभाष्यकर्तृषु सायणादिषु त्वत्याधिक्येन स लब्धप्रतिष्ठो बभूवेत्यनुपदमेव स्पष्टीभविष्यति, अस्याऽपराधस्य मूलमायुर्वेदस्य प्रचाराऽभावः। कृतयुगादौ ब्रह्मचर्यतपोहोमादितत्परेषु जनेषु नैरुज्ययुक्ततया प्रयोजनाऽभाव एव मुख्यं कारणमाकलय्यते। यस्य च शास्त्रस्य पठनपाठनादिशैली विच्छिन्ना भवेत्तत्र संशयविपर्यासादयः शतशो दोषाः समुत्तिष्ठन्तेऽत्र किमतिवैचित्र्यम्? एतस्य यत्किञ्चिद्दिग्दर्शनमधस्तनसन्दर्भेण द्रष्टव्यम्।

अथाऽऽर्षशारीरतत्त्वम्

तिस्रो ह प्रजा अत्यायमायन् न्यन्या अर्कमभितो विशन्त।
बृहन् ह तस्थौ रजसो विमानो हरितो हरिणीरा विवेश॥ अथर्व. १०।८।३॥

परमात्मनोऽचिन्त्याद्भुता शक्तिः सकलजगत्कारणत्वादुच्यते प्रकृतिः, सा च सृष्टिसमये परमात्मेच्छाजीवाऽदृष्टकालस्वभावोपबृंहिता सती सत्त्वरजस्तमसां पृथक्स्वरूपं यथापूर्वं प्रादुरभावयत्। तानि च प्रकृतेः प्रजाः उच्यन्ते, तास्तिस्रः प्रजाः अत्यायमतिविस्तारमयतेरिणश्च वा घञ् प्रत्ययः। आयन्—प्राप्नुवन् अन्या उक्तत्रिवि-

उत्पुरस्तात्सूर्य एति विश्वदृष्टो अदृष्टहा। अदृष्टान्त्सर्वाञ्जम्भयन्त्सर्वाश्च यातुधान्यः ॥८॥

असौ सूर्यः पुरस्तात्पूर्वस्यां दिशि उत्=उदेति कीदृशः विश्वदृष्टः—विश्वैः द्रष्टव्यः यस्य न तादृशः अदृष्टहा-अदृष्टाः विषविशेषाः विषधरविशेषा वा तेषां हन्ता। यद्वा अदृष्टदर्शनमज्ञानं अन्धकारस्तस्य हन्ता सूर्ये उदिते सति सर्वे विषधराः विषाणि वा पलायन्ते किंकुर्वन्नुदेतीति चेदुच्यते—सर्वान् अदृष्टान्=अदृश्यान् विषधरादीन् जम्भयन्=हिंसन् तथा सर्वायातुधान्यश्च—यातवो यातनाः तीव्रवेदनाः तासां धात्र्योत्पादयित्रीर्महारोगी राक्षसीश्च जम्भयन्—पुरस्तादुदेति अतोऽस्मत्तोनिजस्यतेति सम्बन्धः ॥ ऋ० १।१९१।८ ॥

Slayer of things unseen, the sun, beheld of all mounts, eastward up,
Consuming of that are not seen, and evil spirits of the night.

उदपप्तदसौ सूर्यः पुरु विश्वानि जूर्वन्। आदित्यः पर्वतेभ्यो विश्वदृष्टो अदृष्टहा ॥९॥

असौ—पुरस्ताद् दृश्यमानः सूर्यः—सर्वस्य प्रेरक आदित्यः उदपप्तत्—ऊर्ध्वं गच्छति पततेर्लुङि पुषादित्वादङ् किंकुर्वन् विश्वानि=बहूनि विषाणि पुरु प्रभूतं जूर्वन्—हिंसन् कीदृशोऽसौ पर्वतेभ्यः—पर्वतरूपः प्राणिभ्यः तेषामुपकाराय आदित्यः विषोदकादीनामदनशीलः विश्वदृष्टः=विश्वं दृष्टं येन तादृशः अदृष्टहा=अदृष्टानां विषविशेषाणां हन्ता एवं महानुभावः सूर्यः ऊर्ध्वमारोहति अतो विषशङ्का न कार्या ॥ ऋ० १।१९१।९ ॥

There hath the sun-god mounted up, who scorches much and everything,
Even the Aditya from the hills, all seen, destroying things unseen.

सूर्ये विषमासजामि दृतिं सुरावतो गृहे। सोचिन्नु न मराति नो वयं मरामाऽऽरे अस्य योजनं हरिष्ठा मधु त्वा मधुला चकार ॥ १० ॥

आदित्यमण्डले चतुर्थेनाऽङ्गुलिना विषमादाय मधुकस्य योजयित्वा निर्विषोभवेदिति यदेतद्विषविद्यायामुक्तं तदिदमत्रोच्यते-अहं—विषाभृतोऽगस्त्यः सूर्ये—सर्वस्य प्रेरयितरि मधुविद्यारूपे सूर्यमण्डले विषनाशस्य वर्तमानं सूर्ये आसजामि—आसक्तं करोमि तत्र दृष्टान्तः—सुरावतो गृहे सुरानिर्मातृसदने दृतिमिव चर्ममयसुरापात्रमिव यथा तत्कर्तुं न दोषाय भवति तद्वद्विषमा-दित्यस्य न बाधकमित्यर्थः सोचित्—चित्पूजायां नुः—प्रसिद्धौ पूज्यः सः सूर्यः खलु न मराति न म्रियते नो वयं मराम=तदनुग्रहात्तत्रैव विषस्य योजितत्वाद्वयमपि न म्रियामहे उभयोरमरणे कारणमाह—हरिष्ठाः=हरयोऽश्वाः तेषु स्थित आदित्यः आरे=दूरे अस्य विषस्य योजनं प्रापणं चकार—तदेवोच्यते हे विष त्वा—त्वां मधु अमृतं चकार विषस्य विषभावं दूरेऽपनोद्याऽमृतीचकारेति एवं मधुला मधुदात्री निर्विषीकर्त्री मधुविद्या यदेतदादित्यस्य मण्डले विषयोजनं तेन वाऽमृतीकरणं यदस्ति एषा मधुविद्या ॥ ऋ० १।१९१।१० ॥

I hang the poison in the sun, in a wine-skin in a winer's house.
He will not die, nor shall we die, his path is far; he whom—
Bay horses bear hath turned thee to sweetmeat.

इयत्तिका शकुन्तिका सका जघास ते विषम्। सोचिन्नु न मराति नो वयं मरामारे अस्य योजनं हरिष्ठा मधु त्वा मधुला चकार ॥ ११ ॥

इयत्तिका=इयत्तां कुर्वाणा इयत्तावती वा बालेत्यर्थः। [illegible]
माहुः [illegible]
साऽपि [illegible]
आदित्य [illegible]
[illegible] ॥ ऋ० १।१९१।११ ॥

This little bird, so very small, hath swallowed all thy poison up,
She will not die, nor shall we die, his path is far, he whom—
Bay horses bear hath turned thee to sweetmeat.

यथाऽधितिष्ठति । स्वर्यस्य च केवलं तस्मै ज्येष्ठाय ब्रह्मणे नमः ॥ १ ॥ स्कम्भेनेमे विष्टभिते द्यौश्च भूमिश्च तिष्ठतः । स्कम्भ इदं सर्वमात्मन्वद् यत् प्राणन्निमिषच्च यत् ॥ अ० १०।८।१–२ " इति मन्त्रद्वयेन परमेश्वरस्य सर्वनियामकत्वसर्वव्यापकत्वतटस्थत्वादीनि निरूपितानि । तृतीयमन्त्रस्य त्रिभिः पादैः प्रकृतेः समस्तप्रपञ्चस्य प्रतिपादितत्वेन पारिशेष्याज्जीव एव बुद्ध्यारूढो भवति । द्वितीयमन्त्रे स्कम्भेति परमेश्वरस्य नामत्वात् तत्सखित्वादपि जीवो ग्रहीतुमुचितः, स्कम्भेनाऽधिष्ठितत्वात् ।

" द्वादश प्रधयश्चक्रमेकं त्रीणि नभ्यानि क उ तच्चिकेत । तत्राहतास्त्रीणि शतानि शङ्कवः षष्टिश्च खीला अविचाचला ये ॥ अ. १० । ८ । ४ " द्वादश=एतत्सङ्ख्याकाः प्रधयः=परिधयस्तत्सदृशरक्षणकर्तृत्वात्पञ्चभूताऽग्नयः पञ्च च धात्वग्नयो मिलित्वा द्वादश । ननु परिधयश्चक्राऽऽधीना भवन्ति अत्र तत्स्थाने कस्य नियोजनमित्यपेक्षायामाह–एकं=प्रधानं सामान्ये नपुंसकम्, अन्नपक्ता (उदर्योऽग्निः) अग्निश्चक्रं=चक्रवत्प्रधानम् । "भौमाऽप्याग्नेयवायव्याः पञ्चोष्माणः सनाभसाः । पञ्चाऽऽहारगुणान् स्वान्स्वान् पार्थिवादीन् पचन्ति हि ॥ यथास्वैरेव पुष्यन्ते देहे द्रव्यगुणाः पृथक् । पार्थिवाः पार्थिवानेव शेषाः शेषांश्च कृत्स्नशः ॥ सप्तभिर्देहधातारो धातवो द्विविधं पुनः । यथास्वमग्निभिः पाकं यान्ति किट्टप्रसादतः ॥ च. चि. १५ । १३–१५ " इति द्वादशाऽग्नयः । " इति भौतिकधात्वन्नपक्तॄणां कर्म भाषितम् । अन्नस्य पक्ता सर्वेषां पक्तॄणामधिपो मतः ॥ तन्मूलास्ते हि तद्वृद्धिक्षयवृद्धिक्षयाऽऽत्मकाः । तस्मात्तं विधिवद्युक्तैरन्नपानेन्धनैर्हितैः ॥ पालयेत्प्रयतस्तस्य स्थितौ ह्यायुर्बलस्थितिः ॥ च. चि. १५।३९–४० " अत्र स्पष्टतयोदर्याऽग्नेः प्रधानत्वं प्रतिपादितम् । " षड्भिः केचिदहोरात्रैरिच्छन्ति परिवर्तनम् । सन्तत्या भोज्यधातूनां परिवृत्तिस्तु चक्रवत् ॥ च. चि. १५ । २१ " इत्यनेन चक्रसादृश्यमपि स्पष्टमुक्तम् ।

" सुश्रुते तु त एते शरीरधारणाद्धातव इत्युच्यन्ते । सु. सू. १४ । २० " ते च " रसाद्रक्तं ततो मांसं मांसान्मेदः प्रजायते । मेदसोऽस्थि ततो मज्जा मज्ज्ञः शुक्रन्तु जायते ॥ सु. सू. १४ । १०" इत्यनेन सप्त परिगणिताः तत्राऽपि–" तत्र पाञ्चभौतिकस्य चतुर्विधस्य षड्रसस्य द्विविधवीर्यस्य अष्टविधवीर्यस्य वाऽनेकगुणस्योपयुक्तस्याऽऽहारस्य सम्यक् परिणतस्य यस्तेजोभूतः सारः परमसूक्ष्मः स रस इत्युच्यते, तस्य च हृदयं स्थानम् ॥ सु. सू. १४ । ३" इत्यनेन रसस्य पञ्चभूतात्मकत्वनिर्देशात्पञ्चभूतानि सप्त च धातव इति कृत्वा द्वादश पूर्यन्ते । तेषाञ्च सर्वेषां रसे विद्यमानत्वम् इति द्वादशप्रधित्वमव्याहतम् । तत्राऽपि शरीरस्योर्ध्वाऽधरविभागद्वयेन रसवहा धमन्य ऊर्ध्वं द्वादश अधश्च द्वादश इति प्रतिविभागाऽपेक्षया द्वादशत्वस्य विद्यमानत्वाच्चतुर्विंशतित्वेऽपि द्वादशत्वमव्याहतम् । तिर्यग्गाणां मध्यपातित्वादर्द्धमर्द्धं प्रतिभागे स्थापनीयम् । अत्र सर्वासां हृदयस्थानत्वात्तदेव एकं=मुख्यं चक्रम् इति स्पष्टमेवाऽऽयाति द्वादशप्रधयश्चक्रमेकमिति ।

त्रीणि=त्रित्वसङ्ख्याविशिष्टानि वातश्लेष्मपित्ताख्यानि नभ्यानि=रथचक्रमध्यफलकानीव प्रधानानि वर्तन्त इति अथवा सन्तीत्युचितक्रियाऽध्याहारः करणीयः । ननु रथे शङ्कुसङ्घातो भवति अत्र तत्स्थाने किमस्तीत्यपेक्षायामाह, तत्र=शरीरनिर्माणे त्रीणि शतानि षष्टिश्च शङ्कवः=शङ्कुवद्धारणनियामकानि खीलाः परस्परं सन्धानानि । अविचाचलाः=स्थिराः निहिताः क उ कोऽपि महान् एतच्चिकेत जानाति । सायणेन तु ऋग्वेदे (१ । १६४ । ४८) "द्वादश=एतत्सङ्ख्याकाः प्रधयः=परिधयः प्रहिता वर्तन्ते तत्स्थानीयाः द्वादशमासा एकं अद्वितीयं चक्रं क्रमणस्वभावं संवत्सराख्यं चक्रं आश्रिताः तथा त्रीणि त्रिसङ्ख्याकानि नभ्यानि=नाभ्याश्रयाणि फलकानि तत्स्थानीयानि ग्रीष्मवर्षाहेमन्ताख्यानि आश्रितानि, यथा सूर्यरथचक्रस्य द्वादशपरिधयो नाभ्याश्रयाणि त्रीणि फलकानि सन्ति तद्वत्

धर्मजाभ्यः भिन्नाः प्रजा=महदादयः—अर्कमध्यपरिणामं निरूक्तेः अन्ननामकत्वात्, स्थावरजङ्गमात्मकोभयस्तुतिनिमितः= सर्वतः, अमित इति कथनेन सूक्ष्म(लिङ्ग)स्थूलशरीरघटकसामग्रीमभिशन्त । अत्र गुणत्रयस्याऽविशेषेण सृष्टौ कारणत्वेऽपि रजसो रजोगुणस्य विशिष्टं मानं परिमाणं यस्य स विमानो विस्तारो बृहन् अतिविस्तृतस्तस्मिन् तस्मै प्रादुर्भूतो ददृशे हेति प्रसिद्धौ, इममेवाऽभिप्रायं हृदयस्य सुश्रुतः प्राह—"अथातः सर्वभूतचिन्ताशारीरं व्याख्यास्यामः ॥ १ ॥ सर्वभूतानां कारणमकारणं सत्त्वरजस्तमोलक्षणमष्टरूपमखिलस्य जगतः सम्भवहेतुरव्यक्तं नाम। तदेकं बहूनां क्षेत्रज्ञानामधिष्ठानं समुद्र इवौदकानां भावानाम् ॥ २ ॥ तस्मादव्यक्तान्महानुत्पद्यते तल्लिङ्ग एव, तल्लिङ्गाच्च महतस्तल्लक्षण एवाऽहङ्कार उत्पद्यते, स तु त्रिविधो वैकारिकस्तैजसो भूतादिरिति । तत्र वैकारिकादहङ्कारात् तैजससहायात् तल्लक्षणान्येवैकादशेन्द्रियाण्युत्पद्यन्ते, तद्यथा—श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणवाग्घस्तोपस्थपायुपादमनांसीति। तत्र पूर्वाणि पञ्च बुद्धीन्द्रियाणि, इतराणि पञ्च कर्मेन्द्रियाणि, उभयात्मकं मनः । भूतादेरपि तैजससहायात् तल्लक्षणान्येव पञ्चतन्मात्राण्युत्पद्यन्ते तद्यथा—शब्दतन्मात्रं, स्पर्शतन्मात्रं, रूपतन्मात्रं, रसतन्मात्रं, गन्धतन्मात्रमिति। तेषां विशेषाः शब्दस्पर्शरूपरसगन्धाः, तेभ्यो भूतानि=व्योमाऽनिलाऽनलजलोर्व्यः, एवमेषा तत्त्वचतुर्विंशति र्व्याख्याता ॥ ३ ॥ तत्र बुद्धीन्द्रियाणां शब्दादयो विषयाः, कर्मेन्द्रियाणां यथासङ्ख्यं वचनाऽऽदानाऽऽनन्दविसर्गविहरणानि ॥ ४ ॥ अव्यक्तं महानहङ्कारः पञ्चतन्मात्राणि चेत्यष्टौ प्रकृतयः, शेषाः षोडशविकाराः ॥ ५ ॥ स्वः स्वश्चैषां विषयोऽधिभूतं, स्वयमध्यात्मं, अधिदैवतमथ—बुद्धे र्ब्रह्मा; अहङ्कारस्येश्वरः, मनसश्चन्द्रमाः, दिशः श्रोत्रस्य, त्वचो वायुः, सूर्यश्चक्षुषः, रसनस्यापः, पृथिवी घ्राणस्य, वचसोऽग्निः, हस्तयोरिन्द्रः, पादयोर्विष्णुः, पायो र्मित्रं, प्रजापतिरुपस्थस्येति ॥ ६ ॥ सु. शा. अ० १ ॥" सर्व एवाऽचेतन एष वर्गः ननु इन्द्रियाणि अचेतनानि भूत्वा कथं स्वस्वगुणग्रहणे प्रवर्तन्त इत्यपेक्षायामाह—हरितः=ग्रहणधारणपोषणादिनिर्वर्तको जीवो, हरिणी=विषयग्रहीत्रीरिन्द्रियाण्यव्यक्तीरथ च रसादिधातुसमुदायवाहयित्रीः प्रणालीरासमन्ताद्विवेश=व्याप्त इवाऽऽसीत् । जीवसम्बन्धे सत्येवैतत्परिणामस्य दृष्टत्वात् । "पुरुषः पञ्चविंशतितमः कार्यकारणसंयुक्तश्चेतयिता भवति । सु. शा. १।८" "खादीनि बुद्धिरव्यक्तमहङ्कारस्तथाऽष्टमः । भूतप्रकृतिरुद्दिष्टा विकाराश्चैव षोडश ॥ बुद्धीन्द्रियाणि पञ्चैव पञ्च कर्मेन्द्रियाणि च । समनस्काश्च पञ्चार्था विकारा इति सञ्ज्ञिताः॥ इति क्षेत्रं समुद्दिष्टं सर्वमव्यक्तवर्जितम् । अव्यक्तमस्य क्षेत्रस्य क्षेत्रज्ञमृषयो विदुः ॥ जायते बुद्धिरव्यक्ताद्बुद्ध्याऽहमिति मन्यते । परं खादीन्यहङ्कारादुत्पद्यन्ते यथाक्रमम् ॥ ततः सम्पूर्णसर्वाङ्गो जातोऽभ्युदित उच्यते । पुरुषः प्रलये चेष्टैः पुनर्भावै र्वियुज्यते ॥ अव्यक्ताद्व्यक्ततां याति व्यक्तादव्यक्ततां पुनः । रजस्तमोभ्यामाविष्टश्चक्रवत्परिवर्तते ॥ येषां द्वन्द्वे पराऽऽसक्तिरहङ्कारपराश्च ये । उदयप्रलयौ तेषां न तेषां ये त्वतोऽन्यथा ॥ प्राणापानौ निमेषाद्या जीवनं मनसो गतिः । इन्द्रियान्तरसञ्चारः प्रेरणं धारणञ्च यत् ॥ देशान्तरगतिः स्वप्ने पञ्चत्वग्रहणं तथा । दृष्टस्य दक्षिणेनाऽक्ष्णा सव्येनाऽवगमस्तथा॥ इच्छा द्वेषः सुखं दुःखं प्रयत्नश्चेतना धृतिः । बुद्धिः स्मृतिरहङ्कारो लिङ्गानि परमात्मनः ॥ यस्मात्समुपलभ्यन्ते लिङ्गान्येतानि जीवतः । न मृतस्याऽऽत्मलिङ्गानि तस्मादाहुर्महर्षयः ॥ शरीरं हि गते तस्मिञ्छून्याऽऽगारमचेतनम् । पञ्चभूताऽवशेषत्वात्पञ्चत्वं गतमुच्यते ॥ अचेतनं क्रियावच्च मनश्चेतयिता परः । युक्तस्य मनसा तस्य निर्दिश्यन्ते विभोः क्रियाः ॥ चेतनावान् यतश्चात्मा ततः कर्ता निरुच्यते । अचेतनत्वाच्च मनः क्रियावदपि नोच्यते ॥ चरक शा. १।६३–७६" "अष्टौ प्रकृतयः प्रोक्ता विकाराः षोडशैव तु । क्षेत्रज्ञश्च समासेन स्वतन्त्रपरतन्त्रयोः ॥ "तस्य सुखदुःखे इच्छाद्वेषौ प्रयत्नः प्राणाऽपानावुन्मेषनिमेषौ बुद्धिर्मनः सङ्कल्पो विचारणा स्मृति विज्ञानमध्यवसायो विषयोपलब्धिश्च गुणाः ॥ सु. शा. १।१७" ननु हरितशब्देन जीवार्थः कथं गृहीत इति चेत्सूक्तस्य प्रारम्भे—"यो भूतं च भव्यं च सर्वं

सायणेन, अहो कियान्महत्वविषयो महात्मभिः (टीकाकारैः) परित्यक्तोऽस्यैव दुर्विपाकेनाऽद्याऽऽर्षशारीरे याज्ञिकानां चिकित्सकानाञ्चेयान्मतिभ्रमः समजनि। शतपथब्राह्मणे तु " सहस्रशीर्षा पुरुषः०पुरुष एवेदं सर्वं०"(वा. सं. ३१।१-२) इत्यादौ पुरि शेते पुरुष इति साधारणव्युत्पत्त्या जीवेश्वरयोरेकमुद्रया प्रतिपादनाज्जीवपक्षे स्थावरजङ्गमभेदेन सहस्रयोनिग्रहणादथ च स्वेदजाऽण्डजोद्भिज्जरायुजभेदेन सहस्रशाखत्वम्। ईश्वरपक्षे तु सर्वत्र व्यापकतया तत्सत्त्वं मत्वा पुरुषस्य यज्ञादिना नैकधा सादृश्यं प्रतिपादितम् तद्यथा—" पुरुषो वै यज्ञः" शत० १।३।२।१ इज्यते अनेन इति यज्ञः सर्वस्याऽपि यज्ञोपकरणत्वात् तद्यथा—" पुरुषो वै संवत्सरः। तस्य पादावेव प्रायणीयोतिरात्रः पादाभ्यां हि प्रयन्ति तयोर्यच्छुक्लं तदह्नो रूपं यत्कृष्णं तद्रात्रे नखान्येवौषधिवनस्पतीनां रूपमूरूचतुर्विंशमहरूरोऽभिप्लवः पृष्ठं पृष्ठ्यः॥ १ ॥ अयमेव दक्षिणो बाहुरभिजित् इम एव दक्षिणे त्रयः प्राणाः स्वरसामानो मूर्धा विषुवानिम एवोत्तरे त्रयः प्राणाः स्वरसामानः ॥ २ ॥ अयमेवोत्तरो बाहुर्विश्वजित्। उक्तौ पृष्ठ्याभिप्लवौ यावन्यावौ प्राणौ ते गो आयुषी अङ्गानि दशरात्रो मुखं महाव्रतं हस्तावेवोदयनीयोऽतिरात्रो हस्ताभ्यां ह्युचन्ति तयोर्यच्छुक्लं तदह्नो रूपं यत्कृष्णं तद्रात्रेर्नखान्येव नक्षत्राणां रूपं स एष संवत्सरोऽध्यात्मं प्रतिष्ठितः स यो हैवमेतं संवत्सरमध्यात्मं प्रतिष्ठितं वेद प्रतितिष्ठति प्रजया पशुभिरस्मिँल्लोकेऽमृतत्वेनामुष्मिन् ॥ शत० १२।१।३।

" पुरुषो वै संवत्सरः। तस्य प्राण एव प्रायणीयोऽतिरात्रः प्राणेन हि प्रयन्ति वागेवारम्भणीयमहर्वाचा ह्यारभन्ते यद्यदारभन्ते ॥ १ ॥ अयमेव दक्षिणो हस्तोऽभिप्लवः षडहः। तस्येदमेव प्रथमहस्तस्येदमेव प्रातःसवनमिदं माध्यन्दिनं सवनमिदं तृतीयसवनं गायत्र्या आयतने तस्मादियमासां ह्रसिष्ठा ॥२॥ इदमेव द्वितीयमहः। तस्येदमेव प्रातः सवनमिदं माध्यन्दिनं सवनमिदं तृतीयसवनं त्रिष्टुभ आयतने तस्मादियमस्यै वर्षीयसी ॥३॥ इदमेव तृतीयमहः। तस्येदमेव प्रातः सवनमिदं माध्यन्दिनं सवनमिदं तृतीयसवनं जगत्या आयतने तस्मादियमासां वर्षिष्ठा ॥ ४ ॥ इदमेव चतुर्थमहः । तस्येदमेव प्रातःसवनमिदं माध्यन्दिनं सवनमिदं तृतीयसवनं विराज आयतनेऽन्नं वै विराट् तस्मादियमासामन्नादितमा ॥ ५ ॥ इदमेव पञ्चममहः। तस्येदमेव प्रातःसवनमिदं माध्यन्दिनं सवनमिदं तृतीयसवनं पङ्क्तेरायतने पृथुरिव वै पङ्क्तिस्तस्मादयमासां प्रथिष्ठः ॥ ६ ॥ इदमेव षष्ठमहः। तस्येदमेव प्रातःसवनमिदं माध्यन्दिनं सवनमिदं तृतीयसवनमतिच्छन्दस आयतने तस्मादयमासां वर्षिष्ठो गायत्रमेतदहर्भवति तस्मादिदं फलकं ह्रसिष्ठं स इतोऽभिप्लवः षडहः स इतः स इतः स इत आत्मा पृष्ठ्यः ॥ ७ ॥ एतद्ध स्म वै तद्विद्वानाह पैङ्ग्यः। प्लवन्तऽइव वाऽभिप्लवास्तिष्ठतीव पृष्ठ्य इति प्लवत इव ह्ययमङ्गैस्तिष्ठतीवात्मनेति ॥ ८ ॥ शिर एवास्य त्रिवृत्। तस्मात्तत्त्रिविधं भवति त्वगस्थि मस्तिष्कः ॥ ९ ॥ ग्रीवाः पञ्चदशः। चतुर्दश वा एतासां करूकराणि वीर्यं पञ्चदशं तस्मादेताभिरण्वीभिः सतीभि गुरुं भारं हरति तस्माद्ग्रीवाः पञ्चदशः ॥ १० ॥ उरः सप्तदशः। अष्टावन्ये जत्रवो अष्टावन्य उरः सप्तदशं तस्मादुरः सप्तदशः ॥ ११ ॥ उदरमेकविंशः। विंशति र्वा अन्तरुदरे कुन्तापान्युदरमेकविंशं तस्मादुदरमेकविंशः ॥१२॥ पार्श्वे त्रिणवः। त्रयोदशान्याः पर्शवस्त्रयोदशान्याः पार्श्वे त्रिणवे तस्मात्पार्श्वे त्रिणवः ॥ १३ ॥ अनूकं त्रयस्त्रिंशः। द्वात्रिंशद्वा एतस्य करूकराण्यनूकं त्रयस्त्रिंशं तस्मादनूकं त्रयस्त्रिंशः ॥ १४ ॥ अयमेव दक्षिणः कर्णोऽभिजित्। यदिदमक्ष्णः शुक्लं स प्रथमः स्वरसामा यत्कृष्णं स द्वितीयो यन्मण्डलं स तृतीयो नासिके विषुवान्यदिदमक्ष्णो मण्डलं स प्रथमोऽर्वाक्सामा यत्कृष्णं स द्वितीयो यच्छुक्लं स तृतीयः ॥ १५ ॥ अयमेवोत्तरः कर्णो विश्वजित्। उक्तौ पृष्ठ्याभिप्लवौ यावन्यावौ प्राणौ ते गो आयुषी अङ्गानि दशरात्रो मुखं महाव्रतमुदान एवोदयनीयोऽतिरात्र उदानेन ह्युचन्ति स एष संवत्सरोऽध्यात्मं प्रतिष्ठितः स यो हैवमेतं संवत्सरमध्यात्मं प्रतिष्ठितं वेद प्रतितिष्ठति प्रजया पशुभिरस्मिँल्लोकेऽमृतत्वेनामुष्मिन् ॥ १६ ॥ (शत० १२।२।४)

कालचक्रस्याऽपि क उ कोऽपि महान् तच्चक्रं चिकेत=जानाति। तस्मिन् चक्रे साकं सह शङ्कवोन शङ्कव इव अत्र पुरस्तादुपाचारोऽपि न शब्दः सामर्थ्यादुपमार्थीयः। तस्मिन्नपि संवत्सरचक्रे त्रिशताः एतत्सङ्ख्याकाः षष्टिर्न न शब्दश्चार्थे पट्टिश्वारा=अरस्थानीयान्यहानि अर्पिताः अर्पितानि। कीदृशानि तानि चलाचलासः एकश्च शब्दो द्विर्भावं प्राप्तः चलाः चलनस्वभावानीत्यर्थः।" इत्यन्तेन सन्दर्भेण संवत्सरपरत्वेन व्याख्यातः। निरुक्तेऽपि संवत्सरपरत्वमेव स्वीकृत्य शतपथाऽनुकरणं कृतम्, तत्र ऋग्वेदे कस्यचिदेकप्रकरणस्याऽभावाद्यत्किञ्चित्परत्वेनाऽपि व्याख्याने क्षत्यभावः। परमत्र (अथर्ववेदे) प्रारम्भादेव शारीरवर्णनस्योपक्रमात्संवत्सरपरकव्याख्यानं केनाऽपि प्रकारेण न सहृदयहृदयङ्गमतां भजति यतोऽस्य सूक्तस्याऽष्टममन्त्रे चतुर्थमन्त्रोक्तानां त्रिषष्ट्यधिकत्रिशताऽस्थ्नामुत्तमाऽधमनिकृष्टविभागेन दर्शितत्वात्, तथाहि—

पञ्चवाही वहत्यग्रमेषां प्रष्टयो युक्ता अनुसंवहन्ति।
अयातमस्य ददृशे न यातं परं नेदीयो वरं दवीयः॥ अ. १०।८।४

एषामुक्तसङ्ख्याकाऽस्थ्नां मध्ये अग्रं=श्रेष्ठं भागं पञ्च=शब्दस्पर्शरूपरसगन्धान् वहत्याहरतीति पञ्चवाही, इन्द्रियस्थानत्वान्मूर्धा धारयति समस्तशरीराऽपेक्षया शिरोऽस्थ्नां निर्माणशैलीवैचित्र्यादव्याहतं तत्राऽग्रत्वम्। अनु=शिरोऽस्थ्यपेक्षया जघन्यभागं युक्ताः संयुक्ता प्रष्टयोऽर्थात् पृष्ठवंशाः संवहन्ति धारयन्ति शिरःकपालरचनाऽपेक्षया पृष्ठिरचनाया निकृष्टत्वात्। अन्विति सादृश्याऽपरभावमिति यास्कः अस्य=एतच्छरीराऽधिष्ठातुः परं नेदीयः=अतिसमीपतरमयातमगमनम् वरं दवीयः=अतिदूरतरं यातम्=गमनं च न ददृशे केनाऽपीत्यध्याहारः, अथवा ददृश इति वर्तमानार्थकक्तेन तस्य गमनाऽगमनं प्रत्यक्षतो न केनाऽपि दृश्यते अपि तु जीवलिङ्गैः कल्प्यते यथा—

प्राणापानौ निमेषाद्या जीवनं मनसो गतिः। इन्द्रियान्तरसञ्चारः प्रेरणं धारणञ्च यत्॥
देशान्तरगतिः स्वप्ने पञ्चत्वग्रहणं तथा। दृष्टस्य दक्षिणेनाऽक्ष्णा सव्येनाऽवगमस्तथा॥
इच्छा द्वेषः सुखं दुःखं प्रयत्नश्चेतना धृतिः। बुद्धिः स्मृतिरहङ्कारो लिङ्गानि परमात्मनः॥
यस्मात्समुपलभ्यन्ते लिङ्गान्येतानि जीवतः। न मृतस्यात्मलिङ्गानि तस्मादाहुर्महर्षयः॥
शरीरं हि गते तस्मिञ्छून्यागारमचेतनम्। पञ्चभूताऽवशेषत्वात्पञ्चत्वं गतमुच्यते॥
अचेतनं क्रियावच्च मनश्चेतयिता परः। युक्तस्य मनसा तस्य निर्दिश्यन्ते विभोः क्रियाः॥
चेतनावान् यतश्चात्मा ततः कर्ता निरुच्यते। अचेतनत्वाच्च मनः क्रियावदपि नोच्यते॥
यथा स्वेनाऽऽत्मनाऽऽत्मानं नयति सर्वयोनिषु। प्राणैस्तन्त्र्यते प्राणी न ह्यन्योऽस्त्यस्य तन्त्रकः॥

चरक. शा. १। ७०—७७

किञ्चाऽस्यैव सूक्तस्यैकविंशतितममन्त्रस्योत्तरार्द्धे—" चतुष्पाद् भूत्वा भोग्यः सर्वमादत्त भोजनम्॥ अ. १०।८।२१" " पुण्डरीकं नवद्वारं त्रिभिर्गुणेभिरावृतम्। तस्मिन्यद्यक्षमात्मन्वत्तद्वै ब्रह्मविदो विदुः॥४३॥ अकामो धीरो अमृतः स्वयम्भू रसेन तृप्तो न कुतश्च नो नः। तमेव विद्वान्न बिभाय मृत्योरात्मानं धीरमजरं युवानम्॥ अ. १०।८।४४" एभिर्मन्त्रैः शारीरवर्णनस्य निस्संशयीकृतत्वात्। अत्राऽपीत्थमेव शारीरवर्णनस्तुत्यादिपरकमन्त्राणामायुर्वेदाऽनभिज्ञैः सायणादिभाष्यकृद्भिः प्रायः संवत्सरपरत्वेन व्याख्यानं कृतं दृश्यते। यत्र च संवत्सरपरत्वेनाऽपि सङ्गतिर्नाऽऽगता तत्र तत्प्रकरणमेव परित्यक्तम्। यथा इदमेव सूक्तं (अ. १०।८) तथा च 'केन पार्ष्णी आभृते पूरुषस्य० (अ. १०।२), अस्मिन् सूक्ते पुरुषस्याऽर्थान्मनुष्यस्य माहात्म्यं वर्ण्यते। तच्च तद्भिन्नभिन्नाऽवयवान् को देवोऽकरोदित्यादिप्रश्नरूपेण तत्तत्प्रश्नानामुत्तररूपेण च। यज्ञलम्पटाः साम्प्रदायिकास्तु एतत्सूक्तं पुरुषमेधे विनियोजयन्ति इत्यादिना विनियोगं निर्दिश्य मौनमालम्बितं

" पुरुषो वै संवत्सरः। पुरुष इत्येकं संवत्सर इत्येकमत्र तत्समं। द्वे वै संवत्सरस्याहोरात्रे द्वाविमौ पुरुषे प्राणावत्र तत्समं। त्रय ऋतवः संवत्सरस्य त्रय इमे पुरुषे प्राणा अत्र तत्समं। चतुरक्षरो वै संवत्सरश्चतुरक्षरो ऽयं यजमानोऽत्र तत्समं। पञ्चर्तवः संवत्सरस्य पञ्चेमे पुरुषे प्राणा अत्र तत्समं। षड् ऋतवः संवत्सरस्य षडिमे पुरुषे प्राणा अत्र तत्समं। सप्तर्तवः संवत्सरस्य सप्तेमे पुरुषे प्राणा अत्र तत्समम्॥ १॥ द्वादश वै मासाः संवत्सरस्य द्वादशेमे पुरुषे प्राणा अत्र तत्समं। त्रयोदश वै मासाः संवत्सरस्य त्रयोदशेमे पुरुषे प्राणा नाभिस्त्रयोदश्यत्र तत्समं। चतुर्विंशतिर्वै संवत्सरस्यार्धमासाश्चतुर्विंशोऽयं पुरुषो विंशत्यङ्गुलिश्चतुरङ्गोऽत्र तत्समं। षड्विंशतिर्वै संवत्सरस्यार्धमासाः षड्विंशोऽयं पुरुषः प्रतिष्ठे षड्विंश्यावत्र तत्समम्॥२॥ त्रीणि च वै शतानि षष्टिश्च संवत्सरस्य रात्रयस्त्रीणि च शतानि षष्टिश्च पुरुषस्यास्थीन्यत्र तत्समं। त्रीणि च शतानि षष्टिश्च संवत्सरस्याहानि त्रीणि च शतानि षष्टिश्च पुरुषस्य मज्जानोऽत्र तत्समम्॥ ३॥ सप्त च वै शतानि विंशतिश्च संवत्सरस्याहोरात्राणि सप्त च शतानि विंशतिश्च पुरुषस्यास्थीनि च मज्जानश्चात्र तत्समम्॥ ४॥ दश च वै सहस्राण्यष्टौ च शतानि संवत्सरस्य मुहूर्ता यावन्तो मुहूर्तास्तावन्ति पञ्चदशकृत्वः क्षिप्राणि यावन्ति क्षिप्राणि तावन्ति पञ्चदशकृत्व एतर्हीणि, यावन्त्येतर्हीणि तावन्ति पञ्चदशकृत्व इदानीनि, यावन्तीदानीनि तावन्तः पञ्चदशकृत्वः प्राणा, यावन्त प्राणास्तावन्तोऽना, यावन्तोऽनास्तावन्तो निमेषा यावन्तो निमेषास्तावन्तो लोमगर्ता, यावन्तो लोमगर्तास्तावन्ति स्वेदायनानि, यावन्ति स्वेदायनानि तावन्त एते स्तोका वर्षन्ति॥ ५॥ एतद्ध स्म वै तद्विद्वानाह वार्कलिः। *सार्वभौमं मेघं वर्षन्तं वेदाहमस्य वर्षस्य स्तोकानिति*॥६॥ तदेष श्लोकोऽभ्युक्तः। अमादन्यत्र परिवर्तमानस्तिष्ठन्नासीनो यदि वा स्वपन्नपि। अहोरात्राभ्यां पुरुषः समेन कतिकृत्वः प्राणिति चाप चानितीति॥ ७॥ तदेष श्लोकः प्रत्युक्तः। शतं शतानि पुरुषः समेनाष्टौ शता यन्मितं तद्वदन्ति। अहोरात्राभ्यां पुरुषः समेन तावत्कृत्वः प्राणिति चापचानितीति॥ ८॥ (शत० १२।३।२)

......अत्र ब्राह्मणे प्राणानां द्वित्वे उच्छ्वासनिःश्वासौ ग्रहीतव्यौ। प्रादनितेः करणे घञि, प्राणशब्दस्योत्पन्नत्वेन उच्छ्वासनिःश्वासयोर्ग्रहणं तयोर्मुख्यजीवनसाधनत्वात्। योगिनो मुक्त्वा तयोरवरुद्धयोरशीघ्रमेव पञ्चत्वस्य प्रत्यक्षदृष्टत्वात्। त्रित्वपक्षे प्राणाऽपानसमाना ग्राह्या उदानव्यानयोस्तु तेष्वेवाऽन्तर्भावो बोध्यः। अथवा वातपित्तकफानां ग्रहणं बोध्यम्, आयुर्वेदसिद्धान्तेऽनुकूल्येन वर्तमानेष्वेतेषु जीवनसद्भावात्। पञ्चत्वपक्षे प्राणाऽपानसमानव्यानोदाना ग्राह्याः। षट्त्वपक्षे खादयश्चेतनाषष्ठा धातवो ग्राह्याः—खादयश्चेतना षष्ठा धातवः पुरुषः स्मृतः। च. शा. १।१६" अधिकमासस्य यथामासर्तुगणनात्सप्त ऋतुत्वम्, अत्र रसरक्तादिसप्तधातूनां प्राणत्वेन ग्रहणम्। द्वादशप्राणत्वगणनायां भूताग्नयः पञ्च धात्वग्नयश्च सप्त इति कृत्वा द्वादशाऽग्नीनां ग्रहणम्। त्रयोदशप्राणगणनायामन्नपक्ताऽधिकत्वेन संयोजनीयः। शतपथे तु प्रतिपदङ्गमूर्द्धाऽवरभागेन द्वित्वं परिसङ्ख्याय नाभेस्त्रयोदशत्वं सङ्ख्यातम्। अथवा अग्नय एवाऽभिप्रेताः स्युरन्नपक्तुरग्नेर्मध्यशरीरवर्तित्वेन नाभित्वव्यपदेशो बोध्यः। चतुर्विंशत्यर्द्धमासतुलनायां प्राकृतिकचतुर्विंशतितत्त्वान्यादाय साम्यं साधनीयम्। तत्र लिङ्गशरीरस्य स्थूलशरीरे निवसनात्पुरुषत्वं गौणमिति बोध्यम्। मूले तु " विंशत्यङ्गुलिश्चतुरङ्गोऽत्र " इत्यनेनाऽतिस्थूलसादृश्यं साधितमिति द्रष्टव्यं सूक्ष्मदृशैः। अधिकमासार्द्धमासयोः सम्मेलनात्संवत्सरे षड्विंशतित्वम्। प्रकृतितत्त्वेषु जीवेश्वरयोस्सहमेलनात्पुरुषे षड्विंशतित्वम्। मूले तु विंशतिरङ्गुल्यः, हस्तपादान्तराविमूर्धान इति चतुर्विंशतिः, हस्तपादतले च सम्मेल्यातिस्थूलं सादृश्यं साधितम्। मासार्द्धवदस्थ्यर्द्धगणनया विंशत्यधिकसप्तशतसङ्ख्या पूरिता। नच मासार्द्धानामस्थिभिः सह सादृश्यदानमनुचितम्, द्विभागत्वेनाऽस्थ्नामप्रसिद्धेरितिवाच्यं ? अखण्डवस्तुन्यपि मध्ये भग्नमिति व्यवहारस्याऽऽबालवृद्धप्रसिद्धत्वात्। परमाणुसंयोगसृष्टिवादपक्षे त्वस्थिपरमाणूनामसङ्ख्यत्वात्तत्र कियानपि विभागः क्रियेत चेत्सोऽपि न्यूनत्वे एवाऽवतिष्ठते शरीरस्थपरमाणूनां चेतनत्वेन तत्तदीयजीवनं

व्यापारस्याऽपि पार्थक्यान्नानाप्राणाः। प्राणाऽपरपर्यायश्च निमेषशब्दोऽक्षिनिमेषाद्भिन्नोऽप्यस्ति अतो यावन्तो निमेषास्तावन्तो लोमगर्ता इत्यादि ग्रन्थः सङ्गच्छते, अन्यथा समप्रमाणाऽऽपन्नयोर्दिनरात्र्योः प्रत्यंक पञ्चदश मुहूर्ता भवन्ति मिलित्वा त्रिंशत्, तत्रैकैकस्मिन्मुहूर्ते सुश्रुतमते विंशतिः कलाः त्रिंशति मुहूर्तेषु ६०३ कलाः एकस्याः कलायास्त्रिंशतिः काष्ठाः त्र्यधिकषट्शतकलानां १८०९० काष्ठाः। एकैकस्यां काष्ठायां पञ्चदशाऽक्षिनिमेषाः। नवत्यधिकाऽष्टादशसहस्रकाष्ठानां २७१३५० अक्षिनिमेषाः, एते एकदिवसस्याऽक्षिनिमेषाः। एकवर्षस्य ९७६८६००० जाता अक्षिनिमेषाः। शतपथे ५४६७५०००० एते निमेषास्सञ्जाता अत इमे (शतपथीयनिमेषाः) नाऽक्षिनिमेषाः किन्तु तत्तदीयसहस्रशाश्वतनपरमाणुपुञ्जेषु यो जीवनाऽनुकूलो व्यापारः प्रस्फुरणात्मकस्तद्वाचकाः अतो न परस्परं विरोधः। कालस्य पुरुषस्य च सूक्ष्माऽवयवानामानन्त्यात्तत्सङ्ख्यातुं योगिनोऽपि न प्रभवन्ति परन्तु निमेषादिगणना व्यवहारसिद्धयेऽतिस्थूला प्रकल्पिताऽस्ति। तथैव पुरुषस्याऽपि शुक्रशोणितसंयोगः प्रकल्पितोऽस्ति, सूक्ष्मत्वेन तु शुक्रशोणितपरमाणुसूक्ष्मविभागगतविकारवैचित्र्येण विकारवैचित्र्यं प्रजायते तद्यथा—" यतस्तु कार्त्स्न्येनाऽविनश्यन्विकृतिमापद्यते तदनुव्याख्यास्यामः—यदा स्त्रिया दोषप्रकोपणोक्तान्यासेवमानाया दोषाः प्रकुपिताः शरीरमुपसर्पन्तः शोणितगर्भाशयावुपपद्यन्ते न तु कार्त्स्न्येन शोणितगर्भाशयौ दूषयन्ति तदेयं गर्भं लभते स्त्री, यदा गर्भस्य तस्य मातृजानामवयवानामन्यतमोऽवयवो विकृतिमापद्यते एकोऽथवाऽनेके, यस्य यस्य ह्यवयवस्य बीजे बीजभागे वा दोषाः प्रकोपमापद्यन्ते, तं तमवयवं विकृतिराविशति। यदा ह्यस्याः शोणिते गर्भाशयबीजभागः प्रदोषमापद्यते तदा वन्ध्यां जनयति। यदा पुनरस्याः शोणिते गर्भाशयबीजभागाऽवयवः प्रदोषमापद्यते तदा पूतिप्रजां जनयति। यदा त्वस्याः शोणिते गर्भाशयबीजभागाऽवयवः स्त्रीकराणाञ्च शरीरबीजभागानामेकदेशः प्रदोषमापद्यते तदा स्त्र्याकृतिभूयिष्ठामस्त्रियं वार्तां नाम जयनति तां स्त्रीव्यापदमाचक्षते ॥ ३० ॥ एवमेव यदा पुरुषस्य बीजे बीजभागः प्रकोपमापद्यते तदा वन्ध्यां जनयति, यदा पुनरस्य बीजे बीजभागाऽवयवः प्रदोषमापद्यते तदा पूतिप्रजां जनयति। यदा त्वस्य बीजे बीजभागाऽवयवः पुरुषकराणाञ्च शरीरबीजभागानामेकदेशः प्रदोषमापद्यते तदा पुरुषाऽऽकृतिभूयिष्ठमपुरुषं तृणपूलिकं नाम जनयति, तां पुरुषव्यापदमाचक्षते ॥ ३१ ॥ एतेन मातृजानां पितृजानां चाऽवयवानां विकृतिव्याख्यानेन सात्म्यजानां रसजानां सत्त्वजानां चाऽवयवानां विकृति र्व्याख्याता ॥ ३२ ॥ निर्विकारः परस्त्वात्मा सर्वभूतानां निर्विशेषः। सत्त्वशरीरयोस्तु विशेषाद्विशेषोपलब्धिः ॥३३॥ तत्र त्रयस्तु शरीरदोषाः—वातपित्तश्लेष्माणः, ते शरीरं दूषयन्ति, द्वौ पुनः सत्त्वदोषौ-रजस्तमश्च, तौ सत्त्वं दूषयतः, ताभ्यां च सत्त्वशरीराभ्यां दुष्टाभ्यां विकृतिरुपजायते, नोपजायते चाऽप्रदुष्टाभ्याम्॥ ३४॥ (च. शा. ४)" इत्यादावतिसूक्ष्मो विचारः कृतोऽस्ति। पुरुषस्य यथास्थूलसूक्ष्मविभागेन स्वरूपद्वैविध्यं विद्यते तथा संवत्सरस्याऽपि मूर्ताऽमूर्तभेदेन स्वरूपद्वैविध्यं स्वीकृतं चाऽस्ति—" भूतानामन्तकृत्कालः कालोऽन्यः कलनात्मकः। स द्विधा स्थूलसूक्ष्मत्वान्मूर्तश्चामूर्त एव च॥ १०॥ प्राणादिः कथितो मूर्तस्त्रुट्याद्योऽमूर्तसञ्ज्ञकः। षड्भिः प्राणै र्विनाडी स्यात्तत्षष्ट्या नाडिका स्मृता ॥ ११ ॥ नाडीषष्ट्या तु नाक्षत्रमहोरात्रं प्रकीर्तितम्। तत्त्रिंशता भवेन्मासः सावनोऽर्कोदयैस्तथा ॥ १२ ॥ ऐन्दवस्तिथिभिस्तद्वत्सङ्क्रान्त्या सौर उच्यते। मासै र्द्वादशभिर्वर्षं दिव्यं तदहरुच्यते ॥ १३ ॥ इत्यादि (सू. सि. १)" संवत्सरेण साकं पुरुषस्य तुलनायामन्योऽपि गूढाभिप्रायोऽस्ति स यथा—निमेषकालाद्भावानां कालः शीघ्रतरोऽत्यये। च. शा. १। ४८" शारीरधातवः सूक्ष्माऽतिसूक्ष्मविभागानारभ्य स्थूलपर्यन्तं प्रतिक्षणं परिणामशालिनः सन्ति स च परिणामो निमेषकालाद्व्यावहारिकाऽक्षिनिमेषकालादथ च शतपथीयजीवनाऽनुकूलव्यापारनिर्वर्तकादतिसूक्ष्मतमकालादपि अर्थादतिसूक्ष्मकालादपि भावानां (शारीराणामन्येषाञ्च) अत्यये विनाशे शीघ्रतरः कालोऽस्ति यदा च सौक्ष्मिकभावानामुत्प-

त्तिविनाशौ सूक्ष्मदर्शकयन्त्रादिना साक्षात्क्रियेत तर्हि कालकालिकयोरभेदेन प्रतीतिर्भवति अथ च अखण्डेऽस्मिन् काले यथा निमेषादिको भेद औपाधिकः कल्प्यते—" कालो हि नाम भगवान् स्वयम्भुरनादिमध्यनिधनोऽत्र रसव्यापत्सम्पत्ती जीवितमरणे च मनुष्याणामायत्ते । स सूक्ष्मामपि कलां न लीयत इति कालः, सङ्कलयति कालयति वा भूतानीति कालः ॥ ३ ॥ तस्य संवत्सरात्मनो भगवानादित्यो गतिविशेषेण निमेषकाष्ठाकलामुहूर्ताऽहोरात्रपक्षमासर्त्वयनसंवत्सरयुगप्रविभागं करोति ॥ ४ ॥ सु. सू० ६ ॥ " तथा कालस्थिरादिसमस्तोपाधिरहितस्य पुरुषस्यौपाधिको भेदः कल्प्यते—" निष्क्रियश्च स्वतन्त्रश्च वशिनं सर्वगं विभुम् । यदन्त्यात्मानमात्मज्ञाः क्षेत्रज्ञं साक्षिणं तथा ॥ च. शा. १।४ " ननु कथमसावुपाधिरिति चेत् ? " तत्र स्त्रीपुंसयोः संयोगे तेजः शरीराद्वायुरुदीरयति, ततस्तेजोऽनिलसन्निपाताच्छुक्रं च्युतं योनिमभिप्रतिपद्यते संसृज्यते चार्तवेन, ततोऽग्निसोमसंयोगात् संसृज्यमानो गर्भाशयमनुप्रतिपद्यते क्षेत्रज्ञो वेदयिता स्प्रष्टा घ्राता द्रष्टा श्रोता रसयिता पुरुषः स्रष्टा गन्ता साक्षी धाता वक्ता योऽसावित्येवमादिभिः पर्यायवाचकैर्नामभिरभिधीयते दैवसंयोगादक्षयोऽचिन्त्यो भूतात्मना सहान्वक्षं सत्त्वरजस्तमोभि दैवासुरैरपरैश्च भावैर्वायुनाऽभिप्रेर्यमाणो गर्भाशयमनुप्रविश्याऽवतिष्ठते ॥ सु. शा. ३।४ " अतो यथा निरुपाधिकः पुरुषः समस्तविशेषणरहितो भवति तथा सूर्यचन्द्रादिसंयोगरहितः कालोऽपि निरवच्छिन्नो भवति अतः पुरुषेण सार्कं संवत्सरस्य तुलनोचिताऽस्ति तं दृष्ट्वा सायणादयः सर्वेऽपि यत्र यत्र " द्वादशारं नहि तज्जराय वर्वर्ति चक्रं परिद्यामृतस्य । आपुत्रा अग्ने मिथुनासो अत्र सप्तशतानि विंशतिश्च तस्थुः ॥ ११ ॥ पञ्चपादं पितरं द्वादशाकृतिं दिव आहुः परे अर्धे पुरीषिणम् । अथेमे अन्य उपरे विचक्षणं सप्तचक्रे षळर आहुरर्पितम् ॥ १२ ॥ (ऋ. १।१६४) " " सप्त युञ्जन्ति रथमेकचक्रमेको अश्वो वहति सप्तनामा । त्रिनाभिचक्रमजरमनर्वं यत्रेमा विश्वा भुवनानि तस्थुः ॥ ऋ. १।१६४।२ " इत्यादयः प्रत्यक्षशारीरवर्णनपरा अपि मन्त्राः संवत्सरादिपरत्वेन व्याख्याता अतो विज्ञायते यद्धो समयात्शारीरविषये उदासितं जनैरिति । उक्तशतपथब्राह्मणे तु यथाकथञ्चित्सादृश्यं प्रदर्शितं, निरुक्तकारेणाऽपि तदेवाऽऽलम्बितमिति विचार्य नितरां खिद्यते नश्चेत इति ।

अथ त्रिदोषविवरणम्

वातपित्तश्लेष्माणश्च आयुर्वेदे तिलेषु तैलमिव व्यापका दृश्यन्ते, तेषां यथार्थस्वरूपं परिचाययितुमायुर्वेदाऽध्यापका अपि न प्रभवन्ति च्छात्राणान्तु कथैव दूरेऽपास्ता । टीकाकारैस्तु यथास्थानसमागतं यथेच्छं व्याख्यायि तत्स्वरूपं यथार्थतयैकत्र स्थानेऽनासाद्य भारतवर्षादायुर्वेदं स्वदेशं नीतवद्भि र्ग्रीसीयैः—" वमने स्वेदप्रसेकौषधकफपित्ताऽनिलाः क्रमेण प्रवर्तन्ते तथा विरेचने वातमूत्रपुरीषपित्तानि पुनश्चान्ते वायुः ॥ अष्टाङ्गसं. सू. २७ ॥ यथा च वमने प्रसेकौषधकफपित्ताऽनिलाः क्रमेण गच्छन्ति, एवं विरेचने मूत्रपुरीषपित्तौषधकफा इति, सु. चि. ३३।२२ ", इत्यादिवाक्यानि दृष्ट्वा अधोवातादौ वातः, कासादौ तन्तुमच्छ्वेतपदार्थः कफः, वमने हरितपीतनीलवर्णो द्रवः पित्तमिति स्थूलस्वरूपं वातादीनां निरचायि । तद् दृष्ट्वा गताऽनुगतिकतया तत्समीपवर्तिदेशीयैरपि तत्रैव वातादीनां स्वरूपं स्थिरीकृतम् । ततश्च भारतीयाऽऽयुर्वेदे न किञ्चित्सूक्ष्मशारीरतत्त्वं चिकित्सातत्त्वञ्चाऽस्तीति विविधमप्याक्षेपि । तद् दृष्ट्वा विदेशीयविज्ञानझञ्झावातप्रकम्पितमस्तिष्का भारतीया अपि अस्मत्पूर्वजाश्चिकित्सारहस्यं न किमपि ज्ञातवन्त इति प्रतिपदं प्रत्यहञ्च अधिक्षिपन्ति तद् दृष्ट्वा दग्धे क्षारदानमिवाऽऽसाद्य नितरां विषीदति चेतः । तत्कालुष्यं निर्मिमार्जिषवो वैद्यवरा ' आयुर्वेदीयत्रिदोषवादोऽत्यन्तमनुमानविषयः इन्द्रियसृष्टेरपि गहनविषयः स च रत्नपरीक्षकैरिवाऽऽजन्माऽभ्यस्तः यत्किञ्चिन्मात्रं हृदये स्फुरति, इत्यादि वाग्जालमास्तीर्य पुनरपि तं विषयं भ्रमगुहायां पिदधति । तदाऽऽकलय्याऽऽयुर्वेदाऽध्यायिनां

बुद्धि नितरां कुण्ठिता भवति। तत्र यत्किञ्चिद्यथाशक्ति विचार्यते—"सर्वेषां व्याधीनां वातपित्तश्लेष्माण एव मूलं तल्लिङ्गत्वाद् दृष्टफलत्वादागमाच्च। यथाहि—कृत्स्नं विकारजातं विश्वरूपेणाऽवस्थितं सत्त्वरजस्तमांसि न व्यतिरिच्यन्ते, एवमेव कृत्स्नं विकारजातं विश्वरूपेणाऽवस्थितमव्यतिरिच्य वातपित्तश्लेष्माणो वर्तन्ते। सु. सू. २४।८" अत्र सत्त्वरजस्तमांसि विश्वरूपेण=समस्तब्रह्माण्डरूपेण अवस्थितं=दृश्याऽदृश्यरूपेण स्थितं तत्कृत्स्नं समग्रमपि विकारजातं=कार्यजातं मृदो घटादिवत् स्वस्वरूपाऽभिन्नं सत्त्वरजस्तमांसि=समस्तसृष्टेः कारणभूतानि न व्यतिरिच्यन्ते स्वस्वरूपतस्तानि पृथग्भूत्वा न दृश्यन्ते, स्वस्वरूपस्यैवाऽऽकारविशेषेण विकारजातस्य परिणतत्वात् मृद्घटस्य मृदभिन्नत्वेनैव जायमानत्वाद् इयत्परिमाणमृद्भागेन घट उत्पन्नस्तावतो भागस्य पृथग्वर्तमानत्वं घटं विहाय न दृश्यते, दृश्यते तु तस्मिन् घटे एव। मृत्पिण्डस्य घटरूपेण परिणतत्वादाकारमात्रस्यैव विशेषत्वम्, वस्तुतस्तु येयं मृत्पिण्डरूपे आसीत् सैव घटेऽप्यस्ति उपादानकारणस्य कार्यात्पृथग्दर्शनं न भवत्येवेति सर्वजनीनः सिद्धान्तः। एवमनेनैव प्रकारेणेदं=पुरतो दृश्यमानं विश्वरूपेण=शारीराऽऽरम्भकसूक्ष्माऽतिसूक्ष्माऽवयवानारभ्य स्थूलाऽऽकारपर्यन्तं परिणतं आकारविशेषमासादयद्विकारजातं=शरीररूपम्। अवस्थितं=नानाप्रकारेण वर्तमानं व्यतिरिच्य=पृथक् स्थापयित्वा वातपित्तश्लेष्माणो न वर्तन्ते। अयमत्राऽभिसन्धिः, यथा—विश्वरूपं जगत् सत्त्वरजस्तमसां परिणामरूपमस्ति तथा इदं शरीरं वातपित्तश्लेष्मणां परिणामरूपम्। शरीरस्योपादानकारणानि ह्येते, न च वाच्यमन्योऽन्याऽऽश्रयो दोष इति मातापित्रोः शुक्रशोणितयोरेव तद्रूपत्वात्। तथाच—"नर्ते देहः कफादस्ति न पित्तान्न च मारुतात्। शोणितादपि वा नित्यं देह एतैस्तु धार्यते॥ सु. सू. २१।४" अयं देहः सूक्ष्माऽतिसूक्ष्माऽवयवैः सङ्घीभूयोपचितः कफादृते=कफं विहाय, ल्यब्लोपे पञ्चमी। एवं पित्तात्=पित्तं विहाय, एवं मारुतात्=मारुतं विहाय नास्ति। एतान् पृथक् स्थापयित्वा नैव द्रष्टुं शक्यते (उपादानकारणत्वादेषाम्) अत्र वातपित्तकफानां स्वरूपस्याऽपरिचितत्वादाह—शोणितादपि वेति। शोणितं विहाय पृथक् कृत्वा शरीरं भिन्नतया केनाऽपि द्रष्टुमशक्यं, एतैः परिचिताऽपरिचितैः देहो धार्यते। अथवा शोणितशब्देन मातृरजसो ग्रहणमस्ति। एतेषां देहधारणे मृदा घटो धार्यत इतिवदुपादान(समवायि) कारणत्वं बोध्यम्। न पुनः शिक्येन घटो धार्यत इतिवत् निमित्तकारणत्वम्। तत्र शोणितस्य शरीराऽऽरम्भकत्वम् सर्वजनप्रसिद्धम्। तत्रैषां धातूनामन्नपानरसः प्रीणयिता। रसजं पुरुषं विद्याद्रसं रक्षेत्प्रयत्नतः। अन्नात्पानाच्च मतिमानाचाराच्चाऽप्यतन्द्रितः॥ सु. सू. १४।११–१२" अत्र वातपित्तकफा अपरिचितास्ते के कुत्र च निवसन्तीति प्रश्ने स्वयमेवोत्तरयति—"तत्र वा गतिगन्धनयोरिति धातुः, तप सन्तापे, श्लिष आलिङ्गने एतेषां कृद्विहितैः प्रत्ययैः वातः पित्तं श्लेष्मेति च रूपाणि भवन्ति॥ सु. सू. २१–५" अत्र केवला शब्दसिद्धिः प्रदर्शिता तत्स्फोटाऽभावेन न किमपि प्रयोजनं सिद्धमतोऽत्राऽयमभिप्राय आचार्यस्य बोध्यः। सृष्टिप्रपञ्चे सत्त्वरजस्तमोभि र्यथा विश्वोत्पत्ति र्वर्णिताऽस्ति तथा चिकित्साशास्त्रे पञ्चमहाभूतेभ्यः शरीरवर्णनं कृतमस्ति तावन्मात्रे चिकित्साशास्त्रस्याऽधिकारत्वात्—"भूतेभ्यो हि परं यस्मान्नाऽस्ति चिन्ता चिकित्सिते॥ सु. शा. १।१३" भूतेभ्यः=पञ्चमहाभूतेभ्यः परमुपरिष्टाच्चिकित्सिते=चिकित्साशास्त्रे चिन्ता (गवेषणा) नाऽस्ति प्रयोजनाऽभावात्, शोधनसंशमनरूपक्रियायाः पञ्चभूतेष्वेव सम्भवात्। नन्विन्द्रियाणां तदर्थानाञ्चाऽऽयुर्वेदे प्रतिपदं वर्णनमस्ति, अथ कथमुच्येत चिकित्सिते भूतेभ्यः परं चिन्ता नाऽस्तीति अत आह—"भौतिकानि चेन्द्रियाण्यायुर्वेदे वर्ण्यन्ते तथेन्द्रियार्थाः॥ सु. शा. १।१४" यद्यपीन्द्रियाणि न भौतिकानि सन्ति किन्तु वैकारिकादहङ्काराज्जातानीति साङ्ख्यशास्त्रे प्रसिद्धम्। तथापि कार्यकारणयोरभेदबुद्धिमास्थाय चिकित्सकानां पठनपाठनाद्यानुकूल्याय इन्द्रियेषु भौतिकत्वं कल्पितमस्ति। यथार्थतस्तु वैकारिकाण्येवेन्द्रियाणि, स्थूलेन्द्रियार्थास्तु भौतिका एवेत्यर्थं बोधयितुं भौतिकानि चेन्द्रियाण्यायुर्वेदे वर्ण्यन्ते=व्य-

व्यवहारार्थमङ्गीक्रियन्ते न तु सिद्धान्तरूपेण तथैव स्थिरीक्रियन्ते । एवञ्च सति शोणितस्य रसरूपत्वात्तुल्यस्य च रसजातत्वाद्रसस्य पुनरुद्भवः पञ्चभूतेभ्यः (उपादानकारणत्वात्) सर्वस्य च कार्यजातस्य सत्त्वरजस्तमांस्युपादानानि, पञ्चभूतेषु च कथं तेषां स्थितिरित्यत आह—"सत्त्वबहुलमाकाशं, रजोबहुलो वायुः, सत्त्वरजोबहुलोऽग्निः, सत्त्वतमोबहुला आपः, तमोबहुला पृथिवीति ॥ सु. शा. १।१९" सृष्टिप्रपञ्चे विशुद्धगुणानामभावात् प्राधान्येन व्यपदेशा भवन्तीति न्यायात्सत्त्वादिबहुलत्वव्यवहारः—"अन्योऽन्याऽनुप्रविष्टानि सर्वाण्येतानि निर्दिशेत् । स्वे स्वे द्रव्ये तु सर्वेषां व्यक्तं लक्षणमिष्यते ॥ सु. शा. १।२०" मूलकारणानां त्रिविधत्वात्पञ्चभूतान्यप्यायुर्वेदे त्रिभागविभक्तानि कृतानि सन्ति । अप्पृथिव्योस्तमोबहुलत्वेनैककक्षां स्वीकृत्य श्लिष्यते=श्लिष्टो भवति श्लेषयति वा स श्लेष्मा । शुद्धश्लिषधातोरन्तर्भावितण्यर्थाद्वा "सर्वधातुभ्यो मनिन्निति (उ. ४।१४६) मनिन् प्रत्यये श्लेष्मेति रूपं भवति तेन जलपृथिव्योः क्रोडीकरणमस्ति—"सन्धिसंश्लेषणस्नेहनरोपणपूरणबलस्थैर्यकृत् श्लेष्मा पञ्चधा प्रविभक्तः उदककर्मणा अनुग्रहं करोति । सु. सू. १५।६" वायो रजोबहुलत्वात्सः स्वतन्त्रामेव कक्षां समासादयति रजोगुणस्योपस्तम्भनचलनगुणप्रधानत्वात् (सत्त्वं लघुप्रकाशकमिष्टमुपष्टम्भकं चलञ्च रजः । गुरु वरणकमेव तमः प्रदीपवच्चाऽर्थतो वृत्तिः । सां. का. १३) सत्त्वतमसोः सञ्चालकत्वेनाऽवतिष्ठते, अयमभिप्रायो "वा गतिगन्धनयो"रिति कथनेन सूचितः । वैयाकरणनिकाये ज्ञानगमनमोक्षप्राप्तयोऽर्था गतित्वेनाऽभिधीयन्ते । अतएव "स्वयम्भूरेष भगवान् वायुरित्यभिशब्दितः । स्वातन्त्र्यान्नित्यभावाच्च सर्वगत्वात्तथैव च ॥ सर्वेषामेव सर्वात्मा सर्वलोकनमस्कृतः । स्थित्युत्पत्तिविनाशेषु भूतानामेष कारणम् ॥ अव्यक्तो व्यक्तकर्मा च रूक्षः शीतो लघुः खरः । तिर्यग्गो द्विगुणश्चैव रजोबहुल एव च ॥ अचिन्त्यवीर्यो दोषाणां नेता रोगसमूहराट् । आशुकारी मुहुश्चारी पक्वाधानगुदालयः ॥ सु. नि. १।५-८" इत्यारभ्याऽध्यायसमाप्तिपर्यन्तं गत्यर्थविस्तारो वर्णितः । गन्धनम्=सूचनम्, तेन ज्ञानतन्तूनधिष्ठाय समग्रशरीराऽवयवान् यथायोग्यं यथासमयञ्च चेष्टयते । "वायुस्तन्त्रयन्त्रधरः, प्राणोदानसमानव्यानाऽपानाऽऽत्मा प्रवर्तकश्चेष्टानामुच्चावचानां, नियन्ता प्रणेता च मनसः, सर्वेन्द्रियाणामुद्योजकः, सर्वेन्द्रियार्थानामभिवोढा, सर्वशरीरधातुव्यूहकरः, सन्धानकरः शरीरस्य, प्रवर्तको वाचः, प्रकृतिः स्पर्शनशब्दयोः, श्रोत्रस्पर्शयोर्मूलं, हर्षोत्साहयो र्योनिः, समीरणोऽग्नेः, दोषसंशोषणः, क्षेप्ता बहिर्मलानां, स्थूलाऽणुस्रोतसां भेत्ता, कर्ता गर्भाकृतीनां, आयुषोऽनुवृत्तिप्रत्ययभूतो भवत्यकुपितः, कुपितस्तु खलु शरीरे शरीरं नानाविधैर्विकारैरुपतपति बलवर्णसुखायुषामुपघाताय, मनो व्याहर्षयति, सर्वेन्द्रियाण्युपहन्ति, विनिहन्ति गर्भान् विकृतिमापादयत्यतिकालं धारयति, भयशोकमोहदैन्याऽतिप्रलापाञ्जनयति, प्राणांश्चोपरुणद्धि ॥ च. सू. १२।८" इत्यनेन गन्धनार्थो वर्णितः, अतो वायुः स्वतन्त्रामेव कक्षामवगाहते । अग्नेः सत्त्वरजोबहुलत्वात्समस्तपाककारणत्वम्, स च स्थूलरूपेण द्विविधः बाह्यश्शारीरश्च । बाह्यस्य पाककर्तृत्वमाबालवृद्धप्रसिद्धम्, शारीरस्य त्वनुमानगम्यत्वम् तथाहि—"जाठरो भगवानग्निरीश्वरोऽन्नस्य पाचकः । सौक्ष्म्याद्रसानाददानो विवेक्तुं नैव शक्यते ॥ प्राणाऽपानसमानैस्तु सर्वतः पवनैस्त्रिभिः । ध्मायते पाल्यते चाऽपि स्वे स्वे स्थाने व्यवस्थितैः ।' सु. सू. ३५।२७-२८" अयमेवाऽग्निः पित्ततेजश्शब्दवाच्यः, यथा—"अशितं खादितं पीतं लीढं कोष्ठगतं नृणाम् । तज्जीर्यति यथाकालं शोषितं पित्ततेजसा । सु. शा. ४।१९॥ अन्यच्च नष्टशल्यप्रकरणे—कानकं राजतं ताम्रं रैतिकं त्रपुसीसकम् । चिरस्थानाद्विलीयन्ते पित्ततेजः प्रतापनात् ॥ सु. सू. २६।२०" बाह्याग्निर्यथा कोकिलाद्याधारा भवन्ति तथैव शारीरस्य पित्तमाधारो भवति । ननु किमिदं पित्तमित्यत आह—तप सन्तापे इति धातोः क्तप्रत्यये पित्तमिति रूपं भवति, यथा स्थाल्यां तण्डुलजलं निक्षिप्य चुल्यामधिष्ठाप्य यावदुचितोऽग्निर्न ज्वाल्यते तावदोदननिष्पत्तिर्न दृश्यते । एवमेवौदने भुक्ते यावज्जाठराऽग्निर्न व्याप्रियते तावद्रसोत्पत्तिर्न भवति अतोऽनुमीयते शारीरोऽग्नि-

यीशाऽग्निरिवाऽस्तीति । शरीरस्य द्रवप्राधान्यादामाशयक्लोमाऽन्याशयाऽन्त्रदवाः समुपतिष्ठन्ते एषु प्रायशः कट्वम्ललवणा रसाः सन्ति प्रधानतया तेष्वाग्नेयत्वम् अग्नेरेव पाचननिर्वर्तकत्वम्, यथा—" कटुको दीपनः पाचनो रोचनः शोधनः स्थौल्यालस्यकफकृमिविषकुष्ठकण्डूपशमनः सन्धिबन्धविच्छेदनोऽवसादनः, स्तन्यशुक्रमेदसामुपहन्ता चेति । सु. सू. ४२।१५ " अम्लो रसः—अम्लो जरणः पाचनो दीपनः पवननिग्रहणोऽनुलोमनः कोष्ठविदाही बहिः शीतः क्लेदनः प्रायशो हृद्यश्चेति। सु. सू. ४२।१३ " लवणः संशोधनः पाचनो विश्लेषणः क्लेदनः शैथिल्यकृदुष्णः सर्वरसप्रत्यनीको मार्गविशोधनः सर्वशरीराऽवयवमार्दवकरश्चेति ॥ सु. सू. ४२ । १४ ॥" कटुकलवणरसभूयिष्ठः क्षारस्तु न रसः किन्तु द्रव्यं—" क्षरणात्क्षारो नाऽसौ रसः द्रव्यं तदनेकरससमुत्पन्नमनेकरसं कटुकलवणभूयिष्ठमनेकेन्द्रियार्थसमन्वितं करणाऽभिनिर्वृत्तम्। च. सू. २६ । ९" तैरेतैराग्नेयै रसै र्भुक्तस्याऽन्नजातस्य स्थूलांशान् पृथक्कृत्य शरीरोष्मसाहाय्येन जडपरमाणुषु सजीवता स्थाप्यते । तत्र प्रधानतया उक्तद्रव्येषु तपनकर्तृत्वात्पित्तत्वं साङ्केतिकं स्थापितमस्ति । " रागपक्त्योजस्तेजोमेधोष्मकृत्पित्तं पञ्चधा प्रविभक्तमग्निकर्मणा अनुग्रहं करोति ॥ सु. सू. १५ । ५" " तच्च अदृष्टहेतुकेन विशेषेण पक्वाऽऽमाशयमध्यस्थं पित्तं चतुर्विधमन्नपानं पचति, विवेचयति च दोषरसमूत्रपुरीषाणि, तत्रस्थमेव चात्मशक्त्या शेषाणां पित्तस्थानानां शरीरस्य च अग्निकर्मणा अनुग्रहं करोति, तस्मिन् पित्ते पाचकोऽग्निरिति सञ्ज्ञा। यत्तु यकृत्प्लीह्नोः पित्तं तस्मिन् रञ्जकोऽग्निरिति सञ्ज्ञा, स रसस्य रागकृदुक्तः । यत्पित्तं हृदयसंस्थं तस्मिन् साधकोऽग्निरिति सञ्ज्ञा, सोऽभिप्रार्थितमनोरथसाधनकृदुक्तः यद् दृष्ट्यां पित्तं तस्मिन् आलोचकोऽग्निरिति सञ्ज्ञा, स रूपग्रहणाऽधिकृतः । यत्तु त्वचि पित्तं तस्मिन् भ्राजकोऽग्निरिति सञ्ज्ञा, सोऽभ्यङ्गपरिषेकाऽवगाहाऽवलेपनादीनां क्रियाद्रव्याणां पक्ता छायानाञ्च प्रकाशकः ॥ सु. सू. २१ । १० ॥" तदीयगुणाश्च—पित्तं तीक्ष्णं द्रवं पूति नीलं पीतं तथैव च। उष्णं कटुरसञ्चैव विदग्धं चाऽम्लमेव च ॥ सु. सू. २१ । ११ " अन्नरसस्य रञ्जकत्वाद्रक्तस्याऽधिकपित्तस्याऽऽकर्षकत्वाद्यकृदधिकतया पित्तस्थानं निर्दिश्यते, अतएव तस्मिन् व्यापन्ने कामलाप्रभृतयः शतशः पित्तजरोगा प्रादुर्भवन्ति, तदीय व्यापन्निवृत्तौ चानायासेन शाम्यन्ति, इति चिकित्साशास्त्ररहस्यम्। अयं द्रवसमूहः परिणताऽऽन्नरसेन सह समस्तशरीरचक्रं परिभ्राम्यति । अन्तरान्तरा यकृदादौ गच्छंस्तत्रतत्रस्थैः सूक्ष्मस्रोतोभिः पुना रक्तान्निःसार्यते स पूर्ववत्पुनरप्यन्नरसे संसृज्य शरीरपोषणमहरहो निर्वर्तयति, अस्यांऽशस्य पित्तमिति सञ्ज्ञा । पित्तादीनां स्थानानि तु प्राधान्येन व्यपदेशा भवन्ति इति न्यायेन निर्दिश्यन्ते इयत्तां कर्तुन्तु न कोऽपीश्वरः। पञ्चीकरणतयाऽन्योऽन्यमुपकारकोपकार्यभावं प्राप्तानां पृथक्करणाऽसम्भवात्। इममेवाऽभिप्रायमाशय्याऽऽह सुश्रुतः—" जाठरो भगवानग्निरीश्वरोऽन्नस्य पाचकः । सौक्ष्म्याद्रसानाददानो विवेक्तुं नैव शक्यते ॥ सु. सू. ३५ । २७" " स एष इह प्रविष्टः आनखाग्रेभ्यो यथा क्षुरः क्षुरधानेऽवहितः स्याद्विश्वम्भरो वा विश्वम्भरकुलाये तं न पश्यन्त्यकृत्स्नो हि सः ॥ श. ब्रा. १४ । ४ । २ । १६ " स्थानकालसंयोगविशेषादस्य कार्याण्यप्यसङ्ख्येयानि भवन्ति यथा—शुक्तिलाला परिपाकान्मुक्तारूपतां भजति, तथा च नेत्रमणौ मुक्ताऽऽकारिता दृश्यते स एवाऽक्षिक्षीरोष्मदानादिभिः मुक्ताऽनुकारितां च भजति, तथा स्थानादिविशेषैः पदार्था नानाऽऽकारतां भजन्तो विपुलबुद्धीनामप्याकलय्यमानाः संमोहं जनयन्तीति द्रव्यविशेषपरिणामतत्त्वविदां प्रत्यक्षसिद्धम्। एवं श्लेष्मणोऽपि (जलपृथ्वीभागस्याऽपि) पञ्चात्मकत्वम्। " माधुर्यात्पिच्छिलत्वाच्च प्रक्लेदित्वात्तथैव च । आमाशये सम्भवति श्लेष्मा मधुरशीतलः ॥ १३ ॥ स तत्रस्थ एव स्वशक्त्या शेषाणां श्लेष्मस्थानानां शरीरस्य च उदककर्मणा अनुग्रहं करोति, उरःस्थस्त्रिकसन्धारणमात्मवीर्येण अन्नरससहितेन हृदयाऽवलम्बनं करोति । जिह्वामूलकण्ठस्थो जिह्वेन्द्रियस्य सौम्यत्वात् सम्यक् रसज्ञाने वर्तते, शिरःस्थः स्नेहसन्तर्पणाऽधिकृतत्वात् इन्द्रियाणामात्मवीर्येण अनुग्रहं करोति।

सन्धिस्थस्तु श्लेष्मा सर्वसन्धिसंश्लेषात् सर्वसन्ध्यनुग्रहं करोति ॥ सु. सू. २१ । १३—१४" अत्र भुक्तपीतस्य जलपार्थिवभागस्य मिलित्वा वातपित्तसाहाय्येन कणशः पृथग्भूय क्लेपणरूपतां प्राप्तत्वाच्छ्लेष्मेति नामाऽऽसादयितुं योग्यता जायते । ततश्चाऽऽमाशयिकाऽधोद्वारेणाऽधःप्रपन्नं क्लोमाऽन्याशयिकद्रवेण (पित्तेन) विशेषरूपेण तीक्ष्णोष्णत्वादिगुणविशिष्टेन संसृज्य पक्वाशयं गन्तुं प्रक्रमते—" तत्राऽऽमाशयः पित्ताऽऽशयस्य उपरिष्टात् तत्प्रत्यनीकत्वादूर्ध्वगतित्वात् तेजसश्चन्द्र इव आदित्यस्य स चतुर्विधस्य आहारस्य आधारः, स च तत्र औदकैः गुणैराहारः प्रक्लिन्नो भिन्नसङ्घातः सुखजरश्च भवति ॥ सु. सू. २१ । १२ " " अन्नमादानकर्मा तु प्राणः कोष्ठं प्रकर्षति । तद् द्रवैः भिन्नसङ्घातं स्नेहेन मृदुतां गतम् ॥ ६ ॥ समानेनाऽवधूतोऽग्निरुदर्यः पवनेन तु । काले भुक्तं समं सम्यक् पचत्यायुर्विवृद्धये ॥ ७ ॥ एवं रसमलायान्नमाशयस्थमधः स्थितः । पचत्यग्निर्यथा स्थाल्यामोदनायाम्बुतण्डुलम् ॥ ८ ॥ अन्नस्य भुक्तमात्रस्य षड्रसस्य प्रपाकतः । मधुरात्प्राक् कफो भावात्फेनभूत उदीर्यते ॥ ९ ॥ परं तु पच्यमानस्य विदग्धस्याम्लभावतः । आशयाच्च्यवमानस्य पित्तमच्छमुदीर्यते ॥ १० ॥ च. चि. १५ " अत उत्तरं पक्वाशयप्रारम्भं यावद्ग्रहणीस्थानं अन्नलकलायां [Mucous Membranes] (सूक्ष्माऽभ्यन्तरपटले) अन्नपाचकद्रवस्य निर्झरेण प्रतिपदं संसृज्यमानः प्रतिष्ठानं दैवस्थापितया शक्त्या स्वस्थानोचितपाकाऽवधि सङ्गृह्य शनैः शनैः भूनागीयव्यापारेण भूनागोदरस्थमृदो बहिर्निक्षेप इव पुरीतद्व्यापारेण पक्वाशयाऽभिमुखं प्रक्षिप्यते, अस्य (पक्वाऽऽमाशयमध्याख्यस्थानस्य) वेदे पुरीव ततत्वात्पुरीतदिति सञ्ज्ञा । पाश्चात्यशारीरे Duodenum- Jejunum. Ileum. सञ्ज्ञात्रयम् । सम्प्रत्युपलभ्यमानार्षशारीरे पक्वाऽऽमाशयमध्यमिति सञ्ज्ञा एतदभ्यन्तरीयकलायास्तु सङ्ग्राहणशक्तियुतत्वात्सङ्ग्रहणी सञ्ज्ञा कृताऽस्ति यथा—" षष्ठी पित्तधरा नाम या कला परिकीर्तिता । पक्वामाशयमध्यस्था ग्रहणी सा प्रकीर्तिता ॥ सु. उ. ४०।१६८" एतदाधारस्य ग्रहणीत्वग्रहस्तु भ्रममूलक एव पदार्थरहस्यव्याकुलीकरणेन महानर्थाऽऽवहत्वात् । अस्य विशेषविवरणं कलाटिप्पण्यां द्रष्टव्यम् । स च द्रव उक्तप्रकारेण परिपक्वतैलिकचक्रवत् परिपीडितश्च पक्वाशयप्रथमद्वारं यावत्प्रदीप्ताग्नेस्तैलखलविभाग इव मलरसरूपविभागद्वयमासादयति । तत्र मले विड्भतामासाद्य पक्वाशयात्तदीयव्यापारेणाऽपानवायुना च प्रणुन्नो गुदद्वारेण यथासमयं बहिर्निर्याति । साररूपतया निष्कृष्टो रसश्च सूक्ष्मस्रोतोभी रसप्रपामासाद्य यकृत्प्लीहानौ प्राप्य रागमुपगम्य हृदयाद्यभिमुखं प्रतिष्ठते । " पक्वाशयं तु प्राप्तस्य शोष्यमाणस्य वह्निना । परिपिण्डितपक्वस्य वायुः स्यात्कटुभावतः ॥ ११ ॥ अन्नमिष्टं ह्युपहृतमिष्टैर्गन्धादिभिः पृथक् । देहे प्रीणाति गन्धादीन् घ्राणादीनिन्द्रियाणि च ॥ १२ ॥ भौमाप्याग्नेयवायव्याः पञ्चोष्माणः सनाभसाः । पञ्चाऽऽहारगुणान्स्वान्स्वान् पार्थिवादीन् पचन्तिहि ॥ १३ ॥ यथास्वैव पुष्यन्ते देहे द्रव्यगुणाः पृथक् । पार्थिवाः पार्थिवानेव शेषाः शेषांश्च कृत्स्नशः ॥ १४ ॥ सप्तभिर्देहधातारो धातवो द्विविधं पुनः । यथास्वमग्निभिः पाकं यान्ति किट्टप्रसादतः ॥ १५ ॥ च. चि. १५ " " तत्र पाञ्चभौतिकस्य चतुर्विधस्य षड्रसस्य द्विविधवीर्यस्य अष्टविधवीर्यस्य वाऽनेकगुणस्योपयुक्तस्याहारस्य सम्यक् परिणतस्य यस्तेजोभूतः सारः परमसूक्ष्मः स रस इत्युच्यते, तस्य च हृदयं स्थानं, स हृदयाच्चतुर्विंशतिधमनीरनुप्रविश्य ऊर्ध्वगा दश दश चाऽधोगामिन्यश्चतस्रश्च तिर्यग्गाः कृत्स्नं शरीरमहरहस्तर्पयति वर्धयति धारयति यापयति च अदृष्टहेतुकेन कर्मणा । तस्य शरीरमनुसरतोऽनुमानात् गतिरुपलक्षयितव्या ॥ सु. सू. १४।३" " स खल्वाप्यो रसो (पाञ्चभौतिकत्वेऽपि द्रवप्राधान्यादाप्य इति) यकृत्प्लीहानौ प्राप्य रागमुपैति ॥ ४ ॥ रञ्जितास्तेजसा त्वापः शरीरस्थेन देहिनाम् । अव्यापन्नाः प्रसन्नेन रक्तमित्यभिधीयते ॥ ५ ॥ रसादेव स्त्रिया रक्तं रजःसञ्ज्ञं प्रवर्तते । तद्वर्षाद् द्वादशादूर्ध्वं याति पञ्चाशतः क्षयम् ॥ ६ ॥ सु. सू. १४" स च (रसः) " व्यानेन रसधातुर्हि विक्षेपोचित

कर्मणा। युगपत्सर्वतोऽजस्रं देह विक्षिप्यते सदा॥ च. चि. १५।३६" निरन्तरं शरीरे चक्रवन्नानामार्गे विविधस्वरूपेश्च भ्रमति, तेन रक्तादिसमस्तधातव आप्यायन्ते। अत्राऽधिकतया जलपृथिव्योरेव भागौ स्तस्तयोरायुर्वेदे श्लेष्मेति साङ्केतिकी सञ्ज्ञा। यद्यपि रसादेव रक्तादीनां धातूनामुत्पत्तिः प्रदर्शिता यथा—"रसाद्रक्तं ततो मांसं मांसान्मेदः प्रजायते। मेदसोऽस्थि ततो मज्जा मज्ज्ञः शुक्रन्तु जायते सु. सू. १४।१०" परन्तु तद्गर्भाऽवस्थामभिप्रेत्य कथितं प्रतिभाति तत्र हि विलक्षणप्रपाकाद्युगपदेव सर्वधातूनां सम्भवो भवति यथा—"गर्भस्य खलु सम्भवतः पूर्वं शिरः सम्भवतीत्याह शौनकः शिरोमूलत्वात्प्रधानेन्द्रियाणाम्, हृदयमिति कृतवीर्यो बुद्धे र्मनसश्च स्थानत्वात्, नाभिरिति पाराशर्यस्ततो हि वर्धते देहो देहिनः, पाणिपादमिति मार्कण्डेयस्तन्मूलत्वाच्चेष्टाया गर्भस्य, मध्यशरीरमिति सुभूतिर्गौतमस्तन्निबद्धत्वात्सर्वगात्रसम्भवस्य। तत्तु न सम्यक्। सर्वाण्यङ्गप्रत्यङ्गानि युगपत्सम्भवन्तीत्याह धन्वन्तरि गर्भस्य सूक्ष्मत्वान्नोपलभ्यन्ते वंशाऽङ्कुरवच्चूतफलवच्च। तद्यथा—चूतफले परिपक्वे केशरमांसाऽस्थिमज्जानः पृथक् पृथग् दृश्यन्ते. कालप्रकर्षात्तान्येव तरुणे नोपलभ्यन्ते सूक्ष्मत्वात्तेषां सूक्ष्माणां केशरादीनां कालः प्रव्यक्ततां करोति, एतेनैव वंशाऽङ्कुरोऽपि व्याख्यातः। एवं गर्भस्य तारुण्ये सर्वेष्वङ्गप्रत्यङ्गेषु सत्स्वपि सौक्ष्म्याद्नुपलब्धिः, तान्येव कालप्रकर्षात् प्रव्यक्तानि भवन्ति॥ सु. शा. ३।३२" इत्यत्र कृतनिर्णयेन निःसंशयत्वात् रसाद्रक्तमितिक्रमस्तु तत्तद्धातूनामभिव्यक्तिमुद्दिश्य कृतोऽस्तीति प्रतीयते; कथमन्यथा आचार्यः पूर्वापरविरुद्धानि वाक्यान्युच्चारयेत्?। "तत्र प्रथमे मासि कललं जायते, द्वितीये शीतोष्माऽनिलैरभिप्रपच्यमानानां महाभूतानां सङ्घातो घनः सञ्जायते। यदि पिण्डः पुमान्, स्त्री चेत्पेशी, नपुंसकं चेदर्बुदमिति। तृतीये हस्तपादशिरसां पञ्च पिण्डका निर्वर्तन्तेऽङ्गप्रत्यङ्गविभागश्च सूक्ष्मो भवति। चतुर्थे सर्वाङ्गप्रत्यङ्गविभागः प्रव्यक्ततरो भवति, गर्भहृदयप्रव्यक्तीभावाच्चेतना धातुरभिव्यक्तो भवति, कस्मात्? तत्स्थानत्वात्॥ सु. शा. ३।१८" अत्र निर्दिष्टेनाऽपि क्रमेण युगपत्सम्भव एव समायाति। "अप एव ससर्जादौ तासु बीजमवासृजत्॥ मनु० १।" अत्राप्ययमेव क्रमः स्वीकृतोऽस्ति। पाश्चात्यशारीरे स्पर्मेटोजेति (Spermatozoa) प्रसिद्धं पुरुषशुक्रे आर्तवे च 'ओवम्' (Ovum) इत्याख्यया यत्प्रसिद्धं बीजं तदेव पुरुषप्रादुर्भावाय निर्दिष्टमस्ति "तदण्डमभवद्धैमं सहस्रांशुसमप्रभम्॥ मनु० १।९" इत्यनेनाऽण्डाकृतित्वेन निर्देशात्। जरायुजाऽण्डजस्वेदजसृष्टेः क्रमः प्रदर्शितोऽस्ति। त्रिष्वपि प्रथममण्डाऽऽकारत्वेन दृश्यं भवति। इयमेव रचना परमगहना या ईश्वरादन्येन न निष्पादयितुं शक्या। अत्र बीजे ईश्वरेणैव यथायोनि यथास्थानं यथाऽवयवञ्च शारीरविभागप्रविभाजकाः पदार्थाः गर्भशरीरे सूक्ष्मतया निहिताः सन्ति, अत एव वर्तमाना धातवो मातु र्हृदयरसेन परिपोष्यन्ते न तु नूतनतया प्रादुर्भाव्यन्ते। नूतनप्रादुर्भावपक्षे यथायोनि समानरचना न जायेत। एवं सति रसाद्रक्तमित्यादिक्रमोऽभिव्यक्तेरेव द्योतकः स्वीकार्यः, तत्स्वीकृतौ च सर्व एव पन्थाः निष्कण्टको भवति। आयुर्वेदे साधारणतया रसादिक्रमकथनन्तु—"भौतिकानि चेन्द्रियाण्यायुर्वेदे वर्ण्यन्ते तथेन्द्रियार्थाः॥ सु. शा. १।१४" इतिवत् स्थूलग्राहिणामुपकाराय कृतमस्तीति निश्चीयते। अनेनैव पथा क्षीरदधि, केदारीकुल्या, खलेकपोतन्यायाः स्वस्वबुद्ध्या धातुपोषणे तैस्तैष्टीकाकारैः स्वीकृताः सङ्गच्छन्ते। एतद्रहस्यज्ञानाऽनन्तरं शरीरोद्भवे शङ्कोदय एव नोपतिष्ठते। प्रकृतमनुसरामः—तस्मिन् (श्लैष्मिकपरिणामे शरीरे) जलपृथिवीपरिणामौ प्रत्यक्षसिद्धौ वायव्याग्नेयौ त्वनुमानगम्यौ। तत्राऽऽग्नेयभागस्य स्थितिः प्रदर्शिता। श्लैष्मिकश्च द्रवरूपेण प्रविश्य शरीरेऽग्निवाताभ्यामनुगृहीतस्तत्तदाकारानासाद्य मलरूपतां प्राप्तो मूत्रस्वेदादिमार्गै र्बहिर्निक्षिप्यते, नूतनश्च पूर्ववद्दशनपानजो भागः पोषणचक्रमासादयति एवमिदं शरीरमहरहो जलपृथिवीभागाभ्यां पोष्यमाणं स्वसत्तामासादयति तदाऽरुग्णमिति स्वस्थमिति वा सञ्ज्ञां लभते पोषणक्रियाया अनवरुद्धत्वादथ च स्वस्वमर्यादायां वातपित्तश्लेष्मणां विद्यमानत्वात्।

यदाऽस्मिश्चक्रे केनाऽपि प्रकारेणाऽवरोधो विपरीतो वा क्रम उपतिष्ठते तदा रुग्णमिति अस्वस्थमिति वा सञ्ज्ञां समागच्छति पोषणक्रियाभङ्गत्वादस्य च वातपित्तश्लेष्मणां स्वस्वमर्यादाबहिर्भूतत्वात्। **इत्यनपवादं श्लेष्मस्वरूपम्। वातस्वरूपं** वर्णितपूर्वं, स च प्रत्येकस्रोतोद्वारेणाऽन्तः प्रविशति निःसरति च। किञ्च सृष्टिप्रकरणाऽनुसन्धानेन भूतत्रितयस्य कारणत्वादव्यपानरूपेणाऽपि तत्प्रवेशो भवत्येतच्च सूक्ष्मदृशः पश्यन्ति न स्थूलदृशः, स्थूलरूपेण तु नासिकाद्वारेणाऽऽकाशामृत (ऑक्सिजन Oxygen) मादायोदानाऽऽशयोः (फुप्फुसयोः) प्रविशति, तत्र च शरीरभ्रमणपोषणादिना स्वसामर्थ्यक्षयात्कलुषितं यद्रक्तं तत्कालुष्याऽपाकरणाय स्वस्थमाकाशाऽमृतं निक्षिप्य रक्तमलं (हायड्रोजन Hydrogen) स्वस्मिन्नादाय यथाऽऽगतमार्गेणाऽऽगत्य बहिर्निःक्षिपति एवमहरहः स्वकीयव्यापारेण रक्तशुद्धिं विदधाति वायो विकृतभागाश्च स्थूलसूक्ष्मस्रोतोभि र्बहिर्निःसरन्ति शुद्धाश्च प्रविशन्ति। अस्य सूक्ष्मौ प्रवेशनिर्गमावनुमानगम्यौ। पित्तश्लेष्मणोरप्येतत्साहाय्यं विना शरीरे प्रवेशनिर्गमौ भवितुमशक्यौ, अतएवोक्तं "स्वयम्भुरेष भगवान् वायुरित्यभिशब्दितः। स्वातन्त्र्यान्नित्यभावाच्च सर्वगत्वात्तथैव च ॥ सर्वेषामेव सर्वात्मा सर्वलोकनमस्कृतः॥ सु. नि. १।५-६" इत्यादिनाऽध्यायसमाप्तिपर्यन्तं विकृताऽविकृतस्य नामानि रूपाणि कर्माणि च वर्णितानि। अस्य "प्राणोदानौ समानश्च व्यानश्चाऽपान एव च। स्थानस्था मारुताः पञ्च यापयन्ति शरीरिणम्॥ सु. नि. १।१२" प्राणादीनि पञ्चनामानि विहितानि परन्तु सङ्क्षेपेण शरीरोर्ध्वाऽधःकार्यपरत्वेन प्राणाऽपानेति नामद्वयमेव दृश्यते तथाहि—

"प्रविशतं प्राणापानावनड्वाहाविव व्रजम्। व्यन्ये यन्तु मृत्यवो यानाहुरितरांछतम् ॥ अ. ३।११।५" भा०—हे प्राणाऽपानौ शरीरधारकौ युवां प्रविशतम् यक्ष्मगृहीतस्य शरीरमिति शेषः। मन्त्रसामर्थ्येन निर्गन्तुकामयोरपि पुनःप्रवेशाऽभिधानेन अनिर्गतयोस्तयोः कैमुतिकन्यायेन स्थैर्यं प्रार्थितं भवति। तत्र दृष्टान्तः। अनड्वाही अनसः शकटस्य वोढारौ बलीवर्दौ व्रजं स्वनिवासस्थानम् गोष्ठमिव। अन्ये राजयक्ष्मव्यतिरिक्ता मृत्यवः मृतिहेतवो रोगादयः वि यन्तु विमुखा गच्छन्तु। तानेवाह। यान् इतरान् अन्यान् मृत्यून् शतं शतसङ्ख्याकान् आहुः कथयन्ति अभिज्ञाः। शतम् इति अपरिमितनाम। तथैव प्राग् आम्नातम्। "मे मम अन्ये मृत्यवो हिंसिशतं ये" (२-२८-१) इति शाखान्तरेऽपि "ये ते सहस्रम् अयुतं पाशा मृत्यो मर्त्याय हन्तवे" (तै. ब्रा. ३।१०।८।२) इति।

"इहैव स्तं प्राणापानौ मापगातमितो युवम्। शरीरमस्याङ्गानि जरसे वहतं पुनः॥ अ. ३।११।६॥" भा०—हे प्राणाऽपानौ युवाम् इहैव अस्मिन्नेव शरीरे(स्तम्)भवतम्। इतः अस्माच्छरीरात् जवं शीघ्रं अकाले मापगातम् मापगच्छतम्। पुनः शब्दस्त्वर्थे। किन्तु अस्य व्याधितस्य शरीरं अङ्गानि हस्तपादादीनि च जरसे जरार्थम्। जरापर्यन्तमित्यर्थः वहतम् धारयतम्॥

सुश्रुतेनाऽपि प्राणोदानौसमानश्चेति समागतसूत्रे प्राणाऽपानयोराद्यन्तयोः समावेशः कृतोऽस्ति, तेनाऽन्येषां त्रयाणामत्रैवाऽन्तर्भावोऽस्तीति ध्वनितम्। "वायुर्यो वक्त्रसञ्चारी स प्राणो नाम देहधृक्। सोऽन्नं प्रवेशयत्यन्तः प्राणांश्चाऽप्यवलम्बते॥ प्रायशः कुरुते दुष्टो हिक्काश्वासादिकान्गदान्॥ सु. नि. १।१३" इत्यनेन वायुकर्तृकाकाशामृतग्रहणरक्तविषबहिर्निःसारणे ध्वनिते ते अन्तरा देहधारणाऽसम्भवात्। "पक्वाऽऽधानालयोऽपानः काले कर्षति चाऽप्ययम्। समीरणः शकृन्मूत्रशुक्रगर्भाऽऽर्तवान्यधः॥ क्रुद्धश्च कुरुते रोगान् घोरान् बस्तिगुदाश्रयान् ॥ सु. नि. १।१९" अनेनाऽपानव्यापारः कथितः। उचितवस्तूनां प्रवेशनिर्गमावनयो मुख्यौ धर्मौ, ताभ्यामनुकूलाभ्यामिदं शरीरं पाल्यते धार्यते याप्यते च। प्रतिकूलाभ्यान्तु झटिति पञ्चाऽत्वशतां नीयते। "उदानो

नाम यस्तूर्द्ध्वमुपैति पवनोत्तमः । तेन भाषितगीतादिविशेषोऽभिप्रवर्तते ॥ ऊर्द्ध्वजत्रुगतान् रोगान् करोति च विशेषतः, ॥ सु. नि. १।१५" अयं प्राणवायोरेव विशेषः, व्यवहारार्थं विभिन्नसञ्ज्ञा कृताऽस्ति । वायुद्वयत्वपक्षे प्राणे एव समाविशति । "आमपक्वाशयचरः समानो वह्निसङ्गतः । सोऽन्नं पचति तज्जांश्च विशेषान् विविनक्ति हि ॥ गुल्माऽग्निसादाऽतीसारप्रभृतीन् कुरुते गदान् ॥ सु. नि. १।१६" अयञ्चाऽपानस्य विशेषः । आकाशाऽमृताऽन्नपानादि वस्तुजातं यः शरीरान्तःप्रवेशयति सः प्राणः, यश्च शरीरात् पदार्थान् बहिर्निःसारयति स अपान इति प्रवेशनिर्गमकर्माभ्यामेव वायो द्वैविध्यं जायते वस्तुतस्त्वेक एवाऽस्ति । " कृत्स्नदेहचरो व्यानो रससंवहनोद्यतः । स्वेदाऽसृक् स्रावणश्चाऽपि पञ्चधा चेष्टयत्यपि ॥ क्रुद्धश्च कुरुते रोगान् प्रायशः सर्वदेहगान् ॥ सु. नि. १ । १८ " अत्र प्राणापानयोरुभयोरपि कार्यसाङ्कर्यादुभयत्र समावेशः । इमं भेदं " प्राणाऽपानौ समौ कृत्वा नासाऽभ्यन्तरचारिणौ ॥ गीता. ५।२७" इत्यनेन गीतायां भगवानुक्तवान् । तत्र स्पष्टतया प्रवेशनकर्मणः प्राणत्वं, अपनोदनकर्मणोऽपानत्वं स्वीकृत्य वायौ द्वैविध्यमेव स्वीकृतम् । कूर्मकृकलादयो दशभेदाः पौराणिका ऊनपञ्चाशद्भेदाश्चाऽप्यत्रैवाऽन्तर्भवन्ति कर्मपरत्वेनाऽवान्तर्भेदकल्पनायामानन्त्यप्रसङ्गात् । आयुर्वेदे प्राणादयः पञ्च भेदास्तु चिकित्सासौकर्यार्थं प्रतिपादयितव्या एव । प्राणवायोः फुफ्फुसावाधारौ, अपानस्य तु गुदपर्यन्तं बृहदन्त्रम् । तत्र फुफ्फुसयो **वातवहे** स्रोतसी अपस्तम्भौ चेति नाम्नी । यद्यपि वातवहे इति नाम धमनीव्याकरणे समागतमस्ति (सु. शा. ९) परन्तु तत्राऽध्याये प्रारम्भादेकादशसूत्रपर्यन्तभागस्य प्रतिसंस्कारकर्तृकृतप्रक्षेपरूपत्वादथ चैकादशसूत्रपर्यन्तमेव धमनीव्याकरणस्याऽधिकारत्वादथवा "अतऊर्ध्वं स्रोतसां मूलविद्धलक्षणं व्याख्यास्याम" इत्यनेनाऽधिकारान्तरस्य प्रारम्भादध्यायसमाप्तौ च " मूलात्खादन्तरं देहे प्रसृतं त्वभिवाहि यत् । स्रोतस्तदिति विज्ञेयं सिराधमनिवर्जितम् ॥ सु. शा ९ । १३" इत्यनेन स्रोतसां लक्षणस्योपदेशादुक्तशङ्काऽवकाश एव नाऽस्ति अतो, **वातवहे स्रोतसी** इति फुफ्फुसयोरेव नाम । " उभयत्रोरसो नाड्यौ वातवहे अपस्तम्भौ (म्हैा) नाम, तत्र वातपूर्णकोष्ठतया कासश्वासाभ्यां मरणम् । सु. शा. ६ । २६ " अत्र फुफ्फुसयोः स्पष्टतया कथनमस्ति । द्विस्थानत्वेऽपि पक्वाऽऽधानस्य यद्वाताशयत्वेन विशेषतः प्रसिद्धिरस्ति तस्येदं कारणम् । अनिच्छतोऽपि पुरुषस्य स्रोतोऽवरोधाऽभावे मुखे निहितमन्नपानमन्तः प्रविशति परन्तु यावदपानः स्वकार्यं सुष्ठुतया न निर्वर्तयेत्तावद् बलादामाशये प्रक्षिप्ताऽन्नपानस्य परिणाम एव न स्यात् कुतस्तस्माद्रसाद्युत्पत्त्यपेक्षा । यथास्थानञ्च तत् (अवरुद्धमन्नपानं) विविधरोगजालेन सम्पीड्य झटिति प्राणै वियोजयेत्, अतो नूतनरसोत्पादने अपान एवाऽधिकृतः । तस्य च मुख्यतया गुदपर्यन्तं स्थूलाऽन्त्रं स्थानं, तत्स्थितः सः आमाशयक्लोमाऽन्याशयग्रहणीवृक्कगवीनीबस्तिकटि (सुषुम्णामूल) प्रजननेन्द्रियाणि यथायोग्यं स्वस्वकार्याणि निर्वर्तयितुं सञ्चालयति । अत्र सर्वत्रैवाऽपानो व्याप्रियते, तद्विकृतावुक्तस्थानकार्यविप्लवे रसोत्पत्त्यादिक्रियैव स्थगिता जायते, तत्स्थगने च झटिति पञ्चत्वप्राप्तिः । तत्स्वस्थताऽऽपादनार्थं निरूहणाऽऽस्थापनोत्तरबस्तयो विहिताः । " शाखागताः कोष्ठगताश्च रोगाः मर्मोर्द्ध्वसर्वाऽवयवान् गताश्च । ये सन्ति तेषां नहि कश्चिदन्यो वायोः परं जन्मनि हेतुरस्ति ॥ ३८ ॥ विण्मूत्रपित्तादिमलाशयानां विक्षेपसङ्घातकरः स यस्मात् । तस्याऽतिवृद्धस्य शमाय नाऽन्यद् बस्ते विना भेषजमस्ति किञ्चित् ॥ ३९ ॥ तस्माच्चिकित्सार्धमिति ब्रुवन्ति सर्वां चिकित्सामपि बस्तिमेके । नाभिप्रदेशञ्च कटिञ्च गत्वा कुक्षिं समालोड्य पुनश्च पार्श्वम् ॥ ४० ॥ संस्नेह्य कायं शिथिलांश्च कृत्वा दोषान् पुरीषं ग्रथितं विमथ्य । संसक्तवेगः सपुरीषदोषः प्रत्यागतो बस्तिरिति प्रशस्तः ॥ च. सि. १।३८-४१ " इत्यादि चिकित्सारहस्यमाकलय्य प्रतिभाति यत्प्रवेशकर्मणः प्राणादपानस्याऽतिमहत्त्वम् । हठयोगे गुदप्रजननेन्द्रियद्वारेण दुग्धतैलादयोऽपानेनाऽऽकृष्यन्ते जार्यन्ते परिपाच्यन्ते शतशो व्याधयो निर्ह्रियन्ते च । अपि च सुषुम्णामूलमपि पक्वाशयसन्निहितम्, समस्तशरीरचेष्टानां सुषुम्णाऽधीनत्वादायुर्वेदे च

सुषुम्णाऽधिष्ठितस्य कार्यकरत्वात्। अपाने विकृते सुषुम्णाकार्यविक्लेऽपस्माराऽऽक्षेपकादिभयङ्कररोगाः समुपतिष्ठन्ते यथा—"सञ्ज्ञावहेषु स्रोतःसु दोषव्याप्तेषु मानवः। रजस्तमःपरीतेषु मूढो भ्रान्तेन चेतसा॥ विक्षिपन् हस्तपादौ च विजिह्मभ्रूविलोचनः। दन्तान् खादन् वमन् फेनं विवृताक्षः पतेत्क्षितौ॥ अल्पकालान्तरश्चाऽपि पुनः सञ्ज्ञां लभेत सः। सोऽपस्मार इति प्रोक्तः स च दृष्टश्चतुर्विधः॥ सु. उ. ६१।८–१०" "पक्वाशयगते चाऽपि देयं स्नेहविरेचनम्। वस्तयः शोधनीयाश्च प्राशाश्च लवणोत्तराः॥ सु. चि. ४।५" तच्छान्तौ च मुख्यतया वस्तिरभिहितोऽस्ति। ततश्चाऽन्नपानस्य रसादिपरिणामसाधने प्रधानत्वाद्रस्यादि चिकित्सितस्य मुख्याऽऽधारत्वात्परिणतेषु धातुषु परिपोषयितुं परिभ्रमद्रक्तस्थं यत्कालुष्यं तस्य फुफ्फुसद्वारेण बहिर्निःसारकत्वादपानस्य प्रधानत्वं बोध्यम्। प्राणवायोस्तु अन्नपानाऽऽकाशाऽमृतानामन्तः प्रवेशनमात्रे प्रधानत्वात्तदपेक्षयाऽपानस्याऽधिककार्यकरत्वात्प्रधानत्वम्। अतश्च **प्रवेशनकर्माऽधिकृतः प्राणः अपनोदनकर्माऽधिकृतश्चापान** इति तयो निष्कृष्टं लक्षणम्।

यः प्राणेन द्यावापृथिवी तर्पयत्यपानेन समुद्रस्य जठरं यः पिपर्ति। तस्यै०॥ अ. १३।३।४

यः—रोहितः समस्तशरीरे रोहणकर्तृत्वाद्रोहितसञ्ज्ञां लभते स च परमेश्वरो वा स्याज्जीवो वा स्यात्। स प्राणेन—प्राणाख्यवायुना करणेन द्यावापृथिवी चतुर्दश लोकान् शरीरस्योर्ध्वाऽधरभागौ वा तर्पयति पोषयति। यश्च अपानेन—अपानसञ्ज्ञकेन वायुना करणेन सम्यग् द्रवन्ति गङ्गाद्या नद्यो रसरक्तादिवाहिन्यो वा यत्तत् समुद्रं प्रसिद्धं, समस्तशरीरं वा तस्य जठरं स्थूलभागानारभ्य सूक्ष्माऽतिसूक्ष्मभागपर्यन्तं यः पिपर्ति—यथास्थितं स्वप्रमाणे स्थापयति। अथ च क्षीणं नवीनरक्ताऽभिसारणेन पूरयति स देव इत्यादि। अत्र प्राणस्य बाह्यो व्यापारः प्रदर्शितः अपानस्य तु शरीरान्तर्वर्तिरक्ताद्यभिसारणादिक्रियाऽधिष्ठातृत्वं स्पष्टतया कथितमतो प्राणाऽपानशब्दयोरुक्तं निष्कृष्टं लक्षणं समीचीनं प्रतिभाति। किञ्च—

सहस्राह्ण्यं वियतावस्य पक्षौ हरे हंसस्य पततः स्वर्गम्।
स देवान्त्सर्वानुरस्युपदद्य संपश्यन् याति भुवनानि विश्वा॥ तस्यै०॥ अ. १३।२।१४

सहस्राणामह्नां समाहारः सहस्राह्नम् तस्मै हितं सहस्राह्ण्यम्। अत्र सहस्रशब्दोऽसङ्ख्येयतावाचकः, तेनाऽसङ्ख्यदिवसाऽवधि यद्धितं निवासायाऽनुकूलं स्वर्गमभिलषणीयं लिङ्गाख्यमथ च स्थूलाख्यं शरीरं किं वा ब्रह्मलोकाद्यभिधं स्थानं पततः—गच्छतः हंसस्य—हंसरूपस्य अथ चाऽग्नीषोमयोरधिष्ठातृरूपस्य हरेः सुखदुःखाद्युपभोक्तु र्जीवस्य वियतौ शरीरान्तरवकाशे वर्तमानस्य अस्य पक्षौ प्राणाऽपानाख्यौ द्वे साधने स्तः। हंरूपमेकं द्वितीयञ्च सोरूपं मिलित्वा हंस इति तन्नाम स्थापनात् सः—देवः उरसि उरःप्रधाने शरीरे सर्वान्—समस्तान् देवानस्थीनि (अनुकटिप्पणी द्रष्टव्या) अथ च तदधिष्ठातृनिन्द्रादीन् देवान् उपदद्य समर्प्य स्थिरीकृत्येत्यर्थः। विश्वानि समस्तानि भुवनानि जलपरिणामान् रसादीन् धातूनथ च शरीरस्य लोकसम्मितत्वाच्छरीरान्तर्वर्तिनो लोकान् संपश्यन् साक्षात्कुर्वन् याति अपानरूपेण बहिर्गच्छति समस्तधातून् रसं च प्रापयति अथ च प्राणरूपेण शरीरान्तः प्रविशति। अत्र विस्पष्टतया प्राणाऽपानयोः कार्यस्य वर्णनं कृतमस्ति। अन्यच्च—

"द्वाविमौ वातौ वात आ सिन्धो रापरावतः। दक्षं ते अन्य आ वातु व्यन्यो वातु यद्रपः॥ अ. ४।१३।२" इमौ लोके दृश्यमानौ द्वौ वातौ पश्चाद्वातः पुरोवातश्च, "पश्चाद्वातं प्रति मीवति पुरोवातमेव जनयति। तै. सं. २।४।९।१" इति। आसिन्धोः समुद्रपर्यन्तं तथा आपरावतस्तस्मादपि दूरदेशपर्यन्तं वातौ गच्छत इति बाह्यवातप्रार्थना। अथ च इमौ प्राणाऽपानौ द्वौ वातौ आसिन्धोः—स्यन्दत इति सिन्धुरिति

व्युत्पत्त्या नासिकादिस्थूलस्रोतांस्यारभ्य आपरावतः=सूक्ष्माऽतिसूक्ष्मतमस्रोतःपर्यन्ताम्। परावदिति दूरनाम अर्थो-न्नासिकातः प्रविश्य सिराधमनीरसायनीस्वेदायनमलायनेषूचितकार्याणि निर्वर्त्याऽन्तिममार्गे वातो गच्छति। वर्त-मानकालेनाऽखण्डितव्यापारप्रार्थना। तत्र द्वयोरपि वातयोः कार्यं दर्शयति द्वयो मध्ये अन्य=एकः प्राणाख्यस्ते=तव दक्षं बलं आकाशाऽमृतग्राहणेन फुफ्फुसादिस्थे रक्ते निरुक्ते बलनामसु पठित्वा अन्ते "बलं कस्माद्बलं भरं भवति विभर्त्तेः। नि. अ. ३ खं. ९" आ वातु आगमयतु समस्तधातुपोषणेन व्ययीभूतं पुनरागमयतु, आकाशाऽमृतस्य पुनराधानाऽभावे रक्तस्य कार्यकरत्वाऽभावात्। तदपि प्राणसाध्यं भवत्यतस्तस्मा-त्तत्करणं प्रार्थ्यते। अथो रक्ते बलस्थापनेऽपि यावता तत्स्थं कालुष्यं बहि र्न निक्षिप्यते तावदप्यभीष्टसिद्धि र्दुःसा-धेत्यत आह व्यन्य इति। अन्यः=प्राणादन्योऽपान इत्यर्थः। स यद्रक्ते स्थित रपः=पापं "रपोरिप्रमिति पाप-नामनी भवतः। शमनञ्च रोगाणां यावनं च भयानामिति। नि. अ. ४ खं. २१" तत्-आसमन्ताद् वातु=बहि र्गमयतु। "प्राण एवोत्प्राणेन ह्युत्तिष्ठति वाग्गीः वाचो ह गिर इत्याचक्षतेऽन्नं यं अन्नेन हीदं सर्वं स्थितम्। छां. ब्रा. ३-३" इदं=पुरतो दृश्यमानं जगत् अन्नेन=खादितपदार्थेन अद्यत इत्यन्नमित्यर्थात् सर्वं=स्थावरजङ्गमात्मकं स्थितम्=आत्मानं धारयद् दृश्यते पोषणमन्तरा कस्याऽपि वस्तुनः सत्ताया अभावात्। नन्वन्नमपि कथमद्यते, अदने च किमसाधारणं कारणमस्तीत्याह प्राण इत्यादिना प्राणः=प्रवेशनकर्मा वायुः, उत्प्राणेन शरीराद्बहिर्निःसर्तुमू-र्द्ध्वव्यापारेणाऽपानवायुना साकमुत्तिष्ठति=व्याप्रियते तेनाऽन्नप्रवेशनपाचनादिकं भवत्यथ च आकाशाऽमृताहरणं रक्तरसमलादीनां बहिर्निक्षेपश्च भवति इत्यनया रीत्या जगदुत्पत्तिस्थिती भवतः। यदा त्वस्माद्विपरीतता भवति तदा सर्वं स्वस्वकारणे लीयते। अयमेवाऽर्थः "तच्छंयोरावृणीमहे गातुं यज्ञाय गातुं यज्ञपतये दैवी स्वस्तिरस्तु नः स्वस्तिर्मानुषेभ्यः। ऊर्ध्वं जिगातु भेषजं शन्नो अस्तु द्विपदे शं चतुष्पदे (नि. अ. ४ खं. २१) इत्यनेन दर्शितः। इज्यत इति यज्ञो विष्णुः "यजयाचयतविच्छप्रच्छरक्षोनङ्" (पा. ३।३।९०) इति साधुः तं गातुं स्तोतुं अथ च इज्यते विष्णुरनेनेति यज्ञः सम्भारस्तस्य पतिरपि विष्णुरेव तं गातुं तत्=प्रसिद्धं आकाशाऽमृताऽन्नादीनां प्राणकर्तृकं शरीरान्तर्निर्विघ्नतया प्रवेशनं अथ च योः=अपानवायुकर्तृकं रसरक्तमलादीनां यथो-चितबहिर्निक्षेपं आ=समन्ताद् वृणीमहे=याचामहे। देवा=अनूकाऽस्थीनि (अनूकटिप्पणी द्रष्टव्या) तेषां सम्ब-न्धिनी या सम्पत् सुषुम्णातन्तुसंहतिरूपा तस्याःस्वस्तिरस्तु अव्यापन्ना तिष्ठत्वित्यर्थः। एवं मनुष्याणामिमे मानुषाः कामक्रोधादयस्तेभ्यः सकाशात् स्वस्तिरभयमस्तु। भेषजम्=उपक्षीयमाणशरीरांशपोषकमन्नपानादिकं अथ च बृंहणादिद्रव्यं भुक्तं ऊर्ध्वं=यथासमयं परिपच्य रसस्रोतोद्वारा समस्तशरीरं जिगातु विशेषेण स्वस्वद्वारेण व्याप्नोतु। एवं नोऽस्माकं सम्बन्धिने द्विपदे=द्विपदविशिष्टाय स्त्रीकलत्रादिरूपाय, अथ च चतुष्पदे=गोमहिष्यादिसमुदायाय शं=नैरुज्यरूपं कल्याणमस्तु। निरुक्ते शं शब्देन रोगाणां शमनं युशब्देन च भयानां यावनं व्याख्यातम्। तथाहि "शमनञ्च रोगाणां यावनञ्च भयानाम्। नि. अ. ४ खं.२१" इति। "अथाऽपि शंयु र्बार्हस्पत्य उच्यते" इति तु पौराणिकीकथामनुसृत्य लोकरञ्जनाय कथितम्, तत्त्वकिञ्चित्करम्। तच्छंयोरित्यस्यो-पलभ्यमानं भाष्यं नाऽतिस्पृहणीयं शारीराशारीरविषयसाङ्कर्यदूषितत्वात्।

"या ते प्राण प्रिया तनू र्यो ते प्राण प्रेयसी। अथो यद्भेषजं तव तस्य नो धेहि जीवसे ॥ अ. ११।६।९" हे प्राण ते=तव या प्रिया=प्रीतिविषया तनूः=शरीरम् अस्ति तथा प्राण ते तव यौ=ये प्रेयसी प्रिय-तमरूपे प्राणाऽपानवृत्तिद्वयात्मके अग्नीषोमरूपे वा। अथो अपि च तव सम्बन्धि यद् भेषजं अमृतत्वप्रापकं औषधमस्ति तस्य=सर्वस्य प्रियतनुःप्रभृतिकस्य सकाशात् नः अस्माकं जीवसे जीवनाय धेहि अमृतत्वसाधनं औषधं प्रयच्छ ॥ (सा० भा.) ॥ क्रियावशात् वायोः प्राणाऽपानादीनि नानारूपाणि सन्ति तेषां मध्ये या

प्राणानां=रसादिधातुपरिणामानां कृते प्रिया=असाधारणकारणरूपा तनूः=स्वस्वरूपं सा आकाशजन्या (औक्सिजनाख्या Oxygen) हे प्राण=वायो प्रेयसी=अतितमां स्पृहणीया (तामन्तरा मनुष्यजीवनाऽसम्भवात् तया प्रतिक्षणं दुष्टं रक्तं विशोध्य नूतनाऽवस्थायां स्थाप्यते तदप्राप्त्या शोषकासादिना शीघ्रमेव पञ्चत्वप्राप्तिः स्यादित्यभिप्रायः)ऽस्ति। ननु तया तन्वा त्वया किङ्कर्तव्यमस्तीत्यपेक्षायामाह—अथो यदिति। अपि च तस्य=तत्र यदाऽऽकाशजन्याख्यं भेषजं जीवनसाधनममृतमस्ति येन त्वं नोऽस्माञ्जीवसे=जीवयसि तदमृतमस्मासु धेहि।

"प्राणः प्रजा अनु वस्ते पिता पुत्रमिव प्रियम्। प्राणो ह सर्वस्येश्वरो यच्च प्राणति यच्च न॥ अ. ११।६।१०॥" प्रियं=प्रीतिपात्रं पुत्रं पितेव यः प्रजाः प्रजायमाना अनु=अनुकूलं यथा स्यात्तथा वस्ते आच्छादयति सः=प्राणः प्राणाऽऽख्यां लभते हेति प्रसिद्धौ सः यच्च मनुष्यादि प्राणति यच्च स्थावरं न प्राणति तस्य सर्वस्यापीश्वरः प्राणः=वायुरेवाऽस्ति।

"प्राणाय नमो यस्य सर्वमिदं वशे। यो भूतः सर्वस्येश्वरो यस्मिन्सर्वं प्रतिष्ठितम्॥ अ. ११।६।१" इदं=पुरतो दृश्यमानं स्थावरजङ्गमात्मकं सर्वं जगत् यस्याऽनिर्वचनीयस्य वायोर्वशेऽस्ति, यस्मिंश्च सर्वं प्रतिष्ठितमस्ति यश्च सर्वस्य भूतः=भूतकालाऽवच्छिन्नः=न तु भविष्यन् सर्वदा लब्धसत्ताकत्वात् ईश्वरः=ईशिताऽस्ति तस्मै प्राणाय वायवे ते=तुभ्यं नमोऽस्तु॥

"नमस्ते प्राण क्रन्दाय नमस्ते स्तनयित्नवे। नमस्ते प्राण विद्युते नमस्ते प्राण वर्षते॥ अ. ११।६।२" हे प्राण=जीवननिर्वहण क्रन्दाय=आनुकूल्ये हर्षणाय प्रातिकूल्ये रोदनाय वातप्रातिकूल्ये सर्वेऽपि रुदन्ति। 'क्रदि' आह्वाने रोदने च, अच् प्रत्ययः। तथा स्तनयित्नवे स्तनयित्नुरभ्रं तद्रूपाय अथ च तद्वद् ध्वनिकर्त्रे ते=तुभ्यं नमोऽस्तु। अथ च हे प्राण विद्युते=विद्युद्रूपाय अपि च सुषुम्णाकेभ्रनिर्वर्तकाय तदुद्भवस्य वायुनिर्वर्त्यत्वात् अथ च शरीराऽग्निनिर्वर्तकाय पित्तकफयोः सत्त्वतमोरूपयो वातव्यापारमन्तरा स्वस्वकार्यकरणाऽसम्भवात्। हे प्राण वर्षति=सिञ्चतीति वर्षन् तस्मै वर्षते=सेचनकर्त्रे 'वृषुसेचने' शता। यद्यपि शरीरे रसस्य सेचनकर्तृत्वाच्छ्लेष्मरूपत्वमस्ति न तु वातरूपत्वं तथापि वातसाहाय्यमन्तरा तत्करणाऽसम्भवात्तथा कथितमिति बोध्यम्।

"नमस्ते प्राण प्राणते नमो अस्त्वपानते। पराचीनाय ते नमः प्रतीचीनाय ते नमः सर्वस्मै त इदं नमः॥ अ. ११।६।५" सायणभा०—हे प्राण देव प्राणते=प्राणनव्यापारं कुर्वते ते=तुभ्यं नमोऽस्तु। तथा अपानते=अपाननव्यापारं कुर्वते अपानवृत्यात्मकाय तुभ्यं नमोऽस्तु। तथा पराचीनाय पराञ्चनाय परागमनस्वभावाय देहाद् बहिरवस्थिताय ते=तुभ्यं नमोऽस्तु तथा प्रतीचीनाय प्रतिमुखं अञ्चते देहमध्ये वर्तमानाय ते=तुभ्यं नमोऽस्तु। किं बहुना सर्वस्मै सर्वव्यापारकर्त्रे सर्वप्राणिशरीरान्तर्वर्तिने ते=तुभ्यं इदं नमः अयं नमस्कारो भवतु॥

"नमस्ते अस्त्वायते नमो अस्तु परायते। नमस्ते प्राण तिष्ठत आसीनायोत ते नमः॥ अ. ११।६।७" एतीति आयंस्तस्मै आयते, आङ्पूर्वकादिण् गतावित्यस्माच्छता। आकाशाऽमृतङ्गृहीत्वा शरीरान्तः प्रविशते। हे प्राण ते नमोऽस्तु। अथ च परायते=रक्तकालुष्यं गृहीत्वा बहिर्गच्छते अथ च आसीनाय=अन्तःशरीरं सञ्चरते ते नमः। अनेनोदानसमानव्यानानां ग्रहणम्।

"प्राणमाहुर्मातरिश्वानं वातो ह प्राण उच्यते। प्राण ह भूतं भव्यं च प्राणे सर्वं प्रतिष्ठितम्॥ अ. ११।६।१६" मातरि=अन्तरिक्षे श्वसिति वर्तते स मातरिश्वा (औक्सिजन Oxygen) अर्थादाकाशे वर्तमानो विशुद्धात्मा वायुस्तं प्राणं=प्राणाख्यमाहुः। मातरिश्वेति कथनेन शरीराद्बहिर्निःसरतो वायोरनायासेनाऽपानत्वं सिद्धम्। कर्मभेदादेवाऽनयो भेदोऽस्ति न वास्तविकः। प्राणे=प्राणवायौ सति भूतं=भूतकालाऽवच्छिन्नमथ

च भव्यम्=भवितुमिच्छद्वस्तु सर्वं=वर्तमानाद्यवान्तरभेदयुक्तं या वस्तु प्राणे प्रतिष्ठितमस्ति, समन्ताकालव्यवहारस्याऽप्यसम्भवो भवेत्।

"आथर्वणीराङ्गिरसी दैवी मनुष्यजा उत। ओषधयः प्र जायन्ते यदा त्वं प्राण जिन्वसि ॥ अ. ११।६।१६" आथर्वणी=अथर्वणा महर्षिणा सृष्टा शान्तिपुष्ट्यादिकाः क्रियाः=अथ च आङ्गिरसीः=आङ्गिरोभिर्ऋषिभिरुत्पादिताः कृत्योत्थापननिवर्तनादिरूपाः या उद्दिश्य "श्रुतीरथर्वाऽङ्गिरसीः कुर्यादित्यभिचारयन्। वाक् छस्त्रं वै ब्राह्मणस्य तेन हन्यादरीन्द्विजः ॥ मनु० ११।३३" अथ च मनुष्यजाः=मनुष्यप्रयत्नसाध्याः स्वस्तिवत्युपनयननमस्कारमङ्गल्यादिरूपाः क्रिया ओषधयः=ओषः पाको धीयते यासु ता ओषधयः अर्थाद्यथेष्टफलकारिण्यस्तदा सम्पद्यन्ते हे प्राण यदा त्वं जिन्वसि=लब्धसत्ताको भवसि यद्वा आनुकूल्येन साहाय्यं करोषि रणाऽङ्गणादौ यस्मिन् पक्षे वायोरानुकूल्यं भवति तस्यैव पक्षस्याऽव्याहतो जयो भवतीति प्रत्यक्षसिद्धम्। एवं शरीरे यदा वायुः सानुकूलो भवति तदा भरणपोषणादयः सर्वा अपि क्रियास्सफला भवन्ति तत्प्रातिकूल्ये तु सर्वा एव प्रतिकूला भवन्तीत्यायुर्वेदसिद्धान्तः।

"एकं पादं नोत्खिदति सलिलाद्धंस उच्चरन्। यदङ्ग स तमुत्खिदेन्नैवाद्य न श्वः स्यान्न रात्री नाहः स्यान्न व्युच्छेत् कदाचन ॥ अ० ११।६।२१" सायणभा०—अथ वा हन्ति गच्छति कृत्स्नशरीरं व्याप्य वर्तत इति हंसः प्राणः। सलिलात् सलिलोपलक्षितात् पाञ्चभौतिकाद् देहाद् उच्चरन् प्राणवृत्त्यात्मना ऊर्ध्वं गच्छन् एकं पादं अपानवृत्त्यात्मकं नोत्खिदति नोत्क्षिपति। यदि स प्राणस्तमपि अपानात्मकं पादम् उत्खिदेत् शरीराद् उत्क्षिपेत् तदा प्राणस्य कार्त्स्न्येन शरीरतो निर्गतत्वात् मृतशरीरस्य तस्य अद्य श्वः रात्रिः अहः इत्येवमात्मकः कालविभागो न स्यात्। कदाचिदपि न व्युच्छेत् तमसो निवृत्तिर्न स्यात्। अतः जगत् सजीवं कर्तुं एकं पादं नोत्खिदतीत्यर्थः।" अत्र योगमार्गे तन्त्रशास्त्रे च सः इति सोमात्मकः, प्राणवायुरभिहितः आह्लादकाऽमृतरूपत्वेन तस्य सोमात्मकत्वात्। हमिति अहङ्कारात्मकः, अहङ्कारे तमः प्राधान्यात्कालुष्ययुक्तो वायुरपानोऽभिप्रेतः। एवङ्कृत्वा च पादद्वयं भवति तत्राऽहङ्कारेण बहिरायाति सः कारेणाऽन्तः प्रविशति, अनयो र्वैलोमानुलोम्यवैलोम्याभ्यां सोहम्—हंसः इति मन्त्रद्वयं निष्पद्यते अयमेवाऽजपागायत्रीशब्दवाच्यो मन्त्रः इमं महान्तं श्वासोच्छ्वासाभ्यां यथासम्प्रदायमावर्तमाना विधूतपापाः पूर्णयोगिनः सायुज्यादिमुक्तिभाजोभवन्ति। अणिमाऽष्टसमपस्त्वणिमादिसिद्धिसम्पन्नास्सम्पद्यन्ते। इममेवप्रकारं "प्राणाऽपानौ समौ कृत्वा नासाभ्यन्तरचारिणौ ॥ गी० ५।२७" भगवानुक्तवान्। अस्य मन्त्रस्य परमगोप्यत्वादेवं भगवता सूचितम्। प्राणाऽपानमिते परमेश्वरसत्ताऽधीनत्वात्क्वचित्प्राणशब्देन परमेश्वरोऽपि निर्दिश्यते "यथा प्राण बलिहृतस्तुभ्यं सर्वाः प्रजा इमाः। एवा तस्मै बलिं हरान् यस्त्वा शृणवत् सुश्रवः ॥ अ० ११।६।१९" इत्यादौ।

"यो अस्य सर्वजन्मन ईशे सर्वस्य चेष्टतः। अतन्द्रो ब्रह्मणा धीरः प्राणो मानु तिष्ठतु ॥ अ. ११।६।२४" यः=प्राणः=प्रवेशनाऽपनोदनकर्मा (प्राणाऽपानभेदेनेति तत्त्वम्) सर्वाणि=नानाविधानि जन्मानि=रूपग्रहणानि यस्य तथा चेष्टतः=नानाप्रकाराः क्रियाः कुर्वतः सर्वस्य=स्थावरजङ्गमात्मकस्य [illegible]=उक्तो ह्रदयमानस्य जगतः ईशे ईष्टे स प्राणः अतन्द्रः=अनवरुद्धगतिः तथा धीरः=प्रवेशनिर्गमादाद्युर्ध्वाधःसंचारमाऽऽलम्बमानः ब्रह्मणा=सर्वत्र व्यापकस्वभावेन स्वीयव्यापारेण साकं मा=शरीरधारिणं माम् अनु=अनुकूलः स्यात्तथा तिष्ठतु अनुवर्तताम् ॥

"ऊर्ध्वः सुप्तेषु जागार ननु तिर्यङ् नि पद्यते। न सुप्तमस्य सुप्तेष्वनु शुश्राव कश्चन ॥ अ. ११
सुप्तेषु=निद्रावशीभूतेषु प्राणिषु यः प्राणः ऊर्ध्वः=आकाशाऽमृतस्य शरीर प्रवेशकर्ता जागार=[illegible]

म्रियते । पुनश्च यस्तिर्यङ् निपयते तिर्यग्व्यापारमालम्बमानः. अर्थात् फुप्फुसाभ्यां शुद्धरक्तमादाय हृदयङ्गत्वा शरीरे पोषणाय स्थूलसूक्ष्माऽवयवसङ्घातं प्रविशति । अथ च रसायनीद्वारा रसं गृहीत्वा निपयते सर्वत्र यथोचितपाकं प्रापय्य निक्षिपति । नन्विति शङ्कायां सर्वेऽपि प्राणिनो विश्रमार्थं यथा स्वपन्ति तथाऽस्य (प्राणस्य) स्वापे का गतिः स्यादिति प्रश्ने उत्तरयति—न सुतमस्येत्यादिना । अस्य प्राणस्य सम्बन्धि सुप्तं=स्वापं कश्चन कोऽपि न शुश्राव=न श्रुतवान् । अयन्तु सर्वदा व्याप्रियमाण एवाऽऽस्ते, तत्स्वापे तु सर्वस्याऽपि प्रलयः स्यात् दिग्दर्शनं वाल्मीकिना कृतं तद्यथा—"तस्मिंस्तु पतिते चाऽपि वज्रताडनविह्वले । चुकोपेन्द्राय पवनः प्रजानां महिताय सः ॥ ४८ ॥ प्रचारं स तु सङ्गृह्य प्रजास्वन्तर्गतः प्रभुः । गुहां प्रविष्टः स्वसुतं शिशुमादाय मारुतः ॥ ४९ ॥ विण्मूत्राशयमावृत्य प्रजानां परमार्तिकृत् । रुरोध सर्वभूतानि यथा वर्षाणि वासवः ॥ ५० ॥ वायुप्रकोपाद्भूतानि निरुच्छ्वासानि सर्वतः । सन्धिभिर्भिद्यमानैश्च काष्ठभूतानि जज्ञिरे ॥ ५१ ॥ निःस्वाध्यायवषट्कारं निष्क्रियं धर्मवर्जितम् । वायुप्रकोपात्त्रैलोक्यं निरयस्थमिवाऽभवत् ॥ ५२ ॥ ततः प्रजाः सगन्धर्वाः सदेवासुरमानुषाः । प्रजापतिं समाधावन्दुःखिताश्च सुखेच्छया ॥ ५३ ॥ ऊचुः प्राञ्जलयो देवा महोदरनिभोदराः । त्वया तु भगवन्सृष्टाः प्रजा नाथ चतुर्विधाः ॥ ५४ ॥ त्वया दत्तोऽयमस्माकमायुषः पवनः पतिः । सोऽस्मान् प्राणेश्वरो भूत्वा कस्मादेषोऽद्य सत्तम ॥५५॥ रुरोध दुःखं जनयन्नन्तः पुर इव स्त्रियः । तस्मात्त्वां शरणं प्राप्ता वायुनोपहता वयम् ॥ ५६ ॥ वायुसंरोधजं दुःखमिदं नो नुद दुःखहन् । एतत्प्रजानां श्रुत्वा तु प्रजानाथः प्रजापतिः ॥ ५७ ॥ कारणादिति चोक्त्वासौ प्रजाः पुनरभाषत ॥ यस्मिंश्च कारणे वायुश्चुक्रोध च रुरोध च ॥ ५८ ॥ प्रजाः शृणुध्वं तत्सर्वं श्रोतव्यं चात्मनः क्षमम् । पुत्रस्तस्यामरेशेन इन्द्रेणाद्य निपातितः ॥ ५९ ॥ राहोर्वचनमास्थाय ततः स कुपितोऽनिलः । अशरीरः शरीरेषु वायुश्चरति पालयन् ॥ ६० ॥ शरीरं हि विना वायुं समतां याति दारुभिः । वायुः प्राणः सुखं वायु र्वायुः सर्वमिदं जगत् ॥ ६१ ॥ वायुना सम्परित्यक्तं न सुखं विन्दते जगत् । अद्यैव च परित्यक्तं वायुना जगदायुषा ॥ ६२ ॥ अद्यैव ते निरुच्छ्वासाः काष्ठकुड्योपमाः स्थिताः । तद्यामस्तत्र यत्रास्ते मारुतो रुक्प्रदो हि नः ॥ मा विनाशं गमिष्याम अप्रसाद्यादितेः सुतम् ॥ ६३ ॥ वा. रा. उ. का. ३५" प्राणाऽपानयोः शारीरक्रियासु प्रतिष्ठानसाङ्कर्यमस्ति तद्यात्राऽस्ति, अत्र च नाऽस्तीति विवेक्तुमशक्यम् तद्यथा—

"प्राणाऽपानौ व्रीहियवावनड्वान् प्राण उच्यते। यवे ह प्राण आहितोपानो व्रीहि रुच्यते॥ अ. ११।६।१३" प्राणाऽपानौ प्रवेशनाऽपनोदनकर्माणौ वातौ व्रीहियवौ ताभ्यां तुल्यौ यज्ञनिष्पत्तिमिव शारीरक्रियानिर्वर्तकौ तत्र यवा यथाऽवस्थिता होमे विनियुज्यन्ते । व्रीहयस्तु कण्डनादिना विगततुषा एव "व्रीहीनवहन्ती–" त्याद्युपदेशात् इममेव भेदं प्रदर्शयति—यवे ह प्राण आहित इत्यादिना । प्राणवायोराकाशाऽमृतरूपत्वेन शुद्धत्वाद्यथास्थितस्वरूप एव कार्यकारी भवति तस्मिंस्त्याज्यांशस्य विशेषतोऽभावोऽस्ति अतस्स यवशब्देनोपमितः फुप्फुसाभ्यां हृदयमभिगमनकालादथ चाऽऽमाशयादेरसायनीस्रोतोऽभिगमनसमयादेव अपाने स्थले स्थले प्रत्यवयवे आकृष्टस्याऽऽकाशाऽमृतस्योपक्षीणत्वादुष्टवाष्पाणाञ्च संसर्गात्कालुष्यसत्वात्त्याज्यांशयुक्ततया व्रीहिशब्दोपमा दत्ता । अतएवाऽऽर्याणां माङ्गलिककार्येषु यवरपनस्य प्रथाऽस्ति। क्षतक्षीणादौ तत्क्षणं बलार्थं यवसक्तुमन्थः प्रयुज्यते। पाश्चात्यभिषजश्च सर्वस्मिन्नपि रोगे बलार्थं यवपेया (बार्लीवाटर Barly Water) मुपदिशन्ति। नन्वेवं सति शारीरक्रियानिर्वर्तने को विशेषतयोपकारीति प्रश्ने उत्तरयति—अनड्वानित्यादिना। यद्यपि प्रवेशनक्रियाया अभ्यर्हितता प्रतिभाति तथाप्येकेन तेन क्रियानिष्पत्तिर्न भवति यतः स अनड्वान्=अनःशारीररूपं शकटं वहतीति अनड्वान् एकोऽस्ति, द्वितीयस्थानेऽपान एव धुरो वहति। वर्तमानपाश्चात्यवैज्ञानिका अन्तकाले हृदयव्यापारविसृष्टिदशायां यन्त्रादिद्वारा प्राणवायुं प्रवेशयन्ति पर-

ल्पपानवायोरवरुद्धव्यापारतया तयन्नस्य प्रायो निष्फलत्वमेव दृश्यते। सिद्धरसप्रयोगेण तु यदा यौगपद्येन प्राणाऽपानौ व्याप्रियेते तदा दग्धाऽरिष्टेऽपि जीवति एतच्च सिद्धचिकित्सकेषु प्रत्यक्षदृश्यम्। क्रियाद्वैविध्यादेव च प्राणाऽपानत्वोपाधी वाते कल्पितौ चिकित्सासौकर्यात्। वातस्त्वेक एव, अत एव "प्राणो ह्युदानाऽनुगतः प्रदुष्टः सम्भिन्नकांस्यस्वनतुल्यघोषः। निरेति वक्त्रात्सहसा सदोषः कासः स विद्वद्भिरुदाहृतस्तु॥ सु. उ. ५२। ४" इत्यादावपनोदनकर्मण्यपानेऽपि प्राणत्वकथनं न दोषाय कल्पते। यत्तु पायुमार्गाऽधो निस्सरति सोऽपानः मुखात्तु प्राण इति केचिदाहुस्ते त्वायुर्वेदसिद्धान्ताऽनभिज्ञा एव। न च वाच्यं "वायु र्यो वक्त्रसञ्चारी स प्राणो नाम देहधृक्। सोऽन्नं प्रवेशयत्यन्तः प्राणांश्चाऽप्यवलम्बते॥ १३॥ पक्वाऽऽधानालयोऽपानः काले कर्षति चाप्ययम्। समीरणः शकृन्मूत्रशुक्रगर्भार्तवान्यधः॥ १९॥ सु. नि. १" इत्यादौ सुश्रुतेनाऽपि तथैव निर्देशः कृतोऽस्ति। उक्तसूत्रद्वयेन वातकर्तृकाऽन्नप्रवेशननिर्गमनकर्मणोरेव निर्देशः कृतोऽस्ति, सोऽपि (निर्देशः) स्थूलकर्मणोरेवाऽस्ति तदितरसूक्ष्मकर्मनिर्वर्तनार्थमुदानसमानव्यानाख्यास्त्रयो भेदाः पृथक्तया दर्शिताः। सूक्ष्मविचारे रक्तकालुष्यबहिर्निक्षेपणस्य कस्मिन् समावेशः स्यादिति महती चिन्ता उत्तिष्ठते। योगिनश्च मुखादिव पायुतो दुग्धतैलादिकमन्तः प्रवेशयन्ति तस्याऽपि का गतिरिति महत्यापत्तिरापतिष्यति। किञ्च "पक्वाऽऽधानालयोऽपान०" इत्यनेन पक्वाशयोऽपानस्य स्थानमुक्तः, "आमपक्वाशयचरः समानो वह्निसङ्गतः" इत्यनेन तस्यैव समानस्थानत्वमुक्तमिति प्रत्यक्षविरोधः स्यादतो वायोः प्राणाऽपानाख्यभेदौ यवव्रीहिसदृशौ सन्तौ प्रतिस्थले मिश्रितौ दृश्येते तस्मात्प्रवेशनकर्मणि चाऽपानस्याऽधिकारो बोध्यः। वायु र्यो वक्त्रसञ्चारीत्यादयः स्थानभेदास्तु स्थूलग्राहिणां छात्राणामुपकाराय प्रदर्शितास्सन्तीति सर्वं समञ्जसम्। एवमुक्तसन्दर्भेण वातपित्तकफानां स्वरूपं स्पष्टीभूतं सञ्जातम्। लोके सत्त्वरजस्तमसां सूर्याऽनिलचन्द्राख्यैः स्थूलस्वरूपै र्यथेदं स्थावरजङ्गमात्मकं जगज्जायते क्षीयते लीयते च तथैवं शरीरमपि पित्तवातश्लेष्मभि र्जायते क्षीयते लीयते च। "विसर्गाऽऽदानविक्षेपैः सोमसूर्याऽनिला यथा। धारयन्ति जगद्देहं कफपित्ताऽनिलास्तथा॥ सु. सू. २१। ८" विशेषेण सर्जनं पोषणं विसर्गः, वि पूर्वकात् 'सृजविसर्गे' इति धातोर्भावे घञ्। आसमन्तादानं ग्रहणं शोषणमिति यावत्। आदानं 'डुदाञ् दाने, दाप् लवने' वा इत्याभ्यां धातुभ्यां भावे ल्युट्। विविधं क्षेपणं सञ्चालनं नयनं मूर्ताऽमूर्तपदार्थस्य विक्षेपः, विपूर्वकात् 'क्षिप प्रेरणे' इति धातोर्भावे घञ्। एभिः क्रियाभिः सोमः सोमगुणात्मकश्चन्द्रो वा, सवति=यथार्थपाकेन स्थावरजङ्गमात्मिकां सृष्टिमुत्पादयति पाकाऽधीनत्वात्सृष्टेः; ऐश्वर्यं वा ददाति आरोग्यदानेन ऐश्वर्याऽर्जनसामर्थ्यं ददाति "आरोग्यं भास्करादिच्छे-"दिति वचनात्। किं वा अग्नेरपि सूर्यरूपत्वादग्नेश्च "धनमिच्छेद्धुताशना-"दिति वचनेन अग्ने र्धनदातृत्वस्य प्रसिद्धत्वात्, "अग्नेरपत्यं प्रथमं हिरण्य-"मित्यादिवचनाद् रसशास्त्रे रससङ्क्रामणेन द्रव्योत्पादने अग्नेरसाधारणकारणत्वात्। 'षु प्रसवैश्वर्ययो-'रिति भौवादिकादादादिकाद्वा धातोः राजसूयसूर्य० (पा. ३।१। ११४) इत्यनेन निपातितो ज्ञेयः। 'षू प्रेरणे' तौदादिकात् 'षूङ्प्राणिगर्भविमोचने, इत्यादादिकात् 'षूङ्प्राणिप्रसवे' इति दैवादिकाद्वा रूपसिद्धिः। सर्वेषामेतेषां कर्मणां सूर्याभिनिर्वर्त्यत्वात् सूर्यमन्तरा संवत्सरविभागस्याऽप्यावृत्त्या सर्वस्याऽपि जगतः प्रलय एव स्यात्। अनिति 'प्राणयुक्ताञ्जीवान् करोति इत्यनिलः' 'अनप्राणने' इति धातोः सलिकल्यनि० (उ. १।५४) इत्यादिनोणादिसूत्रेण इलच् प्रत्ययः। एतै (सोमसूर्याऽनिलैः) र्यथा जगत्स्थावरजङ्गमात्मकं धार्यते तथा श्लेष्मपित्ताऽनिलै रिदं शरीरं धार्यते। तत्र पृथिवीजलीयपरिणामानां तमोबहुलत्वेन श्लेष्मेति सञ्ज्ञेति पूर्वं निर्णीतम्। न च वाच्यं विसर्गाऽऽदानविक्षेपैरित्यस्मिन् सूत्रे कफस्य सोमसादृश्यदानादेतदनौचित्यमापद्येत चन्द्रस्य प्रकाशात्मकत्वेन सत्त्वबहुलत्वात्। चन्द्रस्याऽपि जलपृथिव्यात्मकत्वमेवाऽस्ति।

तथाहि—"नित्यमधःस्थस्येन्दो र्भाभिर्भानोः सितं भवत्यर्धम्। स्वच्छाययाऽन्यदसितं कुम्भस्येवाऽऽतपस्थस्य ॥१॥ सलिलमये शशिनि रवेर्दीधितयो मूर्च्छितास्तमो नैशम्। क्षपयन्ति दर्पणोदरनिहिता इव मन्दिरस्यान्तः ॥२॥ त्यजतोऽर्कतलं शशिनः पश्चादवलम्बते यथा शौक्ल्यम्। दिनकरवशात्तथेन्दोः प्रकाशतेऽधः प्रभृत्युदयः ॥३॥ प्रतिदिवसमेवमर्कात् स्थानविशेषेण शौक्ल्यपरिवृद्धिः। भवति शशिनोऽपराह्ने पश्चाद्भागे घटस्येव ॥४॥ वृ. सं. ४।१।४" तथा च भास्करसिद्धान्ते—"तरणिकिरणसङ्गादेष पीयूषपिण्डो दिनकरदिशि चन्द्रश्चन्द्रिकाभिश्चकास्ति। तदितरदिशि बालाकुन्तलश्यामलश्री र्घट इव निजमूर्तिच्छाययैवाऽऽतपस्थः ॥ सूर्यादधःस्थस्य विधोरधःस्थमर्धं नृदृश्यं सकलासितं स्यात्। दर्शोऽथ भार्धान्तरितस्य शुक्लं तत्पौर्णमास्यां परिवर्तनेन ॥२॥ कक्षाचतुर्थे तरणे हि चन्द्रकरणान्तरे तिर्यगिनो यतोऽब्जात्। पादोनषट्काद्ध्रु लवान्तरेऽतो दलं नृदृश्यस्य दलस्य शुक्लम् ॥३॥ उपचितिमुपयाति शौक्ल्यमिन्दोस्त्यजत इनं व्रजतश्च मेचकत्वम्। जलमयजलजस्य गोलकत्वात् प्रभवति तीक्ष्णविषाणरूपताऽस्य ॥४॥ सि. शि. गो. शृङ्गोन्नतिवासनाध्याये १—४" अत्रार्थे श्रीपतिरपि—"धाम्नां धामनिधेरधं जलमयो धत्ते सुधादीधितिः, सद्यः कृत्तमृणालकन्दविशदच्छायां विवस्वद्दिशि। हर्म्ये घर्मघृणेः करैर्घट इवाऽन्यस्मिन्विभागे पुन, र्बालाकुन्तलकालतां कलयति स्वच्छां तनोश्छायया ॥" इति ॥

अन्यत्राऽपि—"तेजसां गोलकः सूर्यो ग्रहर्क्षाण्यम्बुगोलकाः। प्रभावन्तो हि दृश्यन्ते सूर्यरश्मिप्रदीपिता" इति। तथा च वेदे—"सुषुम्णः सूर्यरश्मिश्चन्द्रमा.॥ वा. सं. १८।४०" शोभनं सुम्नं बलं सुखं वा यस्य यस्माद्वा स सुषुम्णश्चन्द्रः, सूर्यस्य रश्मिभी रश्मयो यस्य स सूर्यरश्मिः, इत्यादिना चन्द्रमसो जलपृथिव्यात्मकत्वे न सन्देहः, निरुक्तेऽपि इन्दुरिति जलनाम दृश्यते। पृथिवीजलयोश्च तमोवद्गुरुत्वम्—"भूतादेस्तन्मात्रः स तामसस्तैजसादुभयम्॥ सां. का. २५" इत्यनेन स्पष्टत्वेन तामसत्वप्रतिपादनात्। ननु"चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत। श्रोत्राद् वायुश्च प्राणश्च मुखादग्निरजायत ॥ वा. सं. ३१।१२" इत्यत्र चन्द्रमसो विराण्मनोजातत्वस्योक्त्या विरोधः स्यादिति शङ्क्यम्? "सात्त्विक एकादशकः प्रवर्तते वैकृतादहङ्कारात्। सां. का. २५" इत्यनेन वैकृतादहङ्कारादुत्पन्नस्योक्तत्वेन तच्छङ्काऽवसर एव नोत्तिष्ठते। न च वाच्यं तत्र एकादशात्मन इन्द्रियगणस्य सात्त्विकत्वमुक्तमिति सत्यम्? तत्राऽपि (सात्त्विकत्वोक्तावपि) वैकृतादिति विशेषणेन मनस्यसद्गुणात्मकत्व सूचितम्। त्रयाणामपि गुणानां मनस्यधिकारिभेदेन प्रत्यक्षतया दृश्यमानत्वात्। अनेनैवाऽभिप्रायेण चरके मनसस्त्रिविधत्वमुक्तं तथाहि—"त्रिविधं खलु सत्त्वं—शुद्धं, राजसं, तामसमिति। तत्र शुद्धमदोषमाख्यातं कल्याणांशत्वात्, राजसं सदोषमाख्यातं रोषांशत्वात्, तथा तामसमपि सदोषमाख्यातं मोहांशत्वात् ॥ च. शा. ४।३६" इति। उक्तकारिकायामपि तैजसादुभयमिति रजोयुक्तत्वस्य स्पष्टतयाऽभिधानम्, वैकृतादित्यनेन च तामसत्वकथनमतो न चरकीयकथनमसङ्गतम्। योगे तु "वृत्तयः पञ्चतय्यः क्लिष्टाऽक्लिष्टाः। यो. १।५" इत्यत्र क्लिष्टाऽक्लिष्टत्वेन मनसो वृत्तिद्वयत्वमेवोक्तम्। तत्र रजस्तामोमयीनां क्लेशकारणत्वात्क्लिष्टत्वम्। सात्त्विकीनान्तु सुखोदर्कत्वादक्लिष्टत्वं कथितमिति न कश्चिद्विरोधः। एवं गीतायामपि दैवाऽसुरत्वेन प्रकृतिद्वयमुपन्यस्तम् तत्राऽप्ययमेवाऽभिप्रायः। इममेवाऽभिप्रायमाश्रित्य—"रोहिण्यामतिसक्तस्य शरीरं नानुरक्षतः। आजगामाल्पतामिन्दो र्देहः स्नेहपरिक्षयात् ॥ दुहितॄणामसम्भोगाच्छेषाणाञ्च प्रजापतेः। क्रोधो निःश्वासरूपेण मूर्तिमान् निःसृतो मुखात् ॥ प्रजापते र्हि दुहितॄरष्टाविंशतिमंशुमान्। भार्यार्थं प्रतिजग्राह न च सर्वास्ववर्तत ॥ गुरुणा तमवध्यातं भार्यास्वसमवर्तिनम्। रजः परीतमबलं यक्ष्मा शशिनमाविशत् ॥ च. चि. ८।४—७" इति पौराणिकी कथाऽवतारः सङ्गच्छते। ये तु केचित्—"दूर्वेन्दीवरनिस्त्रिंशार्द्रारिष्टकशरकाण्डानामन्यतमवर्णः सुभगः प्रियदर्शनो मधुरप्रियः कृतज्ञो धृतिमान् सहिष्णुरलोलुपो बलवांश्चिरग्राही दृढवैरश्

भवति ॥ ७२ ॥ शुक्लाक्षः स्थिरकुटिलातिनीलकेशो लक्ष्मीवान् जलदमृदङ्गसिंहघोषः । सुप्तः सन् सकमलहंसचक्रवाकान् सम्पश्येदपि च जलाशयान् मनोज्ञान् ॥ ७३ ॥ रक्तान्तनेत्रः सुविभक्तगात्रः स्निग्धच्छविः सत्त्वगुणोपपन्नः । क्लेशक्षमो मानयिता गुरूणां ज्ञेयो बलासप्रकृति र्मनुष्यः ॥ सु. शा. ४ । ७२–७४ " इत्यादि लक्षणानां श्लेष्मप्रकृतिमुपलभ्य श्लेष्मणि सत्त्वप्राधान्यं कल्पयन्ति तन्न श्रद्धेयम् यतः " दूर्वेन्दीस्थिरे०-" त्यादिना यानि लक्षणान्युक्तानि तानि समुपचितसमस्तगुणै र्जातस्य शरीरमभिलक्ष्य निर्दिष्टानि सन्ति । अस्मिंश्च शरीरे जलपृथिवीभागयोरधिकत्वेन सत्त्वात् सः विशुद्धः प्रचुरप्रमाणश्च भागो यदा शुक्रशोणितसंयोगे सत्तामासादयन्नविरतस्ववृत्तिः प्रसवसमयपर्यन्तमवतिष्ठते तदा ह्येतानि लक्षणानि दृश्येरन् । तथात्वे च साम्याऽऽपन्नयो र्वातपित्तयोरपि कारणमस्त्यन्यथोक्तलक्षणस्य रसस्य दीर्घसमयपर्यन्ताऽवस्थितेरेवाऽसम्भाव्यत्वम् । सा च सामग्री विभूतिमत्सत्त्वेष्वेव द्रष्टुं शक्या न सर्वत्र यथा–" इक्ष्वाकुवंशप्रभवो रामो नाम जनैः श्रुतः । नियतात्मा महावीर्यो द्युतिमान् धृतिमान्वशी ॥८॥ बुद्धिमान्नीतिमान्वाग्मी श्रीमांश्छत्रुनिबर्हणः। विपुलांसो महाबाहुः कम्बुग्रीवो महाहनुः ॥ ९ ॥ महोरस्को महेष्वासो गूढजत्रुररिन्दमः । आजानुबाहुः सुशिराः सुललाटः सुविक्रमः ॥ १० ॥ समः समविभक्ताङ्गः स्निग्धवर्णः प्रतापवान् । पीनवक्षा विशालाक्षो लक्ष्मीवांश्छुभलक्षणः ॥ ११ ॥ धर्मज्ञः सत्यसन्धश्च प्रजानाञ्च हिते रतः । यशस्वी ज्ञानसम्पन्नः शुचि र्वश्यः समाधिमान् ॥ १२ ॥ वा. रा. बाल० १।८–१२" इत्यादौ श्रीरामचन्द्रगुणवर्णनं दृश्यते तत्रैवैतानि लक्षणानि सामस्त्येनैकत्र द्रष्टुं शक्यानि न प्राकृतजने । अत इदं लक्षणं यथाऽपेक्षितप्रमाणयुक्तसमधातोरेवाऽस्ति नाऽनेन पृथिवीजलभागस्यैवाधिक्यं निर्णेतुं शक्यम् । यत्र च समस्तान्यपि महाभूतानि किङ्करत्वेन कार्यकराणि समुपपद्यन्ते तत्र सत्त्वगुणस्याऽधिक्यसत्त्वे किं वैचित्र्यम् । अत एव " ब्रह्मरुद्रेन्द्रवरुणैः सिंहाश्वगजगोवृषैः । तार्क्ष्यहंससमानूकाः श्लेष्मप्रकृतयो नराः ॥ सु. शा. ४।७६ " त्यनेन ब्रह्मादिभिः श्लेष्मप्रकृतेः सादृश्यं दर्शितम् । इयञ्च प्रकृष्टगुणयुक्तसर्वसमधातुकी एकैव प्रकृतिः, यदात्वेकस्याऽपि कस्यचिदाधिक्यं भवति तदाऽवश्यमेव विकृतिरुपतिष्ठते यथाऽत्रैव (प्रकृतिवर्णने) " तत्र यः प्रजागरूकः शीतद्वेषी दुर्भगः स्तेनो मत्सर्यनार्यो गान्धर्वचित्तः स्फुटितकरचरणोऽल्परूक्षश्मश्रुनखकेशः क्रोधी दन्तनखखादी च भवति ॥ ६४ ॥ अधृतिरदृढसौहृदः कृतघ्नः कृशपरुषो धमनीततः प्रलापी । द्रुतगतिरटनोऽनवस्थितात्मा वियदपि गच्छति सम्भ्रमेण सुप्तः ॥ ६५ ॥ अव्यवस्थितमतिश्चलदृष्टि र्मन्दरत्नधनसञ्चयमित्रः । किञ्चिदेव विलपत्यनिबद्धं मारुतप्रकृतिरेष मनुष्यः ॥ ६६ ॥ वातिकाश्चाजगोमायुशशाखूष्ट्रशुनां तथा। गृध्रकाकखरादीनामनूकैः कीर्तिता नराः ॥ ६७ ॥ सु. शा. ४ " इति वातप्रकृतेर्लक्षणं तथैव " स्वेदनो दुर्गन्धः पीतशिथिलाङ्गस्ताम्रनखनयनतालुजिह्वौष्ठपाणिपादतलो दुर्भगो वलीपलितखालित्यजुष्टो बहुभुगुष्णद्वेषी क्षिप्रकोपप्रसादो मध्यमबलो मध्यमायुश्च भवति ॥ ६८ ॥ मेधावी निपुणमति र्विगृह्यवक्ता तेजस्वी समितिषु दुर्निवारवीर्यः । सुप्तः सन् कनकपलाशकर्णिकारान् सम्पश्येदपि च हुताशविद्युदुल्काः ॥ ६९ ॥ न भयात्प्रणमेदनतेष्वमृदुः प्रणतेष्वपि सान्त्वनदानरुचिः । भवतीह सदा व्यथितास्यगतिः स भवेदिह पित्तकृतप्रकृतिः ॥ ७० ॥ भुजङ्गोलूकगन्धर्वयक्षमार्जारवानरैः । व्याघ्रर्क्षनकुलाऽनूकैः पैत्तिकास्तु नराः स्मृताः ॥ ७१ ॥ सु. शा. ४ " इत्यनेन पित्तप्रकृतेश्च लक्षणमुक्तम् । अत्रोभयत्राऽपि वह्निवातयोराधिक्यमस्ति तच्च स्वगुणसहितपृथिवीजलभागयो र्न्यूनतां स्पष्टतया प्रतिपादयति यथा जलीयगुणस्निग्धत्वाऽभावेन वातप्रकृतौ प्रजागरूकदुर्भगस्तेनमत्सराऽनार्यगान्धर्वचित्तस्फुटितकरचरणक्रोधिदन्तनखखादित्वान्यभिव्यक्तानि । एते वातगुणा वातगुणरूक्षत्वादिशामकस्नेहादिजलीयगुणानामल्पत्वे एव सत्तामासादयितुं प्रभविष्णवो जाताः स्वविरोध्यभावे एव विरोधिनः प्रभावो व्यज्यत इति सर्वजनीना प्रतीतिः । एवं पृथिवीगुण-

गुरुत्वस्याऽल्पमात्रात्वेन स्वल्पाऽल्पश्मश्रुनखकेशत्वम् । अग्निगुणौष्ण्याऽल्पत्वे शीतद्वेषिता लघ्वाऽऽस्पदा दृश्यते । एवं पृथिवीजलगुणानां पित्तप्रकृतावल्पत्वेन स्वेदनदुर्गन्धित्वादीनि व्यक्तानि । वातस्याऽग्निसखित्वभावात्तदीयगुणानान्तु तद्वर्धकत्वेनैव परिणामो व्यक्ततयोपलक्ष्यत एव । अनयोः (वातिकपैत्तिक्योः) प्रकृत्योः सूक्ष्मतया गवेषणे कृते एतन्निश्चितं भवति यद्धातुत्रयस्य यत्र यत्र केनाऽपि कारणेन इयत्प्रमाणा हीनता भवति तत्र तत्कार्ये तत्प्रयुक्ता तावती हीनताऽवश्यं भवत्येव यथा—"श्लेष्मक्षये रूक्षताऽन्तर्दाहः आमाशयेतराशयश्लेष्माशयशून्यता सन्धिशैथिल्यं तृष्णा दौर्बल्यं प्रजागरणञ्च ॥ सु. सू. १५।११" एवमाधिक्येऽपि यथा—"श्लेष्मवृद्धौ शौक्ल्यं शैत्यं स्थैर्यं गौरवमवसादस्तन्द्रा निद्रा सन्ध्यस्थिविश्लेषश्च । सु. सू. १५।१७" खादितपीतलीढादीनां जठराऽग्निपरिपाकाद्योऽयं रस उदेति स सर्वेषां धातूनां मूलकारणं, तत्राऽपि जलपृथिवीभागस्यैवाऽधिक्यमस्ति स यदा कारणविशेषात्स्वप्रमाणाद्वर्धते क्षीयते वा तत्राऽपीयमेव व्यापत् । तत्र वृद्धौ यथा—"रसोऽतिवृद्धो हृदयोत्क्लेदं प्रसेकञ्चाऽऽपादयति ॥ सु. सू. १५।१८" क्षये यथा—"रसक्षये हृत्पीडा कम्पशोषशून्यता तृष्णा च ॥ सु. सू. १५।१३" अन्यच्च—"रसनिमित्तमेव स्थौल्यं कार्श्यञ्च । तत्र श्लेष्मलाऽऽहारसेविनोऽध्यशनशीलस्य अव्यायामिनो दिवास्वप्नरतस्य च आम एव अन्नरसो मधुरतरश्च शरीरमनुक्रमन् अतिस्नेहान्मेदो जनयति, तदतिस्थौल्यमापादयति । तमतिस्थूलं क्षुद्रश्वासपिपासाक्षुत्स्वप्नस्वेदगात्रदौर्गन्ध्यक्रथनगात्रसादगद्गदत्वानि क्षिप्रमेव आविशन्ति, सौकुमार्यान्मेदसः सर्वक्रियासु असमर्थः कफमेदोनिरुद्धमार्गत्वाच्च अल्पव्यवायो भवति । आवृतमार्गत्वादेव शेषा धातवो नाऽऽप्यायन्तेऽत्यर्थमतोऽल्पप्राणो भवति, प्रमेहपिडकाज्वरभगन्दरविद्रधिवातविकाराणामन्यतमं प्राप्य पञ्चत्वमुपयाति, सर्व एव चास्य रोगा बलवन्तो भवन्ति आवृतमार्गत्वात्स्रोतसां, अतस्तस्य उत्पत्तिहेतुं परिहरेत् । उत्पन्ने तु शिलाजतुगुग्गुलुगोमूत्रत्रिफलालोहरजोरसाञ्जनमधुयवमुद्गकोरदूषकश्यामाकोद्दालकादीनां विरूक्षणच्छेदनीयानां च द्रव्याणां विधिवदुपयोगो व्यायामो लेखनवस्त्युपयोगश्चेति ॥ ३८ ॥ तत्र पुनर्वातलाहारसेविनोऽतिव्यायामव्यवायाऽध्ययनभयशोकध्यानरात्रिजागरणपिपासाक्षुत्कषायाऽल्पाशनप्रभृतिभिरुपशोषितो रसधातुः शरीरमननुक्रामन् अल्पत्वात् न प्रीणयति तस्मादतिकार्श्यञ्च भवति । सोऽतिकृशः क्षुत्पिपासाशीतोष्णवातवर्षभारादानेषु असहिष्णुः वातरोगप्रायोऽल्पप्राणश्च क्रियासु भवति । श्वासकासशोषप्लीहोदराऽग्निसादगुल्मरक्तपित्तानामन्यतमं प्राप्य मरणमुपयाति, सर्व एव चाऽस्यरोगा बलवन्तो भवन्ति अल्पप्राणत्वात् । अतस्तस्य उत्पत्तिहेतुं परिहरेत् । उत्पन्ने तु पयस्याऽश्वगन्धाविदारीविदारीगन्धा शतावरीबलाऽतिबलानागबलानां मधुराणामन्यासाञ्च औषधीनामुपयोगः, क्षीरदधिघृतमांसशालिषष्टिकयवगोधूमानाञ्च, दिवास्वप्नब्रह्मचर्याव्यायामबृंहणवस्त्युपयोगश्चेति ॥ ३९ ॥ यः पुनरुभयसाधारणानि उपसेवेत तस्य अन्नरसः शरीरमनुक्रामन् समान् धातून् उपचिनोति, समधातुत्वान्मध्यशरीरो भवति सर्वक्रियासु समर्थः क्षुत्पिपासाशीतोष्णवर्षातपसहो बलवांश्च, स सततमनुपालयितव्य इति ॥ ४० ॥ सु. सू. अ. १५" एवं श्लेष्मसधर्मणो मेदसोऽपि वृद्धौ क्षये च व्यापत्, तत्र वृद्धौ—"मेदः स्निग्धाऽङ्गतामुदरपार्श्ववृद्धिकासश्वासादीन् दौर्गन्ध्यञ्च ॥ सु. सू. १५।१८" एवं तदीयक्षयेऽपि यथा—"मेदः क्षये प्लीहाऽभिवृद्धिः सन्धिशून्यता रौक्ष्यं मेदुरमांसप्रार्थना च ॥ सु. सू. १५।१३" किञ्च "समदोषः समाऽग्निश्च समधातुमलक्रियः । प्रसन्नात्मेन्द्रियमनाः स्वस्थ इत्यभिधीयते ॥ सु. सू. १५।४५" इत्यत्र शरीरधारकसमग्रसामग्र्याः समत्वेनैव स्वस्थस्य लक्षणं निर्दिष्टम् । साम्यं पुनः स्वस्थतायामेवाऽनुमातुं शक्यम् तथाहि—"एषां समत्वं यच्चाऽपि भिषग्भिरवधार्यते । न तत्स्वास्थ्यादृते शक्यं वक्तुमन्येन हेतुना ॥ सु. सू. १५।४४" तस्याः समताया निरन्तरं रक्षणं करणीयमिति विशेषतोऽभ्यनुज्ञा कृताऽस्ति यथा—"स्वस्थस्य रक्षणं कुर्यादस्वस्थस्य तु बुद्धिमान् । क्षपयेद्बृंहयेच्चाऽपि

दोषधातुमलान् भिषक् ॥ तावद्यावदरोगः स्यान्नरो रोगसमन्वितः ॥ सु. सू. १५।४७ ” इत्यादिग्रन्थपर्यालोचनया सुश्रुते इन्दीवरेत्यादिना यच्छ्लेष्मप्रकृतिलक्षणमुक्तं तत् समसर्वधातुक्याः प्रकृत्या एवाऽस्ति न पुनर्वातपित्तप्रकृत्योरिव विषमताऽऽपन्नश्लेष्मप्रकृतेः । तस्मायत्र श्लेष्मण आधिक्यं स्यात्तत्र तमोगुणजाताः कासश्वासदीर्घसूत्रित्वादयो दुर्गुणा अवश्यमेव भवन्ति यथा तामसकायनिरूपणे—“ दुर्मेधस्त्वं मन्दता च स्वप्ने मैथुननित्यता । निराकरिष्णुता चैव विज्ञेयाः पाशवा गुणाः ॥ ९५ ॥ अनवस्थितता मौर्ख्यं भीरुत्वं सलिलार्थिता । परस्पराऽभिमर्दश्च मत्स्यसत्त्वस्य लक्षणम् ॥ ९६ ॥ एकस्थानरति नित्यमाहारे केवले रतः । वानस्पत्यो नरः सत्त्वधर्मकामार्थवर्जितः ॥ ९७ ॥ सु. शा. अ. ४.” दूर्वेन्दीवरेत्यादिना निर्दिष्टलक्षणानि तु न भवन्त्येव । “ शुक्रशोणितसंयोगे यो भवेद्दोष उत्कटः । प्रकृति र्जायते तेन तस्या मे लक्षणं शृणु ॥ सु. शा. ४ । ६३ ” शुक्रशोणितयोः पञ्चभूतात्मकयोः वैद्यकीयसङ्केतेन वातपितकफात्मकयो र्वा संयोगे यः पञ्चसु (पञ्चभूतेषु) त्रिषु (वातपित्तश्लेष्मसु) वा मध्ये दोषः=कारणसामग्रीसत्त्वे दोषोत्पादनशीलः तदभावे तु पोषक इत्यर्थः स उत्कटः । स्वेतराऽधिकवीर्यशाली भवेत् लब्धास्पदो भवति तेन दोषेण विषमताऽऽपन्नेन समत्वाऽऽपन्नेन वा प्रकृतिः प्रकरणवशात् तदतिरिक्तवस्तुन उपस्थित्यभावाद्वा स्वभावो जायते निर्वर्तते । तस्याः स्वभावस्य मे मम वदतो लक्षणं (स्वरूपं) शृणु अवगच्छेत्यर्थः, समसर्वधातुकायाऽपेक्षया सर्वस्मिन्नपि काये ये ये स्वभावा दृश्यन्ते तत्रतत्र यत्किञ्चिद् दूषणमवश्यमेवाऽवतिष्ठते । तच्च किंप्रयुक्तो भवतीति विचारे “ बलीयसाऽबलं जीयते ” इति न्यायेन तदाऽऽरम्भकवस्तुन उत्कटताऽवश्यं भवितुं योग्या । तथात्वे च दुष्टिरवश्यमेवाऽभिव्यज्यते, अत एव सुश्रुते प्रकृतित्रयलक्षणान्युक्त्वाऽपि सात्त्विकराजसतामसकायानां वर्णनं कृतमस्ति । परन्तु तत्र सत्त्वकायलक्षणेषु दूर्वेन्दीवरनिस्त्रिंशेत्यादि निर्दिष्टप्रकृते र्लक्षणानि सामस्त्येनैकत्र कुत्राऽपि न दृश्यन्त एव इति द्वयम्, अत उत्कटदोषत्वेन समसर्वधातुकत्वेन च प्रकृतिर्द्वैविध्यम् । तत्र समसर्वधातुकत्वमेकविधमेव, केनाऽपि प्रकारेणाऽनेकत्वाऽसम्भवात् । उत्कटदोषत्वस्य तु तरतमत्वादिभेदेनाऽऽसङ्ख्येयत्वम् अत्र (वातपित्तकफेषु) दोषा धातवो मला इति शब्दत्रयाऽऽगमनमेकशो द्विशः समस्ततया वा दृश्यते, पञ्चभूताऽतिरिक्तवस्तुनश्च शरीरेऽभावात् नामत्रयं कथं समागच्छतीति विचार्यते—परिणामभेदात्कार्यभेदाच्च लोके भेदो दृश्यते तत्र परिणामभेदाद्यथागोधूमचणकादीनां मोदकशष्कुलीवटकादीनि परिणामभेदेन नामानि भिद्यन्ते । यद्वा आम्रबीजस्याऽङ्कुरपल्लवपुष्पफलादीनि नामानि जायन्ते । कार्यभेदाच्च देवदत्तस्यैकत्वेऽपि पाचनभर्जनकर्षणखननादिक्रियानिर्वर्तकत्वेन पाचकभर्जकादीनि नामानि विभिन्नविभिन्नतया जायन्ते, तथा पञ्चमहाभूतीयाऽन्नपानस्य जठराऽग्निमासाद्य रसरक्तमांसमेदोऽस्थिमज्जशुक्रौजःप्रभृतीनि नामानि सारात्सम्भवन्ति किट्टं पुनर्मलत्वमासादयति । तच्च तत्तदवयवै र्यथासमयं बहिर्निःसार्यते । सारस्य अहरहः शरीरे सरणाद्द्वैणी रससञ्ज्ञा । रञ्जकादिपित्तेन रञ्जितत्वाद्रक्तसञ्ज्ञा, घनीभावान्मांससञ्ज्ञा, स्नेहभागस्य पृथग्भवनान्मेदःसञ्ज्ञा, पार्थिवभागस्य विशेषतया परिपाकेन कठिनी भावादस्थिसञ्ज्ञा, अस्थ्यन्तर्वर्तिपदार्थस्य (स्नेहरूपस्य) मज्जसञ्ज्ञा, प्रसवकारणस्य रजःशुक्रसञ्ज्ञे, समस्तशरीरव्यापकतया जीवनाऽऽधारस्नेहस्य ओजःसञ्ज्ञा च जायते । एते विशेषाः पाञ्चभौतिकाऽन्नपानस्यैव परिणामभेदेन निष्पद्यन्ते । तेषाञ्च स्वरूपे गुणे क्रियासु च यावत्पर्यन्तं शरीरपोषकत्वमवतिष्ठते तावत्पर्यन्तं धातुरिति व्यवहारः, यदा तु केनाऽपि प्रकारेण दुष्टिरुत्पद्यते तदाऽशुभकार्योत्पादनत्वाद्दोष इत्याख्या, तथाहि—“वातपित्तश्लेष्माण एव देहसम्भवहेतवः। तैरेव अव्यापन्नैरधोमध्योर्ध्वसन्निविष्टैः शरीरमिदं धार्यते आगारमिव स्थूणाभिस्तिसृभिरतश्च त्रिस्थूणमाहुरेके । त एव च व्यापन्नाः प्रलयहेतवः । तदेभिरेव शोणितचतुर्थैः सम्भवस्थितिप्रलयेष्वप्यविरहितं शरीरं भवति ॥ ३ ॥ नर्ते कफादस्ति न पित्तान्न च मारुतात् । शोणितादपि वा नित्यं देह एतैस्तु धार्यते ॥४॥ सु. सू. २१

शरीरपोषणाऽनुपयुक्ततया बहिःक्षेप्तुमुचितानां मलिनीकरणतया मला इति व्यवहारः, नचैकान्ततो मलेषु शरीराऽपोषकत्वम्। यतः "पुरीषमुपस्तम्भं वाय्वग्निधारणञ्च। बस्तिपूरणविक्लेदकृन्मूत्रं। स्वेदः क्लेदत्वक्सौकुमार्यकृत्। सु. सू. १५।८" इत्युक्तत्वात्। तथाऽपि स्वकार्यकरणाऽनन्तरं तेषां बहिःक्षेप एव पर्यवसानात्तथा त्वव्यवहार इति न विरोधः। अत एवोक्तं "दोषधातुमलमूलं हि शरीरम्। सु. सू. १५।३" यद्यपि वातपित्तकफा एव दोषत्वेन वर्णिताः परन्तु तदतिरिक्तपदार्थाऽभावात् तात्स्थ्यात्ताच्छब्द्यमितिन्यायाच्च तदवान्तरभेदाः तत्स्थगुणाः क्रियाश्च सर्वमपि तथात्वेन गृह्यते, तस्माद् यच्छरीरनिर्वहणाऽनुकूल्यमुद्वहति तस्य धातुसञ्ज्ञा, तत्प्रतिपाक्षिणश्च दोषसञ्ज्ञा इति निर्व्यूढं लक्षणं बोध्यम्। तत्र द्रव्यं वा स्याद्गुणो वा स्यात्क्रिया वा स्यादित्यन्यदेतत्। रक्तादयः सर्वेऽपि पदार्थाः रसात्परिणमन्ति तथाहि—"रसजं पुरुषं विद्याद्रसं रक्षेत्प्रयत्नतः। अन्नात् पानाच्च मतिमानाचाराच्चाऽप्यतन्द्रितः॥ सु. सू. १४।१२" यद्यपि रसनाग्राह्यो गुणो रसः सोऽपां गुणः रसतन्मात्रादपां जायमानत्वात्। अद्भ्यश्च पृथिव्या जायमानत्वात्तत्राऽप्यस्ति, इतरभूतत्रये पञ्चीकरणेन रसस्य वर्तमानत्वाद्रसभेदे तदीयाऽभिव्यक्तौ च स्वादयस्त्रयः सहकारिकारणतया प्रत्यवतिष्ठन्ते। तथाहि—"रसनार्थो रसस्तस्य द्रव्यमापः क्षितिस्तथा। निर्वृत्तौ च विशेषे च प्रत्ययाः खादयस्त्रयः॥ च. सू. १।६४" रसनया जिह्वेन्द्रियेण अर्थ्यते=प्रार्थ्यते गृह्यत इति यावत् रसनार्थः रसनाग्राह्यो गुण इत्यर्थः। तस्य रसस्य द्रव्यं आधारकारणं आपस्तथा क्षितिश्च भवति। अप्सु अव्यक्तमधुररसस्यैव सत्त्वात् तद्विशेषे मधुरादिभेदे निर्वृत्तौ च प्रत्यक्षे च खादयस्त्रयः प्रत्ययाः। प्रतीयन्ते स्पष्टतयाऽभिव्यज्यन्ते एभिस्ते प्रत्ययाः सहकारिकारणानि ते खादयस्त्रयो भवन्ति। अस्य विशेष आत्रेयभद्रकाप्यीयेऽध्याये "परं चातः प्रवक्ष्यन्ते रसानां षड्विधत्वम्॥ च. सू. २६।३६" इत्यारभ्याऽध्यायसमाप्तिपर्यन्तं द्रष्टव्यः। सुश्रुते च रसविशेषविज्ञानीयाऽध्यायो द्रष्टव्यः। ते च साधारणतया षट् सन्ति यथा—"स्वादुरम्लोऽथ लवणः कटुकस्तिक्त एव च। कषायश्चेति षट्कोऽयं रसानां सङ्ग्रहः स्मृतः॥ च. सू. १।६४" एते च (मधुरादयः) सामान्यतया स्वतन्त्रे (आयुर्वेदीयतन्त्रे) परतन्त्रे च (न्यायवैशेषिकादौ) रसत्वेन सर्वजनीनां प्रतीतिमावहन्ति तथाऽप्यायुर्वेदे रसशब्दस्य स्वादितपीतादिसाररूपप्रथमपरिणामे तदुत्तरं रक्ते रक्तात्सूक्ष्मधमनीप्रतानैर्गालिते द्रवे च सङ्केतो दृश्यते। तदर्थं "तत्र रसगतौ धातुः, अहरहः गच्छतीत्यतो रसः॥ सु. सू. १४।१३" इत्यनेन योगं प्रधानीकृत्य गौणीसञ्ज्ञा स्थापिता। अयञ्च रसः सर्वेषां धातूनां गुणानाञ्च योनिः। स्थलविशेषं सम्यगाकलय्याऽत्र यौगिको रसः रूढो वा रस इति विवेचनीयम्। प्रकृतमनुसरामः—उपरिनिर्दिष्टं यद् वातपित्तकफेषु **धातुत्वं दोषत्वं मलत्वञ्चेति** मलत्वञ्चेति सञ्ज्ञात्रयं तत्तदुपाधिभेदात्स्थापनीयम्। तत्रापि दोषमलशब्दाभ्यामधिकतया व्यवहारशैली दृश्यते। तया च बुद्धिर्व्याकुलीभवति तदनिवार्यम्। तत्र स्वकीयबुद्धेरेव विदुषा शोधनं कर्तव्यं येन सा सञ्ज्ञासाङ्कर्यदोषदुष्टेऽपि स्थलेऽविमूढा सती प्रकरणस्थतत्त्वं यथार्थतयाऽवबुध्येत। बुद्धिशोधनप्रकारस्त्वस्माभिरनुपदमेव न्यदर्शि। शरीराऽवयवानां गुणानां क्रियाणाञ्चाऽसङ्ख्येयत्वात्तदीयदुष्टीनामपि तथात्वात् तासामेव सामान्यतया रोगत्वाऽभिधानात् शृङ्गीग्राहिकतान्यायेन तदीयनामकरणाऽसम्भवात्, नामाऽकरणे च व्यवहाराऽसौकर्यात्स्वोपादानकारणैः (वातपित्तकफैः) रेव पृथग्द्वन्द्वसन्निपातभेदेन दुष्टयो (व्याधयो) निर्दिष्टाः। तेषां (विकृतवातपित्तकफानां) शमनोपायश्च वातपित्तकफस्थषड्भिर्गुणैः (मधुरादिभिः) रेव व्यापकत्वेन निर्दिष्टः। तेषु षट्सु गुणेषु कक्षात्रयं स्थापितं यथा—"स्वाद्वम्ललवणा वायुं जयन्ति, कषायस्वादुतिक्तकाः पित्तं जयन्ति, कषायकटुतिक्तकाः श्लेष्माणमिति। यत्त्रिकं यदीयदोषस्य शामकं तद्द्वितीयं पारिशेष्यादुत्पादकत्वे पर्यवस्यति, यथा स्वाद्वम्ललवणेषु वातशामकत्वं, तदितरकटुतिक्तकषायाख्ये तज्जनकत्वम्। एवं कषायस्वादुतिक्ताख्ये पित्तशामकत्वं तदितराऽम्ललवणकटुकाऽऽख्ये पित्तजनकत्वम्।

एवं कषायकटुतिक्तकाऽऽख्ये श्लेष्मशामकत्वं तदितरमधुराऽम्ललवणाख्ये तज्जनकत्वम् । अत्रेदं रहस्यम्—" एते रसाः स्वयोनिवर्धना अन्ययोनिप्रशमनाश्च । केचिदाहुरग्नीषोमीयत्वाज्जगतो द्विविधा रसाः सौम्या आग्नेयाश्च । तत्र मधुरतिक्तकषायाः सौम्याः, कट्वम्ललवणा आग्नेयाः, मधुराऽम्ललवणाः स्निग्धा गुरवश्च, कटुतिक्तकषाया रूक्षा लघवश्च, सौम्याः शीता, आग्नेयाश्चोष्णाः ॥ ६ ॥ तत्र शैत्यरौक्ष्यलाघववैशद्यवैष्टम्भ्यगुणलक्षणो वायुस्तस्य समानयोनिः कषायो रसः, सोऽस्य शैत्यात् शैत्यं वर्धयति रौक्ष्याद्रौक्ष्यं लाघवाल्लाघवं वैशद्याद्वैशद्यं वैष्टम्भ्याद्वैष्टम्भ्यमिति ॥ ७ ॥ औष्ण्यतैक्ष्ण्यलाघववैशद्यगुणलक्षणं पित्तं, तस्य समानयोनिः कटुको रसः, सोऽस्यौष्ण्यादौष्ण्यं वर्धयति तैक्ष्ण्यात्तैक्ष्ण्यं रौक्ष्याद्रौक्ष्यं लाघवाल्लाघवं वैशद्याद्वैशद्यमिति ॥ ८ ॥ माधुर्यस्नेहगौरवशैत्यपैच्छिल्यगुणलक्षणः श्लेष्मा; तस्य समानयोनि र्मधुरो रसः, सोऽस्य माधुर्यान्माधुर्यं वर्धयति स्नेहात्स्नेहं गौरवाद्गौरवं शैत्यात् शैत्यं पैच्छिल्यात्पैच्छिल्यमिति ॥ ९ ॥ तस्य पुनरन्ययोनिः कटुको रसः स श्लेष्मणः प्रत्यनीकत्वात् कटुकत्वान्माधुर्यमभिभवति रौक्ष्यात्स्नेहं लाघवाद्गौरवमौष्ण्यात् शैत्यं वैशद्यात्पैच्छिल्यमिति तदेतन्निदर्शनमात्रमुक्तम् ॥ १० ॥ सु. सू. ४२।६–१० " अनेन पथा स्वसमानैः क्षीणानां वृद्धिः, वृद्धानां स्वविपरीतै र्ह्रासः, साम्याऽऽपन्नानां युक्तितो रक्षणम् । " तत्र वातक्षये मन्दचेष्टता अल्पवाक्त्वमप्रहर्षो मूढसञ्ज्ञता च । पित्तक्षये मन्दोष्माग्निता निष्प्रभत्वञ्च । श्लेष्मक्षये रूक्षता अन्तर्दाह आमाशयेतराशयश्लेष्माशयशून्यता सन्धिशैथिल्यं तृष्णादौर्बल्यं प्रजागरणञ्च ॥ सु. सू. १५।११ " अनेन लक्षणेन क्षीणानां परिज्ञानम् । " अत ऊर्ध्वमतिवृद्धानां दोषधातुमलानां लक्षणं वक्ष्यामः । वृद्धिः पुनरेषां स्वयोनिवर्धनात्युपसेवनाद् भवति । तत्र वातवृद्धौ वाक्पारुष्यं कार्श्यं कार्ष्ण्यं गात्रस्फुरणमुष्णकामिता निद्रानाशोऽल्पबलत्वं गाढवर्चस्त्वञ्च । पित्तवृद्धौ पीताऽवभासता सन्तापः शीतकामित्वमल्पनिद्रता मूर्च्छा बलहानिरिन्द्रियदौर्बल्यं पीतविण्मूत्रनेत्रत्वञ्च । श्लेष्मवृद्धौ शौक्ल्यं शैत्यं स्थैर्यं गौरवमवसादस्तन्द्रा निद्रासन्ध्यस्थिविश्लेषश्च ॥ सु. सू. १५।१७ " अनेन वृद्धानां लक्षणं ज्ञातव्यम् । साम्याऽऽपन्नानान्तु यथोचितबलवर्णोपचयादीनां सम्यक् सम्पत् । अनेन सूत्रेण ज्ञाताऽज्ञातसहस्रशो व्याधीनां निदानानि प्रशमनानि च सम्यक्तया सुशिक्षितो वैद्योऽनायासेन कर्तुं समर्थो भवति । शृङ्गग्राहिकन्यायेन तु इदं कार्यं भवितुमयोग्यमेव । तथा एक एव दोषः स्थानभेदान्नानारूपाणि दर्शयति । तत्राऽप्यज्ञातसूत्रो वैद्यः कार्यं कर्तुं नाऽलम् । ज्ञातसूत्रस्तु स्थानभेदमनपेक्ष्यापि साधारणशैल्या यत्नं कर्तुमुद्युङ्क्ते, कार्यसाफल्यञ्च प्रायशो भवत्येव । कर्मजदोषविषये तदसाफल्ये न चिकित्सको विगर्हापात्रतामासादयति केवलचिकित्सया तन्निष्कृत्यसम्भवात् । तत्राऽपि प्रायश्चित्तोपवासदानादीनि कर्माणि कर्मविपाकाऽनुकूलं कर्तुं शास्त्रे प्रतिपादितम् । तेनाऽऽयुर्वेदशास्त्रं सर्वाऽवयवैः परिपूर्णं ऋषिभिः सङ्ग्रथितमित्याकलय्य दिव्यज्ञानसम्पदां ऋषीणां समस्तमपि जगदण्यास्ते । अयञ्च **त्रिदोषवादो** वेदेष्वपि बहुत्र स्थलेषु दरीदृश्यते स च त्रिधातुशब्देन समागच्छति यथा—" त्रि र्नो अश्विना दिव्यानि भेषजा त्रिः पार्थिवानि त्रिरुदत्तमद्भ्यः । ओमानं शंयो र्मम कायसूनवे त्रिधातुशर्म वहतं शुभस्पती ॥ ऋ. १।३४।६" हे अश्विना नः=अस्मभ्यं दिव्यानि द्युलोकवर्तीनि भेषजा औषधानि त्रि र्दत्तं तथा पार्थिवानि पृथिव्यामुत्पन्नानि औषधानि त्रि र्दत्तं अद्भ्य उ अन्तरिक्षसकाशादपि औषधानि त्रि र्दत्तं, आप इत्यन्तरिक्षनाम आपः पृथिवी भूरिति तन्नामसु पाठात् शंयोरेतन्नामकस्य बृहस्पतिपुत्रस्य ते शंयुं बार्हस्पत्यमब्रुवन्निति ब्राह्मणान्तरात्, तस्य सम्बन्धिनमोमानं सुखविशेषं ममकाय सूनवे मदीयाय पुत्राय दत्तं हे शुभस्पती शोभनस्यौषधजातस्य पालकौ युवां त्रिधातु=वातपित्तश्लेष्मधातुत्रयशमनविषयं सुखं वहतं प्रापयतम् ॥ (सायणभा.) ॥ हे शुभस्पती शोभनानामौषधानां पालकौ दातारौ वा अश्विनौ दिव्यानि दिवोऽन्तरिक्षात् आगतानि भेषजा=भेषजानि प्राणाऽपानसमानाऽऽख्यान् वायून् अथवा शरीरान्तःप्रवेशपालन-

निर्गमकर्तॄन् वायून् नः=अस्मभ्यं भेषजा=भेषजानि अभिलषितकार्यकर्तॄन् दत्तं परिणमयतम्। एवं "अग्निः पृथिवीस्थानो वायुर्वेन्द्रो वाऽन्तरिक्षस्थानः सूर्योद्युस्थान। निरुक्त०दै०७।५।२" इति वाक्यात् पार्थिवानि अग्निसम्बन्धीनि भेषजानि त्रिः पूर्ववत् कर्मत्रितयनिष्पादकानि अग्नेः कर्माणि नोऽस्मभ्यं दत्तं परिणमयतम्। एवं अद्भ्य उ अद्भ्यश्च त्रिः पूर्ववत्कर्मत्रितयनिर्वर्तकानि भेषजान्यस्मभ्यं दत्तं परिणमयतम्। शंयोः=रोगाणां शमनद्रावणकामस्य मम स्तुतिकर्तुः कायस्य शरीरस्य सूनवे सूर्यरूपाय शरीराऽधिष्ठातृजीवाय इन्द्रियाऽधिष्ठात्रे मनसे वा तदर्थमित्यर्थः। ओमानं कल्याणं अथ च त्रिधातुशर्म त्रयाणां वातपित्तकफानां धातुरूपाणां शरीरोपादानकारणानामिति, यावत्। शर्म=कल्याणं वहतम् प्रापयतम्। शारीरमानसभेदोभयरोगनिवृत्त्या अस्मभ्यं कल्याणं प्रयच्छतमिति पिण्डार्थः। सायणीयव्याख्याने तु पौराणिककथायाश्चिकित्सायाश्च साङ्कर्यमिति, तद्दर्शनार्थं पूर्वमेवाऽस्माभिरलेखि। परन्तु तत्राऽपि त्रिधातुशब्देन वातपित्तश्लेष्माण एव (सायणेनाऽपि) व्याख्याता इति समाना सम्मतिः।

तं युञ्जाथां मनसो यो जवीयान् त्रिवन्धुरो वृषणा यस्त्रिचक्रः।
येनोपयाथः सुकृतो दुरोणं त्रिधातुना पतथो वि र्न पर्णैः॥ ऋ. १।१८३।१

हे वृषणा=कामानां वर्षयितारौ युवां यो मनसो जवीयान् मनोवेगवान् यश्च त्रिवन्धुरः=मनोबुद्ध्यहङ्काराख्यमुख्यकरणत्रितयोपपन्नः पुनश्च यस्त्रिचक्रः=त्रीणि सत्त्वरजस्तमांसि चक्राणीव चक्राणि यत्र स त्रिचक्रः पुनश्च यः सुकृतः परमेश्वराऽतिरिक्तेन केनाऽपि शिल्पिना कोटिशो यत्नैरपि कर्तुमशक्यस्तं अनिर्वचनीयं देहं लिङ्गाख्यमिति यावत्। त्रिधातुना=त्रयः वातपित्तकफात्मानः धातव इव धातवो यस्मिन् सः त्रिधातुः वातपित्तकफैः निर्वर्तित इति यावत्। तेन त्रिधातुना स्थूलाख्येन देहेनेत्यर्थः। युञ्जायाम् अलग्नतया सम्बद्धं कुर्वाथाम्। अस्यैव संयोगस्य जीवनमिति सञ्ज्ञा, अनयो र्वियोग एव मरणं तथाहि—"यस्मात्समुपलभ्यन्ते लिङ्गान्येतानि जीवतः। न मृतस्याऽऽत्मलिङ्गानि तस्मादाहु र्महर्षयः॥ शरीरं हि गते तस्मिञ्छून्याऽऽगारमचेतनम्। पञ्चभूताऽवशेषत्वात्पञ्चत्वं गतमुच्यते॥ च. शा. १।७३–७४" कथम्भूतेन त्रिधातुना विः=पक्षी, पर्णैः स्वकीयपक्षैः कृत्वा दुरोणं=स्ववासस्थानम्, अथवा दूरश्च ऊनश्च, उपस्थितत्वाद्दूरादेवोनं लभ्यते समीपमिति यावत्, तयोः समाहार इत्यस्मिन्नर्थे दुरोणमिति निपातः—"छन्दसि दृष्टानुविधि—" रिति नियमात्। दूरदेशं समीपदेशं वा स्ववाञ्छितस्थलमिति यावत् न=इव उपयाथ उपगच्छथस्तादृशेन। स्थूलशरीरमन्तरा केवलेन लिङ्गेन कस्यचिदपि कार्यस्य निर्वृत्त्यभावात् तथाहि—"अशरीरः शरीरस्य कृतेऽन्यस्य महामुनिः। वसिष्ठस्तु महातेजा जगाम पितुरन्तिकम्॥ ५॥ सोऽभिवाद्य ततः पादौ देवदेवस्य धर्मवित्। पितामहमथोवाच वायुभूत इदं वचः॥ ६॥ भगवन्निमिशापेन विदेहत्वमुपागमम्। देवदेवमहादेव वायुभूतोऽहमण्डज॥ ७॥ सर्वेषां देहहीनानां महद्दुःखं भविष्यति। लुप्यन्ते सर्वकार्याणि हीनदेहस्य वै प्रभो॥ ८॥ देहस्याऽन्यस्य सद्भावे प्रसादं कर्तुमर्हसि॥ वा. रा. उ. ५६।५-९" येन स्थूलशरीरेण विना युवामपि किञ्चित्कार्यं कर्तुमशक्तौ तथा तेन रुग्णेन सताऽपि असमर्थौ भवतस्तर्हि मादृशानान्तु कथैव दूरेऽपास्ता। अतो रोगरहितेन मम स्थूलशरीरेण सार्कं लिङ्गशरीरस्य योगं कुर्वाथामिति प्रार्थना। एवं "त्रि र्नो अश्विना यजता दिवेदिवे परि त्रिधातुपृथिवीमशायतम्। तिस्रो नासत्या रथ्या परावत आत्मेव वातः स्वसराणि गच्छतम्॥ ऋ. १।३४।७॥ अग्निरस्मि जन्मना जातवेदा घृतं मे चक्षुरमृतं म आसन्। अर्कस्त्रिधातु रजसो विमानोऽजस्रो घर्मो हविरस्मि नाम॥ ऋ. ३।२६।७॥ त्रिरादिवः सवितर्वार्याणि दिवेदिव आसुव त्रि र्नो अह्नः। त्रिधातुराय आसुवा वसूनि भग त्रात धिषणे सातये धाः॥ ऋ. ३।५६।६॥ अहमपो अपिन्वमुक्षमाणा धारयं दिवं सदन ऋतस्य। ऋतेन पुत्रो अदिते ऋतावोत त्रिधातु

प्रथयद्भिर्भूम ॥ ऋ. ४।४२।४" इत्यादीत्यादिमन्त्रेषु त्रिधातुशब्देन वातपित्तश्लेष्माणः कथिताः सन्ति । एषां मन्त्राणां भाष्यन्तु विस्तरभिया न कृतम् । सायणेन तु सर्वत्रैव कर्मकाण्डपरतया व्याख्यातं तत्सहृदयैरेवगाह्यम् । त्रिधातुशब्दश्चाऽयं वेदे त्रिधातवः त्रिदोषाः त्रिमला इत्येतेषां पर्यायवाचको न्यस्तोऽस्ति । आयुर्वेदे पदेपदे दुष्टेष्वदुष्टेषु च त्रिषु धातुषु (वातपित्तश्लेष्मसु) त्रिदोषशब्दाऽऽगमनं प्रायो दृश्यते । तत्र दुष्यन्ते विकृतिमापद्यन्ते विरुद्धकालकर्मादिना इति दोषाः, अथवा दूषयन्ति स्वस्वक्षीणाधिकगुणादिभिरन्यानपीति दोषा इति व्युत्पत्तिद्वयमाश्रित्य स्वेतरधातुदूषकत्वात् स्वेतरैर्वा स्वस्य दोषभाक्त्वात् सत्त्वरजस्तमोरूपदोषत्रयपरिणामत्वादात्मनो दिव्यसामर्थ्यस्याऽवरोधकत्वाद् दोषा इति शब्देन व्यवहृताः सन्ति तथाहि—" भिन्ना दोषास्त्रयो गुणाः सु. उ. ६६।९" सत्त्वरजस्तमोरूपास्त्रयो गुणाः भिन्नाः=परिणामं प्राप्ता आयुर्वेदे दोषाख्यां लभन्ते इत्यर्थः । चरकेण तु एतज्जालविच्छेदनाय शरीरधातुषु मलत्वं प्रसादत्वञ्चेति भेदद्वयं स्वीकृतं यथा—" शरीरधातवः पुनर्द्विविधाः सङ्ग्रहेण मलभूताः प्रसादभूताश्च, तत्र मलभूतास्ते ये शरीरस्य बाधकराः स्युः, तद्यथा—शरीरच्छिद्रेषूपदेहाः पृथग्जन्मानो बहिर्मुखाः परिपक्वाश्च धातवः प्रकुपिताश्च वातपित्तश्लेष्माणो ये चाऽन्येऽपि केचिच्छरीरे तिष्ठन्तो भावाः शरीरस्योपघातायोपपद्यन्ते सर्वांस्तान्मले सम्प्रचक्ष्महे, इतरांस्तु प्रसादे, गुर्वादींश्च द्रवान्तान् गुणभेदेन, रसादींश्च शुक्रान्तान् द्रव्यभेदेन ॥ च. शा. ६।१५" अत्र वातपित्तश्लेष्मसु प्रकुपितत्वं वृद्धिह्रासाभ्यामेव बोद्धव्यम्, लोके प्रकुपितेष्वधिकोत्पातकरणं मौनमालम्बनञ्चेति प्रकारद्वयदर्शनात् । वातपित्तश्लेष्माणश्च किंस्वरूपा इत्यपेक्षायां शरीरोत्पत्तौ "खादयश्चेतनाषष्ठा धातवः पुरुषः स्मृतः । चेतनाधातुरप्येकः स्मृतः पुरुषसञ्ज्ञकः ॥ च. शा. १।१४" इत्यत्र पञ्चमहाभूतान्येव कारणत्वेनोक्तानि । पुनरपि " तत्र शरीरं नाम चेतनाऽधिष्ठानभूतं पञ्चभूतविकारसमुदायात्मकं समयोगवाहि, च. शा. ६।४" इत्यनेन पञ्चभूतानामेव शरीरोपादानकारणत्वं प्रत्यपादि, पञ्चमहाभूतविकारेषु च प्रसादत्वं मलत्वञ्चेति सङ्क्षेपेण द्वैविध्यं स्वीकृतम् तच्च द्वैविध्यं धातुत्वेनैव गृह्यते, शरीरे धात्वतिरिक्तपदार्थाऽभावात् । धातुषु यदा शरीरपोषकता तदा प्रसादत्वं यदा च तद्बाधकत्वं तदा मलत्वमित्येतदध्यायस्यैव पञ्चदशसूत्रेण स्पष्टतया प्रतिपादितम् । पञ्चभूतेष्वेव कक्षात्रयं वातपित्तकफा इति स्वीकृतमिति प्रतिभाति । प्रायशः स्वसंहितायां (चरके) रोगाणां व्यस्ताः समस्ता वा वातपित्तश्लेष्माण एव हेतुतया उपन्यस्ताः । चिकित्सायामपि "स्वाद्वम्ललवणा वायुं कषायस्वादुतिक्तकाः । जयन्ति पित्तं श्लेष्माणं कषायकटुतिक्तकाः ॥ च. सू. १।६५, इत्यनेन त एव (वातपित्तश्लेष्माणः) अधिकृताः सन्ति । किञ्च " अतस्त्रिविधविकल्पा व्याधयः प्रादुर्भवन्ति आग्नेयसौम्यवायव्याः । च. नि. १।४" इत्यनेनाऽपि वातपित्तश्लेष्माण एव स्तुताः । एतदुत्तरं " द्विविधाश्चाऽपरे राजसास्तामसाश्च" इत्यनेन मानसव्याधिकारणं कथयता पारिशेष्यादाग्नेयसौम्यवायव्यशब्दै र्वातपित्तश्लेष्माणः शारीररोगाऽभिनिर्वर्तयितारः सन्तीति निर्विवादतया समायातम् । ते च (वातपित्तश्लेष्माणः) यदा साम्याऽऽपन्नास्तदा शरीराऽऽरोग्यकराः, वैषम्याऽऽपन्नाः पुनः क्लेशाय मरणाय वा सम्पद्यन्ते तथाहि—"यदा ह्यस्मिन् शरीरे धातवो वैषम्यमापद्यन्ते तदा क्लेशं विनाशं वा प्राप्नोति । च. शा. ६।४" वैषम्यनिवृत्तिप्रकारश्च समानगुणैराहारविहारैरभ्यस्यमानै र्दर्शितः । यथा " धातवः पुनः शारीराः समानगुणैः समानगुणभूयिष्ठै र्वाऽप्याहारविहारैरभ्यस्यमानै र्वृद्धिं प्राप्नुवन्ति ह्रासन्तु विपरीतगुणै र्विपरीतगुणभूयिष्ठै र्वाऽप्यभ्यस्यमानैः ॥ ९ ॥ तत्रेमे शरीरधातुगुणाः सङ्ख्यासामर्थ्यकराः, तद्यथा—गुरुलघुशीतोष्णस्निग्धरूक्षमन्दतीक्ष्णस्थिरसरमृदुकठिनविशदपिच्छिलश्लक्ष्णखरसूक्ष्मस्थूलसान्द्रद्रवाः, तेषु ये गुरवस्ते गुरुभिराहारगुणैरभ्यस्यमानैराप्याय्यन्ते लघवश्च ह्रसन्ति, लघवस्तु लघुभिराप्याय्यन्ते गुरवश्च ह्रसन्ति, एवमेव सर्वधातुगुणानां सामान्ययोगाद्वृद्धि र्विपर्ययाद्ध्रासः, एतस्मान्मांसमाप्याय्यते मांसेन भूयस्तरमन्येभ्यः

शरीरधातुभ्यः, यथा लोहितं लोहितेन, मेदो मेदसा, वसा वसया, अस्थि तरुणाऽस्थ्ना, मज्जा मज्ज्ञा, शुक्रं शुक्रेण, गर्भस्त्वामगर्भेण ॥ च. शा. ६।९—१० " एते गुर्वादयो गुणाः वातपित्तश्लेष्मणामेव निर्दिष्टाः। अत्रेदं रहस्यम् यदा समष्टिरूपतया शरीरधातवो निर्दिश्यन्ते तदा वातपित्तश्लेष्माण एव प्रत्युपतिष्ठन्ते यदा तु व्यष्टिरूपतया वक्तुमिच्छाऽस्ति तदा रसरक्तादिरूपेण गणना क्रियते तेन प्रकरणाऽऽशयं दृष्ट्वा व्यवस्था करणीया। अवस्थाभेदेन वातपित्तश्लेष्माणः सर्वेषां (शरीरधातूनां) उत्पत्तिस्थितिविनाशेषु कारणानि तथाहि— " तेषां सर्वेषामेव वातपित्तश्लेष्माणो दुष्टा दूषयितारो भवन्ति दोषस्वभावात्। च. शा. ६।१६ " अर्थापत्तिन्यायेनाऽदुष्टाः पोषयितार इति लभ्यते। ननु वातादीनां धातुत्वं स्पष्टतया न कुत्राऽप्युक्तमिति तु न उपरिनिर्दिष्टसूत्रशेषे तत्पष्टतया कथनात्तथा—" शरीरधातूनां प्रकृतिभूतानां तु खलु वातादीनां फलमारोग्यं तस्मादेषां प्रकृतिभावे प्रयतितव्यं बुद्धिमद्भिरिति ॥ च. शा. ६।१६ " नन्वेवं तर्हि " तत्राऽऽहारप्रसादाख्यो रसः किट्टञ्च मलाख्यमभिनिर्वर्तते। किट्टात्स्वेदमूत्रपुरीषवातपित्तश्लेष्माणः कर्णाऽक्षिनासिकाऽऽस्यलोमकूपप्रजननमलाः केशश्मश्रुलोमनखादयश्चाऽवयवाः पुष्यन्ति॥ च. सू. २८।४ " इति कथमुपपद्येत। अत्र मलकोष्ठ्यां वातपित्तश्लेष्मणां परिगणनं विधाय किट्टादेव च तत्पोषणमुक्तमिति सत्यं, अत्र सूक्ष्मस्वरूपविचारमकृत्वा स्थूलतया प्रत्यक्षतया दृश्यमानवातपित्तश्लेष्माणोऽभिप्रेताः यथा—" अन्नस्य भुक्तमात्रस्य षड्रसस्य प्रपाकतः। मधुराद्यात् कफो भावात्फेनभूत उदीर्यते ॥ परन्तु पच्यमानस्य विदग्धस्याम्लभावतः। आशयाच्च्यवमानस्य पित्तमच्छमुदीर्यते ॥ पक्वाशयन्तु प्राप्तस्य शोष्यमाणस्य वह्निना। परिपिण्डितपक्वस्य वायुः स्यात्कटुभावतः ॥ च. चि. १५।९—११ " अत्र निर्दिष्टाः कफपित्तवायवः स्थूलस्वरूपा एव सन्ति। " किट्टमन्नस्य विण्मूत्रं रसस्य तु कफोऽसृजः। पित्तं मांसस्य खमलाः मलः स्वेदस्तु मेदसः ॥ च. चि. १५।१८" अनेन रसादः सर्वोऽनुगतः श्वेतपिच्छिलगुरुत्वादि गुणविशिष्टः पदार्थो निर्वर्तते यस्य चाऽधिक्यात्कासश्वासादयः समुपपद्यन्ते सः कफत्वेनाऽभिप्रेतः। रक्तांशत् यकृता पृथक्कृत्य क्लोम्नि विसृज्यते तस्य रक्तात्पृथग्भावाद् रक्तमलत्वेन कथनाच्च तदेव पित्तत्वेनाभिप्रेतम्। " परिपिण्डितपक्वस्य वायुः स्यात्कटुभावतः" इत्यत्राऽपि भुक्तादि परिपाकाऽवसाने योऽयं वायुरुत्पद्य पायुद्वारा बहि निःसरति स एवाऽभिप्रेतः। एते त्रयोऽपि मलत्वे एव पर्यवस्यन्ति तेषां पोषणमपि यत्किट्टादुक्तं तदपि समीचीनमेवाऽस्ति परन्त्वनेन एतद्वाचका एव वातपित्तकफा इति नाऽध्यवसितुं शक्यम्। यतः " वायुस्तन्त्रयन्त्रधरः, प्राणोदानसमानव्यानाऽपानात्मा, प्रवर्तकश्चेष्टानामुच्चावचानां, नियन्ता प्रणेता च मनसः, सर्वेन्द्रियाणामुद्योजकः, सर्वेन्द्रियार्थानामभिवोढा, सर्वशरीरधातुव्यूहकरः, सन्धानकरः शरीरस्य, प्रवर्तको वाचः, प्रकृतिः स्पर्शशब्दयोः, श्रोत्रस्पर्शनयोर्मूलं, हर्षोत्साहयो योनिः, समीरणोऽग्नेः, दोषसंशोषणः क्षेप्ता बहि मलानां, स्थूलाणुस्रोतसां भेत्ता, कर्ता गर्भाकृतीनां, आयुषोऽनुवृत्तिप्रत्ययभूतो भवत्यकुपितः। कुपितस्तु खलु शरीरे शरीरं नानाविधै विकारैरुपतपति बलवर्णसुखायुषामुपघाताय, मनो व्याहर्षयति, सर्वेन्द्रियाण्युपहन्ति, विनिहन्ति गर्भान् विकृतिमापादयत्यतिकालं धारयति, भयशोकमोहदैन्याऽतिप्रलापाञ्जनयति, प्राणांश्चोपरुणद्धि ॥ च. सू. १२।८ " "अग्निरेव शरीरे पित्तान्तर्गतः कुपिताऽकुपितः शुभाऽशुभानि करोति, तद्यथा—पक्तिमपक्तिं दर्शनमदर्शनं मात्रामात्रत्वमूष्मणः प्रकृतिविकृतिवर्णौ शौर्यं भयं क्रोधं हर्षं मोहं प्रसादमित्येवमादीनि चाऽपराणि द्वन्द्वानीति ॥ ११ ॥ तच्छ्रुत्वा मारीचिवचः काप्य उवाच—सोम एव शरीरे श्लेष्मान्तर्गतः कुपिताऽकुपितः शुभाऽशुभानि करोति तद्यथा—दार्ढ्यं शैथिल्यमुपचयं कार्श्यमुत्साहमालस्यं वृषतां क्लीवतां ज्ञानमज्ञानं बुद्धिं मोहमेवमादीनि चाऽपराणि द्वन्द्वानीति ॥ १२ ॥ तच्छ्रुत्वा काप्यवचो भगवान् पुनर्वसुरात्रेय उवाच—सर्व एव भवन्तः

म्यगाहुरन्यत्रैकान्तिकवचनात् । सर्व एव खलु वातपित्तश्लेष्माणः प्रकृतिभूताः पुरुषमव्यापन्नेन्द्रियं बलवर्णसुखोपपन्नमायुषा महतोपपादयन्ति सम्यगेवाचरिता धर्मार्थकामा इव निःश्रेयसेन महतोपपादयन्ति पुरुषमिह चामुष्मिश्च लोके, विकृतास्त्वेनं महता विपर्ययेणोपपादयन्ति ऋतवस्त्रय इव विकृतिमापन्ना लोकमशुभेनोपघातकाले इति ॥ १३ ॥ तदृषयः सर्वे एवाऽनुमेनिरे वचनमात्रेयस्य भगवतोऽभिननन्दुश्चेति ॥ च. सू. १२।११–१४ " इत्यादिभिर्वाक्यैः वातपित्तकफानां स्वरूपनिर्णयार्थमेव सम्मिलिता आत्रेयप्रमुखा महर्षयो महान्तं विवादं कृत्वा यद्वातपित्तकफानानिर्णिन्यु स्तत् खपुष्पायितमेव स्यात् अतो सुश्रुतीय-सिद्धान्तेन समान एवाऽऽत्रेयसिद्धान्तोऽपि । तस्मात्स्थूलसूक्ष्मभेदं सम्यगाकलय्य यथाऽऽगतस्थलं निर्णयः कर्तव्यः । रजोगुणात्मनि वायौ वात इति सत्त्वगुणात्मनि पित्तमिति तमोगुणात्मनि श्लेष्मेत्यायुर्वेदसिद्धान्ते व्यवहारोऽस्ति । तत्राऽपि शारीरबाह्यवातयोर्वात इति समानो व्यवहारः । शरीरान्तः प्रविष्टानामाग्नेयपदार्था-नामन्तरग्निसंयोगाद्योऽयमग्न्याधारपरिणामस्तत्र पित्तमिति जलपृथिव्यात्मनां पदार्थानां शारीराऽग्निना परि-णतानां श्लेष्मेति व्यवहारः । ते च पदार्थाः सूक्ष्मा वा स्युः स्थूला वा स्युः तत्स्थाः क्रियागुणाश्च वा स्युः सर्वेषामपि ग्रहणम् तात्स्थ्यात्ताच्छब्द्यमिति न्यायात् । शरीरान्तर्वर्तिलिङ्गशरीरात्मव्यतिरिक्तं यत्किञ्चिदपि वस्तुजातमस्ति तत्सर्वमपि वातपित्तश्लेष्मात्मकमेवाऽस्ति । अत एव परमकारुणिकेन भगवता धन्वन्तरिणेत्थं प्रतिज्ञातं—" सर्वेषां व्याधीनां वातपित्तश्लेष्माण एव मूलं, तल्लिङ्गत्वाद् दृष्टफलत्वादागमाच्च । यथाहि कृत्स्नं विकारजातं विश्वरूपेण अवस्थितं सत्त्वरजस्तमांसि न व्यतिरिच्यन्ते एवमेव कृत्स्नं विकारजातं विश्वरूपेण अवस्थितमव्यतिरिच्य वात-पित्तश्लेष्माणो वर्तन्ते । दोषधातुमलसंसर्गादायतनविशेषात् निमित्ततश्चैषां विकल्पः । दोषदूषितेष्वत्यर्थं धातुषु सञ्ज्ञा क्रियते रसजोऽयं, शोणितजोऽयं, मांसजोऽयं, मेदोजोऽयं, अस्थिजोऽयं, मज्जजोऽयं, शुक्रजोऽयं व्याधि-रिति ॥ सु. सू. २४।८" इति । ये त्वायुर्वेदसिद्धान्ताऽनभिज्ञास्ते सर्वमपि स्थावरजङ्गमात्मकं जगत् वातपित्त-श्लेष्मात्मकमिति वदन्ति तन्महद्धास्यास्पदम्,—प्राणवत्सृष्टिमुक्त्वा तदितरसृष्टौ तद्व्यवहाराऽदर्शनात् । न च वाच्य-मुक्तसूत्रमेव प्रमाणं तत्र यथा समस्तविकारजातं सत्त्वरजस्तमांसि मुक्त्वा पृथङ् न लभ्यते तथा वातपित्तश्लेष्मणो मुक्त्वा पृथङ्न भवतीत्युभयत्र साम्यदर्शनादिति, तत्रैकत्र विकारजातेन महदादीनां समुदायोऽभिप्रेतो द्वितीयस्थाने तु विकारजातेन शरीरीयरसादिधातवो विवक्षिताः सन्तीति महदन्तरत्वात् तेन समस्तं स्थावरजङ्गमात्मकं विश्वं यथा महदादिविकारजातेन व्याप्तमस्ति ते च (महदादयश्च) सत्त्वरजस्तमोभिः पृथक्स्वरूपा न सन्ति तथा प्राणिशरीरं रसाद्यन्नजातेन विकारसमूहेन व्याप्तमस्ति ते च (रसादयोऽन्नविकाराः) वातपित्तश्लेष्मभिः पृथक्-स्वरूपा न सन्ति उपादानात्कार्यस्याऽपृथग्भावात् । प्राणिशरीराऽग्निसंयोगेन जायमानाऽग्निपरिणामविशे-षस्य पित्तत्वात्पृथिवीपरिणामस्य च श्लेष्मत्वात् तस्य च प्राण्यतिरिक्तस्वरूपेऽविद्यमानत्वात् । प्राण्यति-रिक्तस्वरूपवर्णने तु वायव्यः आग्नेयः जलीयः पार्थिव इत्येव व्यवहारः । शरीरसम्बन्धेन वायवीयादिपदार्थानां कः परिणामो भविष्यतीति विचारे आनुकूल्यप्रातिकूल्योदासीनताः प्रत्युपतिष्ठन्ते, तेषां सर्वेषां विचारस्यात्राऽ-नवसरः परन्तु प्रातिकूल्ये विचारस्याऽवश्यताऽस्त्यतस्तत्रदिङ्मात्रमुदाहरामः—यथा—" हिक्काश्वासकरं तूर्णं पित्तश्लेष्मलमाविकम् । च. सू. २७।२२ ॥ सुरासमण्डारूक्षोष्णा यवानां वातपित्तला । गुर्वी जीर्यति विष्टभ्य श्लेष्मला तु मधूलिका ॥ च. सू. २७।१८८ ॥ वातपित्तहरं वृष्यमुष्णं तिक्तमवा-तलम् । पटोलं कटुकं पाके वृष्यं रोचनदीपनम् ॥ सु. सू. ४६।२१८ ॥ अत्यर्थं वातलं ग्राहि जाम्बवं कफपित्तजित् ॥ सु. सू. ४६।१६६ ॥ पित्ताऽनिलकरं बालं पित्तलं बद्धकेसरम् । सु. सू. ४६।१५२ ॥ पाटलाः श्लेष्मजननाः शष्कुल्यः कफपित्तलाः ॥ सु. सू. ४६।४०१ " एवमेवमाहार-

गुणवर्णने द्रव्यगुणवर्णने च शरीरसम्बन्धे यद्यद् यस्य यस्य प्रतिकूलतया वर्धकं तत्र तत्र वातलं पित्तलं श्लेष्मलमिति शब्दाः प्रयुज्यन्ते । यदि चाऽग्नेयादिशब्दानां पर्याया वातपित्तकफा भवेयुस्तर्हि पित्तलादिशब्दप्रयोगा न सङ्गच्छन्त एव, यथा शरीरवर्णने वातः पित्तं श्लेष्मा इत्येव प्रयोगाः समागच्छन्ति अतः आयुर्वेदीयसिद्धान्ते भूतविशेषपरिणामविशेषवाचका एवैते शब्दा न पुनः सामान्येन सर्वं जगद् वातपित्तश्लेष्ममयमिति वक्तुं कथमपि युज्यते । निघण्टुषु तु यद्वातलं पित्तलं श्लेष्मलमित्यादिद्रव्यगुणाख्यापकत्वेन पदे पदे समागच्छति तत्तु समीचीनमेव । तस्माद् यद्यत्पदार्थसेवनेन शरीरान्तर्वर्तिवातीयव्यापारः प्रतिकूलतया परिणमति तत्र तत्र वातलत्वं, विरुद्धवातस्यकरणात् । एवं यद्यत्पदार्थसेवनेन शरीरान्तर्वर्त्याग्नेयव्यापारः प्रतिकूलतया परिणमति तत्र तत्र पित्तलत्वं जठराऽग्निव्यापारस्य शरीरप्रातिकूल्ये योजनात् । एवं यद्यत्पदार्थसेवनेन शरीरान्तर्वर्ती जलपार्थिवव्यापारः प्रतिकूलतया परिणमति तत्रतत्र श्लेष्मलत्वं, शरीरीयसौम्यगुणानां प्रातिकूल्येऽवस्थापनात् । वातादि क्षये तु वातलादिपदार्थसेवनमेवोपशेते, तत्र तेषां प्रातिकूल्यं न भवति परन्तु वातलादिव्यवहारस्तु अव्याहत एवाऽऽस्त इति रहस्यम् । एवञ्च—" सर्वशरीरचरास्तु वातपित्तश्लेष्माणो हि सर्वस्मिञ्छरीरे कुपिताऽकुपिताः शुभाऽशुभानि कुर्वन्ति । प्रकृतिभूताः शुभान्युपचयबलवर्णप्रसादादीनि, पुन र्विकृतिमापन्नानि विकारसञ्ज्ञकानि । च. सू. २०।९ ॥ लोके वाय्वर्कसोमानां दुर्विज्ञेया यथा गतिः । तथा शरीर वातस्य पित्तस्य च कफस्य च ॥ च. चि. २८।२४४ ॥ त्यागाद्विषमहेतूनां समानाञ्चोपसेवनात् । विषमा नाऽनुबध्नन्ति जायन्ते धातवः समाः ॥ कथं शरीरे धातूनां वैषम्यं न भवेदिति ॥ समानाञ्चाऽनुबन्धः स्यादित्यर्थं क्रियते क्रिया ॥ च. सू० १६।३५-३६ ॥ नाऽस्ति रोगो विना दोषै र्यस्मात्तस्माद्विचक्षणः । अनुक्तमपि दोषाणां लिङ्गैर्व्याधिमुपाचरेत् ॥ सु. सू. ३५।१९ ॥ एवमुत्पन्नस्त्वचि दोषस्तत्रतत्र च परिवृद्धिं प्राप्याऽप्रतिक्रियमाणोऽभ्यन्तरं प्रतिपद्य धातूनभिदूषयति ॥ सु. नि. ५।३ ॥ दोषाः क्षीणा बृंहयितव्याः, कुपिताः प्रशमयितव्याः, वृद्धा निर्हर्तव्याः, समाः परिपाल्या इति सिद्धान्तः ॥ सु. चि. ३३।३ ॥ यस्मिन् यस्मिन् ऋतौ ये ये दोषाः कुप्यन्ति देहिनाम् । तस्मिंस्तस्मिन् प्रदातव्या रसास्ते ते विजानता ॥ सु. चि. २४।१०२ ॥" इत्यादीनि सर्वाण्येव वाक्यानि सङ्गच्छन्ते । इत्थञ्च दोषाणां वृद्धौ तद्वर्धकपदार्थसेवनेन महती व्यापत् । साधारण्ये साधारणा, क्षीणतायान्तु वर्द्धनं गुणकरमेव सम्पद्यते समीहितकार्यकरणादित्यलमतिविस्तरेण ॥

अतोऽग्रे शारीराऽवयवबोधकं कोष्ठकं विन्यस्यते । तत्र दुर्दैववडवाऽग्निज्वालयोर्वरिता या या वेदीयसंहिता उपलब्धास्ताभ्यो यानियानि शरीराऽवयवनामान्यासादितानि तानितानि समाहृत्यैकत्र स्थाने उद्ध्रियन्ते । तत्र सायणभाष्यात्प्राचीनमेकमपि भाष्यं नाऽऽसादितम् । सायणस्य केवलकर्मकाण्डनिष्ठतया शारीरविषये वाक्यानि न सन्देहाऽपाकरणसमर्थानि सन्ति तद्दिग्दर्शनं वैदिकटिप्पण्यां स्थलेस्थलेऽस्माभिः कृतमस्ति । वैदिकशब्दार्थनिर्णये शर्मण्य (जर्मन) देशनिवासिना " रौथ " नामाऽलङ्कुर्वता विदुषा बहु प्रायाति परन्त्ववलम्बनाऽभावात् कुशकाशाऽवलम्बनन्यायेनाऽगत्या तेनाऽपि सायणभाष्यमेवाऽलम्बि। तेन तदीयकोषेऽपि यथाऽवस्थित एव भ्रमोऽवशिष्टः । " हार्नले "महोदयैरप्यायुर्वेदीयशारीरमुद्धर्तुकामैरपि स एव पन्था अवलम्बितः । तत्पश्चात्तनैस्तु अन्धलग्नन्यायेन महती भ्रमगुहा निर्मिता, यथा क्लोमादिवर्णनेऽस्माभिः प्रकटीकृतम् । एतद्भ्रमनिराकरणायाऽस्माभिरयं श्रमः स्वीकृतोऽस्ति । तत्र शान्तमनसा हंससदृशा भूत्वा सम्पश्यन्त्विमं सन्दर्भमिति विनीता प्रार्थना ।

अथाऽऽर्षशारीराऽवयवाः

संख्याक्रमः	वैदिक	शतपथ	सुश्रुत
१	केशाः अ० ६।९।१	केशाः १२।९।१।६	मूर्धजाः शा. ३।७, केशाः शा. ३।३३
२	शिरः अ. २।२५।२, शीर्षम् अ. ४।३४।१ मूर्धा अ. १६।३।१-२	शिरः (त्वगस्थिमस्तिष्काः) १२।२।४।९ मूर्धा १४।७।२।३	शिरः शा. ३।१८, मस्तकम् शा. ५।४, मूर्धा शा. ७।२०
३	कपालानि अ. ९।१३।२२	कपालानि ३।४।१।१५	शिरः कपालानि शा. ५।२६
४	मस्तिष्कम् अ. २।३३।१ देवकोशः अ. १०।२।२७ हिरण्ययःकोशःअ. १२।२।३१	मस्तिष्कः ३।८।३।११	मस्तिष्कम् सू. ३५।४
५	ललाटम् अ. ९।१२।१	ललाटम् ३।८।१।५	ललाटम् शा. ५।४
६	भ्रुवौ ऋ० ४।३८।७	भ्रुवौ १२।९।१।५	भ्रुवौ शा. ६।२८
७	नेत्रम् अ. १०।१०।२२, अक्षिणी अ. २।३३।१, चक्षणी अ. १०।२।६ चक्षुः अ. २।३५।५, अम्बके वा. सं. ३।६०	चक्षुषी १२।९।१।५ अक्ष्णा ३।८।३।२७	नेत्रे उ. १।१३, अक्षिणी उ. १।१७, लोचने उ. १।१४, नयने शा. ४।६८ प्रेक्षणे सू. ३५।४
८	पक्ष्माणि वा. सं. २५।१ (उपरितनपक्ष्माणि पार्येक्षवः-अधस्तनानि अवार्येक्षवः)	पक्ष्माणि १२।९।१।५	अक्षिपक्ष्माणि शा. ३।१४ (ऊर्ध्वाऽधोभागेन प्रत्यक्षि पक्ष्मद्वयम्)
९	शुक्रम् वा. सं. १९।८९	अक्षिशुक्लम् १२।२।४।१५	श्वेतभागः उ. १।१५
१०	असितम् वा. सं. १९।८९	अक्षिकृष्णम् १२।२।४।१५	कृष्णभागः उ. १।१५
११	× × ×	अक्षिमण्डलं १२।२।४।१५	दृष्टिमण्डलम् उ. १।१५
१२	कनीनिका अ. ४।२०।३ कनीनकम् वा. सं. ४।३२	कनीनका १२।८।२।२६	दृष्टिः उ. ७।४
१३	श्रुतिः वा. सं. १८।१, कर्णौ अ. २।३३।१	श्रोत्रे १२।९।१।५, कर्णौ १०।१।१।८	कर्णौ सू. ५।४
१४	नासिके अ. १०।२।६	नासिके १२।२।४।१५	नासा शा. ५।४
१५	आस्यम् अ. ६।५६।३, मुखम् अ. १०।२।६	मुखम् १२।२।४।१६	मुखम् शा. १०।१२
१६	ओष्ठौ वा. सं. २५।२	ओष्ठौ १०।१।१।८	ओष्ठौ शा. ४।६८
१७	सृक्का अ. ९।१५।६	× ×	सृक्कण्यौ उ. ६०।१३
१८	दन्ताः अ. ५।१८।८	दन्ताः १०।१।१।८	दन्ताः शा. ५।१९

संख्याक्रमः	वैदिक	शतपथ	सुश्रुत
१९	दंष्ट्राः अ. ११।८।२२	× ×	दंष्ट्राः क. ३।४
२०	दन्तमूलानि वा. सं. २५।१	× ×	दन्तमूलानि नि. १६।१३
२१	तालु वा. सं. २५।१	× ×	तालु शा. ४।६८
२२	जिह्वा अ. २।३३।१	जिह्वा १२।९।१।३	जिह्वा शा. ४।६८
२३	जिह्वाऽग्रम् अ. १।३४।२	× ×	जिह्वाऽग्रम् नि. १६।३९
२४	जिह्वामूलम् अ. १।३४।२	× ×	जिह्वामूलम् सू. २१।७
२५	श्मश्रूणि अ. ५।१९।१४	श्मश्रूणि (सिंहलोमानि) १२।९।२।६)	श्मश्रवः शा. ३।३३
२६	हनू अ. १०।२।८	× ×	हनू चि. ४०।५५
२७	चुबुकम् अ. २।३३।१	× ×	चिबुकम् शा. ५।४
२८	ग्रीवाः अ. २।३३।२	ग्रीवाः (कल्कराणि १४-वीर्य१५)१२।२।४।१०	ग्रीवा शा. ५।४
२९	अधरकण्ठः वा. सं. २५।२	× ×	कण्ठः नि. १६।४६
३०	मन्यः (अर्धा) अ. २।१२।७ मन्याः अ. ६।२५।१ !	× ×	मन्ये शा. ६।२८
३१	उष्णिहाः अ. २।३३।२	× ×	× ×
३२	कृकाटम् अ. ९।१२।१ कृकाटिका अ. १०।२।८		कृकाटिके शा. ६।२८
३३	शुष्ककण्ठः वा. सं. २५।२		× ×

मध्यशरीरावयवाः

३४	स्कन्धौ अ. १०।२।४	× ×	स्कन्धौ शा. ६।२७
३५	अंसौ अ. १०।२।५	अंसौ ३।८।३।२७	अंसौ (म.) शा. ६।२७
३६	कफोडौ अ. १०।२।४	× ×	अंसफलके (म.) शा. ६।२
३७	बाहू अ. २।३३।२. हस्तौ अ. ६।८१।१	दोषी ३।८।३।१७. बाहू १२।२।२।७	बाहू शा. ६।२५
३८	कक्षे अ. ६।१२७।२	निकक्षौ १२।९।१।६	कक्षौ शा. ५।२५
३९	अरत्नी वा. सं. २०।८	अरत्नी ४।२।१।१९	अरत्नी. शा. ८।८
४०	× ×	अङ्गुष्ठौ १०।१।१।८,— प्रतिष्ठे १२।२।४।६	अङ्गुष्ठौ सू. ३५।१२
४१	अङ्गुल्यः अ. २।३३।६	अङ्गुल्य. ३।८।४।१	अङ्गुल्यः सू. ३५।१२
४२	× ×	शिरः (कण्डराः) १२।२।४।५	मणिबन्धौ सू. ३५।१२
४३	× ×	वंक्षि १२।२।४।४	मध्यमा सू. ३५।१२

संख्याक्रमः	वैदिक	शतपथ	सुश्रुत
४४	× ×	वर्षीयसी १२।२।४।३	अनामिका सू. ३५।१२
४५	× ×	ह्रसिष्ठा १२।२।४।२-	कनिष्ठिका सू. ३५।१२
४६	नखानि अ. २।३३।६	नखानि १२।१।४।३	नखाः शा. ३।३३
		(कोष्ठगता थाह्याऽवयवाः)	
४७	कुसिन्धम अ. १०।२।३ कबन्धम् अ. १०।२।३	× × × ×	मध्यशरीरम् शा. ३।३२
४८	वक्षः ऋ. १।९२।४ उरः अ. १०।२।४	वक्षः ३।८।३।१७ उरः (जत्रवः ८+८ अवयव्युरः १=१७) १२।२।४।११	वक्षः शा. ५।३७ उरः सू. ३५।१२
४९	जत्रवः वा. सं. २५।८, अ. ११।३।१०	जत्रवः १२।२।४।११ (सुश्रुताद्भिन्नार्थकाः)	जत्रुणी शा. ६।७
५०	पक्षतिः वा. सं. २५।४, पर्शवः अ. ११।३।१२	पर्शवः १२।२।४।१३	पर्शुकाः चि. ३।२९
५१	पार्श्वौ अः ४।१४।७, क्रोडः अ. ९।१२।५	पार्श्वौ (पर्शवः १३+१३ अवयवी १=२७) १२।२।४।१३	पार्श्वौ शा. ५।४
५२	स्तनौ अ. ९।१।७	स्तनौ १४।९।४।२८	स्तनौ शा. ५।४
५३	वर्जह्ये अ. ११।१०।१४	× ×	चूचुकौ शा. ६।२६
५४	उदरम् अ. २।३३।४, जठरम् अ. २०।३३।१	उदरम् (कुन्तापानि २० अवयव्युदरम् १=२१) १२।२।४।१२	उदरम् शा. ५।४
५५	कुक्षी (उदरपार्श्वौ) अ. २०।४।२	× ×	कुक्षी शा. ३।७
५६	नाभिः अ. २।३३।४	नाभिः १२।९।१।३	नाभिः शा. ६।२६
५७	जघनम् अ. १४।१।३६	जघनम् ३।५।३।६	जघनम् शा. ३।८
५८	पृष्ठम् वा. सं. ९।२१	पृष्ठम् ५।२।१।४	पृष्ठम् शा. ५।४
५९	अनूकम् अ. ४।१४।८ अनूक्यम् अ. २।३३।२	अनूकम् (करूकराणि३२ अवयवी १=३३) १२।२।४।१४	पृष्ठवंशः शा. ६।२७
६०	करूकराणि अ.११।११।८	करूकराणि १२।२।४।१४	पृष्ठाऽस्थीनि शा. ५।१९
६१	पृष्टयः अ. ९।१२।६	× ×	× ×
६२	श्रोणी अ. १०।२।३	श्रोणी ३।८।३।१९	श्रोणी शा. ५।४
६३	भासदम् अ. २।३३।५	× ×	स्फिचौ शा. ५।४

(अन्तःकोष्ठाऽवयवाः)

संख्याक्रमः	वैदिक	शतपथ	सुश्रुत
६४	प्लाशिः अ. २।३३।४, अ. १०।९।१७ अनूधुजौ अ. ९।४।१२ चम्वौ अ. ९।१५।१२	प्लाशिः १२।९।१।३	फुप्फुसौ शा. ४।२५
६५	हृदयम् अ. २।३३।३ हार्दिम् अ. १८।४।५८	हृदयम् १२।९।१।२	हृदयम् शा. ३।१८
६६	× ×	हृदयाग्रम् ३।८।३।१५	× ×
६७	× ×	हृदयमध्यम् ३।८।३।१५	× ×
६८	क्लोम अ. २।३३।३	क्लोमा अ. १२।९।१।२	क्लोम शा. ४।३१
६९	यकृत् . २।३३।३	यकृत् १२।९।१।३, तनिमा ३।८।३।१७	यकृत् शा. ५।७
७०	प्लीहा अ. २।३३।३	प्लीहा १२।९।१।३	प्लीहा शा. ५।७
७१	पाजस्यम् अ. ९।१२।५	× ×	आमाशयः शा. ५।८
७२	पित्तम् वा. सं. १९।८५ हलीक्ष्णम् अ. २।३३।३	× ×	पित्ताशयः शा. ५।८
७३	आन्त्राणि अ. १।३।६ पुरीतत् वा. सं. २५।८	आन्त्राणि १२।९।१।३	अन्त्राणि शा. ४।१७
७४	आन्त्रम् अ. १०।९।१६	× ×	स्थूलान्त्रम् नि. २।५
७५	वनिष्ठुः अ. २।३३।४	वनिष्ठुः १२।९।१।३	उण्डुकः शा. ४।२५
७६	गुदा अ. २।३३।४	पायुः १२।९।१।३, गुदा १२।९।३।३	गुदम् शा. ६।२६
७७	× ×	गुदम् त्रिविधम् (स्थविमा, मध्यमा, अणिमा) ३।८।३।१८	गुदवलित्रयम् (प्रवाहणी, विसर्जनी, संवरणी) नि. २।५
७८	वृक्कौ अ. ९।१२।१३	वृक्कौ ३।८।३।१७	वृक्कौ शा. ५।४
७९	गवीन्यौ अ. १।३।६ मतस्ने अ. २।३३।३	मतस्ने १२।९।१।३	मूत्रनाले उ. ५८।१५
८०	वस्तिः अ. १।३।७, धनुः अ. १।१७।४	वस्तिः १२।९।१।३	वस्तिः शा. ६।२६
८१	वस्तिविलम् अ. १।३।८	× ×	वस्तिद्वारम् शा. ४।२२
८२	मेहनम् अ. १।३।६, शेपः अ. ४।४।१, फाटृत् अ. २०।१२६।१६ रोमशम् अ. २०।१२६।१६	उपस्थम् १२।९।१।६, मेढ्रम् ३।८।२।६, शिश्नानि त्रीणि(वर्षिष्ठम्, अवान्यम्, अमृग्रम्) ११।१।६।३१	मेढ्रम् शा. ७।७

संख्याक्रमः	वैदिक	शतपथ	सुश्रुत
८३	वर्त्म् अ. ११।३७	× ×	मूत्रमार्गः चि. ३७।१०५
८४	भसत् अ. २।३३।५	वर्षिष्ठम् ११।१।६।३१	मणिः उ. ५८।१५
८५	मुष्कौ अ. ६।१२७।२, अ. ८।६।५आण्डौ वा.सं.२०।९	मुष्कौ १४।९।४।३	वृषणौ शा. ५।४, फलस्रोतसी–(स्त्रीणां) चि. ७।३८
८६	सिकतावती अ. ११।७।४	× ×	शुक्रहरणी चि. ७।३८
८७	लोहितवाससः अ.११।७।४	× ×	आर्तववहेस्रोतसी शा. ९।१२
८८	गर्भः अ. १।११।२	गर्भः ३।३।३।१२	गर्भः शा. ३।१८
८९	कमलम् (गर्भशय्या) अ. ८।६।९	× ×	गर्भशय्या शा. ५।४३
९०	उल्बः अ. ४।२।८,	उल्बम् ७।२।१।५	उल्बम् शा. १०।५
९१	जरायुः वा. सं. ८।२८	जरायु ७।२।१।५	अपरा शा. ४।२४
९२	योनिः अ. १।११।५, विजामा अ. ७।८०।२	योनिः १२।४।१।७	योनिः शा. ३।४
९३	भंसः अ. २।३३।५	× ×	योनिमुखम् शा. ३।१०
९४	कुलमलम् (मदनातपत्रम्) अ. २।३०।३	× ×	× ×

(अधःशरीराऽवयवाः)

संख्याक्रमः	वैदिक	शतपथ	सुश्रुत
९५	सक्थ्यौ अ. ६।९।१ पादौ अ. १०।७।३९	अपरसक्थौ ३।८।३।२९	सक्थिनी शा. ३।१३
९६	ऊरू अ. २।३३।५	ऊरू ११।१।६।३३	ऊरू शा. ३।८
९७	जाम्बीलौ वा. सं. २५।३	× ×	× ×
९८	वक्षणाः अ. ९।१३।१६		वङ्क्षणौ शा. ६।२५
९९	जानुनी अ. ९।१३।२१ अष्ठीवन्तौ अ. ११।१०।१४	जानुनी १२।२।१।३ अष्ठीवन्तौ १०।३।२।१०	जानुनी शा. ५।४
१००	जङ्घे अ. १०।२। २	× ×	जङ्घे सू. ३५।१२
१०१	उच्छ्लङ्खौ अ. १०।२।१	× ×	खुल्कौ चि. १८।२६
१०२	गुल्फौ अ. १०।२।१	कुल्फौ ११।५।२।३	गुल्फौ शा. ६।२५
१०३	पादौ अ. १।२७।४	पादौ ३।५।३।६	पादौ सू. ३५।१२
१०४	प्रतिष्ठा अ.१०।२।१ अग्रपदम् अ. ७।६४।१	प्रतिष्ठे १०।३।२।११	पादतले शा. ६।२५
१०५	प्रपदौ अ. २।३३।५	× ×	प्रपदौ सू. ३५।१२
१०६	× ×	अङ्गुष्ठौ १०।१।१।८	अङ्गुष्ठौ सू. ३५।१२
१०७	अङ्गुलयः अ. २।३३।६	अङ्गुलयः ३।८।४।१	अङ्गुलयः सू. ३५।१२
१०८	नखाः अ. २।३३।६	नखानि १२।१।४।३	नखाः शा. ३।३३

साधारणाः स्थूलाः शारीरभावाः

संख्याक्रमः	वैदिक	शतपथ	सुश्रुत
१०९	चर्म अ. ४।१२।४	त्वक् १२।९।१।२	त्वचः शा. ४।४
११०	ऊर्जः अ. १८।४।५३	रसः १२।९।१।२	रसः सू. १५।७
१११	लोहितम् अ.९।१२।१ असृक् अ. ४।१२।४	लोहितम् १२।९।१।२	रक्तम् सू. १५।७
११२	मांसम् अ. १०।२।१ पिशितम् अ. ६।१२७।१ क्रविः अ. ८।६।२३	मांसम् १२।९।१।२	मांसम् सू. १५।७
११३	वपा अ. २०।५।२	वपा ३।८।२।२२, वसा ३।८।३।२०	वसा शा. ४।१३
११४	मेदः अ. ४।२७।५	मेदः ३।८।२।२६	मेदः सू. १५।७
११५	अस्थीनि. अ. ९।५।२३ खीलाःअ. १०।८।४, देवाः अ. १०।२।४	अस्थीनि (३६०) १२।३।२।३	अस्थीनि शा. ५।१८
११६	कीकसाः अ. २।३३।२	कीकसाः ८।६।२।१०	तरुणास्थीनि सू. ११।२९
११७	पर्वाणि अ. २।३३।७	पर्वाणि ११।६।१।३	अस्थिपर्वाणि नि. १।३९
११८	मज्जा अ. २।३३।६	मज्जानः १२।३।२।३	मज्जा सू. १५।७
११९	रेतः अ. ६।११।२ रसः अ. ८।४।१० बीजम् अ. ३।१७।२	रेतः १२।४।१।७ वीर्यम् ४।४।२।११	शुक्रम् सू. १५।७
१२०	ओजः अ. ३।५।१	ओजः ५।४।३।१७	ओजः सू. १५।२५
१२१	तमः वा. सं. ६।१६।, ८।४४।,१८।७०, लोहितम् अ.११।७।२५	पाप्मा (रजः) ७।२।१।१५	आर्तवम् सू. १५।९
१२२	मायुः अ. ९।१५।६	पित्तम् १२।९।१।३	पित्तम् सू. १५।५
१२३	बलासम् अ. ६।१४।१	श्लेष्मा (कललम्) ७।२।१।१५	श्लेष्मा सू. १५।६
१२४	लोमानि अ. २।३३।७	लोम १२।९।१।२	लोमानि शा. ३।३३
१२५	परूंषि वा. सं. १८।३	× ×	सन्धयः शा. ५।२७
१२६	मर्म अ. ८।३।१७	× ×	मर्माणि शा. ६।१६
१२७	सीमन्ताः अ. ६।१३४।३	× ×	सीमन्ताः शा. ५।१७
१२८	स्नात्रानि अ. १२।१।१८	स्नावः १०।१।४।४	स्नायवः शा. ५।३०
१२९	हिराः अ. १।१७।१	× ×	शिराः शा. ७।६

संख्याक्रमः	वैदिक	शतपथ	सुश्रुत
१३०	अवरा: परा मध्या कनिष्ठिका मही } शिरायाः धमन्याश्चेमे भेदाः अ. १।१७।२	× ×	
१३१	{ धमन्यः अ. २।३३।६ { बृहती अ. १।१७।४	× × × ×	धमन्यः शा. ९।३
१३२	ग्रैव्याः अ. ६।२५।२	× ×	× ×
१३३	स्कन्ध्याः अ. ६।२५।३	× ×	× ×
१३४	खानि अ. १०।२।१		स्रोतांसि शा. ५।५
१३५	{ निधिः अ. १०।७।२३, { तन्तुः अ. १०।२।१७	× ×	सञ्ज्ञावहानि उ. ६११८
१३६	पेशनीः अ. १०।२।१		पेश्यः शा. ५।५
	सूक्ष्माः शारीरभावाः		
१३७	धीः अ. २०।८९।३	{ प्रज्ञा १२।९।१।११ { धीः ३।५।३।११	बुद्धिः शा. ३।३०
१३८	इन्द्रियाणि अ. १९।९।५	इन्द्रियाणि ४।१।१।२२	इन्द्रियाणि शा. १।४
१३९	चक्षुः अ. ११।३।३	चक्षुः १४।६।१०।९	चक्षुः शा. १।४
१४०	श्रोत्रम् अ. २।३५।५	श्रोत्रम् ४।५।६।२	श्रोत्रम् शा. १।४
१४१	वाक् अ. २।१२।८	वाक् १२।२।४।१	वाक् शा. १।४
१४२	मनः अ. १९।९।५	मनः १२।९।१।११	मनः शा. १।४
१४३	चित्तानि अ. ३।२।५	× ×	चित्तम् उ. ६११२
१४४	वायुः अ. २।३४।४	वातः ३।८।३।२१	वायुः नि. १।५
१४५	प्राणः अ. ११।१०।४	{ प्राणाः १४।६।९।२७ { ऊर्ध्वप्राणः ३।८।३।१५ { पुरस्तात्प्राणः ३।८।४।९	प्राणः नि. १।१२
१४६	अपानः अ. ११।१०।४	{ अपानः १४।६।९।२७ { पश्चात्प्राणः ३।८।४।९	अपानः नि. १।१२
१४७	उदानः अ. ११।१०।४	उदानः १४।६।९।२७	उदानः नि. १।१२
१४८	समानः वा. सं. २२।३३	समानः १४।६।९।२७	समानः नि. १।१२
१४९	व्यानः अ. ११।१०।४	व्यानः १४।६।९।२७	व्यानः नि. १।१२
१५०	{ वैश्वानरः अ. २।१६।४ { विश्वम्भरः (जठराग्निः) अ. २।१७।५	{ वैश्वानरः ७।३।१।३५ { विश्वम्भरः १४।४।२।१६	{ पित्ततेजः शा. ४।१९ { अनलः सू. १४।३८

अथाऽऽर्षसन्दिग्धशारीरविवरणम्

(सं.४) **देवकोशः, हिरण्ययःकोशः**=कोशो निधिस्थानम्। दीव्यन्ति देवयन्ति क्रीडार्थं कारयन्तीति देवाः। दिवुक्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकान्तिगतिषु इति धातोरन्तर्भावितण्यर्थात् पचाद्यचि देवाः इन्द्रियाणि तेषां कोशः प्रकाशस्थानं योगिनये (सम्प्रदाये) समाध्यवस्थायां विज्ञानान्वितजीवस्य तत्र स्थानत्वात् कोशो वासस्थानम्। ननु कोशोऽत्यन्तं गोपितो भवति, अत्र क्व सा गुप्तिरित्यत्र '**समुब्जितः**' सर्वत आच्छादनेन सम्यक्प्रकारेण **उब्जितः**=सम्पुटायितः। तदथर्वणः=अथर्ववेदप्रतिपाद्यस्य ब्रह्मणः **शिरः**=मुख्याङ्गम्। तच्च (**शिरः**) प्राणः=प्राणवायुः, अथचाऽन्नम्=अहरहः सेव्यमानाऽन्नपानपरिणामरूपाऽविच्छिन्नचक्रं, अथो= अथ च मनः सावहितं मन इन्द्रियाऽधिष्ठातृ तद्रक्षति। एषु मध्ये कस्यचिदपि व्यापदि तत्र विकारसम्भवः, इत्येषोऽर्थः "तद्वा अथर्वणः शिरो देवकोशः समुब्जितः। तत्प्राणोऽभिरक्षति शिरो अन्नमथो मनः। अथर्व. १०।२।२७" इत्यनेन मन्त्रेण प्रकटीकृतः। एतस्मान्मन्त्रादग्रे २८-२९-३० त्रिभि मन्त्रैः समाधिभिन्नाऽवस्था प्रदर्शिता। ततः परं त्रिभिर्मन्त्रैः समाध्यवस्था वर्णिता। इन्द्रियाणां समस्तव्यापारः शिरोऽधीनमिति स्पष्टतया प्रतिपादितम्। इममेवार्थं मनसि निधाय " प्राणाः प्राणभृतां यत्र श्रिताः सर्वेन्द्रियाणि च। यदुत्तमाङ्गमङ्गानां शिरस्तदभिधीयते" इति चरके (सू. १७।१२) प्रतिपादितम्। योगिनां प्रकाशमयत्वेन भासनात् हिरण्ययः-कोशः इत्यपि तस्यैव नाम। तथाहि—"अष्टाचक्रा नवद्वारा देवानां पूरयोध्या। तस्यां हिरण्ययः कोशः स्वर्गो ज्योतिषावृतः ॥ अ. १०।२।३१" अष्टौ चक्राणीव चक्राणि यस्यां सा अष्टाचक्रा। छन्दसिच (पा. ६।३। १२६) इत्यग्नो दीर्घे **अष्टाचक्रा**। अत्र रसादयः सप्तधातव ओजोनामाऽष्टमो धातुस्तेषां चक्रेण=अविरतपरिभ्रमणेन निर्मिता। **नवद्वारा**=नव द्वाराणि रन्ध्राणि यस्यां सा नवद्वारा। न योधयितुं= प्रवेशयितुं योग्या अयोध्या देवानां त्रयस्त्रिंशद्देवानामथ चाऽक्ष्णां यत्रतत्र बहुस्थानेषु देवशब्दस्याऽक्षिवाचकत्वात्। पूर्नगरी। अस्तीति शेषः। **तस्यां (पुरि) हिरण्ययः**=हिरण्यवर्णः, अत एव **ज्योतिषा**=अनिर्वचनीयप्रकाशेन **आवृतः**=संयुक्तः, **कोशः**=निधिस्थानमिव सर्वतो गोपायितोऽस्ति सः स्वर्गः। पाञ्चभौतिके शरीरे स्वर्गस्थानापन्नोऽस्ति समाध्यवस्थायां तत्रगमनाद्योगिनामलौकिकानन्दलाभात् शारीरमानसाऽऽगन्त्वादिव्याध्यस्पृष्टत्वान्मृत्युभयाऽभावाच्च तस्य स्वर्गसादृश्यम्। किञ्च स्वर्गगताः कर्मजीवाः स्वस्वकर्मोपार्जितं नियतफलं भुक्त्वाऽवश्याऽधःपतनशङ्काशीला भवन्ति। अत्र गतास्तु निःशङ्कास्सन्तः त्रिपादविभूतिमतिक्रम्याऽक्षय्यलोकं प्राप्नुवन्तीतीन्द्राद्यधिष्ठितस्वर्गलोकादस्य महिमाऽतिगौरवमस्ति। परन्तु पूर्णयोग्यतिरिक्तजनैरेतद् दृश्यं साक्षात्कर्तुमशक्यमिति विभावनीयम् ॥

(सं. २८) **ग्रीवाः**—पृष्ठवंशस्याऽनूकत्वेनाऽऽम्नानाद् 'अनूकं त्रयस्त्रिंशदिति' तत्रास्थिताऽस्थ्नां त्रयस्त्रिंशत्त्वेन परिगणनाद्ग्रीवाशब्देन न तत्रत्यकशेरुकाणां ग्रहणं भवति, अपि तु तद्विनिर्मुक्तभागस्यैव, अतस्तरुणाऽस्थीनि-पेशी-स्नायु-सिरा-धमन्योऽवशिष्टास्तासामेव ग्रीवाशब्देन व्यवहार उचितः तत्राऽपि अंसौ स्कन्धौ इत्यादिशब्दैः मांसपेश्यः स्नायुसिराधमन्यश्च कृतविभागाः सन्ति अतः श्वासान्नमार्गौ द्वावेवाऽवशिष्टौ स्तः। तत्राऽक्षकास्थ्न उपरिष्टात्तरुणास्थिवलयानि पञ्चदशग्रहीतव्यानीत्यमुमभिप्रायं हृदि सन्निधाय शतपथे व्याख्यातम् " ग्रीवाः पञ्चदशः, चतुर्दश वा एतासां करूकराणि वीर्यं पञ्चदशं तस्मादेताभिरण्वीभिः सतीभि गुरुं भारं हरति तस्माद्ग्रीवाः पञ्चदश इति श. ब्रा. १०।२।४।१० " यत्र तु सौक्ष्म्येण विभागो न कृतोऽस्ति तत्र तु हन्वक्षकास्थ्नोर्मध्यं समग्रमपि गृह्यते—" रुद्रो वो ग्रीवा अशरैत् पिशाचाः पृष्टीर्वोपि शृणातु यातुधानाः। वीरुद् वो विश्वतो वीर्या यमेन समजीगमत् ॥ अ. ६।३२।२ ". हे पिशाचाः पिशिताशनाः वः युष्माकं,

ग्रीवाः गलावयवान् रुद्रः संहर्ता देवः अशरैत् छिनत्तु। इति व्याख्यानं कुर्वता सायणेन तु सामान्यरूपेण गलस्य यावन्तोऽवयवाः सर्वेपि गलावयवानित्यनेन परिगणिताः, एवमेव सर्वत्र बोद्धव्यम्॥

(सं. २९) **अधरकण्ठः**—अधरकण्ठः=आमाशयोर्द्धमार्गः (अन्ननलिका) श्वासनलिका च भवति।

(सं. ३०) **मन्याः**—"पञ्च च याः पञ्चाशच्च सं यन्ति मन्या अभि। इतस्ताः सर्वा नश्यन्तु वाका अपचितामिव॥ अथर्व. ६।२५।१॥ पञ्च च पञ्चाशच्च पञ्चाऽधिकपञ्चाशत्सङ्ख्याका या गण्डमालाः मन्याः गलस्योर्द्धभागे स्थिता धमनी मन्या शब्दवाच्याः अभिसंयन्ति सर्वतो व्याप्नुवन्ति। इतः अस्मात्प्रयोगात् ताः तत्सङ्ख्याकाः सर्वा गण्डमाला नश्यन्तु विनष्टा भवन्तु॥" इत्यत्र मन्या धमन्य इति सायणः। मन्या इति धमनीनां सिराणाञ्चाविशेषेण नामानि प्रतिभान्ति। सुश्रुते तु धमनीनामेव नामानि स्थापितानि। ग्रैव्यसिराणान्तु मातृका इति।

(सं. ३१) **उष्णिहाः**—"ग्रीवाभ्यस्त उष्णिहाभ्यः कीकसाभ्यो अनूक्यात्॥ अथर्व. २।३३।२ **उष्णिहाभ्यः**=ऊर्ध्वं स्निग्धाभ्यो रक्तादिना उत्स्नाताभ्यो वा नाडीभ्यः। तदुक्तं यास्केन उष्णिग्=उत्स्नाता भवति स्निह्यते र्वा स्यात्कान्तिकर्मणः इति (नि. ७।१२) उष्णिगेव उष्णिहा।" (सा. भा.) अत्र शिराधमनीत्वाऽविवेचनात् साधारणतः ऊर्ध्वगामिन्यः कण्ठदेशस्थाः शिराधमन्योरसायन्यश्च बोद्धव्याः॥

(सं. ३३) **शुष्ककण्ठः**—श्वासाऽन्नगमननालीद्वयाऽतिरिक्तो ग्रीवापश्चाद्भागः शुष्ककण्ठः। श्वासाऽन्ननलिकयोः प्रतिक्षणमार्द्रत्वात्कण्ठादधः फुप्फुसपर्यन्तमामाशयाऽवधि च गमनादुचितैव नालीद्वयस्याऽधरकण्ठ इति सञ्ज्ञा, तदपेक्षया ग्रीवापश्चाद्भागस्य शुष्कत्वात्कण्ठप्रदेशस्यैव ग्रहणाच्च शुष्ककण्ठ इति सञ्ज्ञा। यत्तु महीधरेण कण्ठस्य यः शुष्को निर्मांसो देशः स शुष्ककण्ठः इत्युक्तं तत्त्वविचारकृतमिव प्रतिभाति कण्ठे तादृशप्रदेशाऽभावात्। नच कण्ठगतविवराऽभिप्रायेण तथोक्तं महीधरेणेति वाच्यं तादृशाऽऽकाशस्याऽऽहुतियोग्यत्वाऽभावात्। तत्रस्थाऽवयवैस्तत्तदेवतोद्देशेनाऽऽहुतयस्तत्र प्रतिपादिताः। अतस्तदुक्तमविचारमूलकमेव।

(सं. ३४–३५) **स्कन्धौ–अंसौ** चेति शरीराऽवयवौ स्त इति सर्वजनप्रसिद्धिः। परं तयो र्विभागविवक्षायां समानार्थकाविव दृश्येते, अतस्तन्निर्णयोऽत्यावश्यकः सोऽपि वर्तमानाऽमरकोशवैजयन्त्यादिभिः कर्तुं दुश्शकः; यतस्तद्रचयितृषु शारीरज्ञानाऽभावेन शारीरविषये तद्वचनानामप्रामाण्यात्। तथापीदानीन्तनाः वैद्या अवैद्याश्च शारीरेऽशारीरे च सर्वस्मिन्नपि विषये तद्रचितग्रन्थानेवाऽवलम्बन्ते तेषां तद्गताऽनुगतिकतां निवारयितुं सूचनाऽत्यावश्यकी प्रतिभाति तथाहि—"स्कन्धो भुजशिरोंऽसोऽस्त्री" इत्यनेनाऽमरेण "स्कन्धो दोश्शिखरोंऽसोऽस्त्री" इत्यनेन वैजयन्तीकारेण यादवप्रकाशेन च स्कन्धांऽसशब्दौ एकाऽर्थौ प्रतिपादितौ, तच्च (प्रतिपादनं) शारीराऽज्ञानमूलकम्। "विद्युज्जिह्वा मरुतो दन्ता रेवती ग्रीवाः कृत्तिका स्कन्धा घर्मो वहः" अथर्व० ९।१२।३ "मित्रश्च वरुणश्चांसौ त्वष्टा चार्यमा च दोषणी महादेवो बाहू" अथर्व० ९।१२।७ अस्मिन्सूक्ते तत्तद्देवताऽधिष्ठानत्वेन क्रियमाणगवाङ्गविभागेषु अंसयोः स्कन्धयोश्च पृथगुपादानात् न ह्येकाङ्गस्य पुनरुक्तिरीदृशे प्रकरणे वेदे लभ्यते। पुनरपि "यौ ते बाहू ये दोषणी यावंसौ या च ते ककुत्" अथर्व० १०।९।१९ "यास्ते ग्रीवा ये स्कन्धा याः पृष्ठी याश्च पर्शवः" अथर्व० १०।९।२० इत्यत्राऽपि स्कन्धयोरंसयोश्च पृथक्त्वेनोपादानात् अंसौ स्कन्धौ च पृथगङ्गे इति निर्विवादम्। "बाहुमूर्धग्रीवामध्येऽसपीठस्कन्धनिबन्धनावंसौ नाम" सु. शा. ६।२७ अत्र बाह्वादिमध्येऽसयोरवस्थानं निबन्धनाविलनेन स्नायुमयत्वञ्च प्रतिपादितम्। बाहुमूर्धग्रीवेति—बाहुमूर्धा=बाहुशिरः, ग्रीवा तु कन्धरा, तयोर्मध्येऽसपीठस्कन्धयोः अंसफलकभुजशिखरयो र्बन्धनावंसौ स्नायुमर्मणी, इति

डल्हणः । “ अथाप्यङ्गुलौ स्कन्धौ षडङ्गुलावंसाविति (च. वि. ८।११७)” चरकेणाऽपि स्वातन्त्र्येण भिन्न माणतया तावुक्तौ । इमे अङ्गे परस्परं सन्निकृष्टे, भुजशिखरग्रीवयोर्मध्येऽसफलकादीनां यन्निबन्धनार्थे स्नायुं अंसशब्दवाच्ये, ते च स्वाङ्गुलिप्रमाणेन प्रायः षडङ्गुलायते । ‘ जोता’ इति लोके । अंसाऽक्षकयोर्मध्ये यो विस्तृतः प्रदेशः सः समग्रः स्कन्धशब्दवाच्यः । यज्ञविभागे तु अक्षकांऽसयोर्मध्यवर्तिनः त्वग्विशिष्टमांसस्य प्र भवति । अक्षकादिपार्थक्येन तस्यैवाऽवशिष्टत्वात् । “ स्कन्धानमुष्य शातयन् वृत्रस्येव शचीपतिः” अथ ६।१३५।१ इत्यत्र स्कन्धान् स्कन्धोपलक्षितान् शरीराऽवयवानिति सायणो व्याचख्यौ । “ प्रस्कन्धान् प्रहि जहि” अथर्व. १२।११।६ इत्यत्र (कृत्योत्थापनमन्त्रे) स्कन्धानिति बहुवचनेन स्कन्धप्रदेशमारभ्य बा पृथक्करणमभीप्सितम् तत्र स्कन्धांसाऽक्षकांऽससन्धीनां पृथक्करणायुक्त एव स्कन्धानिति बहुवचनप्रयोगः “ विपुलांसो महाबाहुः कम्बुग्रीवो महाहनुः ” वा. रा. बा. १ । ९. इत्यादौ यथा विपुलत्वादि विशे सामुद्रिकशास्त्राऽनुसारेणांऽसयोर्दीयते तथा न स्कन्धयोः । अंसविपुलत्वेनैव स्कन्धविपुलताऽर्थापत्तिन्यायेन स याति, अतः स्कन्धाविति च पृथगङ्गे, तयोरेकतायां न भ्रमितव्यम् । इदानीन्तनप्रचलितकोशकाराणां वच न्यायुर्वेदविषये न श्रद्धेयानि ते हि स्वमहत्त्वप्रख्यापनायाऽकृताऽऽयुर्वेदपरिश्रमा अपि आयुर्वेदीयाऽङ्गान्युन्मत्तव रूपनिति दिक् ।

(सं. ३६) कफोडौ—कफोडशब्दो भग्नघटकपालवाचकः, क्रमेणाऽस्यैवाऽपभ्रंशतया खर्पर-कर्पर शब्दाः सञ्जाता इति प्रतिभाति । अत्र च प्रकरणवशात्खर्पराऽऽकारेण स्कन्धसमीपेंऽसफलकयोरेव सम्भवाद्या ग्रहीतव्यौ । तत्र “कति स्तनौ व्यदधुः कः कफोडौ कति स्कन्धान् कति पृष्टीरचिन्वन् ॥ अ. १०।२।४ इत्यनेन द्वित्वमपि स्पष्टतया विन्यस्तमेवाऽस्ति ।

(सं. ३७-९६) हस्तौ, पादौ=हस्तौपादाविति शब्दौ शाखात्वेनभुजोरुशिर आरभ्याऽङ्गुलिपर्यन्त शवाचकौ, विशेषस्थलेषु प्रत्येकं भागद्वयं ततोऽधिकत्वेन वा भागाः प्रकल्प्यन्ते इत्यन्यव्यवस्थितिरस्ति । तत्र वक्त्रभिप्रायप्रकरणादिगवेषणमेव निश्चायकं भवति, अत एव हस्ते भुजशिरः, प्रगण्डः, प्रकोष्ठः, हस्ताग्रमि पादे ऊरु, जानु, जङ्घा, पादाग्रमित्यादयः शब्दाः प्रयुज्यन्ते । तादृशप्रयोगस्थले तु न कोऽपि विभ ऽस्तीति सुधीभि र्विभावनीयम् ॥

(सं. ४९) जत्रु—जत्रुशब्दः प्रायो वेदे बहुवचनान्तः प्रयुज्यते तस्य चाऽत्यन्तकोमलाऽवय सादृश्यं लभ्यते यथा—“ आन्त्राणि जत्रवो गुदा यत्राः० । अथर्व. ११।३।१० ” “ य ऋते चिद श्रिपः पुरा जत्रुभ्य आतृदः ।”अ. १४।२।४७ ” इदं सूक्तं कृत्योत्थापनतन्निबर्हणार्थम्, पुरा प्रथमं जत्रु सकाशात् कृत्योत्थापयितुरङ्गानि कृत्याया वा आतृदः=आसमन्तात्कर्तय अर्थात् पृथक्कुरु घातूनाम कार्थत्वात् । अत्र शिरः कर्तनमभिप्रेतम् तच्च अंसदेशात्पृथक् क्रियते, अंसयोः स्नायुसमुदायत्व उचितमेव बहुत्वम्, अन्त्रादिसादृश्यञ्च । जत्रुशब्दस्याऽपभ्रंश इदानीं लोके जोता इति वर्तते स मुख्यतया अंसयोरेवाऽवबोधकः । “ तस्य वै दक्षिणं वीरो निर्बिभेद रणे भुजम् । सौमदत्तिस्तथा शङ्खं जत्रु समाहनत् ॥ म. भा. भी. प. ४५।२६ ” अत्र क्षते च प्रतिकर्तव्यमिति वीराणां सामान्यस्वभावत्वात् ए भुजदेशे ताडनं कृतम्, तदुत्तरं तदंसदेशताडनेन स्पष्टं विज्ञायते यदत्र जत्रुदेशेन अंसस्कन्धात्मकः स देशोऽभिप्रेतः । “ सेनापतिः सुशर्माणं भृशं मर्मस्वताडयत् । स चापि तं तोमरेण जत्रुदेशेऽभ्यताडयत म. भा. द्रो. १४।२७ ” अत्रैकेन वक्षःस्थलेऽभिघाते समर्पिते द्वितीयेन जत्रुदेशेऽर्थादंसदेशे ताडनं कृतम्

कुत्रचिज्जत्रुदेशस्यांसशब्देनैव कथनं दृश्यते यथा—" स तया वीरघातिन्या जनार्दनमताडयत्। प्रतिजग्राह तां कृष्णः पीनेनांसेन वीर्यवान्॥ म. भा. द्रो. ९२।५२ " अत्र जत्रुशब्दप्रयोगं विहायांसशब्द एव प्रयुक्तः। " स सिंहवाह आसाद्य गदामुद्यम्य रंहसा। जत्रावताडयच्छक्रं गजश्च सुमहाबलः॥ भाग० ८।११।१४ " जत्रौ कण्ठस्य मूलदेशे इति वीरराघवाचार्यः। " महोरस्को महेष्वासो गूढजत्रुररिन्दमः। वा. रा. १।१।१० " अत्राप्यंसदेश एवाऽभिप्रेतः। वृषभानां शकटनियोजनार्थां या चर्मपट्टिका तस्यां जत्रुशब्दो गौणः, अंसदेशयोस्तद्बन्धनात्। अमुञ्च गौणार्थमबुद्ध्वा बहवो ग्रन्थकाराष्टीकाकाराश्च व्यामुह्य जत्रुशब्देन किं ग्रहीतव्यमिति कर्तव्यतान्विमूढा वृषभगले चर्मपट्टिका यत्र निबध्यते स एव जत्रुशब्दवाच्य इति तर्केण निश्चयं कृत्वा केचिदक्षकास्थ्नोरन्ये वक्षोऽक्षकाऽस्थिसन्धौ अन्ये स्कन्धदेशे तद्बुद्धिं मन्वानास्तत्रतत्र तथैव व्याचख्युः। यथा—" निगूढजत्रुं पृथुतुङ्गवक्षस " मित्यत्रांसवक्षःस्थलयो र्मध्यं जत्रु इति विजयध्वजः, निगूढे मांसले जत्रुणी कण्ठस्याऽधोभागयोः स्थितेअस्थिनी यस्य तमिति विश्वनाथचक्रवर्ती, जत्रुणी अंसद्वयसन्धिगताऽस्थिनी इति वीरराघवाचार्यः, कण्ठस्याधोभागे स्थिते अस्थिनी जत्रुणी इति श्रीधरः। अत्र वीरराघवाचार्येण प्रथमस्कन्धे—जत्रुणी असद्वयसन्धिगताऽस्थिनी इति लिखित्वाऽष्टमस्कन्धे—जत्रौ कण्ठस्य मूलदेशे इति पूर्वापरस्ववाक्यविरोधमविचार्याऽन्यदेव लिखितम्। तस्य जत्रुरूढेरज्ञानमेव मूलम्। एवं बहुस्थलेषु बहुभिः शारीरज्ञैः बहुधा प्रलपितम्। सुश्रुते मर्मनिर्देशस्थले शाखाः, उदरोरः, पृष्ठम्, जत्रुण ऊर्ध्वमिति चतुर्षु विभागेषु समस्तं शरीरं विभज्य मर्माणि निर्दिष्टानि सन्ति। तत्रोदरोरः शब्देनाऽन्तराधि विवक्षितः, उदरोरसो द्वादशमर्माणि व्याख्यातानीति स्वयमेव कथितत्वात्। अन्तराधिश्च अक्षकाऽस्थिसहित एव व्यवह्रियते अतस्तयो र्जत्रुत्वसञ्ज्ञा न सम्भवत्येव। अत ऊर्ध्वं " ऊर्ध्वजत्रुगतानि व्याख्यास्यामः तत्र कण्ठनाडीमुभयतश्चतस्रो धमन्यो द्वे नीले द्वे च मन्ये व्यत्यासेन, तत्र मूकता स्वरवैकृतमरसग्राहिता च, ग्रीवायामुभयतश्चतस्रः सिरा मातृकाः तत्र सद्योमरण—" मित्यादिना अक्षकास्थ्युपरिस्थितानामेवाऽवयवानां वर्णनात् एतदत्यन्तं स्पष्टीभूतम् यज्जत्रुणी अंसे एव स्तो न पुनरक्षकास्थिनी, अक्षकास्थ्नो र्यदुक्तस्थलेषु टीकाकारैर्जत्रुत्वेन प्रयोगः कृतोऽस्ति सः शकटे वृषसंयोजनार्थां चर्मपट्टिकां लक्षणया जत्रुशब्दवाच्यामभिलक्ष्य कृतोऽस्ति। युद्धस्थलेष्वागतजत्रुप्रयोगेषु अंस एवार्थः, युध्यतां वीराणामंसस्थले एव प्रहारसम्भवात्। युद्धसमये शिरोभुजादिभिरक्षकाऽस्थ्नो रक्षितत्वात्तत्र गदादिप्रहारस्य सर्वथाऽसम्भवः। वर्तमानसमयेऽपि भटा अंसदेशे एव प्रहारं कुर्वन्तीति प्रत्यक्षसिद्धत्वात्। यद्यपि " खलः पात्रे स्फ्यावंसावीषे अनूक्ये " ' आन्त्राणि जत्रवो गुदा वरत्राः '। अथर्व० ११।३।९–१० इत्यत्र एकस्मिन् सूक्ते नवमदशममन्त्रयो रंसजत्रुशब्दाऽऽगमनं दृश्यते परन्तु तत्रांसशब्देन स्कन्धावभिप्रेतौ, स्कन्धयोरेकस्मिन्नवयवेऽरूढत्वादिति पूर्वं प्रतिपादितमस्माभिः, अत एव स्कन्धांसशब्दयो र्व्यतिकरो दृश्यते। " स्फ्यावंसा—" विति स्फ्यशब्देन सादृश्यदानात्पृष्ठमेव तत्र स्कन्धार्थकोंऽसशब्दः प्रतिभाति तदपि सादृश्यं न केवलेनांसेन नाऽपिस्कन्धेन किन्तु प्रगण्डांससहितेन स्कन्धेन पूर्यते इति नाऽस्ति शङ्काऽवसरः। जत्रु ग्रीवामूलं, अन्ये वक्षोंऽससन्धिमाहुरिति (सु. सू. १।६) डल्हणेन स्वकीयो भ्रमः प्रदर्शित इति न तद्वाक्येन काचिदर्थसिद्धिः। ' जत्रुण ऊर्ध्वं पञ्चाङ्गीमिति ' सु. सू. १९।१९ इत्यादिसुश्रुतवाक्यपर्यालोचनया जत्रुण ऊर्ध्वं शालाक्यतन्त्रस्याऽधिकारकथनाच्च अंसावेव जत्रुशब्दवाच्यौ।

" न च वातकफात्मानो बलिनोऽप्यूर्ध्वजत्रुजाः। धूमवक्त्रकपानस्य व्याधयः स्युः शिरोगताः॥ " चरक सू. ५।३०॥ तत्रोर्ध्वजत्रुकेऽभ्यङ्गः स्वेदो धूमः सनावनः। हितं वातघ्नमाद्यञ्च घृतञ्चोत्तरभक्तिकम्॥ च. सू. ७।१७॥ गूढं जत्रु पृष्ठवंशश्च—च. शा. ८।५२ " इत्यादीनि चरकीयवाक्यानि सन्ति परन्तु तेभ्यः स्पष्टतया कश्चिन्निर्णयो न सम्भवति। अत्र शतपथे तु मुरारेस्तृतीयः पन्था इतिवत् वक्षोऽस्थिसंलग्नदक्षिणोत्तर-

भागयोः प्रधानसप्तपर्शुकानां बन्धनकारीणि सप्तदशाऽस्थीनि प्रतिभागं सन्ति तानि परिगणय्य द्वे अक्षकास्थिनी मिश्रय्य षोडशसङ्ख्या सम्पादिता । चतुर्विंशतिपर्शुकामध्यवर्ति वक्षःफलकमेकत्वेन परिगणय्य सप्तदशसङ्ख्या पूर्णा कृताऽस्ति तथाहि—" उरः सप्तदशः । अथयन्ये जत्रवोऽथान्ये उरः सप्तदशो तस्मादुरः सप्तदशः ॥ श. ब्रा. १२।२।४।११ " " पर्शवो बृहत्यः । कीकसाः ककुभः सोऽन्तरेण त्रिष्टुभश्च ककुभश्च बृहतीरुपदधाति तस्मादिमा उभयत्र पर्शवो बद्धाः कीकसासु च जत्रुषु च ॥ श. ब्रा. ८।६।२।१० " सर्वं शतपथीयसन्दर्भो लाक्षणिकं जत्रुशब्दार्थं हृदि सन्निधाय कृतोऽस्ति, अस्मादेव सन्दर्भाज्जनानां विभ्रमोऽजनि सोऽपि गङ्गाधरादियतीं सीमानमतिक्रान्तोऽभूत् । यत् सुश्रुतेऽपि " चिरभुक्तपरिणते या वेगैर्मन्दैः समभिवर्तते क्षुद्रिका नाम सा हिक्का जत्रुमूलात् प्रधाविता ॥ सु. उ. ५०।११ " इत्यत्र जत्रुमूलात्प्रधावनमुक्तं तत्र च कण्ठोरसोः सन्धिरिति जेज्जटेनोक्तम् परन्तु उदरच्छदमहापेशीकम्पनमन्तरा कस्याश्चिदपि हिक्काया आगमनाऽभावात् ' जत्रु ग्रीवामूलं तद्ग्रहणेन हृदयरोमकण्ठानामपि ग्रहणमिति ' गयदासेनोक्तम् । एवं " व्यपेता नाम हिक्का याऽन्नपाने चतुर्विधे । आहारपरिणामान्ते भूयश्च लभते बलम् ॥ प्रलापवम्यतीसारतृष्णार्तस्य विचेतसः जृम्भिणो विप्लुताक्षस्य शुष्कास्यस्य विनामिनः ॥ पर्याध्मातस्य हिक्का या जत्रुमूलादसंगता । सा व्यपेतेति विज्ञेया हिक्का प्राणोपरोधिनी ॥ चरक. चि. १७।२१-२२-२३ " इत्यत्र चरकेण व्यपेताया जत्रुमूलोत्थानमुक्तं, अत्र द्वयोरपि स्थानयोः कण्ठोरसः सन्धिर्नाऽस्ति किन्तु शतपथीयवक्षोऽस्थ्यपसलं जत्रुमूलत्वेनाऽभिप्रेतमस्ति तदैवैतद्ग्रन्थयोः सङ्गतिः स्यात् परन्तु अयं विभ्रमः शतपथनिर्माणादनन्तरमेव सञ्जातः, वेदेषु तु जत्रुणी इति ग्रीवाप्रधानस्नायुरूपिणी एव ययोः शाखा ग्रीवाचतुर्दिक्षु प्रसृताः सन्ति, वस्तुतस्तु हिक्कास्थानीयचरकसुश्रुतीयवाक्यद्वयाभ्यां समस्ताऽऽयुर्वेदसिद्धान्ते विप्लवः समुत्थितः । चरके—" शिरोनासाक्षिजत्रूणां ग्रीवायाश्चापि हुण्डनम् । च. चि. २८।२२ " इत्यत्र जत्रुहुण्डनं यत्समागतं तच्चांऽसदेशयोरेव सम्भवति न पुनः शतपथीयजत्रूणाम् । तथात्वस्वीकृते शालाक्यतन्त्रे ऊर्ध्वजत्रुस्थानस्याऽनिश्चयात्समस्ततन्त्रे विप्लवः स्यात्, अतोऽत्र वाक्यद्वये यकृत्स्थाने जत्रुशब्दो लेखकप्रमादात्सञ्जात इति प्रतिभाति, अतिप्राचीनसमये च मन्त्रादिमुद्रणशैल्यभावाद्हस्तलिखितेषु चरकसुश्रुतीयपुस्तकेषु तादृशप्रमादस्य प्रसरणं नाऽनुमानबहिष्कृतम् । तादृशभ्रष्टपाठ—(भ्रष्टपाठं) मासाद्य गयदासादिभि र्जत्रुमूलस्योपलक्षणत्वं स्वीकृत्य यत्समाहितं तदपि न समीचीनम् । अतोऽत्र स्थानद्वये जत्रुमूलस्थाने यकृन्मूलेतिपाठ एव स्थापनीयस्तेन न परस्परं चरकसुश्रुतीयवाक्यानां व्याकोपः स्यात् । यत्तु " शिरोनासाक्षिजत्रूणां ग्रीवायाश्चापि हुण्डन—"मित्यत्र नासाया हुण्डनं=घ्राणनाशः, अक्षिहुण्डनं=अक्षिव्युदासः, जत्रुहुण्डनं वक्षोपरोधः, ग्रीवाहुण्डनं ग्रीवास्तम्भः, इति चक्रपाणिनाऽर्धजरतीयं न्यायं समाश्रित्य एकस्थानसमागतेष्वङ्गेषु यद्वैलक्षण्यं प्रतिपादितं तत्प्रत्यक्षमेव विरुद्धम् । हुण्डनशब्देन विनाशश्चेदभिप्रेतस्तर्हि सर्वत्र स एवाऽर्थोऽवलम्बनीयः स्यात् सोऽपि कैश्चिदपि शास्त्रकारै र्न स्वीकृतः । हुडिधातोः प्रयोगं प्रायः कम्पने प्रयुञ्जन्ते तेन च नासाग्रीवाक्षिजत्रूणामित्यत्र कम्पनार्थ एव भवति, कम्पनञ्च नानाविधं तेन कुत्रचित्सङ्कोचः कुत्रचिद्विस्फुरणं भवति । यद्यपि जत्रुणी ग्रीवासंलग्ने एवाऽऽसाते परन्तु कुत्रचिदेकस्य कुत्रचिद् द्वयोर्जत्रुणोः कुत्रचित्समस्तग्रीवायाः कम्पनं सङ्कोचो वा भवति, इत्यर्थं द्योतयितुं जत्रुणोः पृथगुपादानं कृतं प्रतिभाति । चक्रपाणीयव्याख्यानन्त्वर्धद्वयमेव नानार्थस्वीकारात् । जत्रुशब्देनाऽऽयुर्वेदीयसिद्धान्ते वक्षसोऽनागतत्वाच्चेति दिक् ।

(सं. ५०) पक्षतिः=" पक्षो मासार्धके गेहे पार्श्वसाध्यविरोधयोः । केशादेः परतो वृन्दे बले सखिसहाययोः ॥ चुल्लीरन्ध्रे पतत्रे च राजकुञ्जरपार्श्वयोः ॥ " इत्यभिधानात् पक्षशब्दस्य पार्श्ववाचकत्वात् पक्षस्य पार्श्वस्य मूलमिति विग्रहे ' पक्षात्ति–' (पा. ५।२।२५) रिति तिप्रत्यये पक्षतिः । पर्शुभिर्निर्मितमित्यर्थे

पार्श्वशब्दस्य रूढत्वात्तन्निवृत्तेर्मूलं कारणं पर्शुका एव सन्ति, तदभावे पार्श्वत्वस्यैवाऽसिद्धत्वात् । पक्षतिशब्दे-नाऽत्र पर्शुका ग्रहीतव्याः । "अग्नेः पक्षति वायोर्निपक्षतिरिन्द्रस्य तृतीया सोमस्य चतुर्थ्यदित्यै पञ्चमीन्द्राण्यै षष्ठी मरुतां सप्तमी बृहस्पतेरष्टम्यर्यम्णो नवमी धातुर्दशमीन्द्रस्यैकादशी वरुणस्य द्वादशी यमस्य त्रयोदशी ॥ वा. सं. २५।४" इत्यस्मिन्मन्त्रे स्पष्टतया तासामेव ग्रहणसम्भवात् । शरीराऽवयवेषु तद्वाचकाऽन्याऽवयवस्याऽभावात् ॥

(सं. ५१) क्रोडः="श्येनः क्रोडोऽन्तरिक्षं पाजस्यं बृहस्पतिः ककुद् बृहतीः कीकसाः ॥ अथर्व. ९।१२।५" इत्यत्र क्रोडशब्दः पार्श्ववाची श्येनपक्षिणा उपमितत्वात् । किञ्च "क्रोडौ ते स्तां पुरोडाशावाज्येनाभिघारितौ ॥ अ. १०।९।२५" अस्मिन्मन्त्रे अभिघारितयोरग्नीषोमीयभागत्वेन प्रकल्पितपुरोडाशभागयोः क्रोडत्वप्रकल्पनात् वामदक्षिणभागौ क्रोडशब्दवाच्याविति सिद्धे सति क्रोडौ पार्श्वाऽपरपर्यायौ न पुनर्वक्षोमध्यभागमात्रम् । 'न ना क्रोडं भुजान्तर'मिति प्रमाणदानपुरःसरं क्रोडो घनोवक्षोमध्यभागइति महीधरोक्तिस्तुचिन्तनीयैव ।

(सं. ५३) वर्जह्ये="ऊरू पादावष्ठीवन्तौ शिरो हस्तावथो मुखम् । पृष्टीर्वर्जह्ये पार्श्वे कस्तत् समदधादृषिः ॥ अथर्व. ११।१०।१४" अत्र मन्त्रे शरीराऽवयवानां विलक्षणनिर्माणक्रियाकौशलं दर्शित्वा अन्येनेदृशी कृतिरशक्येति प्रदर्शयन्नीश्वरस्य स्तुतिः कृताऽस्ति, तत्र मुखपृष्टिपार्श्वानां मध्ये वहिर्दृश्यमानाऽवयवौ वर्जह्यशब्देन प्रतिपादितौ, ता च स्तनावेव सम्भवतः, तत्राऽपि स्तनमुकुलयो र्दुग्धवाहिनीनां मुखानि कुल्या वाटिकामिव यच्छिशुं पुष्णन्ति तन्महद्वैचित्र्यमस्ति, अतो वर्जह्यशब्देन चूचुकावेव ग्रहीतव्यौ ।

(सं. ५४) कुन्तापानि—उदरशब्देनोदरगुहायां सन्निविष्टानि समस्तान्यप्यङ्गानि उपतिष्ठन्ते, परन्तु याज्ञिकविभागे पाजस्यादिविशेषनाम्ना शृङ्गिग्राहिकतान्यायेन प्लीहादिसमस्ता अवयवाः पृथग्भवन्ति, उदरशब्देन केवला उदराऽऽच्छादिका त्वग्विशिष्टा महापेश्यवशिष्यते । परन्तु शतपथे "उदरमेकविंशः । विंशतिर्वा अन्तरुदरे कुन्तापान्युदरमेकविंशं तस्मादुदरमेकविंशः ॥ (१२।२।४।१२)" इत्यत्र क्षुद्राऽन्त्राणि उदरपेशीसहितानि परिगणितानि । तत्र क्षुद्रान्त्रेषु विन्यासविशेषेण यान्त्रिकोणा आकृतयः सन्ति तानि कुन्तापनाम्ना सङ्केतितानि, तानि च प्रायः विंशतिसङ्ख्याकानि, तेषु उदरच्छदपेश्याः सम्मेलनादेकविंशतिसङ्ख्या पूर्यते । अतः सैव सङ्ख्या उदरशब्देन याज्ञिकविभागे व्यवहर्तव्या इति स्वकीयः सिद्धान्तः प्रदर्शितोऽस्ति । साधारणतया तु पर्शुकापञ्जरादधस्ताद्या महती गुहा सा सर्वाऽप्युदरशब्देनोपस्थिता भवतीति सुधीभिर्विभावनीयम् ।

(सं. ५७) जघनम्="स्फुरद्भुजकुचश्रोणिनाभ्यूरुजघनस्फिचम् । हर्षोत्सुक्यपराश्चाऽपि विद्यादनुमतीमिति ॥ सु. शा. ३।८ इत्यत्र स्फिग्देशस्य पृथगुक्तत्वात् कटेः पुरस्ताद्भागो जघने पर्यवस्यति वर्तमानकोशकारा अपीममेव भागं जघनशब्देन व्यवहरन्ति । "येन महानघ्न्या जघन०" (अ. १४।१।३६) इत्यादौ वैदिकस्थले तु कटिमात्रे रूढमस्ति ।

अथानूकविवरणम् (सं. ५९)

अनूक्यमनूकमिति चैकाऽर्थोऽभिधायिनौ शब्दौ । कं=शिरः पश्चादिति विग्रहे–अव्ययं-विभक्ती–(पा. २।१।६) त्यादिना अव्ययीभावे समासे, योगविभागात्साधारणे वा समासे 'उपसर्गस्य घञ्यमनुष्ये बहुलम् (पा. ६।३।१२२) इत्यत्र बहुलग्रहणादीघऽनूकमिति सिद्धम् । अनूक्यशब्दे तु अनु=क्रमेण उच्यन्ति समव-

यन्ति अस्थीनि आस्मिन्निति सायणेन साधुत्वप्रक्रिया प्रदर्शिता । एतौ द्वावपि शब्दौ पृष्ठेविकावाचकौ, शिरः पश्चाच्छ्रोणिपर्यन्तमेकत्वेन स्थितिमत्त्वात् । तथाच—“ पादाभ्यां ते जानुभ्यां श्रोणिभ्यां परिभंससः । अनूकादर्षणीरुष्णिहाभ्यः शीर्ष्णो रोगमनीनशम् ॥ अथर्व. ९।१३।२१ ” इत्यत्र परिभंसस उपरि शीर्षाधोऽस्थ्यात्रूकस्य निर्देशः कृतोऽस्ति । पृष्ठेपिकां विहाय नाऽस्त्यन्यदङ्गं यदेकत्वेन प्रतिभासेत, अतोऽनूकाऽनूक्याद्भ्यां पृष्ठेविकैव ग्रहीतव्या । सा च “ ग्रीवाभ्यस्त उष्णिहाभ्यः कीकसाभ्यो अनूक्यात् । अथर्व. २।३३।२, ऋ. १०।१६३।२, ” “ प्रतीच्यां दिशि भसदमस्य धेह्युत्तरस्यां दिश्युत्तरं धेहि पार्श्वम् । ऊर्ध्वायां दिश्यजस्याऽनूकं धेहि दिशि ध्रुवायां धेहि पाजस्यमन्तरिक्षे मध्यतो मध्यमस्य ॥ अथर्व. ४।१४।८ ” “यो विद्याद्ब्रह्म प्रत्यक्षं पंरूंषि यस्य सम्भारा ऋचो यस्याऽनूक्यम् ॥ अथर्व. ९।६।१ ” इत्यादिषु तावेकवचनत्वेनैव समागतौ, परन्तु “ सत्तः पात्रं स्थ्यांसायीषेऽनूक्ये अ. ११।३।९ ” इत्येकस्मिन्नेव मन्त्रेऽनूक्ये इति द्विवचनान्तं समागतम्, तत्राऽपि इतीयतो द्वित्वादनूकस्योत्तराऽधरविभागभास्त्वेन द्वित्वं प्रकल्प्य प्रदर्शनान्न काऽपि हानिः, एकस्मिन्नपि वस्तुनि दिक्परत्वव्यवहारेणाऽनेकत्वस्य दुर्वारत्वात् । अत्रांऽसयो र्मध्यदेहस्य न सन्धिरिति सायणस्य व्याख्यानन्तु न समीचीनम् । अत्र (पृष्ठेविकायां) त्रयस्त्रिंशद्देवानां समन्वयोऽस्ति तथाहि—“यस्य त्रयस्त्रिंशद्देवा अङ्गे सर्वे समाहिताः । स्कम्भं तं ब्रूहि कतमः स्विदेव सः ॥ अथर्व. १०।७।१३” “यस्य त्रयस्त्रिंशद्देवा निधिं रक्षन्ति सर्वदा । निधिं तमद्य को वेद यं देवा अभिरक्षथ ॥ अ. १०।७।२३” “यस्य त्रयस्त्रिंशद्देवा अङ्गे गात्रा विभेजिरे । तान्वै त्रयस्त्रिंशद्देवानेके ब्रह्मविदो विदुः ॥ अ. १०।७।२७ ॥ “ त्रयस्त्रिंशद्देवतास्त्रीणि च वीर्याणि प्रियायमाणा जुगुपुरप्स्वन्तः । अस्मिंश्चन्द्रेऽधि यद्धिरण्यं तेनायं कृणवद् वीर्याणि ॥ अथर्व. १९।२७।१० ” एषु मन्त्रेषु त्रयस्त्रिंशद्देवानामेकाङ्गे विद्यमानत्वं प्रदर्शितम् । अत्र देवा इत्यस्त्यां नाम “देवो दानाद्वा दीपनाद्वा द्योतनाद्वा द्युस्थानो भवतीति वा यो देवः सा देवता ॥ निरुक्त. अ. ७।१५” अस्थिषु च दीपनक्रियावत्त्वं द्योतनक्रियावत्त्वञ्च स्पष्टमेव, अनूकास्थिषु च शरीरमध्यवर्तित्वाद् द्युस्थानत्वमस्ति । प्राचीनाऽस्थिसङ्घातात्पञ्चदशहस्तमितभूम्यधस्तिरोहितादपि घोरान्धकारनिबिडप्रदेशे ज्योतिर्द्देतीति प्रत्यक्षसिद्धम् । अज्ञास्तज्ज्योतिरभिप्रेतनाम्ना कथयन्ति तत्प्रदेशगमने बिभ्यति च । ऋग्वेदे त्वनूके त्रिस्थानेषु विभज्य दिव्यन्तरिक्षपृथिवीति लोकत्रयेण साम्यं प्रकल्प्य प्रतिलोकमेकादशाऽस्थ्नां स्थितिरुक्ता तथाहि—“ये देवासो **दिव्येकादश स्थ** पृथिव्या मध्येकादश स्थ । अप्सुक्षितो महिनैकादश स्थ ते देवासो यज्ञमिमं जुषध्वम् ॥ ऋ. १।१३९।११ ॥ हे देवासो=देवाः=द्योतनशीला **ये**=यूयं **दिवि**=द्युलोके **एकादश स्थ**=एकं च दश चेत्येतत्सङ्ख्याकाः स्थ=भवथ तथा **पृथिव्यामधि**=उपरि **एकादश स्थ**=एतत्सङ्ख्याका भवथ किञ्च **अप्सुक्षितः**=तद्धेतुत्वात्तच्छब्द्यं अप्स्वन्तरिक्षे क्षियन्ति निवसन्तीत्यप्सुक्षितः । क्षीयतेः क्विप्, तत्पुरुषे कृतीत्यलुक् ॥ पा. ६।३।१४ ॥ अन्तरिक्षवासिनो देवा **एकादश स्थ** तत्सङ्ख्याका भवथ **यद्वा** अन्तरिक्षस्येयं सञ्ज्ञा आपः पृथिवी इत्यन्तरिक्षनामसु पाठात् । यद्यपि तिस्र एव देवता इत्युक्तत्वात् क्षित्याद्यभिमानिन्यो देवतास्तिस्र एव तथापि **महिना**=महत्वेन स्वस्वविभूत्या त्रयस्त्रिंशत्सङ्ख्याका भवन्ति तत्तत्स्थाने अन्यास्तद्विभूतय इत्युक्तत्वात् । **महिना देवाम** इत्येते सर्वत्र सम्बध्यन्ते, ते यूयं हे देवासो त्रिलोकसङ्ख्याका देवा इममस्मदीयं यज्ञं जुषध्वं सम्भजध्वं तत्सम्बन्धि हविर्वा सेवित्वा प्रीणयध्वं, एकं च दश च एकादश प्रागेकादशभ्य (पा. ५।३।४९) इति निपातनाद्दीर्घः । सङ्ख्येति पूर्वपदप्रकृतिस्वरत्वमिति सायणः । त्रयस्त्रिंशद्देवानां सङ्ख्या तु “ अष्टौ वसवः, एकादश रुद्राः, द्वादशाऽऽदित्याः प्रजापतिश्च वषट्कारश्च । ऐत० ब्रा. १।१० ” “ अष्टौ वसवः, एकादश रुद्राः, द्वादशाऽदित्या, इन्द्रश्च प्रजापतिश्च त्रयस्त्रिंशदिति । कतमे वसव इत्यग्निश्च पृथिवी च वायुश्चान्तरिक्षं चादित्यश्च

द्यौश्च चन्द्रमाश्च नक्षत्राणि चैते वसव एतेषु हीदं वसु सर्वं हितमिति तस्माद्वसव इति । (वसति अस्मिन् सर्वमिति वसुरिति व्युत्पत्त्या अग्न्यादिषु सर्वपदार्थजातस्य साक्षात्परम्परया वा निहितत्वाद्वसुशब्देनाऽग्न्यादय एव ग्रहीता इत्यभिसन्धिः) । कतमे रुद्रा इति दशेमे पुरुषे प्राणा आत्मैकादशस्ते यदाऽस्माच्छरीरान्मर्त्यादुत्क्रामन्त्यथ रोदयन्ति तद्यद्रोदयन्ति तस्माद्रुद्रा इति । (अन्यस्थले रोदयन्ति रुदन्ति वेति रुद्रा इत्यर्थपरत्वेन ' मन्यु र्मनु र्महिनसो महांश्छिव ऋतुध्वजः । उग्ररेता भवः कालो वामदेवो धृतव्रतः ॥ भा. ३।१२।१२ ' इत्यादि नामानि दत्तानि । बृहदारण्यकस्य ब्रह्मविद्यापरत्वेन प्राणानां शरीरिसहितानां रुद्रत्वं स्थापितमिति न विरोधः) । कतम आदित्या इति द्वादश वै मासाः संवत्सरस्यैत आदित्याः (विवस्वानर्यमा पूषा त्वष्टाऽथ सविता भगः । धाता विधाता वरुणो मित्रः शक्र उरुक्रमः ॥ भा. ६।६।३९ ॥ इत्यादौ विवस्वदादयो ये आदित्यत्वेन परिगणितास्ते द्वादशमासानामधिष्ठातारः, अत्र त्वधिष्ठेयमासा एव गणिता इति न परस्परविरोधः) । एते हीदं सर्वमाददाना यन्ति ते यदिदं सर्वमाददाना यन्ति तस्मादादित्या इति ॥ बृ. उ. ३।९।२–५॥" अत्र वषट्कारस्थाने इन्द्रः समाम्नात इति विशेषः । यद्यपि सायणेन स्पष्टतयाऽस्थीनि नोक्तानि परन्तु बृहदारण्यकीयरुद्राऽऽदित्यशब्दयोर्व्याख्यानेन स्पष्टमेव शारीरपरत्वं मन्त्रस्य सञ्जातम् । पृष्ठेपिकायां समस्ताङ्गानां प्रतिबद्धत्वात्तत्र सूक्ष्मेऽपि भङ्गे समस्तशरीरस्य कार्याऽकरत्वात्तन्निधित्वेन देवत्वेन च वर्णितम्—"कति देवाः कतमे त आसन् य उरो ग्रीवाश्चिक्युः पूरुषस्य । कति स्तनौ व्यदधुः कः कफोडौ कति स्कन्धान् कति पृष्टीरचिन्वन् ॥ अ. १०।२।४ " कतमे स्थाने कति कियत्सङ्ख्याकाः देवाः द्योतनशीलाः स्वेतरापेक्षया प्रधाना वा आसन् सन्ति ये पूरुषस्य उरोग्रीवाश्चिक्युः चिन्वन्ति स्थिरीकुर्वन्ति कति च देवाः स्तनौ कफोडौ स्कन्धान् पृष्टीरचिन्वन् ते कति सन्तीति परोक्षप्रश्नः, परन्तु ये उरोग्रीवाश्चिक्युः स्तनादींश्च व्यदधुरिति वाक्याभ्यां स्पष्टमेव पृष्ठेपिका समायाति, पृष्ठेपिकाया असद्भावे उरोग्रीवाणां चयनाऽसम्भवात्, स्तनादिविधानस्याऽपि खपुष्पायितत्वं स्यात् । अस्मिन्मन्त्रे देवा इत्यनेन त्रयस्त्रिंशत्सङ्ख्यावत्त्वं सर्वाऽस्थिप्रधानत्वञ्च पृष्ठेपिकाऽस्थ्नां स्पष्टतया प्रतिपादितमस्ति, अतः पूर्वोक्तमन्त्रेषु त्रयस्त्रिंशद्देवशब्देन पृष्ठेपिकायां त्रयस्त्रिंशदस्थीनीति स्पष्टतया समायातम् । तेषां विभागो **यथा**—त्रयस्त्रिंशद्देवानां साम्येन अनूकास्थिगणनायां प्रथमतो योगिमार्गाऽनुसारेण तान्त्रिकनयेन च सुषुम्णाया मूलाधारादुत्थितत्वात्पृष्ठवंशस्य सर्वतोऽधस्तनगुदाप्रविष्टभागस्य मूलाऽऽधारत्वात्प्रजापतेश्चादिकारणत्वात्प्रथमकरूकरस्य(करोरुकायाः)प्रजापति र्देवता, द्वितीयस्येन्द्रः, *तृतीयस्याऽग्निः, चतुर्थस्य पृथिवी, पञ्चमस्य वायुः, षष्ठस्याऽन्तरिक्षं, सप्तमस्याऽऽदित्यः, अष्टमस्य द्यौः, नवमस्य* चन्द्रमाः, दशमस्य नक्षत्राणि, एकादशस्य धाता इति मूलाधारादेकादशकरूकराणामेकादश देवा बोध्याः । यद्यप्यत्र धातुः परिगणनमादित्येषु कृतमस्ति तथापि वसुषु प्रजापतेरागतत्वात्प्रजापतेश्च धातेत्यपरपर्यायत्वात्तत्र धातुर्योगः समीचीनतामेव द्योतयति, अनेन प्रकारेण मूलाऽऽधारादूर्ध्वगणनया द्वयोः कटिकरूकरयोः प्रथमैकादशसङ्ख्यायां गणनं समाप्यते । द्वितीयैकादशकसङ्घश्च तृतीयकटिकरूकरादारभ्यते स च क्रमेण मित्राऽर्यमरुद्वरुणसूर्यभगविवस्वत्पूषन्सवितृत्वष्टृविष्णुभिरधिष्ठितो ज्ञेयः । सोऽपि पूर्ववत् (मूलाधारादूर्ध्वगणनया) अष्टपृष्ठकरूकरपर्यन्तं समाप्यते । तदुपरि ऊर्ध्वतनानि चत्वारि पृष्ठकरूकराणि सप्त च ग्रीवाकरूकराणि मिलित्वा तृतीयैकादशको गणः समाप्यते । स च मन्युमनुमहीनसमहच्छिवर्तुध्वजोग्ररेतोभवकालवामदेवधृतव्रतनामभीरुद्रैः समधिष्ठितो बोध्यः। याज्ञिकविभागे इयमेव गणना ज्यायसी प्रतिभाति, मूलाधारे मूलभूतदेवानां समागमनान्मध्येऽन्तरिक्षाऽधिष्ठातृदेवानां सूर्याणां समागमनादन्ते ग्रीवासमाप्तिपर्यन्तं रुद्राणामागमनात् । प्रथमैकादशके यत्प्रजापतीन्द्रपृथिव्यादीनामागमनमस्ति तत्र तन्त्रशास्त्रेऽयं भागः पृथिवीमण्डलत्वेनैव परिगणितः । मध्ये आदित्यानां यदाऽऽगमनं तत्राऽग्निमण्डलं प्रतिपादितम् , आदित्यानाञ्चाऽग्न्यधिष्ठातृत्वात्तदपि युक्तमेव । तृतीयैकादशके मर्मपुञ्जस्य समाग-

मनात् " रुद्रो वो ग्रीवा अशरैत् पिशाचाः पृष्टीर्वोऽपि शृणातु यातुधानाः ॥ अ. ६।३२।२ " इत्यादिकृत्यास्थले ग्रीवायां रुद्राऽधिकारत्वस्य वर्णनात्तत्पीडनेन शीघ्रमृत्योः सम्भवाच्च सोऽपि प्रविभागः सम्यगेवाऽऽस्ते, इति सर्वं समीचीनमेवाऽवभाति । इममेवाऽभिप्रायमाशय्य " अनूकं त्रयस्त्रिंशः । द्वात्रिंशद्वा एतस्य करूकराण्यनूकं त्रयस्त्रिंशं तस्मादनूकं त्रयस्त्रिंशः " इति शतपथे (१२।२।४।१४) प्रतिपादितम् । अधुना पृष्ठाऽस्थ्नां सङ्ख्यायां शङ्कालेशोऽपि नाऽवशिष्टः, परन्तु वर्तमानसुश्रुतचरकयोरायुर्वेदीयसंहितयोरस्मिन् विषये महान् विप्लवो दृश्यते, तट्टीकाकर्तृभि र्मूलमपश्यद्भ्याऽन्यथैव प्रलपितम् । तत्र वेदोक्तप्रामाण्यं पुरस्कृत्योक्तसंहितयोः पाठः शोधयितव्यो इमां सृतिं विहाय नाऽन्यथागतिः प्रतिभाति । आयुर्वेदस्य च वेदमूलत्वाद्भ्रान्तिस्थले तन्मूलगवेषणेनैव निश्चयो भवेदिति सर्वसुधीभिरगत्या स्वीकरणीयमेव प्रतीयते ।

पृष्ठाऽस्थिगणने वर्तमानसुश्रुते ' पृष्ठे त्रिंशत् ' इति पाठो लभ्यते, तत्र लेखकादिप्रमादात् त्रिंशच्छब्दात्पूर्वे त्रयःशब्दो लुप्तो भवेदिति सम्भवद्रूपमेतेन न ग्रन्थकर्तुरुपर्याक्षेपः सम्भवति, अतिप्राचीनपुस्तकेष्वीदृशानां लेखकप्रमादानां शतशो दृष्टत्वात् । त्रयस्त्रिंशदितिपाठे तु समीचीनैव सौश्रुती पृष्ठाऽस्थिगणना । अथवा शल्यतन्त्रे स्थूलाऽस्थ्नां परिगणनस्य स्वयमेव सूचितत्वाच्चतुरस्थिसङ्घातस्य पृष्ठेपिकापुच्छस्याऽत्यन्तछिद्रत्वेनैकतया दृश्यमानत्वादेकत्वेनाऽऽचार्येण परिगणितम्भवेत्तर्हि ' पृष्ठे त्रिंश ' दित्यपि पाठः सम्भवति यथा नितम्बेऽस्थिपञ्चत्वेऽपि " श्रोण्यां पञ्च, गुदभगनितम्बेषु चत्वारि त्रिकसंश्रितमेक- "मिति न्यदर्शि तथा पृष्ठेपिकापुच्छेऽप्यकारीति सम्भवद्रूपम् । अस्थिशतत्रयस्य सङ्ख्याऽप्यमुया सृत्या पूर्णा समायाति । त्रयस्त्रिंशदिति पाठे तु त्रिंशात्त्रीण्यस्थीन्यधिकानि भवन्त्यतः ' पृष्ठे त्रिंश— 'दिति पाठ आचार्यस्याऽभिप्रेतो भवेदिति प्रतिभाति ।

अत्र हार्नेले (Hoernle) प्रभृतिभि र्नवीनाऽऽयुर्वेदोद्धारकम्मन्यैश्चतुर्विंशतिपृष्ठकशेरुकापर्यन्तं पृष्ठवंशं नियतीकृत्याऽवशिष्टनवकशेरुका भागद्वये विभज्य पञ्चकशेरुकाणां ' त्रिक ' मिति, अधस्तनानां चतसृणां गुदास्थिअनुत्रिकास्थि चेति नाम्नी ददति । तेषाम्मते पृष्ठवंशे चतुर्विंशतिरेवाऽस्थीन्यवशिष्यन्ते तदानीं पृष्ठे त्रिंशदित्यपि सुश्रुतीयः पाठोऽशुद्धतामावहति । त्रिकमनुत्रिकमित्यस्थिविशेषसञ्ज्ञा सुश्रुते चरके वा न क्वाऽप्युपलभ्यते न वा वेदेषु, ब्राह्मणेषु, आरण्यकेषु, चेदृशी सञ्ज्ञा कृता दृश्यते । " पक्वाऽऽशयस्थोऽन्त्रकूजं शूलं नाभौ करोति च । कृच्छ्रमूत्रपुरीषत्वमानाहं त्रिकवेदनाम् ॥ सु. नि. १।२४ " इत्यादौ यद्यपि त्रिकशब्दः समागतो दृश्यते परन्तु स न कस्मिंश्चिदप्यर्थविशेषे रूढोऽस्ति किन्तु त्रयाणां समाहारस्त्रिकम्, त्रयाणां नितम्बाऽस्थिद्वयपृष्ठवंशाऽस्थ्नां समाहारस्त्रिकमित्येतं साधारणमर्थमेव बोधयति, न तु विशेषसञ्ज्ञां प्रतिपादयति, अतएव " क्षारोदकनिभः स्रावो वर्ज्यो रक्ताऽऽशयात्स्रवन् । आमाशयात्कलायाम्भोनिभश्च त्रिकसन्धिजः ॥ सु. सू. २२।१० ॥ " इत्यत्र त्रिकशब्दव्याख्याने बाहुग्रीवाऽस्थित्रयसङ्घातोऽत्र त्रिकमिति डल्हणो व्याख्यातवान् अत्रास्थित्रयसङ्घाताऽभावेऽपि त्र्यवयवसङ्घाते एव डल्हणकथनस्याऽऽशयो बोध्यः । अतस्त्रिकाऽनुत्रिके इति पृष्ठवंशेपिकाऽन्तिमनवकशेरुकाणां ये सञ्ज्ञे कृते स्वस्ते एकान्ततो निर्मूले एव । वातस्य पक्वाशयस्थानत्वात्कटित्रिकसन्धेश्च तत्सामीप्यात्कुपितवातोपद्रवस्थानीयत्वेन तन्निर्देशात् साधारण्येन त्रिकमितिकथने तत्रस्थप्रदेशो झटिति बुद्ध्यारूढो भवति परन्तु तत्राऽपि सन्धिरेव जनानां मनसि स्फुरति न पुनः पृष्ठेपिकापञ्चकशेरुकासङ्घातः । न च त्रयाणां समाहारस्त्रिकमिति यौगिकमेवाऽर्थमादायाऽस्तु तत्र त्रिकस्य व्यवहार इति वाच्यम् ? तत्राऽस्थिपञ्चकसङ्घातत्वेन त्रित्वकथनाऽयोग्यत्वात् । नच ' त्रिकसंश्रितमेक 'मिति वाक्यस्य का गतिरिति वाच्यम् ? तत्राऽपि यौगिकार्थे एवाऽऽचार्यस्याऽभिप्रायस्तथाहि " **श्रोण्यां पञ्च** " इत्याचार्यस्य प्रतिज्ञा, तत्परिगणनायां " गुदभगनितम्बेषु चत्वारि

त्रिकसंश्रितश्चैक" मिति यथाऽवस्थितः पाठोऽस्ति अयमत्राऽभिसन्धिः—नितम्बाऽस्थिफलकगुदाऽस्थि (कुकुन्दरास्थि) भागद्वयमध्यवर्तिनी तिर्यङ्ङ्गिःसृता पट्टिका चेति प्रतिश्रोण्यस्थित्रयमस्ति, श्रोणिद्वयसंयोगे मध्यपट्टिकाद्वयं सन्धीयमानमेकत्वं भजद्भगाऽऽधारत्वेनाऽवतिष्ठते, पश्चाच्चैतत्त्रिकद्वयं पृष्ठेपिकाऽस्था सन्धीयते । इदमस्थिगह्वरमेतत्स्थानीयपेशीसमुदायेनाऽऽवृतं सदधस्ताद्गुदद्वारसञ्ज्ञां पुरतो मध्यतो लिङ्गभगस्थानसञ्ज्ञां भजति । पश्चाच्छ्रोणिनितम्बस्फिगादिसञ्ज्ञात्वेन नानाविधं नानानामभिः परिगण्यते । अस्य विवरस्योपरिष्टादधस्ताच्च " नाभिपृष्ठकटीमुष्कगुदवङ्क्षणशेफसाम् । एकद्वारस्तनुत्वक्को मध्ये वस्तिरधोमुखः ॥ एकसम्बन्धिनो ह्येते गुदाऽस्थिविवरस्थिताः । वस्तिर्वस्तिशिरश्चैव पौरुषं वृषणौ गुदम् ॥ अलाब्वा इव रूपेण शिरास्नायुपरिग्रहः । मूत्राशयो मलाधारः प्राणाऽऽयतनमुत्तमम् ॥ पक्वाशयगतास्तत्र नाड्यो मूत्रवहास्तु याः । तर्पयन्ति सदा मूत्रं सरितः सागरं यथा ॥ सूक्ष्मत्वान्नोपलभ्यन्ते मुखान्यासां सहस्रशः । नाडीभिरुपनीतस्य मूत्रस्यामाशयान्तरात् ॥ जाग्रतः स्वपतश्चैव स निःस्यन्देन पूर्यते । आमुखात्सलिले न्यस्तः पार्श्वेभ्यः पूर्यते नवः ॥ घटो यथा तथा विद्धि वस्तिं मूत्रेण पूर्यते ॥ सु. नि. ३।१८।२३ " एतत्सर्वं गुदाऽस्थिगह्वरे निहितमस्ति, अत्राऽऽचार्यस्याऽभिप्रायमजानाना महाशया गुदाऽस्थिगह्वरे वस्त्यादिसमुदायस्य कथं सन्निवेश इत्यादि संशेरते, परं ते गुदाऽस्थिविवरशब्दस्यार्थमेव न जानन्ति । बृहदन्त्रस्याऽन्तिमभागस्य गुदाशब्दवाच्यत्वादन्त्रस्य च मांसस्नाय्वादिमयत्वात्तत्राऽस्थ्न एवाऽभावः । अत्र गुदसमन्ताद्यान्यस्थीनि (नितम्बाऽधस्तनपृष्ठवंशपुच्छाऽख्यानि) तेषांपेश्यादिनिर्मितसंयोगेन यदिदं गह्वररूपं सञ्जातं तदेवाऽत्र गुदाऽस्थिविवरेणाऽभिप्रेयते । " नाभिपृष्ठकटीमुष्कगुदवङ्क्षणशेफसाम् । एकद्वारस्तनुत्वक्को मध्ये वस्तिरधोमुखः । एकसम्बन्धिनो ह्येते गुदास्थिविवरस्थिताः " एते एकसम्बन्धिनः (परस्परं सम्बद्धाः सन्तः गुदाऽस्थिविवरस्थिताः) सन्तीति वाक्येन संशयाऽवकाश एव नाऽवशिष्यते । अत्र कटीशब्देन नितम्बाऽस्थिग्रहणम्, तच्च षड्भिभागभक्तं सदपि अभिप्रायविशेषेण । पञ्चभागत्वेनावशिष्यते । पृष्ठशब्देन पृष्ठेपिकापुच्छो ग्राह्यः । एतदस्थिसङ्घातत्रयेण गुदाऽस्थिविवरं निर्मीयते न तु गुदायां कानिचिदस्थीनि सन्ति इति स्पष्टमेवाऽऽचार्येण ज्ञापितम् । ये तु पृष्ठवंशपुच्छं ' अनुत्रिकास्थि गुदास्थि ' इति नाम्नोल्लिखन्ति तदेकान्ततो निर्मूलम् । गुदद्वारस्योभयपार्श्वयोरतिसन्निहितत्वान्नितम्बास्थिद्वयाऽधोभागौ (ऊर्वस्थिसन्ध्यधोऽस्थिनी) येनकेनाऽपि प्रकारेण गुदाऽस्थित्वेन वक्तुं युज्येते न पुनः पृष्ठपुच्छम् । अस्थिचतुष्टयसङ्घातरूपस्य (पुच्छस्य) सुश्रुते (सूत्र० २।३।६) कुटकास्थीति नाम प्रदत्तम् इदमेवाऽभिप्रेत्य श्रोण्यस्थिगणनायामाचार्येण श्रोण्यां पञ्चेति प्रतिज्ञातम् " तत्र गुदभगनितम्बेषु चत्वारि त्रिकसंश्रितश्चैकमिति " । यद्यप्यत्र श्रोण्यां षडिति वक्तुमुचितं तथाऽपि नितम्बाऽस्नोश्चत्वारो भागाः पृथक्त्वेन यथा संलक्ष्यन्ते तथा मध्यपट्टिकाद्वयस्य न पृथक्त्वेन प्रतीतिर्भवति किन्तु संश्लिष्टतया एकत्वेनैवेति मनसि निधाय त्रिकद्वयाऽऽश्रितं यत्तिर्यक्पट्टिकाद्वयं तत्संश्रितं=संश्लिष्टं सदेकमेकत्वेनैव यस्मात्प्रतीयते, अतो न षडिति वक्तुमुचितम् किन्तु पञ्चैव श्रोण्यामस्थीनि गणयितव्यानि । अतःसुश्रुतीय पृष्ठास्थ्नां त्रयस्त्रिंशदिति त्रिंशदितिवा संख्या श्रोण्यस्थ्नां पञ्चेति सङ्ख्या च समीचीनाऽस्ति । व्यवहारार्थं विभागाः प्रकल्पयितुमिच्छा चेत्तर्हि श्रोणिफलकं दक्षिणं, श्रोणिफलकमुत्तरं, श्रोण्यस्थ्यधोभागो दक्षिणः, श्रोण्यस्थ्यधोभाग उत्तरः, भगास्थि चेति पञ्च नामानि कल्पयितव्यानि ।

श्रोण्यस्थिविवरणे सम्प्रत्युपलभ्यमानचरकीयपुस्तकानां पाठा अराजन्यके जनपदे प्रजा इव गोपालाऽभावे गाव इव अनियता दृश्यन्तेऽतस्तत्पाठोद्धरणं निष्प्रयोजनमिव प्रतिभाति । भेले त्रिकसंश्रितमिति न दृश्यते, केषुचिच्चरकपुस्तकेषु तु सुश्रुतादुद्धृत्य स्थापितमस्ति परन्त्वग्निवेशस्य भेलसहाध्यायित्वेन द्वयोरपि संहितयोः प्रायः पाठसादृश्यदर्शनेन चाऽनुमीयते यत्त्रिकसंश्रितमितिपाठश्चरके नास्त्येवेति । अस्तु वा तथैवाऽत्र नाऽस्म-

दीयो दुराग्रहः परन्तु पद्यसङ्ख्या वर्तमानपाठे न केश्चिदपि पूर्वतोऽस्माभिरपाठशोधनस्याऽऽवश्यकता प्रतिभाति, सा चाऽपि सुधुताऽनुकूलैव कर्तव्या । शारीर धान्वन्तराणामेव श्रेष्ठत्वस्य महर्षाभिरेवैवोक्तत्वात् इत्यल-मतिप्रपञ्चितेन ।

(सं. ६०) करूकराणि=" संकर्षन्ती करूकरं मनसा पुत्रमिच्छन्ती । पतिं भ्रातरमात्स्वान् रदिते अर्बुदे तव ॥ अ. ११।११।८ " हे अर्बुदे ! मृत्यधिष्ठातृदेवते तव=त्वदीये रदिते दन्तानां व्यापारे कृते सति अर्थान्निःशेषमांसादिभक्षणेन केवलाऽस्थिपञ्जररूपेऽवशिष्टे शवे सत्यपी " प्रतिघ्नानाश्रुमुखी कृधुकर्णी च क्रोशतु । विकेशी पुरुषे हते रदिते अर्बुदे तव ॥ अ. ११।११।७ " इति मन्त्रोद्दिष्टदशायुक्ता सती पतिना-स्थिपञ्जररूपं करूकरं करोरुकाप्रदेशमालोच्य संकर्षन्ती शवक्रियार्थं रणाऽङ्गणप्रदेशाद्बहिरानयन्ती, तदाह्यविरि-यार्थं मनसा पुत्रमिच्छन्ती, स आगत्याऽस्य पारलौकिकीं क्रियां कुर्यादित्यभिलषन्ती अथ च तस्याऽपि निधन-प्रातिश्रवणात् आत्=अनन्तरं भ्रातरं पतिभ्रातरं स्वभ्रातरं वा इच्छन्ती अथ च तयोरपि निधनश्रवणात् आत्-स्वान् स्वकीयसम्बन्धिनः यान् कांश्चिदपि इच्छन्ती भूयादिति प्रार्थना । यत्तु " करू-अनुकरणशब्दोऽयम् । तत्करोतीति करूकरं हस्तपादाद्यवयवगतं सन्धिमद् अस्थिजातं तत् सम्यक् कर्षन्ती । लोके हि भयवशाद् उभ-योर्हस्तयोः परस्पराऽङ्गुलिनिपीडनेन तादृशं शब्दं उत्पादयन्ति " इत्याद्यसङ्गतं सायणेन यथेच्छं प्रलपितं तत्तु शतपथाद्याशयमनालोच्य लिखितमस्तीति विद्वद्भिराकलनीयम् । करूकरमिति लिङ्गयुक्तवत्याऽत्रास्त्री सञ्ज्ञा । तानि च पृष्ठवंशे प्रधानानि सन्ति । भासनलिकादौ तु तरुणाऽस्थिरूपाणि यथा—" अनूकं त्रयस्त्रिंशत् । द्वात्रिंशद्वैषां करूकराणि आत्मा त्रयस्त्रिंशादिति ॥ (१२।२।४।१४) शतपथः । करूकरशब्दादेवाऽपभ्रस्य 'कशे' इति शब्दः प्रवृत्त इति प्रतिभाति । अस्मिन्नर्थे अमरादिभिः कशेरुकाशब्दः प्रयुक्तः स च कशेरुकन्दाऽऽकृति-त्वेन कशेरुरिवेत्यर्थे ' इवे प्रतिकृतौ' (पा. ५।३।९६) इत्यनेन कन् प्रत्यये ' क्वचित् स्वार्थिकाः प्रकृतितो लिङ्गवचनान्यतिवर्तन्ते' (परि० ८४) इति कशेरुकाशब्दः स्थापितः, वेदेषु त्वस्याऽभावोऽस्ति । " पृष्ठाऽस्थि तु कशेरुका " इत्यमरटीकायां कं वायुं शृणाति केन शीर्यते वा । 'कॄश एरुङ् चास्य' (उ. १।८८) इत्युः । सञ्ज्ञायां कन् (पा. ५।३।७५) ' केऽणः' (पा. ७।४।१३) इति ह्रस्वः । यद्वा कशति कश्यते वा । कशाशब्दे बाहुलकादेरुः, स्वार्थे कन् इति भानुदीक्षितेन प्रतिपादितम् । परन्तु तालव्यान्तशब्दार्थकस्य कशाव-तोरभावः । प्रथमव्युत्पत्तौ चाऽवयवार्थाऽवगमाऽभावात्र श्रद्धास्पदम् । अस्मादाकृत्यैव कशेरुशब्दादयमपि प्रवृत्त इति प्रतिभाति, अस्तु वा केनाऽपि प्रकारेण सिद्धिः । सञ्ज्ञाशब्दानामव्युत्पन्नपक्षस्यैव व्यापकत्वात् । परन्त्वेतं निश्चितं यद्धन्वन्तर्यात्रेयचिकित्सासंहितयो निर्माणकालादनन्तरमेवाऽयं शब्दः प्रकृतार्थे जनैः प्रकल्पितोऽस्तीति ।

(सं. ६१) पृष्टयः=" क्षणादणमिव सत्रयन् कृत्यां कृत्याकृतो गृहम् । चक्षुर्मन्त्रस्य दुर्हार्दः पृष्टीरपि शृणाञ्जन ॥ अथर्व. १९।४५।१" अत्र पृष्टीः पार्श्वाऽस्थीनीति सायणः । " चक्षुर्मन्त्रस्य दुर्हार्दः पृष्टीरपि शृणी-मसि ॥ अथर्व. २।७।५" अत्र पृष्टयः पर्शवः पार्श्वाऽस्थीनीति सायणः । " पृष्टी वर्जेतो पार्श्वे कस्तत् समदधा-दपिः । अ. ११।१०।१४" पृष्टीः पृष्ठवंशस्य अभितो वर्तमानाः पर्शवः इति सायणः । " मूर्णा मृगस्य दन्ता अपि शीर्णा उ पृष्टयः । अ. ४।३।६" पृष्टयः पर्शव इति सायणः । " पृष्टीर्मे राष्ट्रमुदरमंसौ ग्रीवाश्च श्रोणी । यजु० २०।८" पृष्टीः पृष्ठदेश इति उव्वटमहीधरौ । " क्रव्यो वो ग्रीवा अशरैत् पिशाचाः पृष्टी वोऽपि शृणातु यातुधानाः । अ. ६।३२।२ पृष्टीः पार्श्वाऽस्थीनीति सायणः । उपरिनिर्दिष्टमन्त्रेषु सायणेन पृष्टिशब्दः पार्श्वाऽ-स्थिषु रूढः कृतः परन्त्वत्र सायणस्य भ्रमः " यास्ते ग्रीवाः ये स्कन्धाः या पृष्टी याश्च पर्शवः । अ. १०।८।२०" " देवानां पत्नीः पृष्ट्य उपसदः पर्शवः । अ. ९।१२।६" इत्यादिमन्त्रेषु पृष्टिपर्शुशब्दयोरेकत्राऽऽगमनात् । नहि

समानार्थानां शब्दानामेकार्थस्फोटनाय एकस्मिन् सूक्ते प्रयोगो दृश्यते किम्पुनरेकमन्त्रे, अतोऽस्मिन्नर्थे न किञ्चिदपि विशेषो वक्तुमत्रावशिष्यते। परन्तु पृष्टिरिति कस्याऽवयवस्य नामेति निर्णयस्याऽप्यात्रश्यकत्वमवशिष्टमेव, तत्र यथाशक्ति प्रयत्यते तथाहि—" देवानां पत्नीः पृष्टय उपसदः पर्शवः " इत्यत्र पृष्टीनां देवपत्नीभिः सार्कं सादृश्यदानात् " कति देवाः कतमे त आसन् य उरो ग्रीवाश्चिक्युः पूरुषस्य। कति स्तनौ व्यदधुः कः कफोडौ कति स्कन्धान् कति पृष्टीरचिन्वन्। अ. १०।२।४ इति मन्त्रे पृष्ठेषिकाकशेरुकाणां विशेषतो देवत्वाऽभिधानात्पृष्टीनाञ्च तत्पत्नीत्वेनाऽऽम्नानात्पत्नीनाञ्च शास्त्रेऽर्द्धाङ्गत्वेन कथनात् पृष्ठकशेरुकाशृङ्गाण्यत्र पृष्टिशब्दवाच्यानि ग्रहीतव्यानि तेषामेव पृष्ठकशेरुकाभिन्नत्वेन दृश्यमानत्वान्मिळित्वा कार्यकरत्वाच। " शृणाम्यस्य पृष्टीरपि वृश्चामि यच्छिरः। अ. ५।२३।९ " " तं जहि तेन मन्दस्व तस्य पृष्टीरपि शृणीहि। अ. १६।७।१२ " " तस्याऽग्ने पृष्टी र्हरसा शृणीहि त्रेधा मूलं यातुधानस्य वृश्च। अ. ८।३।१० " " याः पार्श्वे उपर्पन्त्यनुनिक्षन्ति पृष्टीः अ. ९।१३।१५ " इत्यादिमन्त्रकदम्बेऽस्यार्थस्यैवोचितत्वात्। शतपथे तु पर्शुकानां कारूकरशृङ्गनिबद्धत्वात्ताच्छ्ब्द्यमितिन्यायमङ्गीकृत्य पर्शुकासु पृष्टित्वमारोप्य पृष्टिशब्देन द्वित्रस्थाने व्यवहृता यथा—" ते रेतस्सिचो र्वेलयोपदधाति। पृष्टयो वै रेतःसिचौ मध्यमु पृष्टयो मध्यत एवाऽस्मिन्नेतदन्नं दधात्युत्तरे उत्तरमेवास्मादेतदन्नं दधात्यरत्निमात्रेऽरत्निमात्राध्यन्नमद्यते॥ श. ७।५।१।१३ " " एतेन सप्तदशेन संवत्सरेण प्रजापतिना प्रजनयित्रयिताः प्रजाः प्रजनयति ताः सृष्ट्वाऽऽत्मन् प्रपादयते रेतः सिचोर्वेलया पृष्टयो वै रेतःसिचौ मध्यमु पृष्टयो मध्यत एवाऽस्मिन्नेताः प्रजाः प्रपादयति सर्वत उपदधाति सर्वत एवाऽस्मिन्नेताः प्रजाः प्रपादयति॥ श. ८।४।३।२० " इत्यादौ लक्षणया पर्शुकासु व्यवहृतोऽपि पृष्टिशब्दो न सर्वथा तदर्थं बोधयति। शतपथस्य वेदभाष्यरूपत्वेन स न वेदादुच्चकक्षतामासादयितुमर्हति, इति विद्वद्भिराकलनीयम्।

(सं. ६३) भासदम्—" ऊरुभ्यां ते अष्ठीवद्भ्यां पार्ष्णिभ्यां प्रपदाभ्याम्। यक्ष्मं भसद्यं श्रोणिभ्यां भासदं भंससो विवृहामि ते॥ अ. २।३३।५ " अस्मिन्मन्त्रे भासदम्, भसद्यम्, इति च द्वयोरपि पृथग्ग्रहणाद्भासच्छब्दः भसच्छब्दश्च भिन्नार्थकौ " अदित्यै भसत्—वा. सं. २५।८ " इत्यत्र महीधरेण भसल्लिङ्गाग्रमित्युक्तम् तच्चोचितम्, स्त्रीप्रियत्वेन तन्निर्देशात्। भासदमिति स्फिचावेव ग्रहीतव्यौ श्रोण्योः पृथगुपादानात्। भसत्कटिप्रदेश इति सायणस्य व्याख्यानन्तु न समीचीनम् श्रोण्योरव कट्या अन्तर्भावात्। भंस इति योनिमुखवाचकं मुख्यम्, समप्रयोन्यां लाक्षणिको बोध्यः। यथा—" पादाभ्यां ते जानुभ्यां श्रोणिभ्यां परिभंससः। अनूकादर्षणीरुष्णिहाभ्यः शीर्ष्णो रोगमनीनशम्॥ अथर्व० ९।१३।२१ " अत्र क्रमेण पादावारभ्य पादजानुश्रोणिपरिभंसोऽनूकोष्णिहाशीर्षाणीति सप्तविभागैः समग्रशरीरं विभज्य प्रदर्शितम्। तत्र कट्याः पश्चाद्भागः श्रोणिभ्यामित्यनेन पुरोभागश्च परिभंससृशब्देन, तत्र भंससः योनिमुखात् परितः सर्वतः इत्यर्थकरणात् समग्रोऽपि कटिपुरोभागः गृहीतोऽस्ति। एवं भसद्भासदावपि, यथोचिति यथायथं ग्रहीतव्याविति।

(सं. ६४) प्लाशिः=प्रकर्षेण अस्यते क्षिप्यते इति प्लाशिः फुफ्फुसः। स हि उदानवायोर्निर्गमनप्रवेशाभ्यां निरन्तरं क्षिप्यते उच्छ्वसितसङ्कुचितावस्थात्वं प्राप्यते इति प्लाशिः। बाहुलकात्सिद्धिः। अथवा प्रकर्षेण अश्यते भुज्यते आकाशामृतमनेन इति प्लाशिः, तदुक्तं शार्ङ्गधरेण " नाभिस्थः प्राणपवनः स्पृष्ट्वा हृत्कमलान्तरम्। कण्ठाद्बहि र्विनिर्याति पातुं विष्णुपदाऽमृतम्॥ पीत्वा चाम्बरपीयूषं पुनरायाति वेगतः। प्रीणयन्देहमखिलं जीवयञ्जठरानलम्॥ शा. १।५।४८—४९ " या ते प्राण प्रिया तनूर्यो ते प्राण प्रेयसी। अथो यद्भेषजं तव तस्य नो धेहि जीवसे॥ अ० ११।६।९॥" अस्मान्मन्त्रादिममभिप्रायं विदित्वा शार्ङ्गधरेणाऽयं श्लोकः प्रतिबिम्बो भवेदिति प्रतीयते। अस्य मन्त्रस्य भाष्यन्तु त्रिदोषटिप्पण्यां द्रष्टव्यम्। 'अश' भोजने ...

"क्षुत्कुक्षिरिरा वनिष्ठुः पर्वताः प्लाशयः ॥ अथर्व. ९।१२।१२" इत्यत्र प्लाशेः पर्वतसादृश्यं प्रदर्शितम्, "प्लाशिभिरुपलान्" वा. सं. २५।८ इत्यत्रापि ग्रावसादृश्यं प्रतिपादितम्। "कुम्भीवनिष्ठु र्जनिता शचीभि-र्यस्मिन्नग्रे योन्यां गर्भो अन्तः। प्लाशि र्व्यक्तः शतधार उत्से दुहे न कुम्भी स्वधां पितृभ्यः॥ वा. सं. १९।८७" यः कुम्भी=कुम्भसादृश्याद्गर्भाशयः कुम्भः जरायुर्वा कुम्भः, सोऽस्ति निवासस्थानत्वेन यस्य सः कुम्भी=कर्मोऽ-धिकृतो जीवः पितृभ्यः स्वधां न दुहे न दोग्धि न ददाति धातूनामनेकार्थत्वात्। तस्य कुम्भः= सुराकुम्भः यः पूर्वमासेवितः स वनिष्ठु र्जनितः वनिष्ठुरूपेण परिणतः। अग्रे पूर्वं शचीभिः स्वसञ्चितकर्मभिर्योन्यामन्तः शतधारे उत्से=निर्झरे रसवाहिनीभिः सहस्रशः जरायोः सम्भ्रियमाणत्वादुत्सेनोपमा, तस्मिंश्च(जरायौ)जनिता स्थितो भवति। पश्चात्(योनिबहिर्गमनाऽनन्तरं)प्लाशिः=फुप्फुसः व्यक्तः स्वकार्यकरणशीलो जनिता अयमत्राऽभिसन्धिः, योऽज्ञः पितृप्रभृतिदेवानां तर्पणमकृत्वा केवलं शिश्नोदरव्यापारपरायणः सन् सुरानिर्माणग्रहणादिव्यापारतत्परो भवति तादृशःसन्नेव म्रियते चेत् स स्वकर्मभिः पूर्वं मातृयोन्यां जरायौ शेते। तत्र च कुम्भिनामनरके पतित इव विविधवेदना अनुभवन् नवममासादुत्तरं गर्भान्निःसृत्य व्यक्तफुप्फुसव्यापारश्चेज्जीवति अन्यथा तु मृतएवा ऽऽस्ते। पुनरपि ता एव वेदना अनुभवितुमुद्युक्तो भवति। जीवितोऽपि फुप्फुसव्यापाराऽधीनैकजीवनः सन् कासश्वासादिविविधवेदना अनुभवन्नाजन्मपर्यन्तमुच्छ्वसिति, अतोऽज्ञानिन इदं वेदनाचक्रं पुनःपुनरावर्तते। ज्ञानिनस्तु स्वकर्तव्याऽनुष्ठानात्समस्तकर्मबन्धनानि शीर्यन्ते निरिन्धनश्च सन्नमृतत्वमश्नुते इति। अत्र स्पष्टमेव "प्लाशि-र्व्यक्तः" इत्यनेन फुप्फुसीयव्यापारः समाख्यात स्तदधीनं प्राणिनां जीवनञ्चोक्तम्। अतो निस्सन्देहं प्लाशि-शब्देन फुप्फुस एव ग्रहीतव्यः। उक्तमन्त्रे 'प्लाशिः शिश्नोऽभवदिति' महीधरेण व्याख्यातम्, "इन्द्रस्य क्रोडोऽदित्यै पाजस्यं वा. सं. २५।८" अस्य भाष्ये तु 'प्रकर्षेणाऽश्नन्ति भुञ्जतेऽन्नानीति प्लाशयः शिश्नमूलनाड्यः तन्नाडीद्वारैवाऽन्नस्य देहे सञ्चारात्' इत्यत्र महीधरेणव्याख्यातम्। एवं "आन्त्रेभ्यस्ते गुदाभ्यो० ऋक् १०।१६३।३" अस्मिन् मन्त्रे प्लाशिभ्यः=क्लोमप्लीहादिसञ्ज्ञेभ्यश्च मांसेभ्य इति ऋग्वेदभाष्ये सायणः। तथाऽस्मिन्नेव मन्त्रे अथर्ववेदभाष्ये प्लाशेः=बहुच्छिद्रात् मलपात्रादिति सायणो व्याख्यत्। एतयोः (सायण-महीधरयोः) स्ववाक्यैनैव परस्परव्याघातादेतावुपेक्षितव्यौ। किञ्च स्ववाक्येऽश्रद्धधानः सायणः 'प्लाशिः शतातृण्णा तत् यत्सा बहुधा वितृण्णा भवति तस्मात् प्लाशि र्बहुधा विकृत्तः' इति (१२।९।१।३) शतपथीयोदाहरण-मुदाजहार। अतः सायणस्याऽस्मिन्नंशे न सन्देहो दूरीभूतस्तद्वचनमत्राऽश्रद्धेयम्॥

(सं. ६४) अनूवृजौ=" पार्श्वे आस्तामनुमत्या भगस्यास्तामनूवृजौ। अष्ठीवन्तावब्रवीन्मित्रो ममैतौ केवलाविति॥ अथर्व० ९।४।१२ अनुक्षणं श्वासोच्छ्वासाभ्यां वृजाते रक्तस्थं मलं वर्जयतः अनूवृजौ, इगुप-धज्ञा० पा० ३।१।१३५ इति कः अन्येषामपि दृश्यत इति दीर्घः। अनूवृजाविति द्विवचनप्रयोगात् पार्श्वे आस्तामिति च लिङ्गात्फुफ्फुसावेव ग्रहीतव्यौ।

अथ हृदयविवरणम् (६५)

अहो समयपतनस्य पराकाष्ठा, यया आबालवृद्धमामूर्खसहृदयञ्च प्रसिद्धान्यपि शारीरवस्तूनि शङ्कास्पदा-दयन्ति। हृदयम् (सु. शा. ३।१८) हृत् (सु. शा. १०।१४) चेतनास्थानम् (सु. शा. ४।३१) रक्ताशयः (सू. २२।९) हृदयं (च. शा. ७।१३) हृत् (च. सू. १७।७४) आत्मायतनं (च. नि. ८।४) सर्वाश्रयः (च. चि. २।२५) चेतनाऽधिष्ठानम् (च. शा. ७।११) महत् (च. सू. ३०।३) अर्थः (च. सू. ३०।३) हार्दिम् (अ. १८।४।५८) हृदयम् (अ. २।३३।३) इत्यादयः शब्दाः हृदयवाचकाः

संस्कृतभाषायां दृश्यन्ते । अथर्ववेदीयहार्दिम्शब्दस्याऽपभ्रंशतया हार्ट (Heart) इति शब्द आंग्लभाषायां संवृत्तः । एतस्य स्थानमपि सर्वत्र निश्चितमेवाऽस्ति यथा—"अक्षीभ्यां ते नासिकाभ्यां कर्णाभ्यां छुबुकादधि । यक्ष्मं शीर्षण्यं मस्तिष्काज्जिह्वाया वि वृहामि ते ॥ ग्रीवाभ्यस्त उष्णिहाभ्यः कीकसाभ्यो अनूक्यात् । यक्ष्मं दोषण्यमंसाभ्यां बाहुभ्यां वि वृहामि ते ॥ अ. २।३३।१-२" इत्यत्र क्रमेण अक्ष्यादयोऽवयवा निर्दिष्टाः, तेष्वपि शीर्षमस्तिष्कहृदयानि स्वतन्त्रतया निर्दिष्टानि सन्ति तेषु स्वस्वस्थाने स्वतन्त्रताऽपि निर्दिष्टा । पाश्चात्यविज्ञानलवाऽग्निर्दुर्विदग्धहृदया योग्यगुरुमुखादनधीतशास्त्ररहस्यतया मृगतृष्णिकार्णवे निमग्नमस्तिष्काश्च मस्तिष्कमेव हृदयं मन्वानाः स्वेतरानपि भ्रमगह्वरे निपातयितुं प्रयतमाना दृश्यन्ते, तानालोच्य विषीदति नितरां चेतः । "अङ्गादङ्गात्सम्भवसि हृदयादधिजायसे । स त्वमङ्गकषायोऽसि दिग्धविद्धामिव मादये मामर्मूं मयीति । बृ. उ. ६।४।९" इत्यादिमन्त्रैर्हृदये स्नेहस्याऽधिक्यमुक्तमत एव चिरोत्सृष्टमित्रपुत्रकलत्रादिकमालोच्य सहसा लोकप्रसिद्धहृदयेनाऽऽश्लेषयितुं प्रयतन्ते जनाः । सम्पन्ने चाऽऽश्लेषे कियत्क्षणमानन्दसमुद्रे निमग्नाः सन्तः स्वस्वरूपमेव विस्मरन्ति । आनन्दाऽनुभवाऽनन्तरं लब्धसञ्ज्ञाः मूर्धाद्यङ्गसंयोगं विधाय चुम्बनादिक्रियासु प्रवर्तन्ते, इति देशजातिबालवृद्धमूर्खधीमत्त्वादिभेदमनपेक्ष्यैकप्रकारमेव सर्वत्र प्रवर्तमानाः जना दृश्यन्ते । न पुनः प्रथमतः प्रेमोत्कटतायां मूर्धाद्याश्लेषे प्रवर्तमानाः दृश्यन्ते, अत एव वेदे "हृदयादधिजायसे" इत्यनेन प्रेम्णः स्थानं हृदयमधिकतया निर्धारितम् । अग्निं हृदयेनाशनिं हृदयाग्रेण पशुपतिं कृत्स्नहृदयेन भवं यक्ना शर्वं मतस्नाभ्यामीशानं मन्युना महादेवमन्तःपर्शव्येनोग्रं देवं वनिष्ठुना वसिष्ठहनुः शिङ्गीनि कोश्याभ्याम् ॥ वा. सं. ३९ । ८" अस्मिन्मन्त्रे हृदयमुकुलेन अशनेः तत्समीपभागेनाऽग्नेः कृत्स्नहृदयेन पशुपतेः तत्समीपवर्तिना यक्ना भवस्य तर्पणमुक्तम् । अनेन सन्दर्भेण यकृत्समीपवर्ति हृदयं निर्धारितं न पुनर्मस्तिष्के हृदयत्वं स्थापितम् । किञ्च—" इन्द्रः सुत्रामा हृदयेन सत्यं पुरोडाशेन सविता जजान । यकृत् क्लोमानं वरुणो भिषज्यन् मतस्ने वायव्यै र्न मिनाति पित्तम् ॥ वा. सं. १९।८५" अस्मिन्मन्त्रे हृदयसत्ययकृत्क्लोममतस्नापित्तानि निर्दिष्टानि तत्र सत्यशब्देन शिरो निर्दिष्टम् । "समुद्रे ते हृदयमप्स्वन्तः सं त्वा विशन्त्वोषधीरुतापः । सुमित्रिया न आप ओषधयः सन्तु दुर्मित्रियास्तस्मै सन्तु योऽस्मान् द्वेष्टि यञ्च वयं द्विष्मः ॥ वा. सं. २०।१९" समुद्रे=सर्वनदीनां पतनस्थाने अप्सु=तदीयधृतेषु द्रवेषु अन्तर्मध्ये आप उत साधारणजलानीव अव्ययानामनेकार्थत्वादुपमायां उतशब्दो बोध्यः । ओषधयः मया प्रकल्पिताः औषधिरूपा आपः ओषधीः=शरीरपोषणसमर्थाः रक्तादिधातवस्तद्रूपा भूत्वा इत्यर्थः । ते=तव हृदयं हृत्स्थाने संविशन्तु अव्याहततया पाकं प्राप्य हृदयपर्यन्तं गच्छन्तु । ताश्च सुमित्रियाः शोभनफलदात्र्यः सन्तु । उत्तरार्धश्चाऽस्य स्पष्टम् ॥ अत्र मन्त्रे समुद्रेण सह हृदयस्य साधर्म्यमुक्तम्, यथा समुद्रे आपो निपतन्ति तथा हृदयेऽपि रसादिद्रवाः संविशन्ति निस्सरन्तिच । इत्यनेन स्पष्टतया हृदयाऽऽकारः तत्स्थानं तदीयकार्यञ्च निर्णीतमस्ति । इदं सादृश्यं हृदय एव सम्भवति न पुनर्मस्तिष्के । "अदो यत् ते हृदि श्रितं मनस्कं पतयिष्णुकम् । ततस्त ईर्ष्यां मुञ्चामि निरूष्माणं दृतेरिव ॥ अ. ६।१८।३ ॥ हे ईर्ष्याग्रस्तपुरुष ते तव हृदि हृदये श्रितं अवस्थितं अदः प्रसिद्धं यन्मनः पतयिष्णु अस्थिष्णु इतस्ततः पतनशीलम् । कम् इति पदद्वयं पादपूरणार्थम् । तत स्तस्माद् मनसः ते तव ईर्ष्याम् स्त्रीविषयं कोपं निःशेषेण मुञ्चामि अपगमयामि । तत्र दृष्टान्तः ऊष्माणम् इति । यथा दृतेः चर्ममय्या भस्त्रिकायाः सकाशात् तन्मध्यवर्तिनम् ऊष्माणम् श्वासवद् अन्तःपूरितं वायुं तन्मुखान्निःसारयति कर्मकारस्तद्वदित्यर्थः (सा० भा०) ॥ अस्मिन् मन्त्रे हृदयस्य भस्त्रिकया सादृश्यं दत्तम्, तच्च हृदय एव सम्भवति न कथञ्चिदपि मस्तिष्के । तथा च—" शोणितकफप्रसादजं हृदयं, यदाश्रया हि धमन्यः प्राण-

"क्षुत्कुक्षिरिरा वनिष्ठुः पर्वताः प्लाशयः ॥ अथर्व. ९।१२।१२" इत्यत्र प्लाशेः पर्वततासादृश्यं प्रदर्शितम्, "प्लाशिभिरुपलान्" वा. सं. २५।८ इत्यत्रापि प्रावसादृश्यं प्रतिपादितम्। "कुम्भीवनिष्ठु जनिता शचीभिर्यस्मिन्नग्रे योन्यां गर्भो अन्तः। प्लाशि व्यंक्तः शतधार उत्से दुहे न कुम्भी स्वधां पितृभ्यः॥ वा. सं. १९।८७" यः कुम्भी=कुम्भसादृश्याद्गर्भाशयः कुम्भः जरायुर्वा कुम्भः, सोऽस्ति निवासस्थानत्वेन यस्य सः कुम्भी=कर्मविकृतो जीवः पितृभ्यः स्वधां न दुहे न दोग्धि न ददाति धातूनामनेकार्थत्वात्। तस्य कुम्भः= सुराकुम्भः यः पूर्वमासेवितः स वनिष्ठु जनितः वनिष्ठुरूपेण परिणतः। अग्रे पूर्वे शचीभिः स्वसञ्चितकर्मभिर्योन्यामन्तः शतधारे उत्से=निर्झरे रसवाहिनीभिः सहस्रशः जरायोः सम्भ्रियमाणत्वादुत्सेनोपमा, तस्मिंश्च(जरायौ)जनिता स्थितो भवति। पश्चात्(योनिबहिर्गमनाऽनन्तरं)प्लाशिः=फुफ्फुसः व्यक्तः स्वकार्यकरणदीक्षो जनिता अयमत्राऽभिसन्धिः, योऽज्ञः पितृप्रभृतिदेवानां तर्पणमकृत्वा केवलं शिश्नोदरव्यापारपरायणः सन् सुरानिर्माणग्रहणादिव्यापारतत्परो भवति तादृशःसन्नेव म्रियते चेत् स स्वकर्मभिः पूर्वं मातृयोन्यां जरायौ शेते। तत्र च कुम्भिनामनरके पतित इव विविधवेदना अनुभवन् नवममासायुत्तरं गर्भान्निःसृत्य व्यक्तफुफ्फुसव्यापारश्चेज्जीवति अन्यथा तु मृतएवाऽऽस्ते। पुनरपि ता एव वेदना अनुभवितुमुद्युक्तो भवति। जीवितोऽपि फुफ्फुसव्यापाराऽधीनैकजीवनः सन् कासश्वासादिविविधवेदना अनुभवन्नाजन्मपर्यन्तमुच्छ्वसिति, अतोऽज्ञानिन इदं वेदनाचक्रं पुनःपुनरावर्तते। ज्ञानिनस्तु स्वकर्तव्याऽनुष्ठानात्समस्तकर्मबन्धनानि शीर्यन्ते निर्बन्धनश्च सन्नमृतत्वमश्नुते इति। अत्र स्पष्टमेव "प्लाशिर्व्यक्तः" इत्यनेन फुफ्फुसीयव्यापारः समाख्यात स्तदधीनं प्राणिनां जीवनञ्चोक्तम्। अतो निस्सन्देहं प्लाशिशब्देन फुफ्फुस एव ग्रहीतव्यः। उक्तमन्त्रे 'प्लाशिः शिश्नोऽभवदिति' महीधरेण व्याख्यातम्, "इन्द्रस्य क्रोडोऽदित्यै पाजस्यं वा. सं. २५।८" अस्य भाष्ये तु 'प्रकर्षेणाऽश्नन्ति भुञ्जतेऽन्नानीति प्लाशयः शिश्नमूलनाड्यः तन्नाडीद्वारैवाऽन्नस्य देहे सञ्चारात्' इत्यत्र महीधरेणव्याख्यातम्। एवं "आन्त्रेभ्यस्ते गुदाभ्यो० ऋ० १०।१६३।३" अस्मिन् मन्त्रे प्लाशिभ्यः=क्लोमप्लीहादिसञ्ज्ञेभ्यश्च मांसेभ्य इति ऋग्वेदभाष्ये सायणः। तथाऽस्मिन्नेव मन्त्रे अथर्ववेदभाष्ये प्लाशेः=बहुच्छिद्रात् मलपात्रादिति सायणो व्याख्यत्। एतयोः (सायणमहीधरयोः) स्ववाक्येनैव परस्परव्याघातादेतावुपेक्षितव्यौ। किञ्च स्ववाक्येऽश्रद्दधानः सायणः 'प्लाशिः शतातृण्णा तत् यत्सा बहुधा वितृण्णा भवति तस्मात् प्लाशि र्बहुधा विकृत्तः' इति (१२।९।१।३) शतपथीयोदाहरणमुदाजहार। अतः सायणस्याऽस्मिन्नंशे न सन्देहो दूरीभूतस्तद्वचनमत्राऽश्रद्धेयम्॥

(सं. ६४) अनूवृजौ=" पार्श्वे आस्तामनुमत्या भगस्यास्तामनूवृजौ। अष्ठीवन्तावब्रवीन्मित्रो ममैतौ केवलाविति॥ अथर्व० ९।४।१२ अनुक्षणं श्वासोच्छ्वासाभ्यां वृजाते रक्तस्थं मलं वर्जयतः अनूवृजौ, इगुपधज्ञा० पा० ३।१।१३५ इति कः अन्येषामपि दृश्यत इति दीर्घः। अनूवृजाविति द्विवचनप्रयोगात् पार्श्वे आस्तामिति च लिङ्गात्फुफ्फुसावेव ग्रहीतव्यौ।

अथ हृदयविवरणम् (६५)

अहो समयपतनस्य पराकाष्ठा, यया आबालवृद्धमामूर्खसहृदयञ्च प्रसिद्धान्यपि शारीरवस्तूनि शङ्कास्पदयन्ति। हृदयम् (सु. शा. ३।१८) हृत् (सु. शा. १०।१४) चेतनास्थानम् (सु. शा. ४।३१) रक्ताशयः (सू. २२।९) हृदयं (च. शा. ७।१३) हृत् (च. सू. १७।७४) आत्मायतनं (च. नि. ८।४) सर्वाश्रयः (च. वि. २।२५) चेतनाऽधिष्ठानम् (च. शा. ७।११) महत् (च. सू. ३०।३) अर्थः (च. सू. ३०।३) हार्दम् (अ. १८।४।५८) हृदयम् (अ. २।३३।३) इत्यादयः शब्दाः हृदयवाचकाः

संस्कृतभाषायां दृश्यन्ते । अथर्ववेदीयहार्दिम्शब्दस्याऽपभ्रंशतया हार्ट (Heart) इति शब्द आंग्लभाषायां संवृत्तः । एतस्य स्थानमपि सर्वत्र निश्चितमेवाऽस्ति यथा—"अक्षीभ्यां ते नासिकाभ्यां कर्णाभ्यां छुबुकादधि । यक्ष्मं शीर्षण्यं मस्तिष्काज्जिह्वाया वि वृहामि ते ॥ ग्रीवाभ्यस्त उष्णिहाभ्यः कीकसाभ्यो अनूक्यात् । यक्ष्मं दोषण्यमंसाभ्यां बाहुभ्यां वि वृहामि ते ॥ अ. २।३३।१-२ " इत्यत्र क्रमेण अक्ष्यादयोऽवयवा निर्दिष्टाः, तेष्वपि शीर्षमस्तिष्कहृदयानि स्वतन्त्रतया निर्दिष्टानि सन्ति तेषु स्वस्वस्थाने स्वतन्त्रताऽपि निर्दिष्टा । पाश्चात्यविज्ञानलवाऽग्निदुर्विदग्धहृदया योग्यगुरुमुखादनधीतशास्त्ररहस्यतया मृगतृष्णिकार्णवे निमग्नमस्तिष्काश्च मस्तिष्कमेव हृदयं मन्वानाः स्वेतरानपि भ्रमगह्वरे निपातयितुं प्रयतमाना दृश्यन्ते, तानालोच्य विषीदति नितरां चेतः । "अङ्गादङ्गात्सम्भवसि हृदयादधिजायसे । स त्वमङ्गकषायोऽसि दिग्धविद्धामिव मादये माममूं मयीति । बृ. उ. ६।४।९" इत्यादिमन्त्रैर्हृदये स्नेहस्याऽधिक्यमुक्तमत एव चिरोत्सृष्टमित्रपुत्रकलत्रादिकमालोच्य सहसा लोकप्रसिद्धहृदयेनाऽऽश्लेषयितुं प्रयतन्ते जनाः । सम्पन्ने चाऽऽश्लेषे कियत्क्षणमानन्दसमुद्रे निमग्नाः सन्तः स्वस्वरूपमेव विस्मरन्ति । आनन्दाऽनुभवाऽनन्तरं लब्धसञ्ज्ञाः मूर्धाद्यङ्गसंयोगं विधाय चुम्बनादिक्रियासु प्रवर्तन्ते, इति देशजातिबालवृद्धमूर्खधीमत्यादिभेदमनपेक्ष्यैकप्रकारमेव सर्वत्र प्रवर्तमानाः जना दृश्यन्ते । न पुनः प्रथमतः प्रेमोत्कटतायां मूर्धाद्याश्लेषे प्रवर्तमानाः दृश्यन्ते, अत एव वेदे "हृदयादधिजायसे" इत्यनेन प्रेम्णः स्थानं हृदयमधिकतया निर्धारितम् । अग्निं हृदयेनाशनिं हृदयाग्रेण पशुपतिं कृत्स्नहृदयेन भवं यक्ना शर्वं मतस्नाभ्यामीशानं मन्युना महादेवमन्तःपर्शव्येनोग्रं देवं वनिष्ठुना वसिष्ठहनुः शिङ्गीनि कोश्याभ्याम् ॥ वा. सं. ३९ । ८ " अस्मिन्मन्त्रे हृदयमुकुलेन अशनेः तत्समीपभागेनाऽग्नेः कृत्स्नहृदयेन पशुपतेः तत्समीपवर्तिना यक्ना भवस्य तर्पणमुक्तम् । अनेन सन्दर्भेण यकृत्समीपवर्ति हृदयं निर्धारितं न पुनर्मस्तिष्के हृदयत्वं स्थापितम् । किञ्च—" इन्द्रः सुत्रामा हृदयेन सत्यं पुरोडाशेन सविता जजान । यकृत् क्लोमानं वरुणो भिषज्यन् मतस्ने वायव्यै र्न मिनाति पित्तम् ॥ वा. सं. १९।८५ " अस्मिन्मन्त्रे हृदयसत्ययकृत्क्लोममतस्नापित्तानि निर्दिष्टानि तत्र सत्यशब्देन शिरो निर्दिष्टम् । " समुद्रे ते हृदयमप्स्वन्तः सं त्वा विशन्त्वोषधीरुतापः । सुमित्रिया न आप ओषधयः सन्तु दुर्मित्रियास्तस्मै सन्तु योऽस्मान् द्वेष्टि यञ्च वयं द्विष्मः ॥ वा. सं. २०।१९ " समुद्रे=सर्वनदीनां पतनस्थाने अप्सु=तदीयधृतेषु द्रवेषु अन्तर्मध्ये आप उत साधारणजलानीव अव्ययानामनेकार्थत्वादुपमायां उतशब्दो बोध्यः । ओषधयः मया प्रकल्पिताः ओषधिरूपा आपः ओषधीः=शरीरपोषणसमर्थाः रक्तादिधातवस्तद्रूपा भूत्वा इत्यर्थः । ते=तव हृदयं हृत्स्थानं संविशन्तु अव्याहततया पाकं प्राप्य हृदयपर्यन्तं गच्छन्तु । ताश्च सुमित्रियाः शोभनफलदात्र्यः सन्तु । उत्तरार्धञ्चाऽस्य स्पष्टम् ॥ अत्र मन्त्रे समुद्रेण सह हृदयस्य साधर्म्यमुक्तम्, यथा समुद्रे आपो निपतन्ति तथा हृदयेऽपि रसादिद्रवाः संविशन्ति निस्सरन्तिच । इत्यनेन स्पष्टतया हृदयाऽऽकारः तत्स्थानं तदीयकार्यञ्च निर्णीतमस्ति । इदं सादृश्यं हृदय एव सम्भवति न पुनर्मस्तिष्के । " अदो यत् ते हृदि श्रितं मनस्कं पतयिष्णुकम् । ततस्त ईर्ष्यां मुञ्चामि निरूष्माणं दृतेरिव ॥ अ. ६।१८।३ ॥ हे ईर्ष्याग्रस्तपुरुष ते तव हृदि हृदये श्रितं अवस्थितं अदः प्रसिद्धं यन्मनः पतयिष्णु अश्विष्णु इतस्ततः पतनशीलम् । कम् इति पदद्वयं पादपूरणार्थम् । ततस्तस्माद् मनसः ते तव ईर्ष्याम क्षान्तिपयं कोपं निःशेषेण मुञ्चामि अपगमयामि । तत्र दृष्टान्तः ऊष्माणम् इति । यथा दृतेः चर्म्ममय्या भस्त्रिकायाः सकाशात् तन्मध्यवर्तिनम् ऊष्माणम् श्वासवद् अन्तःपूरितं वायुं तन्मुखान्निःसारयति कर्मकारस्तद्वदित्यर्थः (सा० भा०) ॥ अस्मिन् मन्त्रे हृदयस्य भस्त्रिकया सादृश्यं दत्तम्, तच्च हृदय एव सम्भवति न कथञ्चिदपि मस्तिष्के । तथा च—" शोणितकफप्रसादजं हृदयं, यदाश्रया हि धमन्यः प्राण-

महा:, तस्याऽधो वामतः प्लीहा फुफ्फुसश्च, दक्षिणतो यकृत् क्लोम च, तद्विशेषेण चेतनास्थानमतस्तस्मिंस्तम-साऽऽवृते सर्वप्राणिनः स्वपन्ति ॥ सु. शा. ४।३१ " अत्र स्पष्टतया फुफ्फुसादिमध्ये हृदयं वर्णितम्। ईदृशे स्पष्टतया प्रतिपादिते को मूर्खोऽपि मस्तिष्कस्य हृदयत्वं साधयितुं प्रयतेत। "शृङ्गाटकान्यधिपतिः शङ्खौ कण्ठ-शिरो गुदम्। हृदयं वस्तिनाभी च घ्नन्ति सद्योहतानि तु ॥ सु. शा. ६।१० " अत्र मनसा शृङ्गाटकाऽ-धिपतिशिरोभ्यः पृथक् हृदयपरिगणितेन मस्तिष्काद्धृदयस्य पृथग्भावं व्याहर्तुं को नाम मूर्खोऽपि मनसा प्रयतेत। "प्रसन्नाभ्यां कफासृग्भ्यां हृदयं पङ्कजाऽऽकृति। शुषिरं स्यादधोवक्त्रं यकृत्क्रोडान्तरास्थितम् ॥ (टी०) "स्थानान्यामाग्निपक्वानां मूत्रस्य रुधिरस्य च। हृदुण्डुकः फुफ्फुसश्च कोष्ठ इत्यभिधीयते ॥ सु. चि. २।१३ " "पञ्चदश कोष्ठाऽङ्गानि, तद्यथा—नाभिश्च, हृदयञ्च, क्लोम च, यकृच्च, प्लीहा च, वृक्कौ च, वस्तिश्च, पुरीषाधारश्च, आमाशयश्च, पक्वाशयश्च, उत्तरगुदञ्च, अधरगुदञ्च, क्षुद्रान्त्रञ्च, स्थूलान्त्रञ्च, वपावहननञ्चेति ॥ च. शा. ७।१३ " इत्यत्र कोष्ठाऽङ्गत्वेन वर्णनात्को नाम साहसिको हृदयस्य मस्तिष्के स्थानं प्रकल्पयितुं प्रभवेत्। "स्तनयो र्मध्यमधिष्ठायोरस्यामाशयद्वारं सत्त्वरजस्तमसामधिष्ठानं हृदयं नाम ॥ सु. शा. ६।२६ " "हृदयं चेतनास्थानमुक्तं सुश्रुत देहिनाम्। तमोऽभिभूते तस्मिंस्तु निद्रा विशति देहिनाम् ॥ ४।३४ ॥ " आभ्यां सूत्राभ्यां हृदयस्य स्तनयोर्मध्येऽधिष्ठानं चेतनास्थानत्वञ्चोक्तम्। एतेन हृदयस्य कस्मिन् स्थाने स्थितिः कतरच्च तद्वस्त्विति सन्देहस्याऽनवसरोऽस्ति, परन्तु शरीरे कस्मिन् स्थाने चेतनाऽस्ति केन च सेति सन्देहोऽव-शिष्ट एव। तत्र जीवतः शरीरिणो न तदङ्गमन्याधिमदस्ति यच्चेतनारहितं स्यादतश्चेतनायाः सर्वत्र विद्यमानत्वाऽ-स्मिन् स्थाने चेतनाऽस्त्यत्र च नास्तीति केनाऽपि विदुषा वक्तुं न पार्येत, परन्तु सा केनाऽस्तीति विचारे औपनिषदिकाऽधिकरणमेवाऽत्रतारयामः—"यो ह वै ज्येष्ठं च श्रेष्ठं च वेद ज्येष्ठश्च ह वै श्रेष्ठश्च भवति प्राणो वाव ज्येष्ठश्च श्रेष्ठश्च ॥ १ ॥ यो ह वै वसिष्ठं वेद वसिष्ठो ह स्वानां भवति वाग्वाव वसिष्ठः ॥ २ ॥ यो ह वै प्रतिष्ठां वेद प्रति - तिष्ठत्यस्मिंश्च लोकेऽमुष्मिंश्च चक्षुर्वाव प्रतिष्ठा ॥ ३ ॥ यो ह वै सम्पदं वेद सं हास्मै कामाः पद्यन्ते देवाश्च मानुषाश्च श्रोत्रं वाव सम्पत् ॥ ४ ॥ यो ह वा आयतनं वेदायतनं ह स्वानां भवति मनो ह वा आयत-नम् ॥ ५ ॥ अथ ह प्राणा अहं श्रेयसि व्यूदिरेऽहं श्रेयानस्म्यहं श्रेयानस्मीति ॥ ६ ॥ ते ह प्राणाः प्रजापतिं पितरमेत्योचुर्भगवन् को नः श्रेष्ठ इति तान् होवाच यस्मिन् व उत्क्रान्ते शरीरं पापिष्ठतरमिव दृश्येत स वः श्रेष्ठ इति ॥७॥ सा ह वागुच्चक्राम सा संवत्सरं प्रोष्य पर्येत्योवाच कथमशकतर्ते मज्जीवितुमिति यथा कला अवदन्तः प्राणन्तः प्राणेन पश्यन्तश्चक्षुषा शृण्वन्तः श्रोत्रेण ध्यायन्तो मनसैवमिति प्रविवेश ह वाक् ॥ ८ ॥ चक्षुर्होच्चक्राम तत्संवत्सरं प्रोष्य पर्येत्योवाच कथमशकतर्ते मज्जीवितुमिति यथान्धा अपश्यन्तः प्राणन्तः प्राणेन वदन्तो वाचा शृण्वन्तः श्रोत्रेण ध्यायन्तो मनसैवमिति प्रविवेश ह चक्षुः ॥ ९ ॥ श्रोत्रं होच्चक्राम तत्संवत्सरं प्रोष्य पर्येत्योवाच कथम-शकतर्ते मज्जीवितुमिति यथा बधिरा अशृण्वन्तः प्राणन्तः प्राणेन वदन्तो वाचा पश्यन्तश्चक्षुषा ध्यायन्तो मन-सैवमिति प्रविवेश ह श्रोत्रम् ॥ १० ॥ मनो होच्चक्राम तत्संवत्सरं प्रोष्य पर्येत्योवाच कथमशकतर्ते मज्जीवितु-मिति यथा बाला अमनसः प्राणन्तः प्राणेन वदन्तो वाचा पश्यन्तश्चक्षुषा शृण्वन्तः श्रोत्रेणैवमिति प्रविवेश ह मनः ॥ ११ ॥ अथ ह प्राण उच्चिक्रमिषन्त्स यथा सुहयः पड्वीशशङ्कून् संखिदेदेवमितरान् प्राणान्समखिदत्तं हाभि समेत्योचु र्भगवन्नेधि त्वं नः श्रेष्ठोऽसि मोत्क्रमीरिति ॥ १२ ॥ अथ हैनं वागुवाच यदहं वसिष्ठोऽस्मि त्वं तद्वसिष्ठोऽसीत्यथ हैनं चक्षुरुवाच यदहं प्रतिष्ठास्मि त्वं तत्प्रतिष्ठासीति ॥ १३ ॥ अथ हैनं श्रोत्रमुवाच यदहं सम्पदस्मि त्वं तत्सम्पदसीत्यथ हैनं मन उवाच यदहमायतनमस्मि त्वं तदायतनमसीति ॥ १४ ॥ न वै वाचो न चक्षूंषि न श्रोत्राणि न मनांसीत्याचक्षते प्राणा इत्येवाचक्षते प्राणो ह्येवैतानि सर्वाणि भवन्ति ॥

छान्दोग्य० ५।१ ॥" अयमेव विषयो बृहदारण्यकेऽपि (बृ. ६।१) यथाऽत्रस्थितो निहितोऽस्ति । अनेनाऽधिकरणेन प्राणाऽधीना चेतनाऽस्तीति स्पष्टीभूतम् । प्राणाश्च नोच्छ्वासनिःश्वासरूपाः, समाहिते (ब्रह्मरन्ध्राऽवरुद्धप्राणे) योगिनि उच्छ्वासनिःश्वासयोरभावेऽपि निष्प्राणोऽयमिति वदितुमशक्यत्वात् । स यदा ब्रह्मरन्ध्रं त्यक्त्वा पूर्ववद्धृदयस्थानं समाविशति तदा पूर्ववदिन्द्रियाणां प्रसृते व्यापारे निःश्वासोच्छ्वासादयः प्रवर्तमाना दृश्यन्ते पुनरपि यदा हृत्स्थानं त्यक्त्वा समाहितो भवति तदा निःश्वासादयः सर्वेऽपि भवन्ति स्तब्धाः । अतोऽन्वयव्यतिरेकाभ्यामेतन्निर्णीयते यत्प्राणनं तन्न दृश्यमानशरीरीयाऽवयवाऽधीनम्, किन्तु लिङ्गशरीराऽधिष्ठितम् । लिङ्गशरीरञ्च जीवाऽधिष्ठितमिति सर्वशास्त्रसम्मतम् । यदा कदा द्वित्रहोरादिमृतशवशरीरस्याऽपि दैववशात्पुनरपि यथावज्जीवितत्वं दृश्यते लोके । अतश्चेतनत्वं नोच्छ्वासनिःश्वासादिरूपम् किन्तु तत् (निःश्वासादिरूपं) सामान्यतया (योगिनो मुक्त्वा) हृदयाऽवच्छेदेन स्थूलशरीरे लिङ्गशरीरस्थितिद्योतकम् । अत एव "जीवापेतं वाव किलेदं म्रियते न जीवो म्रियत इति स य एषोऽणिमैतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो इति भूय एव मा भगवान् विज्ञापयत्विति तथा सौम्येति होवाच ॥ छा. ६।११।३॥" इत्यत्र स्पष्टतयाऽयं विषयो निर्णीतः। लिङ्गशरीरसत्त्वे च विषयसाक्षात्करणान्येकादशेन्द्रियाणि सन्ति तेषु सर्वेषु मनसोऽधिष्ठातृत्वात्तदधीनानीतराणीति व्यवस्थाऽस्ति यथा—"अथ हैनं सौर्यायणी गार्ग्यः पप्रच्छ । भगवन्नेतस्मिन् पुरुषे कानि स्वपन्ति कान्यस्मिन् जाग्रति कतर एष देवः स्वप्नान् पश्यति कस्यैतत्सुखं भवति कस्मिन्नु सर्वे सम्प्रतिष्ठिता भवन्तीति ॥ १ ॥ तस्मै स होवाच ॥ यथा गार्ग्यमरीचयोऽर्कस्याऽस्तं गच्छतः सर्वा एतस्मिंस्तेजोमण्डल एकीभवन्ति । ताः पुनः पुनरुदयतः प्रचरन्त्येवं ह वै तत्सर्वं परे देवे मनस्येकीभवति । तेन तर्ह्येष पुरुषो न शृणोति न पश्यति न जिघ्रति न रसयते न स्पृशते नाभिवदते नादत्ते नानन्दयते न विसृजते नेयायते स्वपितीत्याचक्षते ॥ २ ॥ प्राणाग्नय एवैतस्मिन् पुरे जाग्रति गार्हपत्यो ह वा एषोऽपानो व्यानोऽन्वाहार्यपचनो यद्गार्हपत्यात्प्रणीयते प्रणयनादाहवनीयः प्राणः यदुच्छ्वासनिःश्वासावेतावाहुती समं नयतीति स समानः मनो ह वाव यजमान इष्टफलमेवोदानः स एनं यजमानमहरहर्ब्रह्म गमयति ॥ ४ ॥ अत्रैष देवः स्वप्ने महिमानमनुभवति । यद् दृष्टं दृष्टमनुपश्यति श्रुतं श्रुतमेवार्थमनुशृणोति देशदिगन्तरैश्च प्रत्यनुभूतं पुनः पुनः प्रत्यनुभवति दृष्टं चाऽदृष्टं च श्रुतं चाऽश्रुतं चाऽनुभूतं चाऽननुभूतं च सच्चाऽसच्च सर्वं पश्यति सर्वः पश्यति ॥ ५ ॥ स यदा तेजसाऽभिभूतो भवत्यत्रैष देवः स्वप्नान्न पश्यत्यथ तदैतस्मिञ्छरीरे एतत्सुखं भवति ॥ ६ ॥ स यथा सौम्य वयांसि वासो वृक्षं सम्प्रतिष्ठन्ते । एवं ह वै तत्सर्वं पर आत्मनि सम्प्रतिष्ठते ॥७॥ पृथिवी च पृथिवीमात्रा चापश्चापोमात्रा च तेजश्च तेजोमात्रा च वायुश्च वायुमात्राचाकाशश्चाकाशमात्रा च चक्षुश्च द्रष्टव्यं च श्रोत्रं च श्रोतव्यं च घ्राणं च घ्रातव्यं च रसश्च रसयितव्यं च त्वक् च स्पर्शयितव्यं च वाक् च वक्तव्यं च हस्तौ चादातव्यं चोपस्थश्चानन्दयितव्यं च पायुश्च विसर्जयितव्यं च पादौ च गन्तव्यं च मनश्च मन्तव्यं च बुद्धिश्च बोद्धव्यं चाहङ्कारश्चाऽहङ्कर्तव्यं च चित्तं च चेतयितव्यं च तेजश्च विद्योतयितव्यं च प्राणश्च विधारयितव्यं च ॥ ८ ॥ एष हि द्रष्टा स्प्रष्टा श्रोता घ्राता रसयिता मन्ता बोद्धा कर्ता विज्ञानात्मा पुरुषः । स परेऽक्षरे आत्मनि सम्प्रतिष्ठते ॥ ९ ॥ परमेवाक्षरं प्रतिपद्यते स यो ह वै तदच्छायमशरीरमलोहितं शुभ्रमक्षरं वेदयते यस्तु सौम्य । स सर्वज्ञः सर्वो भवति तदेष श्लोकः ॥ १० ॥ विज्ञानात्मा सहदेवैश्च सर्वैः प्राणा भूतानि सम्प्रतिष्ठन्ति यत्र । तदक्षरं वेदयते यस्तु सौम्य स सर्वज्ञः सर्वमेवाविवेशेति ॥ ११ ॥ प्रश्न० ४ ॥"

तत्तदिन्द्रियाणां लिङ्गाऽधिष्ठानत्वेऽपि तत्तच्छक्तिप्रादुर्भावाय नियतानि स्थानानि कृतानि सन्ति यथा—गन्धसाक्षात्कारे नासिकाऽग्रमित्यादि । एवं स्वेतरेन्द्रियसाम्राज्यं शासितुं करणानि मनसश्चेतनावाहीनि स्रोतांसि सन्ति तद्द्वारा सर्वत्राऽव्याहतं स्वशासनमवलम्बमानमास्ते । सञ्ज्ञावाहिस्रोतसाञ्च स्थानं प्रधानतया सुषुम्णाकाण्डं

मस्तिष्कश्चाऽस्ति, परमेतत्सर्वं लिङ्गस्य स्थूलशरीरे पूर्वनिर्णीतहृत्कमले यदा स्थिति र्भवति तदैव निष्पद्यते। यदा त्वस्य मस्तिष्के गमनमास्ते यथा योगिषु सर्पविशेषदष्टेषु च तदा चेतनाऽभावो भवति। यदा च मस्तिष्कस्यैव चेतनास्थानं स्वीक्रियेत तर्हि समाधिस्थितानां योगिनामपि सूचीव्यथादयोऽनुभूयेरन्, न तथाऽस्ति, अतः शास्त्रनिर्णीतहृदयस्थाने वर्तमाने लिङ्गे समस्तेन्द्रियाणां समस्ताऽवयवानाञ्च भवति यथाऽवस्थितो व्यापारः। एतदनपेक्ष्य पाश्चात्यज्ञानप्रसन्नद्धाघ्रातकल्पितमस्तिष्के यदा केवलं मस्तिष्कस्य किं वा ज्ञानतन्तूनां चेतनाकर्तृत्वं स्वीक्रियेत तर्हि मृतशरीरे चेतनाऽभावो दुःसाधः। तथा च—"प्राणाऽपानौ निमेषाद्या जीवनं मनसो गतिः। इन्द्रियान्तरसञ्चारः प्रेरणं धारणञ्च यत्॥ देशान्तरगतिः स्वप्ने पञ्चत्वग्रहणन्तथा। दृष्टस्य दक्षिणेनाऽक्ष्णा सव्येनाऽवगमस्तथा॥ इच्छा द्वेषः सुखं दुःखं प्रयत्नश्चेतना धृतिः। बुद्धिः स्मृतिरहङ्कारो लिङ्गानि परमात्मनः॥ यस्मात् समुपलभ्यन्ते लिङ्गान्येतानि जीवतः। न मृतस्यात्मलिङ्गानि तस्मादाहु र्महर्षयः॥ शरीरं हि गते तस्मिञ्छून्यागारमचेतनम्। पञ्चभूताऽवशेषत्वात् पञ्चत्वं गतमुच्यते॥ च. शा. १।७०-७४॥" एतत्सर्वमभिप्रेत्य धन्वन्तरिणा मस्तिष्कादीनां चेतनास्थानत्वमस्वीकृत्य—"हृदयं चेतनास्थानमुक्तं सुश्रुत देहिनाम्। तमोऽभिभूते तस्मिंस्तु निद्रा विशति देहिनाम्" इति सम्यगुक्तम्। इन्द्रियशक्तिप्रकाशाऽधिष्ठानानां केन्द्रत्वाच्छिरस उत्तमाङ्गत्वमभिहितं तदपि युक्तमेव, यथोक्तं—प्राणाः प्राणभृतां यत्र श्रिताः सर्वेन्द्रियाणि च। यदुत्तमाङ्गमङ्गानां शिरस्तदभिधीयते॥ च. सू. १७।१२" परन्तु नैतावता शिरसश्चेतनाऽधिष्ठानत्वं सिद्ध्यति किन्तु तद्विशेषणं हृदयस्यैव शोभत इत्यलमतिविस्तरेण।

अथ क्लोमविवरणम् (सं० ६८)

इन्द्रः सुत्रामा हृदयेन सत्यं पुरोडाशेन सविता जजान।
यकृत्क्लोमानं वरुणो भिषज्यन्मतस्ने वायव्यै र्न मिनाति पित्तम्॥ वा. सं. १९।८५

सुष्ठु त्रायते रक्षति सुत्रामा इन्द्रः पुरोडाशदेवता इन्द्रस्य हृदयेन हृदयं जजान जनयति। सविता च पुरोडाशेनेन्द्रस्य सत्यं जजान। वरुणो भिषज्यन् इन्द्रस्य चिकित्सां कुर्वन् सन् यकृत् कालखण्डं क्लोमानं गलनाडिकाञ्च जजान। वायव्यैः सौमिकोर्ध्वपात्रैः मतस्ने पित्तञ्च न मिनाति निर्मिमीते सृजतीत्यर्थः। सौमिकान्यूर्ध्वपात्राणि वायव्यसञ्ज्ञानि इति। (म० भा०) अत्र मन्त्रे यकृत्क्लोममतस्नापित्तानां निर्मापकत्वेन वरुणो निर्दिष्टः। अन्यत्राऽपि द्रवप्रधानानां द्रवाणाञ्च वरुण एवाऽधिपतित्वेन निर्दिश्यते। यथा—"वरुणोऽपामधिपतिः स माऽवतु। अ. ५।२४।४" उपरिनिर्दिष्टा अवयवाः [यकृत्-क्लोम-मतस्ना-पित्तानि (अग्न्याशयः)] सन्ति द्रवप्रधाना द्रववाहकाश्च। अत्राऽपि क्लोम्नो यकृता सह पाठाद्यकृन्निकटत्वन्निश्चीयते। "इन्द्रस्य क्रोडोऽदित्यै पाजस्यं दिशां जत्रवोऽदित्यै भसज्जीमूतान् हृदयौपशेनान्तरिक्षं पुरीतता नभ उदर्येण चक्रवाकौ मतस्नाभ्यां दिवं वृक्काभ्यां गिरीन् प्लाशिभिरुपलान् प्लीह्ना वल्मीकान् क्लोमभि र्ग्लौभि र्गुल्मान् हिराभिः स्रवन्ती र्ह्रदान् कुक्षिभ्यां समुद्रमुदरेण वैश्वानरं भस्मना॥ वा. सं २५।८" इत्यत्र क्लोमभि र्ग्लावां (चन्द्रमसां) तर्पणेन क्लोम्नो द्रवाऽऽधारत्वं गोलत्वं प्रवहद्द्रवत्वञ्च विज्ञापितम्। अस्य मन्त्रस्य भाष्ये तिलकं क्लोमेत्यमरवाक्यप्रदर्शनेन शरीरस्थतिलकलक्षणत्वम्महीधरेण विज्ञाप्य क्लोमा उदर्यो जलाधार इति स्वसम्मतिः प्रख्यापिता। "हृदयस्य दक्षिणे यकृत्क्लोमा च, वामे प्लीहा पुप्फुसश्चेति वैद्या—इति क्षीरस्वामी" इत्यनेन क्षीरस्वामिमतप्रदर्शनेन स्वमतं पोषितम्। "क्लोमा गलनाडीति कर्कः" इति वेदभाष्यकर्तुः कर्कस्य सम्मतिः प्रदर्शिता। अयञ्च कर्कः महीधरेण बहुमानपुरःसरं बहुत्र स्थाने उल्लेखितोऽतोऽयं महीधरात्प्राचीनः कण्वशाखीययजुस्संहिताभाष्यकर्ता बभूव परं गलनाडीति पाठो

ऽशुद्धः प्रतिभाति । अस्मिन्नध्याये (वा. सं. २५) " वातं प्राणेनाऽपानेन नासिकामित्यारभ्य **जुम्बकाय स्वाहेति** नवममन्त्रपर्यन्तं तत्तद्देवतोद्देशेनाऽधाङ्गानां विभागः कृतोऽस्ति । तत्र कस्याऽप्यवयवस्य द्विरुक्ति र्नास्तीति रहस्यम् । अतएवाऽत्र सप्तममन्त्रे (वा. सं. २५।७) " शेपेन प्रजा " मित्यागतं पुनरष्टममन्त्रे " अदित्यै भसद् " इत्यत्र भसच्छब्देन पुनरागतमवयवं विमृश्य शतपथे शिश्नस्य त्रयो भागाः कल्पितास्तथाहि—" त्रीणि शिश्नानि । त एव त्रयोऽनुयाजाः स योऽयं वर्षिष्ठोऽनुयाजस्तदिदं वर्षिष्ठमिव शिश्नं तं वा अनवानन्यजेदित्याहुस्तयो हास्यैतदमूर्ध्नं भवतीति श० ११।१।६ ॥ ३१ ॥ स वै सकृदवान्यात् । एकं ह्येतस्य पर्वाऽथ यदपर्वकं स्यात्प्रतृण्णं (विच्छिन्नं) वैवतिष्ठेल्लम्बेत वा तस्मादेतदुच्चतिष्ठति पद्येत च तस्मात्सकृदवाऽन्यात् ३२" इत्यन्तेन ग्रन्थेन पुनरुक्तिदोषः प्रहृतः । प्रकृतेऽपि गलनाडिकायास्तेदनीमधरकण्ठेनाऽपः शुष्ककण्ठेनेति द्वितीयमन्त्रे (वा. सं. २५।२) भागद्वये विभक्तत्वेन पुनस्तस्याः (गलनाडिकायाः) क्लोमशब्देन ग्रहणस्याऽयोग्यत्वात् । शुष्ककण्ठो ग्रीवापश्चाद्भागः अधरकण्ठश्चाऽऽमाशयोर्ध्वमार्गः (अन्ननलिका) श्वासनलिका च भवति । अतः केनाऽप्युपायेनगलनाडिकायां क्लोम्नो व्यवहारः सर्वथाऽसम्भवद्रूपः । अतोऽनुमीयते **गलनाडी**स्थाने अथवा गोलनाडीस्थाने लेखकप्रमादेन गलनाडीत्यवशिष्टम् । अस्यैवाऽपभ्रंशतया **गॉलब्लैडर** (Gall bladder) इत्यांग्लभाषायां गतं प्रतीयते । तथा पाठे च प्रवहद्रवा नाडी अथवा गोलाऽऽकारा नाडीत्यर्थः प्रतिपद्यते । अर्थद्वयमपि क्लोम्नि प्रत्यक्षमेवाऽस्ति । " समानवायोः प्रध्मानादक्तादेहोष्मपाचितात् । किञ्चिदुच्छूनसञ्ज्ञस्तु जायते क्लोमसञ्ज्ञकः ॥ तत्तुल्यहेतुजे प्लीहयकृती भिषजाम्मते " इति सर्वाङ्गसुन्दरग्रन्थाट्टोडरानन्दे उद्धरणम् । अत्र (सर्वाङ्गसुन्दरे) " समानवायोः प्रध्मानाद्रक्तादेहोष्मपाचिता-" दित्यनेन उच्छ्वसितत्वगोलाकारत्वयो र्निष्पन्नत्वेऽपि सन्देहवारणाय " किञ्चिदुच्छूनसञ्ज्ञस्तु जायते क्लोमसञ्ज्ञकः " इति स्पष्टीकृतम् । पुनरपि तत्रैव (टोडरानन्दे) " प्राणिनां यकृतप्लीहौ शोणितात्प्रभवौ मतौ । शोणितात्प्रभवं फेनं तस्माज्जातो हि फुप्फुसः ॥ यस्तु शोणितजः किट्टस्तस्मात्क्लोम च जायते । मेदःशोणितसम्भूतं कोष्ठे चान्त्रं प्रजायते " इति **पाराशरः** । " यस्तु शोणितजः किट्टस्तस्मात्क्लोम च जायते " इति वाक्येन क्लोम्नः कृष्णवर्णत्वमपि स्पष्टतयाऽभिहितम् । तत्तुल्यहेतुजे प्लीहयकृती इत्यनेन समाऽऽगतेऽपि गोलत्वे विशेषतया गोलत्वप्रतिपादनाय किञ्चिदुच्छूनतया विशेषितम्, प्रध्मापितस्य वस्तुनो गोलत्वं स्वभावसिद्धं भवति, अनेन (विशेषणेन) यदाऽस्मात् (क्लोम्नःसकाशात्) वायोरपगमो भवति तदोच्छूनता विनश्यति इति प्रत्यक्षसिद्धम् । नन्वेतद्वैचित्र्यं वस्तावपि दृश्यते कथन्न तस्य क्लोमत्वमिति चेन्न, शृङ्गिग्राहिकतान्यायेन तस्य (वस्तेः) स्वतन्त्रतया परिगणनात् । " क्लोमाउदर्यो जलाधार" इति महीधरेण स्पष्टतया क्लोमस्वरूपं वर्णितम् ।

" हृदयमेवेन्द्रः । यकृत्सविता । क्लोमा वारुणः " श. ब्रा. १२।९।१।१५ हृदयमेवाऽस्यैन्द्रः पुरोडाशः । यकृत्सावित्रः । क्लोमा वारुणो, मतस्ने एवाऽस्याऽश्वत्थश्च पात्रमौदुम्बरश्च । पित्तं नैयग्रोधम् आन्त्राणि स्थाल्यः । गुदा उपशयानि श्येनपत्रे प्लीहा । आसन्दी नाभिः । कुम्भो वनिष्ठुः । प्लाशिः शतातृण्णा । तद्यत्सा बहुधा वितृण्णा भवति तस्मात्प्लाशि र्बहुधा विकृत्तो मुखं शतं जिह्वा पवित्रं चप्यं पायुः वस्ति र्वालिः । श. ब्रा. १२।९।१।३ अत्र हृदयस्येन्द्राऽभिन्नत्वेन निरूपणाद्यथा देवेषु इन्द्रः प्रधानस्तथा देहे हृदयमस्तीति प्रतिपादितम् । यद्यपि स्वस्वकार्याऽपेक्षया सर्वाण्यप्यङ्गानि प्रधानान्येव सन्ति तथापि तदधीनत्वाद्देहस्य जीवस्य मुख्यस्थानत्वाच्च तथा प्रतिपादितम् । यकृत्सवित्रभिन्नत्वेन वर्णनाद्यथा धाह्ये सर्वे पाकाः सवित्रधीनाः सन्ति तथा शारीराणां धातूनां पाको यकृदधीन इति विज्ञापितम् । तद्वैकल्ये रसादिधातुप्रादुर्भावस्याऽसद्धत्वात् ।

पक्षौ मुखमस्य सत्यं विष्ठारी जातस्तपसोऽधियज्ञः । अ. ४।३४।१ ” इत्यादौ शीर्ष्णो ब्रह्मत्वेन प्रतिपादनाद्ब्रह्मणश्च सत्यस्वरूपत्वादिन्द्रियस्थानत्वाच्च । सविता यकृज्जजान, वरुणो भिषज्यन् क्लोमानं मतस्ने च जजान, वायव्यैः र्धायव्यौर्द्ध्वसौमिकपात्रैः पित्तं जजान, अत्र कर्तुरदर्शनाद् वायव्यैरिति लिङ्गेन वायुरिति परामृश्यते । स पित्तम्=पित्तमस्मिन्नस्तीति अर्शआद्यचि पित्तमिति नाम, स्फोटे तु पित्ताशय इति समायाति । पित्ताशयं जजान अत्र वायव्यौर्द्ध्वपात्रैः पित्तस्य (पित्ताशयस्य) जायमानत्वप्रतिपादनात्सौमिकोर्द्ध्वपात्राणां पैंक्रियसस्यैव सादृश्याच्चास्यैव वेदे पित्ताशयत्वं प्रतिपादितम् । शतपथब्राह्मणे च ‘ पित्तं नैयग्रोधम् ’ श. ब्रा. १२।९।१।३ इति न्यग्रोधेन सादृश्यदानादामाशयादधस्तात्तिर्यग्भूत्वा समन्तत आमाशयाश्रितत्वमुक्तम् । न्यग्रोधो ह्यन्यवृक्षसमाश्रितत्वेन चेदुत्पद्यते तर्हि पैंक्रियसस्य प्रायः सदृशाऽऽकृतिर्भवति । अतएव सुश्रुते तस्यैव पित्ताशयत्वेनाभिधानमुक्तम् । क्लोमस्तु (Gall bladder) अत्यन्तकोमलत्वाच्छीघ्रक्लान्तिभाक्त्वाच्च क्लोम इत्येव नाम स्थापितम् । “ श्वासो यकृति तृष्णा च पिपासा क्लोमजेऽधिका सु. नि. ९।२२ ” अत्र यकृत्क्लोमजविद्रध्योः समानमेव लक्षणं प्रदर्शितमाधिक्येन क्लोमजायां पिपासाधिक्यमुक्तम् । यद्यपि यकृतो विद्रधौ क्लोम्नो रसक्षरणमवरुध्यते तथैव क्लोमन्यपि भवति रसाऽऽगमनस्य यकृदधीनत्वात्, तथापि यदा यकृति विद्रधिर्भवति तदा क्लोमसम्बद्धाऽग्न्याशयस्य स्वस्थत्वात्तदीयद्रवस्य भुक्तान्ने प्रवेशात्पिपासायास्तादृश्युत्कटता न भवति, क्लोम्नि विद्रधिमत्त्वे तु क्लोमनाड्यामपि शोथाद्युपद्रवसम्भावनायामग्न्याशयोत्थद्रवस्याऽप्यवरोधात्पिपासाऽऽधिक्यमुपतिष्ठत इति स्वाभाविकी स्थितिरितिकृत्वोक्तं पिपासा क्लोमजेऽधिका इति ।

“ क्लोमजायां पिपासामुखशोषगलग्रहाः” चरक सू. १७।१०० इत्यत्र गलग्रहा इति केनाऽभिप्रायेण दत्तमिति न ज्ञायते । कदाचिच्चरकस्य गलनाडिकैव क्लोमत्वेनाऽभिप्रेता भवेत्तथात्वे च गलग्रह उचितएवेति तु न वाच्यम्–“ पित्ताऽनिलौ प्रवृद्धौ सौम्यान्धातूंश्च शोषयतः । रसवाहिनीश्च धमनी जिह्वामूलगलतालुकक्लोम्नः ॥ संशोष्य नृणां देहे कुरुतस्तृष्णां महाबलावेतौ । च. चि. २२।६ इत्यत्र चरकेणैव गलात्क्लोम्नः पृथङ्निर्दिष्टत्वात् । किञ्च “ स्नेहपीतस्य मन्दाग्नेः क्षीणस्याऽतिकृशस्य वा । अत्यम्बुपानान्नष्टेऽग्नौ मारुतः क्लोम्नि संस्थितः ॥ स्रोतस्सु रुद्धमार्गेषु कफश्चोदकमूर्च्छितः । वर्धयेतां तदेवाऽम्बु स्वस्थानादुदरायतौ ॥ च० चि० १३।४५–४६ ” अनया चरकोक्त्या मूर्खोऽपि गलनाड्याः क्लोमत्वं कल्पयितुं स्वप्नेऽपि न प्रयतेत, किम्पुनः सहृदया आयुर्वेदपारावारीणाः । “ जिह्वातालुगलक्लोमशोषेमूर्ध्नि च दापयेत्” सु० उ० ३९।१८२ इत्यत्र सुश्रुतेनाऽपि गलाद्भिन्नं क्लोम प्रतिपादितम् ।

“ पञ्चदशकोष्ठाऽङ्गानि–तद्यथा–नाभिश्च, हृदयञ्च, क्लोम च, यकृच्च, प्लीहा च, वृक्कौ च, वस्तिश्च, पुरीषाधारश्च, आमाशयश्च, पक्वाशयश्च, उत्तरगुदञ्च, अधरगुदञ्च, क्षुद्रान्त्रञ्च, स्थूलान्त्रञ्च, वपावहनञ्चेति चरक. शा० ७।१३ ” “ पञ्चदश कोष्ठाङ्गानि तद्यथा—नाभिश्च, हृदयञ्च, क्लोम च, यकृच्च, प्लीहा च० भेल सं. शा. अ. ७” “ मातृजश्चाऽयं गर्भो नहि मातुर्विना गर्भोत्पत्तिः स्यान्न च जन्म जरायुजानाम्, यानि खल्वस्य गर्भस्य मातृजानि यानि चाऽस्य मातृतः सम्भवतः सम्भवन्ति तान्यनुव्याख्यास्यामः । तद्यथा—त्वक् च लोहितञ्च मांसञ्च मेदश्च नाभिश्च हृदयञ्च क्लोम च यकृच्च प्लीहा च वृक्कौ च वस्तिश्च पुरीषाधानं चाऽऽमाशयश्च पक्वाऽऽशयश्चोत्तरगुदे चाधरगुदञ्च क्षुद्रान्त्रञ्च स्थूलान्त्रञ्च वपा च वपावहनञ्चेति मातृजानि । च. शा. ३।१३ ” “ उदकवहानां स्रोतसां तालु मूलं क्लोम च. वि. ५।८ ” इत्यादिवाक्यपर्यालोचनेन गलनाड्या न केनाऽप्युपायेन क्लोमत्वं साधयितुं सहृदयः (विद्वान्) प्रयतेत, तस्मात्कर्कीयवाक्य (क्लोमा गलनाडी इति

वाक्यं) मत्रद्वेयमेव तद्वाक्ये दृढभक्तिश्चेदस्मदुक्तयुक्त्या कर्को दोषाद्दूरीकरणीय इति। ये पुनः प्लूरा प्रभृतीनां क्लोमत्वं प्रतिपादयन्ति तेषामुक्तयस्तु खपुष्पायिता एव सन्तीत्यलमतिविस्तरेण।

(सं. ७०) तनिमा (यकृत्)=" हृदयं वै पशुः। तदस्यात्मन एवाऽभ्वेऽवद्यति तस्माद्यदि किञ्चिद्वदानं हीयेत न तद्वाद्रियेत सर्वस्य हैवास्य तत्पशोरवत्तं भवति यद्धृदयस्याऽभ्वेऽवद्यति तस्मान्मध्यतः सतो हृदयस्यैवाऽभ्वेऽवद्यत्यथ यथापूर्वम्। अथ जिह्वायै। सा हीयं पूर्वार्धात्प्रतिष्ठत्यथ वक्षसस्तद्धि ततोऽथैकचरस्य दोष्णोऽथ पार्श्वयोरथ तनिम्नोऽथ वृक्कयोः॥ शत० ब्रा० ३।८।३।१६-१७" इत्यत्र पार्श्ववृक्कयोर्मध्ये आगमनाद्धृदयवत्प्रधानाऽङ्गत्वाच्च तनिमेति यकृत एव नाम प्रतिभाति।

(सं. ७२) पाजस्यम्=पाज इति पशूनामर्द्धचर्वितत्तृणादिपिण्डे वर्तते। उदरपूर्त्यनन्तरं सुखमुपविश्य यमाकृष्य पुनश्चर्वयन्ति, लौकिकसंस्कृते रोमन्थपदवाच्यम्। प्राकृते तु पागुर, पगुरी इति नाम्ना आबालवृद्धप्रसिद्धम्। तद्धि बलस्य कारणत्वान्निरुक्ते बलनामसु परिगणितम्। तस्मै हितम् पाजस्यं शरीरावयवाद्यदिति (पा. ५।१।६) यत्प्रत्यये पाजस्यमामाशयः। "श्येनः क्रोडोऽन्तरिक्षं पाजस्यं बृहस्पतिः ककुद् बृहतीः कीकसाः॥ अथर्व. ९।१२।५॥" शरीराऽवयवेष्वामाशयेऽतितरामवकाशत्वादन्तरिक्षेण साकं सादृश्यं दत्तम्। अत एव कृताऽजाऽङ्गविभागविषये "*प्रतीच्यां दिशि भसदमस्य धेह्युत्तरस्यां दिश्युत्तरं धेहि पार्श्वम्। ऊर्ध्वायां दिश्यजस्याऽनूकं धेहि दिशि ध्रुवायां धेहि पाजस्यमन्तरिक्षे मध्यतो मध्यमस्य॥ अथर्व. ४।१४।८*" *अस्य*=विशस्तस्याऽजस्य प्रतीच्यां दिशि भसदं=कटिप्रदेशं धेहि, उत्तरस्यां दिशि उत्तरं पार्श्वं=पर्शुसमूहं धेहि, ऊर्ध्वायां दिश्यजस्याऽनूकं पृष्ठवंशं धेहि, ध्रुवायामधस्ताद्दिश्यस्य पाजस्यं धेहि। मध्यतोऽन्तरिक्षेऽस्यमध्यमर्थाद्भूमिस्पर्शरहितं यथातथा धेहि स्थापय। अत्राऽङ्गविभागत्वेन पाजस्यमित्यामाशयस्यैव नाम। तत्र चाजीर्णभोजनस्य सत्त्वात्पार्थिवभागस्य साक्षाद्वर्तमानत्वाद्भूम्यां निधानमुक्तम्। अपरिपक्वभोजने जलपृथिव्योरेव भागस्याऽधिकत्वात्। जलादपिपृथिवीभागस्य तृणादेरधिकत्वेन वर्तमानत्वात्तस्य भूम्यां निधानमुचितमेव।

"उषा वाऽश्वस्य मेध्यस्य शिरः। सूर्यश्चक्षुर्वातः प्राणो व्यात्तमग्निर्वैश्वानरः संवत्सर आत्माऽश्वस्य मेध्यस्य द्यौष्पृष्ठमन्तरिक्षमुदरं पृथिवी पाजस्यं दिशः पार्श्वे अवान्तरदिशः पर्शव ऋतवोऽङ्गानि मासाश्चार्धमासाश्च पर्वाण्यहोरात्राणि प्रतिष्ठा नक्षत्राण्यस्थीनि नभो मांसान्यूवध्यं सिकताः सिन्धवो गुदा यकृच्च क्लोमानश्च पर्वता ओषधयश्च वनस्पतयश्च लोमान्युद्यन् पूर्वार्धो निम्लोचन् जघनार्धो यद्विजृम्भते तद्विद्योतते यद्विधूनुते तत्स्तनयति यन्मेहति तद्वर्षति वागेवाऽस्य वागहर्वा अश्वं पुरस्तान्महिमान्वजायत तस्य पूर्वे समुद्रे योनी रात्रिरेनं पश्चान्महिमान्वजायत तस्यापरे समुद्रे योनिरेतौ वाऽश्वं महिमानावभितः सम्बभूवतु र्हयो भूत्वा देवानवहद्वाजी गन्धर्वानर्वासुरानश्वो मनुष्यान्त्समुद्र एवाऽस्य बन्धुः समुद्रो योनिः॥ श. ब्रा. १०।६।४" अत्र च पाजस्यस्य पृथिव्याः सादृश्यमुक्तम्। यकृत्क्लोम्नाश्च पर्वतैः सादृश्यमुक्तमुत्थितिमत्त्वाद्रचनावैचित्र्याच्च। एवं यत्रयत्राऽधिकसादृश्यं लभ्यते तत्रतत्र तत्तुल्यता प्रदर्श्यते इति सूक्ष्मतया विवेचनीयम्।

यत्तु सायणेन=पाज इति बलनाम। तत्र हितं उदरगतं ऊवध्यमिति व्याख्यातं तदसमीचीनम्, ऊवध्यस्य शरीराऽवयवत्वाऽभावात्। परिपक्वविष्ठादीनां निधानस्याऽकथनाच्च। सायणमताऽनुगामिनाऽपि महीधरेण "इन्द्रस्य क्रोडोऽदित्यै पाजस्यं" वा. सं. २५।८ इति मन्त्रे पाजसे बलाय हितं पाजस्यं ऊवध्यमिति सायणकृतार्थाऽवहेलनया बलकरमङ्गं निर्दिष्टम्, परं तत्कतमदिति तेन नाऽबोधि अतः स्पष्टतया न निर्दिष्टम्। "प्रजापतिश्च परमेष्ठी च शृङ्गे इन्द्रः शिरो अग्निर्ललाटं यमः कृकाटम्" अथर्व. ९।१२।१ इत्यारभ्य "अभ्रं

पीवो मज्जा निधनम् " अ. ९।१२।१८ एतत्पर्यन्तं सर्वाण्यङ्गानि प्रत्यङ्गानि च वृषभस्य वर्णितानि। तत्राऽऽमाशयस्य स्पष्टतया कुत्राऽपि नाम नाऽगतमस्ति किन्तु "अन्तरिक्षं पाजस्यमित्यनेनैव तदुपादानमस्ति। एवं सर्वत्र शारीरविभागे पाजस्यनाम्नैवाऽऽमाशयो गृह्यते परन्तु यद्दोः कालाच्छारीरविभागस्य नष्टत्वात्सायणसमयेऽपि तस्य साक्षाज्ज्ञानाऽभावात् कुशकाशाऽवलम्बनन्यायेन यत्रतत्र यत्किञ्चित् कथयित्वा भाष्यं समापितमस्ति। न च वाच्यं तत्राऽपि पाजस्यशब्देन जघन्यभक्ता यर्य जघन्यमेव ग्रहीष्याम इति। रक्षांसि लोहितमितरजना ऊवध्यम्" अ. ९।१२।१७ इति सप्तदशामन्त्रे स्पष्टतया ऊवध्यस्य कथनादस्य हठस्य निर्मूलत्वादित्यलमतिपल्लवितेन।

(सं. ७३) हलीक्ष्णम्=हलस्येव ईक्षणं दर्शनं यस्येति विग्रहे हलसादृश्यमग्न्याशये उपान्त्रे चेसे. तत्स्थानद्वये उपलभ्यते, परन्तु 'आन्त्रेभ्यः' इत्यत्र बहुवचनादुपान्त्रस्य चान्त्रैकदेशत्वादान्त्रशब्देनैव तद्ग्रहणात्रो-पान्त्रस्य ग्रहणमुचितम्। तथाहि—"हृदयात्ते परिक्लोम्नो हलीक्ष्णात्पार्श्वाभ्याम्। यक्ष्मं मतस्नाभ्यां प्लीह्नो यक्नस्ते विवृहामसि"॥ आन्त्रेभ्यस्ते गुदाभ्यो० अथर्व० २।३३।३—४" इत्यत्र पूर्वापरसम्बन्धाऽनुसन्धानेन क्लोममतस्नयोर्मध्ये हलीक्ष्णस्याऽवस्थानं प्रदर्शितम्। आन्त्राणाञ्च तदनन्तरं कथनान्नोपान्त्रस्याऽत्र ग्रहणमुचितं किन्त्वग्न्याशयस्यैव नामेति विद्वद्भिर्विभावनीयम्॥

बहुवचनाऽन्त्रविवरणम् (सं. ७४)

"यदान्त्रेषु गवीन्यो र्यद्वस्तावधिसंश्रितम्। एवा ते मूत्रं मुच्यतां बहिर्बालिति सर्वकम्॥ अ. १।३।६" इत्यत्राऽन्त्रगवीनीवस्तिष्ववरुद्धमूत्रस्य वेगेन बहिर्निस्सरणाय प्रार्थना कृताऽस्ति, सा च गवीनीवस्त्योर्विषये मूत्रस्थानत्वादुचितैवास्ति। परन्त्वान्त्रेषु मूत्राऽवरोधः कथं सम्भवतीति संशये "सूक्ष्मनिर्माणं तु वृक्कस्यातिविचित्रम्। वृक्कपरिधिस्थं हि बहिर्वस्तु मूत्रनिर्मापकैः सूक्ष्मै र्वर्तुलप्रायै र्यन्त्रकैरेव भूम्ना निर्मितम्। तेषां **मूत्रोत्सिका** इति सञ्ज्ञा, उत्सवद् अस्रजं वारिप्रभवत्वात्। नवतिश्च तासामङ्गुल-मात्रे प्रदेशे प्रायः। ता ऋजुकाख्यानां सूक्ष्मधमनीनामन्तरालेषु तत्सूक्ष्मतमशाखालम्बिताः फलगुच्छवद् अवति-ष्ठन्ते। एकैकाञ्च उत्सिकां प्रविशति एकैका सूक्ष्मा धमनी गुच्छमुखी। तां हि वर्तुलप्राये गुच्छे परिणतां प्रावृणोति विचित्रनिर्माणः पुटकाकारः कलाविशेषः। पुटकान्तश्च शनैः शनैः क्षरति अतिसूक्ष्मैः कणैः शोणि-तस्य लाव्यभाग आप्यो मूत्रं नाम। तद् उत्सिकानिर्गतेन सूक्ष्मेण मूत्रवहस्रोतसा वृक्कान्तर्नीयते। उत्सिकाभ्यो निर्गतानि च मूत्रस्रोतांसि क्षुद्रान्त्रवत् कुण्डलीभूय केन्द्राऽभिमुखं प्रवर्तन्ते। प्रतिस्रोतश्च दृश्याश्चत्वारो भागाः— (१) आद्यकुण्डलिकाभागः (२) पाशभागः (३) अन्त्यकुण्डलिकाभागः (४) ऋजुभागश्चेति। परस्परपार्श्वस्थानि च तानि ऋजुस्रोतांसि वृक्कशिखरिकाणां निर्माणाय कल्पन्ते। तेषाञ्च मूत्रस्रोतसामान्त्रवत् प्रवर्तमानाद् आन्त्राणीति सञ्ज्ञा प्राचाम् (प्र. शा. भा. २ पृ. २३२)" इत्यन्तेन सन्दर्भेण वृक्कपरिध्यास्तृत-मूत्रोत्सिकासु लाक्षणिकमान्त्रत्वं व्याख्याय महामहोपाध्याय**गणनाथसेनै** र्यथाकथञ्चित्समाहितम्। तच्चाऽऽपाततस्सुसाधु प्रतिभाति, परन्तु वैदिकशारीरविभागेषु मूत्रोत्सिकानां कुत्रचिदपि अन्त्रशब्देनाऽऽन्त्रशब्देन वा अनाग-मनाद्गवीनीशब्दस्योपलक्षणत्वेन वृक्कसहितयो र्गवीन्योरत्र ग्रहणमुचितमेतच्च "वि ते भिनद्मि मेहनं" इतिमन्त्र-व्याख्याने संस्कृतोपोद्घाते चतुर्थपञ्चमपृष्ठयोरस्माभिर्व्याख्यातमस्ति। वैदिकशारीरे यज्ञादौ पश्वङ्गविभागे यत्र स्वसन्निहिताऽवयवस्याऽनुक्ति र्दृश्यते तत्र सर्वत्राऽयमेव पन्थाः समाश्रीयते। अन्त्रवत्सन्निवेशाच्चेन्मूत्रोत्सिकानां ग्रहणमान्त्रशब्देन क्रियेत तर्हि शुक्रवाहिस्रोतसां कथमान्त्रशब्देन ग्रहणंनभवति मूत्रोत्सिकाऽपेक्षया तत्राऽधिकसादृश्यात्, तस्माद्गवीनीसन्निहितत्वाद्गवीनीशब्देनैव वृक्कद्वयग्रहणस्य सिद्धत्वेन यत्नान्तराऽऽलम्बनस्याऽनावश्यकत्वात्। नन्वेवं तर्हि

आन्त्राणीत्यनेन किङ्गृहीतव्यमिति संशये यानि तन्नाम्ना आबालवृद्धं लोके वेदेच प्रसिद्धानि तान्येव ग्राह्याणीति ब्रूमः तत्र च अन्त्राण्येवेत्यर्थे स्वार्थे अन्त्राणामिमानि स्थानानीत्यर्थे वा अण् प्रत्ययः। न चैवं तर्हि तत्र मूत्रसम्भरणं कथं युज्यत इति वक्तव्यम् ? आन्त्रविषये मूत्रशब्देन मूत्रसमवायिकारणस्य शरीरपोषणाऽनुपयुक्तक्षारप्रधानद्रवस्याऽभिप्रेतत्वात्। "आहारस्य रसः सारः सारहीनो मलद्रवः। सिराभिस्तज्जलं नीतं वस्तौ मूत्रत्वमाप्नुयात्॥ शार्ङ्ग० १।६।७" स्वास्थ्याऽऽपन्नाऽऽमाशयादिसर्वशरीरयन्त्रस्य प्रदीप्ताऽग्नेश्च पुरुषस्य मात्रया काले सात्म्यञ्च भुक्तमामाशयाद्यग्निसाहाय्येन परिपच्यमानं सारशब्दवाच्यं रसरूपत्वं भजति। स च रसो यकृत्प्लीहानौ प्राप्य रञ्जितस्सन् हृदयं प्राप्नोति, ततश्च फुप्फुसं प्राप्य विशुद्धतां भजन् हृदयं, हृदयात्समस्तशरीरं गच्छन्नहरहश्शरीरं धारयति। अस्मिंश्च पोषणाऽनुपयुक्तभागाः प्रतिस्थलाद्वाष्पद्वारेण प्रस्वेदरूपतां प्राप्य बहिर्निःसरन्ति। अवशिष्टश्च क्षारद्रवो रक्तेन सह परिभ्रमन् वृक्कौ प्राप्नोति, तत्स्थाभि र्मूत्रोत्सिकाभी रक्तात्पृथक्कृत्य सूक्ष्मस्रोतोभिर्वृक्कयोरन्तर्नीयमानः गवीनीमार्गाभ्यां वस्तिं प्राप्तः मूत्रत्वसञ्ज्ञां लभमानो मूत्रपथाद्यथासमयं बहिर्निःसार्यते, सेयं शैलीस्वस्थशरीराणाम्। यदाऽऽमपक्वाशयनिबद्धरसाऽऽहारिण्यो यकृदादिशैथिल्येन प्रतिरुद्धमार्गाः सन्त्यःस्वाऽऽकृष्टरसमूर्ध्वमनयनसमर्था भवन्ति तदा प्रतिरुद्धः स आमरसः प्रतीपमार्गमागत्याऽऽन्त्रेषु शनैः सञ्चीयते, तस्य दूरीकरणार्थं वेदे वरुणः स्तुतोऽस्ति तथाहि—

अप्सु ते राजन् वरुण गृहो हिरण्ययो मिथः। ततो धृतव्रतो राजा सर्वा धामानि मुञ्चतु अथर्व. ७।८८।१॥

हे राजन् वरुण अप्सूदकेषु मध्ये ते तव यतो मिथः=अनन्यसाधारणः परेषामनभिगम्यो वा हिरण्ययः=हिरण्मयः सुवर्णमयो गृहः स्थानमस्ति। ततस्तस्मात्कारणाद्धृतव्रतः=व्रतमिति कर्मनाम नियतकर्मा सत्यकर्मा राजा वरुणः सर्वा=सर्वाणि धामानि स्थानानि अस्मदीयानि दुर्दैवात्सम्भृतजलस्थानानीतियावत् मुञ्चतु त्यजतु। धामानि त्रयाणि भवन्ति स्थानानि नामानि जन्मानीति हि यास्कः (नि. ९।२८)। जलोदरादयोरोगा हि वरुणकर्तृकाः, तस्य हि जलमध्ये निवासस्थानमस्ति। अतः स्वेन गृहीतानि अस्मदीयाऽवयवरूपाणि स्थानानि त्यक्त्वा स्वगृहे निवसत्वित्यर्थः॥ १॥

धाम्नोधाम्नो राजन्यतो वरुण मुञ्च नः।
यदापो अघ्न्या इति वरुणेति यदूचिम ततो वरुण मुञ्च नः॥ अ. ७।८८।२॥

हे राजन् वरुण! यतोऽस्मात् धाम्नो धाम्नः सर्वस्मात् रोगस्थानात् नः=अस्मान् मुञ्च मोचय। किञ्च हे वरुण इति यदूचिम यच्छापवाक्यमवोचाम यच्छापवाक्यवचनेन पापमार्जितं तस्मादपि मुञ्चेति सम्बन्धः। शापो हि प्रशस्तदेवतानामसङ्कीर्तनेन परेषामनर्थशंसनम्। यद्वा सत्यसति वा विषये 'आपो वै सर्वा देवता' (ऐ. ब्रा॰ २।१६) इति सर्वदेवात्मिकानामपाम् साक्षित्वेन प्रमाणीकरणम्। हे आपः यूयमस्मिन् सत्ये असत्ये वा विषये साक्षीभूता भवथ। हे आप युष्मभ्यं शपामहे इदमित्थं इत्येवं विधं प्रशस्तदेवतानामधेयपुरःसरं यद्वाक्यं तेन पापमार्ज्यते। सत्येपि हि विषये शपथकरणेन धर्मस्यार्धं वैवस्वतो निक्रन्तति किल, असत्ये किमु वक्तव्यम्। अतो देवतानामधेयकीर्तनरूपशपथकरणजनितपापादस्मान् मोचयेत्यर्थः। अत्र ऊचिमेति पदेन वचनमात्रं न विवक्षितम् किन्तु शपथरूपमेव। अत एव तैत्तिरीये "यदापो अघ्निया इति वरुणेति शपामहे" (२–६–६–२) इति समाम्नायते॥ २॥

उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यमं श्रथाय।
अथा वयमादित्य व्रते तवानागसो अदितये स्याम॥ अ. ७।८८।३

हे वरुण उत्तमम् ऊर्द्धकायस्थितं पाशं अस्मत्=अस्मत्तः सकाशाद् उच्छ्रथय=ऊर्ध्वमुत्कृष्य नाशय । अधमम्=अधः कायस्थितं पाशं अवश्रथय=अधस्तादवकृष्य नाशय । मध्यमं=मध्यदेशस्थितं पाशं विश्रथय विकृष्य नाशय । अथ=अनन्तरं हे आदित्य=वरुण तव व्रते कर्मणि कर्मार्थं यागयोग्यतासिध्यर्थं अनागतः विमुक्तसर्वपाशा वयमदितये अखण्डितत्वाय अनभिशस्तये स्याम..भवेम ॥ ३ ॥

प्रास्मत् पाशान् वरुण मुञ्च सर्वान् य उत्तमा अधमा वारुणा ये ।
दुःष्वप्न्यं दुरितं नि ष्वास्मदथ गच्छेम सुकृतस्य लोकम् ॥ अ. ७।८८।४

हे वरुण अस्मत्=अस्मत्तः सर्वान् पाशान् प्रमुञ्च । ये वारुणाः वरुणस्य भवतः सम्बन्धिनः उत्तमा अधमाश्च ये पाशाः सन्ति । उद्भूताभिभूतशक्तिभेदात् अधर्मपाशानां द्वैविध्यम् । किञ्च दुःष्वप्न्यम् दुष्टे स्वप्ने भवे दुरितं पापमरिष्टं अस्मत्=अस्मत्तो निःष्व निस्सुव । निर्गमयेत्यर्थः । अथ पाशदुरितविमोचनाऽनन्तरं सुकृतस्य सुष्ठु कृतस्य पुण्यस्य लोकं गच्छेम प्राप्नुयाम ॥ ४ ॥

इत्यत्र ऊर्ध्वाऽधःसञ्चितदूषितजलीयभागस्य निःसारणाय वरुणस्तुतिकरणात् स्पष्टमेव समायातम्, यत् स्रोतसां प्रतीपगत्या समस्तशरीरे विशेषतश्चोदरे दूषितजलसम्भरणं जायते । सहस्रशो रोगिषु तत्प्रत्यक्षदृश्यं चास्ति । अथवा विसूचिकामूत्राघातमूत्रकृच्छ्रादौ तत्तत्कारणविशेषैर्मूत्रपथेऽवरुद्धे वस्त्यादौ स सम्भृतो भवति । तस्याऽप्यतिमात्राऽवरोधे उदावर्तिततया प्रतीपमार्गमागत्य शरीरभागेषु सञ्चीयते । एवमेवं येन केनाऽपि प्रकारेण मूत्रत्वसञ्ज्ञां प्राप्तः प्राप्तुं योग्यो वेति सर्वोऽप्यत्र क्षारद्रवो मूत्रशब्देन विवक्षितः; तस्य सर्वस्यापि मलद्रवस्य निःसरणाय प्रार्थना कृताऽस्ति, साचाऽमुना प्रकारेण आन्त्रेषु सम्यक् सम्भवन्त्येवाऽऽस्ते, अतएवेदं (अथर्व. १।३) सूक्तं मूत्रपुरीषनिरोधप्रशमनाय विनियुक्तं सूत्रकारैः । तथाहि—"विद्मा शरस्येति तृतीयसूक्तेन मूत्रपुरीषनिरोधे प्रमेहणसाधनहरीतकीकर्पूरबन्धनम् मूषिकामृत्तिकापूतीकतृणदधिमथितजरत्प्रमन्ददारुतक्षणशकलानां अन्यतमस्य पायनं हस्त्यश्वादियानारोहणं शरविसर्जनं शरेण मूत्रनालविदारणं लोहशकलस्य मूत्रद्वारे प्रवेशः इत्येवमादीन्यपि सूत्रोक्तप्रकारेण व्याधितस्य कुर्यात् । "विषितं ते वस्तिबिलम्" इति द्वयृचेन मूषिकामृत्तिकायुक्तद्रव्येषु निरुद्धमूत्रपुरीषं पुरुषं आस्थापयेत् । "विद्मा शरस्येति प्रमेहणं बध्नाति" इत्यादि "फाण्टं पायय तीत्युदावर्तिने च" इत्येतदन्तं सूत्रं द्रष्टव्यम् (कौ० ४।१)" इति । अस्मदुक्तार्थो यदि नाऽभिप्रेतः स्यात्तर्हि अस्मिन् सूक्ते नवस्वपि मन्त्रेषु पुरीषरोधस्य नाममात्रस्याऽप्यगमनात् कथन्तन्निरोधनिवृत्त्यर्थं फाण्टादिपायनं विहितं सङ्गच्छेत । अत आन्त्रशब्देनाऽऽन्त्रवृद्धं प्रसिद्धान्येवाऽन्त्राणि महीतुमुचितानि न पुनर्वृक्कपरिधिस्थमूत्रोत्सिकानाम् । तासान्तु ग्रहणमस्मदुक्तरीत्याऽनायासेनैव सिद्धम् । किञ्च—खादितपीतादिवस्तुन उदर्येण वह्निना परिपाकावदा सारतया रसः प्रादुर्भवति तत्र योऽयमेकान्ततः शरीरपोषणाऽनुपयुक्तः क्षारीयभागः सः मृद्घटस्थापितलवणस्य निःस्राव इव अतिसूक्ष्मैश्छिद्रै=रक्तसहप्रचारमनपेक्ष्य स्वतन्त्रतया वृक्कयो र्गच्छति इति महर्षीणामभिप्रायोऽस्ति । शरीररचनाया अतिसूक्ष्मत्वादतिसूक्ष्माः शरीरपरिणामाः ज्ञातुमशक्यास्ते केवलमनुमेयाः सन्ति, यथा शुक्रशोणितयोर्गर्भाशये प्रवेशसमये योऽयं गर्भपोषणक्रमः सः कियत्समयपर्यन्तमतर्क्य एवाऽऽस्ते । द्रवेण शरीरयन्त्रस्योत्पन्नत्वादवयवानां परस्परं संश्लिष्टत्वात् । अतितीक्ष्णपदार्थानां येन शीघ्रतया व्याप्ति र्भवति सा सर्वथा अतर्क्यैवाऽऽस्ते । तथा च ग्रीष्मघर्मसन्तप्तमनुष्येण पीतं जलं पानसमकालमेव समस्तशरीराद्युगपत्प्रस्वेदरूपेण बहिर्निर्गच्छति, सा व्याप्ति र्न रक्ताऽभिसरणक्रममपेक्षते । मूत्राऽवरोधे चाऽतिमूत्रलद्रव्यदाने तत्क्षणमेव दृश्यते मूत्रक्षरणम् । यदि रक्ताऽभिसरणमार्गमेवाऽनुसृत्य वृक्कयो र्मूत्रं विभज्यते तर्हीत्थं शीघ्रतयामूत्रक्षरणात्मिका प्रवृत्ति र्न सम्भवत्येव । अतः पक्वाशयात्सूक्ष्ममार्गेणाऽपि क्षारीयद्रवस्य वृक्के-

प्राप्ति भवति इति महर्षीणामभिप्रायोऽस्ति। अतएव " पक्वाशयगतास्तत्र नाड्यो मूत्रवहास्तु याः। (सु. नि.३।२१) इत्याद्युक्तं सङ्गच्छते, परमिदं दृश्यं विशेषलमयेष्वेवाऽनुमानगोचरं भवति। न सर्वकाले अनयाऽपि रीत्या ऽन्त्रेषु मूत्राऽवरोधः सम्भवति। नन्वेवं तर्हि स्रोतसां कार्यविप्लवो भवेत्, तस्मिंश्च जाते न मूत्रवहेषु मूत्रस्यैव निःसरणमेवं पुरीषादिवहेष्वपि कथं न कार्ये व्यतिकरः स्यादिति तु न शङ्कनीयमेव। समस्तशरीराऽवयवेषु यद्यपि सूक्ष्माणि छिद्राणि सहस्रशः सर्वत्र गमनशालीनि सन्त्येव परन्तु बलीयसा अनुलोमधातुप्रवाहेण दुर्बलस्य प्रतिलोममार्गस्याऽवरोधो भवति। सुरङ्गा इव सर्वेष्ववयवेषु यानि सर्वत्रगमनशीलानि सूक्ष्मच्छिद्राणि सन्ति तानि सूक्ष्मकलयाऽऽवृतानि सन्ति अतस्तेषु न सर्वेषां धातूनां निर्गमनं भवति किन्त्वीश्वरनिर्मिताऽनुलोममार्गेणैव गच्छन्तो रसादयः तत्तत्स्थानोष्माणं समासाद्य तत्तत्परिणामविशेषानासादयन्तोऽहर्निशमिदं शरीरं पालयन्ति। यदा तु कालार्थकर्मणामयोगाऽतियोगमिथ्यायोगै र्वातादयो विगुणतामासादयन्ति तदा धातुमार्गानाध्मापयन्ति, तेन चाऽऽध्मापनेन सूक्ष्मकलायाः स्फारीभावात् तदाऽऽवृतानि सूक्ष्माणि छिद्राण्युद्घाटितानि भवन्ति तदा स्रोतसां कार्यस्य व्यतिकरो भवति। तस्मिन् काले प्रायो मूत्रविशोरतिसङ्गोऽतिप्रवृत्ति र्वा भवति। तदाऽऽन्त्रेषु मूत्रस्य भवत्येव साक्षात्सञ्चयः। यथा—" रूक्षदुर्बलयो र्वातेनोदावृत्तं शकृद्यदा। मूत्रस्रोतः प्रपद्येत विट्संसृष्टं तदा नरः। विड्गन्धं मूत्रयेत्कृच्छ्राद्विड्विघातं विनिर्दिशेत्॥ च. सि. ९।४७" इत्यत्र विड्वहस्रोतसः सूक्ष्मच्छिद्राणामुद्घाटितमुखत्वान्मूत्रस्रोतः प्राप्तत्वेन कृच्छ्रान्मूत्रप्रवर्तनमुक्तम्, मूत्रप्रवर्तने विड्गन्धयुक्तत्वञ्चोक्तम्। शुक्रदुष्टौ " मूत्रपुरीषगन्धि सन्निपातेनेति" (सु. शा. २।४) शुक्रे मूत्रपुरीषगन्धित्वमुक्तम्। इदमप्युक्तरीत्यैव सम्भवति कथमन्यथा शुक्रे पुरीषगन्धः सम्भवेदिति विद्वद्भिराकलनीयम्। अतः " यदाऽऽन्त्रेषु गवीन्यो–(अ. १।३।६)" रित्यत्र आन्त्रशब्देन प्रसिद्धान्यान्त्राण्येव ग्रहीतव्यानि प्रधानत्वात् लक्षणावृत्त्या मूत्रोत्सिकानाममीष्टं तर्हि क्रियतां तदपि; परन्त्वस्मदुक्तरीत्या सद्ग्रहणस्याऽन्यथैव सिद्धत्वात् पुनस्तद्ग्रहणप्रयत्नस्य पिष्टपेषणता स्यादित्यलमतिविस्तरेण।

(सं. ७३) **पुरीतत्**—पुरीवन्नगरीवत् तन्यते इतस्ततो निक्षिप्यते तत्पुरीतत्। नगर्यां हि इतस्ततः क्रमेणाऽक्रमेण वा गृहाणि स्थितानि भवन्ति तद्वदस्य पुरीततोऽपि ईश्वरेण विन्यासः कृतोऽस्ति, प्रवेशनिर्गममार्गौ च कृतौ स्तः। अतः पुर्यासादृश्यात्सम्यगन्वर्थमेव क्षुद्राऽन्त्राणां पुरीतदिति नाम। सम्पदादित्वात्किपि " गमादीनां कौ" वा० ६।४।४० इत्यनुनासिकलोपे तुकि च पुरीतदिति सिध्यति। यदा तु पुरि शरीरे तन्यत इति विगृह्यते तदा ' हलदन्तात्सप्तम्या०' (पा. ६।३।९) इत्यलुकि ' न हि वृतिवृषिव्यधिरुचिसहितनिषु कौ' (पा. ६।३।११६) इति दीर्घे पुरीतत्। यद्वा पुरीं शरीरं तनोति विस्तारयति इति पुरीतत्। " अष्टाचक्रा नवद्वारा देवानां पूरयोध्ये–"त्यादौ शरीरस्य पुरीत्वाऽभिधानात्, तत्पोषणस्याऽन्त्राऽधीनत्वात्। ग्रहण्यादिरोगे रसादिधातुक्षयाच्छरीरपातस्य प्रत्यक्षदृष्टत्वात्। बहूनामर्थानां सम्भवेऽपि ' पुरीव तन्यते' इत्येवाऽर्थोऽत्र साधुः। संस्कृते सञ्ज्ञानां प्राय आकारबोधकत्वफलत्वादन्यव्युत्पत्तिषु नहि कश्चिदसाधारणोऽर्थ उदेति येनेतराऽवयवव्यावृत्तिः स्यादतो पुरीव तन्यते इत्येव विग्रहः साधुः। तथात्वे तु यथा पुरीमध्यवर्तिनां गृहाणां दूरतो दर्शने भवति दृश्यं एकस्योपरि द्वितीयादि सञ्चितमिति तद्वत्क्षुद्राऽन्त्राणां सन्निवेशस्य सत्त्वात्। " चेतो हृदयं यकृन्मेधा व्रतं पुरीतत्" अथर्व. ९।१२।११ " देवजना गुदा मनुष्या आन्त्राण्यत्रा उदरम्॥ अ. ९।१२।१६" अस्मिन् सूक्ते एकादशमन्त्रे पुरीतत्समागतं षोडशमन्त्रे चाऽन्त्राणि इति समागतमतः क्षुद्रान्त्राणां पुरीतदिति नाम स्थूलान्त्रस्याऽन्त्राणीति बोध्यम्। बहुवचनन्तु पक्वाशयादिनानाभेदज्ञापनार्थम्। १२ मन्त्रे वनिष्ठोरागमनात्तत्पर्यन्तमेव स्थूलाऽन्त्रमर्यादेति समायातम्। एवमेव " यत् ते क्लोमा यद्हृदयं पुरीतत् सह कण्ठिका। आमिक्षां दुहतां दात्रे क्षीरं सर्पिरथो मधु॥अ. १०।९।१५॥ यत् ते यकृद् ये मतस्ने यदान्त्रं

याश्च ते गुदाः । आमिक्षां० ॥ १६ ॥ यस्ते प्लाशि यो वनिष्ठुर्यौ कुक्षी यच्च चर्म ते ॥ आमिक्षां० ॥ १७ ॥ अस्मिन्नपि सूक्ते (अ. १०।९।१५–१६–१७) उपरिनिर्दिष्टयजुर्मन्त्रवदत्रापि मन्त्रेषु पुरीतदान्त्रवनिष्ठूनां क्रमेण समागमनाद् ग्रामगृहस्थितिवत् संस्थापितक्षुद्रान्त्रेषु पुरीतत्, स्थूलान्त्रे आन्त्रम्, उण्डुके च वनिष्ठुरिति सञ्ज्ञाः क्रमेण कृताः सन्ति, अत एषां नाम्नि, स्थाने, आकारे च स्पष्टता सञ्जाता सा यथा—आमाशयादारभ्य पक्वाशयद्वारपर्यन्तभागस्य पुरीतत् इति नाम । पक्वाशयमारभ्य उण्डुकपर्यन्तभागस्य आन्त्रमिति सञ्ज्ञा । ततोऽधस्तात्कुम्भेन्दुकाऽन्यतराऽऽकृतिविशिष्टभागस्य वनिष्ठुरिति सञ्ज्ञा ततोऽधस्तादुत्तरगुदमिति, सर्वतोऽधस्ताद्गुद इति वैदिकीसञ्ज्ञाः ॥

(सं. ७५) वनिष्ठुः—"कुम्भो वनिष्ठुर्जनिता शचीभिर्यस्मिन्नग्रे योन्यां गर्भो अन्तः । प्लाशिर्व्यक्तः शतधार उत्सो दुहे न कुम्भी स्वधां पितृभ्यः ॥ वा. सं. १९।८७" इत्यत्र वनिष्ठोः कुम्भसादृश्यदानादुण्डुक एव ग्रहीतव्यः । समग्रमन्त्रार्थाऽऽकलनया च न साधारणेन घटेन सादृश्यं प्रतिभाति, अपि तु सुरानिर्माणकुम्भेन सादृश्यप्रतिपादनान्मध्ये स्थूलोदरतया ऊर्ध्वाऽधो विद्यमानाऽन्त्रभागाभ्यां शुण्डायुक्तत्वसादृश्याद्वनिष्ठोरुण्डुकत्वाच्चत्वे न कश्चिदपि शङ्काऽवलेशोऽवशिष्यते । अस्यमन्त्रस्यार्थो भगवता कपिलेन स्पष्टतया प्रतिपादितस्तत्र मलाकार-सादृश्याज्जठरायां वनिष्ठुत्वमौपचारिकं मत्वा कूपसादृश्यमधिकतया दत्तं तथाहि—देहान्यदेहविवरे जठराग्निनाऽसृ-ग्विण्मूत्रकूपपतितो भृशतप्तदेहः । इच्छन्नितो विवसितुं गणयन् स्वमासान्निर्वास्यते कृपणधीर्भगवन् कदा नु ॥ भा. ३।३१।१७ ॥ अस्मत्कृतभाष्यन्तु प्लाशिटिप्पण्यां द्रष्टव्यम् "आन्त्रेभ्यस्ते गुदाभ्यो वनिष्ठोरुदरादधि ॥ ऋ. २।३३।६" इत्यत्र वनिष्ठोः स्थविरान्त्रादिति साधारण्येन सायणस्य स्थविरान्त्रोक्तिस्तु न समीचीना स्थविरा-न्त्रैकदेशादिति तु वक्तुमुचितम् । सायणस्यैवाऽभिप्रायमभिप्रेत्य "कुम्भो वनिष्ठुर्जनिता शचीभि—" रित्यत्र वनिष्ठुः स्थूलान्त्रमिति महीधरेणोक्तं तत्राऽपि गताऽनुगतिकत्वमेव कारणम्, शारीरे महीधरस्याऽज्ञानप्रलत्वात् । येन मतस्नाव्याख्याने मतस्ने हृदयोभयपार्श्वस्थे अस्थिनी इत्याद्यसम्बद्धप्रलपितत्वात् । "क्षुत्कुक्षिरिरा वनिष्ठुः पर्वताः प्लाशयः" अथर्व. ९।१२।१२ इत्यत्र वनिष्ठोरिरया (सुरया) सादृश्यदानात्सुराया द्रवरूपत्वाद्वनिष्ठोश्च स्थूलान्त्रैकदेशत्वादिराशब्देन सुरानिर्माणपात्रं लक्ष्यतेऽतो "कुम्भोवनिष्ठु—" रिति यजुर्मन्त्रेण जातं सादृश्यम् । "महादेवस्य यकृच्छर्वस्य वनिष्ठुः पशुपतेः पुरीतत्" वा. सं. ३९।९ इत्यत्राऽपि वनिष्ठुं शर्वभागत्वेन निर्दिश्य शेषं समग्रं पुरीतत् पशुपतेर्भागत्वेनाऽऽम्नातम् । इन्दोः प्रतिकृतिः इन्दुकम्, 'इवे प्रतिकृतौ' (पा. ५।३।९६) इत्यनेन कन् प्रत्यये इन्दुकम्, इति मुञ्जादिनिर्मितजलाद्याहरणसमये शिरसि घटाऽधः स्थापनार्थं आधारः । इन्दोरियमाकृतिरित्यर्थे तस्येदमित्यणि ऐन्दवीति रूपं निष्पद्यते, तस्यैवाऽपभ्रंशतया लोके इंडवी-ईंढवी इत्यादयस्त-त्तत्प्रान्तपरत्वेन शब्दाः प्रचलिता दृश्यन्ते । तदाऽऽकृतित्वस्य उण्डुके विद्यमानत्वादुण्डुकमिति नाम स्थापितमस्ति, इन्दुकशब्दस्याऽयमपभ्रंशः । "यकृत्समन्तात्कोष्ठञ्च तथाऽन्त्राणि समाश्रिता । उण्डुकस्थं विभजते मलं मलधरा कला" सु. शा. ४।१७ इत्यत्र उण्डुकः पोट्टलक इति लोके, चरके च पुरीषाऽऽधारशब्देनोण्डुकः प्रतिपादित इति डल्हणः । अत उण्डुकशब्देन ये समग्रं स्थूलान्त्रं व्याख्यान्ति तेषां तद्व्याख्यानममूलकमेव । न च वाच्यं पक्वाशयमूला-

[illegible] मिति सञ्ज्ञा । "आन्त्रेभ्यस्ते

[illegible] । किञ्च—"पञ्चदश कोष्ठा-ङ्गानि—नाभिश्च, हृदयञ्च, क्लोम च, यकृच्च, प्लीहा च, वृक्कौ च, वस्तिश्च, पुरीषाधान(र)ञ्च (श्च), आमाशयश्च, पक्वाशयश्च, उत्तरगुदञ्च, अधरगुदञ्च, क्षुद्रान्त्रञ्च, स्थूलान्त्रञ्च, वपावहनञ्चेति चरक. शा. ७।१३ इत्यत्र स्थूलान्त्रस्य पुरीषाधानं, पक्वाशयः, उत्तरगुदं, अधरगुदञ्चेति चत्वारो विभागाः प्रदर्शिताः । तत्रोण्डुक-

शब्दस्थाने एव पुरीषाधानं समागतम्। "त्वचः फला धातवो मला दोषा यकृत्प्लीहानौ फुप्फुस उण्डुको हृदयमामाशयाऽन्त्राणि वृक्कौ० सु. शा. ५।५" इत्यत्राशयेभ्यश्चान्त्रेभ्यश्च पृथगुण्डुकस्य ग्रहणान्न स्थूलान्त्रमात्रे उण्डुकसञ्ज्ञा कर्तुमुचिता किन्तु स्थूलान्त्रस्यैकदेशस्येति दिक् ॥

(सं. ७९) गवीन्यौ-मतस्ने=अनयो र्विवरणं संस्कृतोपोद्घाते पञ्चमपृष्ठे द्रष्टव्यम्।

(सं. ८६) सिकतावती="परिवः सिकतावती धनूर्बृहत्यक्रमीत्। तिष्ठतेलयता सुकम् ॥अ.१।१७।४" अत्र सिकताशब्देन रेतो ग्रहीतव्यम् 'रेतो वै सिकता' शत. ब्रा. ७।३।१।१० 'यद्रेतः सिकता उच्यन्ते किमासां रेतोरूपमिति शुक्ला इति ब्रूयाच्छुक्लं हि रेतोऽथो पृश्नय इति पृश्नीव हि रेतः' शत. ब्रा. ७।३।१।३६ 'तदाहुः यदाऽऽर्द्रं रेतः शुष्काः सिकता निवपति कथमस्यैता आर्द्रा रेतोरूपं भवन्तीति रसो वै छन्दांस्यार्द्र उ वै रससंवेदना छन्दोभि निर्वपत्येव मु हास्यैता आर्द्रा रेतोरूपं भवन्ति' शत० ७।३।१।३७ इत्यादिभिः शतपथे रेतसः सिकताभिः सादृश्यप्रतिपादनात् सिकतावतीशब्देन शुक्रहरणी नाड्येव ग्रहीतव्या। यत्तु "सिकतावती=सिकता रजांसि तद्वती तदाऽऽधारभूता नाडी। यद्वा अश्मर्याख्यो व्याधिविशेषो यस्मादुत्पद्यते सा नाडी सिकतावती" इति सायणस्य व्याख्यानं तत्तु न समीचीनम् शतपथेन विरोधात्। यदि चाऽश्मर्युद्भवस्थाना नाड्येव भवेत्तर्हि तस्या धनुरित्यनेनैव गतार्थता स्यात्, धनुरित्यस्य बस्तिरर्थः स्वयमेव सायणेन कृतत्वात्। अतः सिकतावतीशब्देन शुक्रप्रवहा नाड्येव ग्रहीतव्या इति निर्विवादम् ॥

(सं. ८७) लोहितवाससः=अस्य विवरणं निधिटिप्पण्यां द्रष्टव्यम्।

(सं. ९०-९१) उल्बः-जरायुः=उल्बजरायुशब्दौ चिकित्साशास्त्रे गर्भनिमज्जनजले तदीयवेष्टने च साधारणतया प्रयुक्तौ दृश्येते। वेदे तु गर्भनिमज्जनजलं उल्बशब्देन तद्वेष्टनञ्च जरायुशब्देन निर्दिश्यते यथा—"आपो वत्सं जनयन्ती र्गर्भमग्रे समैरयन्। तस्योत जायमानस्योल्ब आसीद्धिरण्ययः कस्मै देवाय हविषा विधेम ॥ अ. ४।२।८" आपः कर्तृभूताः अग्रे गर्भं शुक्रशोणितरूपेण समैरयन् समस्थापयन् पश्चात्तन्निमज्जनभूताः सन्त्यः वत्सं जनयन्तीः परिपोषयन्त्यः तस्य च गर्भस्य जायमानस्य योनिमार्गाद्बहिर्निःसरतः उल्बरूपेण परिणमन्त्यो भवन्तीति शेषः ॥ अत्र प्रथममुदाहरणरूपो यः आसीत्सः हिरण्ययः हिरण्यगर्भ इत्युच्यते तस्मै कस्मै अनिर्वचनीयाय देवाय हविषा विधेम इत्यत्र गर्भनिमज्जनोदकं निर्दिष्टम्। "न हि ते अग्ने तन्वः क्रूरमानंशमर्त्यः। कपि र्बभस्ति तेजनं स्वं जरायु गौरिव ॥ अथर्व० ६।४९।१" इत्यत्र गर्भनिमज्जनजलोदकवेष्टनं कथितम् तस्यैव भक्षणसम्भवात्। यथा—"नैव मांसेन पीवसि नैव मज्जस्वाहतम्। अवैतु पृश्नि शेवलं शुने जराय्वत्तवेऽव जरायु पद्यताम् ॥ अ. १।११।४" हे जरायो! त्वं मांसेन गर्भिण्युदरगतेन मांसेनेव न पीवसि पुष्टोभवसि अर्थात् योदरगतमांसपुष्टि र्भवति तेनेव न पुष्यसे, अर्थान्मांसपुष्टिस्तु सार्वकालिकी भवति त्वन्तु गर्भपरिपोषणपर्यन्तमेव स्थितिशाल्यसि गर्भबहिर्निःसरणाऽनन्तरं त्वया किञ्चित्कर्तव्यन्नाऽस्तीत्यर्थः। अथ च मज्जसु आहतमिव सम्बद्धमिव त्वन्न भवसि किन्तु पृश्नि शेवलं श्वेतवर्णं जलशैवालमिवाऽसि जलशैवालञ्च न जलाऽवयवो भवितुमर्हति किन्तु वैकारिकोऽस्ति तथैव त्वमपि गर्भप्रविष्टाऽर्भकस्य पोषणाय परमेश्वरेण निर्मितोऽसि गर्भस्य बहिर्निःसरणानन्तरं त्वदीयाऽऽसक्तिरयोग्या इति कृत्वा त्वं अवैतु बहिर्निःसरतु। व्यत्ययात्प्रथमपुरुषः। ननु बहिर्निःसरणेन मया किंकर्तव्यमवशिष्टं इत्यपेक्षायामाह 'जराय्वत्तवे शुने पद्यताम्' तद्भक्षणाय कल्पतामित्यर्थः।' अनेन जरायुस्वरूपं स्पष्टतया प्रतिपादितम्। इममेवाऽऽशयमभिप्रेत्य शतपथे "यः पाप्मा यः श्लेष्मा यदुल्बं यज्जरायु तदस्यैताभि-(७।२।१।५) रित्यत्र गर्भाधानोत्तराऽवस्थाः क्रमेण प्रदर्शिताः। तत्रोल्बशब्देन गर्भोदकं

पाश्च ते गुदाः । आमिक्षां० ॥ १६ ॥ यस्ते प्लाशि यो वनिष्टु र्यौ कुक्षी यच्च चर्म ते ॥ आमिक्षां० ॥ १७ ॥ अस्मिन्नपि सूक्ते (अ. १०।९।१५-१६-१७) उपरिनिर्दिष्टसङ्ख्याविशिष्टमन्त्रेषु पुरीतदान्त्रवनिष्टूनां क्रमेण समागमनाद् ग्रामगृहस्थितिवत् संस्थापितक्षुद्रान्त्रेषु पुरीतत्, स्थूलान्त्रे आन्त्रम्, उण्डुके च वनिष्टुरिति सञ्ज्ञाः क्रमेण कृताः सन्ति, अत एषां नाम्नि, स्थाने, आकारे च स्पष्टता सञ्जाता सा यथा—आमाशयादारभ्य पक्वाशयद्वारपर्यन्तभागस्य पुरीतत् इति नाम । पक्वाशयमारभ्य उण्डुकपर्यन्तभागस्य आन्त्रमिति सञ्ज्ञा । ततोऽधस्तात्कुम्भेन्दुकाऽन्यतराऽऽकृतिविशिष्टभागस्य वनिष्टुरिति सञ्ज्ञा ततोऽधस्तादुत्तरगुदमिति, सर्वतोऽधस्तादुदा इति वैदिकीसञ्ज्ञाः ॥

(सं. ७५) वनिष्टुः—" कुम्भो वनिष्टु र्जनिता शचीभि र्यस्मिन्नग्रे योन्यां गर्भो अन्तः। प्लाशि र्व्यक्तः शतधार उत्सो दुहे न कुम्भी स्वधां पितृभ्यः ॥ वा. सं. १९।८७ " इत्यत्र वनिष्टोः कुम्भसादृश्यदानादुण्डुक एव ग्रहीतव्यः । समग्रमन्त्रार्थाऽऽकलनया च न साधारणेन घटेन सादृश्यं प्रतिभाति, अपि तु सुरानिर्माणकुम्भेन सादृश्यप्रतिपादनान्मध्ये स्थूलोदरतया ऊर्ध्वाऽधो विद्यमानाऽन्त्रभागाभ्यां शुण्डायुक्तत्वसादृश्याद्वनिष्टोरुण्डुकवाचकत्वे न कश्चिदपि शङ्काऽवलेशोऽवशिष्यते । अस्यमन्त्रस्यार्थो भगवता कपिलेन स्पष्टतया प्रतिपादितस्तत्र मलाशयसादृश्याज्जरायौ वनिष्टुत्वमौपचारिकं मत्वा कूपसादृश्यमधिकतया दत्तं तथाहि—देहान्यदेहविवरे जठराऽग्निनाऽसृग्विण्मूत्रकूपपतितो भृशतप्तदेहः । इच्छन्नितो विवसितुं गणयन् स्वमासान्निर्वास्यते कृपणधी र्भगवन् कदा नु ॥ भा. ३।३१।१७ ॥ अस्मत्कृतभाष्यन्तु प्लाशिटिप्पण्यां द्रष्टव्यम् " आन्त्रेभ्यस्ते गुदाभ्यो वनिष्टोरुदरादधि ॥ अ. २।३३।६ " इत्यत्र वनिष्टोः स्थविरान्त्रादिति साधारण्येन सायणस्य स्थविरान्त्रोक्तिस्तु न समीचीना स्थविरान्त्रैकदेशादिति तु वक्तुमुचितम् । सायणस्यैवाऽभिप्रायमभिप्रेत्य "कुम्भो वनिष्टु र्जनिता शचीभि-" रित्यत्र वनिष्टुः स्थूलान्त्रमिति महीधरेणोक्तं तत्राऽपि गताऽनुगतिकत्वमेव कारणम्, शारीरे महीधरस्याऽज्ञानग्रस्तत्वात् । येन मतस्नाव्याख्याने मतस्ने हृदयोभयपार्श्वस्थे अस्थिनी इत्याद्यसम्बद्धप्रलपितत्वात् । " क्षुत्कुक्षिरिरा वनिष्टुः पर्वताः प्लाशयः " अथर्व. ९।१२।१२ इत्यत्र वनिष्टोरिरया (सुरया) सादृश्यदानात्सुराया द्रवरूपत्वाद्वनिष्टोश्च स्थूलान्त्रैकदेशत्वादिराशब्देन सुरानिर्माणपात्रं लक्ष्यतेऽतो " कुम्भोवनिष्टु-" रिति यजुर्मन्त्रेण जातं सादृश्यम् । " महादेवस्य यकृच्छर्वस्य वनिष्टुः पशुपतेः पुरीतत् " वा. सं. ३९।९ इत्यत्राऽपि वनिष्टुं शर्वभागत्वेन निर्दिश्य शेषं समग्रं पुरीतत् पशुपतेर्भागत्वेनाऽऽम्नातम् । इन्दोः प्रतिकृतिः इन्दुकम्, 'इवे प्रतिकृतौ' (पा. ५।३।९६) इत्यनेन कन् प्रत्यये इन्दुकम्, इति मुञ्जादिनिर्मितजलाद्याहरणसमये शिरसि घटाऽधः स्थापनार्थं आधारः । इन्दोरियमाकृतिरित्यर्थे तस्येदमित्यणि ऐन्दवीति रूपं निष्पद्यते, तस्यैवाऽपभ्रंशतया लोके ईंडवी-ईंढवी इत्यादयस्तत्प्रान्तपरत्वेन शब्दाः प्रचलिता दृश्यन्ते । तदाऽऽकृतित्वस्य उण्डुके विद्यमानत्वादुण्डुकमिति नाम स्थापितमस्ति, इन्दुकशब्दस्याऽयमपभ्रंशः । " यकृत्समन्तात्कोष्ठञ्च तथाऽन्त्राणि समाश्रिता । उण्डुकस्थं विभजते मलं मलधरा कला" सु. शा. ४।१७ इत्यत्र उण्डुकः पोट्टल्क इति लोके, चरके च पुरीषाऽऽधारशब्देनोण्डुकः प्रतिपादित इति डल्हणः । अत उण्डुकशब्देन ये समग्रं स्थूलान्त्रं व्याख्यान्ति तेषां तद्व्याख्यानममूलकमेव । न च वाच्यं पक्वाशयमूलादारभ्य गुदपर्यन्तं स्थूलान्त्रसन्निवेशस्येन्दुकाऽऽकृतित्वादुचितमेव तत्समग्रस्य उण्डुकमिति सञ्ज्ञा । " आन्त्रेभ्यस्ते गुदाभ्य वनिष्टोरुदरादधि " कुम्भो वनिष्टु र्जनिता शचीभिरित्यादिवेदवाक्यविरोधात् । किञ्च—"पञ्चदश कोष्ठाऽङ्गानि—नाभिश्च, हृदयञ्च, क्लोम च, यकृच्च, प्लीहा च, वृक्कौ च, वस्तिश्च, पुरीषाधान(र)ञ्च (श्च), आमाशयश्च, पक्वाशयश्च, उत्तरगुदञ्च, अधरगुदञ्च, क्षुद्रान्त्रञ्च, स्थूलान्त्रञ्च, वपावहननञ्चेति चरक. शा. ७।१३ इत्यत्र स्थूलान्त्रस्य पुरीषाधानं, पक्वाशयः, उत्तरगुदं, अधरगुदञ्चेति चत्वारो विभागाः प्रदर्शिताः । तत्रोण्डुक-

शब्दस्थाने एव पुरीषाधानं समागतम्। "त्वचः कला धातवो मला दोषा यकृत्प्लीहानौ फुप्फुस उण्डुको हृदयमामाशयाऽन्त्राणि वृक्कौ० सु. शा. ५।५" इत्यत्राशयेभ्यश्चान्त्रेभ्यश्च पृथगुण्डुकस्य ग्रहणान्न स्थूलान्त्रमात्रे उण्डुकसञ्ज्ञा कर्तुमुचिता किन्तु स्थूलान्त्रस्यैकदेशस्येति दिक् ॥

(सं. ७९) **गवीन्यौ–मतस्ने**=अनयो विवरणं संस्कृतोपोद्घाते पञ्चमपृष्ठे द्रष्टव्यम्।

(सं. ८६) **सिकतावती**="परिवः सिकतावती धनूर्बृहत्यक्रमीत्। तिष्ठतेलयता सुकम्॥अ.१।१७।४" अत्र सिकताशब्देन रेतो ग्रहीतव्यम् 'रेतो वै सिकता' शत. ब्रा. ७।३।१।१० 'यद्रेतः सिकता उच्यन्ते किमासां रेतोरूपमिति शुक्ला इति ब्रूयाच्छुक्लं हि रेतोऽयो पृश्नय इति पृश्नीव हि रेतः' शत. ब्रा. ७।३।१।३६ 'तदाहुः यदाऽर्द्रं रेतः शुष्काः सिकता निवपति कथमस्यैता आर्द्रा रेतोरूपं भवन्तीति रसो वै छन्दांस्यार्द्र उ वै रसस्तद्यदेना रछन्दोभि निर्वपत्येव मु हास्यैता आर्द्रा रेतोरूपं भवन्ति' शत० ७।३।१।३७ इत्यादिभिः शतपथे रेतसः सिकताभिः सादृश्यप्रतिपादनात् सिकतावतीशब्देन शुक्रहरणी नाड्येव ग्रहीतव्या। यत्तु "सिकतावती=सिकता रजांसि तद्वती तदाऽऽधारभूता नाडी। यद्वा अश्मर्याख्यो व्याधिविशेषो यस्मादुत्पद्यते सा नाडी सिकतावती" इति सायणस्य व्याख्यानं तत्तु न समीचीनम् शतपथेन विरोधात्। यदि चाऽश्मर्युद्भवस्थाना नाड्येव भवेत्तर्हि तस्या धनुरित्यनेनैव गतार्थता स्यात्, धनुरित्यस्य बस्तिरर्थः स्वयमेव सायणेन कृतत्वात्। अतः सिकतावतीशब्देन शुक्रवहा नाड्येव ग्रहीतव्या इति निर्विवादम्॥

(सं. ८७) **लोहितवाससः**=अस्य विवरणं निघिटिप्पण्यां द्रष्टव्यम्।

(सं. ९०–९१) **उल्वः–जरायुः**=उल्वजरायुशब्दौ चिकित्साशास्त्रे गर्भनिमज्जनजले तदीयवेष्टने च साधारणतया प्रयुक्तौ दृश्येते। वेदे तु गर्भनिमज्जनजलं उल्वशब्देन तद्वेष्टनञ्च जरायुशब्देन निर्दिश्यते यथा—"आपो वत्सं जनयन्ती गर्भमग्रे समैरयन्। तस्योत जायमानस्योल्व आसीद्धिरण्ययः कस्मै देवाय हविषा विधेम॥ अ. ४।२।८" आपः कर्तृभूताः अग्रे गर्भं शुक्रशोणितरूपेण समैरयन् समस्थापयन् पश्चात्तन्निमज्जनभूताः सन्त्यः वत्सं जनयन्तीः परिपोषयन्त्यः तस्य च गर्भस्य जायमानस्य योनिमार्गाद्बहिर्निःसरतः उल्वरूपेण परिणमन्त्यो भवन्तीति शेषः॥ अत्र प्रथममुदाहरणरूपो यः आसीत्सः हिरण्ययः हिरण्यगर्भ इत्युच्यते तस्मै कस्मै अनिर्वचनीयाय देवाय हविषा विधेम इत्यत्र गर्भनिमज्जनोदकं निर्दिष्टम्। "न हि ते अग्ने तन्वः क्रूरमानंशमर्त्यः। कपि र्बभस्ति तेजनं स्वं जरायु गौरिव॥ अथर्व० ६।४९।१" इत्यत्र गर्भनिमज्जनजलोदकवेष्टनं कथितम् तस्यैव भक्षणसम्भवात्। यथा—"नेव मांसेन पीवसि नेव मज्जस्वाहतम्। अवैतु पृश्नि शेवलं शुने जराय्वत्तवेऽव जरायु पद्यताम्॥ अ. १।११।४" हे जरायो! त्वं मांसेन गर्भिण्युदरगतेन मांसेनेव न पीवसि पुष्टो भवसि अर्थात् योदरगतमांसपुष्टि र्भवति तेनेव न पुष्यसे, अर्थान्मांसपुष्टिस्तु सार्वकालिकी भवति त्वन्तु गर्भपरिपोषणपर्यन्तमेव स्थितिशाल्यसि गर्भबहिर्निःसरणाऽनन्तरं त्वया किञ्चित्कर्तव्यन्नाऽस्तीत्यर्थः। अथ च मज्जसु आहतमिव सम्बद्धमिव त्वन्न भवसि किन्तु पृश्नि शेवलं श्वेतवर्णं जलशैवालमिवाऽसि जलशैवालश्च न जलाऽवयवो भवितुमर्हति किन्तु वैकारिकोऽस्ति तथैव त्वमपि गर्भप्रविष्टाऽर्भकस्य पोषणाय परमेश्वरेण निर्मितोऽसि गर्भस्य बहिर्निःसरणानन्तरं त्वदीयाऽऽसक्तिरयोग्या इति कृत्वा त्वं अवैतु बहिर्निःसरतु। व्यत्ययात्प्रथमपुरुषः। ननु बहिर्निःसरणेन मया किंकर्तव्यमवशिष्टं इत्यपेक्षायामाह 'जराय्वत्तवे शुने पद्यताम्' तद्भक्षणाय कल्पतामित्यर्थः। अनेन जरायुस्वरूपं स्पष्टतया प्रतिपादितम्। इममेवाऽऽशयमभिप्रेत्य शतपथे "यः पाप्मा यः श्लेष्मा यदुल्वं यज्जरायु तदस्यैताभि–(७।२।१।५) रित्यत्र गर्भाधानोत्तराऽवस्थाः क्रमेण प्रदर्शिताः। तत्रोल्वशब्देन गर्भोदकं

विवक्षितम्, जरायुशब्देन च तद्वेष्टनमभिप्रेतम् तथाच—"त्रिवृद्वर्हिर्भवति, माता पिता पुत्रः, तदेव तन्मिथुनं, उल्वं गर्भो जरायु, तदेव मिथुनं त्रेधा बर्हिः सन्नद्धं भवति । एक इव ह्ययं लोकः ॥ तै. ब्रा. १।६।३।१" इत्यत्र स्पष्टतया उल्वजरायुशब्दौ भिन्नार्थौ प्रयुक्तौ । एवमेव सर्वत्र वैदिकनये जरायूल्वशब्दौ भिन्नार्थत्वेन प्रयुक्ताविति नाऽत्र कश्चित्संशयाऽवलेश इति दिक् ।

(सं. ९४) कुल्मलम्—"यत्सुपर्णा विवक्षयो अनमीवा विवक्षवः । तत्र मे गच्छताद्धवं शल्य इव कुल्मलं यथा ॥ अ. २।३०।२ ॥ "जिह्वा ज्या भवति कुल्मलं वाङ्नाडीका दन्तास्तपसाभिदिग्धाः । तेभि र्ब्रह्मा विध्यति देवपीयून् हृद्बलै र्धनुर्भि र्देवजूतैः ॥ अ. ५।१८।८" अत्र कुल्मलमिति शब्दः कुड्मलशब्दस्थाने डलयोरैक्यात्सञ्जातः । कुड्मलञ्च विकासोन्मुखपुष्पाऽवस्था । तत्सादृश्यात्लक्षणया बहुस्थानेषु तत्प्रयोगः कृतः, शारीराऽवयवे मदनातपत्रवाचकं कुड्मलसादृश्याद्वेदे प्रयुक्तम् । कामशास्त्रेऽस्य मदनातपत्रमिति सञ्ज्ञा । एतत्स्पर्शादिना कामिनी शीघ्रपञ्चशरमत्ता भवति । "शल्याद्विषं निरवोचं प्राञ्जनादुत पर्णधेः । अपाष्ठाच्छृङ्गात् कुल्मलान्निरवोचमहं विषम् ॥ अथर्व० ४।६।५" इत्यस्मिन्मन्त्रे कुल्मलादिति मदनातपत्रसम्भूतविषादित्यभिप्रेतम् तच्च "पक्षीजायान्यः पतति स आविशति पूरुषम् ।" इत्यत्रोपदर्शितविवरणे विशदतया व्याख्यातमस्ति । कुल्मलात्कुत्सितप्राणिमलादिति सायणव्याख्यानन्तु न समीचीनम्—"यत्सुपर्णाविवक्षव" इति मन्त्राऽऽगतकुल्मलशब्दार्थेन विरोधात् ॥

(सं. ९७) जाम्बील:—कटिकपालाऽस्थिग्रन्थिर्जम्बीराऽऽकृतिरूर्वस्थ्यग्रभागः । स च "मस्कान् केशैरिन्द्र स्वसा०" इत्यादि (वा. सं २५।३) मन्त्रे समागतः ।

(सं. १०१) उच्छ्लङ्खौ ॥ उच्छ्रितशङ्खाविव उच्छ्लङ्खौ एतदाकृतित्वाज्जङ्घाऽधस्तनभागयोरेवैतन्नाम । ये तु एतयोर्भागयोर्गुल्फाविति नामेति वदन्ति ते वैदिकशारीरज्ञानबहिष्कृता एव, यथा—"तद्ग्रन्थी घुटिके गुल्फौ पुमान् पार्ष्णिस्तयोरधः" इत्यमरादयः । "केन पार्ष्णी आभृते पूरुषस्य केन मांसं संभृतं केन गुल्फौ । केनाङ्गुलीः पेशनीः केन खानि केनोच्छ्लङ्खौ मध्यतः कः प्रतिष्ठाम् ॥ अ. १०।२।१" इतिमन्त्रे उच्छ्लङ्खाभ्यां गुल्फयोः पृथक्स्थितिरस्ति, अतो गुल्फावुच्छ्लङ्खाभ्यां भिन्नाऽवयवौ । न च वाच्यं एकाऽवयवस्यैव द्विरुक्तिरस्तीति, कार्यान्तराऽभावात् तादृग्विन्यासस्य वेदमात्रेऽभावात् । किञ्च—"कस्मान्नु गुल्फावधरावकृण्वन्नष्ठीवन्तावुत्तरौ पूरुषस्य । जङ्घे निर्ऋत्यं न्यदधुः क्वस्विज्जानुनोः सन्धी क उ तच्चिकेत ॥ अ. १०।२।२" इति मन्त्रे पूरुषस्य गुल्फौ तदाख्याऽवयवौ जङ्घाऽधस्तनाऽऽधाराविलर्थः । कस्मात्कारणात् अधरौ अकृण्वन्=कृतवान् । अष्ठीवन्तौ जङ्घोर्वोर्नियामके चक्राकृतिनी अस्थिनी उत्तरौ=उपरिवर्तिनौ अकृण्वत् इति परोक्षप्रश्नेन एतज्ज्ञापयति । जङ्घाऽस्नोरधस्ताद् गुल्फाख्यस्य (गुटिकाकारस्य) अस्नो विन्यासः कृतोऽस्ति तदुपरि च अष्ठीवतः (चक्राकारस्याऽस्नः) विन्यासः कृतोऽस्ति । इदं वैचित्र्यं परमेश्वरादन्येन केनाऽपि शिल्पिसहस्रेण कर्तुमशक्यम् । एतद्विचित्राऽस्थिद्वयस्योपर्यधस्ताद्विन्यासेन पुरुषःस्थानोपवेशनतिर्यक्क्षेपाऽऽकुञ्चनप्रसारणधावनादिक्रियासु कुशलो भवति, अतः सः (परमेश्वरः) सर्वानेव शिल्पिनोऽतिशेते इति परमेश्वरस्य स्तुतिः कृताऽस्ति ।

(सं. १०४) प्रतिष्ठा=प्रतिष्ठति उत्थितो भवति अनया सा प्रतिष्ठा । अर्थवशात्पादतलं ग्रहीतव्यम् । तद्वते न हि कश्चिदपि जन्तुरुत्थानप्रत्युत्थानादिसमर्थो भवति । प्रकृतमन्त्रे "केन पार्ष्णी आभृते पूरुषस्य केन मांसं संभृतं केन गुल्फौ । केनाङ्गुलीः पेशनीः केन खानि केनोच्छ्लङ्खौ मध्यतः कः प्रतिष्ठाम् ॥ अ. १०।२। १." शरीराऽवयववर्णनात्तदेव भवितुमर्हति तत्राऽप्यङ्गुलीनां पृथक्कथनान्मध्यत इति निर्देशाच्च अङ्गुलिमूला-

लाकाः पञ्च, तासाञ्चाधाराऽस्थीनि कूर्चशब्दवाच्यानि पञ्च मिलित्वा दशाऽस्मानमत्र प्रतिग्रा सञ्ज्ञा । अङ्गुल्यस्थीनि चतुर्दश एकः पार्ष्णिः, जङ्घाऽऽधारास्थिगुल्फः एकम्, द्वे जङ्घाऽस्थिनी, एकमष्ठीवत्, एकं जानुसन्ध्यस्थि (ऊर्वस्थि) इति मिलित्वा प्रतिपादं त्रिंशदस्थीनि । एवं प्रतिहस्तमपि त्रिंशत्, हस्तेऽष्ठीवत्पार्ष्णिगुल्फानामभावात्कूर्चोऽस्नामष्टसङ्ख्यकत्वात्तत्र त्रयोदशाऽस्नां प्रतिष्ठेतिनाम तेन हस्तेऽपि त्रिंशदेवाऽस्थीनि सन्ति । "कति देवाः कतमे त आसन् य उरोग्रीवाश्चिक्युः पूरुषस्य । कति स्तनौ व्यदधुः कः कफोडौ कति स्कन्धान् कति पृष्टीरचिन्वन् ॥ अथर्व० १०।२।४ " अस्मिन्मन्त्रे कतिशब्दस्य चतुरावर्तनात्तद्वाच्यसङ्ख्याया देवशब्देऽन्वयाच्चतसृणां शाखानां पूर्वाऽपरपर्यालोचनया उपस्थितत्वाद्देवशब्दस्य लक्षणया चाऽस्थिवाच्यत्वे प्रतिहस्तं प्रतिपादञ्च त्रिंशत्सङ्ख्यकान्यस्थीनीति निर्धारणीयम् । त्रयस्त्रिंशदिति देवेषु द्विरुक्तानां परित्यागात्त्रिंशत्त्वं समायातीति बोध्यम् " द्वादशप्रधयश्चक्रमेकं त्रीणि नभ्यानि क उ तच्चिकेत । तत्राहतास्त्रीणि शतानि शङ्कवः षष्टिश्च खीला अविचाचला ये ॥ अथर्व० १०।८।४ " अस्मिन्मन्त्रे त्रिषष्ट्यधिकत्रिशतान्यस्थीनि खीलाशब्देन शङ्कुशब्देन च दर्शितानि परन्तु तेषां स्पष्टतया विभागो मूलमन्त्रेषु न दृश्यते, दृश्यते तु " यस्य त्रयस्त्रिंशद्देवा निधिं रक्षन्ति सर्वदा । *निधिं तमद्य को वेद यं देवा अभि रक्षथ* ॥ अ. १०।७।२३ " इति मन्त्रेणाऽनूक्तास्नां त्रयस्त्रिंशत्सङ्ख्या प्रदर्शिता । प्रकृतमन्त्रे च कति शब्दाऽऽवर्तनेन शाखासुत्रयस्त्रिंशदन्तर्वर्तिनी सङ्ख्या प्रदर्शिता, सा च शरीरस्य प्रत्यक्षत्वात्साक्षाद् दृष्ट्वा निश्चेतव्या । अतो लोकवच्छरीराऽस्थ्यादिषु निश्चयः कर्तव्यः ॥

अथमांसविचरणम् (सं. ११२)

मांसमिति वेदे-आयुर्वेदे-लोके च कस्य वस्तुनो नाम भवितुमर्हतीति प्रश्ने वेदस्थवाक्यानि कानिचिदुद्धरामः, यथा—" मज्ज्ञा मज्जा संधीयतां चर्मणा चर्म रोहतु । असृक् ते अस्थि रोहतु मांसं मांसेन रोहतु ॥ अ. ४।१२।४ ॥ यदस्य हृतं विहृतं यत्पराभृतमात्मनो जग्धं यतमत् पिशाचैः । तदग्ने विद्वान् पुनराभर त्वं शरीरे मांसमसुमेरयामः ॥ अ. ५।२९।५ ॥ शेरभक शेरभ पुनर्वो यन्तु यातवः । पुनर्हेतिः किमीदिनः यस्य स्थ तमत्त यो वः प्राहैत् तमत्त स्वा मांसान्यत्त ॥ अ. २।२४।१ ॥ श्याममयोऽस्य मांसानि लोहितमस्य लोहितम् ॥ अ. ११।३।७ ॥ मांसान्यस्य शातय स्नावान्यस्य सं वृह ॥ अ. १२।११।८ ॥ नेव मांसेन पीवसि नेव मज्जस्वाहतम् । अवैतु पृश्नि शेवलं शुने जराय्वत्तवेव जरायु पद्यताम् ॥ अ. १।११।४ ॥ यं ते मन्थं यमोदनं यन्मांसं निपृणामि ते । ते ते सन्तु स्वधावन्तो मधुमन्तो घृतश्चुतः ॥ अ. १८।४।४२ " इत्यादीनि वाक्यानि बहूनि सन्ति परन्तु तेषु रसादिसप्तधातुव्यवहारे यन्मांसत्वं सर्वजनीनमस्ति तदेव सामान्यतया गृहीतमस्ति । तस्मादेतै र्वाक्यै र्न कस्यचिद्विशेषस्याऽवधारणं जायते । अतो लौकिकव्यवहारं दर्शयामः । तत्राऽपि (लौकिकव्यवहारेऽपि) धर्मशास्त्रं पुरस्कृत्य यत्किञ्चिद्विचार्यते " मां स भक्षयिताऽमुत्र यस्य मांसमिहाद्म्यहम् । एतन्मांसस्य मांसत्वं प्रवदन्ति विपश्चितः ॥ मनु. अ. ५।५५ " अस्मच्छब्दस्य द्वितीयैकवचने मामिति निष्पद्यते, तच्छब्दस्य प्रथमैकवचने स इति । सः मामिति यथावस्थितपदद्वयैक्ये मांसमिति एकस्मिन्नर्थे रूढमिव लोके प्रचलितं दृश्यते । तत्र वैयाकरणैस्तु ' मनेर्दीर्घश्चे'—ति सप्रत्यये मांसं निष्पादितम् । परन्तु मां-सः, इति पृथगेव पदद्वयमवस्थितमिति मनुना प्रतिपादितम् सः मामिति कर्तृकर्मवाचकं पदद्वयम् । तत्क्रियां विनाऽनिष्पन्नम्, सा चाऽत्र क्रिया का भवितुमर्हतीति विचारे मनुना भक्षयतीति क्रियाया अध्याहारं कृत्वा निरणायि-मां स भक्षयिताऽमुत्रेत्यादिना । यस्य=प्राणिनोऽहं=मांसभक्षणकर्ता मांसं कर्म इह=अस्मिन्समये अभि भक्षयामि सः=यस्य पूर्वं मया मांसं जग्धं स इत्यर्थः । अमुत्र=परस्मिञ्जन्मनि परस्मिल्लोके वा मां भक्षयिता इत्यर्थद्योतनाय आसृष्टे र्मां स इति व्यस्तं पदद्वयमेव एकस्मिन्नर्थे रूढं कृतमस्ति यो यस्य मांसं भक्षयति तस्य मांसं सोऽवश्यमेव

भक्षयिष्यति, अत्र नाऽस्ति काचिच्छङ्केति भगवता मनुना जीवानां कल्याणाय स्पष्टतया प्रत्यपादि । तत्र च जना भक्षणविषये मांसशब्देनाऽस्थिवर्जसमस्तमप्यत्रयवजातं प्राणिनो गृह्णन्ति । तत्र च मांसेन साकमस्थीन्य व्याह्रियन्ते, तत्र सामान्यतः मांसाहारिणं दृष्ट्वा किमिदमाहरतीति प्रश्ने मांसमित्येव जना उत्तरयन्ति इति सामान्या सर्वजनीना प्रतीतिः। यत्र त्वेकान्ततो मांसरहितान्यस्थीनि भवन्ति तत्रैव इमान्यस्थीनीति व्यवहरन्ति जनाः। अतः सामान्यतः मांसशब्देन मलमूत्रचर्मनखरोमादिवर्जं सर्वमपि शरीरं मांसशब्दग्राह्यं भवति। कुत्रत्यं मांसमिति विशेषप्रश्ने तु मुखस्थं हृत्स्थं कालखण्डस्थं अन्त्ररूपमित्यादीनि विशेषतयोत्तराणि भवन्ति। सामान्यतया तु सर्वस्यैव शरीरस्य बोधो भवति लोके, अत एव "शरीरबृंहणे नान्यत् खाद्यं मांसाद्विशिष्यते। च. सू ७।८६" "शुष्यते क्षीणमांसाय कल्पितानि विधानवित्। दद्यान्मांसादमांसानि बृंहणानि विशेषतः॥ शोषिणे बर्हिणं दद्याद्बर्हिः शब्देन चाऽपरान्॥ इत्यादि, च. चि. ८।१४९" "तस्मात्क्रव्यादमांसानि शोषी प सोऽवशीलयेत्। रहस्यमेतद्वैद्यानामुपदिष्टं चिकित्सकैः॥ मद्यं क्रव्यादमांसञ्च शोषिणाममृतोपमम्॥ भेल० चि ४" "काकानुलूकान्नकुलान्बिडालानगण्डूपदान् व्यालबिलेशयाखून्। गृध्रांश्च दद्याद्विविधैः प्रकारैः ससैन्धवान् सर्षपतैलभृष्टान्॥ सु. उ. ४१।३६" "कृकलान् विविधांश्छागांश्छशकानर्थभक्षितान्। महिषानेकशल्यांश्च छेदांश्च कृतनिष्ठितान्॥ वा. रा. सु. ११।१७" इत्यादि। अत्र सर्वत्र सामान्यतया सर्वस्मिन् शरीरे मांसशब्दः समागतः अत एव सूदशास्त्रे वेसवारलक्षणे "मांसं निरस्थि सुस्विन्नं पुनर्दृषदि पेषितम्। पिप्पलीखण्डमरिच-गुडसर्पिः समन्वितम्। ऐकध्यं विपचेत्सम्यग् वेसवार इति स्मृतम्॥" इत्यत्र मांसशब्दे निरस्थीति प्रयुक्तं विशेषणं सार्थक्यं भजते, सम्भवव्यभिचारयोरेव विशेषणस्य सार्थक्यात्। साधारणमांसशब्देनाऽस्थिधमनीसिरास्नायुप्रभृति सर्वमेव क्रोडीभवति। परन्तु शारीरशास्त्रे न शरीरसमुदायस्य मांसत्वं कथितुं युक्तम्। तथात्वे शारीरविभागस्य दुरुपपादत्वात्। यथा "यथा विसमृणालानि विवर्धन्ते समन्ततः। भूमौ पङ्कोदकस्थानि तथा मांसे सिरादयः॥ सु. शा. ४।९" यथा भूमौ पङ्कोदकस्थानि विसमृणालानि समन्ततो विवर्धन्ते तथा मांसे सिरादयो ज्ञेयाः। अत्र च विसमृणालशब्देन सिरादीनां सादृश्यदानाद् भूमिस्थाने शरीरमुदकस्थाने रक्तं, पङ्कस्थाने मांससूक्ष्माऽवयवाः समुपतिष्ठन्ते। तेन पङ्के यथा पार्थिवसूक्ष्मकणानारभ्य स्थूलपिण्डपर्यन्तं परस्परं संश्लिष्टत्वाऽस्ति तथा मांसेऽपि गर्भाऽवस्थातः परिपक्वपार्थिवपरमाणूनां परस्परसंश्लेषात् सङ्घीभावो भवति। तत्र ये सङ्घातोत्पादकाः सेल इत्याख्याः (Cells) सूक्ष्माऽवयवास्ते मांसशब्दवाच्यतामासादयन्ति, (सङ्घातस्याऽपि तन्मयत्वेन मांसशब्दवाच्यत्वमव्याहतमित्यन्यदेतत्) सङ्घातस्तु मांसपिण्डमांसपेश्यादिशब्दवाच्यतां प्राप्नोति. तत्र च (गर्भे) परिपक्वाधिकजलीयभागो द्रवरूपः सः रक्तवर्णत्वाद्रक्तपदवाच्यतां लभते। पूर्वाऽपेक्षया सूक्ष्मतमपार्थिवभागयुक्तो योऽयमीषद्रक्तो जलीयभागः स लसीकाशब्दवाच्यतां रसशब्दवाच्यतां वा लभते। स च रसः पाकभेदान्नानाविधः कुत्रचिदधिकपाकमागम्य स्फटिकाऽनुकरणीयतां भजति (यथाऽक्ष्णोर्मणिस्तेजोद्रवश्च) कुत्रचित् श्लेष्मातकरसाऽनुकारितां, कुत्रचित्स्नेहाऽनुकारितां भजन्नानारूपाणि बिभर्ति। अत्र ये मांसाऽवयवास्तेषां जीवाऽदृष्टवशाज्जायन्ते विन्यासविशेषास्ते कुत्रचित्सच्छिद्राः (यथा धमनीसिरारसायनीस्रोतःप्रभृतयः), कुत्रचिदच्छिद्राः (यथा ज्ञानतन्तवः), कुत्रचित्सूक्ष्मच्छिद्राः (यथा मूत्रोत्सिकाप्रभृतयः), कुत्रचित्स्थूलच्छिद्राः (यथा श्वासपथान्नपथप्रभृतयः) सन्तः पाकाऽऽकारविशेषाद् धमनीसिरास्नायुस्रोतोनाड्यादिवाच्यतां लभन्ते तत्र पृथिव्यम्भोभागाः समवायिकारणानि वायव्याग्नेयभागौ स्वरूपपरिवर्तने हेतू, आकाशश्चाऽवकाशहेतुरिति पञ्चमहाभूतसमुदायाद् (शुक्रशोणितसंयोगरूपात्) द्रवप्रधानांशादेवेदं समस्तं शरीरं निष्पद्यते। समस्तस्यैककारणत्वेऽपि पाकाऽऽकारादिविशेषैस्तत्तद्विशेषा समुदयन्ते। साधारणव्यवहारे (लोके शास्त्रे च) मांसशब्देन योऽयं समग्रशरीर-

ग्रहणस्य व्यवहारः प्रसृतः स प्रथमतो गर्भे मांसाकारस्य समुदयादेवेति भगवता धन्वन्तरिणा "यथा विसमृणालानी" ति पद्येन दर्शितः। इममेवाऽभिप्रायमाश्रित्य "त्वङ्मांससंश्रितो वायुस्त्वग्दाहेनैव शाम्यति। मांसे दग्धे हि शाम्यन्ति सिरास्नाय्वस्थिसन्धिजाः ॥" इत्यग्निकर्मविध्यध्याये चतुर्थसूत्रटीकायां डल्हणेन भद्रशौनकीयं वाक्यं लिखितम्। तत्र मांसदाहेन यत्सिरास्नाय्वस्थिसन्धिजानां रोगाणां प्रशम उक्तः स शिरादीनां तदभिन्नत्वाऽभिप्रायेणैव; अतो मांसस्य सर्वधातुव्यापकत्वम्। योऽयं मांससङ्घातः स व्यवहारार्थं पेशीशब्देन व्यवहृतः। तासाञ्च सुश्रुते पञ्चशतानि सङ्ख्या निर्दिष्टा यथा–"पञ्च पेशीशतानि भवन्ति ॥ सु. शा. ५।३७ ॥" मांसाऽवयवसङ्घातः परस्परं विभक्तः 'पेशी' इत्युच्यते इति डल्हणः। अत्र केचिन्मांसाशयाऽऽवरणानां पेशीशब्दवाच्यतामभिदधति ते त्वेकान्ततो बालिशा एव। "स्त्रीणान्तु विंशतिरधिका, दश तासां स्तनयोरेकैकस्मिन् पञ्च पञ्च यौवने तासां परिवृद्धिः। अपत्यपथे चतस्रः तासां प्रसृतेऽभ्यन्तरतो द्वे मुखाश्रिते बाह्ये च वृत्ते द्वे, गर्भच्छिद्रसंश्रितास्तिस्रः। शुक्रार्तवप्रवेशिन्यस्तिस्र एव। सु. शा. ५।३९" इत्यत्र स्पष्टतया मांसपिण्डानामभिधानात् आवरणसङ्ख्यायास्तु इयत्तां कर्तुं न कोऽपि प्रभवेत्। एकस्मिन् मांसपिण्डे तदवयवाः (मांसशब्दवाच्याः) सेलाख्याः (Cells) कोटिशः सन्ति, ते च सूक्ष्मदर्शकयन्त्रेण दृष्टाश्चेत् सर्वेऽपि सूक्ष्माऽऽवरणाऽऽवृताः सन्तीति प्रत्यक्षतया दृश्यन्ते पृथक्पृथक् परिस्पन्दयुक्ताश्च। सोऽयं परिस्पन्दो जीवनशक्तिविशिष्टत्वाद् दृश्यते। तत्राऽपि दिव्यचक्षुर्भि र्योगिभि र्ध्यानविषयीकृताश्चेत् तदीयसूक्ष्मपरमाणवः प्रकृतिपर्यन्तं सावरणाः सव्यापाराश्च ध्यानविषयीभवन्ति। अस्या एव रचनाया वैचित्र्यात् परश्शतशिल्पिभि र्न हि जीवत्सृष्टिः सर्जयितुं शक्या। प्रकृतिमारभ्य यावन्ति कार्याणि भवन्ति तावन्ति प्रायश आवरणविशिष्टानि भवन्ति, अत एव स्थूलकार्येषु "सप्ताऽस्यासन् परिधयस्त्रिः सप्त समिधः कृताः। देवा यद्यज्ञं तन्वाना अबध्नन् पुरुषं पशुम् ॥ वा. सं. ३१।१५" अस्य=पुरतो दृश्यमानस्य विश्वस्य सप्त परिधयः=परिधय इव परिधयः अर्थात् सप्ताऽऽवरणानि आसन् सन्ति। प्रतिब्रह्माण्डं पञ्चतन्मात्राऽहङ्कारमहतां सर्वकार्यजातकारणानां आवरणानि सन्ति। एवं सप्ताऽऽवरणै र्विभक्ताः सहस्रशो ब्रह्माण्डा मिलित्वा प्रकृत्याख्येन महाऽऽवरणेन प्रतिवेष्टिता इति। अत्र त्रिरावृत्ताः सप्त समिधः कृताः पञ्च महाभूतानि पञ्च तन्मात्राणि एकादशेन्द्रियाणि इति त्रिःसप्त एकविंशतिः समिधः दीप्तिसाधनानि कृताः निष्पादिताः। देवा यत् यज्ञं विराड्रूपतया विष्णुं तन्वाना हृदि विस्तारयन्तः पुरुषं परमेश्वरं पशुं=पश्यतीति पशुस्तं सर्वद्रष्टारं अबध्नन् हृदि स्थापितवन्तः, इति ब्रह्माण्डरचना प्रदर्शिता। तत्र सप्ताऽऽवरणानि अभिहितानि, पुरुषस्य च समस्तविश्वस्य सम्मितत्वेन प्रतिपादनात् ("पुरुषोऽयंलोकसम्मितः" च. शा. ५।३) सप्ताऽऽवरणस्थाने पुरुषे सप्तत्वचो भवन्ति, यथा–"तस्य खल्वेवं प्रवृत्तस्य शुक्रशोणितस्याऽभिपच्यमानस्य क्षीरस्येव सन्तानिकाः सप्तत्वचो भवन्ति। तासां प्रथमाऽवभासिनीनाम, या सर्ववर्णानवभासयति पञ्चविधां च छायां प्रकाशयति, सा व्रीहेरष्टादशभागप्रमाणा, सिध्मपद्मकण्टकाऽधिष्ठाना। द्वितीया लोहितानाम, षोडशभागप्रमाणा, तिलकालकन्यच्छव्यङ्गाऽधिष्ठाना। तृतीया श्वेता नाम द्वादशभागप्रमाणा, चर्मदलाऽजगल्लीमशकाऽधिष्ठाना। चतुर्थी ताम्रानामाऽष्टभागप्रमाणा, विविधकिलासकुष्ठाऽधिष्ठाना। पञ्चमी वेदिनी नाम व्रीहिपञ्चभागप्रमाणा, कुष्ठविसर्पाऽधिष्ठाना। षष्ठी रोहिणी नाम व्रीहिप्रमाणा ग्रन्थ्यपच्यर्बुदश्लीपदगलगण्डाऽधिष्ठाना। सप्तमी मांसधरा नाम व्रीहिद्वयप्रमाणा, भगन्दरविद्रध्यर्शोऽधिष्ठाना ॥ सु. शा. ४।४" इति। एवमेव प्रायो जङ्गमस्य सर्वेऽवयवाः प्रत्येकं सप्ताऽऽवरणविशिष्टा भवन्ति। अतिशयितं प्रपाचिते क्षीरे या सन्तानिका निर्वर्तते तस्यामपि सप्ताऽऽवरणपटलानि भवन्ति। सन्तानिकाऽपि मध्यतः कर्तयित्वा सूक्ष्मयन्त्रेण दृश्येत चेत्? तस्यां सहस्रशः सूक्ष्मच्छिद्राणि बाष्पोद्गमनजन्यानि दृश्यन्ते तैश्छिद्रै

जीलमिव विरचितं दृश्यते तत्र प्रतिच्छिद्रं प्रतिग्रथि च स्वतन्त्राण्यावरणानि भवन्ति तर्हि ईश्वरेण निर्मितशारीरधात्ववयवेषु सूक्ष्माऽऽवरणानि यथोचिति सप्तसङ्ख्यापर्यन्तानि कथं न भवन्ति इति सूक्ष्मशरीरतत्त्ववादिनां मतम् । उत्तममुक्तासु सप्त पटलानि प्रत्यक्षदृश्यानि 'तत्राऽधिकाऽऽवरणकृतैवोत्तमताऽस्ति' इति रत्नभेदज्ञानां परीक्षणम् । तत्र यथायथाऽऽवरणहीनता दृश्यते तथातथाऽल्पमूल्यता जायते । अयञ्च नियमः समस्तसृष्टे र्महदादिसप्तकारणाऽपेक्षोऽस्ति । कुत्रचिदधिकान्यप्यावरणानि भवन्ति कुत्रचिच्च न्यूनान्यपि, परन्तु तेनाऽपवादभूतेनौत्सर्गिको नियमो न विहन्यत एव । एवं सप्तावरणानां पेशीत्वस्वीकारे पञ्चशतसङ्ख्यात्वकथनं न केनाऽपि प्रकारेण सङ्गच्छेत । तथा च—" **यथार्थमूष्मणा** युक्तो वायुः स्रोतांसि दारयेत् । अनुप्रविश्य पिशितं पेशी र्विभजते तथा ॥ **सु. शा. ४।२८** " वायुः पिशितं मांसं अनु प्रविश्य पेशी र्विभजते, पेशी मांसपिण्डमिति डल्हणः । अत्र मांसाऽवयवानां सङ्घातेन धमनीस्रोत आदयः कथं निर्वर्तन्ते तदाऽऽचार्यो निर्दिशति यथार्थेत्यादिना—वायुः=समग्राऽवयवविभाजकः यथार्थं=यथाप्रयोजनं ऊष्मणा=शारीराऽग्निना युक्तः=संयुक्तः सन् स्रोतांसि धमनीप्रभृतीनि धात्वादिवहमार्गान् दारयेत्=यथायथं कार्यक्षमान् कारयेत्, तत्राऽपि तदेव पिशितं अनु शरीराऽवयवविभाजनाऽनुकूल्यं यथा स्यात्तथा प्रविश्य पेशीः=अनन्ताऽनन्तमूलकारणानि संयोज्य पिण्डरूपेण विभजते । पिशितं पेशी र्विभजते इत्यत्र पिशितमिति समवायिकारणम्, पेशीरिति कार्याणि मृदं घटान् करोतीतिवत् पिशिताद् भिन्ना एव पेश्यो जायन्ते इति प्रतिपादितम् । अनेन वाक्येन न कथञ्चिदपि आवरणानि समायान्ति किन्तु मांसपिण्डा एव लभ्यन्ते ते च शरीरे पञ्च शतानि प्रायशः सन्तीति सम्यक्त्वं प्रतीयते । " पञ्च पेशीशतानि भवन्ति । सु. शा. ५। ३७ " अत्राऽपि " मांसाऽवयवसङ्घातः परस्परं विभक्तः पेशी " इत्युच्यते इति डल्हणेनोक्तम् । अन्यच्च " महत्यौ मांसरज्ज्वश्चतस्रः पृष्ठवंशमुभयतः पेशीनिबन्धनार्थं द्वे बाह्ये आभ्यन्तरे च द्वे ॥ सु. शा. ५।१४ " अत्राऽपि मांसपिण्डानामेव बन्धनं सम्भवति न ह्यावरणानाम्, आवरणानां स्वयमेव बन्धनरूपत्वात् । " मृदुचर्ममांसपेशीषु उत्पलनालेषु च कर्णसन्धिबन्धनयोग्यां । सु. सू. १।४ " " मांसगते शोफाऽभिवृद्धिः शल्यमार्गोऽनुपसंरोहः पीडनाऽसहिष्णुता चोषपाकौ च । पेश्यन्तरस्थेऽप्येतदेव ॥ सु. सू. २६।१० " अत्र प्रथमोद्धरणे कर्णसन्धिबन्धनयोग्याया मांसपेशीपूपदेशान्मांसपिण्डा एव ग्रहीतुमुचिताः । द्वितीयोद्धरणे मांसपेश्योः पृथक्त्वेन कथनं दृश्यते तत्र स्वाऽवधिविभक्तो मांसपिण्डः पेशीशब्दवाच्यः, तदीयैकदेशस्तु मांसशब्देनाऽभिप्रेत इति न दोषः । अस्मिन् वाक्ये 'चोषशोफवर्जमिति, त्वसम्बद्धमेव प्रतीयते । एकदेशस्थिते चोषशोफौ स्यातां तर्हि समस्तदेशे तत्प्रवेशात्कथं चोषशोफयोरभाव इति स्पष्टमेव विरोधः । कदाचिदयं ग्रन्थस्थः पाठो भवेत्तर्हि चोषशोफवद्बहुलमित्येवं स्यात् । बहुलस्थाने वर्जमिति लेखकादिप्रमादेन सञ्जात इति प्रतीयते अन्यच्च नष्टशल्यप्रकरणे—" तानि वेगक्षयात् प्रतीघाताद्वा त्वगादिषु व्रणवस्तुष्ववतिष्ठन्ते धमनीस्रोतोऽस्थिविवरपेशीप्रभृतिषु वा शरीरप्रदेशेषु ॥ सु. सू. २६।९ " इत्यत्राऽपि पेशीषु बाणादेरवभङ्गेन स्थितेः कथनान्मांसपिण्डमेव ग्रहीतव्यम्, न तदीयाऽऽवरणं सम्भवतीति । कुत्रचिच्च पेशीशब्दं मुक्त्वा मांसपिण्डशब्द एव व्यवहृतोऽस्ति यथा—" मांसदुष्टौ गुरू स्थूलौ मांसपिण्डवदुद्गतौ । सु. नि. १६।१० " " जिह्वां समन्ताद्भृशवेदना ये मांसाङ्कुराः कण्ठनिरोधिनः स्युः ॥ सु. नि. १६।४८" इत्यत्र मांसाङ्कुरशब्देन मांससङ्घात एव विवक्षितः, सूक्ष्ममांसतन्तुभिः कण्ठनिरोधित्वाऽसम्भवात् । तत्र दोषवशाद् गलाऽश्रितपेश्या एव विभागा उच्छूनाः सन्तोऽङ्कुरत्वेन परिणता बोध्याः । तत्तत्पेश्याः प्रान्तीयभागाः सङ्घीभूय रज्ज्वाकारतां भजन्ति तत्र रक्तस्य स्वल्पसञ्चाराच्छ्वेतवर्णास्सन्तः काठिन्यञ्च भजन्तः पेश्याः पृथग्भूता इव लक्ष्यन्ते ते च सन्ध्यस्थिबन्धन-

कारिणो निष्पद्यन्ते तेचाऽतिस्थौल्यं लभमानाः कण्डराशब्दवाच्या भवन्ति, व्यवहारार्थं तयो र्नाम्नि विशेषः कृतोऽस्ति । सुश्रुतेन तु भेदचतुष्टयं प्रतिपादितम् यथा—"स्नायूश्चतुर्विधा विद्यात्तास्तु सर्वा निबोध मे । प्रतानवत्यो वृत्ताश्च पृथ्व्यश्च शुषिरास्तथा ॥ प्रतानवत्यः शाखासु सर्वसन्धिषु चाप्यथ । वृत्तास्तु कण्डराः सर्वा विज्ञेयाः कुशलैरिह ॥ आमपक्वाशयान्तेषु वस्तौ च शुषिराः खलु । पार्श्वोरसि तथा पृष्ठे पृथुलाश्च शिरस्यथ ॥ सु. शा. ५।३०–३१–३२" स्नायूनां कार्यञ्च तत्रैव प्रतिपादितम् यथा—"नौ र्यथा फलकाऽऽस्तीर्णा बन्धनै र्बहुभि र्युता । भारक्षमा भवेदप्सु नृयुक्ता सुसमाहिता ॥ एवमेव शरीरेऽस्मिन् यावन्तः सन्धयः स्मृताः । स्नायुभि र्बहुभिर्बद्धास्तेन भारसहा नराः ॥ सु. शा. ५।३३-३४" स्नाव्नां मांसविशेषत्वेऽपि व्यवहारार्थं पृथक्सञ्ज्ञा (स्नायूकण्डरा इति) कृताऽस्ति यथा—"मांसान्यस्य शातय स्नावान्यस्य संवृह ॥ अथर्व० १२।११।८" "यदा केशानस्थि स्नावमांसं मज्जानमाभरत् । शरीरं कृत्वा पादवत् कं लोकमनु प्राविशत् ॥ अ. ११।१०।११" "कुतः केशान् कुतः स्नावः कुतो अस्थीन्याभरत् । अङ्गा पर्वाणि मज्जानं को मांसं कुत आभरत् ॥ अ. ११।१०।१२" इत्यादीनि वेदे च वाक्यानि दृश्यन्ते । एषामाकारश्च शणादिनिर्मित-रज्जुरिव कार्यमपि तथैवाऽस्ति यथा—"शणजक्षौमसूत्राभ्यां स्नाय्वा बालेन वा पुनः । मूर्वागुडूचीतानैर्वा सीव्येद्वेल्लितकं शनैः ॥ सु. सू. २५।२१" स्नायूनां भङ्गे महत्यापत्तिः सन्धिशैथिल्यात्, यथा—"न ह्यस्थीनि न वा पेश्यो न शिरा न च सन्धयः । व्यापादितास्तथा हन्युर्यथा स्नायुः शरीरिणम् ॥ सु. शा. ५।३५" यत्तु कैश्चिज्ज्ञानतन्तूनां स्नायूत्वमभिमतं तदेकान्ततोऽसङ्गतम् "गूढसन्धिसिरास्नायुः संहताङ्गः स्थिरेन्द्रियः । उत्तरोत्तरसुक्षेत्रो यः स दीर्घायुरुच्यते ॥ सु. सू. ३५।५" इत्यत्र यत्स्नायूनां गूढत्वमुक्तं तत्र ज्ञानतन्तुषु सम्भवति तेषां नित्यमेव गूढत्वात्, विशेषणस्य सम्भवव्यभिचारयोरेव सङ्गतत्वात् । किञ्च—"अङ्गुलीगुल्फजठरहृद्वक्षोगलसंश्रितः । स्नायुप्रतानमनिलो यदा क्षिपति वेगवान् ॥ विष्टब्धाक्षस्स्तब्धहनु र्भग्नपार्श्वः कफं वमन् । आभ्यन्तरं धनुरिव यदा नमति मानवः ॥ तदास्याभ्यन्तरायामं कुरुते मारुतो बली । बाह्यस्नायुप्रतानस्थो बाह्यायामं करोति च ॥ सु. नि. १।५४–५५" इत्यत्र ज्ञानतन्तुविकृतौ न हि बाह्याऽऽभ्यन्तरायामयोः सम्भवो भवति । यद्यपि ज्ञानतन्तूनामप्युक्तप्रकारेण मांसे एवाऽन्तर्भावोऽस्ति परन्तु तत्रोपादानकारणस्यैकत्वेऽपि सहकारिकारणानां वैचित्र्यात् तथात्वं सञ्जातम् । एवमन्यत्राऽपि एकस्मात्कार्यादन्यस्मिन् कार्ये महद्वैचित्र्यं दृश्यते यथा मृत्पात्राद्रत्नादिपात्रेषु । तत्र यद्यपि मृत्त्वं समानमस्ति परन्तु सहकारिकारणस्य तेजसोऽधिकव्यापारादीदृशी विचित्रता सञ्जाता यत्र साधारणजनाः प्रतियन्ति यद्विविधपात्रेषु मृत्त्वमस्त्येवेति तथा ज्ञानतन्तुषु विद्युच्छक्तेरधिकतया वर्तमानत्वेन विशेषव्यवहारे न मांससाधारणत्वेन परिगणना भवितुमर्हति । अत एव व्यवहारार्थं शारीरशास्त्रे पार्थक्येन सञ्ज्ञाः कृताः सन्तीति पूर्वमवोचाम । ज्ञानतन्तुरचनायाः स्थानमपि पृथक्त्वेन स्थापितं यथा—"मूलाच्च द्व्यङ्गुलादूर्ध्वं सुषुम्णामूलरन्ध्रगम् । वादिवेदार्णलसितं पङ्कजं कनकप्रभम् ॥ तत्र विद्युल्लताकारां तेजोराशिमणीयसीम् । कुलकुण्डलिनीमूर्ध्वं न्यसेत् षट्चक्रभेदिनी—॥" मित्यादिभिः तन्त्रशास्त्रे सुषुम्णाकाण्डे विद्युच्छक्तेरेव प्रधानताऽस्ति, अत एव मांसमयत्वेऽपि ज्ञानतन्तूनां समग्रशरीरसञ्चालकत्वमस्ति । भेलेनाऽपि सूत्ररूपेणैतत्सूचितम्—"वेगादानानि विद्युतः । भेल शा. ७ ॥" वेगानां=चेष्टासञ्ज्ञादिप्रदवेगानां आदानानि=आसमन्तात्प्रवर्तनानि विद्युतः कार्याणीति । यद्यपि पक्षाघातविशेषे ज्ञानतन्त्वाघातोऽपि कारणमस्ति परन्तु तन्न सर्वत्र, अतः स्नायूनां ज्ञानतन्तुत्वापादनं शारीरशास्त्रस्य व्याकुलीकरणमेवाऽस्ति । ननु पेशीनां प्रान्तीयभागा एव कण्डराः स्नाय्वश्चेति स्वीक्रियते तर्हि तत्र पेशीतः कथं वैलक्षण्यं सञ्जातमिति चेदस्य निराकरणं सुश्रुतेनैवाऽकारि यथा—"मेदः स स्नेहमादाय सिरास्नायुत्वमप्यथ । सिराणान्तु मृदुः पाकः

स्नायूनाञ्च ततः खरः॥ आशय्याभ्यासयोगेन करोत्याशयसम्भवम्। सु.शा.४।२९-३०" स वायुः=पक्ता अन्तरनात् स्नेहमादाय मेदो विभजते, अर्थात् उदरे मेदश्चिनोति अथ एवं सिरास्नायुत्वं विभजते अर्थात् सिरात्वं=सिरास्वरूपं स्नायुत्वं=स्नायुस्वरूपञ्च विभजते। ननु समवायिकारणस्यैकत्वेऽपि कथमेतद्वैचित्र्यं सञ्जायते इत्यत आह " सिराणान्तु मृदुः पाकः०" सिराणामशुद्धरक्तवाहिनीनां धमनीरसायनीनामप्युपलक्षणमेतत्, अत्र मृदुः पाको भवति निरन्तररससम्भृतत्वात्। स्नायूनाञ्च=पेशीप्रान्तानां खरः पाको भवति अल्परसगमनात्। एतच्च वृक्षादावपि दृष्टचरम्। यत्र (मूलादौ) रससञ्चयोऽधिकतरोऽस्ति तत्र कोमलत्वं, यत्र च (शाखादौ) रसाऽल्पत्वं तत्र मूलाद्यपेक्षया भवत्येव खरत्वम्। एतच्च सहकारिकारणवैचित्र्यात्सञ्जायते, अतो मांसमयत्वे न काऽपि शङ्काऽस्ति अत्र च "मेदसः स्नेहमादाय शिरा स्नायुत्वमाप्नुयात्" इति पाठो लेखकप्रमादाद्भ्रष्टतामवाप स सुधीभिस्संशोधनीयः। तत्कारणञ्च 'मेदः स स्नेहमादाय, इत्यत्र अर्थानवगम एव प्रतिभाति तेन पाठे भ्रष्टता सञ्जाताऽस्ति। स वायुः मांसपेशीषु आशय्य आसमन्तात् निवासं कृत्वा हृदाद्याशयानां सम्भवमुत्पत्तिं करोति। अतः पाकाऽऽकार्यवैचित्र्यात्सर्वस्य (शरीराऽऽवयवसङ्घातस्य) व्यवहारार्थं नामविशेषकल्पनाऽस्तीत्यलमतिविस्तरेण।

(सं. ११६) कीकसाः—"ग्रीवाभ्यस्त उष्णिहाभ्यः कीकसाभ्यो अनूक्यात्। अथर्व० २।३३।२" "यः कीकसाः प्रशृणाति तलीद्यमवतिष्ठति। अ. ७।८०।२" "श्येनः क्रोडोऽन्तरिक्षं पाजस्यं बृहस्पतिः ककुद् बृहतीः कीकसाः। अ. ९।१२।५" "या हृदयमुपर्षन्त्यनुतन्वन्ति कीकसाः। अ. ९।१३।१४" "शिरो हस्तावथो मुखं जिह्वां ग्रीवाश्च कीकसाः। अ. ११।१०।१५" इत्यादिस्थलेषु सायणेन जत्रुवक्षोगताऽस्थिभ्य इत्यस्थिविशेषेऽस्थिसाधारणे च कीकसाशब्दोऽस्थिपरत्वेन व्याख्यातस्तथाऽपि सोऽर्थोऽश्रद्धेयः। "यः कीकसाः प्रशृणाति" इत्यत्र राजयक्ष्मणि कीकसानां प्रशरणमुक्तं तच्च प्रथमतो न कठिनाऽस्थ्नां किन्तु तरुणाऽस्थ्नामेव कीटैराक्रमणजन्यं भवति। कठिनाऽस्थिविशरणाऽवधि तु जीवनमेव विशीर्यते। यद्यस्थिसाधारणपरः कीकसाशब्दः स्यात्तर्हि "ग्रीवाभ्यस्त उष्णिहाभ्यः कीकसाभ्यो अनूक्यात्। अ. २।३३।२" "अस्थिभ्यस्ते मज्जभ्यः स्नावभ्यो धमनिभ्यः अ. २।३३।६" इत्यत्र कीकसाभ्यः—अस्थिभ्य इति द्वयस्योपादानं नोपलभ्येत। अतः कीकसाशब्दस्तरुणास्थिपरो बोध्यः यथा—"पर्शवो बृहत्यः। कीकसाः ककुभः। सोऽन्तरेण त्रिष्टुभश्च ककुभश्च बृहतीरुपदधाति तस्मादिमा उभयत्र पर्शवो बद्धाः कीकसासु च जत्रुषु च॥ शत० ब्रा० ८।६।२।१०" इत्यत्र पृष्ठकशेरुकासम्बद्धतरुणाऽस्थीनि कीकसाशब्देनाऽभिप्रेतानि, वक्षोऽस्थिसंलग्नानि च जत्रुशब्देन स्पष्टतया कथितानि। अतो न कीकसाशब्दोऽस्थिसाधारणपरः, न वा तरुणाऽस्थिसाधारण्येन प्रयुज्यते किन्तु तरुणास्थिविशेषपरत्वेन प्रयुज्यते। "मरुतां स्कन्धा विश्वेषां देवानां प्रथमा कीकसा रुद्राणां द्वितीयाऽऽदित्यानां तृतीया वायोः पुच्छं० यजु० २५।६" इत्यत्र पुच्छोपरिष्टाद्याऽस्थिपङ्क्तिः सा कीकसा इति महीधरेण व्याख्यातमपि नाऽस्थिसाधारण्यं बोधयति, तत्रत्याऽस्थ्नां तरुणाऽस्थिमयत्वात् तस्मात्कीकसा अस्थीनीति अस्थिसाधारण्येन सायणस्य व्याख्यानं न समीचीनमिति दिक्।

अथौजोविवरणम् (सं. १२०)

ओज-इति किं भवितुमर्हतीति विचार्यते। तत्र ऊर्जयति बलयुक्तं प्राणयुक्तं वा करोति "ऊर्ज बलप्राणनयोः। (चु.) उब्जति ऋजूकरोति वा ओजः, असुनि बाहुलकाद्रूपसिद्धिः। "ओज ऊर्जयतेर्वोब्जतेर्वेति" निरुक्तम् (६।८।१) ओजतेर्वोब्जतेर्वेति पाठस्त्वसङ्गत एव, ओजते धातोरभावात्। जलनामसु बलनामसु च तत्पाठात्सोमात्मकं बलाधिकरणञ्च भवतीत्यनायासेन सिद्धम्। इममेवाऽभिप्रायमाश्रित्य— "ओजः सोमात्मकं

स्निग्धं शुक्लं शीतं स्थिरं सरम् । विविक्तं मृदु मृत्स्नञ्च प्राणायतनमुत्तमम् ॥ देहस्याऽवयवस्तेन व्याप्तो भवति देहिनाम् । तदभावाच्च शीर्यन्ते शरीराणि शरीरिणाम् ॥ अभिघातात्क्षयात्कोपाच्छोकाद्ध्यानाच्छ्रमात्क्षुधः । ओजः संक्षीयते ह्येभ्यो धातुग्रहणनिःसृतम् । तेजः समीरितं तस्माद्विस्रंसयति देहिनः ॥ सु. सू. १५।२५-२६-२७" इत्यनेन पाठेन निरुक्तस्थितपाठस्य व्याख्यानमनुपूर्वशः कृतं प्रतिभाति । चरकेण तु निरुक्ते उदकनामसु पाठं दृष्ट्वा शरीरे तेन (ओजसा) किं ग्राह्यमिति बहुशो विचार्य प्रायः शरीरे सर्वधातुष्वपि जलीयभागस्य विद्यमानत्वात्तदेवमवेदितिनिर्धार्य कुत्रत्यं तद्ग्रहीतव्यमिति संदिह्य हृदयस्य रसवहने मुख्यत्वात् तत्रस्थस्य रसस्य रक्तरूपत्वात् तदेवरक्तमोजः शब्दवाच्यमिति निरचायि । पुनरपि समस्तशरीरवर्तिनो रक्तस्य आवापोद्वापाभ्यां हृदि वर्तमानत्वात्समस्तशरीरस्थमेव रक्तमोजः शब्दवाच्यं स्यादिति च सन्दिह्य यद्धृदयमात्रपोषकं रक्तं तदेवौजःशब्दवाच्यं, तदधीनत्वाद्धृदयकार्यस्य । तच्चेदपहृयते तर्हि हृदयमेव निष्क्रियं स्यादिति मत्वा " हृदि तिष्ठति यच्छुद्धं रक्तमीपत्सपीतकम् । ओजः शरीरे सङ्ख्यातं तन्नाशान्ना विनश्यति ॥ च. सू. १७।७४ " अत्र हृदयपोषकं यद्रक्तं तन्नाऽतिशुद्धम्, हृदयपोषणेऽधिकतरं सिराया एव व्यापृतत्वात् । अत आह हृदि=हृत्पोषणार्थं यद्रक्तं तिष्ठति तदीपच्छुद्धं नाऽतिस्वच्छमित्यर्थः । सपीतकं=धमनीस्थरक्तमिव नाऽत्यरुणम् । सपीतकञ्चेति विशेषणं रक्ते न युज्यते अनुपद्रुतरक्ते पीतिमाऽभावात् । यद्यपि रक्तक्लिन्नवस्त्रादेः साधारणप्रक्षालनाऽनन्तरमवशिष्टचिन्हे यत्किञ्चित्पीतिमा दृश्यते परन्तु सा सर्वस्मिन्नेव रक्तेऽस्ति न केवलं हृत्पोषके एव रक्ते इतिमहांश्छंशयः । अस्य च क्षयः " व्यायामोऽनशनं चिन्ता रूक्षाऽल्पप्रमिताऽशनम् । वातातपौ भयं शोको रूक्षपानं प्रजागरः ॥ कफशोणितशुक्राणां मलानां चातिवर्तनम् । कालो भूतोपघातश्च ज्ञातव्याः क्षयहेतवः ॥ च. सू. १७।७५-७६ " एतैरेतैः कारणै निर्दिष्टः । यद्यपि निर्दिष्टहेतवः समग्रधातूनां क्षयहेतवः सन्ति परन्तु हृदये सर्वतोऽभ्यधिकतर आघातोऽनुभूयते चिन्तास्थानत्वात् । आर्षसिद्धान्ते लिङ्गशरीरविशिष्टजीवस्य मुख्यस्थानत्वेन सुखदुःखादेः प्रतिभानं तत्र शीघ्रतरं भवति, अत एव वृद्धिहेतुपुत्रजन्मादेः श्रवणेन हृद्व्यापारस्याऽऽधिक्यं जायते । एवं तन्नाशादौ तदीयव्यापारस्य क्षीणत्वात् सुखदुःखयोस्तत्र प्रत्यक्षं भानं भवतीति सर्वजनीनसिद्धान्तः । अतो हृत्पोषकरक्तस्य क्षयेऽन्यस्थानाऽपेक्षयोक्तहेतूनामधिकतया परिणामो दृश्यते । पुनश्च मदात्ययाऽधिकारे " गुरु शीतं मृदु श्लक्ष्णं बहलं मधुरं स्थिरम् । प्रसन्नं पिच्छिलं स्निग्धमोजोदशगुणं स्मृतम् ॥ च. चि. २४।३१ " इति दशगुणान् ओजसो निर्दिश्य " गुरुत्वं लाघवाच्छैत्यं चौष्ण्यादम्लस्वभावतः । माधुर्यं मार्दवं तैक्ष्ण्यात्प्रसादं चाशुभावनात् ॥ रौक्ष्यात्स्नेहं व्यवायित्वात्स्थिरत्वं श्लक्ष्णतामपि । विकासिभावात्पैच्छिल्यं वैशद्यात्सान्द्रतां तथा ॥ सौक्ष्म्यान्मद्यं निहन्त्येवमोजसः स्वगुणै र्गुणान् ॥ च. चि. २४।३२-३३-३४ " इत्यादिना मद्यस्यौजोविपरीतदशगुणैरोजसो दशगुणानां नाश उक्तः । तन्नाशात् " सत्वं तदाश्रयं चाशु संक्षोभ्य जनयेन्मदम् ॥ रसवातादिमार्गाणां सत्वबुद्धीन्द्रियात्मनाम् ॥ प्रधानस्यौजसश्चैव हृदयं स्थानमुच्यते ॥ अतिपीतेन मद्येन विहतेनौजसा च तत् । हृदयं याति विकृतिं तत्रस्था ये च धातवः ॥ च. चि. २४।३५-३६ " हृदयाश्रितरसवातादिमार्गाणां सत्वबुद्धीन्द्रियाणाञ्च विहते व्यापारे मदात्ययः समभ्युपतीत्युक्तम् । तत्रेत्थं विचार्यते—सूत्रस्थाने हृत्पोषकरक्तस्यौजस्त्वं स्वीकृत्य कथमत्र तद्विस्मृत्य गुर्वादिदशलक्षणानि ओजस उक्तानीति । नहि रक्तस्य स्थिरत्वं शीतत्वञ्च सम्भवति किञ्च हृदयपोषकरक्तस्य नाऽतिशुद्धत्वात्तादृशी प्रसन्नताऽपि तत्र नास्तीति कथमाचार्येण पूर्वापरविरोधजनकं वाक्यमुद्धृतमिति महान् संशयः समुपतिष्ठते, तत्रेदं तत्त्वम्— "ओजः सोमात्मकं स्निग्धं शुक्लं शीतं स्थिरं सरम् । विविक्तं मृदु मृत्स्नं च प्राणायतनमुत्तमम् ॥ देहस्याऽवयवस्तेन व्याप्तोभवति देहिनाम् । तदभावाच्च शीर्यन्ते शरीराणि शरीरिणाम् ॥ सु. सू. १५।२५-२६ " इति सुश्रु-

तोक्ता ओजसो गुणा एते सन्तीति सामान्यतो हृदि सन्निधाय विविक्तमस्तीति प्रतिभाति परन्तु सुश्रुतीयोपन्यासात् स्वोपन्यासस्य महदन्तरमस्तीति न विचारितम्। नहि सुश्रुतेन हृत्पोषकरक्तरूपोजसत्वं स्वीकृतम्। तदीयसन्दर्भस्तु निम्नाङ्कितस्वरूपं सम्यगेवाऽऽख्याति। अत एव तत्र स्थानपरिच्छेदमनिर्दिश्य देहस्याऽवयवोऽवयवानुदायत्तेन (ओजसा) देहिनो व्याप्तो भवतीत्युक्तम्। एतादृशः सूक्ष्मोऽप्यवयवस्तदीयांशांशो वा तादृशो नास्ति य ओजसा रहितो भवति इति सुश्रुतीयाऽभिप्रायः। चरकेण तु कौशलावलम्बिनेव " हृदि तिष्ठति यच्छुद्ध—" मित्यनेन वचनेन जाड्यगूढं निरमायि। तेन शतशो विसंवादस्थानानि प्रादुर्भवन्ति। ननु सुश्रुतेन निरुक्तवार्तिकं निरवारीति प्रश्ने? उच्यते—निरुक्ते उदकनामसु " अर्णः। क्षोदः। क्षद्म। नभः। अम्भः। कबन्धम्। सलिलम्। वाः। वनम्। घृतम्। मधु। पुरीषम्। पिप्पलम्। क्षीरम्। विषम्। रेतः। कशः। जन्म। बृबूकम्। बुसम्। तुग्र्या। बुर्बुरम्। सुक्षेम। धरुणम्। सिरा। अररिन्दानि। ध्वस्मन्वत्। जामि। आयुधानि। क्षपः। अहिः। अक्षरम्। स्रोतः। तृप्तिः। रसः। उदकम्। पयः। सरः। भेषजम्। सहः। शवः। यहः। ओजः। सुखम्। क्षत्रम्। आवयाः। शुभम्। यादुः। भूतम्। भुवनम्। भविष्यत्। महत्। आपः। व्योम। यशः। महः। सर्णीकम्। स्वृतीकम्। सतीनम्। गहनम्। गभीरम्। गम्भरम्। ईम्। अन्नम्। हविः। सद्म। सदनम्। ऋतम्। योनिः। ऋतस्ययोनिः। सत्यम्। नीरम्। रयिः। सत्। पूर्णम्। सर्वम्। अक्षितम्। बर्हिः। नाम। सर्पिः। अपः। पवित्रम्। अमृतम्। इन्दुः। हेम। स्वः। सर्गाः। शम्बरम्। अभ्वम्। वपुः। अम्बु। तोयम्। तूयम्। कृपीटम्। शुक्रम्। तेजः। स्वधा। वारि। जलम्। जलाषम्। इदमित्येकशतमुदकनामानि॥ नि. १।१२ ॥" इत्येतेषु ओजः शब्दः पठितः। शारीरवर्णने कस्मिंश्चिदप्यवयवे शुद्धजलाऽभावाद् द्रवप्रधानानि च सर्वाण्यप्यङ्गानि सन्तीत्यभिप्रेत्योक्तम्—देहिनामवयवशस्तेन व्याप्तो भवतीति। निरुक्तनामसु च पुरीष-क्षीर-रेतः-रस-शुक्रादीनामपि शारीरीयवस्तूनां यत् परिगणनं कृतमस्ति तज्जलीयभागप्रचुरत्वेनैव। अतो मनुष्यशरीरे इतरभूतापेक्षया जलीयभागस्याऽधिकत्वेन वर्तमानत्वात्सर्वत्रैव तद् व्याप्तं भवतीति हृदि निधाय—" देहस्याऽवयवशस्तेन व्याप्तो भवतीत्युक्तम्। नन्वेवं चेद्रक्तादीनामप्योजस्त्वप्रसक्तौ शरीरतत्त्वगणनैव दुर्वारा स्यादिति चेन्नैवम्?—" रसाद्रक्तं ततो मांसं मांसान्मेदः प्रजायते। मेदसोऽस्थि ततो मज्जा मज्ज्ञः शुक्रं तु जायते॥ सु. सू. १४।१० ॥" इत्यनेन वाक्येन पूर्वोऽध्याये सप्तधातूनां नाम्नां परिगणितत्वेन न तेषामोजस्त्वेन ग्रहणमिति सुवचत्वात्। नन्वेवं तर्हि सप्तधात्वतिरिक्तं किमवशिष्टमिति चेत्? उच्यते—बलनामस्वपि निरुक्ते ओजसः पाठोऽस्ति। " ओज ऊर्जयतेर्वोब्जतेर्वा। नि. ६-८-१ ॥" इत्यत्र ओजःशब्दस्य ऊर्जधातोः उब्जतेर्वा उत्पत्तिः प्रदर्शिता। एतेनैतद्ध्वनितम्—" ऊर्ज बलप्राणनयोः " येन वस्तुना प्राणिनां बलमुद्भवति जीवनञ्च निर्व्यूढं भवति तदेवौजः। उब्जतेरुत्पत्तिकथनाद् यद्वस्तु शरीराऽवयवानामृजूकरणार्थमुपयुज्यते तदोज इत्यनेन समस्तशरीरवर्ती यः स्नेहः स ओजःशब्दवाच्यः। यद्यपि मेदोमज्ज्ञोः स्नेहरूपत्वमेवाऽस्ति परन्तु तयोः स्वतन्त्रत्वेनोपदेशान्नौजस्त्वेन परिगणना। तत्र मेदस उदरस्थानमुक्तं मज्ज्ञश्चाऽस्थिरन्ध्राणि, इत्येतद्द्वयं स्थानद्वयेऽवरुद्धम्। एतत्सहितसमस्तशरीरचक्रे यद् व्यापकत्वेन स्नेहोऽवतिष्ठते स ओजःशब्दवाच्य इति धन्वन्तरेराशयः। " रागपक्त्योजस्तेजोमेधोष्मकृत्पित्तं पञ्चधा प्रविभक्तमग्निकर्मणा अनुग्रहं करोति ॥ सु. सू. १५।५ " इत्यत्र ओजसः पित्तनिष्पादनीयतया उक्तत्वेन आग्नेयत्वं स्यादिति तु न शङ्क्यमेव? सर्वेषामपि पदार्थानां पाके पित्तस्यैवाऽधिकृतत्वात् न तेन सौम्यत्वं तस्य (ओजसः) व्याहन्येत। न च शङ्क्यं " ततः स्वयम्भूर्भगवानव्यक्तो व्यञ्जयन्निदम्। महाभूतादिवृत्तौजाः प्रादुरासीत्तमोनुदः॥ मनु० १।६ " इत्यत्र स्नेहस्य स्नेहजन्यशक्तेर्वा अभावोऽस्तीति, तत्राऽपि " सोऽभिध्याय शरीरात्स्वात्सिसृक्षुर्विविधाः प्रजाः। अप एव

ससर्जादौ तासु बीजमवासृजत् ॥ मनु. १।८ " इत्यनेनाऽपामेव सर्वकारणत्वस्योक्तत्वेन, सौम्यगुणस्यैव प्रधानताया उक्तत्वात् । सृष्टिप्रपञ्चे च न केवलस्य कस्यचिदपि भूतस्य विद्यमानताऽस्ति संसृष्टभूतैरेव सृष्टेर्निर्मितत्वात् । शक्तिमात्रे च विद्युच्छक्तेः प्रधानत्वेऽपि सौम्यत्वाऽनपायोऽस्ति विद्युतोऽप्यद्भ्य उद्भवत्वात् । चिकित्साशास्त्रे च प्रायशो द्रव्यरूपस्यैवौजसः कथितत्वात् । जलस्य सृष्टिप्रपञ्चे वह्निरुपादानं कारणमस्ति, अतो जलेऽग्नेरभावः केनापि साधयितुमशक्यः । अत एव निरुक्ते जलनामसु तेजश्शब्दोऽपि पठितः, ओजसि च तेजसोऽधिका मात्रास्ति समस्तशारीरधातुसारत्वात् । शरीरे यावन्तो मुख्यत्वेन जलीयपरिणामास्तेष्वितरभूतसमवायत्वेपि तर्पणगुणाऽधिक्यात्सौम्यत्वमव्याहतम् । एतदभिप्रायेण तल्लक्षणं कृतमस्ति **ओजः**सोमात्मकमिति (सु. सू. १५-१५) । अत्राऽप्युक्तलक्षणमोजो द्रव्यरूपं, तज्जन्या या शक्तिः सा बलशब्देनोच्यते, ननु " बललक्षणं चात ऊर्द्ध्वं वक्ष्यामः । तत्र रसादीनां शुक्रान्तानां धातूनां यत्परं तेजस्तत्खलु ओजस्तदेव बलमित्युच्यते स्वशास्त्रसिद्धान्तात् । सु. सू. १५।२३ " इत्यत्र ओजस एव बलत्वमभिहितं तत्कथमुच्यते तज्जन्या शक्ति र्बलमिति चेन्न ? तस्य वाक्यस्य प्रक्षिप्तत्वात् । " प्राणिनां पुनर्मूलमाहारो बलवर्णौजसाञ्च ॥ सु. सू. १।२७ " इत्यत्र स्पष्टतयौजसः पृथग्बलस्य कथितत्वात् । एवंविधानि बहूनि वाक्यानि प्रतिसंस्कर्तृभिः प्रक्षिप्तानि तैनेदं तन्त्रमाकुलीभूतमासीदित्याकलय्य नितरां खिद्यते चेतः । कथं महर्षिःस्वमुखेन पूर्वाऽपरविरुद्धानि वाक्यान्युच्चारयेत् ? अत एव—" तस्य (ओजसः) विस्रंसो व्यापत् क्षय इति लिङ्गानि व्यापन्नस्य भवन्ति ॥ सन्धिविश्लेषो गात्राणां सदनं दोषच्यवनं क्रियासन्निरोधश्च विस्रंसे । स्तब्धगुरुगात्रता वातशोफो वर्णभेदो ग्लानिस्तन्द्रा निद्रा च व्यापन्ने । मूर्च्छा मांसक्षयो मोहः प्रलापो मरणमिति च क्षये ॥ १५।२८-२९ " इत्यस्याग्रे ' भवन्ति चात्र ' इत्यारभ्य ' मरणं च बलक्षये ' इत्यन्तं त्रयः श्लोकाः (त्रयो दोषा बलस्योक्ता व्यापद्विस्रंसनक्षयाः । विश्लेषसादौ गात्राणां दोषविस्रंसनं श्रमः ॥ अप्राचुर्यं क्रियाणाञ्च बलविस्रंसलक्षणम् । गुरुत्वं स्तब्धताऽङ्गेषु ग्लानि र्वर्णस्य भेदनम् ॥ तन्द्रानिद्रा वातशोफो बलव्यापदि लक्षणम् । मूर्च्छा मांसक्षयो मोहः प्रलापोऽज्ञानमेव च । पूर्वोक्तानि च लिङ्गानि मरणञ्च बलक्षये ॥) स्पष्टतया प्रक्षिप्ताः सन्ति । यत्तु गद्योक्तमेवार्थं श्लोकैराह इतिडल्हणेनोक्तं तदप्यविचार्यैव लिखितम् । पूर्वोक्तसन्दर्भस्य त्रिभिः श्लोकैः सम्बन्धो विच्छिद्यते इयञ्च शृङ्खला चरके बहुत्र स्थाने दृश्यते परन्तु तत्र प्रतिसंस्कर्तॄणां नियम एव नास्ति, यस्य मनसि यत्स्फुरितं तदेव लिखितम् । अत एव बहुत्र स्थाने पुनरुक्तयो दृश्यन्ते तमेव क्रममनुसृत्याऽत्रापि (सुश्रुतेऽपि) तथा कृतं प्रतीयते । पूर्वसन्दर्भादनन्तरं " तत्र विस्रंसे व्यापन्ने च क्रियाविशेषैरविरुद्धै र्बलमाप्यायेत् नष्टसञ्ज्ञमितरन्तु वर्जयेत् । सु. सू. १५।३३ " इत्यस्यैव सन्दर्भस्य संलग्नता प्रतिभाति लेखनशैलीसादृश्यात् । अतोऽग्रेऽपि ' तेजोऽप्याग्नेय' मित्यारभ्य ' लघ्वन्नानि क्षये विदधीत' इत्ययमपि सन्दर्भः (तेजोऽपि आग्नेयं क्रमशः पच्यमानानां धातूनामभिनिर्वृत्तमन्तरस्थं स्नेहजातं वसाख्यं स्त्रीणां विशेषतो भवति । तेन मार्दवसौकुमार्यमृद्वल्परोमतोत्साहदृष्टिस्थितिपक्तिकान्तिदीप्तयो भवन्ति । तत् कषायतिक्तशीतरूक्षविष्टम्भिवेगविघातव्यवायव्यायामव्याधिकर्षणैश्च विक्रियते । तस्यापि पारुष्यवर्णभेदतोदनिष्प्रभत्वानि विस्रंसने भवन्ति, कार्श्यं मन्दाग्निताऽधस्तिर्यक् च विच्युति र्व्यापत्तौ, दृष्टयग्निबलहान्यनिलप्रकोपमरणानि क्षये । तत्राऽपि स्नेहपानाऽभ्यङ्गप्रदेहपरिषेकस्निग्धलघ्वन्नानि क्षये विदधीत ॥ सु. सू. १५।३४ ॥) प्रक्षिप्तोऽस्ति । अत्राभिधेयार्थस्य " अभिघातात्क्षयात्कोपाच्छोकाद् ध्यानाच्छ्रमात्क्षुधः । ओजः संक्षीयते ह्येभ्यो धातुग्रहणनिःसृतम् । तेजः समीरितं तस्माद्विस्रंसयति देहिनः ॥ सु. सू. १५।२७ इत्यनेनैव सूत्रेण कथितत्वात् । अतः स्पष्टतया प्रतिभाति यदयं सन्दर्भोऽपि निःसंशयं प्रक्षिप्त इति । कथमन्यथा सप्तविंशतितमे सूत्रे तेजसः ओजोविस्रंसने कारणमुक्त्वा

अस्मिन् सन्दर्भे वसाख्यस्नेहस्य तेजस्त्वमापादयेदाचार्यः । तस्मादिदं सन्दर्भद्वयमजागलस्तनायितं निष्कासनीयम् । ततश्च न कुत्राऽपि विरोधः उपस्थास्यत इति । उत्तरसन्दर्भविषये तु डल्हणेनाप्यनार्षत्वे पूर्वनिबन्धकर्तृणां सम्मतिः प्रकटिताऽस्ति परन्तु सन्दर्भद्वयमप्यनार्षमस्तीति निःसंशयं प्रतिपत्तव्यम् । अवशिष्टेन च ग्रन्थेन द्रव्यरूपस्यौजसः क्षयनिदानचिकित्सितानि सङ्क्षेपेण वर्णितानि समायान्ति । सुश्रुतीयसिद्धान्ताव्याऽगत्या चरकेणाऽपि पदेपदे स्वीकृतोऽस्ति यथा—" गुरुस्निग्धाम्ललवणं भजतामतिमात्रशः । नवमन्नञ्च पानञ्च निद्रामास्यासुखानि च ॥ त्यक्तव्यायामचिन्तानां संशोधनमकुर्वताम् । श्लेष्मा पित्तञ्च मेदश्च मांसं चातिप्रवर्धते ॥ तैरावृतगतिर्वायुरोज आदाय गच्छति । यदा वस्तिं तदा कृच्छ्रो मधुमेहः प्रवर्तते ॥ च. सू. १७।७७–७८–७९ ॥" इत्यत्र तैरिति पदेन श्लेष्मादयः परामृश्यन्ते, तत्राऽपि श्लेष्मादिषु योऽयं वर्तमानस्नेहस्तमेकं स्वक्रोडीकृत्य वस्तौ प्राप्नोतीति 'ओज आदाय' इत्यनेन स्पष्टं कथितं वर्तते स्नेहाऽतिरिक्तौजसोऽत्राऽभावात् । कदाचित् हृदि स्थितं रक्तरूपमेवाऽत्राऽप्योजोऽस्तीति वाच्यं ? तर्हि ' तन्नाशान्ना विनश्यती-, ति तत्रस्थसिद्धान्तेन तत्क्षणमेव मृत्युवशेन मधुमेहिनो भवितव्यम्' न हि तत्कालमेव मेहिनो म्रियमाणा दृश्यन्ते । हृदयपोषकरक्ते एव ओजस्त्वस्वीकारे तस्य च वातेन वस्तावभ्यपहारे हृदयव्यापार एव स्थगितः स्यात् । स्थगिते च तस्मिन् मृत्यु दुर्वार एव, हृदयव्यापारस्थगनरूपमेव मृत्युरिति प्रसिद्धा सर्वजनीना प्रतीतिः । हृदयस्थगने योगिन एव जीवन्तो दृश्यन्ते नान्येऽपि देहधारिण इति सर्वशास्त्रसिद्धान्तश्च । अतोऽत्र यस्य वायुना वस्तावपकर्षणं प्रतिपादितं स शरीरस्थः स्नेह एव । एवं ओजः " पुन र्मधुरस्वभावं, तयदा रौक्ष्याद्वायुः कषायत्वेनाऽभिसंसृज्य मूत्राशयेऽभिवहति, तदा मधुमेहिनं करोति ॥ च. नि. ४।३२ ॥" इत्यत्राऽपि मधुरस्वभावस्यौजसः स्वस्य कषायरौक्ष्याभ्यां वातस्य संसर्गमुक्त्वा मूत्राशयेऽभिवहनमुदाहृतं तदपि शरीरस्थस्नेहस्यैव सम्भवति न पुनर्हृदयपोषकरक्तस्य । किञ्च " बिभेति दुर्बलोऽभीक्ष्णं ध्यायति व्यथितेन्द्रियः । दुश्छायो दुर्मना रूक्षः क्षामश्चैवौजसः क्षये ॥ च. सू. १७।७३" इत्यत्र दुश्छायत्वदुर्मनस्त्वरूक्षत्वानि यान्युदाहृतानि तान्यपि शरीरस्नेहक्षये एव । अन्यच्च " व्यायामोऽनशनं चिन्ता० । च. सू. १७।७६ " इत्यत्राऽपि ये ओजसः क्षयहेतवो निर्दिष्टास्ते स्पष्टतया शरीरस्नेहस्यैव । अन्यच्च " व्यवायाऽनशनाभ्यां च शुक्रमोजश्च हीयते । च. चि. ८।२४ " इत्यत्राऽपि शुक्रसाहचर्येण सर्वशरीरव्यापिनः स्नेहस्यैव कथनं सम्भवति । " स विमुक्तो ग्रहश्चन्द्रो विरराज विशेषतः । ओजसा वर्धितोऽश्विभ्यां शुद्धं सत्त्वमवाप च ॥ च. चि. ८।१० " इत्यत्र यदाऽश्विभ्यां ओजसा (सर्वशरीरव्यापिना स्नेहेन) वर्धितः पूरितस्तदा चन्द्रो ग्रहः विशेषतो विरराज दीप्तो बभूव । इत्यत्राऽप्योजः पूरणेन या दीप्तिरुक्ता सा स्पष्टतरैव स्नेहजनितेति कस्य सहृदयस्याशयं नाऽवगाहेत । किञ्च—" दश प्राणायतनानि तद्यथा–मूर्धा कण्ठो हृदयं नाभि र्गुदो वस्तिरोजः शुक्रं शोणितं मांसमिति । च. शा. ७।१२ " इत्यत्र शोणिताद्धृदयाच्च पार्थक्येनौजसः प्राणायतनत्वमुक्तम् । यदि च हृदयपोषकं रक्तमेवोजः स्यात्तर्हि हृदयग्रहणेनैव गतार्थत्वान्नौजः पृथकयोपन्यस्येत । न च वाच्यं हृदयवर्त्योजो विशिष्टं वस्त्वस्तीति न तद्ग्रहणेनौजसो बोधो भवेदिति तादृशविशिष्टवस्तुनः प्रत्यक्षत्वाऽभावात् । " ओजो दशगुणं स्मृतम् ॥ च. चि. २४।३० " इत्यत्र चरकेणैव दृश्यमानपदार्थस्य गुणानां निर्दिष्टत्वाच्च न तस्याऽप्रत्यक्षत्वं वक्तुं कोऽपि सहृदयः प्रभवेत् । अन्यच्च " वातश्लेष्मक्षये पित्तं देहौजः स्रंसयेच्चरत् । ग्लानिमिन्द्रियदौर्बल्यं तृष्णां मूर्च्छां क्रियाक्षयम् ॥ च. सू. १७।५९ " इत्यत्र पित्तकृतं यदौजसः स्रंसनं तद् दृश्यमानपदार्थस्यैव सम्भवति तदभावे उत्तरार्धनिर्दिष्टानां विकाराणां सम्भवोऽपि स्नेहक्षये एव । अतो नौजस इन्द्रियाऽगोचरत्वं वक्तुं युज्यते । " इह खल्वोजस्तेजः शरीरे नित्ये च भवतः । तयोः स्थानानि द्वादश भवन्ति तद्यथा—शोणितमांसमेदोऽस्थिमज्जशुक्रस्वेदपित्तश्ले-

ष्ममूत्रपुरीषाणीति ॥ भेल० शा. ५" इत्यत्र भेलेनाऽपि समस्तधातवो मलाश्च ओजसः स्थानत्वेन निर्दिष्टाः। वर्तमानचरकग्रन्थस्य मूलमात्रेयसम्प्रदायः, भेलश्च साक्षादात्रेयस्य शिष्यो योऽग्निवेशसहाध्यायी, तदीयग्रन्थे न कुत्राऽपि हृदयमात्रपोषकस्य रक्तस्याऽन्यवस्तुनो वा ओजस्त्वेन निर्देशः कृतोऽस्ति। अतोऽत्र "हृदि तिष्ठति यच्छुद्धं रक्तमीषत्सपीतक–"मिति पद्यं येन केनाऽपि प्रतिसंस्कर्त्रा प्रक्षिप्तमिति प्रतिभाति। एकेनाऽनेन पद्येन समस्तं तन्त्रमाकुलीभूतमास्ते। नच वाच्यं "यद्धि तत्स्पर्शविज्ञानं धारि तत्तत्र संश्रितम्। तत्परस्यौजसः स्थानं तत्र चैतन्यसङ्ग्रहः॥ च. सू. ३०।७" इत्यत्र परस्यौजस इति कथनेन ओजसो द्वैविध्यमस्ति, परं साधारणञ्च तत्र परमोजो हृदयस्थायि, साधारणन्तु समस्तशरीरव्यापि स्नेहरूपमिति तथात्वेप्रमाणाऽभावात्। न चेदं वाक्यमेव प्रमाणं प्रत्यक्षवस्तुनि वाक्यमात्रस्याऽकार्यकरणात्। नच हृदयस्थितलिङ्गशरीरस्थमोजो वयं परौजःशब्देन ग्रहीष्याम इति वाच्यं "पूर्वोत्पन्नमसक्तं नियतं महदादिसूक्ष्मपर्यन्तम्। संसरति निरुपभोगं भावैरधिवासितं लिङ्गम्॥ सां. का. ४०" इत्यत्र निरुपभोगत्वेन वर्णनात्तत्रत्यगुणानां वर्णनस्य चिकित्सायामनुपयोगात्। "शरीरेन्द्रियसत्त्वात्मसंयोगो धारि जीवितम्। नित्यगश्चाऽनुबन्धश्च पर्यायैरायुरुच्यते॥ तस्याऽऽयुषः पुण्यतमो वेदो वेदविदां मतः। वक्ष्यते यन्मनुष्याणां लोकयोरुभयोर्हितः॥ च. सू. १।४२-४३" अस्मिंस्तु शास्त्रे पञ्चमहाभूतशरीरिसमवायः पुरुष इत्युच्यते। तस्मिन् क्रिया, सोऽधिष्ठानम्। सु. सू. १।२१" इत्यादौ सर्वत्र स्थूलशरीरे एव चिकित्साशास्त्रस्याऽधिकारकथनात्। स्नेहरूपस्य रक्तरूपस्य वा लिङ्गशरीरे कस्यचिदपि कथनस्याऽयोग्यत्वात्। ननु तर्हि परस्यौजस इति वाक्यस्य का गतिरिति चेत्? हृदि तिष्ठति यच्छुद्धं रक्तमित्यस्य पद्यस्य या गतिः साऽस्याऽपि विशेषणस्याऽस्त्विति वदामः। मूलतश्छिन्ने तरौ नहि वियति तदाश्रिताश्शाखा दृश्यन्ते तद्वत्। मरणासन्नपुरुषाणां शरीरात्स्नेहाऽपगमो भवति तेन रूक्षताऽधिक्यात्त्वचोभागाः विशीर्य गोमयचूर्णाभत्वं भजन्ते तेन साकं मांसादिभ्यो निःसृत्य स्नेहो भ्रश्यते। अस्यैव प्रपञ्चो गोमयचूर्णीयाऽध्याये वर्णितो यथा–"यस्य गोमयचूर्णाभं चूर्णं मूर्धनि जायते। सस्नेहं भ्रश्यते चैव मासान्तं तस्य जीवितम्॥ च. इ. १२।१" ननु मूर्धन्येव कथं गोमयचूर्णोत्पत्तिः प्रदर्शिता नाऽन्येष्वङ्गेष्विति चेत्? सत्यम्, मूर्ध्न उत्तमाङ्गत्वात्समस्तेन्द्रियाणां प्रकाशस्थानत्वाद्यदा तदीयस्नेहो विभ्रश्यते तदा महदरिष्टम्। अन्यशरीरभागेषु तु सिध्मादिप्रयुक्तमपि गोमयाभचूर्णादिरूपत्तौ जातायामपि न तादृशाऽरिष्टशङ्का इत्यभिप्रायेणैव मूर्धस्थगोमयाभचूर्णोत्पत्तौ मासान्तं जीवितं निर्दिष्टम्। शिरसः स्नेहे क्षीणे न कोऽपि जीवितुं प्रभवेदिति रहस्यम्। आयुर्वेदे जलपृथिव्योः शरीरस्थपरिणामानां श्लेष्मा इति सङ्केतः कृतोऽस्ति, स्नेहश्च श्लेष्मण्येवाऽऽस्ते, अत एव श्लेष्मशब्देनाऽपि यत्र तत्र ओजसो निर्देशः कृतोऽस्ति यथा—"प्राकृतस्तु बलं श्लेष्मा विकृतो मल उच्यते। स चैवौजः स्मृतः काये स च पाप्मोपदिश्यते॥ च. सू. १७।११६" न च वाच्यं शरीरस्थसमस्तजलपृथिवीपरिणामानामोजस्त्वं स्यादिति तत्तद्विशेषनामभिस्तेषां तेषान्तत्रतत्राऽवरोधः कृतोऽस्ति, अतो नौजस्त्वेन सर्वे निर्देष्टुं शक्याः। किञ्च ओजसोऽर्धाञ्जलिप्रमाणमुद्दिष्टं यथा—"मस्तिष्कस्याऽर्धाञ्जलिः शुक्रस्य तावदेव प्रमाणं श्लेष्मणश्चौजसः। च. शा. ७।१७" इत्यत्र अर्धाञ्जलिप्रमाणः समस्तशरीरव्यापकः स्नेह एव सम्भवति नाऽन्यः परिणाम इति निर्विवादम्। "ओजोवहाः शरीरेऽस्मिन् विधम्यन्ते समन्ततः। च. सू. ३०।८" इत्यत्र यद्यपि ओजःशब्देन तात्स्थ्यात्ताच्छब्द्यमितिन्यायमङ्गीकृत्य स्नेहस्थानस्य रक्तस्य ग्रहणमस्ति। तथात्वेचाऽर्धाञ्जलिरूपप्रमाणं न केनाऽपि प्रकारेण वक्तुं युज्यते, तथाप्यत्रौजः शब्दस्य लक्षणयाऽन्यत्रगमनादोषाऽभावः। एतदस्वीकारे स्ववाक्यान्येव परस्परं विरुद्ध्येरन्। एवं "ओजोऽशनानां रजनीचराणामाहारहेतो र्न शरीरमिष्टम्। गर्भं हरेयु र्यदि तेन मातु र्लब्धाऽवकाशा न हरेयुरोजः॥ च. शा. २।१०" "अष्टमे मासि गर्भश्च

गर्भतश्च माता रसवाहिनीभिः संवाहिनीभि र्मुहुर्मुहुरोजः परस्परत आददाने गर्भस्यासम्पूर्णत्वात् । च. शा. ४।२४ " इति स्थानद्वयेऽप्युक्तन्यायेन रक्तमेव लक्षणया ओजस्त्वेनाऽभिप्रेतम् । अथवा पूर्वोक्तस्नेह एव भावः । तदुक्तात्क्षीरपृथक्करणशक्ति हंसेष्विव रजनीचरेषु ओजःपृथक्करणशक्तिः स्वीकर्तव्या, अत एव " अष्टमेऽस्थिरी-भवत्योजस्तत्र जातश्चेन्न जीवेन्निरोजस्त्वान्नैर्ऋतभागत्वाच्च । सु. शा. ३।३० " इति सुश्रुतवाक्यमपि सङ्गच्छेतेति हृदि निधाय अष्टमे मासि जातेषु बालकेषु यदिदमोजस्तस्य नैर्ऋतभागत्वमर्थान् नैर्ऋताख्यं तदीयशरीराद्धरन्ति अतो बालको निरोजा एवाऽवतिष्ठतेऽतो न जीवेत्, जीवनस्यौजोऽधीनत्वात् । न चाऽष्टमगासे एव ओजो नैर्ऋतभागो भवति इत्यत्र किं प्रमाणमिति वाच्यं ? कुमारतन्त्रे स्वेच्छेण नैर्ऋतेभ्यो बलो दत्त इति प्रतिपादितम् । स चाद्यमानेन नास्तिकैरपि स्वीकर्तव्यः । कथमन्यथा सप्तममासजातानां जीवनं सहस्रशो सङ्ख्या दृश्यते, अष्टममासजातानां तु न कुत्रापि जीवता वार्तापि श्रूयतेऽतस्तदुपाख्यानमगत्याऽपि स्वीकर्तव्यमेव । " ओजश्च मे सहश्च मे आत्मा च मे तनूश्च मे । यजु. १८।३ " ओजो बलहेतुरष्टमो धातुरिति महीधरः । " होता यक्षदोजो न वीर्यं सहो द्वार इन्द्रमवर्धयन् ॥ यजु. २८।५ " ओज इन्द्रियजबलमिति महीधरः । " ओजोऽस्योजो मे दाः स्वाहा । अ. २।१७।१ " ओजः शरीरस्थितिकारणमष्टमो धातुस्तदुक्तमाचार्यैः—ओजो नामाष्टमी दशा । क्षेत्रज्ञस्य तदोजस्तु केवलाश्रय इष्यते । यथा स्नेहः प्रदीपस्य यथाऽभ्रमशनिस्त्विषः ॥ इति सायणः । " समहमेषां राष्ट्रं स्यामि समोजो वीर्यं बलम् । वृश्चामि शत्रूणां बाहूननेन हविषाहम् ॥ अ. ३।१९।२ " येन बलेन क्षेत्रज्ञस्य शरीरेऽवस्थिति र्भवति तदोजः शब्दवाच्यम् । तदुक्तमाचार्यैः 'क्षेत्रज्ञस्य तदोजस्तु केवलाश्रय इष्यते' इति सायणः । " अपि वृश्च पुराणवद् व्रततेरिव गुष्पितम् । ओजो दासस्य दम्भय ॥ अ. ७।९५।१ " ओजो बलं प्रजननसमर्थं वीर्यमिति सायणः । इन्द्रस्यौजो वरुणस्य बाहू अश्विनो रंसौ मरुतामियं ककुत् । बृहस्पतिं संभृतमेतमाहुर्ये धीरासः कवयो ये मनीषिणः ॥ अ. ९।४।८ " अत्रापि ओजः स्थिता शक्तिरोजस्त्वेनाऽभिहिता । " स्वेदं दुष्कृतं वृजिनं सत्यं यज्ञो यशो बृहत् । बलं च क्षत्रमोजश्च शरीरमनुप्राविशन् ॥ अ. ११।१०।२० " ओजः शरीरगतो बलहेतुरष्टमो धातुरिति सायणः । ओजश्च तेजश्च सहश्च बलञ्च वाक् चेन्द्रियञ्च श्रीश्च धर्मश्च । अ. १२।६।१ " अत्र मन्त्रे ओजस्तेजो बलञ्चेति त्रयः शब्दा एकस्मिन्नेव मन्त्रे समागताः सन्ति तत्र ओज इति शरीरव्यापकस्नेहः यमाश्रित्य सर्वेऽपि शरीरशक्तयः प्रभवन्ति, ता एव शक्तयो बलमिति नाम्ना निर्दिश्यन्ते । शरीरगतो योऽयं प्रकाशः स तेजश्शब्देनोच्यते । सह इति च दुःखादिसहनशक्तिः साऽपि ओजोजन्यैव भवति । अतएवाऽस्मिन्मन्त्रे क्रमिको निर्देशः, ओज इति कारणं, तेजः सहः बलञ्चेति तदीयगुणाः । एतत्समग्रसामग्रीसत्त्वे इन्द्रियं=इन्द्रियसङ्घः स्वकार्यकरणसमर्थो भवति, तत्सत्त्वे श्रीश्च धर्मश्चेति तदीयफलत्वेन निर्दिष्टौ । एवं यत्र-यत्र ओज इति पदं वेदे दृश्यते तत्र सर्वत्रैव कुत्रचित् स्वस्वरूपे कुत्रचित् तात्स्थ्यात्ताच्छब्द्यमिति लक्षणया तेजसि बले च समागतो दृश्यते । कुत्रचित्तु स्वतन्त्रतयैव आधाराधेयाः प्रतिपाद्यन्ते यथा प्रकृतमन्त्रे ओज इति आधारः, तेज इति तदीयो गुणः, सहश्च बलश्च इति शक्तिद्वयम् । सूक्ष्मविचारेसहस्याऽपि बले एवाऽन्तर्भावो भवति । यद्यपि ओजोजन्या एव यावन्त्यः शारीर्यः शक्तयः सन्ति तथापि प्रकरणवशाद्यत्र तत्र या याः शक्तय आगच्छन्ति तास्तस्मिंस्तस्मिन्नर्थे नियता भवन्ति ता आलोक्य सूक्ष्मविचारमकृत्वा व्यामुह्यन्ते भाष्यकृतटीकाकाराश्च ते । कुत्रचित् शरीरशक्तिः कुत्रचिद्वीर्यं कुत्रचिदिन्द्रियशक्तिः कुत्रचिद्धारणाशक्तिः कुत्रचिदभिभवनशक्तिः कुत्रचित्प्रभावः कुत्रचित्पराक्रम इत्यादिशब्दैः स्थलेस्थले यथासङ्गति व्याख्यान्ति । नानास्थले नानार्थांश्च दृष्ट्वा महति भ्रमगर्ते साधारणा जना निविशन्ते । मुहुर्मुहुराकलयमाना अपि विषययाथातथ्यं नाऽवबुध्यन्ते । टीकाकर्तृवाक्यानि च ओजसोदुरवबोधत्वात्तल्लक्षणं निर्दिशत्याचार्य इत्यादि वाक्छलेन भ्रमगह्वरमुखे महतीं शिलां स्थापयन्ति, तदाऽऽ-

कलय्य नितरां खिद्यते चेतः । अतो याथातथ्यं बुद्ध्वा भ्रमोऽपोहनीय इति सहृदयेषु प्रार्थना । साहित्यादौ तु लाक्षणिक ओजः शब्दः प्रयुक्तस्तेनौजस्विनी वाणीत्यादौ तत्क्षणहृदयाऽवगाहिनीत्यादिरर्थः कल्पनीयः । पाश्चात्यपदार्थतत्त्वविद्भिरस्थ्यादिभ्यो यत्फास्फोरस (Phosphorus) नामाख्यं द्रव्यं पृथक्क्रियते तदप्योजःप्रधानमेव । तत्र पदार्थद्वयम् तेजः, तेजोऽधिकरणश्च । तयोराद्यो गुणो द्वितीयस्तदाधारः, अयञ्च जीवनाऽऽधारत्वाज्जीवनस्नेह इत्युच्यते । तेजसो मुख्याऽधिकरणत्वेन तैजसमिति, गुणगुणिनोरभेदधिया प्रयोगे तेज इत्यपि कथितुं युज्यते । जङ्गमशरीरधातुत्वेन व्यवहारात्तदतिरिक्तस्थले ओज इति नाम्ना व्यवहारो नोचितः पित्तकफादिवत् । तत्र हि शारीरीयपरिणामबुद्ध्या यदा प्रयोक्तुमिच्छा भवति तदाऽऽग्नेयपदार्थपरिणामे पित्तमिति, जलपृथिवीपरिणामे कफ इति शब्दः प्रयुज्यते । यदा तु जङ्गमशरीराऽतिरिक्तस्थलीयव्यवहारोऽभिप्रेतस्तदाऽऽग्नेय इति जलीय इति पार्थिव इति च शब्दाः प्रयुज्यन्ते । तथाऽत्राऽपि शारीरधातुत्वकथनबुद्ध्या ओज इति निस्संशयं प्रयुज्यते । यदा तु तदतिरिक्तस्थलाऽभिप्रायस्तदा जीवनस्नेहः १ तैजसमिति २ तेज ३ इति वा शब्दाः प्रयुज्यन्ते । पाश्चात्यपद्धतौ तु जङ्गमाऽजङ्गमभेदराहित्येन फासफोरस (Phosphorus) इति साधारणः शब्दः स्वीकृतः । अस्मिन्नर्थे स्फुरमितिप्रस्फुरमिति वा शब्दौ येन केनाऽपि प्रयुक्तौ तत्तु न सम्यक्, निरुक्ताऽर्थाऽनवगमात् । ओज ऊर्जयतेर्वोब्जते र्वा । नि० ६।८।१॥ अस्याऽभिप्रायः पूर्वमदर्शि । अस्मिन्नर्थे स्फुरधातोरर्थसाधकत्वाऽभावात् । न च वाच्यं स्फूर्तिरपि ओजसस्सत्त्वे एव सम्भवति इति, तस्या जीवलिङ्गत्वात् । प्रकृतौजसस्तु मृतशरीराऽस्थिष्वपि विद्यमानत्वात् । मृतशरीरे न हि काचिदपि स्फूर्तिर्दृश्यते, " शरीरं हि गते तस्मिञ्छून्याऽऽगारमचेतनम् । पञ्चभूताऽवशेषत्वात्पञ्चत्वं गतमुच्यते ॥ च. शा. १।७४ " इतिसिद्धान्तादित्यलमतिविस्तरेण ।

(सं. १२१) लोहितम्=पाप्मा=तमः " चक्षुः श्रोत्रं यशो अस्मासु धेह्यन्नं रेतो लोहितमुदरम् ॥ अ. ११।७।२५" अत्र ब्रह्मचर्यप्रकरणात् " ब्रह्मचर्येण कन्या युवानं विन्दते पतिम् ॥ अ.११।७।१८" इति मन्त्रे कन्याया अपि ब्रह्मचर्यकथनात् तत्फलरूपेण एतत्प्रार्थनम् । अस्मासु ब्रह्मचारिषु चक्षुः अव्यापन्नं चक्षुरिन्द्रियं तथा श्रोत्रं श्रवणेन्द्रियं यशः जगद्व्यापि यशः=तथा अन्नं=अदनसाधनं भोज्यभक्ष्यलेह्यचोष्यादिरूपं तथा रेतः=अविकृतं वीर्यं तथा लोहितं अविकृतं (प्रजाजननसमर्थं) रजः तथा उदरं उदरवर्ति हृदयादिसमस्तयन्त्रं धेहि स्थापय देहीत्यर्थः । अत्र रेतः सान्निध्याल्लोहितशब्देन रजस एव ग्रहणमुचितं न पुना रक्तस्य । सायणेन तु मौनमेवाऽवलम्बितम् । परन्तु " अमूर्या यन्ति योषितो हिराः लोहितवाससः । अ. १।१७।१" इत्यत्र लोहितवासःशब्देन रजोवाहिन्य उक्ताः । अतोऽनुमीयते लोहितमिति शब्दो रजसि रूढोऽस्ति अत एव " परमसूक्ष्माश्चेतनावन्तः शाश्वता लोहितरेतसः सन्निपातेष्वभिव्यज्यन्ते ॥ सु. शा. १।१६" इत्यादिस्थले लोहितशब्दो व्यवहृतः ।

" योनि वै गार्हपत्या चितिरुल्वमूपाः सर्वा तद्योनिमुल्वेन प्रच्छादयति । शत० ब्रा० ७।१।१।८ " इत्यारभ्य " यद्वेवैता नैर्ऋती हरन्ति । प्रजापतिं विस्रस्तं यत्र देवाः समस्कुर्वंस्तमुखायां योनौ रेतोभूतमसिञ्चन् योनि र्वा उखा, तस्मा एतां संवत्सरे प्रतिष्ठां समस्कुर्वन्निममेव लोकमयं वै लोको गार्हपत्यस्तस्मिन्नेनं प्राजनयंस्तस्य यः पाप्मा यः श्लेष्मा यदुल्वं यज्जरायु तदस्यैताभिरपाघ्नंस्तथदस्यैताभिः पाप्मानं निर्ऋतिमपाघ्नंस्तस्मादेता नैर्ऋत्यः ॥ शत० ब्रा० ७।२।१।५ " इत्येतत्पर्यन्तं योन्यग्निचित्योः परस्परं सादृश्यं निरूपितम् । " अयं ते योनिर्ऋत्वियो यतो जातो अरोचथा " इत्ययं मन्त्रो मध्ये प्रमाणत्वेन चोपन्यस्तः । अग्निचितिप्रकरणे " अथाष्टिका उपदधाति अष्टाक्षरा गायत्री गायत्रोऽग्नि र्यावानग्नि र्यावत्यस्य मात्रा तावन्तमेवैनमेतच्चि-

नोति । शत० ब्रा. ७।१।१।२२ " इतीष्टकाश्चेतव्यत्वेनोपदिष्टाः । " यद्वैवैता नैर्ऋती र्हरन्ति० ७।२।१।५" इत्यनेन योनौ पाप्मादयः (पाप्मश्लेष्मोत्थजरायवः) चेतव्यत्वेनोपदिष्टाः । तृतीयब्राह्मणसमाप्तिपर्यन्तमसकृदेतयो (योन्यग्निचित्योः) रेव सादृश्यं प्रतिपादितम् । अत्र रजसः, पाप्मा, नैर्ऋत्यः, तमः, ऋत्वियः, इति नामानि स्थापितानि । अस्मिन्नर्थे " ते तामूचुस्ततो देवास्तुष्टाः प्रीतिसमन्विताः । चतुर्धा विभजात्मानमात्मनैव दुरासदे ॥ देवानां भाषितं श्रुत्वा ब्रह्महत्या महात्मनाम् । सन्दधौ स्थानमन्यत्र वरयामास दुर्वसा ॥ एकेनांशेन वत्स्यामि पूर्णोदासु नदीषु वै । चतुरो वार्षिकान् मासान् दर्पघ्नी कामचारिणी ॥ भूम्यामहं सर्वकालमेकेनांशेन सर्वदा । वसिष्यामि न सन्देहः सत्येनैतद्ब्रवीमि वः ॥ योऽयमंशस्तृतीयो मे स्त्रीषु यौवनशालिषु । त्रिरात्रं दर्पपूर्णासु वसिष्ये दर्पघातिनी ॥ हन्तारो ब्राह्मणान्ये तु मृषापूर्वमदूषकान् । तांश्चतुर्थेन भागेन संश्रयिष्ये सुरर्षभाः ॥ प्रत्यूचुस्तां ततो देवा यथा वदसि दुर्वसे । तथा भवतु तत्सर्वं साधयस्व यदीप्सितम् ॥ ततः प्रीत्यान्विता देवाः सहस्राक्षं ववन्दिरे । विज्वरः पूतपाप्मा च वासवः समपद्यत ॥ वा. रा. उ. ८६।११–१८ " इत्यत्र शक्रस्य सञ्ज्ञानाशकरत्वेनोक्तत्वात् ' तम ' इत्यपि नामाऽन्वर्थमेव । ऋतुरितिसमयवाचकः, स्त्रीणां नियतसमये जायमानत्वादृतुः ऋत्वियः एते अपि नाम्नी अन्वर्थे एव । एतान्येव नामानि एतमेवाऽभिप्रायमभिप्रेत्य चिकित्साशास्त्रेऽभिहितानि दृश्यन्ते । सम्प्रत्युपलभ्यमानवेदभाष्येषु तु सायणमहीधरप्रभृतिभिः साम्प्रदायिकैरन्यथैव वेदमन्त्रा व्याख्याताः, अतस्तद्भाष्येषु न कश्चित्सार उदेतीति सुधीभिर्विभावनीयम् ॥

(सं. १३२) ग्रैव्याः—" सप्त च याः सप्ततिश्च संयन्ति ग्रैव्या अभि । इतस्ता सर्वा नश्यन्तु वाका अपचितामिव ॥ अ. ६।२५।२ सप्ताऽधिकसप्ततिसङ्ख्याका या गण्डमाला ग्रैव्याः ग्रीवासु भवा नाडीः अभिसंयन्ति अभितो व्याप्नुवन्ति " इत्यत्र सप्तसप्ततिप्रमिता धमनीनां सङ्ख्या उक्ता सा सूक्ष्माऽभिप्रायेणेति बोध्यम् ॥

(सं. १३३) स्कन्ध्याः—" नव च या नवतिश्च संयन्ति स्कन्ध्या अभि । इतस्ताः सर्वा नश्यन्तु वाका अपचितामिव ॥ अथर्व. ६।२५।३ नवोत्तरनवतिसङ्ख्याका या गण्डमालाः स्कन्ध्याः । ग्रीवाम्योऽधःप्रदेशः स्कन्धः । तत्र भवा धमनीः अभिसंयन्ति अभितो व्याप्नुवन्ति ।" इत्यत्र नवनवतिप्रमिता धमनीनां सङ्ख्या उक्ता सा सूक्ष्माऽभिप्रायेणेति बोध्यम् ॥

अथ निधिविचरणम् (सं. १३५)

वेदे शारीरविभागे यथा देवशब्दोऽस्थिपरस्तथा निधिशब्दो ज्ञानतन्तुपरः, समस्तशरीररक्षणे सञ्चालने विनाशे च ज्ञानतन्तूनां प्राधान्यान्निधित्वेन व्यवहारः, यथा—" यस्य त्रयस्त्रिंशद्देवा निधिं रक्षन्ति सर्वदा । निधिं तमद्य को वेद यं देवा अभिरक्षथ ॥ अ. १०।७।२३ " यस्य=स्कम्भस्य तज्जातस्य वा मनुष्यादेः । त्रयस्त्रिंशत्=एतत्सङ्ख्याकाः देवाः=प्राजापत्यादयः अथवा तदधिष्ठितत्रयस्त्रिंशदनूकाऽस्थीनि निधिं=ज्ञानतन्तुलक्षणं सुषुम्णातन्तुजालमिति यावत् सदा=सर्वदा रक्षन्ति, सुषुम्णाया अनूकाऽस्थिगह्वरे निहितत्वात्, बाह्याघातादिभिः सर्वदा रक्षन्ति । तमनिर्वचनीयं सर्वस्मादपि शरीरात् श्रेष्ठतममित्यर्थः । कः=सर्वतोऽभ्यधिकज्ञानवान् योगीत्यर्थः । वेद=जानाति । यद्यपि स्थूलदृष्ट्या चिकित्सकानामपि तज्ज्ञानमस्त्येव परन्तु योगशास्त्रप्रतिपादितवैभवस्य पूर्णयोगिभिरेव वेद्यत्वात् इत्थं परोक्षः प्रश्नः कृतोऽस्ति । नन्वेतादृग्विलक्षणोऽर्थः कस्मान्निर्धारित इति चेच्छृणु । अस्य सूक्तस्य समस्तस्याऽपि शारीरवर्णनपरत्वात् निधिशब्देनाऽन्यवस्तुनोऽभावात् ज्ञानतन्तूनामेव प्रकरणानुरोधेन ग्रहणस्यौचित्यात् तेषामेव ग्रहणं न्याय्यमिति तत्त्वम् । ननु त्रयस्त्रिंशद्देवानां कस्मिन्नङ्गे क्रमेण निवासोऽस्तीत्यपेक्षायामस्मिन्नेव सूक्ते सप्तविंशतितमे मन्त्रे " यस्य त्रयस्त्रिंशद्देवा अङ्गे गात्रा वि भेजिरे । तान्वै त्रयस्त्रिंशद्देवानेके

ब्रह्मविदो विदुः ॥ अथर्व० १०।७।२७" यस्य=स्कम्भस्य अङ्गे शरीरैकदेशे त्रयस्त्रिंशद्देवा गात्रा=गात्राणि शरीराऽवयवानित्यर्थः, वि=विशेषेण भेजिरे अधिष्ठिताः सन्ति । तान् त्रयस्त्रिंशद्देवान् एके=असाधारणा ब्रह्मविदः ज्ञानिनो विदु र्जानन्ति । अनेन मन्त्रेण त्रयस्त्रिंशदस्थियुक्तैकाङ्गस्य निर्देशात् अनूकातिरिक्ताङ्गे एतत्सङ्ख्याकाऽस्नामेकत्राऽभावात् । पारिशेष्यात् अनूकमेवोपतिष्ठते । "अनूकं त्रयस्त्रिंशत्" (१२।२।४।१४) इति शतपथेन स्पष्टतयोक्तत्वात् । अत्र च तेषामस्नां देवत्वेन कथनात्तत्र निहितस्य वस्तुनो निधित्वेन कथनात् सुषुम्णाप्रताना एव तद्वाच्यत्वेनोपतिष्ठन्ते । इदञ्च वेदेषु स्थितं रहस्यमजानाना वेदवाक्यानि अन्यथैव नियोजयन्ति । यथा—"गोभिष्ट्वा पात्वृषभो वृषा त्वा पातु वाजिभिः । वायुष्ट्वा ब्रह्मणा पात्विन्द्रस्त्वापात्विन्द्रियैः ॥ अथर्व० १९।२७।१" इत्यारभ्य "दिवो मादित्या रक्षन्तु भूम्या रक्षन्त्वग्नयः । इन्द्राग्नी रक्षतां मा पुरस्तादश्विनावभितः शर्म यच्छताम् । तिरश्चीनघ्न्या रक्षतु जातवेदा भूतकृतो मे सर्वतः सन्तु वर्म ॥ १९।२७-१५" इत्यन्तम् शरीराऽधिष्ठातृसन्निभूतित्रयस्त्रिंशद्देवा एव वर्णिता आत्मरक्षार्थञ्च प्रार्थिताः परन्तु साम्प्रदायिकैः प्राजापत्याख्यायां महाशान्तौ सुवर्णरजतलोहमयमणिबन्धने विनियुक्तम् । सूक्ष्मदृष्ट्या तु अनूकव्याख्याने समागतत्रयस्त्रिंशद्देवानां भेदा एवाऽत्र वर्णिताः सन्ति । तथाच—"देवानां निहितं निधिं यमिन्द्रोन्वविन्दत् पथिभिर्देवयानैः । आपो हिरण्यं जुगुपुस्त्रिवृद्भिस्तास्त्वा रक्षन्तु त्रिवृता त्रिवृद्भिः ॥ अथर्व० १९।२७।९" देवानां=त्रयस्त्रिंशत्प्रजापत्यादिदेवानां अथ च तदधिष्ठितत्रयस्त्रिंशदनूकास्नां मध्ये निहितं=सङ्गोप्य स्थापितं निधिं=सुषुम्णाप्रतानसमुदायं देवयानैः=प्रजापत्यादिवत् स्थितिविशेषैः पथिभिः=हृदयादिगमार्गैः साधनै रिन्द्रः=इन्द्रियाणामधिष्ठाता जीवात्मेत्यर्थः । अविन्दत् प्राप्नोत् । यथा सुषुम्णाप्रतानाः समस्तशरीरव्यापिनः सन्ति तदपेक्षया जीवात्माऽधिकतमव्यापकः सन्नास्ते । जीवापगमे सुषुम्णाप्रताना निरुपयोगिनो भवन्ति अतो जीवात्मन इन्द्रत्वं भवति । कीदृशं निधिं ? हिरण्यं=हितं रमणीयं "हिरण्यं कस्मात् ह्रियते आयम्यमानमिति वा । हितरमणं भवतीति वा । हृदयरमणं भवतीति वा । हर्यते र्वा स्यात्प्रेप्साकर्मणः (२।१०)" इति यास्कवचनात्सुषुम्णाप्रतानलक्षणो निधिः सर्वस्य कृते हितो रमणीयश्च भवति, तं निधिं त्रिवृताः=त्रिविधाः=दिव्यान्तरिक्षभौमभेदेन त्रिविधाः, अथवा शुक्रशोणितरूपतया शरीरसमवायिकारणत्वेनाऽऽगता द्विविधा आपः, जन्मोत्तरं स्वभुक्तपीतादिजनिताश्च रसरूपा एका मिलित्वा त्रिविधाः, अथवा सत्त्वरजस्तमोमयत्वेन त्रिविधाः, अथवा रसायनीशिराधमनीषु स्थितिमत्त्वेन त्रित्वं गताः आपः=धातूनां जलीयभागाः शरीरधातुषु जलीयांशस्याऽधिकत्वादब्रूपेण कथनाद्रसादयः सर्वेऽपि धातवः यं=निधिं जुगुपुः गोपायन्ति, तास्त्रिवृद्भिः सत्त्वरजस्तमोलक्षणैः स्वस्वरूपैः त्वा=त्वामनुसन्धातारमित्यर्थः । रक्षन्तु=गोपायन्तु अयञ्च विषयः "शतं चैका च हृदयस्य नाड्यस्तासां मूर्धानमभि निःसृतैका । तयोर्ध्वमायन्नमृतत्वमेति विष्वङ्ङन्या उत्क्रमणे भवन्ति ॥ १६ ॥ अङ्गुष्ठमात्रः पुरुषोऽन्तरात्मा सदा जनानां हृदये सन्निविष्टः । तं स्वाच्छरीरात्प्रवृहेन्मुञ्जादिवेषीकां धैर्येण । तं विद्याच्छुक्रममृतं तं विद्याच्छुक्रममृतमिति ॥(६।१७)"इति सन्दर्भेण कठवल्ल्यामप्युपागतः, अतोऽस्य शारीरपरत्वे नाऽस्ति सन्देहः । परन्तु सायणेनान्यथैव व्याख्यातस्तथाहि—यं=प्रसिद्धं निहितम् निक्षेपरूपेण सङ्गोप्य स्थापितं हिरण्याख्यं (देवानां) निधिं इन्द्रो देवः देवयानैः देवमार्गै र्देवा यै र्मार्गै र्गत्वा निधिं निहितवन्तस्तैः पथिभि र्मार्गैः स्वयमपि गत्वा अन्वविन्दत् अन्विष्य लब्धवान् । यद् देवनिधिरूपं हिरण्यं त्रिवृतः उक्तप्रकारेण त्रिविधा आपः त्रिवृद्भिः साधनै र्जुगुपुः अरक्षन् तास्त्रिवृत आपस्त्रिवृद्भिः हिरण्यरजतलोहरूपेण त्रिविधैः स्वरूपैस्त्वा त्वां रक्षन्तु पालयन्तु ॥ इति ॥ तथाच—"श्रातं हविरो ष्विन्द्र प्र याहि जगाम सूरो अध्वनो वि मध्यम् । परि त्वाऽऽसते निधिभिः सखायः कुलपा न व्राजपतिं चरन्तम् ॥ अथर्व० ७।७५।२" हे इन्द्र=इन्द्रियाधिष्ठातरात्मन् भवतो हविः उपभोग्यं वस्तु श्रातं परिपक्वं सुनिष्ठि-

तमित्यर्थः। अनवधिकसुखसाधनं सहस्रदलकमलाख्यं प्रयाहि प्रकर्षेण यमनियमादिसाधनैः याहि प्राप्नुहि भवतो गन्तव्यस्याऽध्वनो विमध्यं=ईषदूनमध्यभागं प्रजापतिमारभ्य षोडशस्थानमित्यर्थः। योगिनो सुषुम्णाख्य-मार्गात्सहस्रदलकमलं गच्छन्ति तत्र गन्तव्योऽध्वा अनुपलक्षणः तस्य विभागास्त्रयस्त्रिंशत् तत्र क्रमेण प्रजापतिः १ इन्द्रः २ अग्निः ३ पृथिवी ४ वायुः ५ अन्तरिक्षं ६ आदित्यः ७ द्यौः ८ चन्द्रः ९ नक्षत्राणि १० धाता ११ मित्रः १२ अर्यमा १३ रुद्रः १४ वरुणः १५ सूर्यः १६ भगः १७ विवस्वान् १८ पूषा १९ सविता २० त्वष्टा २१ विष्णुः २२ मन्युः २३ मनुः २४ मर्हीनाः २५ महान् २६ शिवः २७ ऋतुध्वजः २८ रुमेश्वा २९ भवः ३० कालः ३१ वामदेवः ३२ धृतव्रतः ३३ इति सञ्ज्ञा देवताः क्रमेण मूलाधारादिविभागाना-मधिष्ठातारः सन्ति यथाऽनूकविवरणे प्रतिपादितम्। तत्र षोडशतमे विभागे सूर्यः समागतः स चाऽध्वनो मध्यभागसमीपं जगाम=सन्निहितोऽस्ति। किञ्च कुलपाः गृहरक्षकाधरन्तं गच्छन्तं व्राजपतिं समस्तसङ्घपति-मिव। नकारोऽत्रोपमार्थो, भवतस्सखायः सहोत्पन्नाः प्रजापत्यादयो देवाः निधिभिः सुषुम्णाप्रतानैः सह त्वा= त्वां परि=परितः आसते उपासत इत्यर्थः। अयमपि मन्त्रो समाध्यतिकर्तव्यतावर्णनपरः सन्नपि वैतायने (वै० ३–४) सोमयागे प्रवर्ग्ये घर्मधुग्दोहार्थे विनियुक्तः। क्वचित्तु निधिस्थाने तन्तुशब्दो व्यवहृतः यथा— "यो यज्ञस्य प्रसाधनस्तन्तुर्देवेष्वाततः। तमाहुतमशीमहि॥ अ. १३।१।६०" इज्यते अनेन यज्ञः शरीरं तस्य प्रकृष्टं साधनं देवेषु प्रजापत्यादिदेवाऽधिष्ठिताऽनूकास्थिषु, आततः प्रसारितो योऽयं तन्तुः सुषुम्णाप्रतान-समुदायोऽस्ति तं=अनिर्वचनीयं आहुतं=सर्वतो निक्षिप्तं अशीमहि निरन्तरं प्राप्नुयामः। अन्यच्च—" ऋचः प्राञ्चस्तान्तवो यजूंषि तिर्यञ्चः। अ. १५।३।६" अस्मिन् शरीरे प्राञ्चः ऊर्ध्वाऽधःक्रमेण निहितास्तन्तवः= सुषुम्णाप्रतानाः ऋचः=ऋक्स्थानीयाः सन्ति, ये च तिर्यञ्चः=तिर्यग्भागेन विन्यस्ताः सन्ति ते यजूंषि यजुः रूपाः सन्ति। इत्यादिषु मन्त्रेषु निधिशब्देन क्वचित्तन्तुशब्देन ज्ञानतन्त्री वर्णिताः सन्ति। "को अस्मिन् रेतो न्यदधात् तन्तुरा तायतामिति। मेधां को अस्मिन्नध्यौहत् को बाणं को नृतो दधौ॥ अ. १०।२।१७" अस्य सूक्तस्य केवलशारीरपरत्वेन अन्यार्थस्यातिरेकेण न सम्भवति। अतः तन्तुनिधिशब्दौ निःसंशयं ज्ञानतन्तु-वाचकौ स्तः। सुषुम्णावैभवस्तु—" मूलाच्च द्वयङ्गुलादूर्ध्वं सुषुम्णामूलरन्ध्रगम्। वादिवेदार्णलसितं पङ्कजं कन-कप्रभम्॥ तत्र विद्युल्लताकारां तेजोराशिमणीयसीम्। कुलकुण्डलिनीमूर्ध्वं न्यसेत् षट्चक्रभेदिनीम्॥" इत्या-दिना तन्त्रशास्त्रे अस्या बहुरेव वैभवो वर्णितः। शाण्डिल्योपनिषदि तु ज्ञानतन्तूनां प्रसृताश्चतुर्दश प्रधानशाखा वर्णिताः। तासां कार्यस्थानानि कार्याणि च वर्णितानि सन्ति यथा—" मध्यस्थकुण्डलिनीमाश्रित्य मुख्या नाड्यश्चतुर्दश भवन्ति। इडा १ पिङ्गला २ सुषुम्णा ३ सरस्वती ४ वारुणी ५ पूषा ६ हस्तिजिह्वा ७ यशस्विनी ८ विश्वोदरी ९ कुहूः १० शङ्खिनी ११ पयस्विनी १२ अलम्बुषा १३ गान्धारीति १४ नाड्यश्चतुर्दश भवन्ति। तत्र सुषुम्णा विश्वधारिणी मोक्षमार्गेति चाचक्षते। गुदस्य पृष्ठभागे वीणादण्डाश्रिता मूर्धपर्यन्तं ब्रह्म-रन्ध्रे विज्ञेया व्यक्ता सूक्ष्मा वैष्णवी भवति। सुषुम्णायाः सव्यभागे इडा तिष्ठति। दक्षिणभागे पिङ्गला इडायां चन्द्रश्चरति पिङ्गलायां रविः। तमोरूपश्चन्द्रः। रजोरूपो रविः। विषभागो रविः। अमृतभागश्चन्द्रमाः। तावेव सर्वकालं धत्ते। सुषुम्णा कालभोक्त्री भवति। सुषुम्णा पृष्ठपार्श्वयोः सरस्वतीकुहू भवतः। यशस्विनीकुहूमध्ये वारुणी प्रतिष्ठिता भवति। पूषासरस्वतीमध्ये पयस्विनी भवति। गान्धारीसरस्वतीमध्ये यशस्विनी भवति। चन्द्रमध्येऽलम्बुषा भवति। सुषुम्णापूर्वभागे मेढ्रान्तं कुहू भवति। कुण्डलिन्या अधश्चोर्ध्वं वारुणी सर्वगामिनी भवति। यशस्विनी सौम्या च पादाऽङ्गुष्ठान्तमिष्यते। पिङ्गला चोर्ध्वगा याम्यनासान्तं भवति। पिङ्गलायाः पृष्ठतो याम्यनेत्रान्तं पूषा भवति। याम्यकर्णान्तं यशस्विनी भवति। जिह्वाया ऊर्ध्वान्तं सरस्वती भवति। आसव्यकर्णान्त-

मूर्ध्वगा शङ्खिनी भवति। इडापृष्ठभागात्सव्यनेत्रान्तगा गान्धारी भवति। पायुमूलादधोर्ध्वगाऽलम्बुषा भवति। एतासु चतुर्दशसु नाडीष्वन्या नाड्यः सम्भवन्ति। तास्वन्यास्तास्वन्या भवन्तीति विज्ञेयाः। यथाऽश्वत्थादिपत्रं शिराभिर्व्याप्तमेवं शरीरं नाडीभिर्व्याप्तम्। प्राणापानसमानोदानव्याना नागकूर्मकृकरदेवदत्तधनञ्जया एते दश वायवः सर्वासु नाडीषु चरन्ति। आस्यनासिकाकण्ठनाभिपादाङ्गुष्ठद्वयकुण्डल्यधश्चोर्ध्वभागेषु प्राणः सञ्चरति। श्रोत्राक्षिकटिगुल्फघ्राणगलस्फिग्देशेषु व्यानः सञ्चरति। गुदमेढ्रोरुजानूदरवृषणकटिजङ्घानाभ्यम्न्यगारेष्वपानः सञ्चरति। सर्वसन्धिस्थ उदानः। पादहस्तयोरपि सर्वगात्रेषु सर्वव्यापी समानः भुक्तान्नरसादिकं गात्रेऽग्निना सह व्यापयन्द्विसप्ततिसहस्रेषु नाडीमार्गेषु चरन् समानवायुरग्निना सह साङ्गोपाङ्गकलेवरं व्याप्नोति इति॥ शां० उ० १।४" अथच विषयः "हृदि ह्येष आत्मा। अत्रैतदेकशतं नाडीनां तासां शतं शतमेकैकस्यां द्वासप्ततिर्द्वासप्ततिः प्रतिशाखा नाडीसहस्राणि भवन्त्यासु व्यानश्चरति॥३।६॥" इत्यादिना प्रश्नोपनिषद्यपि समागतः। यद्यपि निविशब्दः प्रकृतार्थे (सञ्ज्ञावहतन्त्वर्थे) वर्तमानाऽऽयुर्वेदसंहितासु क्वचिदपि दृष्टिगोचरो न भवति तथापि समस्तविद्यानां वेदैकाधारत्वात् तत्रोद्दिष्टार्थ एव विशेषतः प्रामाण्यमावहतीति मत्वा तथैवाऽस्माभिः स्थापितः। एतद्वाचकः सर्वतः पूर्वं कः शब्द आसीदिति गवेषणाकर्तॄणां चित्तानि इतस्ततोऽहर्निशं भ्राम्यमाणान्यपि यथार्थाऽवलम्बनमनासाद्य कुशकाशाऽवलम्बनन्यायमनुसृत्य केचिद्धमनीशब्दं अन्ये स्नायुशब्दं इतरे नाडीशब्दं तदर्थाऽवबोधकं निश्चाययन्ति। धमनीशब्दे प्रमाणं सुश्रुतीयधमनीव्याकरणाध्यायमेवोपन्यस्यन्ति। परन्तु तत्र दृश्यन्ते शतशो विप्लवा यथा—"मूत्रवस्तिमभिप्रपन्ने मूत्रवहे द्वे, शुक्रप्रादुर्भावाय द्वे, द्वे च विसर्गाय, ते एव रक्तमभिवहतो नारीणामार्तवसञ्ज्ञम्। सु. शा. ९।७" अत्र मूत्रवस्तिमभिप्रपन्ने मूत्रवहे द्वे इति मूत्रवहस्रोतसी कथिते न पुनः सञ्ज्ञावहतन्तवो निर्दिष्टाः। नचाऽत्र मूत्रवहस्रोतोविबद्धज्ञानतन्त्वो रेव निर्देश इति वाच्यं? अश्मरीचिकित्सिते "मूत्रवह-शुक्रवह-मुष्कस्रोतो-मूत्रसेक-सेवनीयोनिगुदवस्तीन् परिहरेत्। तत्रमूत्रवहच्छेदान्मरणं मूत्रपूर्णवस्तेः, शुक्रवहच्छेदान्मरणं क्लैब्यं वा। मूत्रस्रोत उपघाताद् ध्वजभङ्गः। मूत्रप्रसेकक्षणनान्मूत्रप्रक्षरणम्॥ सु. चि. ७।३६" अत्र मूत्रवहशब्देन स्पष्टतया गवीन्योरेवाऽभिधानात्। न चापि तयोरेव विधानमिति हठस्य शरणं गन्तव्यं तत्र ज्ञानतन्तूनां बहुत्वाद् द्वित्वाभावात्। अतो 'मूलं नास्ति कुतः शाखा, इतिवत् परिभाषितधमनीव्याकरणमेव प्रमाणार्हतामप्राप्नुवत् कथमन्यस्थलीयशङ्कां निवारयितुं प्रभवेत्। किञ्च—"तत्र पाञ्चभौतिकस्य चतुर्विधस्य षड्रसस्य द्विविधवीर्यस्याऽष्टविधवीर्यस्य वाऽनेकगुणस्योपयुक्तस्याऽऽहारस्य सम्यक् परिणतस्य यस्तेजोभूतः सारः परमसूक्ष्मः स रस इत्युच्यते, तस्य च हृदयं स्थानं, स हृदयाच्चतुर्विंशतिधमनीरनुप्रविश्य ऊर्ध्वगा दश दश चाऽधोगामिन्यश्चतस्रश्च तिर्यग्गाः कृत्स्नं शरीरमहरहस्तर्पयति वर्धयति धारयति यापयति च अदृष्टहेतुकेन कर्मणा। सु. सू. १४।३" अत्रत्येन ग्रन्थेन धमनीविवरणं परस्परं विरुध्यते, अतो विज्ञायते यद्धमनीव्याकरणाध्याय एव कैश्चित्पण्डितम्मन्यैर्महात्मभिः प्रतिसंस्कर्तृभिः पूर्वापरमनालोच्य प्रक्षिप्तोऽस्ति, कथमन्यथा धमनीशब्दं सञ्ज्ञावहतन्तुषु नियन्त्र्य रक्तवाहिनीषु महर्षिर्नियन्त्रयेत। यथा—"असञ्जाताङ्गप्रत्यङ्गप्रविभागमानिषेकात्प्रभृति सर्वशरीराऽवयवाऽनुसारिणीनां रसवहानां (तिर्यग्गतानां) धमनीनामुपस्नेहो जीवयति। सु. शा. ३।३१" इति। तस्माद्धमनीविवरणाऽध्याय एव प्रक्षिप्तः प्रतिभाति। कदाचित् "अधृतिरदृढसौहृदः कृतघ्नः कृशपरुषो धमनीततः प्रलापी। सु. शा. ४।६५" इत्यत्र महर्षिणैव शिरास्थाने धमनीशब्दः प्रयुक्तस्तस्य का गतिरिति चेत्? सत्यम्। तत्रापि प्रतिसंस्कर्तृदोष एव कारणमिति वदामः। कथमन्यथा असम्बद्धवन्महर्षिर्भाषेत? "वि ते भिनद्मि मेहनं० अथर्व. १।११।५" इत्येकस्य मन्त्रस्य यथा महर्षिणा सुश्रुतेन भाष्यं कृतमस्ति तदुपोद्घातीय पृ० ५—द्रष्टव्यम्। सुश्रुतः स्वसंहिताया मूलं "इह —

युर्वेदमथाङ्गमुपाङ्गमथर्ववेदस्य० (सु. सू. ३।५) इति प्रतिज्ञाय कथमथर्ववेदाद्विरुद्धं स्वयं प्रतिपादयेत्। अथर्ववेदे च अशुद्धरक्तवाहिनीषु हिराशब्दः विशुद्धरक्तवाहिनीषु धमनीशब्दः प्रयुक्तस्तथाहि—" इमा यास्ते शतं हिराः सहस्रं धमनीरुत । तासां ते सर्वासामहमश्मना बिलमप्यधाम् ॥ अथर्व० ७।३६।२ " हे विद्वेषिणि स्त्रि ! ते=त्वदीया याः=इमाः शतं=शतसङ्ख्याकाः हिराः=अशुद्धरक्तहारिण्यः सिराः अथ च सहस्रं=सहस्रसङ्ख्याका धमनीः शुद्धरक्तप्रदानेन पूरण्यः पोषण्यो वा शुद्धरक्तवाहिन्यः गर्भाशयस्य अवष्टम्भिकाः स्थूलाः सूक्ष्माश्च याः शिराश्च धमन्यश्च तासां सर्वासामपि बिलं मुखं अश्मना पाषाणेन अहं अप्यधाम् अवरुणध्मि ॥ अत्र शतसहस्रशब्दौ असङ्ख्यतां द्योतयतः । शरीरे सिराणां धमनीनाञ्च व्याप्तत्वात् सङ्ख्यानियमस्य दुर्घटत्वात्। ह्रियते पोषणाऽक्षमत्वेन निरुपयोगितां जातं रक्तं याभिः प्रणालीभिः हृदयं प्रविश्य फुफ्फुसौ च प्राप्य विशुद्धीभूतं पुनरपि हृदयं प्राप्यते ता हिरा इत्युच्यन्ते । धम्यते उच्छ्वसितीक्रियते पूर्यते पोष्यते वा शरीरं याभिस्ता धमन्य इति व्युत्पत्त्या साधारणतया यत्किञ्चिद्वहमार्गाद्युपस्थितावपि धमनीशब्दस्य योगरूढत्वेन न सिरादिष्वतिव्याप्तिः । " अर्तिसृधृधम्यम्यश्यवितॄभ्योऽनिः " (उ. २।१०२) इत्यनिप्रत्यये " षिद्गौरादिभ्यश्च " (पा. ४।१।४१) इति ङीपि धमनीति सम्पद्यते । धमनीनां शरीरे रसधमनैककार्यत्वात् शुद्धरक्तवाहिन्य उच्यन्ते । अत्र शरीरतत्त्वस्य बहोः कालात् लुप्ततया सायणादिभिः सिराधमनीनाडीनां परस्परं भेदो न वर्णितः किन्तु एकार्था इव एते शब्दा व्यवहृतास्तद्भाष्ये दृश्यन्तेऽतस्तत्र न विश्वसनीयम् । इममेव भेदं वेदे प्रदर्शयितुं विशेषतोऽथर्ववेदे सिरासु हिराशब्दः, शुद्धरक्तवाहिनीषु धमनीशब्दः, स्रोतःसाधारण्ये नाडीशब्दो व्यवहृतोऽस्ति, अतोऽशुद्धरक्तवाहिन्यो हिराः १, पोषणोपयुक्तरक्तवाहिन्यो धमन्यः २, स्रोतःसाधारणवाचका नाड्यो ३ ऽवगन्तव्याः । " शतस्य धमनीनां सहस्रस्य हिराणाम् । अस्थुरिन्मध्यमा इमाः साकमन्ता अरंसत ॥ अ. १।१७।३ " शतस्य=शतसङ्ख्याकानां धमनीनां शुद्धरक्तवाहिनीनां सहस्रस्य=सहस्रसङ्ख्याकानां हिराणां अशुद्धरक्तवाहिनीनां या मध्यमा मध्यमार्गाः अथ च अन्ताः अन्तमार्गाः अन्तप्रान्ताः सूक्ष्माऽतिसूक्ष्मप्रताना इत्यर्थः । इमाः सर्वा अपि साकं=समकालं रोगवशात्पूर्वं स्रवन्त्योऽपि अस्थुः निवृत्तस्रावा भवन्तु ! अथ च अरंसत यथापूर्वं स्वकार्यं कुर्वन्त्यः समस्तशरीरे अरंसत=रमन्ताम् अप्रतिहतसञ्चारं कुर्वन्त्वित्यर्थः । अत्र सायणेन मुण्डकाद्युद्धरणं दत्त्वा ज्ञानतन्तून्निर्दिश्याऽन्ते रक्तवाहिनीनाञ्च निर्देशं कुर्वता खिचड़ी पकाई, तत्र शारीराऽज्ञानमेव मूलम् । " अमूर्या यन्ति योषितो हिरा लोहितवाससः । अभ्रातर इव जामयस्तिष्ठन्तु हतवर्चसः ॥ अ. १।१७।१ " प्रसवसमये अतिप्रवाहयुक्तरक्तस्रवन्तीनां सिराणां अथ च अत्यार्तवपीडितायाः स्त्रियाः रजोवाहिनीनां प्रणालीनामवरोधाय प्रार्थनाऽभिप्रायेणाऽयं मन्त्रोऽस्ति तथाहि—योषितः=प्रसूतस्त्रियाः प्रदरादियुक्ताया वा अमूः=पुरतो दृश्यमानाः या हिराः=अशुद्धरक्तवाहिन्यः प्रणाल्यः यन्ति=अतिरिक्तं वहमानास्तिष्ठन्ति । अथ च या लोहितवाससः=रजोवहनप्रणाल्यः लोहितं रजोलक्षणं या वासयन्ति अथवा लोहितं=रजो वसति यासु ता लोहितवाससः रजोवहप्रणाल्यः ता उभयविधाः प्रणाल्यः मन्त्रप्रभावेण हतं वर्चो वेगः यासां ताः हतवर्चसो=नष्टवेगाः सन्त्यः न विद्यन्ते भ्रातरो यासां अभ्रातरः नष्टबन्धुवर्गाः जामय इव तिष्ठन्तु, जामयो हि वर्तमानभ्रातृवर्गा गर्वयुक्ता भवन्ति तदभावे तु अनाथा इव सन्त्य आसते, तद्वन्नष्टवेगा एताः अवरुद्धा भवन्तु । अत्र मन्त्रे **हिरा** इत्यनेन अशुद्धरक्तवाहिन्यः कथिताः । **लोहितवासस** इत्यनेन रजोवहप्रणाल्य उक्तास्ताभिः स्त्रीणां प्रतिमासं वासांसि लोहितानि भवन्ति अतस्ताः लोहितवासस इत्यनेनोक्ताः। सायणेन तु हिराणामेव विशेषणं कृतं तन्न समीचीनमिति सुहृद्भिरेव विभावनीयम् । " तिष्ठावरे तिष्ठ पर उत त्वं तिष्ठ मध्यमे । कनिष्ठिका च तिष्ठति तिष्ठादिद्धमनि र्मही ॥ अ. १।१७।२ " हे अवरे साधारणे !

हे परे उत्कृष्टप्रमाणे ! हे मध्यमे मध्यप्रमाणयुक्ते ! कनिष्ठिका सूक्ष्माऽतिसूक्ष्माऽङ्कुरविशिष्टे ! हे धमनि ! त्वं तिष्ठात्=तिष्ठ शस्त्राद्यभिघातजनितरुधिरस्रावात् निवृत्ता भव । अत्र मन्त्रे शुद्धरक्तवाहिनीनां धमनीशब्देन प्रार्थना कृताऽस्ति । यदि च सिराधमनीशब्दौ एकार्थवाचकौ स्यातां तर्हि पूर्वमन्त्रेणैव गतार्थतया पुनस्तत्प्रार्थना निष्फला स्यात् । अतोऽशुद्धरक्तवाहिनीषु शिराशब्दः विशुद्धरक्तवाहिनीषु धमनीशब्दो रूढोऽस्ति । तदितरार्थेषु तु प्रतिसंस्कर्तृभि र्यथेच्छं प्रयुक्त इति दृढमस्माकं निश्चयः । अस्य च धमनि (नी) शब्दस्य यथाऽऽयुर्वेदे दुर्दशाऽस्ति तथा निरुक्तेऽपि निघण्टुसमयात्पूर्वमेव शारीरे व्यापन्नताऽऽसीत् । तद्यथा "मा त्वा सोमस्य गल्दया० (ऋ. ८।१।२०)" इत्यत्र गल्दा शब्दस्य निघण्टुकारात्पूर्वकालिकै र्भाष्यकारै र्धमन्यर्थः कृतः, तन्निषेधाय "माचुकुर्धं त्वां सोमस्य गालनेन सदा याचन्नहं गिरा गील्या स्तुत्या भूर्णिमिव मृगं न सवनेषु चुकुधं क ईशानं न याचिष्यत इति । (नि. अ. ६।२४)" इत्यादिना मन्त्रस्य यथार्थमर्थं प्रदर्श्य गल्दाशब्दस्य च गालनार्थे वाण्याश्च रूढिं प्रदर्श्योत्तरं गल्दा "धमनयो न भवन्ति गलनमासु धीयते" इति । स्वोक्तौ किं प्रमाणमित्यपेक्षायां गल्दाधमनीशब्दयो र्व्यधिकरणत्वेन यत्र स्थितिरास्ते तं मन्त्रमवतारयति—"आ त्वा विशन्त्विन्दव आ गल्दा धमनीनाम्" इति । अनेन मन्त्राऽवतरणेन किं सिद्धमित्यपेक्षायां स्वयमुत्तरयति—"नानाविभक्ती त्वेते भवत आगलना धमनीनामित्यत्रार्थः" अत्र आगल्दाशब्दस्य आगलना इत्यर्थः कृतः, अतः आगलनाः । आगालनानि सोमादीनां भवन्ति, अत एव कैश्चित्पूर्वभाष्यकारैः 'गल्दा धमनयो भवन्ति' इति व्याख्यातं तदनेन सन्दर्भेण निराकृतम् । अस्य मन्त्रस्योत्तरार्धं यद्यपि न ज्ञायते तथापि धमनीनां व्यत्ययात्षष्ठी धमनीषु गल्दा=आ आकारोऽत्रोपमायां, तेन खादितपीतलीढादिरसपरिणामा यथा सूक्ष्मच्छिद्रैरागल्य रसकुल्यां प्रपद्य शिरासु मिलित्वा फुप्फुसादिगमनेनाऽऽकाशाऽमृतेन पुनरपि शोध्यमानाः धमनीषु शुद्धरक्तवाहिनीषु । प्रपद्यन्ते तथा इन्दवः=सोमा आगल्यमानाः अग्नौ हुताश्च परम्परया त्वा=त्वां इन्द्रमित्यर्थः । आविशन्तु त्वदीयशरीरसात्म्यं भजन्तु । अथवा मया हुता इन्दवः=सोमाः धमनीनां आगल्दा अर्थात् त्वदीयशरीरवर्तिनीनां रक्तवाहिनीनां गाल्यते शरीरभ्रमणशीलो रसो रक्तादिरूपः स्थूलाऽवयवेभ्यः पृथक् क्रियते याभिः सूक्ष्मरक्तसारवाहिनीभिर्गल्दास्ता अभिव्याप्य त्वा=त्वां आविशन्त्वर्थात्त्वदीयं शरीरं प्राप्नुवन्त्वित्यर्थः, इति प्रार्थना कृता प्रतिभाति । तत्र च मनुष्यशरीरे खादितपीतादिवस्तुसम्भारो जठराग्निना परिपक्वः सन् रसरूपतां प्राप्य रक्तादिरूपतां च समुपगम्य शरीरधातुषु यथैकतां भजति तथा मदीयदत्ताः सोमा आहवनीयाग्नौ विशुद्धा भूत्वा हे इन्द्र ! त्वदीयशरीरसात्म्यं भजन्तु इत्यर्थात् धमनीनां शुद्धरक्तवहस्रोतोवाचित्वे न काऽपि शङ्काऽवशिष्यते । परन्तु शारीराऽवयवज्ञाने यास्कसमयात्पूर्वमेव विप्लव आसीदिति विज्ञायते । 'गल्दा धमनयो न भवन्ति' (नि. ६।२४) (इत्यत्र यद्दोः कालाढेखकप्रमादान्नकारो लुप्तो जातः । तदनुसन्धानमकृत्वा दुर्गाचार्यप्रभृतिभि र्यथेच्छं विरुद्धं प्रलपितमिति विद्वद्भिराकलनीयम्) इति निरुक्तपर्यालोचनया विस्पष्टं भवति । अतो निरुक्तपश्चाजातेषु ग्रन्थेषु किमु वक्तव्यम् । अतो धमनीशब्दो निरुक्तमतादपि न ज्ञानतन्तुवाचकः किन्तु विशुद्धरक्तवाहिस्रोतोवाचक एव । स्नायूनां ज्ञानतन्तुवाचकत्वे न किञ्चिद्वाचनिकं वचनमुपलभ्यते केवलं मर्मस्थानविवरणे क्षिप्रादिव्यधे आक्षेपकादिना मरणेनानुमानमात्रं यत्केवलस्नायुकर्तनेन भवतु नाम तत्स्थानीयक्रियाहानिः, परन्त्वाक्षेपकस्तु ज्ञानतन्तुकर्तनाऽभावे न सम्भवत्येव । अतः स्नायुमर्मणि प्रायो ज्ञानतन्तूनेवं हृदि निधाय तत्फलानि दर्शितानि इत्यनुमानमात्रमेव शरणम् । तत्र दृढप्रमाणाऽभावात् न ज्ञानतन्तुवाचकत्वम् । **नाडीश**ब्दस्तु वेदे स्रोतःसाधारण्येन प्रयुक्तः यथा—"जिह्वा ज्या भवति कुल्मलं वाङ्नाडीका दन्तास्तपसाभिदिग्धाः । तेभि र्ब्रह्मा विध्यति देवपीयून् हृद्बलै र्धनुर्भि र्देवजूतैः ॥ अ. ५।१८।८ ॥ ये ते नाड्यौ देवकृते ययोस्तिष्ठति

वृष्ण्यम्। तौ ते भिनद्मि शम्यया मुष्का अधि मुष्कयोः॥ अ. ६।१३८।४ ॥ यत्रामृतश्च मृत्युश्च पुरुषेधि समाहिते। समुद्रो यस्य नाड्यः पुरुषेधि समाहिताः स्कम्भं तं ब्रूहि कतमः स्विदेव सः॥ अ. १०।७।१५॥ यस्य चतस्रः प्रदिशो नाड्यस्तिष्ठन्ति प्रथमाः। यज्ञो यत्र पराक्रान्तः स्कम्भं तं ब्रूहि कतमः स्विदेव सः॥ अ. १०।७।१६॥ इति" यद्यपि "इमा यास्ते शतं हिराः सहस्रं धमनीरुत। अ. ७।३६।२" इत्यत्र सायणेन हिराणां धमनीनामपि नाड्य इत्यर्थः कृतोऽस्ति परन्तु तत्र शारीराऽज्ञानमेव कारणं मन्तव्यम्। सायणसमये शारीरज्ञानं लुप्तप्रायमासीदतो यत्र तत्र स्थले सायणेन यथेच्छं प्रलपितमस्ति। एवं वर्तमानसुश्रुतचरकसंहितयोः सच्छिद्राऽच्छिद्रस्रोतसो नाडी शब्दः प्रयुक्तो दृश्यते यथा—"कण्ठहृदयनेत्रक्लोमनाडीषु मण्डलाः (सु. शा. ५।२७)" इत्यत्र स्रोतःसु। "संज्ञावहासु नाडीषु पिहितास्वनिलादिभिः। तमोऽभ्युपैति सहसा सुखदुःखव्यपोहकृत्॥ सु. उ. ४६।६॥" इत्यत्र ज्ञानतन्तुषु "एवं कालप्रकर्षेण मुक्तो नाडीविबन्धनात्। गर्भाशयस्थो यो गर्भो जननाय प्रपद्यते। सु. नि. ८।८" "मातुस्तु खलु रसवहायां नाड्यां गर्भनाभिनाडी प्रतिबद्धा साऽस्य मातुराहाररसवीर्यमभिवहति॥ सु. शा. ३।३१" अत्रोभयत्र शिरादिस्रोतःसमूहार्थे नाडीशब्दः प्रयुक्तः। "पक्वे च दुष्टहरिणीः परिहृत्य नाडीः कृष्णाच्च चूचुकयुगं विदधीत शस्त्रम्॥ सु. चि. १७।४७" इत्यत्र दुग्धवहस्रोतोऽर्थे नाडीशब्दः प्रयुक्तः। "नाडीव यद्वहति तेन मता तु नाडी। सु. नि. १०।९" इत्यत्र पूयमार्गे यत्किञ्चिद्विशेषमनपेक्ष्य केवलं मार्गमात्रं लक्ष्यीकृत्य नाडीशब्दः प्रयुक्तः। "यदा तु धमनीः सर्वाः कुपितोऽभ्येति मारुतः। तदाक्षिपत्याशु मुहुर्मुहुर्देहं मुहुश्चरः। मुहुर्मुहुस्तदाक्षेपादाक्षेपक इति स्मृतः॥ सु. नि. १।५१" इत्यत्र ज्ञानतन्तुषु धमनीशब्दः प्रयुक्तः। "आवृत्य सकफो वायुर्धमनीः शब्दवाहिनीः। नरान् करोत्यक्रियकान् मूकमिम्मिणगद्गदान्॥ सु. नि. १।८५॥" इत्यत्र वाक्साधनयन्त्रेषु धमनीशब्दः प्रयुक्तः। "अधः प्रकुपितोऽन्यतमो हि दोषः फलकोशवाहिनीरभिप्रपद्य धमनीः फलकोशयो वृद्धिं जनयति॥ सु. नि. १२।४" इत्यत्र रसायन्यादिस्रोतः साधारण्येन धमनी शब्दः प्रयुक्तः। "अश्रुतिरदृढसौहृदः कृतघ्नः कृशपरुषो धमनीततः प्रलापी। सु. शा. ४।६५" अत्र सिराऽर्थे धमनीशब्दः प्रयुक्तः, धमनीतत इत्यनेन नीलाभदृश्यसिरावहुल इत्यर्थात्। "संज्ञावहेषु स्रोतःसु दोषव्याप्तेषु मानवः। रजस्तमः परीतेषु मूढो भ्रान्तेन चेतसा॥ सु. उ. ६१।८" इत्यत्र ज्ञानतन्तुषु स्रोतःशब्दः प्रयुक्तः। "स्रोतःसु ते स्वरवहेषु गताः प्रतिष्ठां हन्युः स्वरं भवति चापि हि षड्विधः सः॥ सु. उ. ५३।३" इत्यत्र स्वरोत्पादकयन्त्रसाधारण्येन स्रोतःशब्दप्रयोगः कृतोऽस्ति। "असृग्वहास्तु रोहिण्यः सिरा नात्युष्णशीतलाः। सु. शा. ७।१८" इत्यत्र सिराशब्देन शुद्धरक्तवाहिन्य उक्ताः, रोहिणीति लिङ्गात्। नहि सिराः रोहिण्यो भवन्ति किन्तु नीलाभाः। अग्रिमेनैव पद्ये "शीता गौर्यः स्थिराः कफात्" इत्यनेन रसायनीषु सिराशब्दः प्रयुक्तः। "व्याप्नुवन्त्यभितो देहं नाभितः प्रसृताः सिराः। प्रतानाः पद्मिनीकन्दाद्बिसादीनां यथा जलम्। सु. शा. ७।२३" अत्र सिराशब्देन ज्ञानतन्तवो निर्दिष्टाः। "अंसदेशस्थितो वायुः शोषयित्वांसबन्धनम्। सिराश्चाकुञ्च्य तत्रस्थो जनयत्यववाहुकम्॥ सु. नि. १।८२" इत्यत्र कण्डरार्थे सिराशब्दः प्रयुक्तः। "धातूनां पूरणं वर्णं स्पर्शज्ञानमसंशयम्। स्वाः सिराः सञ्चरद्रक्तं कुर्याच्चान्यान् गुणानपि॥ सु. शा. ७।१४" इत्यत्र धातूनां पूरणमित्यनेन सिराधमन्यावुक्ते। स्पर्शज्ञानमित्यनेन ज्ञानतन्तुकार्यं निर्दिष्टम्। तच्च सिरास्वसम्बद्धं किन्तु ज्ञानतन्तुनिर्बोधं सिरासु सञ्चरद्रक्तं तत्र साधयति। एवं चरकेऽपि "स्रोतांसि सिरा धमन्यो रसवाहिन्यो नाड्यः पन्थानो मार्गाः शरीरच्छिद्राणि संवृताऽसंवृतानि स्थानान्याशयाः क्षया निकेताश्चेति शरीरधात्ववकाशानां लक्ष्याऽलक्ष्याणां नामानि॥ च. वि. ५।१४" इति वचनेन स्रोत आदयः शब्दाः एकार्थकाः, ते च वैद्ये यथेच्छं

प्रयोक्तव्या इति तदाकलनया चेतसि महान् खेदः सञ्जायते । एतद्वचनं नात्रेयसमादिष्टं प्रतिभाति न वा चरकेणोपनिबद्धं किन्तु प्रतिसंस्कर्तृभिः प्रक्षिप्तमिति निःसंशयं ब्रूमः । स्रोतांसि छिद्राणि मार्गाश्चेति कथमेकार्थवाचका भवेयुरिति आत्रेयमहर्षे र्बुद्ध्यां व्यामोहो जायेत, तथात्वे स्वीकृते च भावाऽभावौ द्वावेव पदार्थावित्येवं कपिलादिभिश्चेन्निर्दिष्टमभविष्यत्तदा पृथिव्यादिद्रव्याणां रूपादिगुणानाञ्च कथं विभेदोऽभविष्यत् ? तद्वद्योगिनामपि सूक्ष्मशरीररचनाया ध्यानगम्यत्वात्तदीयपदार्थानां परस्परं विच्छेदमन्तरा व्यवहारस्यैव दुर्वारत्वं स्यात् । अतः स्पष्टं विज्ञायते इदं वचनं प्रतिसंस्कर्तृप्रक्षिप्तम् । इममेव विपर्ययमाश्रित्य "तदनन्तरं ह्यस्य लोमकूपायनैरुपस्नेहः कश्चिन्नाभिनाड्ययनैः, नाभ्यां ह्यस्य नाडी प्रसक्ता, नाड्यां चापरा० (च. शा. ६।२१)" "असम्यक् कल्पने हि नाड्या आयामव्यायामोत्तुण्डितपिण्डालिकात्रिनामिकाविजृम्भिकाबाधेभ्यो भयम् ॥ च. शा. ८।४७" इति शिरादिसमुदाये नाडीशब्दः प्रयुक्तः । "मन्ये संश्रित्य वातोऽन्तर्यदा नाडीः प्रपद्यते । मन्यास्तम्भं तदा कुर्यादन्तरायामसञ्ज्ञितम् ॥ च. चि. २८।४२" इत्यत्र ज्ञानतन्तुषु नाडीशब्द उक्तः । "बाह्याः सिराः प्राप्य यदा कफासृक्पित्तानि सन्दूषयतीह वायुः । तै र्बद्धमार्गः स तदा विसर्पनुत्सेधलिङ्गं श्वयथुं करोति ॥ च. चि. १२।८" इत्यत्र सिराशब्देन अशुद्धरक्तवाहिन्यः शुद्धरक्तवाहिन्यो रसायन्यश्चोक्ताः । "मन्त्रै र्धमनीबन्धोऽपामार्जनं कार्यमात्मरक्षा च । च. चि. २३।६१" इत्यत्र शुद्धाऽशुद्धरक्तरसवाहिनीषु धमनीसिरारसायनीषु धमनीशब्दः प्रयुक्तः । यथार्थपारिभाषिकसिरायान्तु "समीक्ष्य कारयेद्बाहौ वामे वा व्यधयेत्सिराम् । च. चि. १३।७७" "क्षारोऽगदः कफस्थानगते स्वेदस्तथा सिराव्यधनम् । दूषीविषेऽथ रक्तस्थिते विज्ञाय कर्म पञ्चविधम् ॥ च. चि. २३।६३" इत्यादीन्युदाहरणानि ज्ञेयानि । "अजीर्णकट्वम्लविदाह्यशीतैरामाशये पित्तमुदीर्णवेगम् । रसायनीभि र्विसृतं प्रपीड्य मर्मोर्द्ध्वमागम्य वमिं करोति ॥ च. चि. २०।१०" इत्यत्र रसपरिणामशैलीनिर्देशपुरःसरं यथार्थपारिभाषिकरसायन्यो निर्दिष्टाः । "रसवहानां स्रोतसां हृदयं मूलं दश च धमन्यः । च. वि. ५।१०" इत्यत्र यथार्थपारिभाषिकविशुद्धरक्तवाहिनीषु धमनीशब्दः प्रयुक्तः । "आमाशयगतः पाकमाहारः प्राप्य केवलम् । पक्वः सर्वाश्रयं पश्चाद्धमनीभिः प्रपद्यते ॥ च. वि. २।२५ ॥" इत्यत्र रसायन्यः सिराः धमन्यश्चेति तिसृणामपि धमनीशब्देन ग्रहणं कृतमस्ति । एवं वने गोपालरहिता गाव इव राजरहिता प्रजा इव धमन्यादयः शब्दा अर्थविशेषं परित्यज्य सर्वतः परिभ्राम्यन्तो दृश्यन्ते, अतो ज्ञानतन्तुवाचकः कः शब्दः स्थापनीय इति वर्तमानाऽऽयुर्वेदग्रन्थेभ्यो निश्चेतुं नितरां दुरत्ययः । अतो नवीनग्रन्थरचनासु सञ्ज्ञावहतन्तुरिति सञ्ज्ञातन्तुरिति वा अगत्या सञ्ज्ञास्रोत इति वा ज्ञानतन्तूनां सञ्ज्ञा करणीयेति सुधीभिराकलनीयम् । तन्त्रशास्त्रे उपनिषत्सु च नाडीशब्देन व्यवहारो बहुधा कृतोऽस्ति यथा—"नाड्योऽनन्ताः समुत्पन्नाः सुषुम्णापञ्चपर्वसु ।" शारदातिलके । "मध्यस्थकुण्डलिनीमाश्रित्य मुख्या नाड्यश्चतुर्दश भवन्ति० (शाण्डिल्य उ०) इत्यादि विस्तरः पूर्वमुद्धृतः । परन्तु नैकान्ततया ज्ञानतन्तुष्वेव नाडीशब्दः प्रयुक्त इति साधारणप्रणालीष्वपि प्रयुक्तत्वात्, यथा—"अथ मात्राशितपीतनाडीसूत्रगतेन प्राण आप्याय्यते" (गर्भोपनिषदि) इत्यत्र सिरादिसम्मिलितस्रोतःसमूहे नाडीशब्दप्रयोगात् । अतो नवीनग्रन्थरचनायां वर्तमानसमस्तदेशीयविदुषां सम्मत्या कश्चिदप्येकः शब्दः स्थिरीकर्तव्य इत्यस्माकं सम्मतिः । तत्राऽप्युक्तरीत्या सञ्ज्ञास्रोत इति सञ्ज्ञातन्तुरिति वा सञ्ज्ञाकरणे लाघवात् तयोरेकतरयोर्नियमनं न्याय्यं प्रतिभातीत्यलमतिविस्तरेण ॥

(सं. १५०) वैश्वानरः—विश्वेभ्यो नरेभ्यो हित इत्यर्थे 'तस्मैहित—' (पा. २।१।५) मित्यणि 'तद्धितेष्वचामादे—' (पा. ७।२।११७) रित्यादेरचो वृद्धौ 'नरेसञ्ज्ञाया-' (पा. ६।३।१२९) मिति पूर्वपदस्य दीर्घे वैश्वानर इति सिद्ध्यति । इयं जाठरानलस्य सञ्ज्ञा । नरशब्दो यद्यपि पुरुषत्वविशिष्टे मनुष्ये

वर्तते तथाऽप्यत्र जीवमात्रस्य ग्रहणम् । अत एव एकादशाऽध्याये " पुरीष्योऽसि विश्वम्भरा अथर्वा त्वा प्रथमो निरमन्थदग्ने । त्वामग्ने पुष्करादध्यथर्वा निरमन्थत मूर्ध्नो विश्वस्य वाघतः ॥ वा. सं ११।३२ " हे अग्ने ! त्वं पुरीष्योऽसि, पुरीषमित्यन्ननाम तेन सञ्जातोऽसि तस्मै पचनादिकार्ये हितोऽसि वा पुरीष्यः " पुरीषमित्यन्नं वै पुरीषमन्नमेवास्मिन्नेतद्दधाति तेन वर्धस्व चाऽऽप्यायस्वेति नाऽत्र तिरोहितमिवाऽस्ति वर्धिषीमहि च वयमा च प्यासिषीमहीत्याशिषमेवैतदाशास्ते ॥ शत० ब्रा० १४।३।१।२३ " तथाच त्वं विश्वम्भरा असि विश्वं बिभर्तीति विश्वम्भराः, असुन् प्रत्यये साधुत्वम् । अत्र स्थावरजङ्गमोभयाऽऽत्मकं जगद्विश्वशब्देनाऽभिप्रेतम् । विशेषतो जङ्गमसृष्टिः, पुरीष्य इति विशेषणात् । अत्र विश्वम्भरशब्देन वैश्वानरः पुनरपि स्पष्टीकृत्य स्तुतः, अतो वैश्वानरशब्दस्थनरशब्देन जीवमात्रग्रहणम् तथाच—" अग्ने वैश्वानर विश्वै र्मा देवैः पाहि स्वाहा । अथर्व० २।१६।४ " " विश्वम्भर विश्वेन मा भरसा पाहि स्वाहा ॥ अथर्व० २।१६।५ " इत्यत्राऽव्यवहिताभ्यां मन्त्राभ्यां वैश्वानरविश्वम्भरशब्दप्रतिपाद्योऽग्निः स्तुतः । तत्र शब्दवैलक्षण्यमात्रमेवाऽस्ति नत्वर्थवैलक्षण्यमित्यव्यवहितमन्त्रपाठेन ज्ञापितम् । यद्यपि " स एष इह प्रविष्टः आनखाग्रेभ्यो यथा क्षुरः क्षुरधानेऽवहितः स्याद्विश्वम्भरो वा विश्वम्भरकुलाये तं न पश्यन्त्यकृत्स्नो हि सः ॥ श० १४।४।२।१६ " इति शतपथे प्रकरणवशाद् ब्रह्मपरत्वेन विश्वम्भरशब्दार्थे प्रतिपादितमपि बृहदारण्यके इममेव प्रमाणमुपन्यस्य जाठराग्निपरत्वेन विश्वम्भरशब्दो व्याख्यातः । अत्र परस्परं विरोध इति तु न सम्भावनीयम्—" अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः । प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधम् ॥" (गी. १।१४) इति गीतायां भगवद्वचनाद्वैश्वानरस्य सर्वजीवानां जीवनाऽऽधारत्वात् । स (नरशब्दः) प्रधानतया मनुष्ये बहुधा प्रयुक्तोऽपि जीवमात्रवाचको बोध्यः । तथाच—" पुनर्मनः पुनरायुर्म आगन् पुनः प्राणः पुनरात्मा म आगन् पुनश्चक्षुः पुनः श्रोत्रं म आगन् । वैश्वानरो अदब्धस्तनूपा अग्नि र्नः पातु दुरितादवद्यात् ॥ वा. सं. ४।१५" सुषुप्तिकाले मन आदीनां स्वस्वव्यापारादुपरतत्वात्पुनः स्वस्वकार्यभारं संवोढुं प्रार्थना ' पुनर्मनः पुनरायुर्म आगन् ' इत्यादिना, उपरतव्यापाराणां पुनः पूर्ववत्स्वकार्यकरणे दैवाधीनत्वात् । सर्पादिहिंसकसहस्रकारणानामागमनसम्भवात् । सर्वेभ्यो रक्षणपूर्वकं स्वापात्पूर्ववन्नेऽविकृता जागृतिः स्यात्, मा स्वापान्तरे विघ्नानि भूवन्निति युक्तैवेश्वरप्रार्थनेति मनसि निधाय शतपथे व्याख्यातम् तथाहि—"अथ यत्र सुप्त्वा पुनर्नावद्रास्यन्भवति । तद्वाचयति पुनर्मनः पुनरायुर्म आगन् । पुनः प्राणः पुनरात्मा म आगन् । पुनश्चक्षुः पुनः श्रोत्रं म आगन्निति सर्वे ह वा एते स्वपतोऽपक्रामन्ति प्राण एव न तैरेवैतत्सुप्त्वा पुनः सङ्गच्छते तस्मादाह पुनर्मनः पुनरायुर्म आगन् पुनः प्राणः पुनरात्मा म आगन् । पुनश्चक्षुः पुनः श्रोत्रं म आगन्" श. ब्रा. ३।२।२।२३ ॥ स्वप्ने मन आदीनां व्यापारविसृष्टावपि न काचिद्धानि र्जायते परन्तु वैश्वानरस्य तथाव्यापारविनिवृत्तौ महाननर्थः स्यादिति स्वतन्त्रतया तद्रक्षणस्य प्रार्थना कृताऽस्ति । अदब्धः= अविरतस्वव्यापारोऽतएव तनूः=सूक्ष्माऽतिसूक्ष्मपरमाणुपुञ्जमारभ्य स्थूलाऽतिस्थूलतमाऽवयवपर्यन्तं शरीरं पातीति तनूपाः=वैश्वानरोऽग्निर्नः=अस्मान् अवद्यात्=अशुभात्पापात्स्वकीयक्षीणताऽतिवृद्ध्यादिदोषात्पातु=रक्षतु इति । तथाच—"वैश्वानरो अदब्धस्तनूपा अग्नि र्नः पातु दुरितादवद्यादिति यद्देवाऽत्र स्वप्नेन वा येन वा मिथ्याकर्म तस्मान्नः सर्वस्मादग्ने गोपायत्वित्येवैतदाह तस्मादाह वैश्वानरो अदब्धस्तनूपा अग्निर्नः पातु दुरितादवद्यादिति" श. ब्रा. ३।२।२।२३ । इममेवाऽऽशयमभिप्रेत्याऽऽयुर्वेदे यथायथं व्याख्यातम् । तथाहि—"जाठरो भगवानग्निरीश्वरोऽन्नस्य पाचकः । सौक्ष्म्याद्रसानाददानो विवेक्तुं नैव शक्यते ॥ प्राणापानसमानैस्तु सर्वतः पवनैस्त्रिभिः । ध्मायते पाल्यते चाऽपि स्वे स्वे स्थाने व्यवस्थितैः ॥ सु. सू. ३५।२७–२८" अयमेव पित्ततेजःशब्दवाच्यः यथा—"अशितं खादितं पीतं लीढं कोष्ठगतं नृणाम् । तज्जीर्यति यथाकालं शोषितं पित्ततेजसा ॥ सु. शा.

४।१९" यद्यपि "सर्वहेतुसमाचारादतिवृद्धस्तदाऽनिलः। रक्तमार्गेण सृजति प्रत्यनीककरं कफम् ॥ दुर्गन्धं पिच्छिलं पीतं विदग्धं पित्ततेजसा ॥ च. चि. ३०।२२२" इत्यत्राऽपि पित्ततेजः समागतम् परं न तज्जाठराग्निवाचकं किन्तु मिथ्याऽऽहारविहारादिनाऽतिप्रवृद्धविकृतशरीरोष्मवाचकं शरीरहानिकरत्वात्। शरीरपोषणोपयुक्तपित्ततेजस एव जाठराऽग्निवाचकत्वात्। जाठराऽग्निरितिसञ्ज्ञा तु मातुरुदरे समासादितत्वात्, न पुनरुदर्याऽग्नेरेव सञ्ज्ञा, तस्य सर्वशरीरव्यापकत्वात्। यत्रकुत्रचित्स्थाने आधाराधेययोरेकत्वबुद्ध्या पित्तशब्देनाऽपि व्यवहृतोऽस्ति यथा—"अत्र जिज्ञास्यं किं पित्तव्यतिरेकादन्योऽग्निः आहोस्वित् पित्तमेवाऽग्निरिति? अत्रोच्यते—न खलु पित्तव्यतिरेकादन्योऽग्निरुपलभ्यते, आग्नेयत्वात् पित्ते दहनपचनादिषु अभिप्रवर्तमाने अग्निवदुपचारः क्रियतेऽन्तरग्निरिति। क्षीणे ह्यग्निगुणे तत्समानद्रव्योपयोगादतिवृद्धे शीतक्रियोपयोगात् आगमाच्च पश्यामो न खलु पित्तव्यतिरेकादन्योऽग्निरिति सु. सू. २१।९" शारीरोष्मस्वग्नित्वव्यवहार आयुर्वेदेऽभिप्रेतः, स चोष्मा प्रतिप्रदेशं प्रत्यवयवञ्च भिन्न इति सिद्धान्तः—"शुक्रशोणितं गर्भाशयस्थमात्मप्रकृतिविकारसम्मूर्च्छितं 'गर्भ' इत्युच्यते तं चेतनाऽवस्थितं वायुर्विभजति, तेज एनं पचति, आपः क्लेदयन्ति, पृथिवी संहन्ति, आकाशं विवर्धयति, सु. शा. ५।३" अत्र तेजःशब्देन शारीरोष्मण एव ग्रहणम्, आयुर्वेदे पञ्चभूतपरिणामेषु व्यवहारसौकर्याय वातपित्तश्लेष्माण इति सङ्केतः कृतोऽस्ति पञ्चभूतेषु च तन्निष्ठगुणानामेव प्रायः कार्यकरत्वादाग्नेयपदार्थानां पित्तरूपेण परिणामात्तदीयगुणस्य (दहनपचनादिरूपस्य) तत्र सत्त्वात्साधारणतया पित्तशब्देनाऽपि तदीयतेज उच्यते अङ्गारेषु—अग्निवत्।

चरके तु पञ्चीकरणप्रपञ्चं हृदि सन्निधाय पञ्चभूताऽग्नयः सप्तधात्वग्नय एकश्च सर्वव्यापकः स देहाग्निरिति नामकः, एतदधीनाः सर्वेऽप्यग्नयः सन्तीति सिद्धान्तः प्रदर्शितः यथा—"आयुर्वर्णो बलं स्वास्थ्यमुत्साहोपचयौ प्रभा। ओजस्तेजोऽग्नयः प्राणाश्चोक्ता देहाग्निहेतुकाः॥ शान्तेऽग्नौ म्रियते युक्ते चिरं जीवत्यनामयः। रोगी स्याद्विकृते मूलमग्निस्तस्मान्निरुच्यते॥ यदन्नं देहधात्वोजोबलवर्णादिपोषकम्। तत्राऽग्नि र्हेतुराहारान्नह्यपक्वाद्रसोद्भवः॥ च. चि. १५।३–४–५॥" "*भौमाऽप्याग्नेयवायव्याः पञ्चोष्माणः सनाभसाः।* पञ्चाहारगुणान् स्वान्स्वान् पार्थिवादीन् पचन्ति हि॥ यथा स्वं स्वं च पुष्यन्ते देहे द्रव्यगुणाः पृथक्। पार्थिवाः पार्थिवानेव शेषाः शेषांश्च कृत्स्नशः॥ सप्तभि र्देहधातारो धातवो द्विविधं पुनः। यथास्वमग्निभिः पाकं यान्ति किट्टप्रसादतः॥ च० चि. १५।१३-१४-१५॥" प्रतिस्थानञ्च भिन्नभिन्नाऽग्नयः स्वीकृतास्ते च ऊष्मरूपा एव सन्तीति सिद्धान्तितम्। तथाहि—"यथास्वेनोष्मणा पाकं शारीरा यान्ति धातवः। स्रोतसा च यथास्वेन धातुः पुष्यति धातुना॥ स्रोतसां सन्निरोधाच्च रक्तादीनाञ्च सङ्क्षयात्। धातूष्मणाञ्चापचयाद्राजयक्ष्मा प्रवर्तते॥ तस्मिन्काले पचत्यग्नि र्यदन्नं कोष्ठमाश्रितम्। मलीभवति तत्प्रायः कल्पते किञ्चिदोजसे॥ च. चि. ८।३९-४०-४१" इत्यादिवाक्यैः शारीरोष्माण एवाऽग्नित्वेन प्रतिपादिताः। ऊष्माणश्च पित्तकृता एव सन्तीति (ऊष्मा-पित्तादृतेनास्तीति सिद्धान्तात्) यत्रकुत्रस्थाने गुणगुणिनोरभेदबुद्ध्या पित्तस्याऽग्नित्वकथनं प्रसङ्गवशादागतञ्चेद्भवेत्तर्हि न विप्रतिपत्तव्यम्। अयञ्चाऽग्निसन्तानः परमसूक्ष्मः सन् स्थावरजङ्गमोभयाऽऽत्मकजगदुत्पत्तिस्थितिप्रलयकारकः। तस्मादयं वैश्वानरः विश्वम्भर इत्यादिनाम्ना वेदे आयुर्वेदे च प्रतिपादितः। अयमेतत्स्थानेऽस्ति, इयता प्रमाणेन चाऽस्ति इति केनाऽपि निर्धारयितुमशक्यस्तत्कार्यैरेव समूह्यो भवति, अतएव भगवता धन्वन्तरिणोक्तं—"जाठरो भगवानग्निरीश्वरोऽन्नस्य पाचकः। सौक्ष्म्याद्रसानाददानो विवेक्तुं नैव शक्यते॥ सु. सू. ३५।२७" अतः पित्तमेवाऽग्निरित्यत्र नाऽऽचार्यस्य पित्तस्यैवाऽग्नित्वमभिप्रेतम् किन्तु पित्तव्यतिरेकादन्योऽग्नि र्न लभ्यते इति कथनेन पित्तस्य अग्न्याधारत्वं सूचितम्। पित्तस्य च पञ्चीकरणतयोत्पन्नत्वात्स्वेतरभूतचतुष्टयस्याऽपि सम्बन्धाद्द्रव्यरूपत्वादग्नेश्चोष्मरूपत्वेन गुणत्वात्पित्ताऽग्न्योरेकत्वस्य भ्रमाऽवकाश एव नाऽस्तीति सुधीभिर्विभावनीयमित्यलमतिविस्तरेण।

अथ सुश्रुतीयशारीरकोष्ठकम्
(ऊर्द्ध्वशारीराऽवयवाः)

संख्याक्रमः	सुश्रुते	चरके	आंग्लाऽनुवादः
१	मूर्धजाः शा. ३।७ केशाः शा. ३।३३	केशाः शा. ८।५२	Hair (of the head) (हेर ऑफ दी हेड)
२	शिरः शा. ५।३ मस्तकम् शा. ५।४, मूर्धा शा.७।२०	शिरः सू. १७।१२ मूर्धा शा. ७।१२	Head (हेड)
३	शिरः कपालानि शा. ५।२६	शिरः कपालानि शा. ७।७	Skull Bones (स्कल बोन्स)
४	शिरः सीमन्ताः शा. ६।२८		Sutures of the cranium (सूचर्स ऑफ दी क्रेनियम)
५	केशान्तः शा. ६।२८	केशान्तः चि. ९।८३	Boundary line between the forehead and the scalp (बाउण्डरी लाइन बिट्वीन दी फोरहेड एण्ड स्काल्प)
६	अधिपतिः (म.) शा. ६।२८		Torcular Herophile(confluence of Intra cranial sinuses (टोरक्यूलर हीरोफाइलाइ)
७	मस्तिष्कम् सू. ३५।४	मस्तिष्कम् शा. ७।१७	Brain ब्रेन
८	मस्तुलुङ्गः शा. १०।६२	मस्तुलुङ्गः सि. ९।१०५	Convolutions or gyri of brain (कानव्हुल्युशन्स ऑर गायरी आफ ब्रेन)
९	ललाटम् शा. ५।४	ललाटम् शा. ८।५२	Forehead (फोरहेड)
१०	आवर्तौ (म.) शा. ६।२८		Depression above the superciliary margins (डिप्रेशन अबाउ दी सुपरसीलिअरी मार्जिनस्)
११	उत्क्षेपौ (म.) शा. ६।२८		Temporal muscles (टेम्पोरल मसल्स)
१२	भ्रूमध्यम् शा. ६।२८	भ्रूमध्यम् सू. १७।२०	Glabella (ग्लाबेला)
१३	[1]स्थपनी(म.) शा. ६।२८		Frontal emissary vein (फ्रंटल एमिसरी व्हेन)
१४	भ्रुवौ शा. ६।२८	भ्रुवौ शा. ७।१४	Eyebrows (आइब्राउस)

1 Frontal emissary vein between the superior sagittal sinus & veins of nose.

संख्याक्रमः	सुश्रुते	चरके	आंग्लाऽनुवादः
१५	भ्रूपुच्छान्तौ शा. ६।२८		Lateral angles of the orbit (लैटरल ऐंगल्स ऑफ दी ऑरबिट)
१६	शङ्खौ (म.) शा. ६।२८	शङ्खौ सू. १७।१९ शङ्खकौ शा. ७।७	Temporal bone (टेम्पोरल बोन)
१७	नेत्रे उ. १।१३, अक्षिणी उ. १।१७, लोचने उ. १।१४, नयने शा. ४।६८ प्रेक्षणे सू. ३५।४	नेत्रे सू. ५।१४ अक्षिणी सू. १७।२०, दर्शने इ. ९।१२ चक्षुषी शा. ८।५२	Eyes (आईज्)
१८	अक्षिपक्ष्माणि शा. ३।१४ (ऊर्ध्वाऽधोभागेन प्रत्यक्षि पक्ष्मद्वयम्)	अक्षिपक्ष्माणि इ. ३।८	Eye-lashes (आई—लैसीज्)
१९	पक्ष्माशयः उ. ३।२९		Hair follicles(हेर फौलीकल्स)
२०	नेत्रवर्त्मानि उ. १।१५ (ऊर्ध्वाऽधोभेदेन द्विविधानि) अक्षिकोषाः शा.५।२०	अक्षिवर्त्मानि४ शा. ४।१४	Eyelids (upper and lower) आई लिड्स. (अपर एण्ड लोअर)
२१	वर्त्मपटले उ. १।१७ (तेजोजलमयं वर्त्मपटलं प्रथमम् १, पिशितमयं वर्त्मपटलं-द्वितीयम्)		Conjunctival and muscular layers of the lid (कंजंटाइवल एण्ड मस्क्यूलर लेअर्स ऑफ दी लिड)
२२	नयनबुद्बुदः उ. १।१०		Eyeball (आईबाल)
२३	श्वेतभागः उ. १।१५		Sclerotic and cornea (स्क्लेरोटिक एण्ड कोर्निया)
२४	कृष्णभागः उ. १।१५ तारका सू. ३५।१२		Uveal tract (Iris, ciliary body and choroid) (यूव्हीअल ट्रैक्ट)
२५	दृष्टिः उ. ७।४	दृष्टिः सू. १४।१०	Pupil (प्यूपिल) or macula lutea (ऑर मेक्युला लुटिया)
२६	पक्ष्ममण्डलम् उ. १।१५		Inter palpebral fissure (इंटर पालपीब्रल फिशर)
२७	वर्त्ममण्डलम् उ. १।१५		
२८	श्वेतमण्डलम् उ. १।१५		Sclera (स्क्लैरा)
२९	कृष्णमण्डलम् उ. १।१५		Iris (आयरिस)
३०	दृष्टिमण्डलम् उ. १।१५		Retina (रैटाइना)

संख्याक्रमः	सुश्रुते	चरके	आंग्लाऽनुवादः
३१	पक्ष्मवर्त्मसन्धिः उ. १।१६		Inter marginal sulcus (इण्टर मार्जिनल सल्कस)
३२	वर्त्मशुक्लसन्धिः उ. १।१६		Conjunctival fornix (कंजंटाइवल फौरनिक्स)
३३	शुक्लकृष्णसन्धिः उ. १।१६		Sulcus circularis cornea (सल्कस सरक्यूलैरिस कोर्निया)
३४	कृष्णदृष्टिसन्धिः उ. १।१६		Pupillary margin (प्यूपिलरी मार्जिन)
३५	कनीनकगतः सन्धिः उ. १।१		Internal canthus (इण्टरनल कैन्थस)
३६	अपाङ्गगः सन्धिः उ. १।१७		External canthus (एक्सटरनल कैन्थस)
३७	अक्षिपटलानि ४ उ. १।१८		Coverings of the Eyeball (कवरिंग्स् ऑफ दी आइबौल)
३८	तेजोजलमयम् उ. १।१८		conjunctival layer (कर्जटाइवल लेअर)
३९	पिशितमयम् उ. १।१८		Orbital muscles of Eye (आरबिटल मसल्स ऑफ आय)
४०	मेदोमयम् उ. १।१९		Orbital fat (ऑरबिटल फॅट)
४१	अस्थ्याश्रितम् उ. १।१९		Orbital fascia and periosteum(आरबिटल फेसिया एण्ड पैराआस्टीयम्
४२	नेत्रशिराः उ. १८।५४		Blood vessels of the eyeball (ब्लड वेसल्स ऑफ दी आइबौल)
४३	नेत्रस्रोतांसि उ. १८।५४		Lymph channels of the eyeball (लिम्फ् चेनल्स ऑफ दी आइबौल)
४४	अश्रुमार्गाः उ. १।११		Lacrymal passages (लैक्रीमल पैसैजीज
४५	नेत्रनाडी (दर्शनतन्तु) शा. ५।२७	नेत्रनाडी सि. २।२२	Optic nerve (ऑप्टिक नर्व्ह)
४६	अपाङ्गौ (म.) शा. ६।२८		Canthii (कैन्थाई)
४७	गण्डौ शा. ५।४	गण्डौ शा. ७।१४	Zygoma; malar prominence (जाइगोमा मैलर प्रोमीनन्स)

संख्याक्रमः	सुश्रुते	चरके	आंग्लाऽनुवादः
४८	कर्णौ शा. ५।४	कर्णा शा. ८।५२	Ears (ईअर्स)
४९	कर्णमूले सू. ३५।१२	कर्णमूले सू. १८।२९	Roots of the ears (रूट्स ऑफ दी ईअर्स)
५०	कर्णपाल्यौ सू. १६।१४	कर्णशष्कुलिके शा. ७।१४	Pinnœ (पिन्ना)
५१	कालिका (सिरा) सू. १६।५		Auricular vein
५२	मर्मरिका ,,		Auricular nerves
५३	लोहितिका ,,		Auricular arteries
५४	कर्णस्रोतसी उ. २०।११		The External auditory meatus (दी एक्स्टर्नल ऑडिटरी मीएटस)
५५	शब्दपथः उ. २०।९		Auditory canal (ऑडिटरी कैनाल)
५६	शब्दवहा नाड्यः उ. २०।७		Fibres of the auditory nerve and the organ of corti (फाइबर्स ऑफ दी ऑडिटरी नर्व्ह एण्ड दी ऑरगन ऑफ कॉर्टाइ)
५७	नासा शा. ५।४, घ्राणम् शा. ५।३ घोणा चि. १८।२६	नासिका शा. ८।५२, घ्राणम् चि. २६।१०८, घोणा शा. ७।७	Nose (नोज़)
५८	नासावंशः सू. ३५।१२		Prominence of the nose (प्रौमीनन्स ऑफ दी नोज़)
५९	नासिकामुखम् शा. १०।२५ घ्राणमुखम् उ. २०।१२		Nostrils, Anterior nares (नास्ट्रिल्स एण्टीरिअर नेर्स)
६०	नासापुटभागः सू. ३५।१२.		Ala of the nose (एला ऑफ दी नोज़)
६१	नासिकाग्रम् सू. १६।२९	नासाऽग्रम् चि. २६।१०६	Tip of the nose (टिप ऑफ दी नोज़)
६२	नासास्रोतः उ. २२।२० घ्राणस्रोतः शा. ५।१०		Anterior nares (एण्टीरिअर नेर्स)
६३	फणे शा. ६।२८		Olfactory nerves (ऑल्फैक्टरी नर्व्ह)
६४	वदनम् शा. ३।७	आननम् वि. ८।११७	Face (फेस)
६५	कपोलौ चि. ४०।३१		Cheeks (चीक्स)
६६	मुखम् शा. १०।१२, वक्त्रम् सू. २।३ वदनस्रोतः शा. ५।१०	मुखम् शा. ६।१८ आस्यम् वि. ८।११७	Mouth (माउथ)

संख्याक्रमः	सुश्रुते	चरके	आंग्लाऽनुवादः
६७	ओष्ठौ शा. ४।६८	ओष्ठौ शा. ७।१४	Lips (लिप्स)
६८	ओष्ठाग्रे सू. २।३		Red part of the lip
६९	सृक्किण्यौ (ओष्ठप्रान्तौ) ६०।१३	सृक्किण्यौ शा. ७।१४	Angles of the mouth (एङ्गल्स ऑफ दी माउथ)
७०	दन्ताः शा. ५।१९, दशनाः शा. ५।२० दंष्ट्राः क. ३।४	दन्ताः शा. ७।७ दंष्ट्राः चि. २३।१३७	Teeth (टीथ)
७१	दन्तवेष्टाः नि. १६।१४	दन्तवेष्टकौ शा. ७।१४	Gums (गम्स)
७२	दन्तवल्कानि नि. १६।३३		Dental Periosteum (डैण्टल पैरीऑस्टियम)
७३	दन्तशर्कराः नि. १६।३३		Enamel and cement of Teeth (इनेमल एण्ड सीमेण्ट ऑफ टीथ)
७४	दन्तमूलानि नि. १६।३	दन्तोलूखलाः शा. ७।७	Fangs of the teeth (फैंग्स ऑफ दी टीथ)
७५	दन्ताऽग्राणि सू. २।३		Crowns of the Teeth. (क्राउन्स ऑफ दी टीथ)
७६	तालु शा. ४।६८	तालु शा: ७।१४	Palate (पैलेट)
७७	तालुमूलम् नि. १६।४१		Root of the palate (रूट ऑफ दी पैलेट)
७८	ताल्वस्थि शा. १०।४२	ताल्वस्थिनी तालुपके वा शा. ७।७	Bones of the palate (बोन्स ऑफ दी पैलेट)
७९	जिह्वा शा. ४।६८, रसना उ. ३९।३६	जिह्वा शा. ८।५२, गोजिह्विका शा. ७।१४	Tongue (टङ्ग)
८०	जिह्वाऽग्रम् नि. १६।३९		Tip of the Tongue (टिप ऑफ दी टङ्ग)
८१	जिह्वामूलम् सू. २१।७	जिह्वामूलम् सू. १८।३६	Root of the Tongue (रूट ऑफ दी टङ्ग)
८२	जिह्वाप्रबन्धाः नि. १६।५२		Muscles of the Tongue (मसल्स ऑफ दी टङ्ग)
८३	जिह्वातलम् नि. १६।३८		Floor of the mouth under the Tongue (फ्लोर ऑफ दी माउथ अण्डर दी टङ्ग)
८४	रसवहे (सिरे) शा. ७।२२		Nerves of the Taste (नर्व्हस् ऑफ दी टेस्ट)

संख्याक्रमः	सुश्रुते	चरके	आंग्लाऽनुवादः
८५	वाग्वहे शा. ७।२२		Hypoglossal nerve (nerves that move the tongue in speech (हाइपोग्लौसल नर्व्ह)
८६	स्वरवहानि स्रोतांसि उ. ५३।३		Laryngeal nerves; nerves of the vocal Apparatus लैरिंजिल नर्व्हस्; नर्व्हस् ऑफ वोकल अपेरेटिस)
८७	काकलकम् शा. ५।२६	काकलकम् सू. १८।२२ गलशुण्डिका शा. ७।१४	Uvula (उव्यूला)
८८	भृङ्गाटकानि (म.) शा. ६।२८ चि. ४०।३०; उ. १८।५४		Two cavernous sinuses two Intercavernous sinuses (कवरनस सायनस)
८९	श्मश्रवः शा. ३।३३	श्मश्रुः शा. ३।१४	Beard and moustache (बीअर्ड एण्ड मुस्टास)
९०	हनू चि. ४०।५५	हनू शा. ८।५२	Maxilla (मेग्जिला)
९१	चिबुकम् शा. ५।४	चिबुकम् शा. ७।१४ हनुमूलम् चि. २८।५०	Chin (चिन)
९२	ग्रीवा शा. ५।४	ग्रीवा शा. ८।५२ शिरोधरा वि. ८।११७	Neck (नेक)
९३	ग्रीवाकूर्चः शा. ५।१३		Structures forming [illegible] of the neck (स्ट्रक्चर्स [illegible] मिंग बौडी ऑफ दी [illegible])
९४	कण्ठः नि. १६।५७	कण्ठः शा. ७।१२	Throat (थ्रोट)
९५	कण्ठनाडी शा. ६।२८		Oesophagus, L[illegible] Trachea ([illegible] रिंग्स एण्ड [illegible])
९६	मातृका: (अष्टौ) शा. ६।२८		Superficial [illegible] of [illegible] neck ([illegible] ऑफ दी [illegible])

१ मातृकाः—Superficial veins of the neck. 8
2 Anterior jugular veins.
2 External jugular veins
2 Post external jugular veins
2 Common facial veins.

संख्याक्रमः	सुश्रुते	चरके	आंग्लाऽनुवादः
९७	नीले शा. ६।२८		Internal jugular veins (इन्टरनल जुग्युलर व्हेन्स)
९८	मन्ये शा. ६।२८	मन्ये चि. २८।४२	Common carotid Arteries (कौमन कैरोटिड आर्टरीज़)
९९	विधुरे (म.) शा. ६।२८		Posterior Auricular veins पोस्टीरिअर ऑरीक्यूलर व्हेन्स)
१००	कृकाटिके शा. ६।२८	कृकाटिके वि. ८।१०६	Articulation between the occipital and the Atlas Bones (आरटीक्यूलेशन बिटवीन दी ऑक्सिपिटिल एण्ड दी एटलास बोन्स)
१०१	अवटुः सू. ३५।१२	अवटु शा. ७।१४	Nape of the neck (नेप ऑफ दी नेक)
१०२	स्कन्धौ शा. ६।२७	स्कन्धौ वि. ८।११७	Shoulders (शोल्डर्स)
१०३	अंसौ (म.) शा. ६।३७ जत्रुणी शा. ६।७	अंसौ वि. ८।११७ जत्रुणी शा. ८।५२	Two trapezius muscles. (ट्र ट्रैपीजियस मसल्स)
१०४	अक्षकौ चि. ३।५०	अक्षकौ शा. ७।७	Clavicles (क्लेवीकल्स)
१०५	अंसफलके(म.)शा.५।२७ अंसपीठौ शा. ५।२७		Scapulae (स्कैप्यूला)
१०६	अंसकूटौ शा. ६।२७		Acromion Processes of the Scapula (एकरोमियम प्रोसेसीज़ ऑफ दी स्कैप्यूला)
१०७	हस्तौ शा. ३।१८ बाहू शा. ६।२५	बाहू शा. ७।६	Superior extremeties (सुपीरियर एक्स्ट्रीमीटीज़)
१०८	भुजौ शा. ३।८	प्रबाहू वि. ८।११७	Arms (आर्म्स)
१०९	कक्षौ शा. ५।४	कक्षौ वि. ८।११७	Axilla (एग्जिला)

१ कृकाटिके—The articulation between the atlas and the occipital bone consists of a pair of condyloid joints. Hence described as two by Sushruta.

In ved it is described as one. It could be taken the articulation between the occipital bone and the odontoid process of 2nd Vertibra that is axis.

२ अवटुः Depression at the back of the neck below the occipital protuberance corresponding to the region of the articulation between the skull and the 1st cervical vertebra.

संख्याक्रमः	सुश्रुते	चरके	आंग्लाऽनुवादः
११०	कक्षधरे (म.) शा. ६।२५		Brachial plexus (ब्रेकियल प्लेक्सस)
१११	लोहिताक्षे (म.) शा. ६।२५		Sacral plexus (सेक्रल प्लैक्सस)
११२	उर्व्यौ (म.) शा. ६।२५		Brachial Arteries (ब्रेकियल आर्टरीज़)
११३	आण्यौ (म.) शा. ६।२५		Space above the Elbow (स्पेस अबाउ दी एल्बो)
११४	कूर्परौ शा. ६।२५	कूर्परौ शा. ७।७	Elbows (एलबोज)
११५	अरत्नी शा. ८।८, हस्तौ सू. ३५।१२	अरत्नी शा. ७।७	Fore Arms with hands (फोर आर्म्स विथ हैण्ड्स)
११६	प्रकोष्ठौ सू. ३५।१२	प्रपाणी वि. ८।११७	Fore arms without hands (फोर आर्म्स विदाउट हैण्ड्स)
११७	इन्द्रवस्ती (म.) शा. ६।२५		Cubital Fossa (क्यूबिटिल फोसा)
११८	कूर्चशिरसी (म.) शा. ६।२५		Lateral ligaments of wrist joint (लैटरल लिगामैण्ट्स् ऑफ रीस्ट जॉइण्ड)
११९	मणिबन्धौ शा. ६।२५		Inter carpal ligaments (इण्टर कारपल लिगामेण्ट्स)
१२०	कूर्चौ (म.) शा. ६।२५		Carpo-metacarpal ligaments (कारपो मेटाकारपल लिगामेण्ट्स)
१२१	पाणी क. १।३७	हस्तौ(हस्ताग्रौ)वि.८।११७	Hands (हैण्ड्स)
१२२	पाणितले सू. ३५।१६	पाणितले सि.३।२९पाणिहृदये शा. ७।१४	Palm of the hand (पाम ऑफ दी हैण्ड)
१२३	तलहृदये (म.) शा. ६।२५		Palmer arches (पामर आर्चिज्)
१२४	क्षिप्रे (म.) शा. ६।२५		First Interosseous space of the hand containing the radial artery (फर्स्ट इण्टर औसीयस स्पेस ऑफ दी हैण्ड कन्टेनिंग दी रेडियल आर्टरी)
१२५	अङ्गुष्ठौ सू. ३५।१२	अङ्गुष्ठौ शा. १।३४	Thumbs (थम्स)

संख्याक्रमः	सुश्रुते	चरके	आंग्लाऽनुवादः
१२६	अङ्गुल्यः सू. ३५।१२	अङ्गुल्यः शा. ८।५२	Fingures (फिंगर्स)
१२७	प्रदेशिन्यौ सू. ३५।१२		Fore fingures; Index fingures (फोर फिंगर्स, इण्डैक्स फिंगर्स)
१२८	मध्यमे सू. ३५।१२		Middle fingures (मिडिल फिंगर्स)
१२९	अनामिके सू. ३५।१२		Ring fingures (रिंग फिंगर्स)
१३०	कनिष्ठिके सू. ३५।१२	कनिष्टिके सि. ३।९	Little fingures लिटिल फिंगर्स
१३१	अङ्गुलिपर्वाणि सू. ३५।१२	अङ्गुलिपर्वाणि वि. ८।११७	Phalanges (फैलेंझीज्)
१३२	नखाः शा. ३।२२	नखाः शा. ७।७, करजाः शा. ८।५२	Nails (नेल्स)
१३३	नखसन्धयः चि. ३।२३		Apparent junctions of the nails with skin (एपैरण्ट जंकशन्स ऑफ दी नेल्स विद स्किन)

मध्यशरीराऽवयवाः

संख्याक्रमः	सुश्रुते	चरके	आंग्लाऽनुवादः
१३४	अङ्गुल्यग्राणि चि. ४०।७०		Tips of the fingures (टिप्स ऑफ दी फिंगर्स)
१३५	मध्यशरीरम् शा. ३।२३ अन्तराधिः सू. ३५।१२ कोष्ठम् शा. ७।७	शरीरमध्यम् सू. ११।४८ अन्तराधिः शा. ७।६ कोष्ठः (महास्रोतः, शरीरमध्यम्, महानिम्नं, आमपक्वाशयश्च) सू. ११।४७	Trunk (ट्रंक)
१३६	वक्षः शा. ५।२७ उरः शा. ३५।१२	वक्षः वि. ८।१०६ उरः शा. ८।५२	Thorax (थोरैक्स)
१३७	पर्शुकाः चि. ३।२९	पर्शुकाः इ. ३।७	Ribs (रीब्ज)
१३८	पार्श्वौ वि. ८।११७	पार्श्वे वि. ८।११७ क्रोडौ सू. २७।३३२	Sides of the thorax (साइड्स ऑफ दी थोरैक्स)
१३९	अपलापौ (म.) शा. ६।२६		Medial walls of the Axilla मीडिअल वौल्स ऑफ दी एग्जिला
१४०	स्तनौ शा. ५।४, कुचौ शा. ३।८, पयोधरौ शा. ४।२४	स्तनौ शा. ४।१४, क्षीराशयौ चि. ३०।२३८, स्तन्याशयौ चि. ३०।२४३	Mammary glands. Breasts (मैमरी ग्लैण्ड्स, ब्रेस्ट्स्)
१४१	स्तनान्तरम् सू. ३५।१३	स्तनान्तरम् वि. ८।११७	Inter mammary regaon (इण्डर मैमरी रीजियन)

संख्याक्रमः	सुश्रुते	चरके	आंग्लाऽनुवादः
१४२	स्तनाग्रे सू. ३५।४		Nipples (निपल्स)
१४३	चूचुकौ शा. ६।२६	पिप्पलकौ शा. ८।५४ स्तनपर्यन्तं त्रि. ८।११७ स्तनमण्डले नि. ३।१५	Areola (एरिओला)
१४४	स्तनमूले (म.) शा. ६।२६		Ligamenta suspensora of mamma (लिगामैण्टा सस्पैंजोरा ऑफ मैमा)
१४५	स्तनस्रोतांसि शा. ५।१०	क्षीरवहाः चि. ३०।२३६	Galactophorus (Lactiferous) ducts (गैलैक्टोफोरस (लैक्टीफैरस) डक्ट्स्)
१४६	स्तनरोहितौ(म.) शा. ६।२६		Internal mammary Arteries (इण्टरनल मैमरी आर्टरीज)
१४७	उदरम् शा. ५।४, जठरम् उ.५०।८,गुदास्थिविवरम् नि. ३।१	उदरम् शा. ७।१४	Abdomen (एबडोमैन)
१४८	नाभिः (म.) शा. ६।२६	नाभिः शा. ८।५२	Umbilicus, navel (अम्बीलिकस, नेवल)
१४९	ज्योतिःस्थानम् शा. ५।५८ नाभिस्तनान्तरम् शा. ५।५८		Regeon contained between the umbilicus and the mammary glands (रीजियन कण्टेण्ड बिट्वीन दी अम्बीलिकस एण्ड दी मैमरी ग्लैण्ड्स्)
१५०	कुक्षी (उदरपार्श्वौ) शा.३।७		Sides of Abdomen (साइड्स ऑफ एबडोमैन)
१५१	पृष्ठम् शा. ५।४	पृष्ठम् त्रि. ८।११७	Back (बैक)
१५२	पृष्ठवंशः शा. ६।२७	पृष्ठवंशः शा. ८।५२ पृष्ठेपिका इ. ३।६	Vertibral column. Spine (वरटीब्रल कोलम)
१५३	बृहत्यौ (म.) शा. ६।२७		Anastomosis around scapula (एनेस्टोमोजीज एराउण्ड स्कैप्यूला)
१५४	पार्श्वसन्धी (म.) शा. ६।२७		Common iliac arteries (कौमन इल्यायक आर्टरीज)

संख्याक्रमः	सुश्रुते	चरके	आंग्लाऽनुवादः
१५५	त्रिकसन्धिः शा. ५।१६ सू. २२।१०		The whole region comprised by the sacro iliac articulations (दी होल रीजियन कौम्प्राइस्ड बाय दी सेक्रो इलायक आर्टीक्यूलेशन्स)
१५६	कटिः शा. ५।२५, श्रोणी शा. ३।८, श्रोणिकाण्डम् शा. ६।२७	कटिः वि ८।११७	Waist (वेस्ट)
१५७	कटिकपाले शा. ५।२६	श्रोणिफलके शा. ७।७	Ilia (इलिया)
१५८	मेदोवहे स्रोतसी शा. ९।१२		
१५९	स्फिचौ शा. ५।४ नितम्बौ (म.) शा.६।२७	स्फिचौ शा. ७।१४	Gluteal regions, Buttocks (ग्लुटिअल रीजियन्स, बटक्स)
१६०	जघने शा. ३।८		Hypogastrium हाइपोगैस्ट्रियम
१६१	कुकुन्दरे (म.) शा.६।२७		Anteior superior spines of ilia (एण्टीरिअर सुपीरिअर स्पाइन्स ऑफ इलिया)
१६२	कटीकतरुणे(म.) शा.६।२७		Two great sciatic notches on both sides (टू ग्रेट साएटिक नॉचीज्)

(अन्तःकोष्ठाऽवयवाः)

संख्याक्रमः	सुश्रुते	चरके	आंग्लाऽनुवादः
१६३	अन्तःकोष्ठम् शा. ४।१६	अन्तःकोष्ठम् सि. २।९	Interior of the trunk (इण्टीरिअर ऑफ दी ट्रंक)
१६४	अपस्तम्भौ (म.) शा. ६।२६	प्राणवहस्रोतांसि वि. ५।७	Two bronchi (टू ब्रोंकाइ)
१६५	फुफ्फुसौ शा. ४।२५	उरः सू. २०।८, श्लेष्मभुवौ शा. ७।११	Lungs (लंग्ज्)
१६६	अनिलायनानि नि. १६।६१		Aircells of the lungs (एरसेल्स ऑफ दी लंग्ज्)
१६७	हृदयम् शा. ३।१८ चेतनास्थानम् शा. ४।३१ रक्ताशयः सू. २२।९	हृदयम् शा. ७।११ आत्मायतनम् वि. ८।४ सर्वाश्रयः वि. २।२५ चेतनाधिष्ठानम्शा७।११ महत् सू. ३०।३, अर्थः सू. ३०।३	Heart (हार्ट)

संख्याक्रमः	सुश्रुते	चरके	आंग्लाऽनुवादः
१६८	हृदयनाड्यः (हृदयसंलग्नस्रोतांसि) ५।२७		Vessels connected with the heart
१६९	क्लोम शा. ४।३१	क्लोम शा. ७।१३	Gall bladder (गॉल ब्लैडर)
१७०	क्लोमनाडी शा. ५।२७		Bile duct (बाइल डक्ट)
१७१	यकृत् शा. ४।३१	यकृत् शा. ७।१३	Liver (लीवर)
१७२	प्लीहा शा. ४।३१	प्लीहा शा. ७।१३	Spleen (स्प्लीन)
१७३	आमाशयः शा. ५।८ श्लेष्माशयः शा. ५।८ पक्तिस्थानम् उ. ३९।१८	आमाशयः शा. ७।१३ कुक्षिः वि. २।३	Stomach (स्टमक)
१७४	अन्नवहे स्रोतसी (आमाशयोर्द्ध्वाऽधरमार्गौ) शा. ९।१२	अन्नवहानि स्रोतांसि वि. ५।९आमाशयोत्तराऽधरमार्गौ वि. २।१०	Oesophagus and duodenum (इसोफेगस एण्ड ड्योडीनम्)
१७५	आमाशयद्वारम् शा. ६।२६		Cardiac end of the stomach (कार्डियाक एंड ऑफ दी स्टमक)
१७६	पित्ताशयः (अग्न्याशयः) शा. ८।५		Pancreas (पैन्क्रियस)
१७७	अन्त्राणि शा. ४।१७	क्षुद्रान्त्रम् चि. १५।१०	Small intestines (स्मॉल इण्टेस्टिंस)
१७८	ग्रहणी उ. ४०।१६८	ग्रहणी चि. १५।५६	Mucous membrane lining small intestines म्यूकस मेम्ब्रेन लाइनिंग स्मॉल इण्टेस्टिंस
१७९	स्थूलान्त्रम् नि. २।५	स्थूलान्त्रम् शा. ७।१३	Large intestines (लार्ज इण्टेस्टिंस)
१८०	स्थूलान्त्रैकदेशः (उपान्त्रम्) नि. १२।६	अन्त्रम् चि. १२।९१	Appendix (एपेण्डिक्स)
१८१	पक्वाशयः सू. २१।६ पक्वाधानम् चि. ३६।१४	पक्वाशयः शा. ७।१३	Ascending colon (एसेण्डिङ्ग कोलन)
१८२	वाताशयः शा. ५।८	वाताशयःसू.२०।८मारुताधिष्ठानम् शा. ६।१९	Transverse colon (ट्रांसवर्स कोलन)
१८३	उण्डुकः शा. ४।२५	पुरीषाधानम् शा. ७।१३ स्थूलगुदम् वि. ५।१२	Descending colon, Pelvic colon (डिसेण्डिङ्ग कोलन, पैल्विक कोलन
१८४	गुदम् (म.) शा. ६।२६ अपानम् नि. १३।५५	गुदम् शा. ६।१९	Rectum (रैक्टम्)

संख्याक्रमः	सुश्रुते	चरके	आंग्लाऽनुवादः
१८५	गुदवलित्रयम् (प्रवाहणी १ विसर्जनी २ संवरणी ३) नि. २।५	गुदवलित्रयम् चि. १४।६	Hauston's valves-transverse folds-three in number-in the rectum (हौस्टन्स वाल्व्ज्)
१८६	गुदौष्ठः नि. २।६		Anus (एनस)
१८७	पुरीषवहे स्रोतसी (स्थूलान्त्रस्य पूर्वापरभागौ) शा. ९।१२	पुरीषवहानि स्रोतांसि वि. ५।१२	Sigmoid colon (सिग्मोइड कोलन)
१८८	वृक्कौ शा. ५।५	वृक्कौ शा. ७।१३	Kidneys (two) (किडनीज्)
१८९	मूत्रवहा नाड्यः नि. ३।२१	मूत्रवहानि स्रोतांसि वि. ५।११	Tubuli uriniferi (the structures of the kidneys (ट्यूब्यूलाइ यूरीनीफेराइ)
१९०	मूत्रवहे स्रोतसी शा. ९।१२ मूत्रनाडी उ. ५८।१५		Ureters (यूरेटर्स)
१९१	बस्तिः (म.) शा. ६।२६ मूत्रबस्तिः चि. ७।३८ मूत्राशयः शा. ५।८ मलाधारः नि. ३।२०	बस्तिः शा. ७।१२ मूत्राऽऽशयः नि. ४।१०	Bladder (ब्लैडर)
१९२	बस्तिशिरः शा. ५।३७	बस्तिशिरः चि. ८।११७ बस्तिशीर्षम् शा. ७।१४	Apex of the bladder (एपेक्स ऑफ दी ब्लैडर)
१९३	बस्तिद्वारम् शा. ४।२२		Neck of the bladder, Internal urethral opening (नेक ऑफ दी ब्लैडर, इन्टर्नल यूरेथ्रल ओपनिंग)
१९४	मेढ्रकाण्डः शा. ५।१३		Pennis without the glans (पेनिस विदाउट दी ग्लैंस)
१९५	मेढ्रम् शा. ७।७ शेफः नि. ३।१८	मेढ्रम् सू. २७।२३३ शेफः शा. ७।१४, मेहनम् चि. २६।१८	Pennis (पेनिस)
१९६	पौरुषम् नि. ३।१९,		Prostate gland (प्रॉस्टेट ग्लैण्ड)
१९७	मेढ्रस्रोतः सू. ११।२९, मूत्रमार्गस्रोतः शा. ४।२२, मूत्रोत्सङ्गः चि. ७।३८ मूत्रमार्गः चि. ३०।१०५	मूत्रस्रोतः चि. ९।३० मूत्रमार्गः चि. २६।३३	Urethra (यूरेथ्रा)
१९८	मणिः उ. ५८।१५ मेढ्रमुण्डम् सू. १८।१९	मणिः चि. ३०।१७५	Glans penis (ग्लान्स पेनिस)

संख्याक्रमः	सुश्रुते	चरके	आंग्लाऽनुवादः
१९९	वृषणौ शा. ५।४	वृषणौ शा. ७।१४ अण्डौ चि. २६।४१	Testes (टैस्टिस्)
२००	मुष्कस्रोतांसि चि. ७।३६	शुक्रवाहीनि स्रोतांसि वि. ५।१०	Seminiferous tubule (structures of the teste that produce semen) (सेमिनीफेरस टयुब्यूल्स)
२०१	शुक्रवहे स्रोतसी शा. ९।१२ शुक्रहरणी चि. ७।३८ रतोमार्गः उ. ३९।२३०		Vas deferans and ejaculatory ducts (वास डैफरन्स एण्ड ईजैक्यूलेटरी डक्ट्स्)
२०२	गर्भाशयः शा. ५।८	गर्भाशयः ३।१८	Uterus (यूटेरस)
२०३	आर्तववहेस्रोतसी शा. ९।१२ फलस्रोतसी चि. ७।३८	रजोवहाः चि. ३०।२०७	Fellopian tubes फैलोपियन टयूब्ज)
२०४	आर्तववहस्रोतसां वर्त्मानि शा. ४।२४		Passages through which menstrual fluid passes पैसेजीज् थ्रू ह्विच मैन्स्ट्रयूअल फ्लुइड पासीज
२०५	गर्भशय्या शा. ५।४३	अन्तःकुक्षि :(गर्भशय्या) शा. ८।२८	Uterine cavity (यूटेराइन कैविटी)
२०६	गर्भः (कललघनाद्यवस्थाविशेषाणामप्यत्रैवान्तर्भावः) शा. ५।१८	गर्भः शा. ४।१०	Fœtus (फीटस)
२०७	गर्भनाभिनाडी शा. ३।३१ रसवहा नाडी शा. ३।३१		Umbilical cord (अम्बीलिकल कोर्ड)
२०८	अपरा शा. ४।२४ जरायुः सू. १।२१	अपरा शा. ६।२१	Placenta (प्लैसेण्टा)
२०९	उल्वः शा. १०।१२		Amniotic cavity ऍमनिआटिक कैविटी
२१०	गर्भच्छिद्रम् शा. ५।३९		Cervical canal of the uterus (सरवाइकल कैनाल आफ थी युटेरस)
२११	योनिः शा. ३।४ भगः शा. ५।२७	योनिः शा. २।७ भगः वि. ८।११७	Vagina (वैजाइना)
२१२	अपत्यपथः शा. ५।३९ विशिखान्तरम् शा. १०।९	अपत्यपथः शा. ६।२२	Cervico vaginal canal; passages through which foetus passes (सरवाइकी वैजाइनल कैनाल)

संख्याक्रमः	सुश्रुते	चरके	आंग्लाऽनुवादः
२१३	योनिमुखम् शा. ३।१०	योनिमुखम् चि. ३०।२३	Vaginal orifice (वैजाइनल ओरीफिस)

अधःशरीराऽवयवाः

संख्याक्रमः	सुश्रुते	चरके	आंग्लाऽनुवादः
२१४	{ सक्थिनी शा. ६।२५ { पादौ शा. ३।१८	{ सक्थिनी शा. ७।६ { पादौ चि. २८।५४	Lower extremeties (लोअर एक्स्ट्रीमीटीज़)
२१५	{ ऊरू (जानुन उपरि वङ्क्षणसन्धिपर्यन्तावूरू) शा. ३।८	ऊरू चि. ८।११७	Thighs थाइज़
२१६	विटपे (म.) शा. ६।२५		Inguinal canals इंग्विनल कनाल्स
२१७	वङ्क्षणौ शा. ६।२५	वङ्क्षणौ शा. ७।१४	Groins ग्रॉइन्स
२१८	लोहिताक्षे (म.) शा. ६।२५		Femoral veins & Nerves फिमोरल व्हेनस् एण्ड नर्व्स
२१९	उर्व्यौ (म.) शा. ६।२५		Femoral arteries (फिमोरल आर्टरीज)
२२०	आण्यौ (म.) शा. ६।२५		Tendons of quodriceps femoris muscles (टेन्डन्स ऑफ् फोर्डीसेप्स फिमोरिस मसल्स)
२२१	जानुनी (म.) शा. ६।२५	जानुनी चि. ८।११७	Knees (नीज़)
२२२	जङ्घे सू. ३५।१२	जङ्घे चि. ८।११७	Legs without feet (लेग्स विदाउट फीट.)
२२३	{ पिण्डिके (जङ्घागुल्फयोरन्तरम्) सू. १५।१२	जङ्घापिण्डिके शा. ७।१४	Calves (काव्ज)
२२४	इन्द्रवस्ती (म.) शा. ६।२५		Popliteal space (पॉप्लीटल स्पेस)
२२५	गुल्फौ (गुल्फसन्धी) चि. १८।२६		Malleoli (मैलिओलाइ)
२२६	गुल्फौ (म.) शा. ६।२५	गुल्फाः शा. ७।७	Ankle joints (ऍंकल जॉइन्ट्स)
२२७	पादौ सू. १५।१२	पादौ चि. ३।१९	Feet (फीट)
२२८	कूर्चशिरसी (म.) शा. ६।२५		Lateral ligaments of ankle joints (लैटरल लिगामेन्ट्स ऑफ् ऐंकल जॉइन्ट्स)

संख्याक्रमः	सुश्रुते	चरके	आंग्लाऽनुवादः
२२९	पाष्र्ण्यौ शा. ६।२५	पाष्र्ण्यौ शा. ७।७ एणीपदे शा. ८।५२	Heels हील्स
२३०	कूर्चौ (म.) शा. ६।२५		Tarso metatarsal ligaments (टारसो मेटाटारसल-लिगामैण्ट्स्)
२३१	पादतले शा. ६।२५	पादतले वि. ८।१०५ पादहृदये शा. ७।१४	Plantar regions (प्लैण्टर रीजियन्स)
२३२	प्रपदौ (पादाग्रे) सू. ३५।१२	प्रपदे सि. २।१७	Transverse arches of foot (ट्रान्सवर्स आर्चीज़ ऑफ फ़ुट)
२३३	तलहृदये (म.) शा. ६।२५		Plantar arches (प्लैण्टर आर्चीज़)
२३४	क्षिप्रे (म.) शा. ६।२५		Regions in which the dorsalis pedis arteries are contained (रीजियन्स इन व्हिच दी डौरसैलिस पीडीस आर्टरीज आर कण्टेण्ड)
२३५	अङ्गुष्ठौ सू. ३५।१२	अङ्गुष्ठौ शा. १।३४	Big toes (बीग टोज)
२३६	अङ्गुल्यः सू. ३५।१२	अङ्गुल्यः शा. ८।५२	Toes (टोज़)
२३७	प्रदेशिन्यौ सू. ३५।१२		Second toes (सैकण्ड टोज़)
२३८	मध्यमे सू. ३५।१२		Middle toes (मिडिल टोज़)
२३९	अनामिके सू. ३५।१२		Fourth toes (फोर्थ टोज़)
२४०	कनिष्ठिके सू. ३५।१२	कनिष्ठिके सि. ३।९	Little (fifth) toes (लिटिल टोज़)
२४१	अङ्गुलिपर्वाणि सू. ३५।४	अङ्गुलिपर्वाणि वि. ८।११७	Phalanges (फैलेंझीज़)
२४२	नखाः शा. ३।३२	नखाः शा. ७।७	Nails (नेल्स)
२४३	नखसन्धयः		Apparent junctions of nails with the skin (ऐपेरण्ट जंकशन्स ऑफ दी नेल्स विथ दी स्किन)
२४४	अङ्गुल्यग्राणि चि. ४०।७०		Tips of the toes (टिप्स ऑफ दी टोज़)

साधारणाः स्थूलाः शारीरभावाः

संख्याक्रमः	सुश्रुते	चरके	आंग्लाऽनुवादः
२४५	त्वचः (सप्त) शा. ४।४ चर्म क. ५।४५	त्वचः (षट्) शा. ७।५	Skin (स्किन)
२४६	अवभासिनी १ (त्वग्भेदाः शा. ४।४)	उदकधरा १	
२४७	लोहिता २	असृग्धरा २	
२४८	श्वेता ३	सिध्मकिलाससम्भवाधिष्ठाना ३	Layers of the skin (लेयर्स ऑफ दी स्किन)
२४९	ताम्रा ४	कुष्ठसम्भवाधिष्ठाना ४	
२५०	वेदिनी ५	अलजीविद्रधिसम्भवाधिष्ठाना ५	
२५१	रोहिणी ६	अरुंष्यधिष्ठाना	
२५२	मांसधरा ७		
२५३	कलाः (सप्त) शा. ४।७		Special epithelium (स्पेशल एपीथेलियम)
२५४	मांसधरा शा. ४।८		
२५५	रक्तधरा शा. ४।१०		
२५६	मेदोधरा शा. ४।१२		
२५७	श्लेष्मधरा शा. ४।१४		
२५८	मलधरा शा. ४।१६		
२५९	पित्तधरा शा. ४।१८		
२६०	शुक्रधरा शा. ४।२०		
२६१	धातवः शा. ५।५	धातवः शा. ६।९	Anabolic processes in the body and their products (एनाबॉलिक प्रोसेसेस इन दी बॉडी एण्ड देअर प्रोडक्ट्स)
२६२	रसः सू. १५।३	रसः सू. २८।४	Chyle (चाइल)
२६३	रसवहानि ([illegible]) उ. ४१।९		Lacteals and lymphatics (लैक्टियल्स एण्ड लिम्फैटिक्स)
२६४	रसवहे धमनी शा. ९।१२	रसायनः चि. २०।१० रसवाहीनि स्रोतांसि वि. ५।१०	Vascular and lymphatic systems of the body (वैस्कुलर एण्ड लिम्फैटिक सिस्टिम्स ऑफ दी बॉडी)
२६५	रक्तम् सू. १४।३ असृक् सू. १४।२० लोहितम् सू. २।२१ शोणितम् सू. १४।४०	रक्तम् चि. ८।१८ असृक् सू. १२।५० लोहितम् सू. ७।१७ शोणितम् सू. २८।४	Blood (ब्लड)

संख्याक्रमः	सुश्रुते	चरके	आंग्लाऽनुवादः
२६६	शोणितफेनः (गर्भाऽवस्थायां यस्मात्फुप्फुसप्रादुर्भावः) शा. ४।२५		
२६७	शोणितकिट्टम् (मातुःकुक्षौ यस्मादुण्डुकप्रादुर्भावः) शा. ४।२५		
२६८	रक्तवहे स्रोतसी शा. ९।१२	रक्तवाहीनि स्रोतांसि वि. ५।१०	Veins and arteries of the liver and spleen; portal system of veins (वेन्स एण्ड आर्टरीज् ऑफ दी लिवर एण्ड स्प्लीन)
२६९	मांसम् सू. १५।७ पिशितम् शा. ४।२९	मांसम् सू. २८।४ पिशितम् चि. १२।२०	Cells (सेल्स)
२७०	मांसजालानि शा. ५।१२		Structures round carpal and tarsal joints including muscles, vessels & bones (स्ट्रक्चर्स राउण्ड कार्पल एण्ड टार्सल जौइण्ट्स इनक्ल्यूडिंग मसल्स, वेसल्स एण्ड बोन्स)
२७१	मांसवहे स्रोतसी शा. ९।१२	मांसवाहीनि स्रोतांसि शा. ५।१०	Blood vessels and lymphatics of surrounding cells of the body (ब्लड वेसल्स एण्ड लिम्फैटिक्स ऑफ सराउण्डिंग सेल्स ऑफ दी बौडी)
२७२	वसा शा. ४।१३	वसा शा. ७।१७ वपा शा. ३।१३	*Great omental fat.* (ग्रेट औमैण्टल फैट)
२७३	मेदः सू. १५।७	मेदः सू. २८।४	Subcutaneous fat (सबक्यूटेनिअस फैट)
२७४	अस्थि शा. ५।१८	अस्थि शा. ७।७	Bone (बोन)
२७५	अण्वस्थीनि शा. ४।१२		Small bones (स्मॉल बोन्स)
२७६	स्थूलाऽस्थीनि शा. ४।१३		Big bones (बिग बोन्स)
२७७	तरुणाऽस्थीनि सू. ११।२९		Cartilages (कारटीलेजीज़)

संख्याक्रमः	सुश्रुते	चरके	आंग्लाऽनुवादः
२७८	अस्थिविवराणि सू. २६।९		Medullary and nutrie[n]t canals of the bone (मैडयूलरी एण्ड न्यूट्रीअ[न्ट] कैनाल्स ऑफ दी बोन्स)
२७९	अस्थिपर्वाणि नि. १।३९	पर्वाणि सू. २३।२९	Segments of bones (सैग मैण्ट्स ऑफ बोन्स)
२८०	अस्थिजाल्यानि शा. ५।१२		Bones of the carpus and tarsus (बोन्स ऑफ दी कार्पस ऐण्ड टार्सस)
२८१	मज्जा सू. १५।७	मज्जा सू. २८।४	Bone-marrow (बोनमैरो)
२८२	शुक्रम् शा. २।१२ रेतः शा. २।४	शुक्रम् सू. २८।४ रेतः नि. ६।९	Semen (सीमैन)
२८३	ओजः सू. १५।२५		Vitamen ? व्हिटामिन ?
२८४	आर्तवम् शा. २।१७ रजः सू. ३।१५ असृक् शा. ३।११ लोहितम् शा. १।१६	आर्तवम् चि. ३०।८ रजः शा. २।३ पुष्पम् शा. ८।२४ असृक् शा. २।६	Menstrual fluid (मैन्स्ट्रूअल फ्लूईड)
२८५	दोषाः शा. ५।५	दोषाः सू. १६।२०	Katabolic processes of the body and their products (कैटाबौलिक प्रोसेसीज ऑफ दी बौडी)
२८६	पित्तम् सू. १५।५	पित्तम् सू. १।५७	Digestive juices (डाइजैस्टिव ज्यूसीज़)
२८७	श्लेष्मा सू. १५।६	श्लेष्मा सू. १।६६ कफः सू. १।५७	
२८८	लोमानि शा. ३।३३	लोमानि शा. ७।१८	Hair (हेअर्)
२८९	रोमराजिः शा. ३।१४		Rows of hair रोज आफ हेअर
२९०	रोमकूपाः शा. ४।६०	लोमकूपाः इ. ९।५	Hair-follicles हेअर फोलीकल्स
२९१	सन्धयः शा. ५।२७	सन्धयः सू. २३।२९	Articulations(आर्टीक्युलेशन्स
२९२	कोराः शा. ५।२७		Ginglimous, trochoid or pivot articulations or hinge joints condyloid and saddle articulations (गिंगलीमस ट्रौकोइड ऑर पीवट आर्टिक्युलेशन्स ऑर हिंज जौइन्ट्स कौण्डीलौइड एण्ड सैडल आर्टिक्युलेशन्स)

संख्याक्रमः	सुश्रुते	चरके	आंग्लाऽनुवादः
२९३	उदूखलाः शा. ५।२७		Ball and socket joints. The immoveable joints between teeth & their sockets are included in it because of the form. (बाल एण्ड सोकेट जौइण्टस)
२९४	सामुद्राः शा. ५।२७		Gomphosis (गौम्फोसीस)
२९५	प्रतराः शा. ५।२७		Arthrodial joints (Joints of carpus, tarsus and vertebra) (आर्थ्रोडिअल जौइण्ट्स)
२९६	तुन्नसेवन्यः शा. ५।२७		Sutures (सूचर्स)
२९७	वायसतुण्डाः शा. ५।२७		Temporo-mandibular articulations (टैम्पोरो मैण्डीब्यूलर आर्टीक्युलेशन्स)
२९८	मण्डलाः शा. ५।२७		
२९९	शङ्खावर्ताः शा. ५।२७		
३००	चेष्टावन्तः सन्धयः शा. ५।२४		Moveable joints (मुवेबल जौइण्टस)
३०१	स्थिराः सन्धयः शा. ५।२४		Immoveable joints (इम-मुवेबल जौइण्टस)
३०२	कण्डराः शा. ५।११ मांसरज्जवः शा. ५।१४	कण्डराः शा. ७।१८	Tendons (टैण्डन्स)
३०३	सेवन्यः शा. ५।१५		Sutures (सूचर्स)
३०४	सीमन्ताः शा. ५।१७		Sutures (सूचर्स)
३०५	सङ्घाताः शा. ५।१६		Collection of bones
३०६	पेश्यः शा. ५।६	पेश्यः शा. ७।१६	Muscles (मसल्स)
३०७	स्नायवः शा. ५।३०	स्नायवः शा. ७।१६	Ligaments (लिगामैण्ट्स)
३०८	स्नायुजालानि शा. ५।१२		Arborisations of fibrous tissue of ligaments (आरबोराइजेशन्स ऑफ फाइबरस टिश्यूज ऑफ लिगामैण्ट्स)
३०९	शिराः शा. ५।४	शिराः चि. १३।७७	Veins (व्हेन्स)

संख्याक्रमः	सुश्रुते	चरके	आंग्लाऽनुवादः
३१०	जाड्यरा शा. ७।२२		Axillary and femoral veins (एग्जीलरी एण्ड फिमोरल व्हेन्स)
३११	शिराजालानि शा. ५।१२		Venous plexus (वीनस प्लेक्सस)
३१२	धमन्यः सू. १४।३	धमन्यः वि. ५।१०	Arteries (आर्टरीज)
३१३	धमनीविवराणि सू. २६।९		Lumen of the arteries (ल्यूमेन ऑफ आर्टरीज)
३१४	प्राणवहाः धमन्यः शा. ४।३१	प्राणवाहीनि स्रोतांसि वि. ५।७	Pulmonary veins and aorta (पल्मूनरी व्हेन्स एण्ड एओरटा)
३१५	प्राणवहे स्रोतसी शा. ९।१२		Pulmonary arteries (left and right) (पल्मूनरी आर्टरीज)
३१६	स्रोतांसि शा. ५।५		Ducts; tubular structures of the body. (डक्ट्स)
३१७	योगवहानि स्रोतांसि शा. ५।५		Autonomic (sympathetic) nervous system (ऑटोनॉमिक नर्व्हस् सिस्टम)
३१८	सञ्ज्ञावहानि उ. ६।१८		Sensory nerves (सैन्सरी नर्व्हस)
३१९	उदकवहे स्रोतसी शा. ९।१२	उदकवहानि स्रोतांसि वि. ५।८	Alimentary and lymphatic systems (एलीमेंटरी एण्ड लिम्फेटिक सिस्टिम्स)
३२०	शाखाः शा. ५।३		Extremities (limbs) of the body (एक्स्ट्रीमीटीज आफ बौडी)
३२१	शाखाऽग्राणि क. ५।१४		Foreparts of the extremities such as hands and feet (फोरपार्टस ऑफ एक्स्ट्रीमीटीज सच एज हैण्ड्स एण्ड फीट)
३२२	विम्बः शा. ५।११		

सूक्ष्माः शारीरभावाः

संख्याक्रमः	सुश्रुते	चरके	आंग्लाऽनुवादः
३२३	चेतनाधातुः शा. ३।१८	चेतनाधातुः शा. १।१६	
३२४	बुद्धिः शा. ३।२०	बुद्धिः शा. ७।१८	Reason (रीज़न)
३२५	चित्तम् उ. ६१।१२ चेतः उ. ६१।१८	चेतः चि. ९।५	
३२६	इन्द्रियाणि शा. १।४	इन्द्रियाणि शा. ७।९-१०	Special senses (स्पेशियल् सेन्सीज़)
३२७	श्रोत्रम् } बुद्धीन्द्रियाणि शा. १।४	श्रोत्रम् } बुद्धीन्द्रियाणि शा. ७।९	
३२८	त्वक्	स्पर्शनम्	
३२९	चक्षुः	दर्शनम्	
३३०	जिह्वा	रसनम्	
३३१	घ्राणम्	घ्राणम्	
३३२	वाक् } कर्मेन्द्रियाणि शा. १।४	वाक् } कर्मेन्द्रियाणि शा. ७।१०	
३३३	हस्तौ	हस्तौ	
३३४	पादौ	पादौ	
३३५	उपस्थम्	उपस्थम्	
३३६	पायुः	गुदम्	
३३७	मनः (उभयात्मकम्) शा. १।४	मनः शा. ७।१८, सत्त्वम् वि. ८।११९	
३३८	मारुताः (पञ्च) नि. १।१२ वायुः नि. १।५ पवनः सू. १४।३८ समीरणः उ. ३९।२७	वायुः सू. १२।८ पवनः शा. २।८	
३३९	प्राणः नि. १।१२	प्राणः सू. १२।८	
६४०	अपानः नि. १।१२	अपानः सू. १२।८	
३४१	उदानः नि १।१२	उदानः सू. १२।८	
३४२	समानः नि. १।१२	समानः सू. १२।८	
३४३	व्यानः नि. १।१२	व्यानः सू. १२।८	
३४४	तेजोधातुः शा. २।३५	तेजोधातुः शा. ८।१२	Bodily heat (बौडीली हीट)
३४५	पित्ततेजः शा. ४।१९ अनलः सू. १४।३८ जाठराऽग्निः सू. ३५।२७		Digestive functions of the body. (डिजैस्टिव फंक्शन्स ऑफ़ दी बौडी)
३४६	अन्तरग्निः चि. ३१।५५	अन्तरग्निः चि. २८।८	

अथ सुश्रुतसन्दिग्धशारीरविवरणम्

(सं. २) शिरः="प्राणाः प्राणभृतो यत्र श्रिताः सर्वेन्द्रियाणि च । यदुत्तमाङ्गमङ्गानां शिरस्तदभिधीयते ॥ च. सू. १७।१२"

(सं. ६) अधिपतिः="मस्तकाभ्यन्तरोपरिष्टात् शिरासन्धिसन्निपातो रोमावर्तोऽधिपतिः" सु. शा. ६।२८ ॥ रोम्णामावर्त इवाऽऽवर्त इति व्युत्पत्त्या मस्तकीयसिराकुल्यासङ्घातोऽभिप्रेतः स्यादिति प्रतिभाति तत्रैव मर्मत्वसम्भवात् । डल्हणस्याऽप्ययमेवाऽभिप्रायः प्रतिभाति । यथा—मस्तकाभ्यन्तरोपरिष्टादिति=मस्तकस्याभ्यन्तरोर्द्ध्वमित्यर्थः । शिरासन्ध्योःसन्निपातो रोमावर्तः, एतत्सन्धिमर्म अर्धाङ्गुलप्रमाणञ्चेति ।

(सं. ८) मस्तुलुङ्गः=अत्र शब्दद्वयम्, मस्तुरित्येकः लुङ्ग इति द्वितीयः । तत्र मस्यते परिणम्यते मस्तु "मसी" परिणामे दिवादिः–तुन् प्रत्ययः । मण्डं दधिभवं मस्त्वित्यभिधानेन दधिमण्डेऽयं रूढः । लुञ्ज्यते चीयते दुग्धाधाख्यो रसो यस्मिन्निति व्युत्पत्त्या "लुजि" हिंसादाननिकेतनेषु इत्यस्माद्घञि न्यङ्क्वादित्वात् (पा. ७।३।५३) कुत्वे लुङ्ग इति निष्पद्यते । अयञ्च स्वतन्त्रतया प्रयुक्तो न दृश्यते, किन्तु मातुलुङ्गः मस्तुलुङ्ग इत्यत्र मातुमस्तुशब्दसहचरित एव । तत्राऽऽद्यप्रयोगे मातुलुङ्गः=स्तनाऽऽमिव रससम्भृतत्वात् फलमध्यवर्ति–रसकोषा गृह्यन्ते । अन्यैः "मीञ्" हिंसायामिति धातोस्तुन्प्रत्ययसमभिव्याहारेण साधितस्तदपेक्षया रेफलोपे लाघवम् । यदा तात्स्थ्यात्ताच्छब्द्यमिति न्यायेन समग्रतनस्य ग्रहणं भवति तदा समग्रफलस्य बोधो भवति । अथ च वृक्षस्याऽपि भवति मस्तुलुङ्ग इत्यत्र तु मस्तुना निर्मिता इव लुङ्गा इति व्युत्पत्त्या शिरोगुहायां ये सहस्रशो ज्ञानतन्तुकोपास्ते मस्तुलुङ्गशब्दवाच्याः । यत्तु डल्हणेन 'मस्तुलुङ्गो विलीनघृताकारो मस्तकमज्जा, इति व्याख्यातं तन्न सम्यक् ! विलीनशब्दस्य प्रकरणवशात्स्थगितमेवार्थः करणीयः । स्थगितघृते केवला द्रवता न, इयति परन्तु सूक्ष्माऽऽवरणविशिष्टपृथक्पृथक्कोशानामभावोऽस्ति । मस्तुलुङ्गेषु तु तद्विद्यमानताऽस्ति, तन्त्रशास्त्रे तान् कोशानेव हृदि विन्यस्य शिरसि मस्तिष्कस्य सहस्रदलपद्मेन सादृश्यं प्रकल्पितमस्ति, अतः मस्तिष्कशब्देन मातुलुङ्गफलवत् समग्रमस्तुलुङ्गसङ्घातो बोध्यते । मस्तुलुङ्गशब्देन तु तदन्तर्गताः सूक्ष्माः कोशा अभिप्रेतव्याः ।

(सं. १०) आवर्तौ="भ्रुवोरुपरि निम्नयोरावर्तौ नाम । तत्र आन्ध्यं दृष्ट्युपघातो वा । सु. शा. ६।२८" भ्रुवोरुपरि निम्नयोरिति प्रदेशकथनम् । सन्धिमर्मणी अर्धाङ्गुले वैकल्यकारिणी चेति डल्हणः ॥

(सं. ११) उत्क्षेपौ="शङ्खयोरुपरि केशान्त उत्क्षेपौ नाम । तत्र सशल्यःपाकात् पतितशल्यो वा जीवेन्नोद्धृतशल्यः । सु. शा. ६।२८" शङ्खयोरिति केशान्ते केशपर्यन्ते, स्नायुमर्मणी अर्धाङ्गुले विशल्यप्राणहरे चेति डल्हणः ॥

(सं. १३) स्थपनी="भ्रुवोर्मध्ये स्थपनी नाम, तत्रोत्क्षेपवत् । सु. शा. ६।२८" भ्रुवोर्मध्ये इति तत्रोत्क्षेपवदिति सशल्यः स्वयं पतितशल्यो वा जीवति उद्धृतशल्यो म्रियते इत्यर्थः । शिरामर्म अर्धाऽङ्गुलं विशल्यघ्नञ्चेति डल्हणः ।

(सं. १६) शङ्खौ="भ्रुवोः पुच्छान्तयोरुपरि कर्णललाटयो र्मध्ये शङ्खौ नाम । तत्र सद्योमरणम् । सु. शा. ६।२८" अस्थिमर्मणी अर्धाङ्गुले इति डल्हणः ।

(सं. २२) नयनबुद्बुदः="विद्याद् द्व्यङ्गुलबाहुल्यं स्वाङ्गुष्ठोदरसम्मितम् । द्व्यङ्गुलं सर्वतः सार्धं भिषङ्नयनबुद्बुदम् ॥ सुवृत्तं गोस्तनाकारं सर्वभूतगुणोद्भवम् ॥ सु. उ. १।१०–११" नयनबुद्बुदमक्षिगोलकः । इति डल्हणः ।

(सं. २४) तारका="नयनत्रिभागपरिणाहा तारका" सु. सू. ३५।१२ नयनत्रिभागो द्वियवप्रमाणः, तत्परिणाहा तारका कृष्णभाग इत्यर्थ इति डल्हणः ॥

(सं. २५) दृष्टिः=" नेत्राऽऽयामत्रिभागन्तु कृष्णमण्डलमुच्यते । कृष्णात्सप्तममिच्छन्ति दृष्टिं दृष्टिविशारदाः ॥ सु. उ. १।१२ कृष्णात्सप्तममिति कृष्णमण्डलात् सप्तमं भागं दृष्टिमिच्छन्ति । दृष्टिविशारदाः शालाकिनः । एतत्प्रमाणं परमतमपि अप्रतिषिद्धत्वादनुमतमेव । तस्य सप्तमांशस्य किं प्रमाणं स्यादिति कथनाय मसूरदलमात्रामित्यग्रे निर्देशः, अथवा शालाकिनां परमतमभिधाय मसूरदलमात्रामिति स्वमतमभिव्यास्यत्याचार्यः । यद्येवं तर्हि आतुरोपक्रमणीये ' नवमस्तारकांशो दृष्टिः' इति कथमुक्तवान् ? सत्यं, महापुरुषाणां पूर्णायुषां भिन्नविषयमभिधानमिति न दोष इति डल्हणः ॥ दृश्यते अनया सा दृष्टिरिति करणव्युत्पत्त्या जायमानत्वात् " मसूरदलमात्रां तु पञ्चभूतप्रसादजाम् । खद्योतविस्फुलिङ्गाभां सिद्धां तेजोभिरव्ययैः ॥ आवृतां पटलेनाऽक्ष्णो बाह्येन विवराकृतिम् । शीतसात्म्यां नृणां दृष्टिमाहुर्नयनचिन्तकाः ॥ सु. उ. ७।३-४" इत्यनेन बहिर्भागान्नेत्रपुत्तलिकाभागो बुद्ध्यारूढो भवति । परन्तु यावता विषयसम्बद्धचक्षुर्दर्शनकेन्द्रं (Macula lutea मैक्यूलाल्युटिया) न प्राप्नोति तावत् साक्षात्कारो न भवत्येव, अतो दृष्टिशब्देन दृष्टिकेन्द्रमेव ग्रहीतव्यम् ।

(सं. ३५) कनीनकगतः सन्धिः=डल्हणेन कनीनकगतः नासासमीपेऽक्षिस्थित इति व्याख्यातम् । कनीनिकाशब्देन नासया सममक्षिसन्धिरभिधीयते इति चक्रः ।

(सं. ४२) नेत्रशिराः=नेत्रस्रोतांसि च=" नेत्रवर्त्म शिराकोशस्रोतःशृङ्गाटकाश्रितम् । मुखनासाक्षिभिर्दोषमोजसा स्रावयेत्तु तत् ॥ सु. उ. १८।५४ " अत्र शिराशब्देन नीलरक्ताऽरुणरक्तवहानां ग्रहणम् । स्रोतःशब्देन च रसवहानां तेजोवहरूपग्राहणस्रोतसाञ्च ग्रहणम् ।

(सं. ४६) अपाङ्गौ=" भ्रूपुच्छान्तयोरधोऽक्ष्णो बाह्यतोऽपाङ्गौ नाम । तत्राऽऽन्ध्यं दृष्ट्युपघातो वा । सु. शा. ६।२८ " भ्रूपुच्छेतिशिरामर्मणी अर्धाङ्गुले वैकल्यकरे चेति डल्हणः ॥

(सं. ६३) फणे=" घ्राणमार्गमुभयतः स्रोतोमार्गप्रतिबद्धे अभ्यन्तरतः फणे नाम । तत्र गन्धाऽज्ञानम् ।" सु. शा. ६।२८ घ्राणमार्गस्य द्वयोः पार्श्वयोरभ्यन्तरविवरद्वारसम्बद्धे फणे, शिरामर्मणी वैकल्यकारिणी चेति डल्हणः । वस्तुतस्तु नासास्थज्ञानतन्तुजालके बोध्ये तत्रैव गन्धाऽज्ञानस्य सम्भवात् ।

(सं. ८८) शृङ्गाटकानि=" घ्राणश्रोत्राक्षिजिह्वासन्तर्पणीनां शिराणां मध्ये सिरासन्निपातः शृङ्गाटकानि, तानि चत्वारिमर्माणि ॥ सु. शा. ६।२८" घ्राणादीन्द्रियचतुष्कतर्पणीनां शिराणां=शिरामुखानां सन्निपातः =संयोगस्थानं शृङ्गाटकानि, तानि चत्वारि घ्राणादितर्पणशिराणां चतुर्भेदात्, इमानि शिरामर्माणि चतुरङ्गुलप्रमाणानीति डल्हणः ।

(सं. ९६-९७-९८) मातृकाः=नीले=मन्ये=मातर इत्येत्यर्थे सञ्ज्ञायाञ्च (पा. ५।३।९७) इति कनि प्रत्यये टापि मातृका इति निष्पद्यते । अयञ्च (मातृकाशब्दः) जनन्यां रूढोऽस्ति अन्यत्र लाक्षणिकः । माति=मानयति बाल्याऽवस्थायां माता । शिशिरसमये दारिद्र्यमनुभूयमाना मातरो मूत्राद्यार्द्रवस्त्रे स्वयं स्वपन्ति स्वपुत्रञ्च शुष्कस्थाने स्वापयन्ति तन्मलमूत्रादिकञ्च प्रतिक्षणं विशोधयन्त्य आसते । एवं स्वसन्ततिकृते मातृतुल्यो नाऽन्यः संरक्षकः पोषकश्च । तद्वत् पोषणकर्तृकाः शरीरे याः प्रणाल्यस्ता मातृकाशब्देन वक्तुमुचिताः, ताश्च यद्यपि सिराधमनीरसायनी साधारणाः सन्ति परन्तु रसायनीभिराहृतस्य (अन्नसारस्य) यदि रसकुल्यया सिराप्रवेशो न स्यात्तर्हि पोषणमार्ग एकान्ततः स्थगित एव स्यात् । सिरा च रसकुल्यया नीतं रसं यकृत्प्लीहानौ प्रापय्य तत्रस्थोष्मणा रञ्जितमाहृत्य हृदयद्वारेण फुफ्फुसं प्रापयति । तत्र चाऽऽकाशामृतेन विशोधितं पुनरप्या-

दाय हृदयं प्रवेशयति । तच्च विशुद्धं रक्तं धमनीद्वारा समन्ताच्छरीरं पोषयति । पुनरपि धमनीप्रतानपोषणादूर्ध्वं यदशुद्धिमापन्नं रक्तं तत् स्वस्मिन्नादाय हृदयप्रवेशपुरःसरं पूर्ववद्विशोधनाय फुफ्फुसं प्रापयति पूर्ववद्विशुद्धं च हृदयं प्रापयति, इत्यहर्निशं शरीरपोषणाय विकृतपरलुनश्च विशोधनाय व्याप्रियमाणाऽऽस्ते । अतोऽत्र सूक्ष्मधीभिर्विचारणीयं मन्मातृकेत्युपाधिः कस्यां प्रणाल्यामाहितुमुचिताऽस्ति । एतत्सूक्ष्मविचारे कृते सिराया एव स उपाधिरुचितः प्रतिभाति । गर्भाऽवस्थायामपि इतरप्रणाल्यपेक्षया शिराया एवाऽधिकतरः शिशुपोषणाय प्रयत्न आस्ते । अतस्तदस्यतामालम्ब्य मातृकेत्युपाधिः सिरायामेवोचित इति निर्विवादम् । "ग्रीवायामुभयतश्चतस्रः सिरा मातृका" (सु. शा. ६।२८) इत्यत्र सुश्रुतेनाऽपि सिरास्वेव मातृकाशब्दो निहितो न तु धमनीषु, तत्र ग्रीवायामप्यन्यां प्रधानसिराणामस्तित्वे केचिद्विद्वांसः संशेरते परन्तु तत्र ग्रीवाबहिर्भागस्तदन्तर्भागश्चेति प्रकल्प्य व्यवस्था करणीया, तत्राऽपि ग्रीवान्तर्महासिरयोर्नीले इति नाम्ना निर्देशः कृतोऽस्ति, तत्रस्थयो र्महाधमन्योस्तु मन्ये इति नाम । तद्बहिर्भागस्थानां स्वरूपं यथा—ग्रीवा पुरःसिरे द्वे, ग्रीवामध्यसिरे द्वे, ग्रीवापार्श्वसिरे द्वे, पृष्ठग्रीवासमागते द्वे, इति मिलित्वाऽष्टसङ्ख्या पूर्यते । अनया रीत्या ग्रीवायामुभयतश्चतस्रः सिरामातृका इति सुश्रुतमूलस्य सन्दर्भः सम्यक्त्वं भजति । "ग्रीवायामिति, उभयतश्चतस्र इति । एकस्मिन्नेकस्मिन् पार्श्वे चतस्रश्चतस्र इत्यर्थः" इति डल्हणव्याख्यानमपि सम्यक्त्वं सम्पद्यते । अत्र महामहोपाध्यायगणनाथसेनैस्तु धमनीनां (शुद्धरक्तवाहिनीनां) मातृकात्वमभिहितं तच्चोपरिनिर्दिष्टप्रकारेण महर्षिमतेन च न सम्यक् । एवं "ग्रीवायां षोडश अन्यथाः । सु. शा. ७।२२" (ड. टी.) अष्टौ चतस्रश्च मर्मसञ्ज्ञा इति । तत्राऽष्टौ मातृकाः द्वे नीले द्वे च मन्ये एता द्वादश मर्मसञ्ज्ञा इत्यर्थः । तथा द्वे कृकाटिकयोः, द्वे विधुरयोः, एवं ग्रीवायामिति षोडशसिराणां स्पष्टीकुर्वता डल्हणेन मातृकेति नाम सिरास्वेव स्वीकृतम् । तासामष्टसङ्ख्याऽप्युभयत्र समानैव दृष्टा, अतो मातृकेति नाम सिराणामेव न धमनीनामिति निर्विवादम् ।

(सं. ९९) विधुरे=" कर्णपृष्ठतोऽधः संश्रिते विधुरे नाम, तत्र बाधिर्यम् ।" सु. शा. ६।२८ कर्णेति-स्नायुमर्मणी किञ्चिन्निम्नाकारे वैकल्यकारिणी चेति डल्हणः । इमे शिरामर्मणी, " ग्रीवायां षोडश धमन्यः । सु. शा. ७।२२ " इत्यत्र डल्हणेनैवविधुरयोः षोडशसङ्ख्यायामेव परिगणनं कृतम् । स्नायुमर्मसु गणनन्तुप्रतिसंस्कर्तृदोषदूषितं प्रतिभाति ।

(सं. १००) कृकाटिके–शिरःपश्चात्कपालस्य त्रीणि पीठानि दक्षिणं वामं मध्यमञ्चेति तत्र ग्रीवा-प्रथमकशेरुकादक्षिणवामगर्तयोर्यथासङ्ख्येन दक्षिणवामपीठे निविशेते मध्यमश्च प्रथमकशेरुकामद्याद्वितीयकशेरुकाशृङ्गे निविशते इत्थं ग्रीवामस्तकसन्धाने सन्धित्रयं जायते तत्र पार्श्वसन्ध्योः कृकाटिकेनाम अनयोर्भङ्गे सति चलमूर्धता स्वभावसिद्धा भवति इममेवाऽऽशयमाचार्यः प्रकटीकरोति यथा "शिरोग्रीवयोः सन्धाने कृकाटिके नामतत्रचलमूर्द्धता" सु. शा. ६।२८ वेदे तु यमःकृकाटमित्यादिस्थले (अ. ९।१२।१)एकवचनप्रयोगात्तत्सन्धानस्य यमेन सादृश्यदानाच्छीघ्रमारकत्वमायाति तत्र (वेदे) मध्यसन्धानं विवक्षितमस्ति तत्रभङ्गे सति सुषुम्णाकाण्डभङ्गाच्छीघ्रमेव पञ्चत्वप्राप्तिर्भवति । वर्तमानसमये मारणाय गलपाशदण्डे इममेवं सन्धानं वियोजयन्तीति रहस्यम् यत्तु महामहोपाध्यायगणनाथसेनैः " कृकाटकं नाम अङ्गुरीयकाऽऽकारं तरुणास्थि स्वरयन्त्राऽधराऽवयवभूतं प्र. शा. भा. २ पृ. १७४" इत्यादिना ग्रीवाऽधस्ताद् वर्तमानतरुणाऽस्थि कृकाटकमिति एकवचनान्तप्रयोगः कृतोऽस्ति स अनादेयः, "शिरोग्रीवयोः सन्धाने कृकाटिके नाम । सु. शा. ६।२८" अनेन वाक्येन प्रत्यक्ष एव विरोधोऽस्ति । तदुक्ततरुणास्थ्नो ग्रीवाशिरःसन्धिस्थितत्वाऽभावात् । तत्तु ग्रीवान्तराधि सन्धिस्थितम् आचार्येण सन्धिरूपे एव मर्मणी परिगणिते, तत्र द्विवचनेन सन्धिद्वयमभिप्रेतम्, उक्ताऽस्थि च द्वित्वस्याऽप्य

भावात् । किञ्च—"शङ्खललाटकृकाटिकाऽक्षिगण्डहनुग्रीवास्कन्धोरःकक्षवक्षःपाणिपादसन्धयः गुरुस्थिरमांसोपचिता मांससाराणाम् ॥ च. वि. ८।१०६" इत्यत्र सन्धीनां परिगणनं यथाक्रमेण कृतमस्ति, तेन कृकाटिकयोः सन्धिरूपत्वं ललाटसन्धिसन्निकृष्टत्वञ्चेति समायातम् । अत्र ललाटशब्देन पुरःकपालं विवक्षितम् । कृकाटिकाशब्देन पश्चात्कपालस्याऽधस्ताद्वर्तमानौ सन्धी अभिप्रेतौ । तदनन्तरञ्च—अक्षिगण्डहनूनां सन्धीन् परिगणय्य ग्रीवासन्धिः परिगणितः । अतोऽत्र कृकाटिकास्थाननिर्णये शङ्काऽवलेशोऽपि नाऽवशिष्टः । ग्रीवाऽन्तराधिसन्धाने वर्तमानं यत्तरुणाऽस्थि तत्र कृकाटिकात्वकल्पनन्तु नितरामज्ञानमूलकमेवेति सुधीभि र्विभावनीयम् ॥

(सं. १०१) अवटुः=कृकाटिकाभागसन्धौ गर्तोऽवटुरिति डल्हणः । ग्रीवापश्चाद्भाग इति स्वामिमुकुटौ । अवटु र्घाटाकृकाटिकेत्यमरेण तु विभिन्नस्थानिकानां त्रयाणामवयवानामेकाऽवयववाचित्वं निर्धारितम् । तदनुसृत्योऽमरपश्चात्तना जनाः कश्चासाववयव इति निबिडाऽन्धकारे न्यविशन्त । तत्राऽमरस्य शारीरज्ञानाऽभावात्तद्विषये तत्स्खलनं नाऽतिदोषावहम् । परन्तु तदर्वाचीनजनै र्गताऽनुगतिकतया तदेव प्रमाणमनुसृत्य कैश्चिदप्यस्मिन्विषये न निरणायीति खिद्यतेऽतितमाञ्चेतः । तत्र वैदिकशारीर एतदवयवाऽदर्शनादायुर्वैदिकसंहिता एव केवलमवलम्बनमवशिष्यते । तत्राऽप्यन्यासां संहितानामस्मद्दौर्भाग्यान्नाममात्रश्रवणात् केवलं चरकसुश्रुताख्ये द्वे एव द्रष्टुं समुपलभ्येते । तत्राऽपि चरके षट्पञ्चाशदवयववर्णने ' एकोऽवटु–, (शा. ७।१४) रित्येतन्मात्रस्य लाभान्न तेन कश्चिन्निर्णयः सम्पद्यते, अतः सुश्रुतस्यैकस्यैवाऽवशेषत्वात्तत्रैव मूलं गवेषयामः । तत्र " ग्रीवायान्तु विवृत्तायां प्रविष्टायामधोऽपि च । अवटावथहन्वोश्च प्रगृह्योन्नमयेन्नरम् ॥ ततः कुशाः समं दत्वा वस्त्रपट्टेन वेष्टयेत् । उत्तानं शाययेच्चैनं सप्तरात्रमतन्द्रितः ॥ सु. चि. ३।३७-३८" इत्यत्र विवृत्तग्रीवाया ऋजूकरणार्थमधःप्रविष्टायाश्चोन्नमनार्थमवटावथ हन्वोश्च ग्रहणस्थानमुक्तम् । तत्रोभयोरपि घाटाग्रहणेन केनाऽपि प्रकारेण कार्यं न सिध्यति, यदा त्वस्मन्निर्णीतकृकाटिकाऽधोभागस्य ग्रहणेनैवर्जूकरणं उन्नमनञ्च सम्भवति । वर्तमानेनाल्पतन्त्रविदः साधारणजनाश्चेदस्यामवस्थायामित्थमेव प्रयतन्त इति प्रत्यक्षसिद्धम् । अत एव कृकाटिकाभागसन्धौ गर्तोऽवटुरिति डल्हणेन सम्यग्व्याख्यातम् । यतो जातबालकस्यायुर्विज्ञानार्थं सुश्रुतेऽङ्गप्रत्यङ्गानां विस्तारायामौ विचारितौ तत्र " केशान्तमस्तकान्तरमेकादशाङ्गुलम् । मस्तकादवटुकेशान्तो दशाऽङ्गुलः । सु. सू. ३५। १२" अत्र मस्तकस्य केशान्तो भागः पुरः पश्चाच्चेति द्विधा वर्तते, तत्र मस्तकस्य मध्यमवधीकृत्य मध्यमस्तकाल्ललाटस्थितो योऽयं केशान्तः स एकादशाऽङ्गुलः । तस्मादेवाऽवधेरवटुसन्निकृष्टो योऽयं केशान्तः स दशाङ्गुल इति वर्णनान्मस्तकपश्चात्कृकाटिकाभागसन्धेरधस्तात् योऽयं गर्तः स एवाऽवटुशब्दवाच्य इति निःशङ्कं समायातम् । किञ्च—"यस्याऽवटूकर्णशिरोहनुस्थो मन्यागतो वाऽप्यनिलोऽन्यतो वा । कुर्याद्रुजोऽति भ्रुवि लोचने वा तमन्यतो वातमुदाहरन्ति ॥ सु. उ. ६।२७ ॥" अत्राऽवटुशब्देन पश्चात्कपालादधस्तात्स्थितः सुषुम्णाकाण्डोऽभिप्रेतस्तमन्तराऽयं सन्दर्भ एव पङ्गुः स्यात् । घाटास्थितवातेनाऽन्यतो वातस्याऽसम्भवात् । एतद्विशेषस्थानाऽज्ञानेन स्वामिमुकुटाभ्यां ग्रीवापश्चाद्भाग इत्येव व्याख्यातम् परन्त्वमराक्रियत्यंशे प्रशंसार्हौ । अतो घाटायामवटुत्वकथनं सर्वथाऽसङ्गतमेवाऽस्तीत्यलमतिविस्तरेण ॥

(सं. १०५) अंसफलके="पृष्ठोपरि पृष्ठवंशमुभयतस्त्रिकसम्बद्धे अंसफलके नाम तत्र बाह्वोः स्वापशोषौ सु. शा. ६।२७" पृष्ठवंशस्यायतत्वात् प्रदेशनियमार्थं पृष्ठोपरीत्युक्तं, त्रिकसम्बद्धे इति ग्रीवाया अंसद्वयस्य च यः संयोगः सः त्रिकः तत्र सम्बद्धे अंसफलके, अस्थिमर्मणी अर्धाङ्गुले वैकल्यकारिणी चेति डल्हणः ।

(सं. ११०) कक्षधरे=" वक्षःकक्षयो र्मध्ये कक्षधरम् । तस्मिन् विद्धे ते एवोपद्रवाः । विशेषतस्तु पक्षाघातः " सु. शा. ६।२५ स्नायुमर्मणी ।

(सं. ११९) मणिबन्धौ=मण्याकृतिसूक्ष्माऽस्थ्नां बन्धः परस्परं सम्मिलितः समुदायो यत्र स मणिबन्धः, यद्वा मणीनां धारणीयरत्नानां बन्धनं यत्र स्थाने स मणिबन्धः, इमे सन्धिमर्मणी । मणिबन्धः पाणिमूलमिति डल्हणः ।

(सं. १३६) उरः="व्यूढमुपचितमुरः " च. शा. ८।५२ अत्रोरः वक्षस्थलवाची, बाहुतः प्रमाणाऽभिधानात् । " उरः शिरोग्रीवा पर्वाण्यामाशयो मेदश्च श्लेष्मणः स्थानानि " च. सू. २०।८ अत्र उरः शब्दः फुफ्फुसद्वयाऽभिधायकः, आमान्नस्थालीवाचको वा, श्लेष्मणः स्थानत्वेन कथनात् ।

(सं. १३९) अपलापौ=" अंसकूटयोरधस्तात्पार्श्वोपरिभागयोरपलापौ नाम तत्र रक्तेन पूयभावं गतेन मरणम् ।" सु. शा. ६।२६ शिरामर्मणी अर्धाङ्गुले कालान्तरप्राणहरे चेति डल्हणः ।

(सं. १४४) स्तनमूले="स्तनयोरधस्ताद् द्व्यङ्गुलमुभयतः स्तनमूले नाम मर्मणी" सु. शा. ६।२६ तत्र कफपूर्णकोष्ठतया (कासश्वासाभ्यां) म्रियते स्तनयोरधस्तादिति उभयतः द्व्यङ्गुलप्रदेशे स्तनमूले मर्मणी, उभयतो ग्रहणात् पृथक् पृथक् स्तनस्याधः स्तनमूलं मर्मेति गम्यते, अन्यथा स्तनयोरधस्तादित्युक्ते मिलितयोरेव स्तनयोरधस्तादितीदृशेऽर्थे स्तनयुगमध्यस्याधस्तात् स्तनमूलमेवं मर्मद्वयमित्यनिष्टं स्यात् । इमे शिरामर्मणी द्व्यङ्गुले कालान्तरप्राणहरे चेति डल्हणः ।

(सं. १४६) स्तनरोहितौ="स्तनचूचुकयोरूर्ध्वं द्व्यङ्गुलमुभयतः स्तनरोहितौ नाम, तत्र लोहितपूर्णकोष्ठतयाकासश्वासाभ्याञ्च म्रियते " सु. शा. ६।२६ स्तनचूचुकयोरूर्ध्वं द्व्यङ्गुले स्तनरोहिते द्वे मर्मणी, तदुक्तं—" स्तनचूचुकयोरूर्ध्वं द्व्यङ्गुलात् स्तनरोहिते । अर्धाङ्गुलमिते मांसमर्मणी परिकीर्तिते ॥ रक्तपूरितकोष्ठस्य कालान्मरणकारिणी ॥ " वृद्धवाग्भटेन " स्तनचूचुकयो रूर्ध्वं द्व्यङ्गुलमुभयतः स्तनरोहिते " इत्युक्तम्—मांसमर्मणी सद्योघातिनी चेति डल्हणः । " अतऊर्ध्वमुदरोरसो र्मर्मस्थानान्यनु व्याख्यास्यामः । सु. शा. ६।२६ " अत्राऽधस्तादूर्ध्वाऽऽरोहणक्रमेण गुदमारभ्याऽपस्तम्भपर्यन्तं द्वादश मर्माणि निर्दिष्टानि । तत्र स्तनमूलस्तनरोहितयो र्दैववशात् व्यतिक्रमो जातो दृश्यते, अतः " स्तनयोरूर्ध्वं द्व्यङ्गुलमुभयतः स्तनमूले नाम मर्मणी, तत्र कफपूर्णकोष्ठतया म्रियते " इति सम्यक्, केवलमधस्तात्स्थाने ऊर्ध्वं करणीयम् । तत्र मांसादधस्तात् पर्शुकासन्धिरस्ति तत्राऽऽघातात्सन्धेर्विस्फारीभावाद्भङ्गाद्वा सन्निकृष्टफुफ्फुसाऽऽघातेन तत्रत्यवातीयव्यापारस्य विघातात् कफपूर्णकोष्ठतेति फलं सम्यक् सम्भवति । एवञ्च " स्तनचूचुकयोरधस्ताद् द्व्यङ्गुलमुभयतः स्तनरोहितौ नाम " इत्यत्रोर्ध्वस्थाने अधस्तादिति पाठः करणीयः । तेन तत्र लोहितपूर्णकोष्ठतया कासश्वासाभ्याञ्च म्रियते इति फलं सम्यक्त्वं भजति । "इण्टरनल मैमरी ऑर्टरी (Intrenal mammary Arteries) इत्याख्यधमन्यास्तत्र सत्त्वेन लोहितपूर्णकोष्ठता युक्तैव । परन्त्वयं व्यत्यासोऽष्टमसूत्रेऽपि सञ्जातोऽस्ति तत्राऽपि स्तनरोहितस्य स्थाने स्तनमूलस्य, स्तनमूलस्य स्थाने स्तनरोहितस्य स्थितिः करणीया, तेन फले विप्रतिपत्ति र्नाऽऽयास्यति । यथास्थितपाठे तु निग्रहस्थानमुपतिष्ठते तद्वारणञ्च दुर्वारमिति बुद्ध्वाऽस्माभिस्तथैव कृतम् । तद् दृष्ट्वा सुधीभिः क्षमणीयम् । अत्र भ्रमश्चेत्तर्हि सोपपत्ति सूचनीयम् । द्वितीयाऽऽवृत्तौ तत्तथैव करिष्याम इति शारीरमर्माऽभिज्ञेषु विनीता प्रार्थना ।

(सं. १४७) गुदास्थिविवरम्=अस्य विवरणमनूकटिप्पण्यां द्रष्टव्यम् ।

(सं. १४८) नाभिः="पक्वाऽऽमाशययोर्मध्ये शिराप्रभवा नाभि र्नाम तत्राऽपि सद्य एव मरणम्।" सु. शा. ६।२६ शिरामर्मेदं चतुरङ्गुलश्चेति डल्हणः ॥

(सं. १४९) ज्योतिःस्थानम्=अत्र ज्योतिःशब्देनाऽन्तरग्निरभिप्रेतः । यथा– "अत्र जिज्ञास्यं किं पित्तव्यतिरेकादन्योऽग्निः ? आहोस्वित् पित्तमेवाऽग्निरिति । अत्रोच्यते न खलु पित्तव्यतिरेकादन्योऽग्निरुपलभ्यते, आग्नेयत्वात् पित्ते दहनपचनादिषु अभिप्रवर्तमाने अग्निवदुपचारः क्रियतेऽन्तरग्निरिति, क्षीणे ह्यग्निगुणे तत्समानद्रव्योपयोगादतिवृद्धे शीतक्रियोपयोगात् आगमाच्च पश्यामो न खलु पित्तव्यतिरेकादन्योऽग्निरिति । तच्च अदृष्टहेतुकेन विशेषेण पक्वाऽऽमाशयमध्यस्थं पित्तं चतुर्विधमन्नपानं पचति, विवेचयति च दोषरसमूत्रपुरीषाणि, तत्रस्थमेव चात्मशक्त्या शेषाणां पित्तस्थानानां शरीरस्य च अग्निकर्मणा अनुग्रहं करोति तस्मिन् पित्ते पाचकोऽग्निरितिसञ्ज्ञा । यत्तु यकृत्प्लीह्नोः पित्तं तस्मिन् रञ्जकोऽग्निरिति सञ्ज्ञा, स रसस्य रागकृदुक्तः । यत्पित्तं हृदयसंस्थं तस्मिन् साधकोऽग्निरिति सञ्ज्ञा, सोऽभिप्रार्थितमनोरथसाधनकृदुक्तः । सु. सू. २१।९–१० " नाभिस्तनान्तरे प्रायः पित्ताशयक्लोमाऽऽमाशयहृदययकृत्प्लीहमुख्यानि परिपाकपरिणामसाधनानि यन्त्राणि समाविशन्ति क्षुद्रान्त्रबृहदन्त्रयोरप्यत्राऽधिकांशेन विद्यमानताऽस्ति अतो 'नाभिस्तनान्तरं जन्तो र्ज्योतिःस्थानं ध्रुवं स्मृत–' मिति युक्तमेव । यद्यपि "यद् दृष्ट्यां पित्तं तस्मिन् आलोचकोऽग्निरिति सञ्ज्ञा, स रूपग्रहणाऽधिकृतः, यत्तु त्वचि पित्तं तस्मिन् भ्राजकोऽग्निरितिसञ्ज्ञा, सोऽभ्यङ्गपरिषेकाऽवगाहविलेपनादीनां क्रियाद्रव्याणां पक्ता छायानाञ्च प्रकाशकः" सु. सू. २१।१० इत्यादौ नाभिस्तनान्तराद्बहिरपि अग्नेः स्थानमुक्तं परन्तु तत्सर्वमपि नाभिस्तनान्तरस्याऽग्नेरेव वैभवः । मूले तु शिष्यबुद्धिवैशद्यार्थं बहिःस्थान्यपि कानिचित्स्थानानि दर्शितानि । अतो नाभिस्तनान्तरं ज्योतिःस्थानं यदुक्तं तत्सम्यगेव । यत्तु "द्रवं स्निग्धमधोगञ्च पित्तं वह्निरतोऽन्यथा" इत्यादिवाक्यैरग्निपित्तयोर्विभिन्नत्वं दृश्यते तद्द्रव्यगुणयोर्भेदः प्रदर्शितः । सूक्ष्मदृष्ट्या प्रदीप्ताऽङ्गारादौ दहनपचनादिशक्तेरेवाऽग्नित्वं मुख्यम्, तदधिष्ठानेऽङ्गारादौ गौणम्, निर्वापिते सति तत्राऽग्नित्वाऽभावात् । तथाऽत्रापि अग्न्याशयाद्युत्थितद्रवे या पाचनादिशक्तिरस्ति सा मुख्याऽग्निशब्दवाच्या, द्रवस्तु तदाधारः अतो भेदस्थले आधाराऽऽधेययोः पार्थक्येन प्रदर्शनमात्रमस्ति, अतो न विरोधः ॥

(सं. १५३) बृहत्यौ="स्तनमूलादृजूभयतः पृष्ठवंशस्य बृहती नाम तत्र शोणिताऽतिप्रवृत्तिनिमित्तैरुपद्रवैर्म्रियते" सु. शा ६।२७ इमे शिरामर्मणी अर्धाङ्गुले कालान्तरप्राणहरे चेति डल्हणः ।

(सं. १५४) पार्श्वसन्धी–"अधःपार्श्वान्तरप्रतिबद्धौ जघनपार्श्वमध्ययोस्तिर्यगूर्ध्वञ्च जघनात् पार्श्वसन्धी नाम तत्र लोहितपूर्णकोष्ठतया म्रियते ।" सु. शा. ६।२७ अधः पार्श्वान्तरप्रतिबद्धौ अधोभागे यत्पार्श्वयोरन्तरं मध्यं तत्प्रतिबद्धौ, जघनपार्श्वमध्ययो रिति पश्चाद्भागपार्श्वभागयोः यौ मध्यौ वामदक्षिणौ भागौ तयोः कथं स्थिताविल्याह–तिर्यगूर्ध्वञ्चेति, उपर्युपरि पर्शुकानां क्रमवृद्धेः सन्धेरपि क्रमवृद्धत्वम् । जघनादिति यद्यपि लुप्ता पञ्चमीयं तेन जघनपश्चाद्भागमाश्रित्य स्थितौ पार्श्वसन्धी, शिरामर्मणी अर्धाङ्गुले कालान्तरप्राणहरे चेति डल्हणः ॥ पार्श्वसन्धित्रिकसन्ध्योश्चाऽऽपाततो दर्शने एकार्थता भासते परन्तु नैकार्थवाचिनावेतौ शब्दौ । त्रिकसन्धिरित्यत्र त्रयाणां सन्धानमात्रं प्रवृत्तिनिमित्तमिति त्रिकटिप्पण्यां निर्णीतमस्ति । स च शरीरभागे कत्र्यांससफलकस्थाने चाऽस्ति । पार्श्वसन्धिस्तु शिरामर्मत्वेन स्वयमेवाऽऽचार्येण लिखितत्वात्, तदनुकूले धमनीशाखे अस्माभिर्निहिते, इति शारीराऽवयवकोष्ठके द्रष्टव्यम् ।

(सं. १५५) त्रिकसन्धिः=त्रयाणां केषाञ्चिदपि यः समूहः स त्रिकमिति व्युत्पत्त्या त्रिवस्तुसद्भावे रूढस्त्रिकशब्दः । स च शारीरे नितम्बद्वयेन पृष्ठाऽस्थ्नः योऽयं सम्बन्धः सोऽयं प्रथमं त्रिकम्,

" कृच्छ्रमूत्रपुरीषत्वमानाहं त्रिकवेदनाम् । सु. नि. १।२४ " " पक्वाऽऽशयस्योऽन्त्रकूजं शूलाऽऽटोपौ करोति च । कृच्छ्रमूत्रपुरीषत्वमानाहं त्रिकवेदनाम् ॥ चरक. चि. २८।२८ " इत्यादिवचनानि सङ्गच्छन्ते । अंसफलकद्वयेन ग्रीवाऽस्थ्ना योऽयं सम्बन्धः स द्वितीयं त्रिकम् । " पृष्ठोपरि पृष्ठवंशमुभयतस्त्रिकसम्बद्धे अंसफलके नाम ॥ सु. शा. ६।२७ " इति सुश्रुतवाक्येन निःसंशयीकृतत्वात् , अंसफलकयोर्बाहुमस्तकाभ्यां सम्बद्धत्वात् । अतएव " आमाशयात्कृत्स्नाभ्योनिभिश्च त्रिकसन्धिजः । सावानेतान् परीक्ष्यादौ ततः कर्माऽऽचरेद्भिषक् " सु. सू. २२।१० इत्यत्र बाहुग्रीवाऽस्थित्रयसङ्घातोऽत्र त्रिकमिति डल्हणः, " चतुर्दशाऽस्थ्नां सङ्घाताः, तेषां त्रयो गुल्फजानुवङ्क्षणेषु, एतेनेतरसक्थि बाहू च व्याख्यातौ, त्रिकशिरसोरेकैकः ॥ सु. शा. ५।१६ इत्यत्र त्रिकशिरसोरित्यत्र त्रिकशब्देन त्रिकद्वयमुपतिष्ठते तत्राऽविशेषाद् द्वयोरपि चेद्ग्रहणं त्रिकेन तर्हि पञ्चदशत्वापत्तौ चतुर्दशास्थिसङ्घाता इति श्लोकस्यैव सौत्कित्र्याहन्येत । अतोऽसफलकाऽस्थिसम्बद्धमेव त्रिकमभिप्रेतमिति प्रतिभाति । जघनस्थत्रिकस्य तु वङ्क्षणसङ्घातेनैव गतार्थत्वान्न तस्याऽत्रोपस्थितिरित्याचार्यस्याऽऽशयः प्रतिभाति, अतएव डल्हणेनाऽपि 'यद्यपि श्रोणिकाण्डभागे त्रिकं प्रसिद्धम्, तथाऽप्यत्र बाहुग्रीवाऽस्थित्रयसङ्घातस्त्रिक उच्यते, इति व्याख्यातम् । अतः शारीरे त्रिकशब्दवाच्यं स्थानद्वयं तदपि सन्धिरूपमेवाऽस्ति, न पुनः रूढ्या कस्मिंश्चिदप्यस्थन्यवयवे वा तत्प्रसिद्धिः । लोके तु जघनाधःसन्धेरेव त्रिकशब्देनाऽधिकः प्रचारो दृश्यते । वर्तमानयेऽपि पञ्चनदीयदेशे ' तिक ' इति नाम्ना प्रसिद्धिरतस्त्रिकसन्धिरस्माभिर्जघनस्थान एव लिखितोऽस्ति वस्तुतस्थानद्वयं बोध्यम् ।

१५९ नितम्बौ=''श्रोणीकाण्डयोरुपर्याशयाच्छादनौ पार्श्वान्तरप्रतिबद्धौ नितम्बौनाम तत्राऽधः कायदौर्बल्याच्च मरणम् । " सु. शा. ६।२७ श्रोणिकाण्डयोरुपर्याशयाच्छादनौ आमाशयपिधायकौ पार्श्वान्तरप्रबद्धौ पार्श्वमध्ये प्रतिबद्धौ नितम्बौ, अस्थिमर्मणी अर्धाङ्गुले कालान्तरप्राणहरे चेति डल्हणः ।

१६१ कुकुन्दरे=''पार्श्वयोर्जघनबहिर्भागे पृष्ठवंशमुभयतो (नातिनिम्ने) कुकुन्दरे नाम मर्मणी तत्र स्पर्शाऽज्ञानमधः-काये चेष्टोपघातश्च । सु. शा. ६।२७ पार्श्वयो र्वामदक्षिणसञ्ज्ञकयोः, जघनबहिर्भागे इति कटपश्चाद्भागे, गयी तु ' पार्श्वजघनभागे' इति पठित्वा पार्श्वयो र्जघनभागे अधोभागे नितम्बे निम्ने कुकुन्दरे इ व्याख्याति सन्धिमर्मणी अर्धाङ्गुले ईषन्निम्नाकारे वैकल्यकरे चेति डल्हणः । कुकुन्दरौ स्फिचोरुपरि उन्नभागाविति चक्रपाणिः ।

(सं. १६२) कटीकतरुणे=" पृष्ठवंशमुभयतः प्रतिश्रोणीकाण्डमस्थिनी कटीकतरुणे नाम मर्मणी तत्रशोणितक्षयात्पाण्डुर्विवर्णो हीनस्वरूपश्च म्रियते " सु. शा. ६।२७ प्रतिश्रोणिकाण्डमित्यत्र ' प्रतिश्रोणिकर्णे' इति केचित् पठन्ति, तत्र श्रोणिकर्णौ लक्ष्यीकृत्य त्रिकसन्निधाने श्रोण्यामुपरि अस्थिमर्मणी, अर्धाङ्गुले कालान्तरप्राणहरे च ।

(सं. १६४) अपस्तम्भौ=" उभयत्रोरसो नाड्यौ वातवहे अपस्तम्भौ नाम तत्र वातपूर्णकोष्ठतया कासश्वासाभ्यां मरणम् । " सु. शा. ६।२६ उरसो द्वयोः पार्श्वयोरित्यर्थः । शिरामर्मणी अर्धाङ्गुलप्रमाणे कालान्तरप्राणहरे चेति डल्हणः ॥

(सं. १६५) श्लेष्मभुवौ (फुफ्फुसौ)=श्लेष्मभुवाविति कथनेन स्पष्टमेव फुफ्फुसद्वयाऽभिधानम् । ऊर्ध्वगणनयाऽपि तदाऽऽख्यानमेव सम्भवति; अस्य व्याख्याने श्लेष्मभुवौ कण्ठपार्श्वयो र्व्यवस्थितौ इत्येतद्भागश्चक्रपाणेः समीचीनः, कठिनौ भागाविति त्वज्ञानमूलकमेव प्रतिभाति । कण्ठस्तनयो र्मध्ये तादृशभागाऽभावात्)

क्रमेणाङ्गानां कथनात्तत्तयोरुपरि च श्लेष्मभुवोः कथनात् । न च वाच्यं श्वासपथयोः कोमलास्थि(तरुणास्थि) शृङ्खलाऽभिप्रेता चक्रपाणिनेति तन्मात्रस्य श्लेष्मभूत्वाऽभावात् । पर्शुकानां गणनस्य त्वस्थिगणनायामेव समाविष्टत्वाच्च । हरिश्चन्द्रे–" उदानवायोराधारः फुफ्फुसः प्रोच्यते बुधै–" रित्यनेन उदानवायोराधारत्वेन तौ परिगणितौ, तत्रैव सप्ताशयगणनायां " श्लेष्माशयः स्यादुरसि तस्मादामाशयस्त्वधः " इत्यनेन श्लेष्माशयत्वेन च तयोरेव परिगणनं कृतम्; श्लेष्मज्वरे वर्तमानेऽपि समये तावेव श्लेष्मणा परिपूर्येते इत्यनेन तयोरेव श्लेष्मभूत्वकथनमुचितं प्रतिभाति ।

(सं. १६६) **अनिलायनानि**=फुफ्फुसाऽधःप्रतिबद्धानि प्राणपवनाऽऽहृताकाशाऽमृतस्य रक्तसंयोजनेन समस्तदेहधात्वादिपोषकाणि ज्ञेयानि, तदुक्तं शार्ङ्गधरेण–" नाभिस्थः प्राणपवनः स्पृष्ट्वा हृत्कमलान्तरम् । कण्ठाद्बहिर्विनिर्याति पातुं विष्णुपदाऽमृतम् ॥ पीत्वा चाम्बरपीयूषं पुनरायाति वेगतः । प्रीणयन् देहमखिलं जीवयञ्जठरानलम् ॥ शा. १।५।४३–४४ ॥ इति ॥

(सं. १६७) **रक्ताशयः**=रक्ताशयशब्देन रसाशयशब्देन च विशेषतो हृदयस्यैव ग्रहणम्, जन्मन आरभ्य मरणपर्यन्तमहर्निशं रक्तचक्रस्याऽसाधारणस्थानत्वात् । यत्तु ' स खल्वाप्यो रसो यकृत्प्लीहानौ प्राप्य रागमुपैतीति, व्रणप्रश्नाऽध्याये शोणितस्य स्थानं यकृत्प्लीहानावित्युक्तं तत्प्रत्यहपीतभुक्ताऽन्नरसस्य रञ्जकत्वाऽभिप्रायेणोक्तमिति बोध्यम् ।

(सं. १७३) **आमाशयः**=आमाशयः, कफाशयः, पित्ताशयः, पक्वाशयः, वाताशयः, इत्येतेषामाशयानां निर्णयार्थं बहुधा जना विप्रवदन्ते । तत्र पाञ्चभौतिकस्य चतुर्विधस्य षड्रसस्य द्विविधवीर्यस्याऽष्टविधवीर्यस्य वाऽनेकगुणस्योपयुक्तस्याऽऽहारस्य यत्र प्रथमसञ्चयः स आमाशयः । यथावस्थितस्याहारस्य तत्र प्रवेशात्स एव कफाशयः "आमाशयः श्लेष्मण आशय" इति सु. सू. २१।६, अन्यच्च "तत्र आमाशयः पित्ताशयस्य उपरिष्टात्, तत्प्रत्यनीकत्वादूर्ध्वगतित्वात्तेजसः, चन्द्र इव आदित्यस्य, स चतुर्विधस्याऽऽहारस्य आधारः, स च तत्रौदकैर्गुणैराहारः प्रक्लिन्नो भिन्नसङ्घातः सुखजरश्च भवति । सु० सू. २१।१२।" इत्यत्र स्पष्टमुक्तत्वात् । गुदश्रोण्योरुपरि नाभेरधस्तात्स्थूलाऽन्त्रप्रथमभागः पक्वाशयः, तत्र परिपक्वादाहारात्सारमलपृथग्भावात् । " सर्वेषामेव सर्वात्मा सर्वलोकनमस्कृतः । स्थित्युत्पत्तिविनाशेषु भूतानामेष कारणम् ॥ अव्यक्तो व्यक्तकर्मा च रूक्षः शीतो लघुः खरः । तिर्यग्गो द्विगुणश्चैव रजोबहुल एव च ॥ अचिन्त्यवीर्यो दोषाणां नेता रोगसमूहराट् । आशुकारी मुहुश्चारी पक्वाधानगुदालयः ॥" सु. नि. १।६–९ ॥ इति वचनाद्रोगसमूहराट्त्वेन स्थानविशेषो नियन्तुं वातस्य नोचितस्तथाऽप्यपानवायो र्बृहदन्त्रस्य मध्यभाग आशय इत्यभिप्रायेण ' पक्वाधानगुदालयः' इति निर्दिष्टमस्ति । अत्र पक्वाधानं पूर्वं निर्णीतः पक्वाशयः । त्रिभागविभक्ता गुदाश्च एषां यन्मध्यं तदालयो यस्य स तादृशोऽपानवायुरवगन्तव्यः । अत्र 'विनाऽपि प्रत्ययं पूर्वोत्तरयोः पदलोपो वा वाच्य' इति वार्तिकेन (वा. ५।३।८३) मध्यशब्दस्य लोपो बोध्यः । वाताशयादधःउण्डुकस्य परिगणितत्वात् । पक्वामाशययो र्मध्ये यदग्निस्थानं तदेव पित्ताशयः स एव चाऽन्याशयः " पित्तं नैयग्रोधमिति (शत० १२।९।१।३) शतपथे पित्ताऽऽशयस्य न्यग्रोधपात्रेण सादृश्यदानादामाशयस्य तदीयद्वादशाऽङ्गुलाऽधरमार्गस्यच मध्ये योऽयमांग्लभाषायां पैंक्रियास (Pancreas) शब्दवाच्योऽवयवस्तस्यैव ग्रहणम् । " पक्वामाशयमध्यं पित्तस्य ॥ सु. सू. २१।६ " इत्यादिना स्पष्टतयोक्तत्वात् । केचित्तु आमाशयाऽधरमार्गस्याऽन्याशये गणनाऽस्तीति वदन्ति तन्न, एतदारभ्य क्षुद्रान्त्रमध्यवर्तिपटलस्य ग्रहणीसञ्ज्ञात्वात् । "षष्ठी पित्तधरा-

नाम या कला परिकीर्तिता। पक्वाऽऽमाशयमध्यस्था ग्रहणी सा प्रकीर्तिता॥ सु. उ. ४०।१६८" इति वाक्येन डयूडीनम् (Duodenum) सञ्ज्ञं क्षुद्रान्त्रैकदेशेन परिगणितम् तथाच—"षष्ठी पित्तधरानाम या चतुर्विधमन्नपानमुपभुक्तमामाशयात्प्रच्युतं पक्वाशयोपस्थितं धारयति॥ सु. शा. ४।१८–१९" चतुर्विधमुपभुक्तमन्नपानमामाशयात्प्रच्युतं पक्वाशयाय गन्तुमुपस्थितं धारयति तच्चाऽन्नं पित्ततेजसा शोषितं यथाकालं जीर्यति। अनेन सूत्रेण न कश्चित्सन्देहोऽवशिष्टस्तस्मान्न डयूडीनम् सहितस्य पैङ्क्रियसस्य पित्ताशयसञ्ज्ञा, किन्तुकेवल्पैङ्क्रियसस्य सेति निश्चितम्। ये तु आमाशयाऽधरमार्गमात्रस्य ग्रहणीसञ्ज्ञामभिदधति तदपि न, तथासति "अपक्वं धारयत्यन्नं पक्वं सृजति चाऽप्यधः।" इति वाक्येन विरोधात्। इयं क्रिया समस्तक्षुद्रान्तर्वर्तिन्या कलाया अस्ति न पुनस्तावत्या एव इति स्पष्टमेव ज्ञापितमाचार्यैः। क्षुद्रान्त्रेष्वपीयं सञ्ज्ञा तात्स्थ्याद्ग्रहणी तदन्तर्वर्तिपटलस्य तु मुख्येति निश्चेतव्यम्। एषां (आमाग्निपक्वाशयानाम्) सोमसूर्योऽनिलैराचार्यः साम्यमापादयति यथा "विसर्गादानविक्षेपैः सोमसूर्योऽनिला यथा। धारयन्ति जगद्देहं कफपित्ताऽनिलास्तथा" इति सु. सू. २१।८ अत्र यद्यपि क्लोम्न एव पित्ताशय इति नामदानमुचितमस्ति यकृतो निस्सृत्य तत्र पित्तस्य सम्भ्रियमाणत्वात्तथापि तस्य क्लोमेति स्वतन्त्रसञ्ज्ञाकरणात्तस्मादुदीरितरसस्याऽग्न्याशयप्रच्युतरसेन साकं सङ्गमत्वात्क्लोमरसादग्न्याशयरसेऽग्निगुणाऽधिक्याच्च न तत्पृथग्गणनम्। "इन्द्रः सुत्रामा हृदयेन सत्यं पुरोडाशेन सविता जजान। यकृत्क्लोमानं वरुणो भिषज्यन्मतस्ने वायव्यैर्न मिनाति पित्तम्॥" यजु. १९।८५ इन्द्रो हृदयेन जजान, किमित्यपेक्षायामन्यवस्तुनोऽदर्शनात्प्रत्यासत्तिन्यायेन हृदयमित्युपतिष्ठते, अर्थात्स्वहृदयेन यज्ञस्य हृदयं जजान जनयामास। हृदयेन हृदयमित्युव्वटमहीधरौ। सुष्ठु त्रायत इति सुत्रामा देवताविशेषो न तु इन्द्रस्य विशेषणम् शब्दोपहितार्थस्य वा अर्थोपहितशब्दस्य मीमांसाशास्त्रे देवतात्वस्वीकारात्। पुरोडाशेन सत्यं सत्यप्रधानं सर्वतोऽभ्यर्हितमङ्गं जजान जनयामास। सत्यमिति सर्वतो यत्प्रधानमङ्गं तदुच्यते तच्च लोकवेदयोः शिर उपतिष्ठते "सहस्रशीर्षा पुरुष" इत्यादौ शिर आरभ्यैवाऽन्याऽङ्गानां वर्णनात् लोकेऽपि उत्तमाङ्गशब्देन तदभिधानात् "प्राणाः प्राणभृतां यत्र श्रिताः सर्वेन्द्रियाणि च। यदुत्तमाङ्गमङ्गानां शिरस्तदभिधीयते॥ च. सू. १७।१२॥" एकचक्रं वर्तते एकनेमि सहस्राक्षरं प्र पुरो निपश्चा। अर्धेन विश्वं भुवनं जजान यदस्यार्द्धं क्व तद्बभूव॥ अथर्व० १०।८।७ एकचक्रमेकनेमि सहस्राक्षरं यत्=यत्र पुरः=प्रथमं वर्तते येन चार्द्धेन विश्वमखिलं भुवनं=जगदथ च समस्तं शरीरं शरीरस्य भुवनसादृश्यात्। अस्य पूर्वोक्तस्याङ्गस्य पश्चाद्=पश्चादर्द्धं क्व तद्बभूवेति समस्तशरीरचक्रसञ्चालकत्वेन शिरसः प्रधानत्वेन सत्यतया परिगणनं कृतम्। योगशास्त्रे समाधौ सहस्रदलकमले गमनात्कालभयाभावादपि तस्य सत्यत्वम्—"पुण्डरीकं नवद्वारं त्रिभि र्गुणेभिरावृतम्। तस्मिन् यद्यक्षमात्मन्वत्तद्वै ब्रह्मविदो विदुः॥ अ. १०।८।४३" इत्यादौ ब्रह्मणः स्थानत्वेन सहस्रशो वर्णनादपि शिरसः सत्यत्वमविचाल्यमिति दिक्। सविता यकृज्जजान। वरुणः भिषज्यन् क्लोमानं क्लोमसञ्ज्ञकमङ्गं मतस्ने=गवीन्यौ जजान। वायव्यैरिति लिङ्गाद्वायोः कर्तुरध्याहारः कर्तव्यः। अतो वायु भिषज्यन् वायव्यैरूर्ध्वपात्रैः पित्तं पाचकरसोत्पादकमग्न्याशयाख्यमङ्गं न मिनाति निर्मिमीते सृजतीत्यर्थः। अत्र नकारः न्युपसर्गार्थे। अथवा पित्ताशयस्याऽपि द्रवाशयत्वात्तत्राऽपि वरुणस्यैव कर्तृत्वेन योगः कार्यः। अस्मिन्मन्त्रे क्लोम्नो भिन्नत्वेनैवाऽग्न्याशयस्य पित्तमितिनाम्ना सृष्टिरुक्ता, तदनुसारेण सुश्रुतेनाऽपि अग्न्याशये पित्ताशयत्वमुक्तम्। रसग्रन्थेषु तु पित्तभावनासु क्लोमस्थरसस्यैव ग्रहणं तत्सम्प्रदायविदः कुर्वन्ति तत्राऽपि अग्न्याशयक्लोम्नोरुभयोरपि रसस्य प्रक्षेपः क्रियेत चेत् सुष्ठुफलवाप्ति र्भविष्यतीत्यस्माकमभिप्रायः॥

(सं. १७६) **अन्नवहे स्रोतसी**="अन्नवहे द्वे, तयोर्मूलमामाशयोऽन्नवाहिन्यश्च धमन्यः" सु. शा. ९।१२ इत्याचाऽऽचार्येण जन्मोत्तरकालिकाऽवस्थामभिप्रेत्योक्तम्। तत्रैवामाशयस्य कार्यकर्तृत्वात्। गर्भाऽवस्था-

यान्तु आमाशयस्थाने मातु हृदयं सौम्यम् तदधीनत्वाद्गर्भजीवनस्य। अन्नवाहिन्यश्च धमन्य इत्यत्र रसवाहिन्यश्च स्रोतांसीति वक्तुमुचितम्, परं धमनीशब्दस्य व्यवहारः स्रोतोमात्रे विकसिततया दृश्यते तदाशयो न विज्ञायते केन कारणेन सञ्जातम्। धमनीव्याकरणे (सु. शा. ९) दर्शितविभागेऽपि अनुग्रानाऽभावात्तत्प्रकरणमेव प्रक्षिप्तमिति निधिटिप्पण्यां प्रदर्शितं चरके चाऽन्नवहानां स्रोतसामामाशयो मूलं वामञ्च पार्श्वमिति कथनमामाशयोर्ध्वाऽन्नमार्गा-येव विस्पष्टं विज्ञापयति।

(सं. १८१) स्थूलान्त्रैकदेशः=अन्त्रम् (उपान्त्रम्)=" भारहरणबल्वद्विग्रहवृक्षप्रपतनादिभि रायासविशेषै र्वायुरतिप्रवृद्धः प्रकुपितश्च स्थूलान्त्रस्यैकदेशं विगुणमादायाऽधोगत्वा वङ्क्षणसन्धिमुपेत्य ग्रन्थिरूपेण स्थित्वाऽप्रतिक्रियमाणे च कालान्तरेण फलकोषं प्रविश्य मुष्कशोफमापादयति ॥ सु. नि. १२।६ " इति वृद्धि-रोगस्य सुश्रुते विशदतया वर्णनाचरकेऽतीव सङ्कोचः कृतोऽस्ति। यत्रयत्र यस्ययस्य रोगस्य सुश्रुते विशदतया वर्णनं तत्रतत्र तस्यतस्य रोगस्य वर्णने सङ्कोच इति स्वाभाविकी परिपाटी। अत्र " व्रणोऽनिलार्द्यं र्वृषणे स्वलिङ्गं रन्त्रं निरेति प्रविशेन्मुहुश्च च. चि. १२।९१ " इत्यनेन यद्यपि अन्त्रमिति सामान्यतयाऽन्त्रोद्देशः कृतोऽस्ति तथापि प्रकरणौचित्यात्स्थूलान्त्रैकदेश (उपान्त्रम्) एवोपतिष्ठते।

(सं. १८५) गुदम्=" तत्र वातवर्चोनिरसनं स्थूलान्त्रप्रतिबद्धं गुदं नाम मर्म, तत्र सद्योमरणम्" (सु. शा. ६।२६) निरसनं प्रेरकं, मांसमर्मेदं चतुरङ्गुलं सद्योघातिचेति डल्हणः। अत्र यद्यपि सुश्रुतेन प्रमाणं न निर्दिष्टम् तथापि निदानस्थाने तत्प्रमाणं द्रष्टव्यम् तथाहि—" स्थूलान्त्रप्रतिबद्धमर्धपञ्चाङ्गुलं गुदमाहुः। तस्मिन् वल्यस्तिस्रोऽध्यर्धाङ्गुलसम्मिताः प्रवाहणी-विसर्जनी-संवरणी चेति चतुरङ्गुलायताः सर्वास्तिर्यगेकाङ्गुलो-च्छ्रिताः ॥ शङ्खावर्तनिभाश्चापि उपर्युपरिसंस्थिताः। गजतालुनिभाश्चापि वर्णतः सम्प्रकीर्तिताः ॥ रोमान्तेभ्यो यवाध्यर्धं गुदौष्ठः परिकीर्तितः ॥ सु. नि. २।६।

(सं. १९०) पुरीषवहानि स्रोतांसि=उदावर्ताद्यवस्थाविशेषाऽभिप्रायेण पुरीषवहानामिति बहुवचन-निर्देशः। तस्यामवस्थायां भवति स्रोतसां कार्यविप्लवः। तत्र मूत्रवहेष्वपि स्रोतःसु पुरीषांशस्य प्रवेशसम्भवात्। अत एवोदावर्तिनो मूत्रे पुरीषगन्धित्वं भवति। यथा—"रूक्षदुर्बलयो र्वातेनोदावृत्तं शकृद्यदा। मूत्रस्रोतः प्रपद्येत विट्संसृष्टं तदा नरः ॥ विड्गन्धं मूत्रयेत्कृच्छ्राद्विड्विघातं विनिर्दिशेत् ॥ च. सि. ९।४७"। अथवा पक्वाश-यत्रातारायोण्डुकवलिमार्गाश्चेत्यवान्तरभेदं प्रकल्प्य बहुवचनस्य यथाकथञ्चिद्गतिः समर्थनीया।

(सं. १९९) पौरुषम्=पुरुषत्वमस्यस्मिन्ननेन वेति व्युत्पत्त्या मेढ्रं ग्राह्यम्। वेदे शिश्नस्य त्रयो भागाः प्रकल्पिताः सन्ति तत्र येन भागेन मेढ्रेजागृति भवति स भागो ग्राह्य इति रहस्यम्।

(सं. २०९) गर्भशय्या="पित्तपक्वाशययोर्मध्ये गर्भशय्या यत्र गर्भस्तिष्ठति। सु. शा. ५।३९" "शङ्खनाभ्याकृति योनि स्त्र्यावर्ता सा प्रकीर्तिता। तस्यास्तृतीये त्वावर्ते गर्भशय्या प्रतिष्ठिता ॥ यथा रोहित-मत्स्यस्य मुखं भवति रूपतः। तत्संस्थानां तथारूपां गर्भशय्यां विदुर्बुधाः ॥ सु. शा. ५।४३—४४"

(सं. २१२) अपरा="गृहीतगर्भाणामार्तववहानां स्रोतसां वर्त्मान्यवरुध्यन्ते गर्भेण, तस्माद्गृहीतगर्भा-णामार्तवं न दृश्यते, ततस्तदधः प्रतिहतमूर्ध्वमागतमपरञ्चोपचीयमानमपरेत्याभिधीयते ॥ सु. शा. ४।२४"

(सं. २१९) विटपे=" वङ्क्षणवृषणयोरन्तरे विटपं नाम तत्र पाण्ड्यमल्पशुक्रता वा भवति। सु. शा. ६।२५" स्नायुमर्मेदं एकाङ्गुलं वैकल्यकरञ्चेति डल्हणः।

(सं. २२१) लोहिताक्षे=" उर्व्या ऊर्ध्वमधो वङ्क्षणसन्धेरूरुमूले लोहिताक्षं नाम तत्र लोहितक्षयेण पक्षाघातः ।" सु. शा. ६।२५ शिरामर्मेदं अर्धाङ्गुलं वैकल्यकरञ्चेति डल्हणः ।

(सं. २२२) उर्व्यां=" ऊरुमध्ये उर्वी नाम तत्र शोणितक्षयात् सक्थिशोषः ।" सु. शा. ६।२५ उर्वीति शिरामर्मेदं एकाङ्गुलं वैकल्यकरञ्चेति डल्हणः ।

(सं. २२३) आण्यौ="जानुन ऊर्ध्वमुभयतस्त्र्यङ्गुलमाणी नाम तत्र शोफाभिवृद्धिः स्तब्धसक्थिता च।" सु. शा. ६।२५ जानुन ऊर्ध्वं त्र्यङ्गुले उभयतः ऊर्ध्वमधश्च । स्नायुमर्मेदं अर्धाङ्गुलं वैकल्यकरञ्चेति डल्हणः ।

(सं. २२४) जानुनी=" जङ्घोर्वोः सन्धाने जानु नाम, तत्र खञ्जता ।" सु. शा. ६।२५ सन्धिमर्मेदं त्र्यङ्गुलप्रमाणं वैकल्यकरञ्चेति डल्हणः ।

(सं. २२७) इन्द्रबस्ती=" पार्ष्णिं प्रति जङ्घामध्ये इन्द्रबस्तिर्नाम तत्र शोणितक्षयेण मरणम् ।" सु. शा. ६।२५ मांसमर्मेदं अर्धाङ्गुलं पार्ष्णिं प्रति त्रयोदशाङ्गुले स्थितं कालान्तरे प्राणहरञ्चेति डल्हणः ।

(सं. २२९) गुल्फौ=" पादजङ्घयोः सन्धाने गुल्फो नाम तत्र रुजः स्तब्धपादता खञ्जता वा ।" सु. शा. ६।२५ सन्धिमर्मेदं द्व्यङ्गुलप्रमाणं वैकल्यकरञ्चेति डल्हणः ।

(सं. २३१) कूर्चशिरसी=" गुल्फसन्धेरध उभयतः कूर्चशिरो नाम तत्र रुजाशोफौ ।" सु. शा. ६।२५ स्नायुमर्म एकाङ्गुलं वैकल्यकरञ्चेति डल्हणः ।

(सं. २३३) कूर्चौ=" क्षिप्रस्योपरिष्टादुभयतः कूर्चो नाम तत्र पादस्य भ्रमणवेपने भवतः ।" सु. शा. ६।२५ उपरिष्टात्, इत्यत्र द्व्यङ्गुल इति शेषः । उभयत इति ऊर्ध्वमधश्च, तस्य कूर्चः इति नाम 'विद्धि' इति शेषः स्नायुमर्मेदं चतुरङ्गुलं वैकल्यकरञ्चेति डल्हणः ।

(सं. २३६) तलहृदये=" मध्यमाङ्गुलीमनुपूर्वेण मध्ये पादतलस्य तलहृदयं नाम तत्रापि रुजाभिर्मरणम् ।" सु. शा. ६।२५ मध्यमाङ्गुलीमनुलक्ष्यीकृत्य क्रमेण पादतलस्य मध्ये तलहृदयं, मांसमर्मेदं अर्धाङ्गुलं कालान्तरप्राणहरञ्चेति डल्हणः ।

(सं. २३७) क्षिप्रे=" पादस्याङ्गुष्ठाङ्गुल्यो र्मध्ये क्षिप्रं नाम मर्म तत्र विद्धस्य आक्षेपकेण मरणम् ।" सु. शा. ६।२५ स्नायुमर्मेदं अर्धाङ्गुलं कालान्तरप्राणहरञ्चेति डल्हणः ।

अथ कलाविवरणम् ।

'अथातो गर्भव्याकरणं नाम शारीरं व्याख्यास्यामः, अग्निः सोमो वायुः सत्त्वं रजस्तमः पञ्चेन्द्रियाणि भूतात्मेति प्राणाः । तस्य खल्वेवं प्रवृत्तस्य शुक्रशोणितस्याऽभिपच्यमानस्य क्षीरस्येव सन्तानिकाः सप्तत्वचो भवन्ति, अवभासिनी १ लोहिता २ श्वेता ३ ताम्रा ४ वेदिनी ५ रोहिणी ६ मांसधरा ७ इति' बाह्यप्रदेशादारभ्याऽन्तः क्षेत्रपर्यन्तं त्वचामवस्थानं सोपपत्ति प्रदर्श्य समानत्वात् समकालमेवाऽन्तस्त्वचो विवरीतुं प्रतिजानीते—'कलाः खल्वपि सप्त सम्भवन्ति, इति । नन्वन्तस्त्वचां स्वीकारे किम्प्रमाणमित्याकाङ्क्षायां हेतुगर्भविशेषणमवतारयति—'धात्वाशयान्तरमर्यादाः सु. शा. ४।४ इति । यतः शारीरधातवो (रक्तमांसादयः) विभिन्नस्थितित्वेन दृश्यन्ते । सा च (विभिन्नता) मर्यादामन्तराऽसम्भवद्रूपाऽस्ति, अतः शारीराणां भावानां मध्ये व्यवच्छेदकेन येन केनाऽप्यवश्यं भवितव्यम् । पूर्वोक्तनाम्नी व्यवहारसौकर्यार्थं तस्य (व्यवधायकस्य) स्वतन्त्रं नाम निर्दिशति—'कलाः' इति । कल्यन्ते=सङ्ख्यायन्ते धातवीयाः सूक्ष्माऽतिसूक्ष्मा अपि मात्रा याभिरथवा कल्यन्ते व्यवच्छेदहेतुनाऽन्तो निक्षिप्यन्त इति कलाः, 'कलगतौ सङ्ख्याने,' इत्यस्मात् 'कलक्षेपे' इत्य-

स्माद्वा रूपसिद्धिः। ता अन्तरा स्थूलाऽवयवानारभ्य सूक्ष्माऽतिसूक्ष्मविभागान् यावदसिद्धेरन्ततः शरीरत्वमेव न सिध्येदिति स्थूलसूक्ष्मविदां सदशाऽऽपत्तिः प्रसज्येत इति हेतोरवश्यमेवाऽनिच्छयाऽपि व्यवधानं स्वीकर्तव्यम्। तच्च स्थूलसूक्ष्मोभयपदार्थव्यवहारे उपयुक्तं स्यादिति विचार्य्य तस्य **कलेति** नामाऽऽचार्येण स्थापितमिति रहस्यम्। तासामस्तित्वं दृष्टान्तेन दर्शयति–**यथेत्यादि**। "यथा हि सारः काष्ठेषु च्छिद्यमानेषु दृश्यते तथा धातुर्हि मांसेषु च्छिद्यमानेषु दृश्यते सु. शा. ४।६" यथा=येन प्रकारेण छिद्यमानेषु काष्ठेषु सारो दृश्यते **तथा**=तेनैव प्रकारेण मांसेषु=मांसाऽवयवविशेषेषु छिद्यमानेषु धातू रक्तादिरूपो दृश्यतेऽतः साऽवयवसर्वधातूनामावरणमस्तीत्यनुमीयते तदेव कलारूपमस्ति। **ननु**? सर्वत्र कलानां स्वरूपमेकप्रकारमस्त्याहोस्विद्भिन्नविभिन्नप्रकारकमित्यत आह–**स्नायुभिश्चप्रतिच्छन्नान्सन्ततांश्चजरायुणा। श्लेष्मणावेष्टितांश्चाऽपिकलाभागांस्तुतान्विदुः** सु. शा. ४।७। "स्नायूश्चतुर्विधा विद्यात्तास्तु सर्वा निबोध मे। प्रतानवत्यो वृत्ताश्च पृथ्व्यश्च सुषिरास्तथा॥ सु.शा. ५।३०" इत्युक्तप्रकाराभिः स्नायुभिः=स्नायुजालैः प्रतिच्छन्नानास्तृतान्। कुत्रचित् जरायुणा=जरायुसदृशजालेन "**विनापि** प्रत्ययं पूर्वोत्तरपदयो र्लोपो वा वक्तव्यः" वा. ३२९९ इति वार्तिकेनोत्तरपदलोपो द्रष्टव्यः। सन्ततान्=व्याप्तान्। कुत्रचित् श्लेष्मणा=श्लेष्मपटलेन अत्राऽप्युत्तरपदलोपः पूर्ववत्। वेष्टितान्निर्म्मितान्। कलानां भागान्=विशेषान् विदुराचार्या इत्यध्याहार्यम्। शरीरे धातूपधातुदोषमलादीनामसङ्ख्यत्वात्तत्तत्कोषाणामावरणानि विचित्राणि २ भवन्ति तेषामाकाराश्चाऽऽधेयपदार्थसदृशा एव प्रकल्प्यास्तेन सहस्रश आकारा अवगन्तव्याः। स्नायु जरायु-श्लेष्मणां त्रीणि पटलानि तन्निर्माणोपादानकारणानि निर्दिष्टानि सन्ति। तत्रैकैकेन द्वाभ्यां त्रिभिश्च वा यथास्थानौचित्ति तन्निर्माणं भवतीति अपि शब्देन सूच्यते। कारणानुरूपं कार्यं भवतीति सिद्धान्तात्सजातीयसूक्ष्माऽवयवसङ्घैः यथोत्तरं स्थूलकार्याण्यारभ्यन्ते सूक्ष्ममृत्कणैः घटवत्। तथा शुक्रशोणितसंयोगेन पुरुषशरीराऽभिनिर्वृत्तिरस्ति। तयो (शुक्रशोणितयोः) श्च जीवत्परमाणुसङ्घातोऽस्ति सौक्ष्म्येण स एव सङ्घात ईश्वरेच्छाऽनुगृहीतो मातृकुक्षौ पाकमवाप्य विकसिताऽवयवः सन् बहिर्निःसरति। स च स्वसमर्यादायां विभक्तजीवत्पाञ्चभौतिकपरमाणुसमूहरूप एवाऽस्ति, अतएव "**खादयश्चेतनाषष्ठा धातवः पुरुषः स्मृतः** ॥ चेतना धातुरप्येकः स्मृतः पुरुषसञ्ज्ञकः। इति चरके शा. १।१४' पञ्चमहाभूतशरीरिसमवायः पुरुष इत्युच्यते, इति सुश्रुते च. सू. १।२१' पुरुषलक्ष्म निष्कृष्टं निदर्शितम्। यद्यप्यत्र धातुशब्देन चेतनासहितखादय उक्ताः परन्त्वत्र व्यवहारसौकर्यार्थमायुर्वेदप्रसिद्धपारिभाषिका रक्तादयोऽथ च प्राकृतानि कफपित्तपुरीषाणि धातुत्वेन व्यवह्रियन्ते। आशयाः=तत्तद्धातुपुञ्जनिवासस्थानानि पारिभाषिकपक्वाद्याशया वा तेषां मध्ये मर्यादास्थापनं येन वस्तुना भवति तत्कलोच्यते। सा चाऽत्र तत्तत्कोषपरिवेष्टनरूपैवाऽस्ति, अतः स्थूलवेष्टनस्य पूर्वमवभासिन्यादिमांसधरान्तानि सप्त नामानि व्याख्यातानि। ननु स्थूल मांसधरसप्तमत्वगनन्तरं यन्मांसमस्ति तस्याऽऽवरकत्वचः किन्नामेत्यपेक्षायां साऽपि मांसधरैवाऽस्ति पूर्वस्याः सकाशाद्भेदप्रदर्शनार्थमस्याः कला इति नाम स्थापितम्।

इयञ्च कला (मांसधरा) अन्यकलाऽपेक्षया स्थूलाऽस्ति, अतोऽस्यां मांस-सिरा-स्नायु धमनीस्रोतसां (स्रोतश्शब्देनज्ञानतन्तूनां ग्रहणं वातस्रोतस्त्वात्) प्रताना भवन्ति। ननु मांसाऽऽवरणत्वेन मांसधरा कलेति नामचेदभिप्रेतं तर्हि मांसधराकलास्थाने मांसधरा त्वगेवाऽस्तु, इति तु भ्रान्त्याऽपि न शङ्क्यम्, या मांसधरा त्वक्त्वेनाऽभिहिता सा व्रीहिद्वयप्रमाणा स्थूलाऽस्ति, इयं कला तु परमसूक्ष्माऽस्ति, "कला स्यान्मूलरैवृद्धौ शिल्पादावंशमात्रके। षोडशांशे च चन्द्रस्य कलनाकालमानयो" रिति मेदिनीकोशात्कौशल्यप्रत्यापितत्त्व विद्या कलाशब्देनोच्यते यथा चतुः षष्टिः कलाः। इत्यादौ। कलानिर्मिता विचित्ररचनाऽपि कलाशब्देनोच्यते। कलायास्तु सूक्ष्मरचनामारत्वव्येश्वरस्य प्रत्यक्षयन्ति यो... ...दर्शीः कलाः। इयं पुन र्नाना ...

संधिक्रियाकारिणीत्वेन शरीरयन्त्रस्य निर्दोष्टी, अतः कथमस्या मांसधरादित्वेषु परिगणनं स्यादिति निर्विवादम्। अत्रस्यः सौश्रुतपाठो लेखकप्रमादाद्गिरकाण्डस्थामवाततथाहि—" यस्यां मांस-सिरा-स्नायु-धमनी-स्रोतांसि प्रताना भवन्ति " इत्याकारको मूलपाठ आसीत्तस्य स्थाने " यस्यां मांसे " इतिसञ्जातः। स एव भ्रान्तेः जननोऽभूदुत्तरकालीनाऽष्टाङ्गसङ्ग्रहकारादीनाम्। तथाच–यथा हि सारः काष्ठेषु छिद्यमानेषु दृश्यते। तथा धातुर्हि मांसेषु छिद्यमानेषु दृश्यते सु. शा० ४।६ अस्य वास्तविकार्थः—यथा छिद्यमानेषु=तदाऽऽवरकरूपत्वक्षु छिन्नासु सारो गर्भो दृश्यते, अन्यथा तु न दृश्यतेऽतोऽनुमीयते-आवरकपदार्थे छिन्ने सर्वत्र तदन्तर्वर्तिपदार्थानां साक्षात्कारो भवति। अतः सर्वेऽपि पदार्थाः सावरकास्सन्ति। अतो मांसेषु=तदावरकभागत्वक्षु तदन्तर्वर्तिकलासु वा छिद्यमानासु तदन्तर्वर्तिनो धातवो दृश्यन्ते अतः स्थूलवेष्टनानां त्वक्षु परिगणनं सूक्ष्माणां कलासु कर्तव्यम्। इति श्लोकस्य यथार्थनियोजनेऽपि सङ्ग्रहकारस्याऽन्यथा भ्रमोऽजनि स यथा—' छिद्यमानेषु काष्ठेषु सारो दृश्यते तथा मांसेषु छिद्यमानेषु कलाधातु दृश्यते इति विपरीताऽऽशयग्रहणेन विपरीतार्थो मनसि कृतोऽवगम्यते ततश्च छिद्यमानेषु मांसेषु किं दृश्यते इत्यपेक्षां शान्तयितुं "यस्तु धात्वाशयान्तरक्लेदोऽवतिष्ठते स यथास्वमूष्माभि र्विपक्वः स्नायुश्लेष्मजरायुच्छन्नः काष्ठ इव सारो धातुसारशेषोरसशेषोऽल्पत्वात्कलासञ्ज्ञः। ता धात्वाशयान्तरमर्यादास्सप्त कलाः (अष्टाङ्गसङ्ग्रह of Vagbhata first शा. ५।२३) इत्येवमष्टाङ्गसङ्ग्रहकारेण क्लिष्टकल्पना कृताऽस्ति। तत्र तावदस्यां कल्पनायां धातवः, आशयाः, तदन्तराणि क्लेदश्चेति विचारणीयाः सन्ति पदार्थाः। तेऽपि गर्भाधानोत्तरं गर्भपाकसमकालीना अभिप्रेताः स्युराहोस्विज्जन्मोत्तरकालीनाः ? न तावद्गर्भविपाकसमकालीनेषु कल्पनाकर्तुरर्थः सिद्ध्यति, तस्मिन्काले शरीरसमवायि (शुक्रशोणित) कारणस्य सर्वस्यापि क्लेदप्रधानत्वात् सर्वाण्यङ्गप्रत्यङ्गानि युगपत्सम्भवन्तीत्याह धन्वन्तरिरिति सिद्धान्तेन रसशेषत्वाऽनुपपत्तेश्च। शेषशब्दो हि अभीष्टकार्यपरिपूर्णतायां कस्मिंश्चिदपि तदीयाङ्गे उपयोगलेशानप्यभजन्ति वस्तूनि प्रतिपादयति। यथा घटनिर्माणोत्तरमुर्वरितो मृत्पिण्डो यथा वा गृहनिर्माणोत्तरमुर्वरितानि मृत्सुधेष्टकाकाष्ठादीनि शेषशब्दोऽभिदधाति तद्वत्। नाऽपि जन्मोत्तरकालीनेषु तेषु तत्रापि शारीराऽवयवसङ्घपरिपोषणार्थमशितलीढखादितस्य रसपरिणतौ शरीरपोषणे निरर्थकानि यानि मज्ज्ञादीनि तानि शेषाण्युच्यन्ते तेषामपरनाम मला इति च निर्दिश्यते। ते मला निरर्थकत्वाद्बहिर्निक्षिप्यन्ते न पुनश्शरीरे सङ्गृह्यन्ते। न वा रससारशेषत्वेन धातुसारशेषत्वेनोपाधिना वाऽभिधीयन्ते, तथाप्यर्थास्तु दर्शनीया एव। दधति–गृहाऽऽस्तरणादीनि कुड्यवदुपस्तम्भकत्वेन स्वेतरधातून् धारयन्ति, उपक्षीणकुड्यादिकं समानजातीयमृन्निक्षेपवत् पोषयन्ति वा, स्वस्थितप्रमाणं वा वर्धयन्ति, । जायमानह्रासं वा येऽवरुन्धन्ति ते धातवः ते च रस १ रक्त २ मांस ३ मेदोऽस्थि ४–५ मज्ज ६ शुक्र ७ ओजः ८ सञ्ज्ञका अष्टौ प्राकृतानि कफमूत्रपुरीषादीनि च। एते च प्रत्येकं स्थूलस्वरूपादारभ्य सूक्ष्माऽतिसूक्ष्मसूक्ष्मतमस्वरूपाः सर्वेऽपि गृह्यन्ते। तेऽपि संसृष्टरूपा वा स्युरसंसृष्टरूपा वा स्युरित्यन्यदेतत्। प्रकृतस्थले (यस्तु धात्वाऽऽशयान्तरक्लेद० इत्यत्र) आशेरते निवसन्ति दोष-धातु-मल डिम्भकाद्या येषु ते आशयाः, आङ्पूर्वाच्छेतेर्घञि साधुः। आयुर्वेदे आशयशब्दः स्थानमात्रवाची "रुधिरं स्रावयेज्जन्तोराशयं प्रसमीक्ष्य वा–चरक सू. २४। १९" इत्यादौ तथैव प्रयोगात्। यः पुन र्वाताशयः १ पित्ताशयः २ श्लेष्माशयः ३ रक्ताशयः ४ आमाशयः ५ पक्वाशयः ६ मूत्राशयः ७ गर्भाशयः ८, सुश्रुत शा. ५।८ इत्येतेषु विशिष्यप्रयुक्तोऽस्ति स एषामन्यभागाऽपेक्षया विलक्षणक्रियात्वमधिकाऽवकाशवत्त्वञ्च द्योतयति, अवकाशवन्त एव आधारा भवितुमर्हन्ति। विशेषाऽवकाशवत्तामेवाऽऽधाराणामायुर्वेदे विशेषेणाऽऽशयशब्देन परिगणितत्वात्। सूक्ष्मविचारे तु पाञ्चभौतिकपरिणामधात्वतिरिक्ते शरीरत्वमेव न सम्भवति " भूतेभ्यो हि परं यस्मान्नाऽस्ति चिन्ता चिकित्सिते सु. शा. १।१३ " " खादय-

श्चेतनाषष्ठा धातवः पुरुषः स्मृतः—च. शा. १।१४ " वचनात् । अन्तरमवकाशाऽत्वविपरिधानान्तर्द्धिभेदता-दर्थ्ये । छिद्राऽऽत्मीयविनाबहिरवसरमध्येऽन्तरात्मनि चेत्यभिधानात् । अन्तर—शब्दस्य अवकाशमध्यार्थावत्रोपयोगिनौ । क्लिन्नतासमवायि कारणं द्रव्यं क्लेदः अत्र धातूनां (रक्तादीनां) आशयानां (हृदयादीनां) मध्ये कः क्लेदोऽस्तीति विचारे उपस्थिते धात्वतिरिक्तो न कश्चित्क्लेद उपलभ्यते ? न च वाच्यं लसीकादिरूपो द्रवोऽस्त्येवेति तस्य रसधात्वतिरिक्तत्वाऽभावात् । न च वाच्यं धातूनां परमसूक्ष्माऽवयवविषयकोऽयं विचार इति तत्रापि धातुत्वाऽनपायात् । अतः सुश्रुतीयाऽऽशयाऽज्ञानमूलकमेवैतत्सङ्ग्रहकारस्य विडम्बनमास्ते । तन्मूलमाश्रित्य "धात्वाशयान्तरक्लेदो विपक्वः स्वं स्वमूष्मणा । श्लेष्मस्नाय्वपराच्छन्नः कलाख्यः काष्ठसारवत्—अष्टाङ्ग हृ. शा. ३।९" " धात्वाशयान्तरे धातो यः क्लेदस्त्ववितिष्ठति । देहोष्मणाऽभिपक्वश्च सा कलेत्यभिधीयते ॥ भा. पू. खं. २६८" इत्यादयः सङ्ग्रहकारादर्वाचीना गताऽनुगतिकतामनुसरन्तः परास्ताः । इममेवसन्देहमाकलय्य शार्ङ्गधरेण कलास्वरूपवर्णनं विहाय तत्परिगणनमेवाऽलेखि "मांसासृङ्मेदसां तिस्रो यकृत्प्लीह्नोश्चतुर्थिका । पञ्चमी च तथाऽन्त्राणां षष्ठी चाऽग्निधरा मता ॥ रेतोधरा सप्तमी स्यादिति सप्त कलाः स्मृताः ॥ शा. पू. खं. ५।६" कदाचिदहर्निशं स्थूलसूक्ष्माऽवयवानविशेषेण परिपोषयन्नविरतं चक्रवत्परिभ्राम्यन्नक्षीणस्वरूपो रसः (क्लेदः) आस्त एवेति वाच्यम् । न हि तेनाऽपूर्वाः काश्चिदपि कलाः सम्पाद्यन्ते, अपि तु गर्भे युगपत्प्रादुर्भूतानामेवाऽवयवानां स रसः परिपोषक इति दिक् । अत्र (कलाः खल्वपि सप्त सम्भवन्ति धात्वाऽऽशयान्तरमर्यादा इति सुश्रुतवाक्ये) धातोरेकस्माद्धातुपरमाणोरपरस्य धातो र्धातुपरमाणो र्मध्ये या मर्यादा सा कला इति एकं लक्षणम्, अनेन सूक्ष्मधात्ववयवानां विभिन्नता सिध्यति । एवमेकस्याऽऽशयस्य द्वितीयस्मादाशयादवयवाद्वा याऽन्तरमर्यादा सा कला इति द्वितीयम् लक्षणम्, सचैका वा स्यादुभयो र्विभिन्ना विभिन्ना वा स्यादित्यन्यदेतत्, अनेन (लक्षणेन) स्थूलाऽवयवानां परस्परं भेदः अथच स्वाऽवकाशः सिध्यति । या धात्वाशयान्तरमर्यादास्ताः कला इत्येवं महर्षेः कलालक्षणमभिप्रेतम् " धात्वन्तरेषु याः सप्त कलाः सम्परिकीर्तिताः । तास्वेकैकामतिक्रम्य वेगं प्रकुरुते विषम् ॥ येनाऽन्तरेण तु कलां कालकल्पं (विषम्) भिनत्ति हि । समीरणेनोह्यमानं तत्तु वेगान्तरं स्मृतम् ॥ सु. क. ४।४५-४६" इत्यत्र महर्षिणैव स्पष्टीकृतत्वात् । तत्र सप्तसङ्ख्या तु धातुसङ्ख्याभेदेनाऽभिप्रेता । तेन समस्तानामपि कलानां ग्रहणं निर्विवादं सिध्यति । एतेनेह धातव आशयाश्चेत्युपलक्षणमिति कैश्चित्कृतकल्पनं नाऽवश्यकम् । आमाशयस्थकलायाः पित्तधरायां मांसधरायां वाऽन्तर्भावः । वस्तुतस्तु मांसधरादिकथनमुदाहरणार्थं बोध्यं न पुनरियत्ताकरणार्थम् ।

नन्तु मांसेऽपि (स्थूलमांसे) रक्तपरमाणवस्तिष्ठन्ति तेषामपि येन केनाऽऽवरणेनयुक्ततयाऽवश्यं भवितव्यमन्यथा सर्वस्याऽपि तरलत्वप्रसङ्गान्मांसत्वादेरप्यनुपपत्तेरितिकृत्वा रक्तपरमाणूनामावरकस्यापि रक्तधरेति नाम । " द्वितीया रक्तधरा नाम मांसस्याऽभ्यन्तरतस्तस्यां शोणितं विशेषतश्च सिरासु यकृत्प्लीह्नोश्च भवति, सु० शा. ४।१० । अस्याः सत्तां दृष्टान्तेन दृढयति—वृक्षाद्यथाऽभिप्रहतात्क्षीरिणः क्षीरमावहेत् । मांसादेवं क्षतात्क्षिप्रं शोणितं सम्प्रसिच्यते सु. शा. ४।११) एवं मेदोधरा ३ श्लेष्मधरा ४ मलधरा ५ पित्तधरा ६ (ग्रहणी) शुक्रधरा ७ इति सप्तसङ्ख्याका भवन्ति । आसां कलानां विवरणं चरके साक्षान्न कृतं तथापि "बाह्यास्त्वचो दूषयिताऽभिघातः काष्ठाश्मशस्त्राऽग्न्यशनीविषाद्यैः । आगन्तुहेतुस्त्रिविधो निजश्च सर्वोऽर्थगात्राऽवयवाऽऽश्रितत्वात् ॥ च. चि. १२।५" इत्यत्र बाह्यास्त्वच इति विशेषणेन कलानामन्तस्त्वच इति नामाऽभिप्रेतमिति बुध्यते । सुश्रुते विस्तृततया वर्णितेषु विषयेषु प्रायश्चरके सङ्क्षेपोऽस्ति "पराऽधिकारे नहि विस्तरोक्ति" रिति चरकीयसिद्धान्तात् । अत एव चरके शरीरे षट् त्वचः उदकधरा १ असृग्धरा २ इत्यादिना

परिगणिता मांसधरा तु निष्कासिता। तस्या रक्तधरायामेव समन्वयमिच्छतीति तदीयसन्दर्भेण स्पष्टं ज्ञायते। चिकित्सायां "अग्न्यधिष्ठानमन्नस्य ग्रहणाद्ग्रहणी मता, च. चि. १५।५६" इत्यत्र षष्ठी पित्तधरा कला गृहीताऽस्ति। नामाऽपि अग्न्यधिष्ठानमिति पित्तधरया समानम्, शरीरे पित्ताग्नेरतिरिक्ताऽग्नेरभावात्। ग्रहणी इति त्र्यक्षरता. समानम् "षष्ठी पित्तधरा नाम या चतुर्विधमन्नपानमुपभुक्तमामाशयात्प्रच्युतं पक्वाशयोपस्थितं धारयति सु. शा. ४।१८" उ. ४०।१६८ वचनात्। न च वाग्भटे चरकोपवचनेन सह न सुश्रुतेनापार्थमेकाऽऽशयतां भजते, तत्र नाभेरुपरीति वाक्यस्य नियमानत्वात्। क्षुद्रान्त्राणि नहि नाभेरुपर्येव वर्तन्ते, अपि तु नाभेः सर्वतः सन्तीति। "परन्तु ध्यमानस्य विदग्धस्याऽन्नभावतः। आशयाच्च्यवमानस्य पित्तमच्छमुदीर्यते॥ पक्वाशयन्तु प्राप्तस्य शोष्यमाणस्य वह्निना। परिपिण्डितपक्वस्य वायुः स्यात्कटुभावतः॥ च. चि. १५ इति तत्रैवोक्तत्वादस्य वाक्यस्येत्थमाशयो वर्णनीयः। आशयात्—आमाशयाद्यदामाशयाऽधराऽन्नवहस्रोतसः सकाशाच्च्युतस्याऽन्नद्रवस्य मध्ये अच्छं पित्तं=पित्तप्रधानो द्रवः (क्लोमाऽग्न्याशयाभ्यामागतम्) उदीर्यते—संयुक्तं भवति। इदमेव पित्तमग्निशब्देनाऽभिप्रेतम् तात्स्थ्यात्ताच्छब्द्यमितिन्यायात्। अस्य च यदधिष्ठानं धारकं तदग्न्यधिष्ठानं क्षुद्रान्त्रान्तर्वर्ति पटलं तदन्नग्रहणाद्ग्रहणी भवति, अन्नग्रहणादिति हेतुना। क्लोमाऽग्न्याशययो रग्न्यधिष्ठानत्वेऽपि न तदन्तर्वर्तिपटलस्य ग्रहणीसञ्ज्ञा। सा च (ग्रहणी) नाभेरुपरिप्रदेशे सम्मिलितस्य अंशरग्निद्रवस्य बलेन=उपस्तम्भभूतया शक्त्या बृंहिता=उपचया सती अपक्वं=यथोचितपाकाऽनवाप्तमन्नद्रवं स्वस्मिन् पाकावधिकालं धारयति=सङ्गृह्णाति। पक्वं=तत्तत्स्थानोचितलब्धपाकम्। अधः—उत्तरप्रदेशं प्रति गन्तुं सृजति=विसृजति। अस्याः (सङ्ग्रहणविसर्जनशक्त्याः) शक्त्या अनन्यथात्वे अदुष्टत्वमुच्यते, विपरीते दुष्टत्वम्। अत एव "दुर्बलाऽग्निबलाद्दुष्टाऽऽममेव विमुञ्चति, च. चि. १५।५७ इति वाक्यं सङ्गच्छते। तात्स्थ्यात्ताच्छब्द्यमिति न्यायेन क्वचित्समस्तक्षुद्रान्त्रेऽपि ग्रहणीशब्द आर्षैः प्रयुज्यमानो दृश्येत चेत्तत्र लाक्षणिकः प्रयोगोऽवगन्तव्यः। ननु ग्रहणीमाश्रितं दोषं विदग्धाऽऽहारमूर्च्छितम् सविष्टम्भप्रसेकार्तिविदाहाऽरुचिगौरवैः। आमलिङ्गान्वितं ज्ञात्वा सुखोष्णेनाऽम्बुनोद्धरेत् च. चि. १५।७३ इत्यत्राऽऽमाशये ग्रहणीशब्दः प्रयुक्तस्तस्य का गतिरिति चेत्तत्र दुष्टायां ग्रहण्यामन्नाऽपरिपाकलक्षणो दोषो भवति तस्य कारणाऽन्वेषणे दुष्टा ग्रहण्येवोपस्थिता भवति, अतः स दोषो ग्रहण्याश्रितो भवत्येव, इत्यभिप्रायेणोक्तं ग्रहणीमाश्रितं दोषमिति न तु तत्र आमाशयस्य ग्रहणीत्वेन कथनमिति निर्विवादम्।

अथ स्रोतोविवरणम्।

"यावन्तः पुरुषे मूर्तिमन्तो भावविशेषास्तावन्त एवाऽस्मिन् स्रोतसां प्रकारविशेषाः, सर्वभावा हि पुरुषे नान्तरेण स्रोतांस्यभिनिर्वर्तन्ते क्षयं वाऽप्यधिगच्छन्ति, स्रोतांसि खलु परिणाममापद्यमानानां धातूनामभिवाहीनि भवन्त्ययनार्थेन ॥ च. वि. ५।३ ॥" इत्यारभ्य पञ्चदशसूत्रपर्यन्तं निर्दिष्टलक्षणे नानासन्देहनिकर उदेति, यदस्थीनि स्रोतांसि कथं वाहयन्तीत्यादीत्यादि। परन्तु "क्षयात्सन्धारणाद्रौक्ष्याद् व्यायामात्क्षुधितस्य च। प्राणवाहीनि दुष्यन्ति स्रोतांस्यन्यैश्च दारुणैः ॥ च. वि. ५।१६ ॥" इत्यारभ्य चतुर्विंशच्छ्लोकपर्यन्तं तत्तद्वहानां स्रोतसां प्रकोपस्य निर्दिष्टनिदानेनाऽयमाशयः समुदेति यत् तत्तदङ्गीयाऽवयवपोषणाय रसरक्तवहानि स्रोतांसि व्याप्रियन्ते इति सर्वसम्मतम्। यत्र यत्र स्थाने यानि यानि गच्छन्ति तत्र तेषु तद्वहत्वेन व्यपदेशः क्रियते यथा—अस्थिवहानि मज्जवहानीत्यादि। कुत्रचित्तु शरीरमलं बहिर्निक्षिपन्ति तान्यपि तद्वहानि कथ्यन्ते तेषु तानि वा वहन्तीति व्युत्पत्तिस्वीकारात्, यथा मलमूत्रवहानीत्यादि। शुक्रवहस्रोतःसु तु उपाधिद्वयम्, शुक्रस्रोतःपो-

षणानि स्रोतांसि शुक्रहारीणि चेति । इममेव भेदं ज्ञात्वा स्रोतःसु तत्तद्वहत्वं निर्धारणीयम् । स्थूलबुद्ध्या तु यथास्थितार्थकरणे हि शरीरऽस्थ्यादिघनपदार्थानां स्रोतःसु वहनत्वाऽयोगात् । "रसाद्रक्तं ततो मांस–" मित्यादिप्रकारेण न हि तत्तद्धातूनां वहानि स्रोतांसि सम्भवन्ति । "सर्वाङ्गनिर्वृत्तिर्युगपदितिधन्वन्तरिः ॥ च. शा. ६।१९ ॥" "सर्वाण्यङ्गप्रत्यङ्गानि युगपत्सम्भवन्तीत्याह धन्वन्तरिर्गर्भस्य सूक्ष्मत्वान्नोपलभ्यन्ते वंशाङ्कुरवच्चूतफलवच्च ॥ सु. शा. ३।३२ ॥" इति सिद्धान्तेन युगपदेव सर्वेषामङ्गानां जायमानत्वात् सतामेवाऽङ्गानां रसभ्रमणचक्रेण पोषणाऽपोषणेन विकाससङ्कोचौ भवत इति शास्त्ररहस्यत्वात् । वर्तमानाऽऽयुर्वेदीयसंहितासु निर्दिष्टवाक्यैस्तु न कश्चित्सिद्धान्तः समभ्युदेति तद्यथा–"नेत्रवर्त्मसिराकोशस्रोतः शृङ्गाटकाऽऽश्रितम् । मुखनासाऽक्षिभिर्दोषमोजसा स्रावयेत्तु तत् ॥ सु. उ. १८।५४ ॥" इत्यत्र स्रोतःशब्देन नेत्रलसीकावाहकं स्रोतोऽभिप्रेतम् । यदवरोधेनाऽनन्तवातादयो रोगाः प्रादुर्भवन्ति । "नासास्रोतोगता रोगास्त्रिंशदेकश्च कीर्तिताः । स्रोतःपथे यद्विपुलं कोशवच्चाऽर्बुदं हि तत् ॥ सु. उ. २२।२० ॥" इत्यत्रनासाविवरमेव स्रोतस्त्वेनाऽभिमतम् । "श्रवणनयनवदनघ्राणगुदमेढ्राणि नव स्रोतांसि नराणां बहिर्मुखानि । एतान्येव स्त्रीणामपराणि च त्रीणि द्वे स्तनयोरधस्ताद्रक्तवहञ्च ॥ सु. शा. ५।१० ॥" इत्यत्र द्रववहानि शुष्काणि च विवराणि स्रोतस्त्वेनाऽभिमतानि । "अत्युच्चभाषणविषाऽध्ययनाऽतिगीतशीतादिभिः प्रकुपिताः पवनादयस्तु । स्रोतःसु ते स्वरवहेषु गताः प्रतिष्ठां हन्युः स्वरं भवति चाऽपि हि षड्विधः सः ॥ सु. उ. ५३।३ ॥" इत्यत्र विवरमात्रं स्रोतस्त्वेन निर्दिष्टम् । "तथामर्मशिरास्नायुसन्धितरुणाऽस्थिसेवनी धमनी गलनाभिनखान्तः शेफःस्रोतःसु अल्पमांसेषु च प्रदेशेषु अक्ष्णोश्च न दद्यादन्यत्र वर्त्मरोगात् । सु. सू. ११।२९ ॥" इत्यत्र शेफोविवरं निर्दिष्टम् । तस्माद्यथासमयं मूत्रशुक्रादीनि वस्तूनि निर्गच्छन्ति । "द्व्यङ्गुले दक्षिणे पार्श्वे वस्तिद्वारस्य चाऽप्यधः । मूत्रस्रोतःपथाच्छुक्रं पुरुषस्य प्रवर्तते ॥ सु. शा. ४।२२ ॥" अत्र शुक्रवहं विवरं निर्दिष्टम् । "मुष्कस्रोत उपघाताद् ध्वजभङ्गः । सु. चि. ७।३६" अत्र शुक्रोत्पादकानि विवराणि गृहीतानि । "मर्माण्यष्टावसम्बुध्य स्रोतोजानि शरीरिणाम् । व्यापादयेद्बहून्मर्त्यांश्छद्मकर्माऽपटुर्भिषक् ॥ सु. चि. ७।३७ ॥" अत्रविवरमात्राणि विवक्षितानि । "गृहीतगर्भाणामार्तववहानां स्रोतसां वर्त्मान्यवरुध्यन्ते गर्भेण । सु. शा. ४।२४ ॥" अत्र च रजोवहविवराण्यभिप्रेतानि । "सञ्ज्ञावहेषु स्रोतःसु दोषव्याप्तेषु मानवः । रजस्तमः परीतेषु मूढो भ्रान्तेन चेतसा ॥ सु. उ. ६१।८" इत्यत्र ज्ञानतन्तूनां स्रोतस्त्वमभिप्रेतम् । प्रसिद्धविवरयुक्तत्वाऽभावेऽपि ज्ञानतन्तूनां वातवहत्वेन तथात्वम् । "यदा तु रक्तवाहीनि रससञ्ज्ञावहानि च । पृथक् पृथक् समस्ता वा स्रोतांसि कुपिता मलाः ॥ मलिनाहारशीलस्य रजोमोहावृतात्मनः । प्रतिहत्याऽवतिष्ठन्ते जायन्ते व्याधयस्तदा ॥ च. सू. २४।२५–२६" यदा मलिनाहारशीलस्य नरस्य कुपिता मलाः पृथक् पृथक् स्थिताः समस्ता वा एकत्र सङ्घीभूय वा रक्तवहानि रसवहानि सञ्ज्ञावहानि च स्रोतांसि प्रतिहत्य अवतिष्ठन्ते तदा रजोमोहाऽऽवृतात्मनः व्याधयो जायन्ते, इत्यर्थाद्रसरक्तसञ्ज्ञावहानां मार्गाणां स्रोतस्त्वेन ग्रहणं कृतम् । "कोपयेन्मृद्रसादींश्च रौक्ष्याद्रक्ष्यं विरूक्षयेत् । पूरयत्यविपक्वैव स्रोतांसि निरुणद्धि च ॥ च. चि. १६।२८ ॥" अत्र स्थूलानि सूक्ष्माणि च शरीरविवराणि सर्वाण्यपि स्रोतस्त्वेनाऽभिप्रेतानि । अतोऽस्मन्निर्दिष्टो मार्ग एवाऽवलम्बनीयः ।

अथ सुश्रुतीयाऽस्थिकोष्ठकम्

सुश्रुते	आंग्लाऽनुवादः
(ग्रीवां प्रत्यूर्ध्वं त्रिषष्टिः ६३)	
शिरःकपालानि ६	1 Occipital (ऑक्सिपिटल) 1 Frontal (फ्रोण्टल) 1 Sphenoid (स्फिनॉइड) 1 Ethmoid (इथमॉइड) 2 Parietals (पेराइटल्स)
शङ्खाऽस्थिनी २	2 Temporals (टेम्पोरल्स)
कर्णाऽस्थीनि ६	6 Ossicles in the ear (ऑसीकल्स इन दी ईअर)
गण्डाऽस्थिनी २	2 Malars (मेलर्स)
नासाऽस्थीनि ९	2 Nasals (नेज़ल्स) 2 Lacrimals (लैक्रीमल्स) 2 Inferior turbinates (इन्फीरिअर टर्बिनेट्स) 2 Maxillæ (मैग्ज़िला) 1 Vomar (वोमर)
ताल्वस्थीनि २	2 Palates (पैलेट्स)
हन्वस्थि १	1 Mandible (मैण्डीबल)
दन्ताः ३२	32 Teeth (टीथ)
कण्ठनाड्यस्थीनि ३	1 Hyoid, 1 Thyroid and cricoid cartilages (हायॉइड, १ थाइरॉइड, १ क्रिकॉइड कार्टिलेजीज़)
(श्रोणिपार्श्वपृष्ठोरःसु ११७)	
पृष्ठाऽस्थीनि ३० (ग्रीवाकशेरुकाः ७, पृष्ठकशेरुकाः १२, कटिकशेरुकाः ११)	7 Cervical vertebræ (सरवाइकल वरटीब्री) 12 Dorsal vertebræ (डॉरसल वरटीब्री) 11 Lumbar 5 sacral 5 and coccyx 1 (लम्बर ५ सैक्रल ५ एण्ड कॉक्सिक्स १)
अंसफलकाऽस्थिनी २	2 Scapulæ (स्कैप्यूली)
पार्श्वाऽस्थीनि ७२	24 Pairs of ribs (पैर्स ऑफ रीब्ज) 24 Heads (articular facets) of ribs 24 Tubercles of the ribs
उरोऽस्थीनि ८	2 Clavicles (क्लैवीकल्स) 6 Sternum (स्टर्नम्)
श्रोण्यस्थीनि ५ (नितम्बाऽस्थिनी २, गुदाऽस्थिनी २, भगाऽस्थि १)	2 Ilia (इलिया) 2 Ischia (इस्किया) 1 Ospubis (ऑसप्यूबिस)

सुश्रुतः	आंग्लाऽनुवादः
(शाखासु १२०)	
बाह्वस्थिनी २	Pair of humerus (पैर ऑफ ह्यूमरस)
प्रकोष्ठाऽस्थीनि ४	4 { 2 Ulna 2 Radius (अल्ना २, रेडियस २
ऊर्वस्थिनी २	Pair of Femur (पैर ऑफ फीमर)
जान्वस्थिनी २	2 Patella (पैटेला)
जङ्घाऽस्थीनि ४	4 { Pair of tibia (पैर ऑफ टिबिआ) Pair of fibula (पैर ऑफ फिब्यूला)
गुल्फसंश्रिताऽस्थिनी २	2 Astragalus; Talus (ऐस्ट्रैगैलस; टैलस)
पार्ष्ण्यस्थिनी २	2 Os calcis (ऑस कैल्सिस)
हस्तकूर्चास्थीनि १६	16 Carpal bones (कार्पल बोन्स)
पादकूर्चाऽस्थीनि १०	10 Tarsal bones (टार्सल बोन्स)
हस्ततलाऽस्थीनि ८ }	8 Metacarpal bones (मेटाकार्पल बोन्स)
पादतलाऽस्थीनि ८ }	8 Metatarsal bones (मेटाटार्सल बोन्स)
अङ्गुल्यस्थीनि ६०	60 Phalanges (फैलेञ्जीज)

सुश्रुताऽस्थिगणनायां " त्रीणि सपष्ठीन्यस्थिशतानि वेदवादिनो भाषन्ते, शल्यतन्त्रे तु त्रीण्येव शतानि। तेषां सार्विंशमस्थिशतं शाखासु, सप्तदशोत्तरं शतं श्रोणिपार्श्वपृष्ठोरःसु, ग्रीवां प्रत्यूर्द्ध्वं त्रिषष्टिः, एवमस्थ्नां त्रीणि शतानि पूर्यन्ते ॥ सु.शा.५।१५" इति सूत्रे निर्दिष्टा सङ्ख्या सम्यगास्ते। वेदे (अथर्ववेदे) "द्वादश प्रधयश्चक्रमेकं त्रीणि नभ्यानि क उ तच्चिकेत। तत्राहतास्त्रीणि शतानि शङ्कवः षष्टिश्च खीला अविचाचला ये॥ अ.१०।५।४" इतिमन्त्रे खीलाशब्देन लघ्वस्थीनि निर्दिष्टानि शङ्कुशब्देन च स्थूलानि, तानि मिलित्वा षष्ठ्यधिकत्रिशतान्युद्दिष्टानि। परन्तु विशेषतो विभागाऽदर्शनात् कस्मिन्नङ्गे कियन्ति सन्तीति सुश्रुतेनाऽपि दर्शयितुं यत्नो न कृतः। स्वतन्त्रे (शल्यतन्त्रे) शस्त्रक्रियार्हाणि यानि षोडशत्रयादूर्ध्वमपि विभक्तानि दृश्यन्ते तद्वर्णनं मनसि निधाय त्रिशतसङ्ख्यां निर्दिश्य शाखासु विंशत्यधिकशतं, श्रोणिपार्श्वपृष्ठोरःसु सप्तदशोत्तरं शतं, ग्रीवां प्रत्यूर्द्ध्वं त्रिषष्टिरितीयत्ता निर्दिष्टा। तत्र " एकैकस्यां तु पादाङ्गुल्यां त्रीणि त्रीणि तानि पञ्चदश, तलकूर्चगुल्फसंश्रितानि दश, पार्ष्ण्यामेकं, जङ्घायां द्वे, जानुन्येकं, एकमूराविति त्रिंशदेवमेकस्मिन् सक्थ्नि भवन्ति. एतेनेतरत्सक्थिबाहू च व्याख्यातौ ॥ सु. शा. ५।१८" अत्राङ्गुष्ठे द्वे एवाऽस्थिनी प्रत्यक्षदृश्ये स्तः कथं सुश्रुते त्रीणि सङ्ख्यातानीति प्रत्यक्षवादिनो विप्रवदन्ते। तत्राऽयमाचार्यस्याऽभिसन्धिः—स्वस्वतलानि मुक्त्वा चतस्रोऽङ्गुल्यो यथा विभिन्नस्थितिका क्रियावत्यश्च भान्ति तथा नाऽङ्गुष्ठस्य मर्यादा व्यवच्छिद्यते। तस्य सञ्चलनादिकं स्वतलाऽस्थिसंयुक्तमेव भवति, अतस्स स्वतलास्थिसंयुक्त एव ग्रहीतव्यस्तथा कृते च तत्र त्रीण्यस्थीनि सन्त्येवेति निःसंशयमङ्गुलिषु पञ्चदशाऽस्थीनीति। किञ्च-केचित्पाश्चात्यविद्वांसोऽप्यङ्गुष्ठेषु तलाऽस्थीनि न सन्त्येव किन्तूर्द्ध्वतनाऽस्थ्येवाऽन्तः प्रविष्टमिति कथयन्ति, अतोऽपि एकैकस्यां पादाऽङ्गुल्यां त्रीणि त्रीणि तानि पञ्चदशेति सुश्रुतीयगणना सम्यक्त्वं भजति। " तलकूर्चगुल्फसंश्रितानि दश" अत्राऽङ्गुष्ठतलस्याऽङ्गुष्ठेन सह परिगणनादुर्वरितान्यङ्गुलितलाऽस्थीनि चत्वारि ४। " केशादिशोधनः कूर्चः कूर्चा चित्रादिसाधिनी" इत्यादि लोकव्यवहारात् कङ्कतिका (कङ्घीति प्राकृते) प्रभृतयः कूर्चशब्दवाच्यास्तत्समानाऽऽकृतित्वात्कूर्चाऽस्थीनि प्रतिपादं पञ्च ५। यत्तु " षट्कूर्चास्ते हस्तपादग्रीवामेढ्रेषु, हस्तयोर्द्वौ, पादयोर्द्वौ, ग्रीवामेढ्रयोरेकैकः ॥ सु. शा. ५। १३" इत्यत्र कूर्चशब्दोऽभिहितः सोऽपि चित्रलेखन्या (लोके कूंचीति प्रसिद्धवस्तुना) सादृश्यात् शाखाऽस्थिसङ्घातानामुपरिभागानां नामानि निर्दिष्टानि, तेऽपि भागा=अस्थिसङ्घातान् संश्रिताः, अस्थिसङ्घाताश्च तानाश्रयन्ति सम्बन्धस्य द्विष्ठत्वात्। उभयथाऽपि कूर्चसंश्रितानीति सम्यक्त्वं भजति। अत्र " हार्नले " प्रभृतिभिः सुश्रुतस्य कूर्चसंश्रिताऽस्थिविषयतया ज्ञानं नाऽसीदिति प्रतिभातीत्युक्तं तत्त्वविचारकृतम्। यद्याचार्यस्य तज्ज्ञानं नाऽभविष्यत् कथं तर्हि " तलकूर्चगुल्फसंश्रितानि दश" तीयत्तां निरदेक्ष्यत्। अतोऽत्र विषये सुश्रुतस्य नाऽज्ञानमासीत् किन्त्वत्र तदीयसूत्रसङ्कलनार्थमज्ञाय ते (हार्नलेप्रभृतय) एव भ्रमगह्वरे पतिता इति निर्विवादम्। तदनुयायिनान्तु कथैव दूरेऽपास्ता, अन्यचक्षुषा पश्यन्तो वराका ईदृशेऽर्थजटिले सूत्रे किं ज्ञास्यन्तीति।

जङ्घाऽन्तोऽधोभागो यत्र स्थिरो भवति तदुच्यते गुल्फाश्रितश्चैकम्। एतत्स्थानीयसन्धिरप्येतन्नाम्ना समागच्छतीत्यन्यदेतत्। एषां (कूर्चगुल्फसंश्रितानां) चाऽस्थ्नां मण्याकृतित्वाद्धस्तयोरेतानि मणिनामानि भजन्ते। तेषां बन्धः सङ्गठनं यत्राऽस्ति स प्रदेशो मणिबन्धशब्देनोच्यते। तान्त्रिकनये वर्णादिन्यासे प्रसिद्धश्चाऽयं सङ्केतः। प्रतिपादं पार्ष्ण्यामेकमस्थि १। जङ्घायां ह्रस्वं स्थूलञ्चेति द्वे अस्थिनी २। जानुनि=जङ्घोर्वोः सन्धाने प्रतिपादमेकमस्थि १। प्रत्यूर्वेकमूर्वस्थि नाम १। अथ न्यासः—१५+४+५+१+१+२+१+१=३०+३०=६०॥ प्रतिहस्तं मण्यस्थीन्यष्टौ ८। प्रकोष्ठाऽस्थिनी द्वे २। प्रकोष्ठप्रगण्डाऽस्थ्नां सन्धानप्रदेशस्य कूर्परनाममात्रम्, न तु स्वतन्त्रं तत्र किञ्चिदस्थि, अतः प्रगण्डाऽस्थ्येकम् १। अथ न्यासः—१५+४+८+२+१=३०+३०=

६० ॥ अथ सर्वासु शाखासु मिलित्वा सविंशमस्थिशतम् १२० । "एतेनेतरत्सक्थियाह्व च व्याख्यातौ" इति कथनस्याऽयमेवाऽभिप्रायो बोध्यः । पादाऽपेक्षया हस्तयोरेककूर्चाऽस्थ्नोऽधिकत्वात्त्रिंशत्सङ्ख्या पूर्णा भवतीति शाखाऽस्थिविभाजकं सूत्रं सम्यग्वर्तते । वर्तमानपाश्चात्यविच्छेदेऽपीयत्येव सङ्ख्याऽस्ति ॥

मध्यशरीरविभाजके वाक्ये श्रोणिपार्श्वपृष्ठोरांसीति चत्वारोऽन्तर्विभागाः प्रकल्पिताः। अत्रोदरस्य गणनन्तु प्रमादादेव सञ्जातमिति प्रतिभाति, उदरगुहायां कस्यचिदप्यस्थ्नोऽभावात्। केचित्तु भगाऽस्थ्याचार्येणोदरे परिगणितं भवेदित्यनुमिन्वन्ति परन्तु तन्न समीचीनम्, तस्य त्रिकसंश्रितमेकमित्यनेन श्रोण्यामेवाऽऽगतत्वादित्यनूकटिप्पण्यां सविस्तरं वर्णितमन्यथा श्रोण्यामस्थिपञ्चकस्याऽभाव एवोपस्थास्यते । "पार्श्वे षट्त्रिंशदेकस्मिन् द्वितीयेऽप्येवम् ॥ सु. शा. ५।१९" इति प्रतिपार्श्वं द्वादशपर्शुकानां सत्त्वाच्चतुर्विंशतिः, तासां योऽयं भागो वक्षोऽस्थिसंलग्नतरुणाऽस्थिभिः सन्धीयते चिपिटाकारः स स्थालकशब्देन याज्ञवल्क्यादिभिः स्वीकृतः । तदनन्तरं योऽयमुच्छ्वसितो भागस्तस्याऽर्बुदाकृतित्वादुच्यतेऽर्बुदसञ्ज्ञः । एवं प्रति पर्शुकां त्रयो भागा भवन्ति ते मिलित्वा द्वासप्ततिः । पृष्ठे त्रयस्त्रिंशत् त्रिंशद्वा इत्यस्योपपत्तिः सविस्तराऽनूकटिप्पण्यां द्रष्टव्या ।

"अष्टावुरसीति" उरःफलकं त्रिभागविभक्तम्, ऊर्ध्वाऽधस्तनयो र्भागयोरेकैकमस्थि, मध्यभागस्त्वस्थिचतुष्टयात्मकः, इति मिलित्वा षट् । अक्षकसञ्ज्ञे द्वे तयोः सम्मेलनेऽष्ट सङ्ख्या सम्पद्यते तत्सहितस्यैवोरस्त्वात् । "अंसफलके द्वे" इत्यस्य स्थाने सम्प्रत्युपलभ्यमानसुश्रुतीयपुस्तकेषु "द्वे अक्षकसञ्ज्ञे" इति पाठः समुपलभ्यते परन्तु स लेखकप्रमादादिनाऽपभ्रष्ट इति प्रतिभाति तथात्वे उरसीयाऽष्टाऽस्थ्नां गणनैव दुर्घटा स्यात् न च वाच्यं शतपथादिवत् तरुणाऽस्थीन्यादाय सा (सङ्ख्या) पूर्तिमायास्यतीति ? शतपथे सप्तदशाऽस्थ्नां परिगणितत्वेनाऽष्टत्वस्य वक्तुमशक्यत्वात् । तस्मादंसफलकस्थाने अक्षकस्य प्रमादाल्लेखः सञ्जातोऽस्तीति निःसंशयं ब्रूमः । एवं मध्यभागे सप्तदशोत्तरसङ्ख्या सञ्जाता ।

"ग्रीवां प्रत्यूर्द्ध्वं त्रिषष्टिः" इति तृतीयसूत्रस्य विभागो न सम्यक् प्रतिभाति । मूलसूत्रे ग्रीवां प्रत्यूर्द्ध्वमिति प्रतिज्ञया ग्रीवाशब्देन किं ग्रहीतव्यमिति संशये उरस्यष्टसङ्ख्यायाः कथनादक्षकाऽस्थ्नोस्तत्रैव सम्मिलितत्वादक्षकाऽस्थ्नोरुपर्येव ग्रीवाभागः समायाति । "यस्य त्रयस्त्रिंशद्देवा अङ्गे गात्रा विभेजिर । अ. १०।७।२७" इति सर्वविद्यामूलभूते वेदे कशेरुकाणां पृष्ठे एव गणितत्वान्न तासां (कशेरुकाणां) ग्रीवायां गणनमायाति सुश्रुतेनाऽपि तथैव स्वीकृतत्वात् । अतो ग्रीवाशब्देनाऽक्षकाऽस्थ्युपर्यन्श्वासमार्गावेवोपतिष्ठेते । तत्र च कण्ठनाडीति साधारणो व्यवहारः । विभाजकसूत्रे च "ग्रीवायां नव, कण्ठनाड्यां चत्वारी-" ति कृतो विभागो न हृदयङ्गमो भवति । कदाचित्तरुणाऽस्थीन्यादाय तद्गणनापूर्ति र्भविष्यतीति शङ्क्यम् ? नियतत्रयोदशतरुणाऽस्थ्नामभावादक्षकाऽस्थ्नोरधस्ताद्भागस्य गणनञ्च समीचीनमिति स्पष्टमेव । अत एव शतपथेऽपि "ग्रीवाः पञ्चदश" (शत० १२।२।४।१०) इत्यत्र ग्रीवायां तरुणास्थिभिरेव पञ्चदशसङ्ख्या पूरिता दृश्यते परन्तु नियततया तरुणाऽस्थ्नां तावतामेव तत्र स्थितावपि संशयोऽस्ति । किञ्चाऽस्थिविभागे साक्षात्काठिनाऽस्नां लाभे तरुणाऽस्थिगणनस्याऽयोग्यत्वम् । वेदेऽपि षष्ट्यधिकत्रिशताऽस्थीनि लघुस्थूलभेदं स्वीकृत्य खीलाशङ्कुशब्दाभ्यां निर्दिष्टानि तान्यपि कठिनाऽस्थीन्येव प्रतिभान्ति खीलाशङ्कु विशेषणत्वात् । तानि च (अस्थीनि) सम्भवद्रूपाण्येव सन्ति यथा—प्रतीच्यव्यवच्छेदे अंसफलकाऽस्थ्नि प्रत्येकं सप्तविभागाः दर्शिताः सन्ति । तथा षोडशवर्षादारभ्य पञ्चविंशतिवर्षाऽभ्यन्तरे यान्यस्थीनि परस्परं सम्मिलितानि भवन्ति तेषां संयोगबुद्ध्या चेद्भेदेन निर्दिष्टानि तर्हि षष्ट्यधिक त्रिशताऽस्थ्नां परिगणनं समायास्यत्येव । परन्तु तादृशवाक्यानां दैववशात् लुप्ततया शतपथादि निर्माणसमये कथं वेदीयसङ्ख्याया निर्वाहः कर्तव्य इति

संशय्य येन केन प्रकारेण सा सङ्ख्या परिपूरिता। तत्पश्चात्तनै ब्राह्मणग्रन्थानेव "मन्त्रब्राह्मणयोर्वेद नामधेय" मित्यादि वाक्यान्यालम्ब्य तेष्वपि (ब्राह्मणग्रन्थेष्वपि) वेदत्वं स्वीकृत्य तथैव गणनं कृतम्। परन्तु तन्न सम्यक्, तेषां वेदभाष्यरूपत्वेन मूलत्वकल्पने सर्वथा भ्रम एव। तत्र (शतपथादौ) "एतद्धस्म वै तद्विद्वानाह वार्कलिः" (शत० १२।३।२।६) इत्यादौ पदे पदे पूर्वभाष्यकर्तॄणां सम्मतिकथनात्तत्र वेदत्वकथनस्य सर्वथाऽयोग्यत्वम्। अतो वेदभाष्यभूतेषु ब्राह्मणेषु वेदत्वकल्पनं न सम्यगिति निर्विवादम्। परन्तु तद्व्यतिरिक्तमूलव्याख्यानामभावादेव जनै ब्राह्मणग्रन्था अपि मूले परिगणिताः सन्तीति रहस्यम्। अत एव सुश्रुतेनाऽपि वेदवादिनो भाषन्ते इत्यनेन ब्राह्मणग्रन्था एवाऽभिप्रेता इति प्रतिभाति अत एव मूलसूत्रे ग्रीवां प्रत्यूर्द्धमित्येव सामान्यतया सूचितम्। तदुत्तरं यद्विभाजकं सूत्रं तत्र वैदिकैर्हस्तक्षेपः कृतोऽस्तीति प्रतीयते। यतो ग्रीवायां ग्रीवेति कण्ठनाडीति च विभागद्वयं कृतमुपलभ्यते, अतः पञ्चत्रिंशतिपर्यन्तं प्राय एवामस्थ्नां सङ्घातो भवति। तत्सङ्ख्यां प्रधानीकृत्याऽस्माभि विभागः कृतोऽस्तीति सुधीभिरवगन्तव्यम्। तदनुकूलश्च पाठः " कण्ठनाड्यां त्रीणि, एकं हनौ, दन्ता द्वात्रिंशत्, नासायां नव, तालुनि द्वे, गण्डयोर्द्वे, शङ्खयो द्वे, कर्णयोः षट्, षट् शिरसीति स्थापनीयः। तथैव कोष्ठके विन्यस्यवर्तमान प्रतीच्यनामान्यपि दत्तानि। अत्र काचित्क्षतिश्चेन् साराऽसारविवेचके विद्वद्भिः सूचनीया, सोचिता चेद् द्वितीयाऽऽवृत्तौ तथैवाऽनुग्राह्यत इति शरीरतत्त्वविज्ञु विज्ञप्तिः।

चरकीयाऽस्थिगणनाविभागस्य महद्वैचित्र्यमस्ति तत्र प्रतिपुस्तकं विभिन्नाः पाठा दृश्यन्ते। अग्निवेशसहाध्यायिनो भेलस्याऽपि संहितायां तत्समान एव पाठ उपलभ्यते। याज्ञवल्क्यस्मृतावपि "तस्य षोढा शरीराणि षट् त्वचो धारयन्ति च। षडङ्गानि तथाऽस्थ्नाञ्च सह षष्ट्या शतत्रयम्॥ ८४॥ स्थालैः सह चतुःषष्टिर्दन्ता वै विंशति र्नखाः। पाणिपादशलाकाश्च तेषां स्थानचतुष्टयम्॥ ८५॥ षष्ट्यङ्गुलीनां द्वे पार्ष्ण्यो गुल्फेषु च चतुष्टयम्। चत्वार्यरत्निकाऽस्थीनि जङ्घयोस्तावदेव तु ॥ ८६॥ द्वे द्वे जानुकपोलोरूफलकांससमुद्भवे। अक्षतालूषकश्रोणीफलके च विनिर्दिशेत्॥ ८७॥ भगाऽस्थ्येकं तथा पृष्ठे चत्वारिंशच्च पञ्च च। ग्रीवा पञ्चदशाऽस्थी स्याज्जत्र्वेकैकं तथा हनुः॥ ८८॥ तन्मूले द्वे ललाटाक्षिगण्डे नासा घनास्थिका। पार्श्वकाः स्थालकैः सार्द्धमर्बुदैश्च द्विसप्ततिः॥ ८९॥ द्वौ शङ्खकौ कपालानि चत्वारि शिरसस्तथा। उरः सप्तदशाऽस्थीनि पुरुषस्याऽस्थिसङ्ग्रहः॥ ९०॥ (प्रायश्चित्ताऽध्याये यतिधर्मप्रकरणे)" इति सप्तभिः श्लोकैश्चरकीयाऽऽनुक्रम आनुपूर्व्या प्रदर्शितः। तत्र "स्थालैः सह चतुःषष्टि र्दन्ता वै विंशति र्नखाः। पाणिपादशलाकाश्च तेषां (तासां) स्थानचतुष्टयम्॥" इति द्वितीयश्लोकस्य चतुर्थचरणे तेषां तासामिति पाठभेदे अपरार्कशूलपाणिविज्ञानेश्वरप्रभृतयष्टीकाकारा विवदन्ते। विज्ञानेश्वरेण तु वर्तमानश्लोके नखाः शलाकाश्चेति शब्दद्वयमागतमस्तीति विचार्य तेषामिति तच्छब्देन किं परामृष्टव्यमिति चिन्तायामविशेषादुभयस्याऽपि बुद्धिस्थत्वेन "पुमान् स्त्रिया" (पा. १।२।६७) इति सूत्रेण पुम् शेषं कृत्वा तेषां नखानां शलाकाऽस्थ्नाञ्च स्थानचतुष्टयं द्वौ चरणौ द्वौ करौ चेति नियोजितम्। अपरार्केण तासामिति पाठं मत्वा तच्छब्देन शलाकानां स्थानचतुष्टयमस्तीति नियोज्य स्थानशब्देन तदाऽऽधाराऽस्थिचतुष्टयमस्तीति व्याख्याय चत्वार्यस्थीन्यधिकानि प्रदर्शितानि, परन्तु तथात्वे "अस्थ्नाञ्च सह षष्ट्या शतत्रयम्" इत्याचार्यस्य यत्प्रतिज्ञातं तद्धीयेत चतुर्णामस्थ्नामाधिक्यात्। अपरञ्च—"गुल्फेषु च चतुष्टय—" मित्यत्र गुल्फशब्देन किं गृहीतमिति विचारे पादमूलशलाकानामधिष्ठानानि चेद्ग्रहीतुमभीष्टानि स्युर्तर्हि तेषां प्रतिपादं पञ्चत्वाद् द्वयोः पादयोः दश भवन्ति तत्र अङ्गुल्यस्थिगणनायामङ्गुष्ठेषु अस्थिद्वयस्य सत्वात् त्रित्वपूरणार्थं सुश्रुतवदङ्गुष्ठाऽधिष्ठानमङ्गुष्ठाऽस्थिषु परिगण्येत चेत् पादयोरधिष्ठानपदवाच्यानि अष्टावेवाऽस्थीन्यवशिष्यन्ते तत्राऽपि "गुल्फेषु च चतुष्टय—"मिति वाक्यस्य केनाऽपि प्रकारेण नियोजनं न सम्भवति। जङ्घाऽऽधा-

तायाऽस्ति न गुल्फत्वेनाऽभिप्रेतं स्यात्तर्हि तत्प्रतिपादमेकैकमेव वर्तेत इति द्वित्वात्र चतुष्टयकथनं युक्तिसहमिति महती शङ्का प्रत्युपतिष्ठते । कोषकाराश्च जङ्घाऽस्थिद्वयाऽधस्तनभागयोरेव गुल्फत्वं मन्यन्ते यथा—" तद्ग्रन्थी घुटिके गुल्फौ पुमान् पार्ष्णिस्तयोरधः " इत्यमरेण तयोरधः पार्ष्णिरित्यनेन सूत्रेण जङ्घाऽस्थिद्वयाऽधस्तनभागयो यौ ग्रन्थ्याकारौ भागौ तयोरेव गुल्फत्वं निरधारि । त एव भागाश्चेद्गुल्फत्वेनाऽभिप्रेताः स्युस्तर्हि पादद्वये चतुर्णां गुल्फानां भवति सम्भवः परन्तु तेषु स्वतन्त्राऽस्थित्वाऽभावात् जङ्घाऽस्थिभ्यः पृथक् तद्गणनमनुचितम् । एषां भागानां सुश्रुतेन खुड्केति नाम निर्दिष्टम् यथा—" आगुल्फकर्णात्सुमितस्य जन्तोस्तस्याष्टभागं खुड्कादि भग्न । इति । सु. चि. १८।२६ " यद्यप्यनेन वाक्येन स्पष्टतया निर्णयो न जायते परन्तु " कस्मात्तु गुल्फावधरावकृण्वन्नष्ठीवन्तावुत्तरौ पूरुषस्य । जङ्घे निर्ऋत्य न्यदधुः क्व स्विज्जानुनोः सन्धी क उ तच्चिकेत ॥ अ. १०।२।२ " इत्यत्र जङ्घाऽस्थ्न उपर्यधोवतः अधस्ताद्गुल्फस्य च भिन्नाऽस्थित्वेन विधानस्योक्तत्वाज्जङ्घाऽस्थ्यधस्तनभागस्य गुल्फत्वकथनस्य सर्वथाऽसम्भवः, तस्य तु पूर्वमन्त्रे उच्छ्लङ्खसञ्ज्ञा कृताऽस्ति । अपञ्च गुल्फः पार्ष्ण्यस्थ्युपरि गुटिकाकारेण निहितमस्ति, यतोऽङ्घ्रिद्वयो भवति विन्यासः, सुश्रुते यन्मर्मत्वेन निर्देशः कृतोऽस्ति स त्वेतत्स्थानीयसन्धेरस्ति तात्स्थ्यात्ताच्छब्द्यात् । " तत्र कूर्चगुल्फसंश्रितानि दश " (सु. शा. ५।१९) इत्यत्र सुश्रुतेऽपि गुल्फत्वेन प्रतिपादमेकमेवाऽस्थि परिगणितम् । यत्तु सम्प्रत्यमरादिवाक्यमाकलय्य उच्छ्लङ्खयोरेव अन्तर्गुल्फो बहिर्गुल्फ इत्यादिना व्याख्यान्ति ते त्वन्धस्येवान्धलग्नस्य विनिपातः पदेपदे इति गताऽनुगतिकतया कथयन्ति तत्र विद्वद्भि विश्वासो न करणीयः सुश्रुतेन गुल्फस्य स्वतन्त्रत्वेनाऽस्थितया परिगणितत्वात् । वेदे तु स्पष्टतया पृथगस्थि कथितमित्यनुपदमेवावोचाम । एवमेवाऽस्य (गुल्फस्य) कूर्चशिर इति नामदानमप्यविचारकृतम् । " क्षिप्रस्योपरिष्टादुभयतः कूर्चो नाम तत्र पादस्य भ्रमणवेपने भवतः । गुल्फसन्धेरुभयतः कूर्चशिरो नाम तत्र रुजाशोफौ ॥ सु. शा. ६।२५ " इत्यत्र मर्मप्रकरणे कूर्चकूर्चशिरश्च नाऽस्थिपरके, कूर्चोऽस्थिसङ्घातस्य क्षिप्रादुपरिष्टादुभयभागयोः कूर्चा नाम तदुपरिष्टात् कूर्चोऽस्थ्नामुभयपार्श्वयोः कूर्चशिरो नाम, मर्मत्वाऽपेक्षयोभयत्रैकवचनम् । वस्तुतस्तूभयत इति कथनाद् द्वयोरपि भागयोः कूर्चौ कूर्चशिरसी च भवतः, इमे तत्रस्थस्नायुसङ्घातस्य नाम्नी–,' आणिविटपकक्षधरकूर्चकूर्चशिरोवस्तिक्षिप्रांसविधुरोत्क्षेपाः" स्नायुमर्माणि । सु. शा. ६।८ " इति सुश्रुतेनैव निर्णीतत्वात् । पादाऽङ्गुलिशलाकानामुपरिष्टाद्यानि कूर्चाऽऽकृतीन्यस्थीनि सन्ति तेषां पार्श्ववर्तिनोरधस्तनभागयोः स्नायुपुञ्जस्य कूर्चो नाम । उभयपार्श्ववर्तित्वेन द्वौ कूर्चौ भवतः वामो दक्षिणश्चेति । एवमेव कूर्चाऽस्थिपुञ्जस्योपरिष्टाद् वामदक्षिणभागयोः स्नायुपुञ्जस्य कूर्चशिरो नाम । उभयपार्श्ववर्तित्वेन द्वे कूर्चशिरसी भवतः वामं दक्षिणञ्च । अतो जङ्घाऽऽधाराऽस्थ्नः कूर्चशिरो नामदानं सर्वथाऽनुचितमिति प्रकृतमनुसरामः । अतो याज्ञवल्क्यस्य " गुल्फेषु च चतुष्टय–" मिति वाक्यस्य सङ्गतिः सर्वथा दुर्घटैव । अन्यच्च वाहस्थो नर्मैव नाऽऽगतमिति महद्वैचित्र्यम् ! पृष्ठे च पञ्चचत्वारिंशदस्थीनि परिगणितानि तत्राऽपि (पृष्ठवंशे) ग्रीवा, पृष्ठं, कटिश्चेति त्रयो भागा गण्यन्ते तत्र ग्रीवासु सप्त, पृष्ठे द्वादश, कट्यां चतुर्दशकशेरुकाः सन्ति तासां त्रयस्त्रिंशत्परिमितत्वेन पञ्चचत्वारिंशदस्थ्नामभावादिदमपि वाक्यमसङ्गतम् । न च वाच्यं प्रतिकशेरुकं बहवो भागाः सन्ति यथा–कशेरुपिण्डं, स्थालकं, चक्रमूलं सन्धिप्रवर्धनं, कशेरुबाहुः, कशेरुपत्रकं, पृष्ठकण्टकमित्याद्यस्तानादाय सङ्ख्या पूर्येतेति तथात्वे सङ्ख्याया आधिक्यात् पञ्चचत्वारिंशत्त्वकथनस्य दुर्घटत्वात् । यद्यप्यत्र हार्नले प्रभृतिभिः कुशकाशाऽवलम्बनन्यायमाश्रित्य कतिपये उपायाः प्रदर्शिताः परन्तु तत्र पुष्टप्रमाणाऽभावात् ते उपेक्ष्याः । तथाच—" ग्रीवा पञ्चदशास्थी स्यात " इत्यत्र ग्रीवायां पञ्चदशाऽस्थीनि परिगणितानि तन्मूलञ्च " ग्रीवाः पञ्चदशः चतुर्दश वा एतासां करूकराणि वीर्यं पञ्चदशं तस्मादेताभिरण्वीभिः सतीभिर्गुरुं भारं

[illegible] । श० १२।२।४।१० " [illegible] [illegible] । [illegible] [illegible] । [illegible] । श० १२।२।४।११ " [illegible] [illegible] [illegible] । [illegible] [illegible] । [illegible] [illegible] । [illegible] " [illegible] " [illegible] [illegible] " [illegible] "[illegible] [illegible] [illegible] ([illegible] । [illegible] । [illegible] । ([illegible]), [illegible] [illegible] । [illegible] "[illegible]" [illegible] । [illegible] "[illegible] [illegible]" (ऋ. १०।८।४) [illegible] । [illegible] । [illegible] "[illegible] ॥ ऋ. १०।७।१२" इत्यादिषु मन्त्रेषु [illegible] मनुष्या [illegible] (कल्पिवन्तौ) प्रकटितमस्ति । ब्राह्मणग्रन्थेषु [illegible] "पुरुषो वै संवत्सरः" इत्युक्त्वा "त्रीणि च वै शतानि षष्टिश्च संवत्सरस्य रात्रयः त्रीणि च शतानि षष्टिश्च पुरुषस्याऽस्थीनि [illegible] । (श. १२।३।२।३)" इत्यत्र पुरुषशरीरे [illegible] पुरुषस्याऽस्थ्नां सङ्ख्या कृताऽस्ति परन्तु [illegible] तानि सन्तीति [illegible] स्थाने नोक्तानि । "[illegible] वै [illegible], [illegible] [illegible] वै शूद्रौ [illegible] वै देवाः सर्वे [illegible] । (श. १२।३।४।११)" इत्यादिषु कथितानि तानि यथाक्रमं [illegible] प्रदर्शितानि । [illegible] निवारणाय [illegible] सुश्रुतेन "त्रीणि सषष्टीन्यस्थिशतानि वेदवादिनो भाषन्ते शल्यतन्त्रे तु [illegible] । सु. शा. ५।१८–१९ ॥" इत्यनेन वैदिकमतं प्रदर्श्य [illegible] सर्वज्ञता प्रदर्शिता [illegible] निर्देशः कृतोऽस्ति । यद्यपि सूक्ष्माऽस्थीनि [illegible] इव भाति परन्तु स दोषः प्रति-संस्कर्तॄणामस्तीति [illegible] । ननु याज्ञवल्क्याऽऽदयो महर्षयः कथमन्यथा ब्रूयुरिति चेत्तर्हि स दोषः प्रतिसंस्कर्तॄणां शिरसि निक्षेप्यः । तथा कथनस्य [illegible], दीर्घकाल[illegible] [illegible] तादृशप्रमादस्याऽसम्भवत्वात् । तथा सुश्रुतोऽपि [illegible] प्रतिसंस्कर्तृभिः [illegible] नीतमिति कृत्वा यत्किञ्चिद्दोषः प्रतीयते परन्तु स नाऽऽचार्यस्याऽस्ति योऽयं महर्षि-[illegible] निर्देशः कृतवान् स कथं स्थूलविषये प्रमादं [illegible] यत्किञ्चिदपि [illegible] दृश्यते तत्प्रतिसंस्कर्तृकृतो बोध्यः । एवं चेत्तर्हि पृष्ठाऽस्थ्नां [illegible] [illegible] भवेदिति [illegible]

सूक्ष्माऽनुसन्धानेन सर्वेऽस्थ्यस्थाने पञ्चशताधिकानामपि प्रतिपत्तिः स्थापिता भवेदित्यनुमिनुमः । अस्थिपरि-
गणनविषये सुश्रुतेन या पञ्चशतता कृताऽस्ति सा पाश्चिमात्यानामस्थिसंख्यायाः प्रत्यासन्नैवेत्यत्र नाऽस्ति सन्देहः ।

इतीदमत्राऽस्थिगणनायां इदमादिमीमांसाऽपरोऽपि इदमित्थमेवास्ति आहोस्विदन्यदेव भवितेति संशयान्दोलेषु अन्येषु प्रमाणग्रन्थेष्वन्वेष्यमाणेषु शतपथब्राह्मणादिष्वपि सूक्ष्मतया गवेषणायां वैशुर्विदितेषु तत्राऽन्य-निर्धारितमपि कथमर्थमिदं स्यादित्यन्ततोऽप्यस्य महान् खेदः समुदेति । "द्वादश प्रधयश्चक्रमेकं त्रीणि नभ्यानि क उ तच्चिकेत । तत्राहतास्त्रीणि शतानि शङ्कवः षष्टिश्च खीला अविचाचला ये ॥ अ. १०।८।४" इत्यादिमन्त्रेषु शीलाशब्देन षष्ट्यधिकत्रिशताऽस्थीनि मनुष्यशरीरे विद्यन्तेऽस्थीनीति शिक्षयन्तोऽपि कस्मिन्नङ्गे कति-सङ्ख्याकानि तानि च कस्मादवयवानां परिगणितानीति विशेषविवेचनस्याऽभावेन नानाप्रकारैरस्थिगणना कृताऽस्ति तत्र चैविध्यान्नानामतम् ... शरीरे प्रत्यक्षं दर्शयितृणां नखानामपि परिगणनं कृतमस्ति, साक्षा-द्दन्तानां परिगणनं तत्र न दृश्यते यथा प्रतिपर्शुकं ... निहितानि सूत्राणि त्रीण्य-स्थीनि सन्ति तत्परिगणनं न क्वाऽपि लभ्यते । याज्ञवल्क्यस्मृतिनिर्दिष्टायामपि सर्वजनप्रसिद्धायां याज्ञवल्क्यस्मृतावपि च विष्णुस्मृतौ विस्पष्टतत्सन्दर्भो आसाद्यते तथैव भेदोऽपि । चरकीयपुस्तकानान्तु सर्वतो निकृष्टा दशा दृश्यते इत्यस्थिविवरणेऽपोद्घाम । अथाऽष्टाङ्गसङ्ग्रहकारेण तु चरकसुश्रुतीयपाठानामाशयमज्ञात्वैव कुत्रचित्सुश्रुतः कुत्रचिच्चर-कश्च निहितस्तत्र साक्षाद्वाग्भटस्याप इव प्रतिभाति । यथा—"त्रीणि षष्ट्यधिकान्यस्थिशतानि । तेषाञ्च चत्वा-रिंशच्छाखासु । सविंशच्चत्वारिंशदन्तराधौ । शताष्टमूर्ध्नीति । तत्रैकैकस्मिन् सक्थ्नि पञ्च पादनखाः प्रत्येकम-ङ्गुल्यां त्रीण्यस्थीनि तानि पञ्चदश । पञ्च पादशलाकाः । तत्प्रतिबन्धकमेकम् । द्वे द्वे कूर्चगुल्फजङ्घासु, एकैकं पार्ष्णिजान्वोः । सर्वाणि च नखाऽस्थ्यादीनि सक्थिवद् बाह्वोश्च । चतुर्विंशतिः पर्शुकाः । तावन्त्येव स्थालका-न्यर्बुदानि च । त्रिंशत् पृष्ठे । अष्टावुरसि । एकैकं भगे त्रिके । नितम्बयोश्च द्वे । तद्वदक्षकांसाऽसफलकेषु । तथा गण्डकर्णशङ्खेषु जत्रुतालुनोश्च । त्रयोदश ग्रीवायाम् । चत्वारि कण्ठनाड्याम् । द्वे हनुबन्धने । द्वात्रिंशद्दन्ताः । तद्वदुलूखलानि च । त्रीणि नासायां षट् शिरसि ॥ इति ॥ अ. सं. शा. ५" अत्र विंशतिः पाणिपादशलाका इति चरकीयमतमश्लाघ्य पञ्चपादशलाकाः इति निहितम् । चत्वार्यधिष्ठानान्यासामित्यस्य स्थाने तत्प्रति-बन्धकमेकमिति लिखितं परन्तु कस्मात्तदिति न विवेचितम् द्वे कूर्चाऽस्थ इत्यस्य स्थाने द्वे द्वे कूर्चगुल्फजङ्घास्विति निहितम् । अत्र कूर्चानां स्वरूपाऽनिर्देशात् " षट् कूर्चाः हस्तपादग्रीवामेढ्रेषु " इति स्वोक्तस्यैव हस्तपादेषु चत्वारः कूर्चाः समायाताः प्रतिकूर्चं द्वे द्वे अस्थिनी समायाते तान्यपि कान्यभिप्रे-तानीति ऊहितुं न पार्यन्ते । स्वकीयवाक्यरचनया गुल्फावप्यष्टौ भविष्यन्ति तत्र हस्तयोर्गुल्फास्तान्त्रिकादिनयेऽपि न स्वीकृताः किमु शारीरशास्त्रे । न च वाच्यं तत्कथनं पादाऽभिप्रायेणैवाऽस्तीति ? सर्वाणि च नखाऽस्थ्यादीनि सक्थिवद्बाह्वोश्चेति स्वमुखेनैव स्पष्टतयोल्लिखितत्वात् । एवं तद्वदक्षकांऽसाऽसफलकेष्वित्यत्रांऽसयोरप्यस्थि विद्यमानतायाः स्वीकृतत्वेन महती बालक्रीडा प्रख्यापिता । न च वाच्यमंसशब्देनांऽसपीठत्वमभिप्रेतमिति तयो-रेवांऽसफलकत्वात् । त्रयोदशग्रीवायामित्यत्र सुश्रुते 'ग्रीवायां नव' इत्यस्ति । चरकादौ च पञ्चदशग्रीवायामिति लभ्यते तथैव शतपथादावप्यासाद्यते । स्वकीया गणना न केनाऽपि साम्यमावहतीति महदाश्चर्यम् । इत्यादी-त्यादि स्ववाक्येषु शतशो निग्रहस्थानानि सन्तीति सुधीभिरेव द्रष्टव्यम् । अतएवाऽष्टाङ्गहृदये "अस्थ्नां शतानि षष्टिश्च त्रीणि दन्तनखैः सह । धन्वन्तरिस्तु त्रीण्याह० । अ. हृ. शा. ३।१६" इति पादोनैकश्लोके एवाऽस्थिग-णना समापिता, अत एतयो (अष्टाङ्गसङ्ग्रहाऽष्टाङ्गहृदययोः) र्न कोऽपि शारीरवस्तुनिश्चयोऽस्ति । एताभ्यान्तु शरी-रविषये मौनाऽऽलम्बनमेवाऽकरिष्यत्तदा छात्राणांकृते श्रेयस्करमभविष्यत् । परन्तु तथा नाऽनुष्ठितमिति छात्रैः-

[illegible]

[illegible]

अत्र [illegible]

अत्र [illegible]
(वै. पं. हरिप्रपन्न ;
[illegible] सं. १९८४,
सन् १९२७।

निवेदक—
वैद्यपण्डितहरिप्रपन्नशर्मणः।

संस्कृतोपोद्घातीयशुद्धिपत्रकम्

पृष्ठे	पंक्तौ	अशुद्धम्	शुद्धम्
१	१	भावाना	भावानां
	२४	०धाऽऽयापि	०धाऽयापि
२	५	तत्त्व०	तत्त्त्य०
	१३	स्रीष्ट०	स्रिष्ट०
	१४	मेगस्तनीजः	मेगस्थनीजः
	३१	०यागये	०योगये
३	५	अस्यव	अस्य च
	५	क्षीरैः	क्षारैः
	८	कृतवलि०	कृतबलि०
	२७	मधे०	मेध०
	३३	१८	१९
४	१९	निस्यन्देन	निःस्यन्देन
	२२	आमुखात	आमुखात्
	२५	निस्यन्देन	निःस्यन्देन
५	११	०वयवेषुमध्ये	०वयवेषु
	१२	मतस्ना०	शर्वं मतस्ना०
	१२	पार्श्वव्ये०	पर्शव्ये०
	२२	१६८	१७१-१७६
	२६	भिनधी, स्य०	भिनधीस्य०
	३२	०किया	०क्रिया
६	१	वृत्ताल्पः	वृत्तोऽल्पः
	२	१२	१८
	६	(च मिनध्रि=विशेषा०	च मिनध्रि ([illegible]
	१०	गर्भा	गर्भौ
	१४	०क्रमेत्	०क्रमेत
	३१	०च्छित्वा	०च्छित्त्वा
	३२	वधो	वैधो
७	११	बध्नीया०	बध्नीया
	३०	द्वि ०दक्षरैरव	०दक्षरैरु
८	१३	Necatar	Necz[illegible]
	२३	अगस्टसस्य	अगष्ट[illegible]
	२४	हरियोकि०	हरि[illegible]
	२९	बहिरव	बहिर[illegible]
	३१	Taxile	T[illegible]
९	९-१०	शतोत्तरपद्य०	[illegible]
	१८	सप्तनव०	[illegible]
	२०	प्रचक्रिरे॥	[illegible]

पृष्ठे	पंक्तौ	अशुद्धम्	शुद्धम्
९	११	[illegible]	[illegible] ई. १८९३
१०	४	पोकक०	पोकोक०
	७	[illegible]	[illegible]
	८	Pococke	पोकोक (Pococke)
	११	[illegible]	[illegible]
	२१	Paleaphatus	Palaephatus
	२२	[illegible]	[illegible]
	२३	[illegible]	[illegible]
११	५	[illegible]	[illegible] (Philology) [illegible]
	१७	पोकक	पोकोक
	२१	[illegible]	[illegible]
	२२	[illegible] (Phoenicia)	[illegible] (Phoenicia)
१२	६	[illegible]	[illegible]
	१७	combunu	cambunh
	१८	Phoen:	Phoens
	२०	[illegible]	[illegible]
	२१	[illegible]	[illegible]
	२२	[illegible]	[illegible]
	२२	[illegible]	[illegible]
	२७	[illegible]	[illegible]
	२९	पोकक०	पोकोक०
१३	१	पोकक०	पोकोक०
	३	पोकक०	पोकोक०
	२२	[illegible]	[illegible]
	२४	[illegible]	[illegible]
	२५	(Review of Reviews)	(Review of Reviews Aug 15 Sept. 15, 1925)
	२६	Latins	Latin
	३१	[illegible]	[illegible]
	३३	[illegible]	[illegible]
१४	१६	१११	११०
१५	५	[illegible]	[illegible]
	१२	[illegible]	[illegible]
	१४	[illegible]	[illegible]
	१४	[illegible]	[illegible]
	१५	Indian	Hindu
	१८	Horun	Harun
	२०	[illegible]	[illegible]
	२१	[illegible]	[illegible]

पृष्ठे	पंक्तौ	अशुद्धम्	शुद्धम्
१५	२१	Acrzte	Aerzte
१६	१२	क्रीष्टाब्दावधि	क्रिष्टाब्दावधि
	१६	०भापायै०	०भाषयै०
	२६	'शङ्कर'	'अशङ्कर'
	२८	०सन्दहा०	०सन्देहा०
१७	१२	०सुश्रत०	०सुश्रुत०
१८	२१	३।८	३।८।५
१९	४	इत्यादि	इत्यादौ
	६	Prophessor	Professor
	१५	भावविशेषा०	मूर्तिमन्तो भावविशेषा०
	२५	parmadides	Parmenides
२०	८-९	१७-२-२६	१७-२१-२६
	९	Dastole	Diastole
	२०	०तत्व०	०तत्त्व०
	२०	समाज	समाजे
	२८	०युरोपियाणा०	०युरोपीयाणा०
२१	३	०भाषा भाषित्वात्	०भाषाभाषित्वात्
२२	७	-दक्-वसु-कर २८२७०	-वसु-कर २८७०
	७	भूम०	भूमे०
	२३	विहिता	निहिता
	३३	०तत्व०	०तत्त्व०
२४	५	इत्यायुऽऽर्वेद०	इत्याऽऽयुर्वेद०
	५	अ. १	च. सू. १-४-३१
	७-८	प्रजापतिः (दक्षः) । इन्द्रः	प्रजापतिः (दक्षः) । अश्विनौ । इन्द्रः
	१९	मुखोपाध्याय०	मुख्योपाध्याय०
२५	४	मुखोपाध्याय०	मुख्योपाध्याय०
	३०	६।१८	६।१९
	३१	धन्वन्तरीयाणा०	धान्वन्तरीयाणा०
२६	१	०ध्यायाना	०ध्यायानां
	१	०मोखा-आचारिअ	०मोख-आचारिअ
	१४	मञ्जूषा	परमलघुमञ्जूषा (शक्तिविचारे)
	१७	०नामा०	०नाम्रा०
	१७	विख्यातः	ख्यातश्च
	१७	०मण्डले॥	०मण्डले॥ भा० प्र० ११५६-६२
	१९	०ऽऽधिकृत्य	०ऽधिकृत्य
	१९	०लब्ध्वा देशं	०लब्ध्वाऽऽदेशं
	१९-२०	०तदाऽगमत्	०तदाऽऽगमम्

पृष्ठे	पंक्तौ	अशुद्धम्	शुद्धम्
२६	२२	अन्ते	अन्तेऽस्तीति
	३२	निष्क्रान्तारीभूतो	निष्कान्तकान्तारो
	३३	(१ अ. १ पा. ९ आ.)	(१।१।७४)
२७	६	सल्वालेग्जण्डरो	सल्वलक्षेन्द्रो
	६	ई. ३२७ खी. पू.	३२७ खि. पू.
	१४	ह्योयेन्यसाङ्गतो	ह्योएन्यसाङ्गतो
	१५	०रव	०रेव
	१६	०मदै०	०मैवै०
	१७	ह्योयेन्यसाङ्गस्य	ह्योएन्यसाङ्गस्य
	२२-२३	(४ अ० २ पा० २ आ०)	(४।२।१०४)
२८	१५	पाटलीपुत्र०	पाटलिपुत्र०
	२३	०पाटलीपुत्र	०पाटलिपुत्र०
	२३	पाटलीपुत्रस्य	पाटलिपुत्रस्य
	२४	पाटलीपुत्रे	पाटलिपुत्रे
	२४-२५	(१ अ० ३ पा० १ आ०)	(१।३।१)
	२५	पाटलीपुत्रस्थं	पाटलिपुत्रस्थं
	२५	०मुपदिशति	मुद्दिशति
	२६	कुण्डली	कुण्डली किरीटी
	२६	०नासिको	०नासो
	२६-२७	(१ अ० ३ पा० १ आ०)	(१।३।२)
	२७	पाटलीपुत्र०	पाटलिपुत्र०
	२९	विष्णुमित्रे	विष्णुमित्रो
	३०	(२ अ० १ पा० १ आ०)	(२।१।१)
२९	८	कण्टकौरसा०	कण्टकोत्सा०
	९	स्वनामाङ्क०	स्वनामाङ्कं
	९-१०	× × × ×	लब्ध्वाऽऽदेशं तस्मात्तदागमम् । प्रवर्तित महाभाष्यं
	१३	(१ अ० २ पा० ३ आ०)	स्वं च (१-२-६४)
	२७	(८-६-२)	(८।३।१)
	२९-३०	पा० ४-३-५-६-७	छा० ४।३।५-६-७
	३४	रामायणे नैव	रामायणेनैव
३०	६	०तत्व०	०तत्त्व०
	१५	प्रयोगाना०	प्रयोगाणा०
	१७	अनुदितौषधरागा	अनुदितौपसरागा
	२२	(३ अ० १ पा० २ आ०)	(३।१।२४)
३१	२	बालकृणा०	बालकृष्णा०
	११	०वल्या०	०वल्ल्या०
	२७	निर्माण०	निर्वाण०
	२८	०तर्के०	०तर्कै०
३२	८	सङ्क्षेरण	सङ्क्षेपेण

पृष्ठे	पंक्ती	अशुद्धम्	शुद्धम्
१२	१२	०ऽधुनिक०	०ऽऽधुनिक०
१३	१९	०ऽय	०ऽयं
	१९	१७२७	१७२९
	२०	विसल्पकः	विसल्यकः
	२५	सुक्षित०	सुक्षत०
	२८	०भाजनात्	भोजनात्
	२८	०कपणात्	कर्षणात्
	३०	मोहाया	मोहायो
१४	७	३	३०
	१०	चाऽऽस्य	चाऽस्य
	१८	सिंह	सिंहं
	२१	मेदा न०	भेदो ना०
	२८	०ऽऽलसर्क०	०ऽलसकं०
१५	१५	लक्षीकृत्य	लक्ष्यीकृत्य
	२०	लक्षीकृत्य	लक्ष्यीकृत्य
	२१	तह्ले केषु	तह्लोकेषु
१६	१	शेरते तेभ्य	शेरते तेभ्यः सर्वेभ्यो नम इति ये चैव वनस्पतिषु सर्पा ये चावटेषु शेरते तेभ्य
	३	यह्लेनवै०	यह्लेनैवै०
	१४	दृहत्	दृषत्
	२१	जम्भयामसि	[जम्भयामसि]
१७	२	अथर्व	अथर्व०
	१२	रश्मिभिः	रश्मिभि
	२५	सचिवो	सचिवो [हतः]
	२६	नष्टमातृकः हतस्वसा	नष्टमातृकः हतभ्राता हतभ्रातृकः हतस्वसा
१८	२२	शतन्	सरन्
	२७	Worms	worms
१८	२८	unobscured	unobserved
	२८	inflicted	infected
१९	३	वैरिणाः	वैरिणाः
	८	Virama	Virana
	१६	light	lights
	२२	... ...	*reptiles*
	२३	obscured	observed
	२३	seer	seers
	३३	*Vigilant*	*vigilant*

पृष्ठे	पंक्तौ	अशुद्धम्	शुद्धम्
३९	२४	भ्राता दितिः	भ्राताऽदितिः
	३०	Diti	Aditi
	३०	your	Your
	३५	नि जस्यत	नि जस्यत नितरां जस्यत
४०	१०	पुगागमेरूपं	पुमागमेरूपं
४२	६	इवो	इवो
५३	२१	द्धमं	द्वैमं
५६	५	विरचनम्	विरेचनम्
६१	३०	ऽप्या	ऽप्य
६९	२८	शरीर	शरीरे
७२	१३	शरीर	शरीरे
७४	२९	अङ्गलयः	अङ्गुलयः
८८	५	रतस्मिन्	रेतस्मिन्
८८	१९	ददाति	दत्ते
९०	२	शरीर	शरीरे

ERRATA

Page	Line				
1	14	for	for	read	to
	28	,,	in	,,	on
2	28	,,	especially of	,,	especially
3	1	after	diseases	add	etc.
	3	for	about	read	for almost
	13	,,	the	,,	a
	15	after	see	add	that
	23			omit	page
	25	for	preface	read	Introduction (p. 5)
	27	,,	mark	,,	marks
	30	,,	पताळे	,,	पाभाले
	30	,,	महेद्रे	,,	महेन्द्रे
	30 & 31	,,	॥ १ ॥	,,	मृच्छकटिक ८।४५
	37	,,	Vol X pp 130	,,	Vol IX p. 130
4	4	after	see	add	that
	12	for	vedas	read	veda
	12	,,	medical	,,	medicinal
	13	for	accounts	read	account
	13	after	literature	add	is
	14	for	Whitneys Grammar	read	Sanskrit grammar by Whitney introduction p. 22
	20	after	Alchemy	add	and
	20-21	,,	preserved	,,	in
5	2	for	pragnent	read	pregnant
	3	,,	graval	,,	gravel
	6	,,	condition	,,	stage
	10	,,	is	,,	has
	२३	,,	घृतैः क्षीरैः	,,	घृतैः क्षारैः
	26	,,	and	,,	with
	27			omit	as the
	27	after	surgeon,	add	and
6	11	for	सु. चि ७।३०-३८	read	सु. चि. ७।३०।३४
	20	,,	graval	,,	gravel
	21	,,	nave	,,	navel
	23	,,	graval	,,	gravel
	39	,,	,,	,,	,,

Page	Line				
7	6	for	in	read	at
	7–8	after	having	add	an
	12–13	,,	out	,,	must
	13	for	into	read	in
	15	,,	of bunyan	,,	of a banyan
	16	,,	of the Bunyan	,,	of a banyan
	19	,,	the doubt	,,	doubt
	21	,,	above	,,	following
	26	,,	urinater	,,	urinator
	29	,,	,,	,,	,,
	32	,,	च	,,	च. चि.
8	16	,,	urinater	,,	urinator
	17	,,	,,	,,	,,
	18	after	honey	add	and
	21	,,	urine	,,	and
	22	for	does	read	do
	28	,,	urinater	,,	urinator
	26	,,	kidnies	,,	kidneys
	30	,,	implied	,,	implies
	30	,,	kidnies	,,	kidneys
	38	,,	,,	,,	,,
9	5	,,	५८।	,,	५८।१५-१६
	16	,,	घृताल्पः	,,	घृतोऽल्पः
	18	,,	५८।	,,	५८।१८-१९
	25	after	means	add	a
	31	,,	womb	,,	or
	32			omit	obout
	32	for	occasion	read	time
	32	after	delivery,	add	then
10	4	for	S. N. 2. 24	read	S. N. 8. 14
	5			omit	that
	6	for	but	read	and
11	32	after	foetus	add	and
	34	,,	thighs	,,	and
	37	for	being	read	if
	39	after	help of	add	the
	40	for	The	read	the
	40	,,	is to	,,	must
12	1	,,	the parts	,,	parts
	10	,,	attempts	,,	care

Page	Line				
12	12	For	injuntion	read	injunction
	13	after	hour	add	otherwise
	22	„	then	„	an
	23	for	be stopped	read	stop
	24	„	remedy of	„	remedy for
	25			omit	it is
	25			„	to be taken out by a hand
13	9	after	palms	add	of hand
	16			omit	if
	21			„	here
	24	for	whitney	read	whitney's
	26	„	to be	„	as
	26			omit	and
	31	for	that they often wrote in	read	to write
	34			omit	and
	35	after	student	add	and
	35			omit	book;
14	6	for	does not mean	read	neither means
	17	„	of	„	in
	25	after	ambassador	add	had
	26	for	was	read	having been
	27	„	and	„	had
	29	„	॰ग्रा	„	॰ग्राणि
	29	„	॰ख्याते चोप॰	„	॰ख्यातोप॰
	29	after	कालाः	add	भूतभविष्यद्वर्तमानाः
	30	„	हस्तासः	„	अस्य
	35	after	as	add	is
	37	after	History of	add	Ancient
	37	for	P. 153	read	Pp. 124 & 153
15	7			omit	the
	13	for	Copper in	read	copper in a
	25	after	physicians	add	and
	29	„	fact	„	that
	33	for	supplimentary	read	supplementary
	35	after	History of	add	Ancient
	37	for	grammanians	read	grammarians
	38	„	चरित्र	„	चरित
	39	for	Never to be	read	A

Page	Line				
16	1	after	that	add	had
	2	for	Zenith	read	zenith
	4	„	the other nations	„	other nations
	9	„	5100	„	5000
	13	after	so-called	add	modern
	13	for	do	read	no
	16	„	in	„	from
	20	after	and	add	the
	30	„	time	„	of
	31	for	fine	read	find
	33	„	3756	„	3735
	33	„	3197	„	3179
	35	after	objected	add	to
	36	after	प्रचक्रिरे ॥	add	रा. १।४९
	37	„	०पाण्डवाः ॥	„	रा. १।५१
	41	for	5126	read	5026
17	1			omit	the
	7			„	*
	9	for	" I	read	" * I
	9	„	will	„	shall
	11	for	Bands	read	bonds
	13	„	Godships	„	godships
	14			omit	[illegible]
	17	for	corrections	rea[illegible]	
	19	„	It	„	
	20	„	Kings	„	
	26	„	strippped	„	
	27	„	Societies	„	
	29	„	T[illegible]	„	
	29	after	is	ad[illegible]	
	29	for	Paleaph[illegible]		
	30	after	was		
	32	for	page 1[illegible]		
	42	„	Kings		
18	2	„	past		
	5	„	notion		
	7	„	the		
	9	„	Colonies		
	13	„	observe		
	13	„	History		

Page	Line				
18	34	For	into	read	to
	37	„	emgrants	„	emigrants
	43	„	P. I. in greek p. 26	„	"India in Greece" by Pococke pages 26–27
19	2	„	The	„	That
	2	„	with	„	by
	4	„	driven	„	Driven
	7	„	Sciences	„	science
	9	„	Channel	„	channel
	12	„	Champions	„	champions
	16	after	and	add	an
	16	for	similar	read	singular
	18	„	sects	„	sect
	20	„	composition	„	compositions
	28–29	„	that Language	„	That language
	33	„	disguise	„	disguises
20	8	„	words	„	word
	16			omit	the
	19	for	at	read	in
	20	„	alternative	„	synonymous
	24	„	skandanábha	„	skandhanábha
	29	„	thing	„	point
21	5	„	and we	„	We
	7	after	Reviews	add	Aug. 15 to Sep. 15, 1925, the Editor.
	12	for	laid	read	led
	13	„	became	„	was
	15			omit	the
	18	after	writings	add	and
	19	for	Riddle	read	riddle
	22	after	sloping	ādd	down
	23	for	grounds	„	ground
	25	„	Burial	„	burial
22	7	after	appears	add	to be
	24	for	Magasthenes	read	Megasthenes
	25	„	Hoernley	„	Dr. Hoernle
	30	„	Hypproccrates	„	Hyppocrates
23	3	after	fill	add	up
24	6	for	Harun-ar-Raschid	read	Harun-al-Raschid
	26	„	„	„	„

Page	Line				
24	34			omit	that
	42	for	Fourn Royal Asiatic societies old series	read	the journal of the Royal Asiatic Society of Great Britain and Ireland
25	26	"		"	Vol.
26	1	"		omit	the
27	19	after	many of	"	had
	40	for	whatsover	add	the
	42	"	52	read	whatsoever
28	8	"	Upanishadas	"	25
	24	"	Dhamnis	"	Upanishads
	32-33	after	work	"	Dhamanis
29	8	for	according	add	entitled
	8			read	According
	9			omit	that
	14-15	after	called	"	coming into
	15	for	filia	add	Love
	16	"	he	read	philia
	18	"	of	"	He
	18	after	Klepsydra	"	with the
	19	for	Parmadides	add	(water-clock)
	21	"	the strife	read	Parmenides
	21	"	the love	"	Strife
	24			"	Love
	24-25	after	on	omit	the
	25-26	"	strife	add	the
	28	"	driven	"	has
	29			"	outwards, passing
	32	after	who	omit	the
	34	"	says	add	had
	34	for	has	"	himself
	35	"	17-21-2	read	had
	39	"	A world	"	17-21-26
	41			"	"A world
	41			omit	of the world
30	3	for	The	"	the
	4	"	beings	read	the
	5	for	other	"	being
				read	another

Page	Line				
30	5	after	perishable.	add	just because they have no substance (phusis) of their own, only the four 'roots' have that. There is, therefore, no end to their death or destruction
	6	for	is mixture	read	is a mixture
	7	after	earth	add	and
	26	,,	middle of	,,	the
	33	for	many of	read	many
	42	,,	73-74	,,	72-74
31	2	,,	here	,,	Here
	24	after	arrived at	add	a
	30-31	,,	mentioned in	,,	the
	36	for	Orian	read	Orion
	38	,,	Kritirās	,,	Krittikās
	40	,,	,,	,,	,,
भाषा—पारा और बछनाग बराबर लेकर चित्रक के क्वाथ से भावना देना, फिर मूषा मे रखकर मूषा को बालू के बीच मे रखकर भूधरयन्त्र मे एक दिनभर पकाना। स्वाङ्गशीतल होने पर कड़वे तेल से भावना देना फिर उस मे $\frac{1}{4}$ बछनाग मिलाकर नील और काले दाने के रस से उस को खूब मर्दन करना इस की २ रत्ती की मात्रा देनी चाहिये। यह सन्निपात का नाश करता है इस का नाम दिव्य अग्निकुमार रस है। यह प्राणियों को जीवन देने वाला है॥ ४८॥

४९ अग्निकुमारो रसः (महदाद्यः) (द्विचत्वारिंशः)

गन्धकेन द्विकर्षेण
शुद्धसूतेन तावता।
विधाय कज्जलीं श्लक्ष्णा-
मेकवासरमर्दनात्॥ १८५॥
कर्षमात्रं विषं दत्वा
मर्दयित्वा दृढं तथा।
हंसपादीरसं दत्वा
स्तोकं स्तोकं मुहुर्मुहुः॥ १८६॥
कुडवार्धमितं पश्चात्
गोलीकृत्य विचक्षणः।
काचकूप्यां विनिःक्षिप्य
शुल्वं चास्मिन् प्रदापयेत्॥१८७॥
देवीशास्त्रे पुनः प्रोक्तं
चूर्णितं काञ्चनं विषम्।
ऊर्ध्वाधो गोलकानां हि
काचकूप्यां विनिःक्षिपेत्॥ १८८॥

निःक्षिपेत्कज्जलीं मध्ये
यथा श्वासो न जायते ।
ततश्च द्व्यङ्गुलोत्सेधं
मृदा कूपीं विलिप्य च ॥ १८९ ॥
विशोष्य वालुकायन्त्रे
रसस्थानप्रकाशिते ।
अधोमुखीं घटीं क्षिप्त्वा
क्षिपेदुपरि वालुकाम् ॥ १९० ॥
निरुध्य भाण्डवक्त्रं च
चुल्यामारोप्य यत्नतः ।
वह्निं प्रज्वालयेत्सार्ध-
दिनं च क्रमवर्धितम् ॥ १९१ ॥
स्वाङ्गशीतं समाकृष्य
सह ताम्रेण मर्दयेत् ।
पलार्धं मारिचं चूर्णं
कर्षार्धं वत्सनाभकम् ॥ १९२ ॥
विनिःक्षिप्य विमर्द्याथ
क्षिपेद्रम्यकरण्डके ।
नन्दिनाऽथ समादिष्टं
रसतुल्यं मरीचकम् ।
वत्सनाभं च कर्षार्धं
मिश्रयेत्प्रतिचूर्णितम् ॥ १९३ ॥
निर्दिष्टोऽग्निकुमारको रसवरो
देव्या तथा नन्दिना,
सद्यो वैद्ययशःप्रभूतफलदः
सर्वामयध्वंसनः ।
नित्यं पाचनदीपनो रुचिकरः
शीघ्रं गुणोत्कर्षकृत्,
शालीन् भुक्तवतो यथेष्टसुखदः
श्रेष्ठो रसानां प्रभुः ॥ १९४ ॥
मन्दाग्निं कफवातजक्षयगदं
निश्शेषशूलामयं,
श्वासं कासगदं तथा कफमरु-
ज्जूर्तिं च पाण्डुं तथा ।
शोषं वातगदान् महाकफरुजः
कण्ठामयं सर्वशः,
सामां च ग्रहणीं हरेत् खलु रतिं
कुर्याच्च प्राणान्विताम् ॥ १९५ ॥

कणया सितयाज्येन
दातव्योऽयं महारसः ।
वायुमुख्येषु रोगेषु
वायुसंसर्गकेष्वपि ॥ १९६ ॥

नन्दिनाऽथ पुनः प्रोक्त-
स्तत्तद्रोगहरः परः ।
निहन्ति सकलान् रोगा-
ननुपानविशेषतः ॥ १९७ ॥

रसजनितविदाहे शीततोयाभिषेको,
मलयजघनसारैर्लेपनं मन्दवातः ॥
तरुणदधि च देयं नारिकेलस्य नीरं,
मधुरशिशिरवातःशीतमन्यच्च शस्तम् ॥ १९८

व. रा., र. र. स., क्षयादिषु ।

भाषा—२ तोला गन्धक और २ तोला शुद्ध पारा लेकर एक दिनभर मर्दन करके बारीक कज्जली बनाना । फिर उसमे एक तोला बछनाग मिलाकर ८ तोला हंसराजके रसको थोड़ा थोड़ा उसमे डालते रहना और घोटते रहना । फिर उसका गोला बनाकर शीशीमे रखना, शीशीके भीतर बछ-नाग १ तोलेका चूर्ण भी ऊपरसे डाल देना और शीशीके मुखको (१ तोलाभर) तांबेके बारीक पत्रोंकी गोलीसे बंदकर देना । परन्तु देवी-शास्त्रमे कहा है कि हलदिया विषका चूर्ण करके नीचे और ऊपर छिड़क कर बीचमे कज्जलीको रखना फिर शीशीमे रसको रखना और बाहरसे २ अंगुल गाढी कपडमिट्टी करना । जिससे कि किसी प्रकारका छिद्र बाष्पनिकलनेके लिए उसमे न रहे । फिर सुखाकर रसस्थानमे कहे अनुसार वालुका-

यन्त्रमे शीशीको उल्टी करके रखना और ऊपरसे वालू भर देना। फिर वालुका यन्त्रकी हांडीको बंद करके बड़े यत्नसे चूल्हेपर रखना। नीचे क्रमसे मन्द, मध्य और तेज अग्नि १½ दिन तक प्रज्वलित करना। स्वाङ्गशीतलहोनेपर शीशीको गोलीके साथ ही चूर्ण कर लेना। फिर २ तोला कालीमिर्च का चूर्ण और ½ तोला बछनाग मिलाकर खूब घोटकर अच्छी शीशीमे रखना। परन्तु नन्दिकेश्वर महाराजने कहा है कि पारेके बराबर कालीमिर्च और ½ तोला बछनाग पृथक् पृथक् चूर्णकर मिला देना। यह तत्काल बहुत फल देनेवाला वैद्योंके पूर्ण यशको बढानेवाला और सबरोगोंका नाश करनेवाला अग्निकुमार रस नन्दीमहाराज और देवोंने कहा है। नित्य पाचन और दीपन है रुचिको बढ़ाता है जल्दी ही गुणोंको बढानेवाला है। इसके सेवन करनेवाले को शाली चावलोंका भात खानेसे यथेष्ट सुख होता है। यह रस सबसे श्रेष्ठ और रसोंका राजा है। मन्दाग्नि और कफ तथा वातसे हुआ २ क्षय, सर्वप्रकारके शूल, दमा, खांसी कफ और वायुका ज्वर, पाण्डुरोग, शोथ वातरोग, कफरोग, कण्ठरोग और साम ग्रहणी को यह रस नष्ट करता है बल और रुचि को बढ़ाता है। यह रस वातप्रधान रोगों मे अथवा वायुके संसर्गवाले रोगोंमे पीपल, मिश्री और घीके साथ देना चाहिये। और नन्दी महाराज ने उपरोक्त सब रोगों को हरनेवाला बताया है। विशेष २ अनुपानों के साथ देने से यह सभी रोगों को नष्ट करता है। यह रस अत्यन्त गरम है इसलिये इस के खाने से दाह हो जावे तो ठंढे पानी की धारा सिर पर देनी चाहिये। अथवा चन्दन और कपूर सिर पर पोत देना चाहिये। ठंढी हवा के स्थान में रखकर ताजा दही और नारियल का पानी, मधुर और ठंढी हवा (पंखेसे) देनी चाहिये। अन्य भी ठंढे उपचार हितकर हैं॥ ४९॥

५० अग्निकुमारो रसः (त्रिचत्वारिंश:)

तुल्यौ गन्धकपारदावमृतकं
शुल्वं च तुल्यांशकं,
खल्वे हंसपदीरसैर्दिनयुगं
संमर्द्य यत्नात्ततः।
कृत्वा काचमये घटे च वटिकाः
संताप्य सूर्यांशुभिः,
तद्वक्त्राननमङ्गुलिप्रतिमितं
चैलैर्मृदा वेष्टयेत्॥ १९९॥
भाण्डे वालुकया त्रिभागभरिते
क्षिप्त्वा क्षिपेद्वालुकां,
भाण्डास्यं तु निरुध्य वासरयुगं
गाढाग्निमुद्दीपयेत्।
उत्तार्य स्वशरीरशीतलमतो
वेदांशतुल्यामृतं,
तुल्यांशैश्च मरीचचूर्णनिकरैः
संयोज्य गुञ्जामितम्॥
देयं नागलतादलेन सहितं
चूर्णं तथा खादयेत्,
श्रीमानग्निकुमारको रसवरो
निःशेषरोगापहः॥ २००॥
श्वासकासगदपाण्डुकामलाः
शूलवातवमिराजयक्ष्मणः।
सन्निपातमतिदारुणज्वरान्
हन्त हन्ति रसभूपतिः स्वयम्॥२०१॥

धा०, र. क. यो०, (रसभूपतिः) क. रा. तुल्यौगन्धकपारदौ इत्यस्याग्रे वाहटे मधुगदौ इति पाठः तत्र मधुशब्देन स्वर्णमाक्षिकं, गरेण विषम्, अन्यत्सर्वं समानम् र. क. योगेमणिशिलेति पाठः तत्र मणिशिलाशब्देन मनःशिला योज्या स्फटिकं वा–

भाषा—गन्धक, पारा, बछनाग और तांबा इन सब को बराबर लेकर दो दिन तक खरल मे हंसराज के रस के साथ घोटना। फिर गोला बनाकर शीशी मे भरदेना। और ऊपर से शीशी के

मुख बंद करके बाहर से कपडमिट्टी कर देना। और धूप मे सुखा देना एक हांडी मे ३ भाग बालु भरकर शीशी रखना फिर ऊपर से हांडी को बालु से भर देना। और २ दिन तक तेज अग्नि से उसे पकाना। स्वाङ्गशीतल होने पर उतार लेना और ½ बछनाग और सब की बराबर कालीमिर्च का चूर्ण मिलाना। पान के रस के साथ २ रत्ती की मात्रा इस रस की देना। यह अग्निकुमार रस सब से श्रेष्ठ है और सब रोगों का नाश करता है। दमा, खांसी पाण्डु, कामला, शूल, वातरोग, छर्दि, राजयक्ष्मा सन्निपात और कष्टसाध्य ज्वरों की यह रसों का राजा नष्ट करता है ॥ ५० ॥

५१ अग्निकुमारो रसः (रसभूपतिः)
(चतुश्चत्वारिंशः ।)

कर्षद्वयं रसेन्द्रस्य
गन्धकस्य तथैव च ।
तथैव ताम्रपर्णानां
विशुद्धानां च निःक्षिपेत् ॥२०२॥
दिनमेकं विमृद्नीया-
द्धंसपादीरसेन च ।
तत्कल्कं गोलकीकृत्य
काचकूप्यां निवेशयेत् ॥ २०३ ॥
अमृतं तालकश्चात्र
निःक्षिपेत्कूपिकान्तरे ।
कूपिकाया मुखं रुद्ध्वा
विलेप्या वस्त्रमृत्तिका ॥ २०४ ॥
द्व्यङ्गुलोत्सेधमात्रेण
परितोऽति विशोषितम् ।
भाण्डमेकं ससिकतं
कृत्वा तत्र च निःक्षिपेत् ॥ २०५ ॥
कूपिकामुपरिष्टाच्च
वालुकाया द्विभागकौ ।
वालुकापूरितं भाण्डं
शरावाच्छादितं दृढम् ॥ २०६ ॥
मृत्स्नया कर्पटैर्युक्तमातपे शोषितं तथा ।
चुल्यामारोप्य तद्भाण्डं विपचेन्मृदुनाग्निना२०७
सार्धं दिनं सुसंसिद्धं भाण्डमुद्घाट्य ग्राहयेत् ।
पलार्धं मरिचोपेतं कर्षार्धामृतसंयुतम् ॥२०८॥
श्लक्ष्णं संपेष्य ताम्बूलीदले गुञ्जामितं भजेत् ।
सन्निपातं धनुर्वातं पक्षाघातं ततःक्रमात् ॥२०९
क्षयं च श्वासकासौ च मन्दाग्नि श्लेष्मकामले ।
हस्तपादगतं शोथं प्रयोगादेव संहरेत् ॥२१०॥
शाल्यन्नं मुद्गसंयुक्तं गव्यक्षीरं पलामृतम् ।
छागपारावतं पथ्यं तथा लावकतित्तिरी॥२११॥
रसदीप्तिः प्रकर्तव्या शारिवादिरसेन च ।
इष्टभुग्भक्षणैर्युक्तं गोक्षीरं खण्डशर्कराः ॥२१२॥
कोकिलाक्षस्य निर्यासैर्वातशोणितनाशनः ।
तत्तद्रोगानुपानेन तत्तद्रोगनिबर्हणः ॥ २१३ ॥
रसो ह्यग्निकुमाराख्यो योगोऽयं रसभूपतिः ।

र. क. यो., धा.,

भाषा—पारा, गन्धक और शुद्ध ताम्रपत्र सब को दो २ तोला लेकर एक दिन भर हंसराज के रस मे घोटना, फिर उसकी गोलियां बनाकर शीशी मे रखना और शीशी के मुख को बंद करके बाहर चारों तरफसे २ अंगुल कपडमिट्टी करना फिर एक हांडी में ½ बालु भरना और शीशी को रख कर बालु से हांडी को भर देना, और मिट्टी के सकोरे से ढककर ऊपर से कपडमिट्टी करके सुखालेना। उस हांडी को चूल्हे पर रखकर मन्द अग्नि से १½ दिन तक पकाना और ठंढा हो जाने पर निकाल लेना फिर २ तोला कालीमिर्च और ½ तोला बछनाग मिलाकर बारीक चूर्ण कर लेना। इस को पान के रस के साथ २ रत्ती देना, सन्निपात, धनुर्वात, पक्षाघात, क्षय, दमा, खांसी, मन्दाग्नि, कफरोग, कामला और हाथ पैरों का सोना, ये सबरोग इस रस के प्रयोगमात्र से नष्ट हो जाते हैं। शालीचावल, मूंग की दाल, गाय का दूध मांस रस, बकरा, कबूतर, लवा और तीतर इनका

मांस इस रस के खानेवाले को हितकर है। इस रस को अधिक बल देनेवाला बनाने के लिये शारिवादिगण (शारिवा, मुलेठी, चन्दन, लालचन्दन, पद्मकाठ, गंभारी के फल, महुवा के फूल, दाख) के रस का उपयोग करना चाहिये। तालमखाने के रस के साथ खाने से यह रस वातरक्तरोग को दूर करता है। जैसा २ रोग हो उस के यथोचित अनुपान के साथ सभी रोगों को यह दूर करता है यह सब रसों का राजा अग्निकुमार रस है॥ ५१॥

५२ अग्निकुमारो रसः (पञ्चचत्वारिंशः)

रसगन्धकतालानामेकद्वित्रिपलं क्रमात् ।
हंसपादीरसेनाथ सूक्ष्मचूर्णं विमर्दयेत् ॥२१४॥
निधाय वालुकायन्त्रे विधाय सुदृढं मुखम् ।
अधोमुखगतां कूपीं वालुकामध्यगां पचेत् २१५
क्रमाग्नौ त्रिदिनं सिद्धं ततः शीतं समुद्धरेत् ।
विषं कलांशमानेन योजनीयं भिषग्वरैः २१६
वाताद्यग्निकुमारोऽयं रक्तिमानप्रमाणतः ।
सन्निपाते धनुर्वाते गृध्रस्यामपबाहुके ॥
सर्वाङ्गकम्पवाते च विसूच्यामग्निमान्द्यके २१७

र. क. यो.,

भाषा—पारा ४ तोले, गन्धक ८ तोले, हरताल १२ तोले लेकर हंसराज के रस मे बारीक घोटना फिर शीशी मे रखकर उसका मुख अच्छी तरह से बंद करके वालुका यन्त्र के बीच मे शीशी को उलटी रखकर ऊपर से वालु भरकर क्रम से मन्द, मध्यम और तेज अग्नि मे तीन दिन तक पकाना। ठंढा हो जाने पर निकाल कर $\frac{१}{१६}$ बछनाग मिलाकर चूर्ण कर लेना यह वाताद्यग्निकुमार रस है। इस की मात्रा १ रत्ती की है। सन्निपात धनुर्वात, गृध्रसी, अपबाहुक, सर्वाङ्गकम्प और विसूचिका मे हितकर है॥ ५२॥

५३ अग्निकुमारो रसः (षट्चत्वारिंशः)

रसविषगन्धकहरितालं
ताम्रं चार्कविमर्दितमेतत् ।
वज्रमूषधरवालुकपक्वः
अनुभवसिद्धो ह्यग्निकुमारः॥२१८॥

र. क. यो.,

भाषा—पारा, बछनाग, गन्धक, हरताल और तांबा इन सब को बराबर लेकर आकड़े के रस मे मर्दन करना। फिर वज्रमूषा मे रखकर भूधर यन्त्र मे वालु के बीच मे पकाना। यह अनुभवसिद्ध अग्निकुमाररस है॥ ५३॥

५४ अग्निकुमारो रसः (सप्तचत्वारिंशः)

सूतं गन्धं विषं शङ्खं कपर्दं टङ्कणोषणे ।
चन्द्राग्निगजत्रिद्विवसुभागैर्मितं क्रमात् २१
जम्बीरकेण संमर्द्य भवेदग्निकुमारकः ।
वाते मन्दानलेऽजीर्णे ज्वरश्लेष्मविसूचिके२२
गुञ्जामात्रः प्रदातव्यो विण्मूत्रशिरसो ग्रहे।
कासे श्वासे क्षये शूले सर्वरोगेषु योजयेत् २२

र. सं. क., अग्निमान्द्यादौ ।

भाषा—पारा १ भाग, गन्धक १ भाग, [illegible] (बछनाग) ३ भाग, शंखभस्म ८ भाग, कौ[ड़ी] की भस्म ३ भाग, सुहागा भूना हुआ २ भा[ग] और कालीमिर्च ८ भाग, इन सब को जम्बीरी नी[बू] के रस मे एक या दो दिन तक घोटना। [यह] अग्निकुमार नामक रस है। इस की १ रत्ती [की] मात्रा है। मन्दाग्नि, वातरोग, अजीर्ण, ज्वर, क[फ] रोग, हैजा, मूत्र की रुकावट, मत्थे का शुम [व] शून्य रहना, खांसी, दमा, धातुक्षीणता और श[ूल] इत्यादि सब रोगों को नष्ट करता है॥ ५४॥

५५ अग्निकुमारो रसः (अष्टचत्वारिंशः)

रसस्य पलमेकन्तु गन्धकस्य पलत्रयम् ।
चतुःपलं माक्षिकश्च पलमेकमयस्तथा ॥२२[३]
मृतशुल्बं पलश्चैकं मृतं कृष्णाभ्रकं पलम् ।
पलमेकं तथा वङ्गं मृतं नागं पलन्तथा॥२२[४]

एवं सम्भृत्य सम्भारमेकीकृत्य विमर्दयेत् ।
नष्टपिष्टिं ततः कृत्वा गोलकं कारयेद्बुधः२२४
ऊर्ध्वाधः सैन्धवं कृत्वा देया कर्पटमृत्तिका ।
पुटेत्तद्भूधरे यन्त्रे यावद्यामाँस्त्रयोदश ॥२२५॥
स्वाङ्गशीतलमुत्तार्य चूर्णं कुर्याद्विचक्षणः ।
सैन्धवञ्च पृथक्कृत्वा तस्य चूर्णं प्रकल्पयेत्२२६
तल्लवणञ्च प्रदातव्यमजीर्णकृमिशूलिषु ।
औषधं भावयेत्पश्चात् मागधीभावनात्रयम्२२७
पश्चार्द्रकरसेनापि सप्तकन्यारसेन च ।
ज्वालामुख्या तथा सप्त पञ्च चित्रकभावनाः ॥
भूम्यामल्याश्च क्वाथेन भावनास्त्वेकविंशतिः ।
मरिचं पञ्चभागेन वल्लमेकं प्रदापयेत्॥२२९॥
हन्त्यर्शांसि च मन्दाग्निं कोष्ठवातं तथोदरम् ।
क्षयं मेहमपस्मारमुन्मादं विषमज्वरम्॥२३०॥
नित्यं ज्वरं सदाहञ्च सन्निपातं सुदारुणम् ।
अश्मरीं मूत्रकृच्छ्रञ्च ग्रहणीञ्च भगन्दरम् २३१
कामलां पाण्डुरोगञ्च शूलगुल्मकृमीन् ध्रुवम् ।
विशेषात्सर्वरोगांश्च हन्ति चाग्निकुमारकः२३२

अनुपानविधिः ।

तक्रं पेयं केवलं सप्तरात्रं
नो वा युक्त्या शर्करामृक्षणाभ्याम् ।
किंवाऽखण्डो वर्द्धमानप्रमाणः
पेयः शीतेनाम्बुना मासमेकम्॥२३३॥
र. (मा.)

भाषा—पारा ४ तोले, गन्धक १२ तोले, सोनामक्खी १६ तोले, लोहभस्म, ताँबेकीभस्म, कृष्णाभ्रकभस्म, बङ्गभस्म और सीसाभस्म यह सब चार चार तोले, सबको मिलाकर बहुत बारीक चूर्ण करके (घीकुंआर, पान अथवा अदरखके रससे) गोला बनालेना । फिर नीचे और ऊपर सेंधानमक रखकर शराव सम्पुटमे उस गोलेको रखकर बाहरसे कपडमिट्टी करके १३ पहर तक भूधर यन्त्रमे पकाना । स्वाङ्गशीतल होनेपर उसमेसे नमकको अलग निकालकर चूर्ण कर लेना । यह अजीर्ण, कृमिरोग और शूलको शान्त करनेवाला है । भीतर के गोलेको अलग निकालकर पीपलके क्वाथ से ३ अदरखके रससे ५, घीकुंआर और ज्वालामुखीके रससे पृथक् पृथक् ७, चित्रकके क्वाथ अथवा रससे ५, और भुंईआंवलेके रससे २१ भावना देना । इसकी ३ रत्तीकी मात्रा पचगुने कालीमिर्चके चूर्णके साथ देना । यह रस बवासीर, मन्दाग्नि, कोष्ठवात, उदररोग, क्षय, प्रमेह, मिरगी, उन्माद, विषमज्वर, दाहसहित नित्यज्वर, घोर सन्निपात, पथरी, मूत्रकृच्छ्र, संग्रहणी, भगन्दर, कामला, पाण्डुरोग, शूल, गुल्मरोग और कृमिरोगको अवश्यही नष्ट करता है । प्रायः यह अग्निकुमार रस सभी रोगोंको नष्ट करता है । इसके अनुपान की यह विधी है कि इसको सात दिनतक केवल छाछके साथ अथवा शक्कर और मक्खनके साथ अथवा शक्करके साथ, अथवा बर्धमान पिप्पलीके साथ अथवा १ महीने तक ठंढे पानीके साथ देना ॥ ५५ ॥

५६ अग्निकुमारो रसः
(महदाद्यः) (ऊनपञ्चाशः)

सूतं गन्धं विषं ताम्रं
प्रत्येकं द्विपलं तथा ।
सौवर्णं राजतं भस्म
प्रवालं मौक्तिकं तथा ॥ २३४ ॥
गोमेदकं च नीलं च
राजावर्तं च माक्षिकम् ।
वैक्रान्तं टङ्कणश्चाभ्रं
वङ्गं कान्तं च सीसकम् ॥ २३५ ॥
शिलां च हरितालं च
स्वरोष्ट्रं खर्परं तथा ।
पृथक् पलार्धकश्चैव
हंसपादीरसैर्दिनम् ॥ २३६ ॥
निर्गुण्डीवह्निवासाजैः
[illegible] दिनम् ।

मत्स्य,माहिषवाराह
मयूर, च्छागसम्भवैः ॥ २३७ ॥
पित्तैश्च भावयेदेवं
प्रत्येकं तु पृथक्पृथक् ।
काचकूप्यां विनिःक्षिप्य
वालुकायन्त्रगं पचेत् ॥ २३८ ॥
यामद्वादशपर्यन्तं
स्वाङ्गशीतलमुद्धरेत् ।
पुनः पित्तैः पृथग् भाव्यं
खल्वमध्ये विनिःक्षिपेत् ॥ २३९ ॥
मर्दयेच्चूर्णयेत्सूक्ष्मं
गुञ्जामात्रंप्रदापयेत् ।
सन्निपातं धनुर्वातं
पक्षाघातं सुदारुणम् ॥ २४० ॥
कामलापाण्डुरोगौ च
गुल्मशूलनिवारणः ।
महानग्निकुमारोऽयं
रसोऽयं लोकपूजितः ॥ २४१ ॥
वा०,

टि० उष्ट्रमिति—कस्यापि धातोरेतन्नाम्नाऽप्रसिद्धत्वान्न ज्ञायते उष्ट्रशब्देन किन्नाम तथापि, एकदा मिश्रदेशे बहवो वार्तिका एकस्मिन्देवीमन्दिरे विलक्षणतत्वमुद्भावयितुं समवेतास्तत्र उष्ट्रविटं प्रज्वालयामासुस्ततो घ्राणादिप्रबाधकस्तीक्ष्णो धूमस्समुदतिष्ठत् । किमिदमित्याश्चर्यनिमग्नास्तं धूममूर्ध्वं निपात्य तं रसराजस्याऽसाधारणसहकारकं मेनिरे तत्रापि इदं तत्वं देव्यैव मुखात्कथितमिति मत्वा "उमाननीय" मिति नाम स्थापितवन्तः । तदेव नाम क्रमेणापभ्रष्टतामाप्य पाश्चात्यदेशे "एमोनियम्," इति नाम्ना व्यवहियते—यथोष्ट्रविशस्तस्य समुत्पत्तिस्तथाभारते नरविशः सकाशात्तस्य प्रचुरतया उत्पत्तिरसमजनि अतस्तस्य भारते नरसार इतिनाम प्रसिद्धं वर्तते । अत्र तद्ग्रहणे न कापि क्षतिरिति मे प्रतिभाति। यद्यपि अथर्ववेदे सुवर्णस्य नाम समागतं परन्तु तस्यात्र प्रत्यक्षविहितत्वादकिञ्चित्करन्तत् ।

भाषा—पारा, गन्धक, बछनाग और तांबे की भस्म ये सब प्रत्येक ८ तोले और सोना, चांदी, प्रवाल, मोती, गोमेद, नीलम, लाजवर्द, सोनामक्खी, तुरमुली (वैक्रान्त) सुहागा, अभ्रक, बङ्ग, कान्तलोह, सीसा, मैनसिल, हरताल, कांस्य, उष्ट्र, (नोसादर) और खर्पर इन सब की भस्में प्रत्येक दो तोले लेकर हंसराज, निर्गुण्डी, चित्रक, अडूसा इनके स्वरस या क्वाथ तथा आक के दूध और मच्छी भैंसा, वराह, मोर और बकरा इन के पित्तों से पृथक् २ एक एक दिन भावना देना फिर उस को शीशी में रखकर वालुकायन्त्रमे १२ पहर तक पकाना । जब स्वाङ्गशीतल होजावे तब निकालकर दुबारा उपरोक्त ५ पित्तों से भावना देकर सुखाकर खरल मे पीसकर बारीक चूर्ण बना लेना इस को १ रत्ती की मात्रा मे देना । यह रस सन्निपात, धनुर्वात, घोर पक्षाघात, कामला, पाण्डुरोग, गुल्म और शूल इनका नाश करता है । यह महान् अग्नि कुमार रस संसार मे आदर पाया हुआ है ॥५६॥

५७ अग्निकुमारो रसः (सिद्धार्थः)
(पञ्चाशः)

सोमब्रह्म, भुजङ्गशुल्बदरदं,
वङ्गं, रसं लोहजं,
आरं शल्यसुगन्धकौ
स्वरशिलाताप्यद्वयं मुण्डकम् ।
सर्वं भस्म निरुत्थशुद्धिसहितं
खल्वे च संस्थापयेत् ,
अर्कक्षीरविमर्दितं दिनमिदं
निम्बद्रवैः सत्वरम् ॥ २४२ ॥
मुण्डीवर्वरलिङ्गिरेणुसरलै-
स्तत्काचकूप्यां न्यसेत् ,
संवेष्ट्यं शुभमृत्स्नया
करपटैः सम्पक्वभाण्डोदरे ।

विन्यस्यामलभस्मना सुपिहितं
घस्रत्रयं पाचयेत् ,
नीत्वा शीतलताङ्गतं रसवरं
ताप्यात्समांशं विषम् ॥ २४३ ॥
मृद्वीयाच्छिखिकासराजझषजैः
कौलैश्च पित्तैस्तथा,
कृत्वा गोलमिदं सुकूपिनिहितं
स्थाप्यश्च मृद्भाण्डके ।
क्षिप्त्वा तत्पटुयन्त्रके त्रिदिवसं
मध्याग्निना पाचयेत् ,
भारङ्गीसुरदारुतित्तिरिफलै-
र्भृङ्ग्या च निर्गुण्डिका- ॥२४४॥
शुण्ठीचित्रकटुत्रयै रविपयः
पित्तैः पुनर्भावितं,
प्रत्येकैर्मुनिभावितश्च विधिना
संशोषितं मर्दितम् ।
दाप्योऽयं विषमे त्रिदोषसहिते
सिद्धाग्निसूनुर्ज्वरे ,
सर्वातङ्कहरोरसोऽयममिता-
श्चर्यप्रदः सर्वदा ॥ २४५ ॥
गुञ्जैकः सितयार्द्रकेण सहितः
सर्वान्गदान्नाशयेत् ,
बीजैः पुष्करसम्भवैर्धनपते-
रक्षान्वितो रामठैः ।
गुल्मप्लीहजलोदरग्रहणिकाः
पाण्डुं तथा कामलाम् ,
मागध्या मधुशर्करादिसहितः
श्वासं च कासं क्षयम् ॥ २४६ ॥
तापस्यानुभवो भवेद्यदि तदा
शीतोपचारः शुभः,
कर्पूरागुरुकेसरं मलयजं
शीताम्बुपानादिकम् ।
पुष्पं केतकमालतीशतदला-
दद्याच शाल्योदनं,
द्राक्षेक्षुद्रवशर्करा हिततमा-
स्ताम्बूलसंचर्वणम् ॥ २४७ ॥
रम्भाकोमलपत्रवेष्टिततनोः
प्रौढाङ्गनालिङ्गनं,
स्नानं दानमथोचितं कुरु सदा
भूदेवसंतर्पणम् ।
ब्रह्मेशाच्युतपूजनं च विधिव-
त्सौख्यप्रदं सर्वदा,
वैद्याधीशनमस्कृतैर्विरचितोऽ-
यंपूज्यपादै रसः ॥ २४८ ॥

वाहटे ।

टि०—अत्र ब्रह्मेति नाम्ना यद्यपि कस्यापि लोहस्य नास्ति व्यवहारे प्रसिद्धिस्तथापि " तदण्डमभवद्धैमम्" मनु० "हिरण्यगर्भः समवर्तताग्रे०," यजु० इत्यादिप्रमाणैः प्रकरणबलात्सुवर्णमित्यर्थो व्यधाय्यस्माभिः । रेणुरिति गन्धद्रव्यविशेषः परं तस्य दुर्लभत्वाद्रेणुकेति निर्गुण्डी निहितास्माभिः प्रायो गुणसाम्यात् ।

भाषा—चांदी, सोना, सीसा, तांबा, शिंगरिफ, वङ्ग, पारा, लोह, पीतल, गन्धक, कांसा, मैनसिल, दोनों माक्षिक, (सोनामक्खी और रूपामक्खी) और विड्लोह इन सबकी निरुत्थभस्में (यद्यपि पारा और गन्धककी भी भस्म होती है परन्तु उसका बनाना कठिन है । इस लिये यदि पारे और गन्धक की भस्म न होसके तो इन दोनोंको शुद्ध कर लेना) बराबर लेकर एक एक दिन आकका दूध नीमका रस, गोरखमुण्डी, शिवलिङ्गी,संभालु, और देवदारु इनके रस अथवा क्वाथसे जल्दी जल्दी घोटना । फिर उसका गोला बनाकर शीशीमे रखकर बाहरसे कपडमिट्टी कर देना । फिर उसको एक पक्के मटकेमे रखकर ऊपर नीचे साफ राख रखकर मटकेके मुंहको अच्छी तरह बंद करके ३ दिन तक उसको पकाना फिर स्वाङ्गशीतल होनेपर सोनामाखीके बराबर बछनाग मिलाकर मोर, भैंसा

बकरा, मच्छी, और वराह इनके पित्तोंसे भावना देना फिर उसका गोला बनाकर शीशीमें रखकर पहिलेके माफिक मटकेमे रखकर लवणयन्त्रमे ३ दिन तक मध्याग्निसे पकाना, फिर ठंढा होनेपर भारङ्गी, देवदारु, जमालगोटा, भांगरा, संभालु, अदरख, चित्रक और त्रिकटु, इनके रस अथवा क्वाथ, आकका दूध और उपरोक्त पांचों पित्त, इनप्रत्येकसे सात ७ वार भावना देना और सुखाकर बारीक घोट लेना यह सिद्धाग्निकुमार रस विषमज्वर और सन्निपातमें देना चाहिये। यह सभी रोगोंको नष्ट करता है और बहुतही आश्चर्यकारक है। एक रत्तीभर इसको अदरख और मिश्रीके साथ खानेसे सभी रोग नष्ट होते हैं। पुष्करबीज, करंजके बीज और हींगके साथ, खानेसे गुल्म, प्लीहा, जलोदर, सङ्ग्रहणी पाण्डुरोग और कामलाको नष्ट करता है। पीपल, शहद और शक्करके साथ खानेसे दमा, खांसी और क्षयको नष्ट करता है। इसको खानेसे यदि गरमी मालूम पडे तो शीत उपचार करने चाहियें और कपूर, अगर, केसर और चंदनका लेप, ठंढा जल और शर्वत इत्यादि पीना। केवड़ा मालती और गुलाब आदिके फूल सूंघना, शालिचावलोंका भात खाना, दाख (अंगूर) गन्ना और मिश्री हितकर है और पान चबाना चाहिये। केलेके कोमलपत्तेशरीरमे लपेटकर युवती स्त्रियोंसे आलिङ्गन करना, स्नान, दान और ब्राह्मणोंको भोजन कराना, ब्रह्मा, शिव और विष्णु भगवान्की पूजा करना इत्यादि काम इसके खानेवालेके लिये हितकर हैं। यह वैद्योंसे नमस्कृत पूज्यपाद महाराजने बनाया है ॥ ५७ ॥

५८ अग्निकुमारलोहम् ।

तुत्थरामठटङ्कानि
सैन्धवं धान्यजीरकम् ।
यवानी मरिचं शुण्ठी
[illegible]
प्रत्येकं तोलकं चूर्णं
लोहचूर्णं तु तत्समम् ।
रसस्य गन्धकस्यापि
पलैकं कज्जलीकृतम् ॥ २५० ॥
घृतेन मधुना खादे-
ल्लौहमग्निकुमारकम् ।
यकृत्प्लीहोदरं गुल्मं
नाशयेच्च हलीमकम् ॥ २५१ ॥
बलवर्णाग्निजननं
कान्तिपुष्टिविवर्धनम् ।
श्रीमद्गहननाथेन
निर्मितं विश्वसम्पदे ॥२५२॥

र. सा., र. चि., र. सु., ध., र. र., र. चं., प्लीहाधिकारे.

भाषा—तूतिया की भस्म, हींग, सुहागा (भूना हुआ) सेंधानमक, धनियां, जीरा, अजवाइन, काली मिर्चे, सोंठ, लौंग, छोटी इलायची और विडङ्ग, सबको प्रत्येक १ एक तोला और सबके बराबर लोहभस्म और पारा तथा गंधक ४ चार तोले लेकर पहिले पारे और गन्धक की कजली बनाना फिर अन्य औषधियों को बारीक पीसकर मिलादेना और घी तथा शहद के साथ इस अग्निकुमार लोह को खाना। यह यकृत्, प्लीहा, उदररोग, गुल्म और हलीमक का नाश करता है, बल और वर्ण को उत्पन्न करके जठराग्नि को प्रदीप्त करता है। कान्ति और पुष्टिको बढाता है श्रीमान् गहननाथ महाराज ने संसार के कल्याण के लिये इस को बनाया है ॥ ५८ ॥

५९ अग्निगर्भो रसः (प्रथमः)

सूतं ताम्रमयोऽभ्रकं च कुटिलं
वङ्गं विषं ताप्यकं,
कङ्कुष्ठं द्रदं शिलाजतु शिला
कम्पिल्लकं गन्धकम् ।
सर्वं तुल्यविभागिकं तपनतु-

कन्यावह्निवराम्लवेतसशटी-
ब्राह्म्यम्लिकाद्भिः पृथक् ॥ २५३ ॥
वारान् सप्तमितानरुष्करभव-
क्वाथेन षड्विंशतिम्,
गोजीभिश्च रसोन्मितांस्त्रिकटुक-
क्वाथेन वारान् दश ।
अर्शोघ्नस्वरसेन विंशतियुतां-
स्तालीरसेन त्रिधा,
सर्वैरेव विभाव्य च प्रतिरसं
सिद्धोऽग्निगर्भो रसः ॥ २५४ ॥
माषैकः सुरसारसेन चपला-
क्षौद्रान्वितो वाऽभया,
क्षौद्राभ्यां च सुवर्चिकादहनयु-
ग्वा त्र्यूपणैर्वाहितः ।
वा कन्दाग्नियवानिकागुडकणा-
तालीवरीभिः शिवा-
क्षौद्राभ्यां च घृतोषणैरपि जये-
दर्शांसि सर्वाण्यपि ॥ २५५ ॥
वह्नेर्मान्द्यं प्रमेहश्रवणनयनरुक्
शूलगुल्मोदरान्ध्य,-
श्वासोदावर्तहिध्माकसनक्रमिगणान्
पीनसाध्मानतूनीः ।
प्रत्यष्ठीलां प्रतूनीं हरति च तथा
शोथपाण्ड्वामयादीन्,
वर्ज्ये वृन्ताकतैले स्त्रियमपि च दिवा
स्वापमश्वेन यानम् ॥ २५६ ॥

रसावतारे—अर्शोऽधिकारे ।

भाषा—पारे की भस्म, अथवा शुद्ध किया हुआ पारा, ताम्र, लोह, अभ्रक, सीसा, बङ्ग, (इनकी भस्में) बछनाग, सोनामाखी, (शुद्ध) मुर्दासंग, (शुद्ध) सुहागा (भुनाहुआ), शिलाजीत, मैनसिल (शुद्ध); कमीला, और गन्धक (शुद्ध) सब को बराबर और सब के बराबर श्वेत आक की जड़ की छाल लेकर घीकुंआर, चित्रक, त्रिफला, अमलवेत, कचूर, ब्राह्मी और इमली के रस (जिस का रस न मिले उस के क्वाथ) से अलग अलग २ सात वार भावना देना । फिर भिलावे के क्वाथ से २६, गोभी के रस से ६, त्रिकटु के क्वाथ से १०, जिमीकंद के क्वाथ से २० और खजूर की ताडी से ३ भावनाएं देना । यह सिद्ध अग्निगर्भ रस है । इस की मात्रा १ मासा है । इस का अनुपान तुलसी का रस, पीपल और शहद; हरड़ और शहद; कालानमक और चित्रक; त्रिकटु, जिमीकंद, चित्रक, अजवाइन, गुड़, पीपल, ताडी और शतावरी का चूर्ण, अथवा आंवले का चूर्ण और शहद, अथवा घी और त्रिकटु है । यह सभी प्रकार के अर्श, मन्दाग्नि, प्रमेह, कान और आंख की पीडा, शूल, गुल्म, उदररोग, अंधेरी, दमा, उदावर्त, हिचकी, कृमिरोग, पीनस, पेट का फूलना, तूनी, प्रत्यष्ठीला, प्रतूनी, शोथ और पांडुरोग को नष्ट करता है इस के सेवन करनेवाले को, बैंगनका शाक, तेल, स्त्री, दिन मे सोना और घोडे की सवारी बिलकुल छोड देनी चाहिये ॥ ५९ ॥

६० अग्निगर्भो रसः (द्वितीयः)

रसगन्धौ समौ ताभ्यां द्विगुणं हरितालकम् ।
गुञ्जारसेन त्रिदिनं मर्दयेत्खल्वमध्यतः॥२५७
तत्समं ताम्रपात्रं च तेन कल्केन लेपयेत् ।
अधोमुखं तु तत्पात्रं यामयुग्मं पचेच्छनैः २५८
वालुकापूर्णयन्त्रे तु ताम्रेण सह मर्दयेत् ।
गुञ्जाद्वयमितो हन्याज्ज्वरांश्च विषमानपि २५९
अग्निगर्भो रसो ह्येष ससितो विषमापहः ।
स्वीयानुपानैरपि वा तुलसीरससंयुतः ॥२६०॥

रसावतारे, ज्वराधिकारे—

भाषा—पारा और गन्धक बराबर और इन दोनों से दूनी हरिताल लेकर गुन्जा का रस मिले तो रस नहीं तो क्वाथ से खरल मे घोटना फिर उसके बराबर वजन की तांबे की कटोरी लेकर

उपरोक्त कल्क भीतर से पोत देना । उस कटोरी पर एक ढकन दे कर २-३ कपड मिट्टी देकर सुखाके उल्टी रखके २ पहर वालुका यन्त्र मे मन्द अग्निसे पकाना । फिर उस तांबे की कटोरी सहित उस को पीस लेना इस की मात्रा २ रत्ती भर है यह अग्निगर्भ रस विषमज्वरों को भी नष्ट करता है इस का अनुपान मिश्री, तुलसी का रस अथवा जो कुछ अवस्थाके अनुसार समझा जावे ॥६०॥

६१ अग्निगर्भा वटी.

शुद्धं रसं पलं ग्राह्यं गन्धकं द्विपलं भवेत् ।
लोहं टङ्कं वचां कुष्ठं रामठं त्रिकटुं निशाम् २६१
रसार्धभागमानेन सर्वमेकत्र भावयेत् ।
मानोल्वर्षटाकर्णानां त्रिफलानां रसेन च २६२
गुञ्जापञ्चप्रमाणेन वटिका परिनिर्मिता ।
अग्निगर्भेयमुदिता प्लीहगुल्मोदरापहा ॥२६३॥
शूलघ्नी याकृतं हन्यादष्ठीलां कामलामपि ।
हलीमकं च पाण्डुत्वं कृमिकुष्ठविनाशिनी २६४
चन्द्रनाथेन गदिता रसमङ्गलभूषिता ।
आनाहकासशमनी व्रणविस्फोटनाशिनी २६५
सङ्ग्रहग्रहणीं हन्याच्छ्लेष्मदोषोद्भवामपि ।
लवङ्गयोगः कर्तव्यो महाग्निदायिनी मता २६६

र. र., र. च., उदराधिकारे

भाषा—शुद्धपारा ४ तोले, गन्धक ८ तोले, लोह, सुहागा, बच, कूठ, हींग, त्रिकटु और हल्दी ये सब पारे से आधे प्रमाण में लेकर सब का चूर्ण कर लेना। फिर मानकंद (मराठी कासाळू), जिमीकंद, और व्याघ्रनखी (हिंदी-वघनहा, मराठी-वाघाण्टी) और त्रिफला के रस अथवा क्वाथ से अलग अलग भावनाएं देना। फिर ६ छः रत्ती की गोलिएं बना लेना। यह अग्निगर्भावटी, प्लीहा, गुल्म, उदररोग, शूल, यकृत्, अष्ठीला, कामला, हलीमक, पाण्डु, कृमी और कुष्ठ को नष्ट करती है। यह श्रीचन्द्रनाथ जी महाराज ने (रसमङ्गल ग्रन्थ में) कही है। यह आनाह, खांसी, व्रण, फोड़ा और कफदोष से जनित संग्रहणी को नष्ट करती है। इस के साथ ३ मासा लवंगका चूर्ण देना चाहिये। यह जठराग्नि को बहुत प्रदीप्त करती है ॥ ६१ ॥

६२ अग्निजननीवटी

रसगन्धकनागरटंकणकं
गरलं मरिचं समभागयुतम् ।
लकुचस्वरसैश्चणकप्रमिता
गुटिका जनयत्यचिरादनलम् ॥२६७॥

र. सु., वै. क., र० र० स०, भै. र., अग्निमान्द्याधिकारे । भैषज्यरत्नावल्यां टंकणादिवटीति नाम योजितमस्ति ।

भाषा—पारा, गन्धक, सोंठ, सुहागा, बच्छनाग और कालीमिर्च, सब को बराबर लेकर बड़हल के रस मे घोट कर चने के बराबर गोलियें बनालेना। ये गोलियें जल्दी जठराग्नि को प्रदीप्त करती हैं ॥ ६२ ॥

६३ अग्नितुण्डीवटी

शुद्धसूतं विषं गन्धमजमोदां फलत्रिकम् ।
स्वर्जिक्षारं यवक्षारं वह्निसैन्धवजीरकम् ॥२६८॥
सौवर्चलं विडङ्गानि सामुद्रं त्र्यूषणं तथा ।
विषमुष्टिं सर्वसमां जम्बीराम्लेन मर्दयेत् ।
मरिचाभां वटीं खादेद्वह्निमान्द्यप्रशान्तये २६९

ना. वि., नू. क., र. सि., र. क. ल., र. सा., र. मं., भै. र., र. क., र. क. यो., वै. चिन्तामणौ (कालाग्निरुद्रेति नाम वाताधिकारे) र. सु., शा., र. प्र. सु., बृ. र., र. र., भै. सा., चि. र., टो., र. चं., र. प्र., बसवराजीये (अग्निमान्द्यवटी) सा वटी वल्लयुगला सेविता जयति क्षुधम् । वह्निमान्द्यमजीर्णं च विसूचीं ग्रहणीगदम् ॥ शूलं कोष्ठगतं वातरोगानन्यांश्च नाशयेत् । शूलं सर्वाङ्गजं चापि शूलं च परिणामजम् ॥ आमवातं विशेषेण हन्ति तथ्यं शिवोदितम् । पथ्यां शुण्ठीं गुडं चानु पलार्धं भक्षयेत्सदा ॥ इत्यधिकः पाठो रसेन्द्रकल्पद्रुमे ।

रसावतार मा., रसायनसं., अग्निमान्द्याधिकारे। अग्नितुण्ड्याः सम्प्रदायानुसारेणाग्निमान्द्यार्शोविकारक-

मिषु प्रायो वैद्यवराः प्रयोगं कुर्वन्ति, तत्रार्शः कृमिविकारयोर्विषमुष्टिशब्देन महानिम्बबीजानि ग्राह्याणि, अग्निमान्द्ये कुचिलेति प्रसिद्धं द्रव्यमिति रहस्यम् ।

भाषा—शुद्धपारा, बछनाग, गन्धक, अजमोद त्रिफला, सज्जी, यवक्षार, चित्रक, सेंधानमक, जीरा कालानमक, विडङ्ग, समुद्रलवण और त्रिकटु सबको बराबर और सबके बराबर कुचिला लेकर जम्बीर के रस मे घोटना फिर कालीमिर्च के बराबर गोलियें बना लेना । इस गोली को खाने से मन्दाग्निरोग दूर होता है । कुचिलेका विशेषशोधन किया जाय तो इसकी ३ रत्ती तक की गोली बनाके दे सक्ते हैं पर जब केवल कुचिले के छिल के मात्र ही निकालना शुद्धि अभीष्ट हो तो मरिच जितनी ही गोली बस है इसी लिए रसेन्द्रकल्पद्रुममें ६ रत्तीकी मात्रा लिखी है पर जब बकायन के बीज डाल के बनानी हो तो २ रत्ती की गोली बस है ॥ ६३ ॥

६४ अग्निदीपनीवटी

गन्धकं मरिचं शुण्ठी सैन्धवं यवजं नवम् ।
निम्बूरसेन वटिका चणमात्राऽग्निदीपनी ॥२७०

नि. र., र. इ., अर्शसि ।

भाषा—गन्धक, कालीमिर्च, सोंठ, सेंधानमक और नया यवक्षार सब को बराबर लेकर नींबू के रस मे घोटकर चने के बराबर गोलिएं बना लेना । यह गोली जठराग्नि को प्रदीप्त करती है ॥ ६४ ॥

६५ अग्निप्रदो रसः

कर्षौ द्वौ रसगन्धयोस्तु समयोः
संमर्द्य नागस्य च,
कर्षैकेण विषेण कज्जलनिभं
काचस्य कूप्यां क्षिपेत् ।
लिप्त्वा कर्पटमृत्स्नया सुविधिना
संपाच्य यामाष्टकं,
ज्ञात्वा शीतलमत्र जातविधिना
मर्द्य त्रिकर्षोषणैः ॥
भक्षेद्रक्तिकमिक्षुशर्करयुतं
नाम्ना रसोऽग्निप्रदो,
मन्दाग्निक्षयसन्निपातमरुतां
नाशाय चायं वरः ॥ २७१ ॥

र. प्र. सु., अग्निमान्द्ये ।

भाषा—पारा, गन्धक, सीसा और बछनाग, प्रत्येक एक तोला लेकर सब को घोटकर कज्जली कर के शीशी में डालकर बाहर से कपडमिट्टी कर के ८ पहर तक बालुका यन्त्र मे पकाना । स्वांग शीतल होने पर २ तोले त्रिकटु मिलाकर बारीक पीस लेना । एक रत्ती भर ईखके रस अथवा शक्कर के साथ खाने से यह अग्निप्रद रस मन्दाग्नि, क्षय, सन्निपात, और वातरोगों का नाश करने के लिये उत्तम है ॥ ६५ ॥

६६ अग्निप्रभावटी

सैन्धवं नरसारं च यवक्षारं तथा विडम् ।
मर्दयेद्रससिन्दूरं पटोलमूलजैः रसैः ॥ २७२ ॥
माषमानां वटीं कृत्वा छायाशुष्कां समाचरेत् ।
प्रातः प्रातः पाययेत्तां कोकिलाक्षाम्भसा समम् ॥ २७३ ॥
यकृद्रोगं महाघोरं प्लीहानमतिदारुणम् ।
वाताष्ठीलां वह्निमान्द्यं गुल्मं चैषा व्यपोहति ॥ २७४ ॥

आ. वि., यकृद्रोगाधिकारे ।

भाषा—सेंधानमक, नोसादर, यवक्षार, विडनमक, और रससिन्दूर, सबको बराबर लेकर पटोलकी जड़के रससे भावना देकर उड़दके बराबर गोलियें बनाकर छायामे सुखा लेना । रोज सुबहको तालमखानेके पञ्चाङ्गके क्वाथ के साथ इस गोलीको देना । यह गोली घोर यकृत् रोग, दारुणप्लीहा, वाताष्ठीला, मन्दाग्नि और गुल्मरोगोंको नष्ट करती है ६६

६७ अग्निमुख चूर्णम् (बृहत्)

द्वौ क्षारौ चित्रकं पाठा करंजं लवणानि च ।
सूक्ष्मैला पत्रकं भार्गी क्रिमिघ्नं हिङ्गुपौष्करम् ॥ २७५ ॥
शुण्ठी दार्वी त्रिवृन्मुस्तं वचा चेन्द्रयवास्तथा ।

वृक्षाम्लं जीरकं धात्री श्रेयसी चोपकुञ्चिका ॥
अम्लवेतसमम्लीका यवानी देवदारु च ।
अभयातिविषा श्यामा हपुषारग्वधं समम् ॥२७७
तिलमुष्ककशिग्रूणां कोकिलाक्षपलाशयोः ।
क्षाराणि लोहकिट्टं च तप्तं गोमूत्रसेचितम् २७८
सूक्ष्मचूर्णानि कृत्वा तु समभागानि कारयेत्
मातुलुङ्ग रसेनैतद्भावयेद्दिवसत्रयम् ॥ २७९ ॥
दिनत्रयं तु शुक्तेन तथार्द्रकरसेन च ।
अत्यग्निकारकं चूर्णं प्रदीप्ताग्निसमप्रभम् ॥२८०
उपयुक्तं विधानेन नाशयत्यचिराद्गदान् ।
अजीर्णमथ गुल्मांश्च प्लीहानं गुदजानि च२८१
अष्ठीलामन्त्रवृद्धिं च वातरक्तं तथोदरम् ॥
प्रणुदत्युल्बणान् दोषान् नष्टमग्निं प्रदीपयेत्२८२

यो. म., वृ. मा, र. र. क, नि. र., भा. प्र., ना. वि.,

भाषा—सर्जीक्षार, यवक्षार, चित्रक, पाठा, करंज, पांचों नमक, छोटी इलायची, तमालपत्र भारङ्गी, वायविडंग, हींग, पोहकरमूल, सोंठ, दारुहल्दी, निसोत, नागरमोथा, बच, इन्द्रजव, कोकम, जीरा, आंवला, गजपीपल, कलौंजी, अमलवेत, अमली, अजवायन, देवदार, हरड, अतीस, काली निसोत, हाऊबेर, अमलतास, और तिल, मोखा, सहजन, तालमखाना और पलाश इनके क्षार, गोमूत्रमें तपाकर बुझाया हुआ मण्डूर, सबको बराबर लेकर बारीक चूर्ण करलेना फिर तीन २ दिनतक बिजोरेका रस, सिरका, और अदरख के रस की भावनाएँ देना । यह बृहदग्निमुख चूर्ण अग्नि को अत्यन्त बढानेवाला तथा साक्षात् जलती हुई अग्नि के समान दीप्तिमान् है विधिपूर्वक उपयोग में लाया हुआ रोगों को शीघ्र नष्ट करता है। अजीर्ण, सम्पूर्णगुल्म, प्लीहा, बवासीर, उदर के रोग, अन्त्रवृद्धि, अष्ठीला, वातरक्त तथा अन्य बढेहुए दोषों को नष्ट करता है और अग्नि को प्रदीप्त करता है ॥ ६७ ॥

६८ अग्निमुखनाम्रम् ।

गन्धकेनाक्षमात्रेण सूततुल्येन निर्मिता ।
कज्जली या तया लेप्यं ताम्रपत्रं तु तत्समम्२८३
अर्जुनत्वग्रसैः सार्धं पक्वोदुम्बरपल्लवैः ।
आच्छाद्य पञ्चलवणै श्चूर्णैश्चापि च मृन्मये २८४
अन्धमूषागतं ध्मातं तत्सिद्धं भक्षयेन्नरः ।
निहन्ति रक्तिकावृद्ध्या माषमात्रप्रयोगतः२८५
अम्लपित्तं क्षयं शूलं जरत्पित्तं सुदारुणम् ।
सप्तरात्रप्रयोगेण शरीरं निर्मलं भवेत् ॥२८६॥

र. र., र. च., अम्लपित्ताधिकारे। अग्निमुखताम्रे सूतगन्धककज्जलीं विधायार्जुनत्वक्कषायेण पिष्टिमात्र पक्वोदुम्बरपत्रैस्तामावेष्टय मृत्पात्रे पंचलवणचूर्णमध्ये आच्छादितो कृत्वा तदुपरि सौध (चूर्णं) सम्पुटं विधाय दृढ निरुध्यान्धमूषतां सम्पाद्य ध्मात्वसित्वा भस्म कुर्यात् ।

भाषा—१ तोला पारा और १ तोला गन्धककी कज्जली बनाकर, अर्जुनवृक्षकी छालके रस अथवा क्वाथमें घोटकर, २ तोले ताम्रके पत्रपर लेपकर पके हुए गूलरके पत्ते लपेटकर कच्चे सूतसे लपेटके मिट्टीके वर्त्तनमें पांचो नमक और चूनेके बीचमें क्रमसे रखकर अन्धमूषामें रख कर भाथीसे धौंकना जब सिद्ध हो जाय तब निकालकर १ रत्ती की मात्रासे प्रारम्भ करना और रोजाना एक १ रत्ती बढाकर १ मासा तक पहुँचाना चाहिये। यह रस अम्लपित्त, क्षय, शूल, और दारुण पक्तिशूलको नष्ट करता है । सात रात्रि तक इसका प्रयोग करने से शरीर निर्मल हो जाता है ॥ ६८ ॥

६९ अग्निमुखमण्डूरम् ।

पलद्वादशमण्डूरं गोमूत्रेऽष्टगुणे पचेत् ।
पञ्चकोलं देवदारु मुस्तं व्योषं पलत्रयं ॥२८७॥
विडं च पलमात्रं तु पाकान्ते चूर्णितं क्षिपेत् ।
पाययेच्छाणमात्रं तु तक्रेण सह बुद्धिमान् ॥
असाध्यं श्वयथुं हन्ति पाण्डुरोगं चिरोद्भवम् ।
मण्डूरोऽग्निमुखो नाम सर्पिः क्षौद्रेण सेव्यताम्
॥ २८९ ॥

भै. र., ध., शोथाधिकारे । पलमात्रमिति प्रत्येकमित्यप्याहार्यम् ।

भाषा—४८ तोले मण्डूरको अठगुणे गोमूत्र मे पकाना फिर पकजाने पर उसमे पंचलवण, देवदार, नागरमोथा और त्रिकटु, इनको प्रत्येक १२ तोले और विडलवण ४ तोले, सब चूर्ण करके डालना। इसको ४ मासेभर छाछके साथ घोलकर पीनेसे असाध्य शोथ और पुराने पाण्डुरोगको यह अग्निमुखमण्डूर नष्ट करता है। घी और शहद भी इसका अनुपान है ॥ ६९ ॥

७० अग्निमुखो रसः (प्रथमः)

सूतं गन्धं विषं तुल्यं मर्दयेदार्द्रकद्रवैः ।
अश्वत्थचिञ्चापामार्गक्षाराः क्षारौ च टंकणम् ॥
जातीफलं लवङ्गं च त्रिकटु त्रिफला समम् ।
शङ्खभस्म पञ्चपटु हिङ्गु जीरं द्विभागिकम्॥२९१
मर्दयेदम्लयोगेन गुञ्जा मात्रा वटी शुभा ।
पाचनी दीपनी सद्योऽजीर्णशूलविसूचिकाः ॥
हिक्कां गुल्मं चोदरं च नाशयेन्नात्र संशयः ।
रसेन्द्रसंहितायां च नाम्ना वह्निमुखो रसः२९३

रसायन सं., र. का., यो. र., वृ. यो.त., नि. र., र. सु., अजीर्णाधिकारे ।

भाषा—पारा, गन्धक और वछनाग बराबर लेकर अदरख के रस की भावना देना। फिर पीपल (वृक्ष), इमली और अपामार्ग (चिरचिटा) इनके क्षार, यवक्षार, सज्जी और सुहागा, जायफल, लौंग, त्रिकटु त्रिफला सबको बराबर और शंखभस्म, पांचोंनमक, हींग और जीरा प्रत्येक, पारेसे दूने डालकर अम्ल के योग से घोटकर २ रत्ती की गोलिएं बनालेना। यह गोली पाचन दीपन है, अजीर्ण, शूल, हैजा, हिचकी, गुल्म, और उदर रोगको नष्ट करती है। रसेन्द्र संहिता मे इसी गोली को अग्निमुख रसकहा है ॥ ७० ॥

७१ अग्निमुखो रसः (द्वितीयः)

रसबलिगगनार्कं वेतसाम्लं विषं स्यात्,
सवरमिह पृथक् स्याद्भावयेद्वस्समेतैः ॥२९४॥
कनकभुजगवल्लीकण्टकारीजयाद्भिः,
कमलसलिलवासामुष्टिवज्र्यम्बुपूरैः ॥ २९५ ॥
अरुणसदृशशाकैर्मातुलान्याऽथ योज्यः,
पटुगण इह तुल्यो भावयेदार्द्रकाद्भिः॥२९६॥
दहनवदननाम्ना वल्लमानो निहन्ति,
प्रबलसकलशूलं तद्विकारानशेषान् ॥ २९७ ॥

र. सं., टो., ध., नि. र., वृ. यो. त., र. क. यो., र. सु., र. र. स., र. क. ल., र. र. दी., र. र., रसायन सं., र. र. को., शूलाधिकारे ।

टि० वज्र्यम्बुपूरैरित्यत्र वज्रीस्थाने रास्नाराष्ट्रीभ्यां विकल्पो दृश्यते, तत्र राष्ट्री शब्देन महाराष्ट्रीग्राह्या, रसरत्नाकरे स्पष्टतया महाराष्ट्रीति प्रयोगात् तत्र वज्रीरास्नामहाराष्ट्रीणां विवादे वज्र्या एव जयस्तस्याः शूलापाकरणे सर्वतोऽभ्यर्हितत्वात् । रत्नाकरौषधयोगे नन्द्यावर्तामृताजम्बुभाव्यं नीलोत्पलद्रवैरितिपद्येन भावनायां विशेषो दृश्यते ।

भाषा—पारा, गन्धक, अभ्रकभस्म, ताम्रभस्म, अमलवेत, वछनाग और त्रिफला सबको बराबर लेकर, धतूरा, पान, कंटकारी, जैत, कमल के फूल, सुगन्धवाला, वासा, कुचिला, मराठी (अथवा थूहर) और बिजोरा, मरसा और भांग इन के क्वाथ की भावना देकर सबके बराबर पांचों नमक मिलाकर फिर अदरख के रस की भावना देना। यह अग्निमुख रस ३ रत्ती की मात्रा मे लेने से घोर शूल और उसके विकारों का नाश करता है ॥ ७१ ॥

७२ अग्निमुखो रसः (तृतीयः)

पारदं माक्षिकं ताम्रं कृष्णाभ्रं गन्धकत्रयम् ।
माणिमन्थं विषं हिङ्गु त्वङ्निशाकंदकाञ्चनान्
रक्तमारिपनिर्गुण्डीमहाराष्ट्र्याटरूपकैः ।
जयाजयन्तीनिर्यासैस्तथाच विषतिन्दुकैः २९९
मर्दितं कुक्कुटपुटे पचेदग्निमुखाह्वयः ।

टि–१–कन्दशब्देनात्र मानकन्दो ग्राह्यो गुल्मशूलादिहरणे सूरणापेक्षयाऽधिक कार्यकरत्वात् ।

अष्ट गुञ्जामितः सोऽयं प्रयोज्यः साज्यनागरः
हिङ्गुसौवर्चलोष्णाम्बुयुतो वा गुल्मशूलजित्
॥ ३०० ॥

टो., र. का., र. र. को., र. स., शूलाधिकारे., र. र. को., शूलमर्दन रस इसी नाम।

भाषा—पारा, सोनामक्खी, तांबा कृष्णाभ्रक भस्म, गन्धक त्रय (गन्धक हरिताल मैनशिल) संचल, हींग, दालचीनी, हल्दी, सुवर्ण, समभाग लेकर लाल मरसा, निर्गुण्डी (संभालू) महाराष्ट्री (मराठी) अडूसा, अरणी और जैत, कुचिला इन प्रत्येकके स्वरस अथवा क्वाथसे घोटकर कुक्कुट पुट मे पकाना । यह अग्निमुख नाम का रस बनेगा । इसकी मात्रा आठ रत्ती की है । और इसका अनुपान घी और सोंठ अथवा हींग, काळानमक और गरम जल है । यह रस गुल्म और शूलरोगको नष्ट करता है ॥ ७२ ॥

७३ अग्निमुखो रसः (चतुर्थः)

शुद्धं सूतं समं गन्धं रसार्धं मृतताम्रकम् ।
दिनैकं शाकजैर्द्रावैर्मर्दयेच्च क्षीरिणीद्रवैः॥३०१
रुद्ध्वा लघुपुटे चैवपचेदग्निमुखो रसः ।
यवानीन्द्रयवापाठाबिल्वशुंठीरसाञ्जनैः ॥
चूर्णं शूलहरं चानु पिबेदुष्णाम्बुना सह॥३०२

र. र. को., र. क. ल., यो. म., र. र., शूलाधिकारे।

भाषा—शुद्ध पारा और गन्धक बराबर लेना और पारेकी ½ ताम्रभस्म, इन सबको मिलाकर एक दिन सागके क्वाथ से भावना देना । लघुपुट मे बंद कर के उसको पकाना यह अग्निकुमार रस बनेगा । अजवाइन इन्द्रजो, पाठा, बिल्व (बेल) सोंठ और सहजने का चूर्ण ३ मासा इस रसके साथ खाना और ऊपर से गरमपानी पीना चाहिये । यह रस उपरोक्तविधि से खाया हुआ शूलरोगको दूर करनेवाला है। इसरसकी मात्रा २ रत्ती से ४ तक की है ॥ ७३ ॥

७४ अग्निमुखो रसः (बृहत्) पञ्चमः

स्वर्जीक्षारं यवक्षारं भल्लातं गजपिप्पलीम् ।
अजमोदां वचां मुस्तां देवदारु विडङ्गकम् ३०३
पाठां दारुनिशां हिङ्गु धात्रीं दाडिमपुष्करम् ।
वृद्धदारुकशीवयवानीजीरकद्वयम् ॥ ३०४ ॥
कर्पूरं नागरं भार्गी मरिचं चाम्लवेतसम् ।
मण्डूरममयां शुण्ठीं चातुर्जातकरञ्जकम्॥३०५
आरग्वधं तथा पञ्चलवणानि विचूर्णयेत् ।
शिग्रुब्रह्मत्वचःक्षारो पाटलासम्भवं तथा ३०६
तिलानां कोकिलाक्षस्य क्षारं शिखरिजं तथा ।
दग्धशंखं समं सर्वं सूक्ष्मचूर्णं प्रकल्पयेत्॥३०७
आतपे मातुलुङ्गाम्ले भावनात्रयभावितम् ।
मुस्ताक्वाथैस्त्रिधा भाव्यमार्द्रकोत्थद्रवैस्त्रया॥
३०८॥
बृहदग्निमुखोनाम माषको दीप्तिकृद्भवेद् ।
गोमूत्रं वा सुरापानं रारनालं स्थापि वा ॥
असाध्योदरगुल्मौ च हन्ति सत्यं त्रिदोषजौ
॥ ३०९ ॥

र. को., अग्निमान्द्ये ।

भाषा—सज्जी, यवक्षार, भिलावा, गजपीपल, अजमोद, वच, नागरमोथा, देवदारु, विडङ्ग, पाठा, दारुहल्दी, हींग, आंवला, अनारदाना, पोकरमूल, विधारा, श्वेतपुनर्नवा, अजवाइन, दोनों जीरे (अलग) कपूर, सोंठ, भारङ्गी, कालीमिर्च, अम्लवेत, मंडूर, हरड, सोंठ, (दो बार आया है इसलिये द्विगुण डालना चाहिये) चातुर्जात, (तज, पत्रज, लायची नागकेसर,) करञ्ज, अमिलतास, पांचो नमक (पृथक् पृथक्) सहजन, ढाककी छाल का क्षार सफेद पाटला, तिलका क्षार, तालमखानेका क्षार, अपामार्ग, (चिरचिटे) का क्षार और शंखभस्म इन सबको बराबर लेकर बारीक चूर्ण कर लेना । फिर बिजोरे निम्बूका रस, नागरमोथेका क्वाथ, और अदरख के रस से अलग २ तीन तीन बार भावना देना । यह बृहत् अग्निमुख रस है । इसकी मात्रा एक मासा है । यह बड़ा दीपन है, गोमूत्र अथवा मद्य, या काञ्जीके साथ खानेसे यह रस सन्निपातसे

होनेवाले असाध्य भी उदररोग और गुल्मरोगोंको शीघ्र नष्ट करता है । इसकी मात्रा एक मासे से २ माशे तक है ॥ ७४ ॥

७५ अग्निमुखलोहः

त्रिवृच्चित्रकनिर्गुण्डीस्नुहीमुण्डिनिकाजटाः ।
प्रत्येकशोऽष्टपलिकान् जलद्रोणे विपाचयेत् ॥ ॥ ३१० ॥
पलत्रयं विडङ्गस्य व्योषात्कर्षत्रयं पृथक् ।
त्रिफलायाः पलान् पञ्च शिलाजतुपलं न्यसेत् ॥ ॥ ३११ ॥
दिव्यौषधीहतस्यापि वैकङ्कतहतस्य वा ।
पलद्वादशकं देयं रुक्मलोहस्य चूर्णितम् ॥ ३१२
चतुर्विंशत्पलं सर्पिस्तथा च मधु शर्कराम् ।
घनीभूते सुशीते च दापयेदवतारिते, ॥ ३१३ ॥
एतदग्निमुखं नाम दुर्नामान्तकरं परम् ।
मन्दमग्निं करोत्येप कालाग्निसमतेजसम् ॥ ३१४
पर्वता अपि जीर्यन्ति प्राशनादस्य देहिनाम् ।
गुरुवृष्यान्नपानादि पयो मांसरसो हितः ॥ ३१५
दुर्नामपाण्डुश्वयथुकुष्ठप्लीहोदरापहम् ॥
न स रोगोस्ति यं चापि न निहन्यात्क्षणादिदम् ॥ ॥ ३१६ ॥
करीरकाञ्जिकादीनि वर्जयेत्तु प्रयत्नतः ।
स्रवत्यतोऽन्यथा लौहं देहे किट्टं च दुर्जयम् ३१७

र. चि., र. सु., र. चं., र. प्र., भै. र., र. र., र. फ., रसायन सं., टो., च. द., र. का., र. र. को., यो. म., अर्शोरोगाधिकारे ।

टि० दिव्यौषधीहतस्यापीति—यद्यपि मनःशिलायां दिव्यत्वम्प्रदर्श्य कृतकृत्या जाताः केचिन्महानुभावाः परन्तु धातुवादरसायनादिसिद्धान्तावगाहनेन याभिरोषधीभिस्सकृद्वारं पुटनेन निरुत्थतां सम्प्राप्य लोकोत्तरगुणकारितां धातव आवहन्ति ता एव दिव्यौषधीपदेन ग्राह्याः । यथा दिव्यौषधीबद्धादिपारदेऽभसत्वप्रासमन्तरापि बुभुक्षा भवति ।

भाषा—निसोत, चित्रक, निर्गुण्डी (संभाळु) थूहर और गोरखमुण्डीकी जड़ इन सबको अलग अलग बत्तीस तोळे लेना और १६ सेर पानीमें उसको पकाना । फिर विडङ्ग बारह तोले, त्रिकुट ३ तोले, त्रिफला २० तोले, शिलाजतु ४ तो०, और दिव्यौषधीसे अथवा स्नुवृक्ष (कांटी) से मारा हुआ कान्त लोह ४८ तोले मिलाकर बारीक चूर्ण कर लेना फिर घी शहद और शक्कर प्रत्येक ९६ तोले डालना । जब सब ठंढा होकर जमजावे तब यह रस अवदारित रोग (जिसमें गुदाके भीतर फटकर चीर जैसे पड़ते हैं) वालेको देना चाहिये । यह अग्निमुखनामवाला रस दुर्नाम (अर्शआदि) का अन्त करने वाला है । मन्दाग्नि को प्रलयकाल की अग्नि के सदृश बना देता है । जो लोग इस को खाते हैं उन को पहाड़ भी हजम हो जाते हैं । भारी और वृष्य अन्नपान दूध और मांसरस को खानेवाले के लिये हितकर है । यह रस जिस को क्षणभर मे नष्ट न कर देवे ऐसा कोई रोग ही नहीं है । करील और कांजी इत्यादि का उपयोग बिलकुल ही छोड देना चाहिये । क्यों कि उपरोक्त वस्तुओं को उपयोग करने वाले के देह मे लोह और किट्ट फूट निकलता है ॥ ७५ ॥

७६ अग्निरसः (प्रथमः)

वज्रहाटकसूतानां भस्मैषां द्वित्रिषट्क्रमात् ।
त्रिकण्टकरसैर्भाव्यं दिनान्ते तद्विचूर्णयेत् ॥ ३१८
गुञ्जामात्रं प्रयोक्तव्यं सज्वरे राजयक्ष्मणि ।
स्नुहीमूलश्चजम्बीरद्रवैः स्यादनुपानकम् ३१९
साध्यासाध्यं क्षयं हन्ति ह्यनुपानं मृगाङ्कवत् ।
इममग्निरसं खादेत्त्रिनिष्कं राजयक्ष्मनुत् ॥ ३२०

र. र., यक्ष्माधिकारे ।

भाषा—हीरा भस्म २ भाग, सुवर्णभस्म ३ भाग, पारामस्म ६ भाग इन को लेकर १ दिनभर गोखरू के रस मे भावना देना । शाम को उस का चूर्ण कर लेना । इस की मात्रा १ रत्ती की है । जहां राजयक्ष्मा के साथ ज्वर भी होवे वहां इस का प्रयोग करना चाहिये । थूहर की जड़ और जंभीरी का रस इसका अनुपान है यह रस

साध्य और असाध्य दोनों क्षयों को नष्ट करता है। इस का अनुपान मृगाङ्क के सदृश ही है। इस अग्निमुख रस को १ रत्ती रोज खाना चाहिये। इसी प्रकार ½ तोला जब खाया जायगा तब यह राजयक्ष्मा को समूल नष्ट कर डालता है ॥ ७६ ॥

७७ अग्निरसः (द्वितीयः)

रसगन्धकपिप्पल्यो हरीतक्यक्षवासकम्।
एषां यथोत्तरा भागा बब्बूलक्वाथभाविताः॥ ॥ ३२१ ॥
एकविंशति वारांश्च शोषयित्वा विचूर्णयेत्।
भक्षयेन्मधुना हन्ति कासमग्निरसो ह्ययम् ३२२

र. का., र. क. ल., र. र. स., नि. र., र. को., कासाधिकारे।

टि० अत्रसप्तगुणं भार्गीचूर्णं मिश्रय्य भार्गोत्तरवटीति नाम्ना व्यवहृतमिति रहस्यम्।

भाषा—पारा १ भाग, गन्धक २ भाग, पीपल ३ भाग, हरड ४ भाग, बहेडा ५ भाग, और अडूसा ६ भाग सबको लेकर चूर्ण करके बब्बूलके क्वाथसे २१ बार भावना देना। फिर सुखाकरके चूर्ण कर लेना। फिर शहदके साथ इस रसको खाना यह अग्निरस खांसीको दूर करता है ॥ ७७ ॥

टि० इसी रसमें ७ तोला भार्गीका चूर्ण मिला देनेसे भार्गोत्तर वटी बन जायगी।

७८ अग्निरसः (तृतीयः)

शुद्धं सूतं समं गन्धं शिखितुत्थं च टंकणम्।
दरदं तालकं चैव समभागानि कारयेत्॥ ३२३
पुनर्नवामूलरसैर्मर्दितं प्रहरत्रयम्।
पाचयेद्यामामात्रं तु दोलायन्त्रे च बुद्धिमान् ३२४
गुञ्जाद्वयं तथा नित्यं श्लेष्मकुष्ठविनाशनः।
भक्षयेन्मधुना हन्ति कासमग्निरसो ह्ययम् ३२५

व. रा.,

भाषा—शुद्ध पारा, गन्धक, नीलाथोथा, सुहागा, शिंगरिफ और हरताल इन सबको बराबर लेकर पुनर्नवा की जड़के रस मे तीन पहर तक घोटना फिर दोलायन्त्र मे एक पहर तक पकाना यह रस श्लेष्मकुष्ठ को नष्ट करता है। और खांसी को भी दूर करता है इसका नाम अग्नि रस है। इसकी मात्रा २ रत्ती और अनुपान शहद है ॥ ७८ ॥

७९ अग्निरसः—(चतुर्थः)

रसगन्धकपिप्पल्यो हरीतक्यक्षवासकाः।
यष्टिः समगुडं चूर्णं बब्बूलक्वाथभावितम् ३२६
एकविंशतिवारेण शोषयित्वा विचूर्णयेत्।
भक्षयेन्मधुना हन्ति कासमग्निरसो ह्ययम् ३२७

यं. चि., वल्लद्वयमस्यमात्रा

भाषा—पारा, गन्धक, पीपल, हरड, बहेडा अडूसा और मुलहठी इन सबको बराबर लेना और सबके बराबर गुड लेना फिर २१ बार बब्बूल (कीकर) के क्वाथ मे भावना देकर सुखाना। यह अग्निरस खांसी को नष्ट करता है इसका अनुपान शहद है। ६ रत्तीतक इसकी मात्रा है ॥ ७९ ॥

८० अग्निसन्दीपनो रसः (प्रथमः)

पारदं गन्धकं शुद्धं कज्जलीकृत्य बन्धयेत्।
गाढं वस्त्रेण सिकतान्ततः कुम्भे विनिःक्षिपेत् ॥ ३२८ ॥
पोट्टलीं स्थापयेत्तत्र सिकतां प्रक्षिपेत्पुनः।
तस्योपरि तृणाग्निन्तु सन्दध्याद्दिवसद्वयम् ३२९
पुटेद्गजपुटे चापि वारमेकं विचक्षणः।
सिद्धस्यास्य प्रदातव्यं रक्तिकाद्वितयं सदा॥
अत्यग्निकारकः प्रोक्तः पारदोयं महारसः ३३०

ना. वि.,

टि० पुटेद्गजपुटे—इति तु चिन्त्यम्। वस्त्रवेष्टितस्यास्य गजपुटे पाचनं त्वसम्भवान्नम्। गजपुट एतस्य पाचनमिष्टञ्चेत्काचकूप्यां तन्निःक्षिप्य वस्त्रमृत्तिकयाऽऽवेष्टय तद्विधेयम्। एवन्तु रससिन्दूरभेद एवायं रसोऽपि भविष्यति।

भाषा—शुद्धपारा और गन्धक बराबर लेकर कज्जली करके गाढे वस्त्रमे उसको बांध देना। फिर

१ घड़े मे नीचे बालू रखकर उस पोट्टलीको रख देना और ऊपरसे घड़ेको बालूसे भर देना । उसके ऊपरसे २ दिन तक तृणाग्नि जलाना अथवा उसको गजपुट मे १ दिन तक पकाना (गजपुटमे पकाना असम्भवप्राय है) सिद्ध होनेपर २ रत्तीभर इसको सदा देनेसे यह रस जठराग्निको अत्यन्त प्रदीप्त करता है ॥ ८० ॥

८१ अग्निसन्दीपनो रसः (द्वितीयः)

गन्धाश्मा गगनं सुतीक्ष्णहरजं
सर्वं समांशीकृतं
माक्षीकं जरणं कणा कृमिरिपुः
सौवर्चलं सैन्धवम् ।
चव्यं चित्रकनागरं समरिचं
पथ्यान्वितं गन्धकं,
द्वेऽजाज्यावजमोदवेतससुमं
कुष्ठं त्वजीर्णापहम् ॥ ३३१ ॥

र. र., (ना.,) अजीर्णाधिकारे ।

भाषा—गन्धपाषाण, (जिससे गन्धक निकलता है वह पत्थर अथवा गन्धक) अभ्रक, फौलाद, पारा, सोनामाखी, जीरा, पीपल, विडङ्ग, कालानमक, सेंधानमक, चव्य, चित्रक, सोंठ, कालीमिर्च, हरड़, गन्धक, कालीजीरी, खड़जीरा (जीरऐ किरमानी) अथवा जीरा और स्याह जीरा लेना अमलवेत, लौंग और कूठ, इन सबको मिलाकर पीसकर बारीक चूर्ण बना लेना । यह रस जठराग्निको प्रदीप्त करता है । और अजीर्णको नष्ट करता है ॥ ८१ ॥

८२ अग्निसन्दीपनो रसः (तृतीयः)

षडूषणं पञ्चपटु त्रिक्षारं जीरकद्वयम् ।
ब्रह्मदर्भोग्रगन्धे च मधुरी हिङ्गु चित्रकम्
॥ ३३२ ॥
जातीफलं तथा कुष्ठं जातीकोषं त्रिजातकम् ।
चिञ्चाशेखरिकक्षारममृतं रसगन्धकौ ॥३३३॥
लौहमभ्रञ्च वङ्गञ्च लवङ्गंच हरीतकी ।

र. सा. ७

समभागानि सर्वाणि भागौ द्वावम्लवेतसात् ॥
॥ ३३४ ॥
शङ्खस्य भागाश्चत्वारः सर्वमेकत्र भावयेत् ॥
क्वाथेन पञ्चकोलस्य चित्रापामार्गयोस्तथा ॥
॥ ३३५ ॥
अम्ललोणीरसेनैव प्रत्येकं भावयेत्त्रिधा ॥
त्रिःसप्तकृत्वो लिम्पाकरसैः पश्चाद्विभावयेत् ॥
॥ ३३६ ॥
बदराभा वटी कार्या योक्तव्या सन्ध्ययोर्द्वयोः ।
अनुपानं प्रदातव्यं बुद्ध्या दोषानुसारतः ।
॥ ३३७ ॥
अग्निसन्दीपनो नाम रसोऽयं भुवि दुर्लभः ।
दीपयत्याशु मदाग्निमजीर्णं च विनाशयेत् ॥
अम्लपित्तं तथा शूलं गुल्ममाशु व्यपोहति ॥

भै., र. सु., अग्निमान्द्याधिकारे । ॥३३८॥

टि० मधुरीशब्देन शतपुष्पा ग्राह्या ।

भाषा—षड्ूषण (पीपल, पीपलामूल, चव्य, चित्रक सोंठ और कालीमिर्च) पांचों नमक, तीनोंक्षार (जवाखार, सज्जी और सुहागा) दोनों जीरे, कुशा, बच, सोंफ, हींग, चित्रक, (दो बार आया है इसलिए यहां पर सफेद चित्रक और लाल चित्रक लेना या २ भाग लेना) जायफल, कूठ, जावित्री त्रिजातक, इमलीका क्षार, अपामार्ग (चिरचिटे) का क्षार, बछनाग, पारा, गन्धक, लोहभस्म, अभ्रकभस्म, बङ्गभस्म, लौंग और हरड़ इन सब को बराबर लेना और अमलवेत हरडसे दूना तथा शंखभस्म, अम्लवेत से दूनी इन सबको चूर्ण करके पञ्चकोल (षडूषणमें जब कालीमिर्च न डालें तो पञ्चकोल कहाता है) चित्रक, अपामार्ग और अमलोनियां के क्वाथ अथवा रस से तीन तीन बार भावना देना । फिर २१ बार अमलतास के रस अथवा क्वाथसे भावना देना । फिर जंगली बेरके बराबर गोलियें बनालेना । और रोगीके दोष तथा अपनी बुद्धि के अनुसार अनुपान के साथ वैद्य

इस गोलीको शाम और सवेरे देवे। यह अग्निसंदीपन नामवाला रस संसार मे दुर्लभ है। मन्द जठराग्नि को जल्दी प्रदीप्त करता है और अजीर्ण का नाश करता है तथा अम्लपित्त, शूल और गुल्मरोग को जल्दी नष्ट करता है ॥ ८२ ॥

८३ अग्निसन्दीपनो रसः (चतुर्थः)

रसभस्मसमं गन्धं धात्री द्विगुणटंकणम्।
दिनं जम्बीरजैर्द्रावैर्मर्द्यं पूर्यावराटिकाः॥३३९॥
रुद्ध्वा गजपुटे पच्याद्यथा वैरोचनो रसः।
तथा कुर्याच्च रोगाणां फलं तद्वन्न संशयः॥
कुमारीसैन्धवश्चानु लेहयेदग्निदीपनम्॥३४०॥

र. र.,

भाषा—पाराभस्म, गन्धक, आंवले ये समभाग लेना और सुहागा पारे से दूना लेकर एकदिन जम्भीरी के रस मे घोटकर उसको कौड़ियों मे पकालेना। यह रस वैरोचन रसके माफिक गुण करता है। घीकुँआर का रस और सेंधानमक इसका अनुपान है यह जठराग्नि को प्रदीप्त करने वाला अग्निसन्दीपन रस है ॥ ८३ ॥

८४ अग्निसन्दीपनो रसः (पञ्चमः)

पलैकं मूर्च्छितं सूतं मरिचं हिङ्गु जीकरम्।
प्रतिकर्षं वचा शुण्ठी तत्सर्वं भृङ्गजैर्द्रवैः॥३४१॥
दिनं मर्द्यं लिहेन्माषं मधुना वन्हिदीपनम्।
कर्षैकं भक्षयेच्चानु दाड़िमं नागरं गुड़म्॥३४२॥

र. र. क.,

भाषा—रससिन्दूर ४ तोले, कालीमिर्च, हींग, जीरा वच और सोंठ प्रत्येक १ तोला इन सब को एक दिन भांगरे के रस मे घोट लेना इस की मात्रा १ माशा और अनुपान शहद है। इस के ऊपर अनारदाना, सोंठ और गुड़ १ तोला खाना चाहिये ॥ ८४ ॥

८५ अग्निसन्निभावटी (अगस्तिवटिका)

सुस्विन्नपिष्टं विषतिन्दुबीजं
द्विपञ्चविल्वं सशिवं तुषाम्ले।
विडङ्गहिङ्गुत्रिकटुत्रिदीप्यं
पृथक्पृथग्बिल्वमथेशगन्धौ॥३४३॥
निष्पिष्य चूर्णीकृतमञ्जनाभं
कोलास्थिमात्रा वटिका विधेया।
सा सेविता हन्ति कफप्रसेकं
तन्द्राग्निसादस्वरभेदमाशु ॥ ३४४॥
आध्मानशूलोदरकासहिध्मा
वमिक्रमीन्नाशयति प्रसह्य।
अगस्त्यहारीतपराशरोक्ता
शास्त्रेमताऽगस्तिवटी प्रसिद्धा ॥ ३४५ ॥

टी., र. रा. सि., र. (मा.) ना. वि., अजीर्णाधिकारे।

भाषा—४० तोले जहर कुचिले के बीज और तुषाम्ल ("तुषाम्बुसंधितं ज्ञेयमामैर्विदलितैर्यवैः") कच्चे (हरे जव दलकर उनकी जो कांजी बनाई जाती है उसको तुषाम्बु या तुषाम्ल कहते हैं) मे उतनी ही हरड़ें, उबाले हुए विडङ्ग, हींग, त्रिकटु, त्रिदीप्य (अजवायन, अजमोद और खुरासानी अजावायन) पारा और गन्धक, ये सब चार ४ तोले मिलाकर घोटकर बारीक कजली के माफिक चूर्ण बनालेना और सब चीजें कुचिले और हर्रे वाले कल्क मे मिलाके जंगली बेर की गुठली के बराबर गोलियें बनालेना यह गोली कफ का बहुत निकलना, मन्दाग्नि, तन्द्रा, स्वरभेद, आफरा, शूल, उदररोग, खांसी, हिचकी, वमन और कृमिरोग इन सब रोगों को नष्ट करती है। इस बटी को अगस्त्य, हारीत और पराशर महाराज ने कही है। शास्त्र मे इसका नाम अग्निसन्निभावटी है ॥ ८५ ॥

८६ अघोरनृसिंहो रसः

भागैकं मृतताम्रस्य द्विभागं मृतलौहकम्
त्रिभागं मृतवङ्गं च चतुर्भागं मृताभ्रकम्॥३४६॥
माक्षिकं रसगन्धौ च तथा शुद्धा मनःशिला।
चत्वार्येतानि ताम्रस्य प्रत्येकं तुल्यमेव च ॥
॥ ३४७ ॥

गरलं चाभ्रतुल्यं स्याद्वेदकर्षं कटुत्रयम् ।
एतत्सर्वं समं देयं विषभागं तथैव च ॥३४८॥
एतत्सर्वस्य द्रव्यस्य द्विगुणं कालकूटकम् ।
मत्स्यमाहिषमायूरघृष्टिपित्तैर्विभावयेत् ॥३४९॥
चित्रकस्य द्रवेणैव प्रत्येकं याममात्रकम् ।
सर्षपाभा वटी कार्या शोषयेदातपे ततः ॥३५०॥
दापयेद्वटिकामेकां पयःपेटीरसेन च ।
सन्निपातेषु सर्वेषु विसूच्यामतिसारके ॥३५१॥
त्रिदोषजे तथा कासे दापयेत्कुशलो भिषक् ।
पयःपेटीशतं दद्याद्भोजनं दधिभक्तकम् ॥
रसोऽघोरनृसिंहाख्यस्सन्निपातकुलान्तकः ॥ ॥ ३५२ ॥

र. सुं., भै. र., ज्वराधिकारे ।

टि० अत्र यदि विषभागमित्यस्य स्थाने विषमाख्यमिति पाठस्तदा विषमख्यशब्देन यूनानी पद्धत्यां प्रसिद्धं विखमेति वस्तु ग्राह्यम् ।

भाषा—तांबाभस्म १ भाग, लोहभस्म दो भाग, वङ्गभस्म ३ भाग, अभ्रकभस्म ४ भाग, सोनामाखी, पारा, गन्धक और शुद्ध मैनसिल यह ४ वस्तुएं ताम्रभस्मके बराबर गरल (सर्पविष) और त्रिकटु यह दो वस्तुएं अभ्रकके बराबर डालना और सबके बराबर बछनाग और सबसे दूना कालकूट (विषविशेष) डालना । फिर मच्छी, भैंसा, मोर और सूअर इनके पित्तोंसे अलग अलग एक पहर तक भावना देना फिर चित्रकके क्वाथसे भावना देना और सरसोंके बराबर गोलिएं बनाकर धूपमे सुखाना एक गोली देकर ऊपरसे नारियलका रस पिलाना यह रस तेरहों सन्निपातोंमे देना चाहिये । थोड़ा थोड़ा करके १०० नारियलोंका पानी पिलाना। पथ्य दही और भात खानेको देना यह सब रसोंमें उत्तम अघोरनृसिंह रस है । समस्त सन्निपातोंके कुलको नष्ट करता है ॥ ८६ ॥

८७ अघोरास्त्रो रसः

सूतं गन्धं विषं तालमिल्लिपाषाणटङ्कणम् ।
नेपालं शिखितुत्थं च सर्वं खल्वे विमर्दयेत् ॥ ३५३ ॥
सन्निपातं निहन्त्याशु साध्यञ्चासाध्यमेव च ।
गुञ्जामात्रः प्रयोक्तव्य अघोरास्त्रो महारसः ॥ ३५४ ॥
वा.

भाषा—शुद्धपारा, शुद्धगन्धक, शुद्ध बछनाग, हरताल (भस्म), शुद्धसंखिया, सुहागा, तांबा (भस्म) और शुद्ध नीलाथोथा इन सबको बराबर लेकर खरलमे बारीक घोट लेना । यह अघोरास्त्ररस साध्य और असाध्य सभी सन्निपातोंको नष्ट करता है इसकी मात्रा एक रत्तीकी है ॥ ८७ ॥

८८ अघोरेशगुटिका

दत्वाऽधरोत्तरं सस्यचूर्णं मुण्डस्य पात्रके ।
पारदस्य ततो जम्बूरसेनापूर्य पात्रकम् ॥३५५॥
रात्रौ संस्थाप्य तत्प्रातर्जम्बूरसमपोह्य च ।
आसार्यं शोषयित्वा तु पुनरापूरयेद्रसम् ॥३५६॥
एवं पुनःपुनर्भाव्यं शोष्यं यत्नाद्दिनत्रयम्
ततो वै पारदेन्द्रं तु समाहृत्य प्रयत्नतः ॥३५७॥
भङ्गेन सह शुद्धेन खल्वेन कृतकज्जलिम् ।
तत्खोटं तु समाहृत्य धत्तूरफलमध्यगम् ॥३५८॥
दत्त्वा सप्तपुटान् दद्यादप्रमत्तोऽग्निमध्यतः ।
तद्रसेन ततो लिप्त्वा जयापिष्टया च खोटकम् ॥ ३५९ ॥
तद्रसेनैव दोलायां पचेद्यामाष्टकं ततः ।
निर्यासलेपितं पोस्तुनीरैः पाच्यं सुदोलया ॥ ३६० ॥
आसवेन तथा पाच्यं तद्गृहीत्वा विचक्षणः ।
कदलीफलमध्ये वा गुडे वा मधुरे तथा ॥३६१॥
मुखे तिष्ठति यावत्तत् तावद्रेतो न मुञ्चति ।
वीर्यादिस्तम्भकारि स्यान्नारीणां च शतं व्रजेत् ॥ ३६२ ॥

र. क. यो., रसायने

भाषा—बीड लोहे की कड़ाही मे ऊपर और नीचे धान का भूसा रखकर बीच मे पारा रख देना। फिर कड़ाही को जामुन के रस से भरकर रातभर उसको वैसे रहने देना। प्रातःकाल जामुन का रस अलग करके दिन मे कड़ाही को सुखाकर फिर सायंकाल पूर्वोक्त विधि से पारे को रख देना। इस प्रकार ३ रात्रि पारे को भावना देकर समभाग वङ्ग मिलाकर उस की कज्जली कर लेना (वङ्ग को कड़छी मे पिघलाकर ठंढाकरके उस मे पारा मिलाकर घोटलेना), फिर उस का गोला जैसा बनाकर धतूरे के फल के भीतर रखकर कपड मिट्टी कर के पुटपाक करना ऐसे सात बार पुटपाक करना-फिर उस गोली पर धतूरे के गाढे रस का लेप देकर भांग की लुगदी बनाकर भीतर उसको रखकर भांग के रस से दोलायन्त्र मे पकाना, फिर दूसरी बार अफीम का लेप देकर पोस्त के पानी से दोला यन्त्र मे पकाना, फिर तिसरी बार मद्यसे दोलायन्त्र मे पकाना, फिर केले के फल, गुड अथवा किसी मीठी वस्तु के भीतर रख कर जितनी देर मुखमे रक्खैं उतनी देर वीर्य स्खलित नहीं होगा। इस को खाने से वीर्यस्तम्भन होता है। चाहे १०० स्त्रियों से गमन करैं ॥ ८८ ॥

८९ अङ्कोलबद्धवटी ॥

पारदं तु समादाय श्वेताङ्कोलस्य वारिणा।
त्रिदिनं भावयित्वा तु तत्समं गन्धकं क्षिपेत् ॥ ॥ ३६३ ॥
गन्धकेन समं कृत्वा ततः कज्जलिकां चरेत्।
अङ्कोलकरसेनैव संमर्द्य गुटिकां चरेत् ॥३६४॥
सद्योमारितछागस्य मांसपिण्डोदरे क्षिपेत्।
रक्तचित्रकनिर्यासं तालमूलीरसं तथा ॥३६५॥
अनयोस्तु रसं दत्वा ततो मांसेन वेष्टयेत्।
मांसपिण्डेन संवेष्ट्य तप्ततैलेऽनलप्रभे ॥३६६॥
प्रक्षिप्य तं पचेद्यत्नाद् ध्यात्वादेवीं रसेश्वरीम्।
पच्यमाने बलिं दत्वा समभ्यर्च्य कुमारिकाः॥ ॥ ३६७ ॥
ततः सिन्दूरतापन्नं वटकं तं समुद्धरेत्
सिद्धेऽस्मिन् सुमुहूर्तेतु सिद्धपारदरक्तिकाम् ॥ ॥ ३६८ ॥
लेहयेन्मधुसर्पिर्भ्यां क्षीरं चानु पिबेदिह।
यथेष्टं भोजनं कार्यं कटुकाषायवर्जितम् ॥३६९॥
अनेन विधिना कृत्वा नरः स्यात् कामदेववत्
नारीशतं सहस्रं वा रमयेत् कामनिर्भरः॥३७०॥
अकृत्वा मैथुनं रेतः स्फुटित्वा लोचनं व्रजेत्
रसेऽस्मिन् भक्ष्यमाणे तु मैथुनं नैव वर्जयेत् ॥ ३७१ ॥
पारदं संक्रमेयत्र निश्चितं कायगोचरे।
स एव मन्मथाकारो नात्र कार्या विचारणा ॥ ३७२ ॥

यो. म.,

व्योमचूर्णं पलशतं गृहीत्वा लोहभाजने ।
पुनर्नवारसेनैव भाव्यमेकत्र चैकधा ॥५६७॥
त्रिफलाया रसैः पञ्च निम्बस्य द्वादशैव तु ।
अथ निश्चन्द्रिकं यावत्तावद्देयं पुटं क्रमात् ५६८
नियोज्य गन्धकं चैव पादांशेन तथा रसम् ।
विधिना जारितं लोहं रसतुल्यं प्रदापयेत्५६९
रसेन्द्रमातृकातोयैर्भाव्यं सम्यग्विमर्दयेत् ।
घृतेन मधुना चापि पश्चादेतच्च भक्षयेत् ५७०
अरोगी क्षीरपानेन रोगी तु त्रिफलां पिबेत् ।
वातपित्तकफध्वंसि तथा कान्तिविवर्धनम् ५७१
ध., र. क., रसायनाधिकारे.

भाषा—४०० तोले अभ्रक का चूर्ण लेकर लोहे के बर्तन मे एक बार पुनर्नवा के रस से पांच वार त्रिफला के क्वाथ और बारह वार नीम के रस से भावना देना फिर $\frac{1}{4}$ गन्धक और $\frac{1}{4}$ पारा मिलाकर जब तक निश्चन्द्र न होजावे तबतक जितना पारा पहिले मिला चुके हैं उतना ही विधिपूर्वक जारण किया हुआ लोह (भस्म) मिलाना और रसेन्द्रमात्रिका (तिपतिया) का रस मिलाकर खूब घोटना। इसको उचितमात्रा मे घी और शहद के साथ खाना जिसको कोई रोग नहीं है वह इसको खाकर उपर से दूध पीवे और जो रोगी है वह त्रिफला का क्वाथ पीवे। यह रसायन वातपित्त और कफ से होने-वाले रोगों का नाश करता है और कान्ति को बढाता है ॥ १४९ ॥

१५० अभ्ररसायनम्

पुनर्नवा रसैर्भाव्यमभ्रकं चैकधा पुनः ।
त्रिफलाया रसैःपञ्च वारान्निम्बस्य द्वादश ५७२
यावन्निश्चन्द्रतां याति तावद्देयः पुटः क्रमात् ।
नियोज्यो गन्धकश्चैव पादांशेन तथा रसः ५७३
रसेन्द्रमातृका तोयैर्यामान्तं तत्तु मर्दयेत् ।
घृतेन मधुना वापि पश्चादेकत्र भक्षयेत्॥५७४॥
त्रिफलानुपानतो रोगी भक्षेद्वा क्षीरयोगतः ।
वातिकं पैत्तिकं श्लेष्मव्याधिं हन्यात्सुदुस्तरम्॥
अर्शोव्याधिं तथा दन्तपाडुरोगं भगन्दरम् ।
हृद्रोगं मूत्रकृच्छ्रं च प्लीहानमुदरं तथा॥५७६
महान्तमग्निसादं च शोषकासक्षयापहः ।
रक्तपित्तं महाघोरं नाशयेन्नात्र संशयः ॥५७७
अष्टादशैव कुष्ठानि कुक्षिरोगांश्च सर्वशः ।
अश्मरीं मूत्रसंबाधां मेहांश्चैवमनेकधा ॥५७८॥
सर्वांश्च ग्रहणीरोगान् श्वयथुं विनिवर्तयेत् ।
सतताभ्यासयोगेन वलीपलितवर्जितः॥५७९॥
र. क.,

भाषा—अभ्रकको पुनर्नवा के रस से एक, त्रिफला के क्वाथ से ५, और नीम के पत्तों के

रस अथवा छाछ के क्वाथ से १२ भावनाएं देकर पुट देना। जब तक अभ्रक निश्चन्द्र न हो जावे तब तक उपरोक्त प्रकार से भावनाएं और पुट देते रहना हरएक पुट मे अभ्रक से ¼ पारा और उतना ही गन्धक देते रहना, जब निश्चन्द्र हो जावे तब तिपतिया के रस मे १ पहर तक उसको खूब घोटना। उचित मात्रा मे १ मासा घी और शहद के साथ अथवा त्रिफला चूर्ण अथवा गाय के दूध के साथ इसको खाना चाहिये। यह अभ्रक रसायन वात, पित्त और कफ से होनेवाले रोग, बवासीर दंतरोग, पाण्डुरोग, भगन्दर, हृद्रोग, मूत्रकृच्छ्र, प्लीहा उदररोग, अग्नि की अत्यन्त मन्दता, शोष, खांसी और क्षयको नष्ट करता है और रक्तपित्त, १८ प्रकार के कुष्ठ, कुक्षिरोग, पथरी, मूत्रबाधा, प्रमेह, संग्रहणी और सूजन को नष्ट करता है। जो लोग इसका सदा अभ्यास करते हैं वे बली पलित रहित हो जाते हैं॥ १५०॥

१५१ अभ्ररसायनम्।

शुद्धसूतस्य कर्षैकं कर्षकं गन्धकस्य च।
द्वयोः कज्जलिकातुल्यं व्योमचूर्णं प्रदापयेत्॥
केशराजस्य भृङ्गस्य निर्गुण्डीचित्रकस्य च।
ग्रीष्मसुन्दरमुण्डीरीजयन्तीन्द्राशनस्य च ५८१
श्वेतापराजितायाश्च पर्णस्य स्वरसस्तथा।
रसतुल्यं प्रदातव्यं चूर्णं च मरिचोद्भवम् ५८२
देयं रसार्धभागेन चूर्णं टङ्कणसम्भवम्।
सम्मर्द्य वटिकां कुर्यात्कलायसदृशीं बुधः५८३
हन्ति कासं क्षयं श्वासं वातश्लेष्मभवां रुजम्।
ज्वरे चैवातिसारे च सिद्ध एषः प्रयोगराट्५८४
चातुर्थिकज्वरे श्रेष्ठं सूतिकातङ्कनाशनम्।
दधि चावश्यकं देयं प्राह नागार्जुनो मुनिः५८५

र. क.,

भाषा—शुद्धपारा १ तोला और गन्धक १ तोला इन दोनों को घोटकर कज्जली कर लेना और दोनों के बराबर अभ्रक मिला देना फिर काला भांगरा, भांगरा, संभालू, चित्रक, हरमल, गोरखमुण्डी, जैंत, गांजा और सफेद अपराजिता के पत्ते, इनके रस अथवा क्वाथसे पृथक् २ भावना देना। (जब तक अभ्रकनिश्चन्द्र न हो जावे तब तक बार २ उपरोक्त क्रम से भावनाएं देते रहना) फिर पारे के बराबर कालीमिर्च का चूर्ण और उस से आधा सुहागे का चूर्ण मिला कर मटर के बराबर गोलियें बना लेना। इस गोली का प्रयोग खांसी, क्षय, दमा, वात और कफ से होने वाले रोग, ज्वर और अतिसार को नष्ट करने मे सिद्ध है। चौथिया ज्वर और सूतिका रोग मे यह गोली हितकर है। इस के ऊपर से थोडासा दही खिलाना चाहिये। ऐसा मुनिवर नागार्जुन महाराजने कहा है॥१५१॥

१५२ अभ्ररसायनम्।

चातुर्जातकरेणुकं मलयजं तक्कोलजातीफलं,
कुष्ठं गोक्षुरकं सशाल्मलिजटं द्राक्षां सुखर्जूरकम्।
कुण्डल्युद्भवसत्त्वकं कतकजं ह्रीबेरकं चोरकं,
कर्पूरं वसुगन्धमेहरिपुजं कासीसकंशुण्ठिकाम्,
प्रत्येकं त्रिफला त्रिगन्धमधुकं
निष्कप्रमाणं पृथक्,
व्योम्नोमस्य पलत्रयेण मिलितं
धान्योपितं मासकम्।
स्निग्धे कालिकलेपिते विनिहितं
निष्कप्रमाणं भजेत्,
नानातङ्कनिकृन्तनं मुनिमतं
प्रौढाङ्गनाद्रावकम्॥ ५८७॥
बलाम्बुना शर्करया च दाहं
मूत्रातिसारं वमिकामले च।
पित्तोद्भवां श्लेष्मभवांश्च मेहान्
वातोद्भवं मेहगणं निहन्ति॥५८८॥
नानाविधैराविहितानुपानै
रसायनं चाभ्रकसञ्ज्ञितो यः।

पुराणशाल्योदनमुद्गयूपं
दद्याद्वमेर्नाशकरं च योज्यम्॥५८९॥

धा.,

भाषा—चातुर्जात (तज, पत्रज, इलायची नागकेसर) संभालू के बीज, चन्दन, शीतलचीनी जायफल, कूठ, गोलरू सेमल का मुसला, दाख खजूर, गिलोय का सत्व, निर्मली का चूर्ण, हाऊवेर, चोरक, कपूर, तांबे की भस्म, गन्धक, वङ्गभस्म कसीस, सोंठ, त्रिफला (पृथक् २), त्रिगन्ध (पृथक् २) और मुलहठी प्रत्येक चार ४ चार मासे और अभ्रकभस्म १२ तोले मिलाकर किसी पात्र मे बंदकरके धान्यकी राशि (ढेरी) मे एक महीने तक रखदेना, फिर निकालकर बारीक चूर्ण करके भीतर तगर का लेप किये हुए मिट्टीके चिकने बर्तन मे रखदेना । इस को ४ मासे रोज खाना । यह रस अनेक रोगों को नष्ट करता है और जवान स्त्रियों को जल्दी द्रावित करता है ऋषियोंने इसका बड़ा आदर किया है इसको वलाके क्वाथ और शक्कर के साथ खानेसे दाह, मूत्रातिसार, उलटी, कामला और वात, पित्त तथा कफ से होनेवाले प्रमेह ये सब रोग नष्ट होते हैं, उचित अनुपानों के साथ खाने से यह अभ्रक रसायन सभी रोगों को नष्ट करता है । इसको खानेवाले के लिये पुराने चावलों का भात, मूँग का यूप और वमिनाशक चीजें पथ्य हैं ॥ १५२ ॥

१५३ अभ्रलोहयोगः

मृताभ्रकं मृतं लोहं क्षौद्रं लिंह्याद्विगुञ्जकम् ।
फलत्रयं पटोलं च तिक्ताक्वाथं सितायुतम् ॥
पिबेदनु हरेदम्लपित्तं छर्दिं ज्वरं तथा । ५९०

व. रा.,

भाषा—१ रत्ती अभ्रकभस्म और १ रत्ती लोहभस्मको त्रिफला के चूर्ण अथवा पटोल के चूर्ण के साथ खाना ऊपर से मिश्री मिला हुआ कुटकी का क्वाथ पीना । यह प्रयोग अम्लपित्त, वमन और ज्वरको शान्त करता है ॥ १५३ ॥

१५४ अभ्रवटी (लघ्वी)

त्रिःसप्तकृत्वः सम्भाव्यं भृङ्गराजाम्भसाभ्रकम् ।
तेन गन्धं रसं लोहं हेम चाभ्रार्धसम्मितम् ५९१
वराक्वाथेन सम्मर्द्य वटिकां रक्तिकोन्मिताम् ।
औपसर्गिकमेहस्य नाशाय दापयेद्भिषक् ५९२

आ. वि., भै. र., र चि., र. सु. र. सं., र. क., मेहाधिकारे.

भाषा—अभ्रकभस्म को २१ बार भांगरेके रस से भावना देना फिर गन्धक, पारा और लोहभस्म पृथक् पृथक अभ्रकके बराबर और सोना अभ्रक से आधा मिलाकर त्रिफला के क्वाथ मे सब को डालकर खूब घोट लेना फिर एक १ रत्ती की गोलियें बना लेना इस गोली को औपसर्गिक मेह (सुजाक) वाले को देना चाहिये ॥ १५४ ॥

१५५ अभ्रवटी (महती)

अभ्रकं पुटितं ताम्रं लौहगन्धकपारदम् ।
कुनटी टङ्कणक्षारं त्रिफला च पलं पलम् ५९३
गरलस्य तथा मापचतुष्कश्चैव चूर्णयेत् ।
तत्सर्वं भावयेदेषां रसैः प्रत्येकशः पलैः ५९४
देवराजाशनाख्यस्य केशराजाख्यकस्य च ।
सोमराजस्य भृङ्गाख्यराजस्य श्रीफलस्य च॥
पारिभद्राग्निमन्थस्य वृद्धदारस्य तुम्बुरोः ।
मण्डूकपर्णीनिर्गुण्डीपूतिकोन्मत्तकस्य च ५९६
श्वेतापराजितायाश्च जयन्त्याश्चार्द्रकस्य च ।
ग्रीष्मसुन्दरकस्याटरूपकस्य रसेन तु ॥५९७॥
रसैस्ताम्बूलवल्याश्च पत्रोत्थैर्भावयेत्पृथक् ।
द्रवे किञ्चित् स्थिते चूर्णं मरिचस्य पलं क्षिपेत्॥
ततश्चैव वटीं कुर्यान्मात्रां दद्याद्यथोचिताम् ।
ज्वरे चैवातिसारे च कासे श्वासे क्षये तथा ॥
सन्निपातज्वरे चैव विविधे विपमज्वरे ।
क्षयरोगेषु सर्वेषु क्षीणे शुक्रे च यक्ष्मणि ६००
ग्रहण्यां चिरभूतायां सूतिकायां विशेषतः ।

शोथे शूले तथाऽसाध्ये स्थविरे चामवातके ॥
मन्दानले बले चैव सकले श्लेष्मजे गदे।
पीनसेऽपीनसे चैव पक्केऽपक्के विशेषतः॥६०२॥
वातश्लेष्मणि वाते वा विविधे चेन्द्रियस्थिते।
वातवृद्धावृते पित्ते बलासेनावृतेऽपि च॥६०३॥
अष्टसूदररोगेषु कुष्ठरोगे प्रशस्यते।
अजीर्णे कर्णरोगे च कृशे स्थूले च यक्ष्मणि॥
अयं सर्वगदेष्वेव रसो वै परिकीर्तितः।
महाभ्रवटिका सेयं परं श्रेष्ठा रसायने॥६०५॥

भै. र., र. र. र. सु, र. क., सर्वरोगे।

भाषा—अभ्रकभस्म, पुट मे शुद्ध किया हुआ तांबा, लोहा, गन्धक, पारा, मैनसिल, सुहागा और त्रिफला इन सबको चार ४ तोले लेना और उस मे ४ माषा सर्पविष मिलाना तथा बारीक चूर्ण कर लेना। फिर अर्जुन, विजयसार केशराज, काला भंगरा सोमराज (यह अज्ञात है इसके स्थान में बाकुची को काम मे लासक्ते हैं) भांगरा, बेल, नीम, अरणी, विधारा, तुम्बुल, ब्राम्ही, संभालू, करंज, धतूरा, सफेद कोयल, जैत, अदरख, हरमल, अडूसा और पान इनके रस अथवा क्वाथ से अलग २ भावना देना। उपरोक्त रस के सूखने से पहिले ४ तोले कालीमिर्च का चूर्ण मिला देना फिर उसकी गोलियें बनालेना। और उचित मात्रा मे देना। इस गोली का उपयोग निम्न लिखित रोगों मे होता है, ज्वर, अतीसार, खांसी, दमा क्षय, (शोष) सन्निपातज्वर, अनेक प्रकारके विषमज्वर, वीर्य की अत्यन्त क्षीणता से जनित क्षय, पुरानीसे पुरानी संग्रहणी, सूतिकारोग, सूजन, शूल, नया और पुराना आमवात, मन्दाग्नि, क्षीणाग्नि, सभी प्रकार के कफरोग, पका हुआ अथवा कच्चा पीनस, वातश्लेष्म अनेक प्रकार से अङ्गों मे घुसा हुआ वातरोग, वातवृद्धि, पाचकपित्त की क्षीणता, आठ प्रकारके उदररोग कुष्ठरोग, अजीर्ण, कर्णरोग, कृशता, स्थूलता असाध्य से असाध्य क्षय वगैरह सभी रोगों मे यह रस हितकर है। यह महाभ्रवटी परम रसायन है॥ १५५॥

१५६ अभ्रवटिका।

अथ शुद्धस्य सूतस्य गन्धकस्याभ्रकस्य च।
प्रत्येकं कर्षमानं तु ग्राह्यं रसगुणैषिणा॥६०६॥
ततः कज्जलिकां कृत्वा व्योषचूर्णं प्रदापयेत्।
केशराजस्य भृङ्गस्य निर्गुण्ड्याश्चित्रकस्य च॥
ग्रीष्मसुन्दरकस्याथ जयन्त्याः स्वरसं तथा।
मण्डूकपर्ण्योः स्वरसं तथा शक्राशनस्य च ६०८
श्वेतापराजितायाश्च स्वरसं पर्णसम्भवम्।
दापयेत्तत्र तुल्यं च विधिज्ञः कुशलो भिषक्
रसतुल्यं प्रदातव्यं चूर्णं मरिचसम्भवम्।
देयं रसार्धभागेन चूर्णं टङ्कणसम्भवम्॥६१०॥
शुभे शिलामये पात्रे घर्षणीयं प्रयत्नतः।
शुद्धमातपसंयोगाद्वटिकां कारयेद्भिषक् ६११
कलायपरिमाणां तु खादेत्तां तु प्रयत्नतः।
दृष्ट्वा वयश्चाग्निबलं यथा व्याध्यनुपानतः ६१२
हन्ति कासं क्षयं श्वासं वातश्लेष्मभवां रुजम्।
परं वाजीकरः श्रेष्ठो बलवर्णाग्निवर्धकः ६१३॥
ज्वरे चैवातिसारे च सिद्ध एष प्रयोगराट्।
नातः परतरः श्रेष्ठो विद्यतेऽभ्ररसायनात् ६१४
चातुर्थिके ज्वरे श्रेष्ठः सूतिकातङ्कनाशनः।
भोजने शयने पाने नास्त्यत्र नियमः क्वचित्।
दधिचा वश्यकं भक्ष्यं प्राह नागार्जुनो मुनिः॥

र. सं., र. र., भै. र., र. सु, र. क., ग्रहण्यधिकारे

भाषा—शुद्धपारा, गन्धक और अभ्रकभस्म एक २ तोला लेकर कज्जली बना लेना। फिर त्रिकटु का चूर्ण, कालाभंगरा, भंगरा, संभालू, चित्रक, हरमल, जैत, ब्राह्मी भांग और सफेदकोयल और नागर बेलके पत्ते इन का रस, ये प्रत्येक कज्जली के बराबर पारे के बराबर काली मिर्च का चूर्ण और पारे से आधा सुहागा डालकर खरल मे घोटना फिर मटर के बराबर गोलियें बनाकर धूपमे सुखा लेना। अव-

स्या, अग्निवल, और रोगके अनुसार उचित अनुपानके साथ खाने से यह गोली खांसी, क्षय, श्वास (दमा) और वातकफ से होने वाले रोग इन को नष्ट करती है । इस का प्रयोग बड़ा ही वाजीकरण है । बलवर्ण तथा अग्नि को बढाता है । ज्वर और अतिसार मे भी इसका प्रयोग सिद्ध और राजप्रयोग है। इस अभ्रक रसायन से अधिक बलकारक और रोगनाशक कुछ नहीं है। चौथिया ज्वर और सूतिका रोग को यह नष्ट करता है इस के खाने वाले को भोजन, शयन और पान का कोई परहेज करना आवश्यक नहीं परन्तु दही जरूर खाना चाहिये ऐसा मुनिश्रेष्ठ नागार्जुन ने कहा है॥१५६॥

१५७ अभ्रवटी

अभ्रं भास्करजं सनागकनकं चन्द्रं पविं ताण्डवं,
कान्तं तीक्ष्णसुरायसं दृढमृतं सूतं कृतं तत्समम्।
वक्त्रस्थं रसगोलकं रतिकरं सर्वार्तिसङ्घापहं,
वर्षैकेण निहन्ति दोषनिचयं कल्पायुषो नो जरा
रसेन्द्र सं.,　　॥ ६१६ ॥

भाषा—तांबा, अभ्रक, सीसा, सोना, चांदी, हीरा, तांडव (हरिताल अथवा मैनसिल), चुम्बक अथवा कान्तलोह, फौलाद, सोना (दो वार आने से दूना लेना) और पारा सबकी भस्मैं बराबर बराबर लेकर गोली बनाकर रोज मुख मे रखने से कामवृद्धि होती है और सब रोग नष्ट होते हैं एक वर्ष तक इसको मुख मे रखने से सब दोष नष्ट होकर मनुष्यकी आयु दीर्घ हो जाती है। और वह अजर हो जाता है ॥ १५७ ॥

१५८ अभ्रसिन्दूरम् ।

विधाय धान्याभ्रकमुक्तपूर्वं
　तदन्धमूषापिहितं यथावत् ।
ध्मातं चतुर्भिः सह वङ्कनालै
　र्यामद्वयाद्भस्म भवेत्तदीयम्॥६१७॥
सा चाभ्रभूतिः समगन्धकेन
　एरण्डतैलेन विमर्दनीया।
आज्येन धेनोरपि मर्दयित्वा
　कृत्वा तु पूगीफलमात्रमेतत्॥६१८॥
पुनश्चतुर्भिर्धमनं विधाय
　वङ्के श्चयामद्वयमस्ततन्द्रम्।
सञ्जायते शुभ्रमतीवसत्त्वमभ्रस्य
　नानाकरणाय युक्तम् ॥ ६१९ ॥
एतेनापि प्रवक्ष्यामि विकृतिं लोकविश्रुताम् ।
व्यतिरेकस्तु तापेन वसुवर्णं तु काश्चनम् ॥ ६२०
कनकीफलमध्यस्थं पुटमष्टोत्तरं शतम् ।
समवङ्गेन संयोज्य मर्दयित्वा यथाविधि॥६२१
काचकूप्यां विनिःक्षिप्य वालुकायन्त्रपाचितम् ।
पद्मरागमिदं सर्वमभ्रसिन्दूरमुच्यते ।
तारे ताम्रे भुजङ्गे वा विध्यत्यष्टोत्तरं शतम् ६२२
भक्षणादस्य जायन्ते धातवश्च पुनर्नवाः ।
राजयक्ष्मा क्षयं याति रेतसःस्तम्भनं परम् ६२३
पा. यो. शा.,

भाषा—पीताभ्रक अथवा कृष्णाभ्रक अभावमे श्वेताभ्रक लेकर कोयलों पर रखकर धोंकनी से गरम करना जब वह अग्निवर्ण हो जाय तब उस पर गन्धक का तेल डाले । तेल के जलजाने के बाद फिर जब अग्निवर्ण हो तब रक्तवर्ण या कृष्णवर्ण गाय के दूध मे डालना। शीतल होने पर निकाल कर फिर अभ्रक को अग्नि पर रखना और धोंकनीसे गरम करना जब फिर रक्तवर्ण हो जाय तब गन्धकका तेल डालना, तेलके जल जानेपर फिर अग्निवर्ण होने पर दूधमे बुझाना इस तरह सौ वार करना । फिर अभ्रकके बराबर चावलोंके धान लेकर कम्बल के टुकडे मे दोनों को मिलाकर ढीली पोटली बांधना और पोटली को कांजी मे ३ दिन तक डुबाना। चौथे दिन पोटली को कांजी मे मसल २ कर तमाम अभ्रक को निकाल लेना और जब अभ्रक कांजी मे नीचे बैठ जाय तब कांजी को नितार कर डाल देना और अभ्रक को सुखा फिर देना उस मे गन्धक का तेल मिलाकर अन्धमूषा मे रखकर

कोयलों पर रख देना और कोयलों के चारों तरफ ४ धौंकनी लगा देना। दोपहर मे इस अभ्रक की भस्म हो जायगी। इस अभ्रक भस्म के बराबर शुद्धगन्धक (अग्निस्थायी, पा० यो० शा० में है) देकर पीले फूल के एरण्ड के तैल मे मर्दन करे फिर रक्त वर्ण गाय के घीसे मर्दन करके सुपारी के बराबर गोलियें बनाकर अंधमूषा मे रखना और पहिले के समान ही दोपहर तक धौंकना। इस की अत्यन्त सफेद भस्म बन जायगी। इस भस्म को गन्धक के तैल से मर्दन करके धतूरे के फल मे भर कर कपड़मिट्टी कर देना और वराह पुट मे पकाना इस प्रकार १०८ पुट देवे फिर इसकी बराबर बङ्ग भस्म मिलाकर पूर्वोक्त एरण्ड के तैल और गाय के घी मे मर्दन करके आतशी शीशी मे भरकर ४ पहर बालुका यन्त्र मे पाचन करे तो माणिक्य के सदृश भस्म होगी इसका नाम अभ्रसिन्दूर है। १०८ तोला चांदी अथवा तांबा या सीसा में १ तोला डालने से हल्के दर्जे का सुवर्ण बनेगा। और वह गलाने मे रंगमे भद्दा मालूम पडेगा। इस के सेवन करने से मनुष्य के रक्तादि तमाम धातु नये हो जाते हैं राजयक्ष्मा नष्ट हो जाता है और उत्तम वाजीकरण है।

गन्धकका तेल और अग्निस्थायी गन्धक बनाने का प्रकार के लिये पारदयोग शास्त्रका पहिला और दूसरा पटल देखो ॥ १५८ ॥

१५९ अभ्रसिन्दूरम्

इदं केचिच्छुभं प्राहुर्गगनस्य च मारणम्।
स्तेनराजरसं चैव सूर्यभक्तारसं तथा ॥६२४॥
अश्वगन्धा च निर्गुण्डी रुदन्ती विजया तथा।
शतावर्या रसं चैव आटरूपरसं तथा ॥६२५॥
बला चातिबला चैव शाल्मलीसत्त्वमेवच।
कूष्माण्डकरसश्चैव मुस्ताया रसमेव च ॥६२६॥
विदारीवरकन्दं च तुलसी मदनं तथा।
भल्लातकरसश्चैव वार्ताकीरसमेवच ॥६२७॥
कपित्थस्य रसं चैव द्राक्षाफलरसं तथा।
न्यग्रोधस्य रसश्चैवमर्कक्षीरं तथैव च ॥६२८॥
उशीरं बालकं कुष्ठं तथा लोहितरोहिषम्।
चम्पकं काकमाची च गोक्षुरं शतपत्रिका६२९
दाडिमी कपिकच्छूश्च धात्रीफलरसं तथा।
पुनर्नवा तथा ब्राम्ही चित्रकस्य रसं तथा ६३०
मुण्डीरसं शिरीषस्य गुण्डूच्याश्च रसं तथा।
अभ्रकस्य पुटं देयं प्रत्येकैर्योजयेद्रसैः।
सर्वांश्रोगान्निहन्त्याशु तमः सूर्योदयो यथा
वा., ॥ ६३१ ॥

भाषा—कोई वैद्यगण निम्न लिखित प्रकार से अभ्रक का मारण उपयुक्त बताते हैं यथा-चोरक, हुर हुर, असगन्ध, संभालु, रुदन्ती, भांग शतावरी अडूसा, बला, अतिबला, सेमल का मूसला, कूष्माण्ड, नागरमोथा, विदारीकन्द, तुलसी, मैनफल, भिलावा, बनभांटा, कैथ, दाख, गूलर, आंक (का दूध) खस सुगन्धवाला, कूठ, छाल रोहिडा, चम्पा, मकोय, गोखरू, गुलाब, अनार, कैंवाच, आंवला, पुनर्नवा, ब्राह्मी, चित्रक, गोरखमुण्डी, शिरस और गिलोय इन के रसों से (जिसका रस न मिले उस के क्वाथ से) पृथक् पृथक् भावना देकर पुट देना। यह अभ्रसिन्दूर सभी रोगो को ऐसे नष्ट करता है जैसे कि सूर्योदय अन्धकार को नष्ट करता है ॥१५९॥

१६० अभ्रसुन्दरो रसः।

क्षारत्रयं सकृष्णाभ्रं गन्धं ताम्ररसं समम्।
हस्तिशुण्ड्याश्च चाङ्गेर्या दिनं द्रावेण मर्दयेत् ६३२
यत्नतो गोलकं कृत्वा ततो लघुपुटे पचेत्।
अत्रनेपालजं ताम्रं प्रयोज्यं नान्यथा गुणाः६३३
स्यानुपानेरस्यगुञ्जा जयेद्रोगान्न संशयः।
ग्रहणीमारनालेन कासं मन्दाग्नितामपि॥६३४॥
वातं तीव्रं महाशूलं शूलं च परिणामजम्।
आर्द्रकस्य रसेनैव धारोष्णपयसा सह
अम्लपित्ते पित्तरोगे सर्वथैव प्रयोजयेत्॥६३५॥
र. क. ...

भाषा—तीनक्षार (यवक्षार, सुहागा और सज्जी) काला अभ्रक, गन्धक, तांबा और पारा इन सबको बराबर भाग मे लेकर मिलाना फिर हस्तिशुण्डी और अम्लोनिया के रस से एक २ दिन उसको भावना देना फिर उसका गोला बनाकर लघुपुट मे पकाना, फिर उसमे नेपालीताम्रभस्म डालना, यदि किसी दूसरे प्रकार का तांबा मिलाया जायगा तो कुच्छ भी गुण न होगा। उचित अनुपान के साथ सभी रोगों को शान्त करता है संग्रहणी खांसी और मन्दाग्नि मे इसको कांजी के साथ देना चाहिये। बढ़ा हुआ वातरोग, शूल, पार्श्वशूल और परिणामशूल मे इसको अदरख के रस के साथ देना चाहिये। अम्लपित्त तथा सभी प्रकार के पित्तरोगों को यह धारोष्ण दूध के साथ देनेसे नष्ट करता है ॥ १६० ॥

१६१ अभ्रहरीतकी

मृताभ्रं विंशतिपलं मृतलोहस्य पञ्चकम् ।
गन्धकस्य पलान् पञ्च त्रिभिर्द्विगुणमाक्षिकम्॥
पथ्याशतपलं योज्यं धात्रीफलशतद्वयम् ।
सर्वमेकत्र तच्चूर्णं जम्बीरैर्भावयेद्दिनम्॥६३७॥
भृङ्गीपुनर्नवाद्रावैः पातालगरुडाह्वयैः ।
भल्लातवह्निसैरेयैः हस्तिशुण्डी तु लाङ्गली ॥
क्षीरिणी जलकुम्भी च प्रत्येकं स्वरसैर्दिनम् ।
भावयेन्मर्दयेदित्थं मध्वाज्याभ्यां विलोडयेत्॥
स्निग्धभाण्डे स्थितं खादेन्नित्यं निष्कद्वयं द्वयम् ।
सिद्धसावरयोगोऽयं त्रिदोषार्शांसि नाशयेत् ॥

नि. र., र. सु., धे. चि , व. रा., अर्शोऽधिकारे ।

भाषा—अभ्रकभस्म ८० तोले, लोहभस्म २० तोले, और शुद्ध गन्धक २० तोले, तथा इन तीनों से दूनी सोनामाखी, २४० तोले, हरड का चूर्ण ४०० तोले, आंवले का चूर्ण ८०० तो०, सब को इकट्ठा कर के जम्बीर, भांगरा, पुनर्नवा, पातालगारुडी (छिलहिंटा) भिलावा, चित्रक, पीयावासा, हस्तिशुण्डी, लांगली (कलिहारी) खिरनी और जलकुम्भी इन के रस अथवा क्वाथ से एक एक दिन भावना देना फिर बारीक घोट कर शहद और घी मे मिला देना और चिकने वर्तन मे रख देना। प्रतिदिन १ तोला खाने से त्रिदोष से उत्पन्न अर्श (बवासीर) नष्ट हो जाता है। यह सिद्ध साबरयोग है ॥ १६१ ॥

१६२ अभ्रामलकरसायनम्

अभ्रकेण समं गन्धं नवनीतामलच्छविम् ।
मूर्च्छितं च तथा सूतं त्रिकटु त्रिफला बचा ॥
विडङ्गं जीरके द्वे च पालाशं बीज मैलकम् ।
वृद्धदारुत्वचं कंदं सविडङ्गं सचित्रकम्॥६४२॥
श्यामार्कं शिग्रुदन्त्यौ च त्रिवृता वर्णदूषिका ।
प्रत्येकं कर्षमात्रं वै पाके खरतरे क्षिपेत्॥६४३॥
रसायनविधानेन कर्षकं भक्षयेन्नरः ।
वातरक्तं महाव्याधिं दुस्तरञ्च व्यपोहति ६४४

वं. से.,

भाषा—अभ्रक भस्म, गन्धक और मूर्च्छित पारा जो कि मक्खन के माफिक साफ हो इन को बराबर २ लेना। और त्रिकटु, त्रिफला, बच, विडङ्ग, दोनों जीरे, ढाकके बीज, एलुवा, विधारा, तज, कमल की जड़, विडङ्ग (दो बार आया है इस लिये दूना डालना) चित्रक, सामा, (एक प्रकार के बारीक चावल) सहजन, दन्ती, निशोत, और वर्णदूषिका (मेंहदी) इन सबको एक एक तोला लेना और सब का चूर्ण कर कड़क चासनी मे डाल देना। रसायन की विधि से इस को एक तोला रोज खाना यह रस कष्टसाध्य से कष्टसाध्य वातरक्त को नष्ट करता है। अत्यन्त बढ़े हुए वातरक्त मे इसका प्रयोग किया जाता है॥१६२॥

१६३ अमरकलानिधिरसः ।

मुक्ताफलं विद्रुमकं रसेन्द्रकं
गन्धं समांशानि ततश्च सावयेत् ।

तद्बीजपूरस्य रसेन मर्दितं
गोलं हि कृत्वा वसनेन वेष्टयेत्॥६४५॥
मृदा सुलिप्तं परिशोषितं च
शरावयोः सम्पुटयेच्च वह्नौ।
चूर्णीकृतं वल्लमितं च भुक्तं
स्याद्रोगराजस्य निकृन्तनं हि६४६

र. प्र. सु., राजयक्ष्मणि.

भाषा—मोती, मूंगा, पारा, और गन्धक इन सब को बराबर लेकर बिजोरे के रस में घोटकर गोला बना लेना उस गोले को बारीक कपड़मिट्टी करके सुखा लेना फिर दो शरावों के बीच में रखकर अग्नि मे पका लेना। ठंढा होनेपर उसका बारीक चूर्ण कर लेना इस को ३ रत्तीभर खानेसे राजयक्ष्मा नष्ट होता है॥ १६३॥

१६४ अमरसुन्दरः

सूतभस्म दरदं विशोधितं
तालसत्त्वमिति चैकभागिकम्।
गन्धकं च सममत्र मर्दितं
भृङ्गराजरसकेन यत्नतः॥६४७॥
काकमाचिजरसैश्च मर्दितं
कुक्कुटाख्य पुटपञ्चकेन हि।
पाचितं हि सितया समं सदा
सेवितं सकलरोगघातकम्॥६४८॥

र. प्र. सु., र. म. मा., अतिसारज्वरादौ।

भाषा—पारे की भस्म, शिंगरिफ, शुद्ध हरताल की भस्म और गन्धक इन सब को बराबर लेकर भांगरे के रस से और काकमाची के रस से भावना देना और कुक्कुट पुट मे पकाना ऐसे ५ वखत करना फिर इस को मिश्री के साथ खानेसे सभी रोग नष्ट होते हैं॥ १६४॥

१६५ अमरसुन्दरीगुटी (प्रथमा)

अकसतरुविमानाः सूतकं तत्त्रिनिघ्नं,
मृतपरिमथहेम षोडशांशं प्रयुक्तम्।
युगपदरविकल्पास्तोयघृष्टं विपक्वं,
गुलितममरनाम्ना सुन्दरी स्याद्वटीयम्॥६४९
मासमेकं तु वक्त्रस्था गुटिका दिव्यरूपदा।
सर्वसिद्धिप्रदा प्रोक्ता जरामृत्युविनाशिनी६५०
सङ्ग्रामे विजयी वीरो जायते नात्र संशयः।
गुटिकेयं समाख्याता नाम्ना ह्यमरसुन्दरी ६५१

रसेन्द्रम.,

टि० अत्र नामैकदेशग्रहणे नाममात्रग्रहणमिति न्यायमङ्गीकृत्य अ. क. स. त. रु. वि. मा. ना. इत्येतदक्षरैः अभ्रक, कान्त, सूत, तार्क्ष्य (वा ताम्र,) रजत, विद्रुम, माणिक्य, नागाः क्रमेणग्रहीतव्याः तत्र अ. र. वि. कल्पाः इत्येतैः सदृशा अर्थात् अभ्रक, कान्त, सूत, तार्क्ष्य (ताम्र) रजत, विद्रुम, नागा युगपद्ग्राह्या अर्थात् एकैकभागा ग्रहीतव्याः। माणिक्यं सूतकं च त्रिघ्नं त्रिगुणं कर्तव्यम्। अर्थादेतयोस्त्रयस्त्रयोभागा ग्रहीतव्याः इति रहस्यम्। "मृतपरिमथहेमषोडशांशप्रयुक्तम्." इति परि सर्वतः मध्नाति साधकान् इतिकर्तव्यतादिङ्मूढान् करोतीति परिमथं पारदस्येव यशदस्य अग्निस्थायिताकरणे वादिनां दुष्करत्वेन तस्य परिमथमिति नाम। परिमथश्च हेम चेति समाहारद्वन्द्वे मृतश्च तत्परिमथहेम चेति कर्मधारयाद्यथाकथञ्चित्सिद्धिः। आयुर्वेदे औषधसमाहारद्वन्द्वस्य विकल्पस्वीकारमन्तरा गत्यन्तराभावात्। मृते यशदसुवर्णे षोडशांशे योज्ये। अत्र गुटिकायाः प्रमाणविशेषस्याविद्यमानत्वेऽपि उत्तरगुटिकायां गुञ्जाभिः कृतवन्वेतिविशेषप्रमाणरूपस्य विद्यमानत्वेनात्रापि तदेवानुसर्तव्यमथवा यावता प्रमाणेन मुखे स्थापनं सुखावहं स्यात्तथा कर्तव्यमिति निष्कर्षः।

भाषा—अभ्रक १ भाग, कान्तलोह १ भाग, पारा ३ भाग, तांबा (अथवा सोनामाखी) १ भाग, चांदी १ भाग, प्रबाल (मूंगा) १ भाग, माणिक्य ३ भाग, जस्त $\frac{1}{16}$ भाग, और सोना $\frac{1}{16}$ भाग, सब की भस्में लेकर पानी मे घोटकर अन्धमूषा मे पकाकर १ गोली बना लेना इस गोली

का नाम अमर सुन्दरी गुटी है। इस दिव्यगोली को एक महीने तक मुख मे रखने से (इस को रोज मुख मे रखना भोजन और स्नान आदि आवश्यक कार्य और सोते वक्त इस को मुख मे से निकाल लेना शेष समय मे रख लेना) मनुष्य का रूप दिव्य होजाता है यह गोली सब सिद्धि देती है बुढापे को और मृत्यु को नष्ट करती है इसके खाने से मनुष्य बड़ा वीर और लड़ाई मे विजय पाने वाला होता है। इस मे कुछ भी सन्देह नहीं। यह अमर सुन्दरी गुटी संसार के हित के लिये सिद्ध लोगोंसे प्रकट की गई है ॥ १६५ ॥

१६६ अमरसुन्दरीगुटी (द्वितीया)

अकसतरुविमानाः सुरविंशद्विघ्नविंशैः स्यात्।
गुञ्जाभिः कृतबन्धा गुटिका ह्यमरसुन्दरी नाम्ना
वक्त्रस्था बहुकालं विजयति विश्वं न संदेहः।
आस्यस्थैकं मासं वलीपलितनाशनं कुरुते ॥

रसेन्द्रमं.,

भाषा—अभ्रक भस्म ३२ रत्ती, कान्तलोहभस्म २० रत्ती, पारा ४० रत्ती, तांबा भस्म (अथवा सुवर्ण माक्षिक) २० रत्ती, चांदीभस्म २० रत्ती, मूंगाभस्म ४० रत्ती, माणिक्य भस्म २० रत्ती और सीसाभस्म ३ रत्ती लेकर पानी मे घोटकर एक गोली बनाकर अन्धमूषा मे पका लेना। इस गोली को देरतक मुख मे रखने से मनुष्य विश्व विजयी हो जाता है। और १ महीने तक मुख मे रखने से वली पलित रहित हो जाता है॥ १६६॥

१६७ अमरसुन्दरीगुटी (तृतीया)

कान्ताभ्रसत्त्वहेमतारं चार्कः समांशतः सर्वे।
बद्धं सूतं समांशं ध्मातं गोलं कृतं खोटम् ॥
बाह्ये रसेन लिप्तं वदनगतं शस्त्रवारकं रोगान्।
हन्ति हि शरीरसंस्थान्-
नाम्नाऽमरसुन्दरी गुटिका ॥ ६५५ ॥

र. ह., रसायने।

भाषा—कान्तलोह, अभ्रक, सोना, चांदी, तांबा और बंधा हुआ पारा सबका गोला बनाकर धूंक कर खोट बना लेना बाहर से पारा लपेट देना। इस अमर सुन्दरी गोली को मुख मे रखने से शस्त्रोंका निवारण होता है और यह सभी रोगों को नष्ट करती है ॥ १६७ ॥

१६८ अमरेन्द्ररसः

शुद्धौ गन्धकटङ्कणौ रससमौ भागद्विकं दन्तिकम्
भृङ्गोत्थैश्च विमर्दितं रसवरं यामांश्च वेदोन्मितान्
ताम्बूलीरसमर्दितं नवदिनं मुद्गप्रमाणान्वितं,
भक्ष्यं तीक्ष्णतरज्वरप्लुपहरं पैत्तादिदाहापहम्
नानाशूलहरं च गुल्महरणं दध्यन्नभुक्तं क्रमात्,
प्रख्यातस्तरुणज्वरौघदलनः श्रीपूज्यपादोदितः

र. क. यो.,

अयं पाठः त्रिनिष्कं शुद्धजैपालमिति रामबाणाख्यरसादभिन्न एव प्रतिभाति। अत्र केवलो विषाभावः सोऽपि लेखकप्रमादाद् व्यपगतो जातइत्यपि सम्भवति ॥

भाषा—शुद्ध गन्धक और शुद्ध सुहागा प्रत्येक १ भाग, और गोदन्ती २ भाग इनको मिलाकर ४ पहर तक भांगरे के रस मे घोटना फिर नौ दिन तक पान के रस मे घोटना और मूंग के बराबर इस की मात्रा खिलाना यह रस भयानक ज्वर और पित्तादि से उत्पन्न दाह, अनेक प्रकार के शूल और गुल्मरोगको नष्ट करता है। इस के सेवन करनेवाले को धीरे २ दही और भातका आहार बढाना चाहिये। यह श्री पूज्यपाद का बताया हुआ जवानों के प्रचण्ड ज्वरों को नष्ट करने वाला (अमरेन्द्र) रस है॥ १६८ ॥

टि०—यह रस "त्रिनिष्कं शुद्ध जैपालं" इत्यादि से कहा गया रामबाण रस ही है ऐसा ज्ञात होता है केवल बछनाग का भाग लिखने वाले की भूल से रह गया हो ऐसा सम्भव है।

१६९ अमरेश्वरो रसः

पारदाद् द्विगुणं गन्धं मर्दयेन्मसृणावधि।
सूरणस्य प्रदातव्या रसेन मुनिभावनाः ६५७
शङ्खसेहुण्डधुत्तूरवराटलघुशङ्खकान्।
अग्निद्वयहरिणशृङ्गवर्चीसैन्धवसम्भवान् ६५८
क्षारान् गन्धमितान् दत्वा
द्रव्याणीमानि मिश्रयेत्।
वज्रक्षारं त्रिकटुकं सूरणं वंशरोचना ॥६५९॥
भल्लातं चित्रकं चेति प्रत्येकं गन्धतुल्यकम्।
एकविंशतिसंख्याभिर्भावयेदमरेश्वरम् ६६०
द्विगुञ्जं घृतसंयुक्तं खादेदर्शो निवृत्तये।
मण्डलान्नाशयेत्सत्यं सिद्धयोग उदाहृतः ६६१

र. को., अर्शोऽधिकारे।

भाषा—पारा और उस से दूना गन्धक लेकर कज्जली बनालेना और जमीकंद के रस से ७ भावना देना। फिर शंख, थूहर, धतूरा, कौडी, छोटे शंख, चित्रक भिलांवा हरिण का सींग, अंगुलिया थूहर और सेंधानमक इनके क्षारों को प्रत्येक गन्धक के बराबर मिलाकर घोटना। फिर थूहर का क्षार, त्रिकटु, जमीकंद, वंशलोचन, भिलांवां और चित्रक प्रत्येक को गन्धक के बराबर डालना और सूरण के रस की २१ भावना देना। इसकी २ रत्ती की मात्रा घी के साथ खानी चाहिये। इससे अर्शरोग १ मण्डल (२१ दिन) मे नष्ट होता है। यह सिद्धयोग है॥ १६९ ॥

१७० अमृतकलानिधिः

मुक्तगन्धसहितं रसं शुभं
बीजपूरकरसेन मर्दयेत्।
गोलकं च कुरु वेष्टयेत्ततो
मृत्स्नया लवणमिश्रया दृढम् ॥६६२॥
शोषयेच्च पुटयेच्च यत्नतो
जायते ऽमृतकलानिधीरसः।
राजयक्ष्मविनिवृत्तये रसं
योजयेच्च गदितानुपानतः ॥ ६६३ ॥
पूर्णचन्द्रवदिमं नियोजये-
दन्यरोगविनिवृत्तये रसम्।
सर्वरोगविनिवृत्तये च तं
रोगयोगसहितं नियोजयेत् ॥ ६६४ ॥

र. दी., र. चं., राजयक्ष्मणि।

भाषा—मोती, गन्धक और पारा इन तीनों को बराबर लेकर बिजोरे के रस से भावना देना फिर नमक मिली हुई मिट्टी से कपड़मिट्टी करके सुखा कर अग्नि मे उस को पुट देना यह अमृतकलानिधिरस बनेगा। यथोचित अनुपान के साथ राजयक्ष्मा को नष्ट करने के लिये इस का उपयोग करना। अन्य रोगों मे भी पूर्ण चन्द्र की तरह इस का उपयोग कर सक्ते हैं। जिस रोग मे जिस योग के साथ इस का उपयोग लाभकारी हो सक्ता है। वहां उसी के साथ इस का उपयोग करना॥ १७० ॥

१७१ अमृतकल्पवटी.

शुद्धौ पारदगन्धौ च समानौ कज्जलीकृतौ।
तयोरर्द्धं विषं शुद्धं तत्समं टङ्कणं भवेत्॥६६५॥
भृङ्गराजद्रवैर्भाव्यं त्रिदिनं यत्नतः पुनः।
मुद्गप्रमाणा वटिका कर्तव्या भिषजांवरैः६६६
वटीद्वयं हरेच्छूलमग्निमान्द्यं सुदारुणम्।
अजीर्णं जरयत्याशु धातुपुष्टिं करोति च ६६७
नानाव्याधिहरा चेयं वटी गुरुवचो यथा।
अनुपानविशेषेण सम्यग्गुणकरी भवेत् ६६८

र. सं., र. चं., अग्निमान्द्ये।

भाषा—शुद्धपारा और शुद्धगन्धक इनको बराबर लेकर कज्जली बनालेना फिर पारे के बराबर शुद्ध बछनाग और उतना ही सुहागा मिलाकर तीन दिनतक भांगरे के रससे भावना देना फिर उसकी मूंगके बराबर गोलियें बना लेना। इसकी दो गोलियें शूल, मन्दाग्नि और भयानक अजीर्ण को हरती हैं और धातुओं को पुष्ट करती हैं। यह गोली विशेष २ अनुपान के साथ सभी रोगों को

नष्टकर के गुण करती है गुरुके वचन की तरह यह गोली यथार्थ गुणकारी है ॥ १७१ ॥

१७२ अमृतगर्भः

प्रत्येकं दशगद्याणाः शुद्धगन्धकसूतयोः ।
त्रिंशत्या चार्कदुग्धस्य द्वयं पिष्ठा दिनत्रयम् ॥
त्र्यहं सेहुण्डदुग्धेन शरावस्थं च तं पुटेत् ।
भूधराख्ये च यन्त्रे वै क्रमादेयं पुटाष्टकम्६७०
ततः खल्वे तु सम्पिष्य सूक्ष्मं चूर्णं विधीयते ।
श्रीखण्डेन च पथ्यानां देयाः सप्तैव भावनाः
मरिचानां जलेनाथ दद्याच्च सप्तभावनाः ।
भावनाभावितं चूर्णं तोलयेत्तत्समानकम् ६७२
वत्सनाभविषं दत्वा श्रीखण्डेन च भावयेत् ।
आकाशवल्ल्याश्च रसैर्भावनास्तावतीस्ततः ६७३
खल्वे पिष्ट्वा ततः सूक्ष्मं काचकूप्यां क्षिपेत्सुधीः।
नाम्ना ह्यमृतगर्भोऽयं कीर्तितो रसवित्तमैः ६७४
द्विगुञ्जामात्रकश्चाऽयं गद्याणैका च शर्करा ।
सर्वरोगेषु दातव्यः समं शीतेन वारिणा ॥६७५
वातशूले तथा पार्श्वशूलेऽथ परिणामजे ।
वातज्वरे च मन्दाग्नौ ह्यजीर्णे श्लेष्मजामये
पीनसे चामवातेषु वातश्लेष्मादिके गदे ६७६

रस चि., र. कं., शूले ।

भाषा—शुद्धगन्धक ५ तोले और उतनाही शुद्धपारा लेकर १० तोले आक के दूध से ३ दिन तक भावना देना और तीन दिन तक थूहर के दूध से भावना देना फिर २ सरावों के बीच मे रखकर भूधरयन्त्र सें अग्नि मे पुट देना ऐसे ८ पुटें देकर खरल मे उसका बारीक चूर्ण बना लेना चन्दन और हरड़ तथा लालचन्दन के क्वाथ की सात ७ भावनाएं देना (अथवा दोनों को मिलाकर सात भावना देना) फिर कालीमिर्च के क्वाथ से ७ भावना देना फिर चूर्ण के बराबर बछनाग मिलाकर सात बार चन्दन के क्वाथ से और ७ बार आकाशवेल के रस से भावना देना और बारीक पीसकर शीशी मे भर देना । श्रेष्ठ रसविद्या के विद्वानोंने इस रस का नाम अमृतगर्भरस बताया है इस की २ रत्ती मात्रा ३ माशे शक्कर के साथ दी जाती है ऊपर से थोडासा ठंढा पानी पीना चाहिये । यह रस सभी रोगों मे दिया जाता है । वातशूल, पार्श्वशूल, परिणामशूल, वातज्वर, मन्दाग्नि, अजीर्ण, कफ के रोग, पीनस, आमवात और वात तथा कफ से होनेवाले रोगों में यह अत्यन्त हितकर है ॥ १७२ ॥

१७३ अमृतपालो रसः

रसगन्धामृतानां तु गोलं कृत्वाऽम्बुयोगतः ।
तले भाण्डस्य संस्थाप्य तथोर्द्धे ताम्रपत्रिकाम्
अधोमुखीं निरुध्याथ दिनं दीपाग्निना दहेत् ।
ताम्रपात्रोदरस्थं तं मृद्नीयादतियत्नतः ६७८
सैन्धवार्द्रकनीरेण मुखं जिह्वां विलिप्य च ।
अम्भसावल्लभामात्रन्तु दत्वा प्रावृणुयान्नरम्॥
स्वेदोद्गमः स्याद्यामोर्द्ध्वे ततो ज्वरविमुक्तये ।
एवं तु त्रिदिनं कृत्वा ज्वरान्मुक्तो भवेन्नरः ।
पथ्यं तक्रौदनं देयं जीर्णे च तरुणे तथा ६८०

टो., ज्वराधिकारे ।

भाषा—पारा, गन्धक और बछनाग इन को बराबर लेकर पानी मे घोटकर गोला बना लेना फिर हांडी के बीचमे रखके ऊपर तांबे की लोटी रखकर सन्धि बन्ध कर के हंडी के मुंह पर ढकन दे कर कपड़मिट्टी करके सुखा लेना फिर १ दिन दीपाग्निसे पकाना ठंढा होने पर तांबे के पत्र और उस के भीतर के रस को बारीक पीस लेना । सेंधानमक और अदरख का रस मिलाकर पहिले जिह्वा और मुखको अच्छी तरह चुपड लेना। फिर इस रसकी ३ रत्ती की मात्रा रोगी को देकर गरम कपडे एकदम ओढा देना । एक पहर के बाद खूब पसीना आवेगा इसी प्रकार ३ दिन तक करने से ज्वर बिल्कुल ही नष्ट हो जावेगा । इस

प्रयोग मे छाछ और चावल का भात पथ्य है चाहे ज्वर और रोगी जीर्ण (वृद्ध) हो अथवा युवावस्था मे हो ॥ १७३ ॥

१७४ अमृतप्राशः

यथोत्तमं स्वर्णरजः समानं,
ब्राह्मीवचाकुष्ठशिवारजश्च ।
आयुः प्रहर्षबलमङ्गपुष्टिं,
क्षौद्राज्यलीढं कुरुते शिशूनाम्॥६८१॥

लो. प., (लो. त.,)

भाषा—उत्तम स्वर्णका चूरा, ब्राह्मी, वच, कूठ और हरड़ इनका चूर्ण, घी और शहद के साथ चटाने से बालकों की आयु, प्रसन्नता, बल और अंगपुष्टि बढती है ॥ १७४ ॥

१७५ अमृतभल्लातकः

भल्लातकानां पवनोद्धतानां
तरुच्युतानां च यदाऽऽढकं स्यात् ।
घृष्टेष्टिकाचूर्णकणैर्जलैश्च
प्रक्षाल्य संशोष्य च मारुतेन ॥ ६८२ ॥
शुष्काणि तानि द्विदलीकृतानि
विपाचयेदप्सु चतर्गुणासु ।
तत्पादशेषं पुनरेवशीतं
क्षीरेणतुल्येन विपाचयेत्तत् ॥ ६८३ ॥
घृतांशयुक्तेन घनं यथा स्या-
त्तदर्धया शर्करयाभिकीर्णम्
सञ्चूर्णं त्रैफलचन्द्रमांस्य
त्रिवृच्च वांशी खदिरामृतं च ॥ ६८४ ॥
सचन्दनाऽऽकल्लकणाकवाचं
सदेवपुष्पं मुशलीद्वयञ्च ।
कङ्कोलमोचाह्वयदीप्ययुग्मं
नतं समातङ्गकणा विदारी ॥ ६८५ ॥
जातीफलं मुस्तकजातिपत्र्यौ
कुबेरजीरागुरुसाब्धिशोपम् ।
मेदाद्वयं लोहरसेन्द्रवङ्ग
मभ्रं तथा कुङ्कुमकश्च कर्षम् ॥ ६८६ ॥
तत्सप्तरात्रादतिजातवीर्यं
सुधारसादप्यधिकं वदन्ति ।
प्रातः प्रबुद्धः कृतदेवकार्यो
मात्रां भजेत्सात्म्यशरीरयोग्याम् ॥६८७॥
न चानुपाने परिहार्यमस्ति
न चातपेनाऽध्वनिमैथुने च ।
यथेष्टचेष्टो विचरेत्प्रयोगा-
न्नरोभवेत्काञ्चनराशिगौरः ॥ ६८८ ॥
अनेन विद्वान् नरसिंहवीर्यो
दृढेन्द्रियो वीतगदः सुबुद्धिः ।
दन्ता विशीर्णाः पुनरेव दिव्याः
केशाश्च शुभ्राः पुनरेव कृष्णाः ॥ ६८९ ॥
नीलाञ्जनालिप्रतिमा भवन्ति
त्वचोविशीर्णाः पुनरेव भव्याः ।
विशीर्णकर्णाङ्गुलिनासिकोऽपि
कृम्यर्दितो भिन्नगलोऽपि कुष्ठी ॥६९०॥
शुष्कः पुनः स्याद्धतमूलशाख-
स्तरुर्यथा भाति नवाम्बुसिक्तः ।
बृहस्पतेरप्यधिको हि बुद्ध्या
ग्रन्थं विशालं च नवं करोति ॥ ६९१ ॥
गृह्णाति सद्यो न च विस्मृतिं च
करोति कल्पायुरनल्पवीर्यम् ।
कुर्वन्निमं कल्पमनल्पबुद्धि-
र्जीवेन्नरो वर्षशतं सुखी स्यात् ॥ ६९२ ॥

पा. व., यो. र., बृ. यो. त., रसायनाधिकारे ।

भाषा—जोर की हवा लगने से वृक्ष से झडे हुए भिलावों को बटोर कर ४ शेर लेना । ईटके छोटे २ टुकड़े और पानी के साथ उनको खूब मलकर वृन्त निकालकर धोकर सुखा लेना । फिर उन को फाड़कर दोदल अलग करके चौगुने जल मे पकाकर चतुर्थांश शेष रहने पर छान लेना । फिर ठंढा होने पर आठ सेर दूध और २ सेर घी मिलाकर अग्नि पर चढाना और कड़छे से चलाते रहना जब वह गाढा (खोवा) होकर अच्छी तरह भुन-

जावै तव २ सेर शक्कर डाल देना फिर उसमे त्रिकटु त्रिफला, कपूर, जटामांसी, निशोत, वंशलोचन, खैरसार, चंदन, अकरकरा, पीपल, कवाबचीनी, लौंग, दोनों प्रकार की मुसली, कंकोल, मोचरस, दोनों अजवाइन (देशी और खुरासानी) गजपीपल, विदारीकंद, जायफल, नागरमोथा, जावित्री, नन्दीवृक्षकी छाल, जीरा, अगुरु, समुद्रशोष, मेदा, महामेदा, लोह, पारा और बङ्ग इनकी भस्म और केसर इन सबको १ एक तोले मिलालेना और सातदिनतक उसको रहने देना यह अमृत से अधिक गुणकारी बन जावेगा ऐसा आचार्य लोग कहते हैं। सवेरे उठकर नित्यकर्म करके इस रस की पचसकने योग्य मात्रा लेना। इसके लिये अनुपान पथ्य धूप मे चलना और मैथुन करना इत्यादि का कोई परहेज नहीं है। इसको खाकर मनुष्य जैसी इच्छा हो वैसा काम करे इसका गुण कम न होगा। और मनुष्य का शरीर स्वर्ण पर्वत के समान चमकने लगेगा। इस के सेवन करने से मनुष्य विद्वान्, सिंह के सदृश बलवान् मजबूत इन्द्रियोंवाला और बुद्धिमान् होता है हिलते हुए दांत दृढ होते हैं, पके हुए बाल फिर से काजल और भौंरे के सदृश हो जाते हैं। लटकी हुई खाल बली रहित हो जाती है। जिस के कान, अंगुली और नाक गलगये हैं और जिस के शरीर मे कीडे पड गये हों ऐसा कोढी भी इस से फिर अच्छा हो जाता है। इस के सेवन से सूखा हुआ भी मनुष्य सूखे वृक्ष की जड मे पानी डालने से वह हरा भरा होजाता है वैसे ही तरुणता को प्राप्त होजाता है। और वृहस्पति के बराबर बुद्धिवाला होकर बडे २ ग्रन्थों को जल्दी पढ लेता है इच्छा होने पर स्वतन्त्र नवीन ग्रन्थको बना सक्ता है। पढे हुए ग्रन्थों को फिर कभी नहीं भूलता और बलवान् होकर शतायु हो जाता है। इस रसायन का कल्प करके मनुष्य सुखसे १०० वर्ष जीता है॥१७५॥

१७६ अमृतभस्मसूतः।

लोहस्य पात्रे त्रिदिनं रसेन्द्रं
गन्धेन तुल्यं त्रिफलाजलेन।
विमृद्य ताम्रस्य पुटे निविष्टं
मृदा च संलिप्य पुटेत पश्चात्॥ ६९३॥
फलत्रयं भृङ्गकृशानु शुण्ठी
बचासिता वाकुचिकाशताह्वा।
भल्लातगन्धाश्ममयूरतुत्थ
विषाणि चैतानि समानि कुर्यात्॥६९४॥
पूर्वोक्तसूतं तु कलाप्रमाणं
प्रक्षिप्य संसेवय वत्सरार्धम्।
कान्तोत्थपात्रे त्रिफलाजलेन
कुष्ठं लयं यात्यपि रोगसङ्घः॥ ६९५॥
पञ्चाङ्गनिम्बेन मधुत्रयेण
सेवेत यद्वा गदितं रसेन्द्रम्।
षण्मासयोगेन लयं प्रयाति
कुष्ठं प्रभूतं गतनासिकादि॥ ६९६॥
तदाततं वाकुचिकाफलैश्च
श्वित्राख्यरोगस्य निबर्हणाय।
भल्लाततैलं हरितालभस्म
युक्तं निषेवेत सुयुक्तितोऽपि॥६९७॥
र. दी.,

भाषा—पारा और गन्धक बराबर लेकर त्रिफला के साथ तीन दिन तक लोहे के खरल मे घोटकर तांबे की डिब्बी मे रखकर बाहर से कपडमिट्टी करके उसको पुट देदेना। फिर त्रिफला, भांगरा, चित्रक, सोंठ, बच (दोनों प्रकार की देशी और खुरासानी) बाकुची, शतावरी, भिलावा, गन्धक, नीलाथोथा और बछनाग सब को बराबर लेकर पीसकर उपरोक्त पुट दिया हुआ पारा १/१६ मिलाकर इस को कान्तलोह के बर्तन मे त्रिफला का क्वाथ करके उस के साथ खानेसे ६ महीने मे कुष्ठ नष्ट होता है। नीम का पचाङ्ग (पुष्प, पत्र, फल, बीज और छाल), शहद, घी और शक्कर के साथ ६

महीने तक इस का प्रयोग करने से कोढी के नासिका इत्यादि गिरे हुए अङ्ग अच्छे हो जाते हैं। बाकुची के फल अथवा भिलावें का तेल और हरतालभस्म के साथ इस के प्रयोगसे श्वित्र कुष्ठ नष्ट होता है ॥ १७६ ॥

१७७ अमृतमञ्जरी।

हिङ्गुलं च विषं चैव कणामरिचटङ्कणम्।
जातीकोषं समं सर्वं जम्बीररसमर्दितम् ६९८
रक्तिमानां वटीं कुर्यादार्द्रकद्रवसंयुताम्।
वटीद्वयं त्रयं खादेत्सन्निपातं सुदारुणम् ६९९
अग्निमान्द्यमजीर्णं च सामवातं सुदारुणम्।
उष्णतोयानुपानेन सर्वान् व्याधीन्नियच्छति ॥
कासं पञ्चविधं श्वासं सर्वाङ्गग्रहमेव च।
जीर्णज्वरं क्षयं चैव हन्यादमृतमञ्जरी॥७०१॥

र. सं., र. सु., र. चं. कासे।

भाषा—सिंगरिफ, वछनाग, पीपल, कालीमिर्च सुहागा और जायफल इन सब को बराबर लेकर जम्बीर के रस से बारीक घोटना फिर अदरखका रस मिलाकर एक २ रत्ती की गोलियें बना लेना इस की मात्रा २ अथवा ३ गोलियें हैं। भयानक सन्निपात, मन्दाग्नि, अजीर्ण और आमवात में गरम जलके साथ इसको खाने से उपरोक्त सभी रोग नष्ट हो जाते हैं। यह अमृतमञ्जरी गोली ५ प्रकार की खांसी, दमा, अंगों की जकड, जीर्णज्वर और क्षय को भी नष्ट करती है ॥ १७७ ॥

१७८ अमृतमण्डूरो रसः

मण्डूरस्य पलान्यष्टौ शतावर्या रसं तथा।
क्षीराज्यं दधि प्रत्येकं पिष्ट्वा पलचतुष्टयम् ॥
यावत्पक्वं, तदुत्तार्य निष्कैकं भोजयेत्सदा।
प्रातः सायं सदा खादेत् पक्तिशूलप्रशान्तये ॥
वातजं पित्तजं मिश्रममृताख्यो हि मृत्युजित्।

र. र., परिणामशूले।

भाषा—मण्डूर ३२ तोले, शतावरी का रस ३२ तोले दूध, घी और दही (गायका) हरएक १६ तोले लेकर सब मे मण्डूर को बारीक घोटकर कड़ा ही मे पकाना। जब पकजाय तब सबेरे और शाम ४ चार माशे खिलाने से परिणामशूल वातज, पित्तज और सन्निपातज शूल भी नष्ट हो जाते हैं और मनुष्य उपरोक्त रोगों से होनेवाली मौत से भी बच जाता है। इस का नाम अमृतमण्डूर है ॥ १७८ ॥

१७९ अमृतरसः

कर्षद्वयं गन्धकस्य तदर्धं पारदस्य च।
त्रिकटु त्रिफला मुस्ता विडङ्गं चित्रकं तथा ॥
एषां सञ्चूर्णितानाञ्च प्रत्येकं तु पलं क्षिपेत्।
एकनिष्कप्रमाणं तु लिह्यात्तन्मधुसर्पिषा ७०५
शीतोदकं चानु पिबेद्गव्यमाजं पयोऽथवा।
अम्लपित्तं चाग्निमान्द्यं परिणामभवं तथा ॥
कामलां पाण्डुरोगं च हन्यादमृतको रसः ॥

रसचिं, अम्लपित्ते।

भाषा—गन्धक २ तोला, पारा १ तोला और त्रिकटु, त्रिफला नागरमोथा, विडङ्ग और चित्रक इन को प्रत्येक ४ चार तोले डालकर खूब घोटना इसकी ४ मासे की मात्रा घी और शहद के साथ लेनी चाहिये। ऊपर से ठंढा पानी, गाय अथवा बकरीका दूध पीना चाहिये। यह अम्लपित्त मन्दाग्नि, परिणामशूल, कामला और पाण्डुरोग को हरता है इसका नाम अमृत रस है ॥ १७९ ॥

१८० अमृतरसायनम्।

गोमूत्रशुद्धं विषमूलमुत्तमं
धात्रीहतं कान्तमयोऽभ्रमाक्षिकम्।
तारं च वङ्गं रसभस्म हेमजं
प्रत्येकशः कर्षयुगप्रमाणकम् ॥ ७०७ ॥
विश्वं नतं चन्दनयुग्मखादिरौ
बलाश्वगन्धा मुशली शतावरी।
प्रत्येकशो राममिताक्षमानकं
धात्रीशिलाधन्वनतालमूलिकाः ॥७०८॥

शतावरीशाल्मलिका गुडूचिका-
श्यामाविदारीकिरिवृद्धदारुकाः ।
रसैरमीषां क्रमशो विभाव्य त-
द्विधाय माषोन्मितिकां वटीं भिषक्॥७०९॥
सद्वैद्यैरमृतरसायनं रसोऽयं
सम्प्रोक्तो विविधरुजां विनाशहेतुः ।
वर्णौजःप्रदमचिराद्रसायनं च
सेवित्वा ह्यमितबलं जना लभन्ते॥७१०॥
शुक्रं वर्धयति क्षयं क्षपयति
क्षीणाङ्ग पुष्टिप्रदः,
दुःसाध्यां ग्रहणीं तथाऽप्यतिसृतिं
दूरीकरोत्याशितः ।
क्लीबानां पुरुषत्वदो विषयिणां
संस्तम्भको रेतसः,
भुक्त्वैनं मधुशर्कराघृतयुतं
वृद्धो युवत्वं व्रजेत् ॥ ७११ ॥
स्वीयानुपानैरथवा तत्तद्रोगहरो ह्ययम् ।
देशकालग्रहीतॄणां नास्त्यत्र नियमःक्वचित्७१२

नृ. क.,

भाषा—अच्छी तरह गोमूत्र मे शुद्ध किया हुआ विषमूल (बछनाग), आंवले के रस से मारा हुआ कान्तलोह, लोहभस्म, अभ्रकभस्म, सोनामाखी चांदीभस्म, वंगभस्म, पारद और सोने की भस्म ये सब प्रत्येक १ तोला, सोंठ, तगरगंठोला, दोनों चंदन, खैरसार, खरेंटी, असगन्ध, मुसली और शतावरी ये सब प्रत्येक ३ तीन तोले लेकर, आंवला, मैनसिल, धामन, तालमूली, शतावरी, सेमर कामुसला, गिलोय, प्रियङ्गु, विदारीकंद, वाराहीकंद, विधारा, इन के रस अथवा क्वाथ से क्रम से (प्रत्येक से) भावना देना और उड़द के बराबर गोलियें बना लेना । अच्छे वैद्योंने इस रस का नाम अमृतरसायन रक्खा है। यह रस अनेक प्रकार के रोगों का नाश करता है। वर्ण और ओज को देता है जल्दी से बुढापे का नाश करता है । इस को सेवन करने वाला मनुष्य अपार बलसे युक्त होता है। यह रस वीर्य को बढाता है, क्षयरोग का नाश करता है, क्षीण अंगोंको पुष्ट करता है दुःसाध्य संग्रहणी और अतिसार को दूर करता है, नपुंसक भी इस के सेवन से पुरुषत्व का उपभोग करता है । विषयी लोगों के लिये यह बडा स्तम्भन करने वाला है । घी, शक्कर और शहदके साथ इसको खाने से बूढा भी जवान हो जाता है और उचित अनुपान के साथ इस का सेवन किया जाय तो यह सभी रोगों को नष्ट करता है । देश काल और किसी प्रकार की रोगों की अवस्था इसके लिये अपेक्षित नहीं है ॥ १८० ॥

१८१ अमृतरसायनम्
(विषरसायनम्)

गोमूत्रशुद्धामृतकर्षमाहरे-
त्तथैव ताराकभवं शिवाहतम् ।
रक्तोत्पलाभं शिववीर्यमद्भुतं
घृतादिसंशोधितहिङ्गुलं क्षिपेत् ७१३
प्रत्येकतः कर्षयुगं सुचूर्णकं
व्योषाच्चतुर्जातकचित्रमूलकात् ।
निष्पिष्य निष्पिष्य विभावयेदथो
वरीविदारीक्षुरचित्रमूलजैः ॥७१४॥
कृत्वाऽस्यगुञ्जाद्वयमानयुक्ताः
वटीरनेकामयनाशिनीस्ताः ।
तत्सेवनाद्वर्णबलायुरोजो
रेतांसि वृद्धिं नियतं लभन्ते॥७१५॥
संदीप्यते ऽग्निर्ग्रहणी विसूची
तथातिसारश्च विनाशमेति ।
भुक्त्वा वटीं तां ललनासु सक्तो
वृषायतेस्तम्भितवीर्यसारः ॥७१६॥

नृ. क.,

भाषा—गोमूत्र मे शुद्ध किया हुआ बछनाग १ तोला, पारा और गन्धक से मारी हुई चांदी और वैसा ही तांबा एक १ तोला, रससिन्दूर २ तोले, घृतादि से शोधा हुआ शिंगरिफ २ तोले, (भिलावा, मालकांगनी और निर्मोली प्रत्येक ८ तोले लेकर

इन का कल्क करके कड़ाही मे नीचे और ऊपर रखकर बीच मे शिंगरिफ २ तोले को रख देना और ऊपर से घी और शहद प्रत्येक ६४ तोले डालकर नीचे से मंदी आंच देना। जब आग ऊपर आकर घी और शहद सब जलजाय तब बीच का शिंगरिफ निकाल लेना इस प्रकार यह शोधा जाता है) सबको मिलाकर चूर्ण कर लेना फिर त्रिकटु, चातुर्जात, चित्रकमूल, शतावरी, विदारीकंद, तालमखाना और लाल चित्रक के क्वाथ से अलग अलग भावना देना। और २ दो रत्ती की गोलियें बना लेना। यह गोली अनेक रोगों का नाश करनेवाली है और बल, वर्ण आयु, ओज और वीर्य को वढाती है तथा जठराग्निको प्रदीप्त करती है संग्रहणी, हैजा और अतिसार को नष्ट करती है इस गोली को खाकर पुरुष सांड के सदृश स्त्रियों मे आसक्त होता है। और उसके वीर्य का स्तम्भन भी होता है॥ १८१॥

१८२ अमृतरसेन्द्रोरसः।

शुद्धपारदमादाय विषेण सह मर्दयेत्
दिनत्रयं प्रयत्नेन पादांशेन रसस्य तु॥७१७॥
जम्बीराम्लसमायुक्तं मातुलुङ्गरसेन वा।
ततस्तं पातनायन्त्रे चोर्द्धमुत्पातयेद्रसम् ७१८
पुनश्चानेन विधिना मर्दयित्वाऽथ पातयेत्।
कुर्यादित्थं पातनादि दशवारांस्ततः परम्॥
कलांशं जारयेत्स्वर्णं विषचुल्लिकयोगतः।
जम्बीराद्यम्लयोगेन मर्दनेनैव जारयेत्॥७२०
ततोऽमृतजले गन्धं सप्तकृत्वो विभावयेत्।
तं दानवेन्द्रं सूतेन्द्रे जारयेत्क्रमशः शनैः॥
पञ्चगुणं च ततः क्षारे रुक्मलोहभवं रसम्।
मर्दयेदतियत्नेन तस्य निर्यासतश्च वै॥७२२॥
ततः सोमानले यन्त्रे रसेन्द्रं तं निवेशयेत्।
अथवा कच्छपे यन्त्रे ततोऽग्निं ज्वालयेत्क्रमात्॥
दिनपञ्चकमादत्य स्वाङ्गशीतं ततो नयेत्।
निर्भिद्य यन्त्रं गृह्णीयाद्भस्मीभूतं रसेश्वरम्॥
भस्मसूतस्य पादेन सिद्धं ताम्रं विनिःक्षिपेत्।
सर्वदोषविनिर्मुक्तं वान्तिभ्रान्त्यादिवर्जितम्॥
दैत्येन्द्रं वत्सनाभेन भावितं सूतसाम्यतः।
क्षिप्त्वा तत् त्रितयं खल्वे मर्दयेद्विपवारिणा॥
तत्र शौण्डी च मरिचं शुण्ठी चैव पृथक् पृथक्।
रससाम्येन संदद्याद्विषं रससमांशतः॥७२७॥
दद्यात्तु देवकुसुमं रससाम्येन तत्र वै।
तत्सर्वं मर्दयेद्यत्नाद्दिनत्रयमतन्द्रितः॥७२८॥
रक्तच्छागस्य पित्तेन चाभावे मेषकस्य वै।
वनकासरजैः पित्तैः नीलकण्ठभवैस्तथा ७२९
रोहितापृचरजैः पित्तै रोहितोत्थैश्च हारिणैः।
इत्येवमाद्यैः संमर्द्य कृष्णसर्पभवैर्विषैः॥७३०॥
भावयित्वा वटीः कुर्यान्मरिचस्य प्रमाणतः।
छायाशुष्कास्ततः कृत्वा भैरवं पूजयेत्ततः॥
योगिनीसहितं पश्चाद्वटीं यत्नेन धारयेत्।
सन्निपाते प्रवृद्धे तु वटिकां तत्र योजयेत्॥
व्योषार्द्रकरसैर्युक्तां तदेव ह्यनुपाययेत्।
सिञ्चेच्छिरसि तोयानि सुशीतानि बहून्यपि॥
यावत्सञ्जायते कम्पः सर्वाङ्गीणोऽस्य रोगिणः
ततः पश्चात्प्रदातव्यं पथ्यं दधिसमन्वितम्॥
इक्षुखण्डादियोगश्च सर्वोऽप्यत्र विधीयते।
ग्रहण्यां वटिकां खादेदेकैकां च दिनेदिने॥
त्रिमासाभ्यन्तरे हन्ति ग्रहणीरोगमुद्धतम्।
सर्वज्वरविकारेषु वटीमेकां प्रयोजयेत्॥७३६॥
मुस्तापर्पटजं क्वाथमनुपानेच पीयते।
क्षयरोगे च धारोष्णसहितां सम्प्रयोजयेत्॥
कुष्ठेषु खदिरक्वाथैर्वाकुचीबीजसंयुताम्।
सर्वार्शसां विकारे तु कुटजारुष्करैर्युताम् ७३८
भगन्दरे गिरिजतुसहितां सम्प्रयोजयेत्।
प्रमेहेष्वथ सर्वेषु व्योषवासकसंयुताम्॥७३९॥
पाषाणभेदसंयुक्तामश्मरीषु नियोजयेत्।
प्लीहगुल्मविकारे तु शङ्खक्षारेण संयुताम्॥
कणगुग्गुलुलोहैश्च पाण्डुरोगान्निवारयेत्।
उदरोत्थविकारेषु करभीक्षीरसंयुताम्॥७४१॥

जयपालरजोभिर्वा संयुक्तां विनियोजयेत्।
मन्दाग्नौ वटिका देया केवलैव सुबुद्धिना७४२
विसूचिकायां दातव्या वटिका व्योपसंयुता।
एतस्याभ्यासयोगेन वलीपलितजिन्नरः ७४३
वत्सरद्वितयेनैव सर्वरोगाञ्जयेन्नरः।
निम्बूरसेन संयुक्ता रुचकेन समन्विता॥७४४॥
इत्थं नियोजितः सूतः सर्वान् रोगान् विनाशयेत्
त्रिवर्षाभ्यन्तरे हन्ति दौर्गन्ध्यं देहसम्भवम्॥
चतुर्हायणयोगेन न विषेण विपद्यते॥
स्थाणुना जङ्गमेनापि कृत्रिमेणापि वा पुनः।
इत्येषोऽमृतसूतेन्द्रो विषकल्पनिरूपितः।
सम्प्रदायान् मया लोकहितायात्र प्रकाशितः॥
दृष्टप्रभावः सर्वेषां रोगाणां विनिवारणे॥
रसाल.,

भाषा—शुद्ध पारे को लेकर उसके बराबर बछनाग मिलाकर पारे के , जम्बीर के अथवा बिजोरे के रस मे ३ दिनतक घोटना फिर ऊर्ध्व-पातन यन्त्र से पातन करना इसी प्रकार फिर मर्दन करके पातन करना। दसवार ऊर्ध्वपातन करके उस में $\frac{1}{16}$ सोना डालकर विषचुल्ली के योग से और जम्बीर आदि के योग से केवल घोटकर जारित करना फिर पारे से षड्गुण गन्धक लेकर बछनाग के रस अथवा क्वाथ से ७ वार भावना देना। उस गन्धक को धीरे २ पारे मे जारित करना फिर रुक्मलोह की भस्म और बछनाग के रस अथवा क्वाथ से भावना देना फिर उस पारे को सोमानल यन्त्र मे अथवा कच्छपयन्त्र मे रखना उसके नीचे ५ दिन तक क्रम से मन्द, मध्य, तीक्ष्ण अग्नि जलाना फिर स्वांगशीतल होनेपर अलग निकालकर यन्त्र को तोड़कर भस्म हुए पारे को निकाल लेना। फिर वान्ति भ्रान्ति आदि सब दोषों से रहित तांबा पारे की भस्म से $\frac{1}{4}$ उस मे मिलाना और पारे के बराबर बछनाग मिलाना और सबको खरल मे डालकर बछनाग के क्वाथ से भावना देना। फिर गज पीपल, कालीमिर्च, सोंठ, सब को मिलाकर पारे के बराबर उस मे मिलाना और लौंग भी पारे के बराबर मिलाकर ३ दिन तक घोटना फिर लाल बकरा या मेंढा, जंगली भैंसा नीलकण्ठ रोहू (मछली विशेष) हरिण विशेष तथा काले सांप के पित्तों से अलग २ एक एक दिन भावना देना और कालीमिर्च के बराबर गोलियें बना लेना और उन को छाया मे सुखाना फिर योगिनियों के सहित भैरव की पूजा करके स्वच्छ वर्तन मे गोलियों को रख देना। सन्निपातज्वर बहुत बढा हुआ हो तब उन गोलियों को त्रिकटु के रस मे मिलाकर देना और ऊपर से उसी का रस पिलाना और रोगी के सिर पर खूब ठंढे पानी की धार तब तक देना जब तक उस का सारा शरीर कांपने न लग जाय फिर उस को दहीभात का पथ्य देना इस रस के खाने मे ईख के टुकडे रोगी को देने चाहियें। संग्रहणी मे इस रस की एक एक गोली रोज खानी चाहिये तीन महीने के भीतरही असाध्यप्राय संग्रहणी भी अच्छी हो जाती है, सभी प्रकार के ज्वरों मे इसकी एक एक गोली देनी चाहिये और नागरमोथा तथा पित्तपापडे का क्वाथ अनुपान देना चाहिये। क्षयरोगवालों को धारोष्ण दूधके साथ यह गोली देनी चाहिये। कुष्ठ रोग मे खैर के क्वाथ के साथ तथा बाकुची के बीजों के साथ देनी चाहिये। सब प्रकार की बवासीर मे यह रस कुटज (कुडा) और भिलावें के बीज के साथ देना चाहिये। भगन्दर मे शिलारस (शिलाजीत) के साथ देना चाहिये। सम्पूर्ण प्रमेहों मे त्रिकटु और अडूसे की जड़ के साथ देना चाहिये। अश्मरी (पथरी) रोग मे पाषाणभेद के साथ प्लीहा और गुल्मरोग मे शंखक्षार (शंखभस्म) के साथ, पाण्डुरोग मे पीपल, गुग्गुलु और लोहभस्म के साथ, पेट के विकारों में ऊंटिनी के दूध अथवा शुद्ध जमालगोटे के चूर्ण के साथ, मन्दाग्नि मे

केवल गोली देना और हैजे मे त्रिकटु के साथ इस को देना। जो मनुष्य नींबू का रस और रुचक (एक प्रकार का काला नमक) मिलाकर इस गोली को रोज खाता है वह दो वर्ष मे ही बली पलित से रहित हो जाता है। तीन वर्ष मे उस के देह की दुर्गन्धि दूर हो जाती है। चार वर्ष तक इस गोली को खानेवाले को कभी विष (स्थावर-जंगम) नहीं लगता (सांप इत्यादि काटे तो भी नहीं मरता) यह अमृत सूतेन्द्र रस विषकल्प मे बताया है हमने सम्प्रदाय से लोकहित के लिये प्रकाशित किया है। सभी रोगों को नष्ट करने मे इस का प्रभाव प्रत्यक्ष देखा गया है॥ १८२॥

१८३ अमृतलोहः

अमृता त्रिवृता दन्ती श्रावणी खदिरो वृषः।
चित्रको भृङ्गराजश्च कोकिलाक्षः सपुष्करः॥
पुनर्नवा बला कासशिग्रुमोरटदारुकाः।
स्नुह्यरुष्कौ शरो दर्भः कुशः शृङ्खलिका वरी॥
गवाक्षी वरुणः कन्दश्चविका तालमूलिका।
कणामूलं नागबला कुष्ठं ब्राह्मणयष्टिका ७५०
पलोन्मितानि चैतानि जलद्रोणे विपाचयेत्।
अष्टभागावशिष्टं तु कषायमुपकल्पयेत्॥७५१॥
त्रिफलायास्तथा प्रस्थं जलाष्टगुणपाचितम्।
तस्मादष्टावशिष्टस्तु कषायस्तु परिस्रुतः ७५२
शिलया निहतस्यापि पुटितस्य यथाविधि।
अयसश्चर्णितं पूतं पलषोडशसम्मितम्॥७५३॥
पलान्यभ्रस्य चत्वारि तावन्ति गन्धकस्य च।
द्वे पले च रसस्यापि शोधितस्य विधानतः॥
गुडस्य च पलान्यष्टौ सिताया वाऽथ पैत्तिके।
रक्तपित्तेऽथ खण्डस्य मत्स्यण्ड्या वाऽपिकार्पिकैः
गुग्गुलोर्द्विपलं दत्वा प्रस्थार्धं सर्पिषस्तथा।
एवं पाकविधिज्ञस्तु पचेल्लोहं समाहितः॥
शीतेऽवतार्य मधुनः क्षिपेदष्टपलं भिषक्।
माक्षिकस्य विशुद्धस्य द्विपलं रजसः क्षिपेत्॥
शिलाजतु तथा शुद्धं पलार्धं सम्मितं पृथक्।
अर्धपां प्रक्षिपेच्चूर्णं पलमात्रं पृथक् पृथक्॥
त्रिकटु त्रिफला दन्ती त्रिवृता जीरकद्वयम्।
गायत्रीसारतालीसौ धान्यकं मधुयष्टिका॥
पूतं रसाञ्जनं शृङ्गी चित्रकं तान्त्रवस्तुतम्।
चातुर्जातककङ्कोलं लवङ्गं जातिकाफलम्॥
द्राक्षाखर्जूरकं चूर्णं पलार्धसम्मितं पृथक्।
एषो लोहवरः श्रीमान् सर्वव्याधिप्रणाशनः॥
यत्रयत्र प्रयुञ्जीत तत्तदाशु विनाशयेत्।
अम्लपित्ते रक्तपित्ते क्षये कुष्ठे ज्वरेऽरुचौ॥
दुर्नाम्नि चोदरे शूले ग्रहण्यां चामवातके।
वातरक्ते मूत्रकृच्छ्रे प्रमेहे शर्करागदे॥७६३॥
अस्योपयोगान्मनुजस्तारुण्यमधिगच्छति।
ब्रह्मचर्येण कुर्वीत प्लुतं माक्षिकसर्पिषा॥७६४
माषकं रक्तिकावृद्ध्या यावदष्टौ च माषकान्।
वर्जयेद्द्विदलं सर्वं मांसं चानूपसम्भवम्॥७६५
ककारपूर्वकं सर्वं प्रयत्नेन विवर्जयेत्।
अमृताख्योऽवलेहोऽयं सर्वत्रैवोपयुज्यते॥
अनेन जन्तवः स्वस्था भवन्तीति विनिश्चितम्॥

र. र., र. सु., र. का., यो. म., रक्तपित्ताधिकारे।

भाषा—गिलोय, निशोत, दन्ती, गोरखमुण्डी, खैरसार, अडूसा, चित्रक, भांगरा, तालमखाना, पुष्करमूल, पुनर्नवा, बला, कास (कुशके सदृश घास) सहजना, मोरट, (लता करंज) देवदारु, थूहर, भिलांवा, सरकंडा, डाभ, कुश, शृंखलिका, (हडजोड या जोडतोड) शतावरी, इन्द्रायण, वरुण सूरण, चव्य, कालीमुसली, नागबला, पीपलामूल, कूठ और पलाश इन को प्रत्येक चार चार तोले लेकर १६ सेर पानी मे क्वाथ बनाना। जब अष्टमांश पानी बचजाय तब एक सेर त्रिफला को अठगुने पानी मे उबालकर जब सेर भर पानी रह जाय तब उस को छान कर उपरोक्त क्वाथ मे मिला देना फिर मैनसिल से मारा हुआ और पुट दिया हुआ लोहचूर्ण और शंखभस्म प्रत्येक बत्तीस बत्तीस तोले, अभ्रकभस्म १६ तोले, गन्धक १६ तोले, शुद्ध-

पारा ८ तोले और गुड ३२ तोले अथवा पित्तोद्भव रोगों के लिये बनाना हो तो उतनी ही गुड की जगह मिश्री डालनी चाहिये। यदि रक्तपित्तोद्भव रोगों के लिये बनाना हो तो उतनी ही मिश्री के वदले चाशनी अथवा राब मिलानी चाहिये और आठतोले गुग्गुल और ½ सेर घी मिलाना चाहिये । इस प्रकार सभी चीजों को मिलाकर इस लोह को पाकविधि जाननेवाला वैद्य सावधानी से पकावे । जब ठंढा हो जाय तब ३२ तोले शहद मिला देना फिर शुद्ध सोनामाखी का चूर्ण ८ तोले, शुद्ध शिलाजतु २ तोले और त्रिकटु त्रिफला, दन्ती, निशोथ दोनों जीरे, खैरसार, तालीसपत्र, धनियां, मुलेठी, शंख का चूना, रसौत, काकडासींगी, चित्रक, शिलाजीत, चातुर्जात, कंकोल, लौंग, जायफल, दाख और पिण्डखजूर इन को प्रत्येक ४ चार तोले और चूना (पान मे लगाने का) २ तोले मिलाना। यह श्रेष्ठ लोहासव रोगों को नाश करने वाला है जिस रोग मे इसका प्रयोग करो उसी का जल्दी नाश करता है । रक्तपित्त, अम्लीपत्त, क्षय, कोढ, ज्वर, अरुचि, दुर्नाम (अर्श) उदरशूल, संग्रहणी, आमवात, वातरक्त, मूत्रकृच्छ्र, प्रमेह, और शर्करारोग (पथरी की विशीर्णावस्था) इन मे इस का प्रयोग होता है । इसके उपयोगसे बुड्ढा मनुष्य भी जवान हो जाता है इस रस को घी और शहद मे मिलाकर खाना और १ मासे से १ एक रत्ती बढाना जबतक कि मात्रा आठ मासे की न हो जाय । ब्रह्मचर्य के साथ इस का सेवन करना चाहिये । इसके सेवन करने मे सभी दाल और अनूप देशमें होने वाले मृग और पक्षियों का मांस तथा जिस पदार्थ मे "क" अक्षर पहिले आता है वह सब छोड देने चाहियें यह अमृतलोहावलेह है । इस का सभी जगहों मे उपयोग किया जा सकता है इस से मनुष्य निरोग हो जाते हैं इस मे कुछ संदेह नहीं है ॥ १८३ ॥

१८४ अमृतवटी (प्रथमा)

कुष्ठगन्धविषव्योषत्रिफलापारदैः समैः ।
भृङ्गाम्बुमार्दिता मुद्गमानाऽमृतवटीशुभा ॥
अजीर्णश्लेष्मवातघ्नी दीपनी रुचिवर्धनी ७६७

र. स., र. चि., र. सु., र. चं., रसायन सं., र. का., ध., यो. म., बा., अजीर्णाधिकारे ।

भाषा—कूठ, गन्धक, बछनाग, त्रिकटु, त्रिफला, और पारा इन सब को बराबर लेकर भांगरे के रस मे घोटकर मूंग के बराबर गोलियें बना लेना यह अमृतवटी है । अजीर्ण, कफ, और वातरोग को हरती है दीपन और रुचिकर है ॥ १८४ ॥

१८५ अमृतवटी (द्वितीया)

अमृतवराटकमरिचैस्त्रिपञ्चनवभागकैः क्रमशः
वटिका मुद्गसमाना वातश्लेष्मत्रिदोषमानहरी॥

र. सु., र. सि., र. का., भै. र., नि. र., ज्वराधिकारे, यो. र.. नि. र.अनयोः अमृतकलानिधि इति नाम। टो. त्रिपुरभैरव नाम

भाषा—बछनाग ३ भाग, कौडीभस्म ५ भाग कालीमिर्च ९ भाग इन सब को घोटकर मूंग के बराबर गोलियें बनाना यह वात कफ और त्रिदोष को हरती है ॥ १८५ ॥

१८६ अमृतसुन्दरो रसः

मनःशिला माक्षिकतालगन्धं
सूतं तथा खर्परमेव तुल्यम् ।
सम्मर्दितं चार्द्ररसेन सम्यग्
वासारसैर्वै सुरसारसेन ॥ ७६९ ॥
आपूरितं ताम्रजपात्रमध्ये
तत्सम्पुटे वै त्रिदिनं प्रपाचयेत् ।
तं स्वाङ्गशीतं हि समुद्धरेद्वै
वल्लोन्मितं तं परिभक्षयेच्च
वातोद्भवान् हन्ति समस्तरोगान्
तथा समस्तान्कफजान् विकारान् ७७०

र. प्र. सु.,

भाषा—मैनसिल, सोनामाखी, हरताल, गन्धक, पारा और खपरिया सब को बराबर लेकर अदरख, अडूसा और तुलसी के रस मे घोटकर तांबे के मूषायन्त्र मे भरकर तीन दिनतक पुट देकर पकाना। ठंडा होनेपर निकाल लेना इसकी मात्रा ३ रत्ती की है। यह रस वात और कफ से होने वाले सभी रोगों को नष्ट करता है॥ १८६ ॥

१८७ अमृतसञ्जीवनरसायनम्।

अमृतोशीरकं निम्बं मत्स्याक्षी चाटरूपकम्।
गोक्षुरं मुद्गपर्णी च शाल्मली च शतावरी॥
पृथक् प्रस्थमितं छित्वा जले वसुगुणे पचेत्।
अष्टभागावशेषे तु गुडप्रस्थं ततः क्षिपेत्॥
वासाशतावरीधात्रीमीनाक्षीसर्पिभिः पचेत्।
शीतले च घृते योज्यं बालयुग्मं निशायुगम्॥
मुस्ताद्वयं शटी भार्गी श्रीखण्डद्वितयं तथा।
त्रिजातकं त्रिकटुकं त्रिफला केसरत्रयम् ७७४
तवक्षीरी चोरकं च मुशली चाश्वगन्धिका।
पाषाणभेदि धान्याकाटरूपं दाडिमीभवम्॥
खर्जूरयष्टिमधुकं द्राक्षानीलोत्पलं तथा।
कर्पूरं च शिलाधातुं सुगन्धं च पृथक् पिचुम्॥
सर्वं सञ्चूर्ण्य यत्नेन सितां मधु च मिश्रयेत्।
ब्राह्मणं स्वगुरून्देवानर्चयित्वा यथा क्रमम्॥
खादितं कर्षमात्रं तु लघ्वन्नं पथ्यमाचरेत्।
नाशयेद् बहुमूत्रं च बद्धमूत्रं प्रवाहिकाम्॥
स्रावं सशर्कराघातं प्रमेहं सर्वदोषजम्।
अश्मरीं मूत्रकृच्छ्रं च चिरकालोत्थितां तृषाम्॥
प्रदरं करपादाङ्गमहादाहं त्रिदोषजम्।
रक्तपित्तं चाम्लपित्तं योनिरोगमसृग्दरम् ७८०
लिङ्गदोषं शुक्रदोषं पण्ढत्वं पलितं सदा।
रक्तोद्गारं महापैत्यं पित्तवर्णं भ्रमं तथा ७८१
कासं श्वासं पीनसं च वैवर्ण्यं क्षीणतां पराम्।
सर्वाङ्गवातं पङ्गुत्वं धनुर्वातं च शुष्कताम्॥
क्षयप्रदरमुन्मादमपस्मारं बलक्षयम्।
वन्ध्यरोगं रक्तगुल्मं पक्षाघातापबाहुकम्॥
सदालापं कोपनत्वं बुद्धिभ्रंशं व्रणादिकम्।
सर्वज्वरहरं श्वेतरसर्वातीसारनाशनम्॥
इदं ब्रह्ममुखोद्भूतं सेवितश्चामृतोपमम्॥ ७८४
धा.,

ध्मातो भस्मत्वमायाति शुद्धः कर्पूरसन्निभः।
गुरुमार्गेण संसेव्यः फिरङ्गान्तकरो रसः ३१४॥
गोधूमचूर्णमध्यस्थं कृत्वा शोथन्न विन्दति।
दन्तस्पर्शो यथा न स्यात्तथा तमम्भसा गिलेत्

र. कौ., र. सं., र. म., यो. म., ना. वि., र. चं., फिरङ्गे।

टि०—रसमञ्जर्यां भृङ्गजद्रावैरित्यस्य स्थाने भृगजद्रावैरिति पाठो दृश्यते, तत्र लेखकप्रमादात् संवृत्तश्चेत्तदा तु तत्र न कापि चर्चा; यदातु मन्यकारेण ज्ञात्वैव पाठो लिखितस्तर्हि भृगजशब्देन भूनागा ग्राह्यास्तच्छरीरवर्तिशुद्धताम्रस्य सत्वेन तस्य केवलस्यापि कुष्ठादिहरणेऽव्याहतशक्तिमत्वात् तदानं भद्रताकरमेव। रसेन्द्रसारसङ्ग्रहे दिनैकं च धमेत्पुनः इत्यस्य स्थाने दिनं सम्पुटमागतः इति पाठो दृश्यते, स च साधीयानिति विस्पष्टमेव।

भाषा—सुहागा, शहद, लाख, ऊन, गुञ्जा, गुड़ और पारा येसबसमभागलेकर खरलमे घोटना फिर भांगरेकेरससे एकदिनभावना देकर अन्धमूषामे रखकर धमनकरना। जब मूषामे सफेद लपटनिकलने लगे तभी उतारकर रखदेना, शीतल होनेपर कपूरके समानसफेदभस्म निकालकर रखलेना। रसतत्त्ववेत्ता श्रेष्ठवैद्योंके कथनानुसार इसफिरङ्गनाशक रसका सेवनकरना, अन्यरसकपूरोंके खानेकाजो विधानहैउसतरह खानेसेमुंहमे शोथनहींहोताजैसे गेहूंके आटेकी वा लौगकी कूपिकामे लपेटकर। इसकी पानीकेसाथ इसतरह निगलनाचाहिये कि यह रस दांतोंको न लगे॥ ७५॥

७६ कर्पूररसः (दशमः)

कर्पूरकं शङ्करवीर्यजातमेलालवङ्गोपणजातपत्र्यः
आर्द्रस्य नीरे त्रिदिनं विमर्द्य
टङ्कप्रमाणास्य वटी प्रयुक्ता॥३१६॥
आवेष्ट्य नित्यं घृतमाक्षिकाभ्यां
दुग्धौदनं पथ्यमलं प्रकुर्वन्।
नरस्य कुर्याच्च मनोजरोग-
फिरङ्गरोगादिविनाशमाशु॥३१७॥

चि. क., उपदंशे।

भाषा—रसकपूर, इलायची, लौंग, त्रिकुटु, जावित्री, येसब समभागलेकर खरलमे बारीकचूर्णकरना फिर अदरखके रसको ३ दिनतक भावना देकर चार ४ माशेकी गोलियें बनालेना। इनमेंसे प्रतिदिन १ गोली घृत और शहदमे लपेटकर खाना पथ्यमे दूधचावलखाना, इससे उपदंश (फिरङ्ग) वगैरहरोग बहुतशीघ्र नष्टहोतेहैं॥ ७६॥

७७ कर्पूररसः (एकादशः)

पिष्टं पांशुपटुप्रगाढममलं वज्र्यम्बुना नैकशः,
सूतं धातुयुतं खटीकवलितं तं सम्पुटे रोधयेत्।
अंतःस्थं लवणस्य तस्यच तले प्रज्वाल्य वह्निं हठा
द्भस्म ग्राह्यमथेन्दुकुन्दधवलं भस्मोपरिस्थं शनैः।
तद्वल्लद्वितयं लवङ्गसहितं प्रातः प्रभुक्तं नृणा,
मूर्ध्वं रेचयति द्वियाममसकृत्पेयं जलं शीतलम्।
एतद्धन्ति च वत्सरावधिविषं षण्मासिकं मासिकं
शैलोत्थं गरलंमृगेन्द्रकुटिलोद्भूतञ्चतात्कालिकम्

र. सं., र. म., र. क., र. सा., यो. म., र. मु., र. का., र. चं., रसकामधेनावेकस्मिन् स्थाने सुधानिधिरितिनाम स्थापितम्।

भाषा—रेतेकानमक (अभावमे रेह) और पारा समभाग लेकर सेहुण्डके दूधकेसाथ खूब घोटकर गोला बनालेना, खड़ियामिट्टीकीमूषाबनाकर उसमे गेरू नीचे बिछाके ऊपर गोलेको रखदेना और ऊपरदूसरेगेरूसेढककर दूसरेखड़ियाके मूषेसे बन्दकरदेना। और उसे (मूषाको) हांडीके भीतर रखकर ऊपरसे नमकसे ढककर मुंहघिसीहुई दूसरीहांडी ऊपरसे उल्टीरखकर कपड़मिट्टीसे सन्धि बंदकरदेना। सूखनेपर हांडीको चूल्हेपर रखकर दोदिनतक तीव्र अग्निदेना, शीतलहोनेपर ऊपरलगीहुई चन्द्रमाके समानउज्ज्वल भस्मको लेकर रखलेना। इसरसमेसे ६ रत्तीलेकर ७–८

लौंगको पानीमे पीसकर कूपीजैसीबनाकर उसमे रखकर प्रातःकालखाना । दोपहरतक या दोपहरके-बाद इससे जुलाब होगा और प्यासलगेगी तबबारम्बार थोड़ाथोड़ा ठंढा पानी पीना चाहिये । इसके सेवनकरनेसे १ वर्ष, ६ महीना १ महीनासे शरीरमे रहाहुआ विष, शैलोत्थविष (सोमल हरिताल वगैरह) सर्पविष और बिगड़ेहुए सिंहकी दंष्ट्रादिजातविष, बनावटीविष येसब नष्ट होजातेहैं ॥ ७७ ॥

७८ कर्पूरोरसः(द्वादशः)

खटीष्टिगैरिकावल्मीमृत्तिका सैन्धवं समम् ।
भागद्वयमितो गन्धो रसभागद्वयं स्मृतम्३२०॥
हण्डिकायां विनिःक्षिप्य पार्श्वपार्श्वे च खर्परान् ।
दत्त्वाऽथ हण्डिकां दत्त्वा द्विरष्टप्रहरं पचेत्३२१
मृतसूतं तु गृह्णीयाच्छुद्धकर्पूरसन्निभम् ।
कल्कादिवेष्टितं कृत्वा निर्गिलेदुपदंशके ३२२॥

र. मं., यो. म., टो., रस चि., उपदंशे ।

टि०-रसचिन्तामणौ भागद्वयमितो गन्धो रसभागद्वयं स्मृतम् इत्यत्र भागत्रयमिदं श्लक्ष्णं रसो भागद्वयोन्मितः इति पाठो दृश्यते तत्रैव, फलभागे " पुष्ट्यारोग्यप्रदं तीक्ष्णं कामनीयं सुखावहम् । बलप्रदं विशेषेण दीर्घायुःकारकं परम् ॥ इदमेकसहो भस्म गृह्यतां राजवल्लभम् । हन्ति सर्वामयांश्चैतयद्वद्रं तत्प्रकाशितम् ॥ इति विशेषः ॥

भाषा—खड़ियामिट्टी, ईंट, गेरू, दीमककी मिट्टी, सेन्धानमक येसब एक २ भाग, शुद्धपारा और गन्धक प्रत्येक दो २ भाग, इनसबको खूब बारीक मर्दनकरके कपड़मिट्टी कीहुई हंडीमे बिछादे। इसके ऊपर नवीन खपड़े ढकदे और दूसरी हांडीका मुँह घिसकरउसकेउपर उल्टी रखकर ३-४कपड़मिट्टी देकर सन्धिबंद करदेना फिर चूल्हेपर चढ़ाकर क्रमसे मन्द, मध्य और खर इसप्रकार १६ पहर अग्निदेना। स्वाङ्गशीतलहोनेपर बहुत आहिस्तेसे यन्त्रका मुंह उघाड़कर ऊपरलगेहुए रसको धीरजसे निकाले। यदि ऊपरसे गिरकर खपड़ोंपर पड़जायतो उसकोभी लेलेना इसीलिये ये खपड़े हंडीमे दिये जाते हैं इनका औरकोई प्रयोजननहीं है ॥ ७८ ॥

७९ कर्पूरोरसः (त्रयोदशः)

नवभागो भवेत्सूतः स्फटिका दशभागिका ।
पटोरेकादशप्रोक्ताः खटचाश्च द्वादश क्रमात्
सिन्धोस्त्रयोदशं भागं जम्बीराम्लेन मर्दयेत् ।
पातनायन्त्रयोगेन यामकानां चतुष्टयम् ३२४॥
गुञ्जामात्रं तु दातव्यं लवणाम्लविवर्जितम् ।
सर्ववातोद्भवान् रोगान् व्रणरोगानशेषतः ॥
निहन्ति सप्तरात्रेण योगोऽयममृतोपमः ३२५

वृ. यो. त., बा., र. र. कौ., उपदंशे ।

भाषा—पारा ९ भाग, फिटकड़ी १० भाग, खारीनमक ११ भाग, खड़ियामिट्टी १२ भाग, सैन्धव १३ भाग., इनसबको इकट्ठेकर जम्भीरीके रससे १ दिनमर्दनकरके सुखालेना फिर कपड़-मिट्टीकीहुई हांडीमे डालकर मुंहबन्दकर चार-पहरकी अग्निदेना । स्वाङ्गशीतलहोनेपर निकालकर १ रत्तीभर इसको लौंग वगैरह किसीभी चीज़मे कवलितकरके देनेसे समस्तवायुरोग और तमामव्रण इनको यह सातरोज़मे नष्टकरताहै । यह अमृतके जैसायोगहै इसमे नमक और अम्लपदार्थ वर्जित हैं ॥ ७९ ॥

८० कर्पूरोरसः (चतुर्दशः)

सैन्धवञ्च नवसारटङ्कणं
स्फाटिकेयपिचुना नियोजितम् ।
शुद्धपारदपलैकमात्रकं
चित्रमूलरसमर्दितं दिनम् ॥३२६॥
पात्रनिहितं पिधाय बुद्धिमाँ-
ल्लवणवालुकायन्त्रमध्यगम् ।
पाचयेद्भवति वासरार्धके
पूर्णचन्द्रसदृशं तु शोभनम् ॥३२७॥
वल्लमात्रमवभोज्यरोगिणं
शूलवातगजमत्तकेसरी ।
सर्वरोगहरयोगमुत्तमं
तैलमम्लपदृजान्विवर्जयेत् ॥३२८॥

स्वादुयुक्तघृतभोज्यमेषजं
गोपनीयमिदमुत्तमं मतम् ॥
गन्धकान्नवनीतेन वर्तिना घृतमाहरेत् ३२९॥
तद्धृतं सेवयेन्नित्यं सूतदोषेषु पूजितम् ॥
सूतदाहे तालुदाहे कूष्माण्डरससेवनम्॥३३०॥
तथा कुमारीं रम्भांच योजयेत्सूतदोषनुत् ॥
तथा निम्बस्य तैलेन पानलेपनयोगतः ३३१॥

वृ. यो. त., उपदंशे ।

भाषा—सेन्धानमक, नोसादर, सुहागा और फिटकड़ी येसब प्रत्येक एक १ तोले, शुद्धपारा ४ तोले, इनसबको इकट्ठेकर चित्रककेरस अथवा क्वाथसे एकदिन घोटकर सुखाले; खूब सूखनेपर सम्पुटमे बन्दकर हंडीमे रखकर लवण अथवा बालूसे ढकदे और हांडीको ४ दिनतक अग्निदेवै । स्वाङ्गशीतलहोनेपर ऊपरकी हांडीमे लगेहुए कर्पूरसदश इसरसको निकालकर रखलेना इसकी ३ रत्ती देनेसे तमामरोगोंका नाश करताहै इसमे तैल, अम्ल और लवण ये वर्जितहैं । स्वादु और मिष्टान्न भोजन करावे । इसरसकर्पूरके देनेसे कदाचित् मुखपाक या व्रणवगैरह उपद्रवहोजांय तो गन्धकमे घी मिलाकर उसको कपड़ेपर पोतकर उसकी बत्ती बनाकर तैलको निकालकर उसतैलको यथाग्निबल दूधमे सेवनकरानेसे पारदजनित समस्तदोष दूर होते हैं । यदि पारेसे शरीरमे दाहहो या तालुदाहहो तो कूष्माण्डका रसपिलावे अथवा कुमारी, केला इनका रस पिलावे । शरीरमे दाहशान्त्यर्थ निम्बकातैल लगावे और पिलावे ॥ ८० ॥

८१ कर्पूररसः (पञ्चदशः)

रसगन्धौ च कर्षांशवर्द्धकर्षश्च खर्परम् ।
विमर्थ सप्त घस्रांश्च कुमारीरसतो बुधः ३३२॥
वालुकायन्त्रगं पाच्यमष्टप्रहरसङ्ख्यया ।
रसः कर्पूरनामायं फिरङ्गादिनिषूदनः॥३३३॥

र. सं., उपदंशे ।

भाषा—शुद्धपारा और गन्धक एक १ तोला, खर्पर ६ मासे लेकर सबको कुमारीके रसमे ७ रोजमर्दनकर और सुखाकर वालुकायन्त्रमे आठ पहरकी आंचदेनेसे कर्पूररस तैयार होगा। यह फिरङ्गादि रोगोंको यथोचितानुपानकेसाथ देनेसे अवश्यही नष्ट करताहै ॥ ८१ ॥

८२ कर्पूररसः (षोडशः)

खटिकास्फटिकालवणश्च समं
वनमृद्दलदिष्टिरजोगिरिजम् ।
तलभाण्डधृतः स्फटिकोदरगो
रसराजवरो डमरूपिहितः ॥ ३३४
तलखर्परकेपिहितोनिहितो
विहितः सकलामयनाशकरः
रतिभोगपुरन्दरसुन्दरम-
न्दिरमादरकन्दरकंमुदितः ॥ ३३५॥
घनसारतुषारसुमौक्तिलता
मृतराशिशशाङ्ककलाधवलः ।
कदलीनवकन्दकलाकुलितो
मृगनाभिसुचन्दनकुङ्कुमयुक् ॥
सममेलवङ्गकुरङ्गसुरी-
युत एष मुदंतनुते त्वशिनः ॥ ३३६ ॥

र. का., वाजीकरणे ।

भाषा—खड़ियामिट्टी, फटकड़ी, सेन्धानमक, दीमककीमिट्टी, ईंटकाझामा और गेरू येसब समभागलेकर खूबबारीक पीसकर कपड़मिट्टीकीहुई हांडीमे बिछाकर फटकड़ीकी मूषाबनाकर उसपर रक्खे और उसमूषामे पूर्वचूर्णकी बराबर पारा डालदे और मूषाका मुंह बंदकर उसके ऊपर खपड़े रखदे और दूसरीहांडीको उसके ऊपर रखकर ३-४ कपड़मिट्टीकर खूब सुखाकर चूल्हेपर चढ़ाकर १६ पहरकी अग्निदेवै । स्वाङ्गशीतलहोनेपर आहिस्तेसे हंडीको उघाड़कर उसमेंसे कपूरके माफिक लगेहुए पारेकोलेकर रखलेवे यदि कुछ खपड़ोंपर पड़ाहोयतो उसकोभी लेलेना । इसको पकेहुए केलेके नये कन्दके टुकड़ेमे अन्दर १ रत्ती डालकर उसपर कस्तूरी, चन्दन, केसर, इलायची, लौंग और

वङ्गभस्म येसब प्रमाणसे डालकर खानेसे स्त्रियोंमे अत्यन्तहर्षकेयुक्त वाजीकरण होताहै और तत्तद्रोगानुपानकेसाथ खानेसे उन २ रोगोंको दूर करता है ॥ ८२ ॥

८३ कर्पूरोरसः (सप्तदशः) (सुधानिधिरसः)

स्फटिका खर्परिकेष्टा वल्मीकं गैरिकञ्च धूमरजः
स्नुग्दन्तीक ष्टस्वरसैः सूतं दृढं खल्वे॥३३७॥
सम्मर्द्य घस्रमेकं घर्मे शुष्कं विधाय परिपिष्टम्।
स्थालीमध्ये चूर्णित सैन्धवमध्ये क्षिपेद् द्विगुणे
तदपिनिरुध्याऽप्युच्चैरत्युच्चैश्चापि पक्वघटशकलैः
स्थालीमन्यामूर्ध्वं मुखतो रुन्ध्यात्कपर्दभस्मभरैः
मृत्कर्पटैश्च लेपः कार्यः स्थाल्योर्मुखादितो भूयः
छायामध्ये शुष्कं पूर्वं तीव्रातपे पश्चात् ३४०॥
कुर्याद्दृमरूकमेतच्चुल्हीस्थभाण्डमध्यगर्तगतम्।
आगलमस्याः पिठर्याः पूरितमनु वालुकापूरैः
तदधः क्रमाग्निदानं कुरुष्व दशपञ्चयामपर्यन्तम्
ऊर्ध्वस्थालीगर्भात्स्तं शीताद्धरेच्छनकैः ३४२
प्रतिवल्लमितं सुरसुमनोभी रसेश्वरञ्चगृह्णीयात्।
यःपिबति शीतमुदकं यामयुग्मं तं विरेचयति
अधिगतगरषण्मासत्रिकद्विकैकमासमाशितंविषम्
सर्वं निहन्ति सहसा शिववीर्यशक्तिसामर्थ्यात्
कुष्ठानिवातरक्तं जठरमुदावर्तमामवातरुजः॥
अपहरति सप्तदिवसैः सुधानिधिः सुधोदन्वान्

र. का.,

भाषा—फटकड़ी, खपड़े, ईंट, दीमककीमिट्टी, गेरू और गृहधूम येसब समभाग लेकर सबकी बराबर पारामिलाकर थूहरकादूध, दन्ती और कड़ुष्ठ (रेवनचीनी) केरस अथवा क्वाथोंसे क्रमसे एक-एक दिन मर्दनकरके खूब सुखाकर पीसडाले। फिर इसपिसीहुई दवासे दूना सेन्धानमकपीसकर कपड़मिट्टीकीहुई हांडीमे आधा बिछाकर इसपिसीहुई-दवाको उसपर बिछाकर बचाहुआनमक ऊपरसे बिछाकर दवादेना फिर खपड़ोंसे ढकफर दूसरी-हांडीको मुखपर उल्टीरखदेना और कौड़ीकीभस्म पानीमे सानकर हण्डियोंकी सन्धि बन्दकर ऊपरसे २–४ कपड़मिट्टी लगाकर छायामे सुखालेना। फिर एकदोपहर धूपमे रखकर वालुकायन्त्रमे रखदेना यन्त्रमे बालू हांडीकेगलेतक भरना। फिर क्रमसे मन्द, मध्य और खर, १५ प्रहरकी आंचदेवैं। स्वाङ्गशीतल होनेपर ऊपरकीहंडीमे लगेहुए रसको निकालकर रखछोड़ना इसमेसे ३ रत्ती रसको लौंगकी गोलीमे रखकर ठंढेपानीसे निगलजाय दोपहरतक इससे रेचनहोगा। बरस, ६ मास, ३ मास, २ मास १ मासका खाया हुआ ज़हर अथवा गर (बनावटी ज़हर) बहुत शीघ्र नष्ट होताहै कुष्ठ, वातरक्त, जठर, उदावर्त, आमवात इनसबको ७ दिनमे यह सुधानिधि रस दूर करताहै ॥ ८३ ॥

८४ कर्पूरोरसः (अष्टादशः)

विशुद्धं रसमादाय वह्निकूप्यां विनिःक्षिपेत्।
चतुर्गुणं बलिद्रावं दत्त्वाऽङ्गारेष्वधिक्षिपेत्३४६
व्यजनेन धमेदग्निं धूमाच्छ्वासं च रक्षयेत्।
शलाकया लोहमय्या मध्येमध्ये च चालयेत्
गन्धसारे क्षयं याते रसे कुन्देन्दुसन्निभे।
दृष्टेऽवतारयेद्भूमौ कूपीं न्युब्जां विधाय च ३४८
रसचूर्णं समाहृत्य तत्समानञ्च सैन्धवम्।
मिश्रय्य सिकतायन्त्रे प्रहराभ्यांविपाचयेत्३४९
कूपिकामुखसंलग्नं रसं कर्पूरमाहरेत्।
औपदंशिकरोगादौ स्वानुपाने नियोजयेत्३५०

नू. क.,

भाषा—विशुद्धपारेको आतशी शीशीमे डालकर उसमे चतुर्गुणित गन्धककातेज़ाब डालकर अङ्गारोंपर रखदे और पंखेसे धोंकताजाय, बीच बीचमे लोहेकी शलाकासे चलाताजाय। तेज़ाब जल जाय और शीशीमेसे धुंआ निकलना बिल्कुल बंद होजाय तब लोहेकी शलाकासे ऊपरको उठावे, जब पारेकी सफेद भस्म होजाय तब शीशीको संडसीसे उठाकर चीनीके पात्रमे पलटले, इसकी सफेदसफेद

शलाकाएं दिखाईदेंगीं इसके बराबर सेंधानमक डालकर आतशी शीशीमे रखकर मुंहबंदकर बालुकायन्त्रमे दोपहरकी आंच देनेसे तमामरस उड़कर शीशीके मुंहपर लगजायगा और नमक नीचे रह जायगा, ऊपरलगेहुए रसको लेकर शीशीम रखले। इसकी १ रत्ती अथवा ½ रत्ती लौंग वगैरह अनुपानकेसाथ देनेसे उपदंशके तमाम विकारोंको दूर करतीहै ॥ ८४ ॥

८५ कर्पूरोरसः (ऊनविंशः)

संशुद्धं पारदं कृत्वा पूर्वयुक्त्या तु षट्पलम् ।
शरावस्थं ततो विंशत्पलानि शुभगैरिकम् ३५१
लवणं तत्तृतीयांशं सौराष्ट्री लवणांशिका ।
तत्रादौ गैरिकार्द्धस्य चूर्णं स्थाल्युदरे क्षिपेत्
पश्चाच्छेषं गैरिकादि चूर्णं तदुपरि न्यसेत् ।
तस्योपरि शरावस्थं तं सूतं धारयेद्बुधः ३५३॥
तत्पार्श्वे खर्परं दत्त्वा हित्वा रसशरावकम् ।
यत्नपूर्वं ततोऽन्याश्च स्थालीं दत्त्वा च घर्षिताम्
खटिकाभिस्तयोरास्यसन्धौ मुद्रां प्रदापयेत् ।
एवं डमरुकाकारं यन्त्रं कृत्वाऽग्निना पचेत्३५५
चुल्ल्यामारोप्य विधिना यावद्यामांश्चतुर्दश ।
स्वाङ्गशीतलमादाय तद्भस्म पुलकोज्ज्वलम् ॥
युक्त्या निगृह्य तत्सर्वं काचकूप्यां विनिःक्षिपेत् ।
दृढं मृद्वस्त्रलिप्तायां तन्मुखं मुद्रितं भवेत् ३५७
बालुकायन्त्रगां ताञ्च कूपीं सम्पाचयेद् ध्रुवम् ।
क्रमाग्निना पुनस्तद्वत्प्रहरांश्च चतुर्दश ॥३५८॥
स्वाङ्गशीतलमादाय कूपीकण्ठगतं रसम् ।
कर्पूरपुलकाकारं सूर्यकान्तमणिप्रभम् ॥३५९॥
कर्पूरेण समं भक्ष्यं सेव्यमानं रसायनम् ।
द्वित्रिवल्लमितश्चैव रसं कर्पूरसंज्ञकम् ॥ ३६० ॥

यो. म.

भाषा—६ पलपारेको एकशरावमे रक्खे, फिर २० पल गेरू और गेरूका तीसराहिस्सा नमक औरनमकके बराबरफिटकड़ी लेकर सबका अलग अलग चूर्णकरलेना और तीनोंके दोदोभागकरके रखना फिर एक कपड़मिट्टीकीहुई हण्डीमेंक्रमसे तीनोंका एकएकभाग बिछाकर ऊपरशरावमे ६ पलपारेको रखकर उसके ऊपर बाकीबचेहुए तीनोंभागोंको रखदे अर्थात् पहिले फिटकड़ी फिर नमक उसके ऊपर गेरू बिछाकर नये खपड़ोंसे ढकदे फिर ऊपरसे दूसरीहंडी रखकर सन्धिको ३–४ कपड़मिट्टीसे बंदकर सुखाकर चूल्हेपर १४ पहरकी आंच देना स्वाङ्गशीतल होनेकेबाद युक्तिसे ऊपरकी हंडीमे लगेहुए रसको उतारकर कपड़मिट्टीकीहुई आतशी-शीशीमे रख बालुकायन्त्रमे २४ पहरकी आंच देकर स्वाङ्गशीतलहोनेपर शीशीके मुंहपर लगेहुए रसको निकालकर शीशीमे रखछोड़े, इसमेसे ३ रत्ती या ६ रत्ती योग्यतानुसार कपूरकेसाथ देनेसे रसायनका कामकरताहै ॥ ८५ ॥

८६ कर्पूरोरसः (विंशः)

शुद्धसूतं चतुःसङ्ख्यपलं खर्परके दृढे ।
क्षिप्त्वा तत्खर्परं युक्त्या चुल्यामारोप्य पाचयेत्
पुनर्नवामूलरसं क्षिप्त्वाक्षिप्त्वा क्रमाग्निना ।
तावत्प्रमाणं स्वरसं देयं मज्जति पारदः ३६२॥
एवं तावद्रसं देयं यावच्चन्द्रसमतां व्रजेत् ।
हठाग्निं नैव कुर्वीत भिषग्रसविचक्षणः ॥
एवं सिद्धो भवेद्रम्यो रसः कुन्देन्दुसन्निभः३६३

यो. म.,

भाषा—४ पल शुद्धपारेको नईमिट्टीकी कड़ाहीमे रखकर चूल्हेपर रख बहुतमन्दअग्नि जलावे और उसमे पारेके डूबनेतक पुनर्नवा (इटसिट) की जड़कारस भरदे और आंचलगाताजाय रस सूखनेपर उतनाही रस बारबार देताजाय जबतककि पारेकी भस्मनहोजाय भस्महोनेपर इसको निकालकर रखछोड़े यह कुन्दकेफूल अथवा चन्द्रमाके सदृश सफेदभस्म होतीहै इसमे खराग्नि भूलकरभी नहीं देना ॥ ८६ ॥

८७ कर्पूररसः (एकविंशः)

द्विपलौ रसकासीसौ ताभ्यां तुल्यं तु सैन्धवम् ।
इष्टिकायाः पलं चूर्णं पारावतमलेन च॥३६४॥
धत्तूरलकुचद्रावैः सम्मर्द्य घटयन्त्रके ।
पाचयेदर्कयामं तु कर्पूरं भवति ध्रुवम् ॥
त्रिवारं मर्दयेदेवं सर्वरोगेषु योजयेत् ॥३६५॥

र. क. यो.,

भाषा—शुद्धपारा और कासीस प्रत्येक एक १ पल, सैन्धव २ पल, ईंटकाचूर्ण १ पल, इनको इकट्ठे मर्दनकर कबूतरकी विष्ठा, धतूरा और बडहर इनप्रत्येकके रसमे एकएकदिन मर्दनकर डमरूयन्त्रमे बंदकर १२ पहरकी आंचदेकर स्वाङ्गशीतल होनेपर ऊपरकी हंडांमे लगेहुए रसको निकालकर फिर दोवक्त और इसीतरह उड़ावें फिर यथानुपानसे सबरोगोंमे देवें ॥ ८७ ॥

८८ कर्पूररसः (द्वाविंशः)

शुद्धसूतं पलैकं तु कुमारीद्रवसंयुतम् ।
मत्स्याक्षी हंसपादी च किंशुकद्वयमूलकम् ३६६
अर्कमूलं तु निर्गुण्डी वासा च वज्रवल्लिका ।
कार्पासपुष्पतोयं च धुत्तूरस्य च मूलिका ३६७॥
चित्रकं कासमर्दं च प्रत्येकं च दिनंदिनम् ।
मर्दनान्ते च तं सूतं काञ्जिकैः क्षालयेत्पुनः ॥
तं रसं पातनायन्त्राद् द्विदिनान्ते समुद्धरेत् ।
भाण्डद्वये तु संम्भृत्य रसं धुत्तूरपेषितम्॥ ३६९
तद्भाण्डस्य त्रिभागं तु सैन्धवैश्च प्रपूरितम् ।
एरण्डपत्रमध्ये तु शुद्धसूतं विनिःक्षिपेत् ।३७०॥
भाण्डद्वयं तु सङ्घृष्य विलेप्याः सप्तमृत्तिकाः ।
पचेद् द्वादशयामांस्तु क्रमेणैव भिषग्वरः ॥
स्वाङ्गशीतलमुद्धृत्य रसः कर्पूरतां व्रजेत् ३७१॥

र. क. यो.;

भाषा—शुद्धपारा १ पल लेकर कुमारी मत्स्याक्षी, हंसराज, पलाश और कण्टकीपलाश की जड, आककीजड़, निर्गुण्डी, वज्रवल्ली (तिधारी हड़सांकळ) कपासके फूल, धतूरेकीजड, चित्रक, कसोंदी, इन प्रत्येकके अङ्गस्वरस अथवा काढ़ेसे एकएकदिन मर्दनकर कांजीसे पारेको साफकरके दोदिन डमरूयन्त्रमे रखकर आंचदेना । स्वाङ्गशीतल होनेपर पारेको निकालकर एकदिन धतूरेके रससे मर्दनकर कपड़मिट्टी कीहुई हांडीके ३भागोंको पिसेहुए सैन्धवसे भरकर उसपारेके गोलेको एरण्डपत्रसे लपेटकर उसपर रखकर नमकसे हांडीको भरदेना और दूसरी मुंहघिसीहुई हांडीको उल्टी रखकर सात कपड़मिट्टी करदेना । इसको खूबसुखाकर १० पहरतक क्रमाग्नि (मन्द, मध्य और खर) देकर स्वाङ्गशीतल होनेपर ऊपरकी हंडीमें लगेहुए रसको निकालकर रखछोड़ना । तत्तद्रोगानुपानके साथ देनेसे तमाम व्याधियोंको दूरकरताहै ॥ ८८ ॥

८९ कर्पूररसः (त्रयोविंशः)

शम्याककाञ्चनीधूर्तकुमारीकाञ्जिकद्रवैः ।
सूर्यभक्ताग्रन्थिविश्वैर्मर्द्यः सूतः पृथक् पृथक्
रसः पलचतुष्कः स्यात्सैन्धवं द्विगुणं मतम् ।
पारदार्धं गैरिकं तु तत्समा शुभ्रमृन्मता ३७३
ऐष्टिकं चूर्णमेकं तु तत्समा स्फटिका स्मृता ।
तद्द्विभागं तु यवजं मर्द्यं जम्बीरजद्रवैः॥३७४॥
तत्सर्वं पारदे क्षिप्त्वा भाण्डमध्ये विनिःक्षिपेत्
ऊर्ध्वं डमरुगं सूतं कैतवद्रवलेपितम्॥ ३७५ ॥
मृत्पटेन समावेष्टय सप्तधा यन्त्रराजकम् ।
चुल्ल्यां पचेचतुर्यामं मृदुना वह्निनाग्रतः ३७६॥
यामानष्टौ मध्यमेन चतुर्यामं खराग्निना ।
सिक्तवस्त्रं क्षिपेदूर्ध्वमादौ यामचतुष्टयम् ३७७
स्वाङ्गशैत्यं यदास्य स्यात्तदा यन्त्रं समुद्घटेत्।
तं रसं तु समादाय मर्दयेच पुनःपुनः ॥३७८॥
दन्तहर्षणनीरेण सिन्धुवाररसेन च ।
तच्चूर्णं निःक्षिपेच्छिक्यपिष्टके समके भिषक्॥
मृत्कर्पटेन संवेष्टय सप्तधा च पुनःपुनः ।
वालुकायन्त्रमार्गेण पचेद् द्वादशयामकैः३८०॥
सामुद्रेणापि यन्त्रेण पचेद्वा पूर्ववत्क्रमः ॥
स्वाङ्गशैत्यं यदा जातं स्वीकृतं चन्द्रनामकम् ॥

हन्ति क्षयान्गुलमरोगान् पीनसश्वासकासकान् ।
तूनीं प्रतूनीं ग्रन्थिश्च वातकुण्डलिशूलनुत् ३८२
उदराणि च सर्वाणि हृद्रोगांश्च तथैव च ।
अशीतिं वातरोगांश्च मूत्ररोगभगन्दरान् ३८३॥
पाण्डुकुष्ठान्यशेषाणि पुराणज्वरकामलाः ।
वीर्यवृद्धिकरं पुंसां रतिदं मोदकारणम् ॥ ३८४॥
अनुपानविशेषेण सर्वरोगे प्रयोजयेत् ।
रसायनमिदं दिव्यं रहस्यं परमं विदुः ॥३८५॥

र. क. यो.,

भाषा—अमिलतास, हल्दी, धतूरा, कुमारी, काञ्जी, सोंठ, पिपलामूल इन प्रत्येकके अङ्गस्वरस अथवा क्वाथोंसे मर्दनकिआ हुआ पारा ४ पल, सेन्धानमक ८ पल, गेरू और खड़िया दो २ पल, ईटकाचूर्ण और फिटकड़ी एकएकपल, यवक्षार ३ पल, इनसबको इकठेकर जम्बीरके रसमे एकदिन मर्दनकर पारेकेसाथ मिलाकर कपड़मिट्टी दीहुई हंडीमे बिछाकर ऊपरसे दूसरी हंडी जिसमेकि भीतर धतूरेका रस पोतकर सुखाई हुई हो उसे उल्टी रखकर सन्धिको सातकपड़मिट्टीसे बंदकर धूपमे अच्छी तरह सुखाकर चूल्हेपर चार पहरकी मृदु, आठप्रहर मध्य और चार प्रहर खर अग्नि देना । हंडीके ऊपर पहिले ४ पहर-तक भिगोयाहुआ कपड़ा रखना फिर निकालदेना । सोलहपहर समाप्त होनेकेबाद स्वाङ्गशीतल होनेपर ऊपरकी हंडीमे लगेहुए पारेको निकालकर जम्भीरीनीबू और निर्गुण्डीके रसोंसे एक १ दिन मर्दन-करके कुछ थोड़ाबहुत सूखजाय तब इसचूर्णको इसकी बराबर गेंहूंके आटेकी बाटीमे रखकर कपड़ मिट्टी देकर सुखादे । फिर उसीतरह ७ कपडमिट्टी करके वालुकायन्त्र वा लवणयन्त्रमे रखकर १२ पहरकी आंच देताजाय, स्वाङ्गशीतल होने-पर एकदम वह चन्द्रमाके सदृश उज्ज्वल भस्म होगी यह तत्तद्रोगहरानुपानके साथ देनेसे क्षय, गुल्म, पीनस, श्वास, कास, तूनी, प्रतूनी, ग्रन्थि, वातकुण्डलिका, शूल, समस्त उदररोग और हृद्रोग, अस्सीप्रकारके वातरोग, मूत्ररोग, भगन्दर, पाण्डु, समस्तकुष्ठ, पुरानाज्वर, कामला इनसबको दूर करके मनुष्योंकी वीर्यवृद्धिको करताहै । रति और मोदका कारणहै, उत्तम रसायनहै और वैद्योंको परम-गोपनीय वस्तु है ॥ ८९ ॥

९० कर्पूररसः (चतुर्विंशः)

शुद्धसूतं दिनैर्मर्द्यं कुमारीद्रवसंयुतम् ।
काकमाचीद्रवैश्चैव निर्गुण्ड्याश्च द्रवैं दिनम् ॥
कासमर्दरसैश्चाद्रि दिनं धुत्तूरकद्रवैः ।
हंसपाद्यग्निजद्रावैः प्रत्येकं तु दिनंदिनम् ॥
वज्रवल्या द्रवैर्युक्तं दिनैकेन विभावयेत् ।
एवमष्टदिनं कुर्यात्काञ्जिकैः क्षालयेत्ततः ३८८
तं च सूतं समुद्धृत्य भाण्डे लवणपूरिते ।
तन्मध्ये गोमयं क्षिप्त्वा पूर्वसूतं च निःक्षिपेत्
भाण्डं संघट्टयेत्तत्र धुत्तूररसलेपितम् ।
सन्धिं मृल्लवणैं रुद्ध्वा सप्तधा च विशोषयेत्॥
चुल्यामारोप्य तद्यत्नान्मन्दमध्यखराग्निभिः ।
तद्भाण्डस्योर्ध्वभागं च क्षार्द्रवस्त्रेण सेचयेत्३९१
एवं द्वादशयामान्ते स्वाङ्गशैत्ये समुद्धरेत् ।
घनसारसमं वर्णं सर्वरोगेषु योजयेत् ॥३९२॥
वल्लकममिदं सेव्यं सिताज्यमधुसंयुतम् ।
वलीपलितकध्वंसि कामदं सुखदं तथा ३९३॥
मेहमन्तर्गतं हन्ति सर्वकुष्ठरुजापहम् ।
वातादिग्रहणीशूलमूत्रघाताश्मरीहरम् ॥३९४॥
ज्वरभ्रमतिवृष्यं च रतिदं मतिकारकम् ।
रसःकर्पूरनामाख्यः सर्वरोगहरः परः॥३९५॥

र. क. यो.,

भाषा—शुद्धपारेको कुमारी, काकमाची, निर्गुण्डी, कसोंजी, चित्रक, अग्निशिखा, वज्रवल्ली (तिधारीहड़सांकळ) इन प्रत्येकके अङ्गस्वरस अथवा क्वाथोंसे एकएकदिन मर्दनकर काञ्जीसे धोकर साफकरले । फिर बारीकपिसेहुए नमकसे तीनहिस्से हंडीको भरकर उसके बीचमे ताजे गोबरका गर्त बनाकर उसमे उसपारेको रखकर उपर सेन्धानमक

देकर ऊपरसे धतूरेके रससे पुतीहुई हंडीको उल्टी रखकर सन्धिको मिट्टी और लवणसे बंद करके ऊपरसे सातकपड़मिट्टीकरदे । फिर चूल्हेपर रखकर क्रमसे चार४पहर मन्द, मध्य और खर अग्नि देवे । पहिले ४ पहरतक हंडोके ऊपर भीगाहुआकपड़ा-रखखे फिर स्वाङ्गशीतल होनेपर कपूरके सदृश ऊपरकी हंडीमे लगेहुए रसको निकालकर रखछोड़े, इसमेसे तीनतीनरत्ती शक्कर, घी और मधुके साथ देनेसे वलीपलितको दूरकरके काम और सुखको देताहै । पुराना प्रमेह, कुष्ट, संग्रहणी, शूल, मूत्राघात, पथरी, ज्वर इनको दूरकरताहै। बुद्धि और रतिको देताहै ॥ ९० ॥

९१ कर्पूरोरसः (पञ्चविंशः)

सूतं चतुष्पलं शुद्धं लवणेन सुसंयुतम् ।
स्फटिका नवसारश्च समभागानि कारयेत् ३९६
कुमारी सुरसाद्रावै मर्दयेद्यामपञ्चकम् ।
पश्चादारोपयेच्चुल्यां शनैर्मृद्वग्निना पचेत् ३९७
यामद्वयं ततो धीमान् दशयामं खराग्निना ।
स्वाङ्गशीतं समुद्धृत्य रसराजः प्रकीर्तितः ३९८
सर्वरोगविनाशाय तमः सूर्योदये यथा ।
रसः कर्पूरनामायमश्विभ्यां परिकीर्तितः ३९९
वल्लकमिदं सेव्यं सिताज्यमधुसंयुतम् ।
वलीपलितविध्वंसि कामदं सुखदं तथा॥४००॥
मेहघ्नं पुष्टिदं सेव्यं परं गुह्यरसायनम् ।
पाण्ड्वादिग्रहणीशूलमूत्राघाताश्मरीहरम्॥४०१॥
ज्वरभ्रमतिवृष्यं च रतिदं कान्तिवर्धनम् ।
रसः कर्पूरनामाऽयं सर्वरोगहरः परः ॥४०२॥

र. क. यो. ,

भाषा—शुद्धपारा, सेंधानमक, फिटकड़ी, नोसादर ये प्रत्येक ४ चार पललेकर घीकुंआर और तुलसीके रसमे पांच५ पहर मर्दनकर सुखाकर कपड़मिट्टी दीहुई हंडीमे बिछाकर दूसरी हंडीको ऊपर उल्टी मारकर सन्धिको लवणमिलीहुई मिट्टीसे बन्दकर ऊपरसे ७ कपड़मिट्टी करके खूब सुखाकर चूल्हेपर दोपहरतक मन्दअग्नि देकर फिर १० पहरतक खूबकड़ी आँचसे पकावें । स्वाङ्गशीतल होनेपर ऊपरकी हंडीमे लगेहुए रसको निकालकर रखछोड़ें । इसमेसेतीनतीनरत्ती शक्कर, घीऔर मधुके साथदेनेसे वलीपलित, प्रमेह, पाण्डु, ग्रहणी, शूल, मूत्राघात, पथरी, ज्वर इनसबकोनष्टकर कामऔर सुखसेयुक्तकरताहुआ रति और, कान्तिकोबढ़ाताहै९१

९२ कर्पूरोरसः (षड्विंशः)

कासीसं सैन्धवं सूतं तुल्यंतुल्यं विमर्दयेत् ।
कासीसस्याष्टभागेन दातव्या पुष्पतुवरी४०३॥
स्तोकंस्तोकं क्षिपेत्खल्वे मर्दयेद्यामयामकम् ।
प्रत्येकं शतनिष्कं स्यादूनं नैवाधिकं भवेत् ४०४
स्थालीसम्पुटयन्त्रेण दिनं चण्डाग्निना पचेत् ।
ऊर्ध्वलग्नं ततश्चुल्यां मूर्च्छितश्चाहरेद्रसम् ४०५
कुरण्टकरसै र्भाव्यमातपे मर्दयेद्रसम् ।
लताकरञ्जपत्रैर्वा स्वाङ्गुष्ठेन विमर्दयेत् ॥४०६॥
दिनैकं मूर्च्छितं सम्यक् सर्वरोगेषु योजयेत् ।
अथ सूतस्य शुद्धस्य मूर्च्छितस्याप्ययं विधिः

र. र. , र. का., र. क. यो. ।

टि० रत्नाकरौपधयोगरसकामधेन्वो र्भर्जिता स्फटिका न दृश्यते स्फटिकादानेन गुणगौरवात् सोऽपि रसोऽत्रैवान्तर्भवति न पुना रसान्तरतां प्राप्तुमर्हति, अत्रैव उन्मत्तकाकमाचीरसाभ्यां भावनां दत्वा द्वितीयोरसः सम्पादितस्तस्याप्यत्रैवान्तर्भावः ।

भाषा—कसीस, सैन्धव और पारा येसब समभाग, और कसीससेअष्टमांशफूलीहुईफिटकड़ीदेकर थोड़ाथोड़ाखरलमे डालकर एकपहरतक मर्दनकरे । फिर सुखाकर कपड़मिट्टीकीहुई हंडीमे रखकर एकदिन खराग्निसे पकाकर स्वाङ्गशीतल होनेपर ऊपरकी हंडीमे लगेहुए रसको लेलेना । उसमे जितनारस मूर्च्छितहोगयाहो उतनेहीको लेकर पीलेकटसरैया और लताकरञ्जकेरससे अपने अङ्गुष्टसे १ दिन मर्दनकरे । इसतरहमूर्छितकियाहुआपारा अथवा शुद्धपारेको मर्दनकरके सबरोगोंमे देसक्ते हैं ॥ ९२ ॥

९३ कर्पूरोरसः (सप्तविंशः)

सैन्धवं स्फटिकां सूतं कासीसं लकुचद्रवैः ।
विघृष्टं खल्वमध्यस्थं सर्वं श्लक्ष्णं दिनत्रयम् ॥
हण्डिकायां तदारोप्य काष्ठवह्निर्विधीयते ।
दिनत्रये व्यतिक्रान्ते भस्मश्वेतं ध्रुवं भवेत् ॥
तद्गुञ्जां भक्षयेत्प्रातः प्रथमं वह्निदीपनम् ।
सबलाश्च तनुं कुर्यात्पुष्टिं दृष्टिमनामयम् ॥

रसचिं,

भाषा—सेंधानमक, फिटकड़ी, कसीस, पारा इनको समभागलेकर बड़हरके रससे तीनदिन खरलकर सुखाकर कपड़मिट्टी दीहुई हांडीमे बिछाकर ऊपर दूसरी हण्डी रखकर कपड़मिट्टी देकर तीनदिनकी आंचदेना । स्वाङ्गशीतल होनेपर ऊपरकी हंडीमे लगेहुए रसको निकालकर रखछोड़ना । इसमेसे एकएकरत्ती सुबहमे खानेसे पहिले अग्निको बढ़ाकर शरीरको रोगरहित और पुष्टकरदेताहै ॥ ९३॥

९४ कर्पूरोरसः (अष्टाविंशः)

अङ्कोलमज्जस्वरसैरेरण्डकदलीजलैः ।
मार्कवस्य द्रवैः सूतं काकमाचीरसैस्तथा ॥
धुत्तूरपत्रस्वरसे मेकपर्णीरसैरपि ।
तण्डुलीयकतोयेन कन्यकारसमर्दितः ॥४१२॥
इष्टिकाकाञ्जिकेनाथ त्रिफलाक्वाथमर्दितः ।
कण्टालिकारसेनापि देवदाल्या रसेन तम् ॥
चपलारससम्पिष्टं गोक्षुरद्रवमिश्रितम्
चित्रकस्य रसै भृष्टं सेहुण्डपयसा तथा॥४१४॥
चिञ्चिकाद्रवसम्पिष्टं मूषाकर्णीद्रवैस्तथा ।
आटरूषाम्भसापिष्ठा कलिहारीरसै भृशम् ॥
गण्डदूर्वारसेनामुं यामंयामं विमर्द्य च ।
पलषट्कप्रमाणेन पारदो निम्बुकद्रवैः ॥ ४१६
बहुशो मर्द्यते तापे भाव्यते च पुनः पुनः ।
अथ तापीद्वयं नीत्वा समश्च दृढमुत्तमम् ॥
अधस्ताल्लेपयेत्ताप्योः वस्त्रकुट्टितमृत्स्नया ।
पुनः पश्चमृदो ग्राह्या मृन्मध्ये लघुगर्तिका ॥
तन्मध्ये शिम्बिकापत्रधुत्तूरदलसम्भवाम् ।
विरच्य मूषिकां गाढां तस्मिन्गर्ते निवेशयेत् ॥
तस्यां सूतं विनिःक्षिप्य शिम्बीपत्ररसो रसे।
दीयते शेरमात्रोऽस्मिन् सूक्ष्मच्छिद्रशराविका॥
तत्पार्श्वे खर्परी देया निर्दोषा नूतना तथा ।
तापिकामानयेच्चान्यां कन्याद्रवविलेपिताम् ॥
पुनर्नोसादरेणाक्तामेकतः कुरु तद्द्वयम् ।
कुरुसन्धे निरोधश्च पश्चाच्चुल्योपरि क्षिपेत्
यथाग्निरुद्भवेच्चारु द्वयोस्ताप्योः समन्ततः ।
यामषोडशकं यावद्वह्निं कुर्यान्निरन्तरम्॥४२३॥
तदा निष्पद्यते भस्म सूतकाच्छृणु यादृशम् ।
हीरकेन च संकाशं प्रमाणे हीरकाकृति४२४॥
क्वचित्पर्पटिकाकारं क्वचित्कर्पूरसन्निभम् ।
पिण्डरूपं क्वचित्साक्षाद्गलद्रूप्यप्रभं क्वचित् ॥
क्वचिच्चन्द्रसमं साक्षाद् दृश्यते दृष्टिसौख्यदम्॥
भक्षयेद्रक्तिकामेकां मरिचेनाथवा समम् ४२६
गुडेनावेष्टय मतिमाञ्ज्वरनाशाय भक्षयेत् ।
अरुचौ सह पिप्पल्या समं मोचरसेन तत् ॥
ग्रहण्यामतिसारेऽथ समं बिल्वेनशस्यते ।
त्रिफलाक्वाथसंयुक्तं पाण्डुरोगे नियुज्यते ४२८॥
तं भार्गीक्वाथसंयुक्तं कासेश्वासे प्रदापयेत् ।
अनौपम्यवपुः श्रीमान्मतिमान्कान्तिमान्भवेत्।
बलवान् पुष्टिमान्वाग्मी दीर्घायुः सुप्रजायुतः।
चिरस्थायी भवेद्धर्मै प्रभया स्यान्मनोहरः ॥
उत्साहवान्भवेत्प्रायो ह्यप्रधृष्यश्च मानवैः ४३०

रसचिं,,

भाषा—अङ्कोटकीमज्जा, एरण्ड, केला, भंगरा, मकोय, धतूरा, पुनर्नवा, कांटेवालीचौलाई, घीकुआर, ईंट, काञ्जी, त्रिफला, भटकटैया देवदाली पीपल, गोखरू, चित्रक, सेहुण्डकादूध, इमली मूषाकर्णी, अडूसा, कलिहारी, गण्डदूर्वा इनप्रत्येकके यथासम्भव स्वरस या क्वाथ अथवा चूर्णके साथ ६ पल पारेको एकएकदिन मर्दनकर नीबूके रसमे धूपमे मर्दनकरके भावनादेकर सुखालेना । फिर कपड़मिट्टीकीहुई हंडीमे रेह, गेरू, नमक, खड़िया-

मिट्टी और दोमकर्मोमिट्टी इन पांचमिट्टियोंको मिला-कर दांथमें पीसकर गर्म बनाकर सेम और धतू-रेके पत्तोंकी मूसी बनाकर उसमें ऊपरवाले पारेको रखकर सेमके पत्तोंकारस १ सेर भरदे। इसके ऊपर जिसमें चारीवर्ताके छिद्रों वेसा शराव ढं-कदे और उनके ऊपर कपडे रखदे। फिर शुद्ध घिसीहुई हंडी जिसमेंकि घीकुआरका रस पोतकर नोसादर छिड़काहुआहो उसको ऊपर ढकी रख-कर सन्धिबंदकर सातकपड़मिट्टी देकर सुखावे और चूल्हेपर रखकर १६ पहरकी आंच देवे। स्वाङ्गशी-तऌ होनेकेबाद युक्तिसे हंडीके मुंहको खोलकर देखे तो कहीपर हीरेजैसी, कहीचन्द्रजैसी, कहींपप-डीजैसी, कहीकपूरजैसी, कहींथकाजैसी, कहींग-ली हुई चांदीजैसी, कान्ति नजर पड़ेगी। उसको नि-कालकर शीशीमें रखदे। इसमेंसे १ रत्ती मिरच अथवा गुडके साथ देनेसे ज्वर निवृत्त होताहै, पी-पलके साथ अरुचि, मोचरसकेसाथ ग्रहणी, बिल्व-केसाथ अतीसार, त्रिफलाकेसाथ पाण्डुरोग, भारङ्गी-केक्काथकेसाथ देनेसे कास, श्वास येसब नष्टहोतेहैं। इसके सेवनकरनेसे मनुष्यका शरीर उपमारहित हो-कर श्री, बुद्धि, कान्ति, बल, पुष्टि, वाणी, दीर्घायु, अच्छीप्रजा, इनसे युक्त होकर भूमीमें बहुतदिनतक रहताहै। उत्साहयुक्तहोकर शत्रुवगैरहसे अप्रधृष्यहो-तीहै ॥ ९४ ॥

९५ कर्पूरवटी

हिङ्गुलश्चाहिफेनश्च मुस्तकेन्द्रयवं तथा।
जातीफलश्च कर्पूरं सर्वं सम्मर्द्य यत्नतः ४३१॥
जलेन वटिका कार्या द्विगुञ्जापरिमाणतः।
ज्वरातिसारिणे चैव तथातीसाररोगिणे४३२॥
ग्रहणीषट्प्रकारेषु रक्तातीसार उल्बणे।
तत्तद्रोगानुपानेन नियोज्योऽयं रसोत्तमः४३३

र. सु., भै. र., र. त., ज्वरातिसारे

जायफल, शुद्धकपूर ये प्रत्येक समभागलेकर साथ एकत्रीभूघोंटकर दोदोरत्तीकी गोलियां ज्वरातिसार अथवा केवलातिसार, सबप्रकार हणी, उत्कटरक्तातिसारमें यथोचित अनुपा देनेसे यह वटी इनसबरोगोंको नष्टकरतीहै।

९६ कर्पूरसुन्दरीवटी

कर्पूरजातीफलजातिपत्री
धत्तूरबीजं जलराशिशोषम्।
आकल्लकं व्योषमिदं समांशं
द्वीपान्तरोत्या च कुबेराक्षम्॥
सर्वौषधार्धा विजया प्रदिष्टा
जीर्णाहिफेनश्च तया समानम्
तदर्धभागं खलु वत्सनाभं
स्यादेकतश्चात्र विधाय चूर्णम् ॥
तद्भावितं भृङ्गरसेन सम्यक्
कोलास्थिमात्रा गुटिका विधेया
सा शीतवाते ग्रहणीगदे च
अर्शोविकारे प्रबलातिसारे॥
मन्दे च वन्हौ स्मरपुष्टिकर्त्री
साऽफेनसेवाऽऽकुलमुक्तिदात्री॥४

र. प्र. सु., र. म. मा., अतिसारे।

भाषा—कपूर, जायफल, जावित्री, धतूरेके समुद्रशोष, अकलकरा, त्रिकटु, चोपचीनी फरडबीज इनसबको समभाग, इनसबसे भांग और अफीम, अफीमसे आधा बछनाग सबको इकट्ठेकर भांगरेकेरससे ६–७ भावना कर झरबेरकी गुठलीके बराबर गोलीबनाकर रख इसका नाम कर्पूरसुन्दरी है। इसको वात अर्शोविकार, प्रबलातिसार, मन्दाग्नि इनसबको चितानुपानकेसाथ देनेसे नष्टकरतीहै काम बढ़ाती है, अफीमचियोंकी ..अफीमको. छु है ॥९६॥

द्विचत्वारिंशद्भिश्च वा कोमलै रेकविंशकैः ॥
पीतैस्तेषां रसै मर्द्य गुडाः कार्याश्चतुर्दश ।
एकः सायं प्रातरेकः शर्करासलिलेन च ॥
सेव्यः पथ्यं विना स्त्रीणां सङ्गमं वर्जयेद्बुधः ।
चिरन्तनो नवीनो वा उपदंशश्च शाम्यति ॥
सप्तमे दिवसे रोगी यथापूर्वो भविष्यति ४३९
रसायनसं., उपदंशे ।

भाषा—½ तोला रसकपूरको पीले और पकेहुए इन्द्रायणके ४२ फलोंके रससे मर्दनकरे अथवा कोमलहोंतो २१ से मर्दनकरे। जब गोली बनने लगजाय तब उसकी चौदह गोलियें बनाकर सुबह शाम शक्करके शरबतकेसाथ लेवे । इसमे कोई पथ्य करनेकी जुरूरत नहींहै केवल स्त्रीसङ्ग छोड़देवे । इसके सेवनसे उपदंश नवीनहो अथवा पुरानाहो तोभी सातदिनकेभीतर अवश्य अच्छाहोजाता है ९७

९८ कर्पूरादिवटी (द्वितीया)

भागैकं देवपुष्पस्य भागार्द्धं रसचन्द्रकात् ।
उभयोः कज्जलीं कृत्वा ताम्बूलेन समं ददेत्॥
तस्योपरि च ताम्बूलमश्नीयात्पथ्यवान्नरः ।
उपदंशः शमं याति नात्र कार्या विचारणा ॥
रसायनसं., उपदंशे ।

भाषा—लौंग १ भाग, रसकपूर ½ भाग, इनदोनोंको रगड़कर चूर्णबनाले और पानमे रखकर खावे ऊपरसे एकपान दूसराखावे। खटाई, नमक तेल इनको वर्जितकरताहुआ तमाम उपदंशके विकारोंसे निर्मुक्तहोजाताहै ॥ ९८ ॥

९९ कर्पूरादिवटी (तृतीया)

कर्षं रसशशाङ्कस्य कर्षपादं मरीचकम् ।
आजेन पयसा शुक्तिमितेन परिमर्दयेत् ४४२॥
ताम्रपात्रे तु ताम्रेण यावत्सञ्जायते घनम् ।
चणाभा गुटिका योज्या दुग्धेन पिण्डितेन च ॥
दन्तस्पर्शं विना ग्राह्यं पथ्यं लवणवर्जितम् ।
माषसूपं पोलिकाञ्च कुर्यात्सप्तदिनं नरः ४४४॥
रसायन सं, पूयमेहोपदंशयोः ।

भाषा—रसकपूर १ तो., मिरच ¼ तोला लेकर २ तोले बकरीके दूधमे घोटकर तांबेके पात्रमे तांबेकेडंडेसेघोटकर रखदे जबतककि गाढ़ा नहो । गाढ़ा होनेपर चने प्रमाण गोलियें बनाकर मावेके बीचमे कवलितकर निगलजाय जिससे दांतसे स्पर्श नहो । लवण, तेल खटाई इनको छोड़कर उड़दकीदाल और गेंहूंकीरोटी खाय ऐसे सातदिन करनेसे उपदंशसेरहित होजाताहै ॥ ९९ ॥

१०० कर्पूराद्योरसः

कर्पूरभङ्गे उन्मत्तबीजं जातीफलं तथा ।
मृताभ्रं मृतलोहञ्च त्रपु नागरसौ तथा ४४५॥
एला पुन्नागधान्याकं विषं व्योषं लवङ्गकम् ।
तालीसपत्रं पत्रञ्च जयाबीजं त्वचं तथा ४४६
अकर्करं नागबला तुल्यांशेन समन्वितम् ।
चूर्णयित्वा सितां तुल्यां दत्त्वा सेवेद्यथाबलम्॥
श्वासं प्रमेहञ्च सरक्तपित्त
प्रस्वेदवातं बहुसन्निपातम् ।
स्वरक्षयं चाशु जयेद्विचित्रं
कर्पूरसंज्ञः कथितो रसोऽयम् ॥४४८॥
उन्मत्तबीजसम्भूतं तैलंवात्रापि पूजितं ।
दद्यादग्निबलं वीक्ष्य मात्राऽमात्रे विचारयन्
र. सु. प्रमेहाधिकारे ।

भाषा—कपूर, भांग, धतूरेकेबीज, जायफल अभ्रक, लोह, वङ्ग, नाग, और पारा इनकी भस्मे, इलायची, नागकेसर, धनियां, बछनाग, त्रिकटु, लौंग, तालीसपत्र, पत्रज, गांजेकेबीज, तज, अकलकरा और नागबला ये प्रत्येक समभाग लेकर सूक्ष्मचूर्णकर इनसबकी बराबर शक्कर मिलाकर अग्निबलदेखकर सेवनकरेतो श्वास, प्रमेह, रक्तपित्त, स्वेद, वातरोग, सन्निपात, स्वरभङ्ग इनसबको यहरस नष्टकरताहै । इसकेसाथ धतूरेके बीजोंका तैल अधिक उपकारी होताहै । उसे अग्निबल देखके मात्राका प्रमाण निर्द्धारितकरके देना चाहिये ॥१००॥

१०१ कलधौतादिरसः

रसगन्धकलोहाभ्रतारमाक्षिकसंयुतम्।
सूतपादमितं हेम मर्दयेत्कन्यकाद्रवैः ॥४२०॥
धान्यराशौ निशास्तिस्रो वासयेद्रसकर्मवित्।
रसोऽयं कलधौतादि वल्लमात्रः प्रयुज्यते ४५१
वातव्याधीनपस्मारं यकृद्रोगं ज्वरं कृमीन्।
क्लैब्यमुन्मादमत्युग्रं कासांश्चायं व्यपोहति ॥

आ. वि., यकृद्रोगे।

भाषा—शुद्धपारा, शुद्धगन्धक, तथा लोह, अभ्रक, रजत और सोनामाखी इनसबकी भस्मे समभाग और पारेसे चतुर्थांश सुवर्णभस्म लेकर घीकुआंरके रससे घोटकर गोलाबनाकर एरण्डपत्रमे वेष्टितकर एकपहर धूपमे रखना फिर धान्यराशिमे तीनरोज़ रखकर निकालेलेना यह कलधौतादि रस तैयारहुआ। इसकी २ रत्तीकी मात्रा यथानुपानके साथ देनेसे वातव्याधि, यकृद्रोग, ज्वर, कृमि, क्लैब्य, अत्युग्रउन्माद और खांसी इनसबको यह दूरकरताहै ॥ १०१ ॥

१०२ कलायवटिका

कलायचूर्णभागौ द्वौ लौहचूर्णस्य चापरः।
कारवेल्लपलाशानां रसेनैव विमर्दयेत् ॥ ४५३॥
कर्षमात्रां ततश्चैकां भक्षयेद्गुटिकां नरः।
मण्डानुपानात्सा हन्ति जरत्पित्तं सुदुर्जयम्४५४

र. र., र.का., वृ. मा., टो., परिणामशूले। अत्र कलायो वर्तुलकलायः। लोहस्यैकभागः मापकादिक्रमेण भक्षणीयः।

भाषा—खिसारी अथवा मटर २ भाग, लोहचूर्ण १ भाग इनदोनोंको इकट्ठेकर करेलेकेपत्तोंकेरससे मर्दनकर एकतोलेकी मात्रा लेकर मांडपीनेसे असाध्यसेअसाध्य जरत्पित्त (अम्लपित्त) को यह नष्ट करतीहै ॥ १०२ ॥

१०३ कल्पतरुरसः (प्रथमः)

शुद्धं शङ्करशुक्रमक्षतुलितं मारारिनारीरज-,
स्तावत्तावदुमापतिस्फुटगलालङ्कारवस्तु स्मृतम्।
तावत्येव मनःशिला च विमला तावत्तथाटङ्कणम्
शुण्ठी द्व्यक्षमिता कणा च मरिचं
दिक्पालसङ्ख्याक्षकम् ॥ ४५५ ॥
विषादिवस्तूनि शिलोपरिष्टा
द्विचूर्णयेद्वाससि शोधयेच्च।
ततस्तु खल्वे रसगन्धकौ च
चूर्णश्च तद्यामयुगं विमर्द्य ॥४५६॥
कल्पतरुनामधेयो यथार्थनामा रसः श्रेष्ठः।
समीरणश्लेष्मगदान्
हरतेमात्राऽस्य गुञ्जैका ॥ ४५७ ॥
आर्द्रकेण सममेष भक्षितो
हन्ति वातकफसम्भवज्वरम्।
श्वासकासमुखसेकशीततां
वह्निमान्द्यमरुचिश्च नाशयेत् ॥४५८॥
नस्येनाश्वेव हरति शिरोर्ति कफवातजाम्।
मोहं महान्तमपि च प्रलापं क्षवथुं ग्रहम् ४५९॥

नि. र., र. सु., र. प्र., भा. प्र., र. कौ., र. क. ल., यो. म., ज्वराधिकारे।

भाषा—शुद्धपारा, गन्धक, बछनाग, मैनसिल, सोनामाखी और टङ्कण ये प्रत्येक एक १ तोला, मिरच ८ तोले, सोंठ और पीपल दो २ तोले लेकर प्रथम पारे और गन्धककी कज्जली बनाकर अन्यसबचीजोंका कपड़छान चूर्णकर कज्जलीमे मिलाकर दोपहरतक खरलकरनेसे यह कल्पतरु रस सिद्धहुआ, इसकी १ रत्तीकीमात्रा अदरखकेसाथ देनेसे वातश्लेष्मरोगोंको दूरकरतीहै। इसमे सोंठ मिलाकर दीजाय तो वातकफज्वरको दूरकरतीहै। और श्वास, कास, मुखप्रसेक, अङ्गशैत्य, अग्निमान्द्य और अरुचि इनकोभी नष्टकरतीहै। इसकानस्यदेनेसे कफवायुसे जायमान शिरःपीडाको दूरकरतीहै। घोरमोह, प्रलाप और छींककी रुकावट इनसबको बहुतजल्दी नष्टकरतीहै ॥ १०३ ॥

१०४ कल्पतरुरसः (द्वितीयः)

रसं गन्धं विषं ताम्रं समभागं विचूर्णयेत्।
भावयेत्पञ्चभिः पित्तैः क्रमशः पञ्चवासरान् ॥

निर्गुण्डीस्वरसेनैव मर्दयेत्सप्तवासरान्।
आर्द्रकस्य रसेनैव भावयेच्च त्रिधा पुनः ४६१
सर्षपाभा वटी कार्या छायया परिशोषिता।
ततः सप्तवटी योज्या यावन्न त्रिगुणाश्च ताः ॥
बुद्ध्वा वयोऽग्निदोषादि प्रयोज्यो भिषजां वरैः
अनुपानं चोष्णजलं कज्जलीपिप्पलीयुतम् ४६३
पानावसाने प्रस्वाप्य वस्त्रै राच्छादयेन्नरम्।
घर्माभ्यागमनं यावत्ततो रोगात्प्रमुच्यते४६४॥
रोगिणं स्वापयित्वा तु भोजयेत्ससितं दधि।
एष कल्पतरुर्नाम रसः परमदुर्लभः ॥४६५॥
असाध्यं चिरकालोत्थं जीर्णञ्च विषमं ज्वरम्।
हन्ति ज्वरातिसारौ च ग्रहणीं पाण्डुकामले ४६६
प्रदेयः श्वासकासे च शूलयुक्ते नरे तथा।
गोपनीयः प्रयत्नेन न देयो यस्य कस्यचित्४६७
मै.र., र. सु.,व. रा., ज्वराधिकारे।

भाषा—शुद्धपारा, गन्धक, बछनाग, और ताम्रभस्म इनसबको समभागलेकर पांचों पित्तोंसे क्रमसे ५ पांच भावनाएं देकर निर्गुण्डीके रससे ७ दिन और अदरखके रससे ३ दिन भावना देकर सरसोंके बराबर गोलियें बनाकर छायामे सुखालेना इसकेबाद इसमेसे सात७गोलियें जबतक वे त्रिगुण न होजांय अर्थात् पहिलेरोज़ सात गोलियें देना। फिर १ गोली रोजाना बढ़ाते जाना जब २१ होजांय तब समझलेनाकि इसकाप्रयोग समाप्तहुआ। इसका अनुपान १ माशा पीपल, ३ रत्ती कज्जली मिलाकर गरमपानीके साथदेकर गरमकपड़े ओढ़ादेना। इससे पसीना आकर बुखार उतरजायगा। जब रोगी सोकर उठेतो शक्करमिलाकर दहीखानेको देना। यह कल्पतरु नाम अन्वर्थहै। क्योंकि बहुतदिनका असाध्य जीर्णज्वर और विषमज्वर, ज्वरातिसार, ग्रहणी, पाण्डु, कामला, श्वास, कास, शूल, इनसबको बहुतजल्दी काबूमे करताहै। यह प्रयोग भीषणहै इसलिये हरएकको नहीं बतलाना चाहिये। क्योंकि गवांरके हाथमे जानेसे ज्यादा अनर्थ होनेका सम्भवहै। इसकी मात्रा यद्यपि ७ वटीसे शुरूकरनी लिखीहै तौभी अवस्था, अग्निबल और दोषबलको देखकर अपनी बुद्धिसे वैद्य उचित फेरफार करसकताहै। यह टोटका नहीं है कि वैसाही करनेसे फलहोवे ॥ १०४ ॥

१०५ कल्पतरुरसः (तृतीयः)

कनकमाक्षिकतालकगन्धकं
धवलदारुमुखं सितसोमलम्।
विषसमं कनकं नवसादरं
रससमं सुधया सह सस्यकम् ॥ ४६८॥
लवणखर्परिका घटयन्त्रगं
प्रथमजम्भविधूतमिदं न्यसेत्।
दशदिनं कुरु वह्निमनाविलं
भवति शुकशशाङ्ककलोपमम् ॥४६९॥
ज्वरहरं कणया मरिचेन वा
समधुना मधुकेन घृतेन वा।
विषमधातुगतं दिवसान्तरा-
न्वितमलं समलं सविलम्बितम्॥४७०॥
सहकृतं विकृतं सहजं चिरं
हरति भूतभवं हरजं तथा।
बहुदिनं त्रिदिनावधिकं क्वचि-
त्कृतिकृतं विकृतिप्रकृतिस्थितम् ४७१
टो., ना. वि., ज्वराधिकारे।

भाषा—सोनामाखी, रसमाणिक्य अथवा हरिताल, गन्धक, दालचिकना, सफेदसोमल, येसब १ एकतोला, शुद्ध धतूरेके बीज और नोसादर दो २तोले चूना और तुत्थक तीन ३ तोले लेकर सबको बारीक पीस जम्भीरीनींबूके रसमे एकदोरोज मर्दन करके गोला बनाले, फिर ६—७ कपड़मिट्टी दीहुई हंडीमे आधेतक नमकभरकेऊपर इसगोलेको रखकर उसको नये ठीकरोंसे ढकदेना। और मुंह घिसकर बराबरकीहुई दूसरी हंडी उल्टीमारकर दोनोंकी सन्धि गुड़-चूनेसे बंदकर ४-५ कपड़मिट्टी देकर सुखादेना। फिर चूल्हेपर रखकर मन्द, मध्य और तीक्ष्ण इसक्रमसे दस

दिनकी आंचदेना। बीचमे अग्नि बन्द न होनी चाहिये, दसरोजकेबाद स्वाङ्गशीतल होनेपर ऊपरकी हंडीमे चन्द्रमाके सदृश लगेहुए रसको युक्तिसे निकालकर शीशीमे रखछोड़े। यह कल्पतरु रस सिद्ध हुआ। इसमेसे दोचावलकी मात्रा पीपल अथवा मिरच या मधु या मुलहठी या घृत इनके साथ औचिती देखकर देनेसे, विषम, धातुगत, ऐकाहिक, द्व्याहिक, चातुर्थिक, निराम, साम, विलम्बित, अविलम्बित, प्राकृत, वैकृत, सहज, चिरकालज, भूतज, कृत्याज, पक्ष या महीनेकी पारीवाला इत्यादि समस्त ज्वरोंको यह बहुतशीघ्र दूर करताहै ॥ १०५ ॥

१०६ कल्पतरुरसः (चतुर्थः)

निष्कमात्रं विषं दद्यान्मरिचं चाष्टनिष्ककम्।
पलार्धं कारभं चूर्णं निष्कषट्कं कुलिञ्जनम्॥४७२
जातीफलं पलार्द्धञ्च जातीकेसरकं तथा
समुद्रशोषं कर्षन्तु चूर्णयेत्सर्वमेकतः॥४७३॥
क्षौद्रेण संयुतं हन्ति चतुर्गुञ्जाप्रमाणतः।
कासं श्वासं क्षयं कुष्ठं ग्रहणीं वह्निमन्दताम्॥४७४
पुष्टिवीर्यबलोत्साहं भजते कामिनीशतम्।
वातश्लेष्मभवान्रोगान् प्रमेहांश्चैव विंशतिम्॥४७५
अनुपानविशेषेण निहन्ति विविधान्गदान्।
रसः कल्पतरुर्नाम्ना शङ्करेण विनिर्मितः॥४७६॥

र. सुं., कासाधिकारे।

भाषा—शुद्ध बछनाग १ टंक, मिरच ८ टंक, अकलकरा २ तोला, कुलिंजन ६ टंक, जायफल, जावित्री, नागकेसर, समुद्रशोष ये प्रत्येक दो २ तोले लेकर सबको बारीक पीसकर रखछोड़े। इसमेसे ४ रत्ती मधुकेसाथ देनेसे श्वास, कास, क्षय कुष्ठ, ग्रहणी, अग्निमान्द्य, दौर्बल्य, वीर्यहानि, वातश्लेष्मरोग, वीसप्रकारके प्रमेह इन सबरोगोंको दूरकर स्त्रियोंमे, रमणशक्तिको बढ़ाताहै। कल्पतरु इसका नामहै ॥ १०६ ॥

१०७ कल्पतरुरसः (पञ्चमः)

मृतसुवर्णकराजतभास्करं।
रसकगन्धकतालकमाक्षिकम्।
शिखि मयूरशिलादरदं विषं
मृतरसं मृतलोहरजः समम् ॥४७७॥
शिखिरसेन दिनं परिमर्द्य
तदनुचार्कदलैः सुरसाद्रवैः।
त्रिकटुभृङ्गजलैस्त्रिफलाजलैः।
सरसकान्तमये क्षिपभाजने ॥४७८॥
विमलकाचमये क्षिपसम्पुटे
रसनमृत्तिकया परिवेष्टितम्।
सलवणेऽथघटे क्षिप भाजने
तदनुगन्धसमं परिमर्दयेत्॥ ४७९ ॥
अमृतमत्रकलाप्रमितं क्षिपेत्
तदनुपित्तगणैः परिभावयेत् ॥
बृहतिकात्रिफलाग्निकुमारिका
दलजलैरनुमालतिकाफलैः ॥ ४८० ॥
मनुजतापहरो गदतापहा
भवति कल्पतरुः क्षितिमण्डले ॥
मधुकणासहितः क्षयरोगहा
श्वयथुपाण्डुगदे जयपालकैः ॥४८१॥
त्रिकटुकार्द्रयुतैः सुरसान्वितैः
मधुफलत्रितयेन च कासहा ॥
अनिलपित्तकफोल्बणिताञ्जयेत्
त्रिकटुकार्द्ररसोनकषायतः ॥ ४८२ ॥
घृतमरीचयुतोऽप्यनिलं जयेद्
बलकरः शुभपुष्टिविवर्धनः।
घृतमरीचकपर्दकभस्मना
रसवरः परिणामजशूलहा ॥४८३ ॥
मधुविडङ्गयुतः क्रमिशूलहा
मधुपलाशजबीजयुतोऽथवा।
धवलकासहरोऽश्मरिरोगहा
वरुणनिम्बपुनर्नविकारसैः ॥ ४८४ ॥
कुटिलनागविलीनममुं रसं
रुधिरकुष्ठगदेषु च योजयेत्।
त्रिकटुनिम्बफलत्रितयान्वितो

निखिलमेहविनाशकरो रसः॥ ४८५॥
पुरगुडत्रिफलासहितोऽर्शसां
प्रशमनः कटुवह्नियुतोऽथवा।
ग्रहणिकालरसोऽयमजाजिका-
मधुयुतस्त्वथवा विजयान्वितः ४८६
मधुफलत्रितयेन कफज्वरे
त्रिकटुकार्द्रयुतस्त्वनिलज्वरे।
मधुकणासहितस्तु खरेज्वरे
त्रिकटुयुक्तमजाजिकया युतम्॥
अखिलरोगजये रससेवकः
भवति नैव पराभवसेवकः॥४८७॥

यो. म., र. दी., र. क. यो., ज्वरे।

टि०—रसदीपिकायोगमहार्णवयोस्त्रुटिततया विशृङ्खलितः पाठोऽस्ति, अतस्तस्याप्यत्रैवान्तर्भावो न पुना रसान्तरतायां भ्रमितव्यम्।

भाषा०—सुवर्णभस्म, रजतभस्म, ताम्रभस्म, खर्पर (जस्तभस्म) गन्धक, हरिताल, सोनामाखी, चित्रक या अग्निशिखा, तुत्थक, मैंनसिल, शिंगरिफ, बछनाग, पारदभस्म, लोहभस्म ये सब समभाग लेकर। चित्रक और अग्निशिखाके रससे एकएकदिन मर्दनकर। आकके पत्ते, तुलसी, त्रिकटु, भंगरा, त्रिफला इनके यथायथं स्वरस अथवा क्वाथोंसे एक एकदिन भावनादेकर कान्तलोहकी स्वच्छीनलिकामे रखकर। नलिकाको आतशीशीशीमे डालकर मुंहसमेत तमाम शीशीपर ६ कपड़मिट्टी चढ़ाकर खूब सुखालेना। फिर लवणयन्त्रमे रखकर ४ पहरकी अग्निमे पकाकर। स्वाङ्गशीतल होनेपर निकालकर रसकी बराबर गन्धक और रसका सोलहवां हिस्सा बछनाग डालकर। ५ पित्तोंसे भावना देकर सुखालेना। फिर भटकटैया, त्रिफला, चित्रक, अग्निशिखा घीकुआर और मालतीकेफल इनप्रत्येकसे एकएक दिन भावना देनेसे यह कल्पतरु रस सिद्धहोगा। इसको क्षयरोगमे मधु और पीपलकेसाथ, शोथ और पाण्डुरोगमे जयपालकेसाथ, खांसीमे त्रिकटु, अदरख, तुलसी, त्रिफला और मधुकेसाथ, वातपित्ताधिकातिसारमे त्रिकटु, अदरख, और लशुन इनके काढ़ेकेसाथ, वातरोगमे घी और मरिचकेसाथ, परिणामशूलमे घी, मिर्च और कौड़ीभस्मकेसाथ, कृमिजन्यशूलमे मधु और विडङ्गकेसाथ अथवा मधु और पलाशबीजकेसाथ, बच्चोंकी कूकरखांसी और पथरीरोगमे वरुण, निम्ब और पुनर्नवा इनके रस अथवा क्वाथकेसाथ, रुधिरविकार और कुष्ठोंमे शङ्खभस्म और नागभस्मकेसाथ, समस्त प्रमेहोंमे त्रिकटु, निम्बमज्जपत्र और छालकेसाथ, बवासीरमे गुड़ और गुग्गुलकेसाथ, अथवा त्रिकटु और चित्रककेसाथ, ग्रहणीमे जीरा और मधु अथवा भांगकेसाथ, कफज्वरमे मधु और त्रिफलाकेसाथ, वातज्वरमे त्रिकटु और अदरखकेसाथ, अत्यन्त तीक्ष्णज्वरमे मधु और पीपलकेसाथ, समस्तरोगोंमे त्रिकटु अथवा जीरेकेसाथ इस कल्पतरु रसको देवे। युक्तिसे इसरसका प्रयोगकरता हुआ वैद्य तथा रोगी पराभवको प्राप्त नहीं होताहै॥१०७॥

१०८ कल्पद्रुमोरसः (प्रथमः)

प्रत्येकं रसगन्धखर्परशिला तुत्थालताप्यामृतम्।
म्लेच्छाऽऽखण्डलचक्रमार्कववरा
व्योषार्द्रकन्याग्निभिः।
पिष्ट्वाऽरुध्य च लोहसम्पुटगतं सामुद्रभाण्डस्थितं
कृत्वा तीव्रपुटं विधाय च समं
गन्धं कलांशं विषम्॥ ४८८॥
दत्त्वा तेन विभाव्य पित्तनिवहैः
कन्याग्निजातीफलैः,
क्षुद्राव्योषवराग्निभिः पृथगयं
कल्पद्रुमः स्याद्रसः।
अर्ककाथकटुत्रयार्द्रकयुतोवल्लस्त्रिदोषादिषु,
प्रोक्तः सौख्यपतिः स्वयोगकथितः
सर्वामयौघापहः॥ ४८९॥

टो., ज्वराधिकारे।

भाषा०—शुद्धपारा, गन्धक, खर्पर (जस्त-भस्म) मैनसिल, तुत्थक, हरिताल, सोनामाखी, बछनाग, तांबा और हीरा येसब यथायथं शुद्ध और मारेहुए समभागलेकर। भांगरा, त्रिफला, त्रिकटु, अदरख, घीकुंआर, चित्रक अथवा अग्निशिखा, इनके स्वरस अथवा क्वाथोंसे एकएकदिन मर्दनकर गोलाबनाकर लोहके सम्पुटमे बंदकर दोतीन कपड़मिट्टीकर लवणयन्त्रके भीतर रखदेना। फिर यन्त्रपर अच्छीतरह कपड़मिट्टीकर और सुखाकर तीन दिनकी तीव्र आंचदेना। स्वाङ्गशीतल होनेपर सबकी बराबर शुद्धगन्धक और सोलहवां हिस्सा बछनाग देकर,पांचपित्तोंसे एकएक रोज़ भावना देकर सुखालेना। फिर घीकुआंर, चित्रक, जायफल, भटकटैया, त्रिकटु, त्रिफला, चित्रक इनप्रत्येककी एकएकरोज़ भावना देकर सुखाकर रखछोड़ना। यह कल्पद्रुम रस तैयार हुआ। इसकी २ रत्ती अदरख, त्रिकटु और आकड़ेकीजड़की छालके काढ़ेके साथ देनेसे त्रिदोषज्वरको नष्ट करताहै और तत्तद्रोगहरानुपानके साथ देनेसे समस्तरोगोंको नष्ट करता हुआ सुखको देता है॥ १०८॥

१०९ कल्पद्रुमोरसः (द्वितीयः)

सूतगन्धाहितरणिलोहमाक्षिकमौक्तिकैः।
सहिरण्यं विषं क्षिप्त्वा चित्रकार्द्रकजै रसैः ४९०
तद्गोलं कर्पटे क्षिप्त्वा पचेल्लवणयन्त्रके।
दिनं शीतं विचूर्ण्याथ सर्वमेहेषु योजयेत् ४९१॥
रोगानुपानैरथवा पिप्पलीमधुसंयुतः।
कल्पद्रुमरसो ह्येषः क्षयपाण्डूदरज्वरान् ॥४९२॥
गुल्मप्लीहग्रहण्यर्शःशूलमन्दानलानिलान्।
निशाक्षौद्रयुतं रात्रौ वल्लमानं प्रयोजयेत् ४९३॥

रसायनसं., र. सं., प्रमेहाधिकारे।

भाषा०—शुद्धपारा, गन्धक, नाग, तांबा, लोह, सोनामाखी, मोती, सुवर्ण, बछनाग येसब यथायथं शुद्ध और मारेहुए समभागलेकर चित्रक और अदरखके रससे एकएकदिन मर्दनकर गोलाबनाकर गोलेसे १६ गुने चिथड़ोंमे लपेटकर लवणयन्त्रमें धरके एकदिनभरकी आंचदे। स्वांगशीतल होनेपर निकालकर रखछोड़े। यह कल्पद्रुम रस तैयार हुआ। इसको २ रत्तीकी मात्रामे हल्दी और मधु मिलाकर देनेसे समस्तप्रमेह, क्षय, पाण्डु, ज्वर, गुल्म, प्लीहा सङ्ग्रहणी, बवासीर, शूल, मन्दाग्नि और वातरोग इनसबको दूरकरताहै। यद्यपि मूलमे सबरोगोंके लिये हल्दी औरगुड़ही अनुपान रक्खा है परन्तु यह अनुपान प्रमेहके लियेहै। अन्यरोगोंमे तत्तद्रोगोचित अनुपान वैद्य अपनी बुद्धिसे कल्पित करले। अथवा पीपल और मधुकेसाथदेवे॥ १०९॥

११० कल्पपादपोरसः

विंशभागमितं ताम्रं सूताद् भागत्रया शिला।
तावन्त्येव प्रमाणेन भव्यभल्लातकानि च॥
भवन्ति तानि तावन्ति तन्मध्ये सकलानि च।
हण्डिकायन्त्रमध्यस्थं ताम्रे सर्वं समाक्षिपेत्।
द्विगुणं गन्धकं दत्त्वा अधस्ताचोर्ध्वकं क्षिपेत्।
पञ्चयामावधि यावत्तावच्चुल्यां परिक्षिपेत्॥
उत्तार्यते स्वयंशीतं तत्ताम्रं मृतमुच्यते।
पिप्पल्याः स्वरसेनादौ चिञ्चिकास्वरसेन तत्॥
भावनाश्च पुटान्दद्यात्प्रत्येकं पञ्चपञ्च च।
रेचनाय ततः स्थाप्य किञ्चित्समाच ताम्रतः॥
पिप्पल्या सहितं दद्यात्समं पर्णेन माषकम्।
तदेतद्रेचयेत्सम्यग् यावद्यामावधि भवेत्॥
नैव क्लेदो नातिमूर्च्छा वान्ति भ्रान्ति र्न विद्यते
अथान्यद्यद्धवेत्ताम्रं भावयेत्त्रिफलाम्बुभिः॥
काकमाचीरसस्याथ भावनात्रितयं त्रयम्।
धुत्तूरस्य रसस्यापि भृङ्गराजस्य भावनाः॥
चतुर्गुञ्जामितं दद्यात्त्रिकटुस्त्रिफला समा।
जातीफलं लवङ्गं च चूर्णं कृत्वाऽथ निःक्षिपेत्॥
पर्णखण्डेन तत्सार्धं पुनस्ताम्बूलचर्वणम्।
मुखशुद्ध्यर्थमेतस्य तत्फलश्रुतिरुच्यते॥
सन्निपातेऽपि सञ्जाते विषमे वाग्निनाशने।
कुष्ठे सकुष्ठे दुष्टे च सव्यये पवनात्यये॥

सामे निरामे कामे च दातव्योऽसौ महारसः ।
घस्मरे चाप्यपस्मारे कासे श्वासे विशेषतः ॥
पाण्डुरोगे च विड्भेद उदरे अत्रलेऽपि च ।
घृतादिकश्च यद्युक्तं तत्सर्वं भस्मसाद्भवेत् ॥
कालतः पलितं हन्ति खलितश्च विशेषतः ।
वज्रकायो भवत्येव निरपायो विशेषतः ५०७॥
दीर्घायुः कामरूपी च स्त्रीणामत्यन्तवल्लभः ।
उत्साही स्मृतिमान् प्रायो मेधावी सुस्वरः परः
ब्रह्मास्त्रं यद्यसिद्धं स्याद्धरेश्चक्रञ्च निष्फलम् ।
शिवशूलमथायाति शक्रशस्त्रं निवर्तते ॥५०९॥
तदाऽयं सर्वरोगेषु प्रयुक्तः प्रतिहन्यते ।
स्वयं स्वयम्भू र्भगवान् यदि वेधा विधानवित् ॥
जानाति नो नूनमस्य रसराजस्य तन्महः ।
य एनं सेवते नित्यं न कालकलनां व्रजेत् ५११॥
भृङ्गराजस्य यः कल्पो यः कल्पःशालमलीभवः
हरीतक्याश्च यः कल्पो दन्तीकल्पोऽपि विद्यते ॥
सोमराज्याः परः कल्पो रुदन्त्या अपि यः परः ।
भल्लातकस्य यः कल्पस्तथा निर्गुण्डिकाभवः ॥
लोहकल्पोऽपि यः प्रोक्तः कल्पो गोक्षुरकस्य च ।
ब्रह्मयोगोऽस्ति यो भूमौ विष्णुयोगो महोत्तमः ।
[illegible]

एवंसम्यग् हृदि ध्यात्वा स्मर्तव्यः कल्पपादपः॥
र. का., रसायने ।

भाषा–ताम्रके वारीकपत्र २० भाग, शुद्धपारा २० भाग, मैनसिल ३ भाग, इनतीनोंकी बराबर भिलावां लेकर पहिले तांबेकेपत्र और पारेको खरलमे डालकर बिजोरे अथवा जम्भीरीनीबूके रसमे यहांतक खरलकरे कि तमामपारा तांबेके पत्रोंपर चढ़जाय फिर भिलावोंको कूटकर आधा लुगदा कपड़मिट्टीकीहुई हांडीके बीचमे बिछाकर ऊपर तांबेसे द्विगुण गन्धकलेकर आधागन्धक भिलावोंके ऊपर बिछादे, गन्धकके ऊपर आधी मैनसिल बिछादे । फिर उसपर तांबेकेपत्रोंको रखकर ऊपर फिर क्रमसे बँचीहुई मैनसिल गन्धक और भिलावे धरके सम्पुटकरके मुंहपर तीन चार कपड़मिट्टी करदे और ५ पहरकी अग्नि देवै । स्वाङ्गशीतल होनेपर उतारकर इसमेंरहुएतांबेको रखछोड़े । इसमे पीपल, इमली इनके स्वरसोंसे पांच २ भावनाएं देकर थोड़ासा हिस्सा इसमेसे लेकर अर्थात् जितनेकी जुरूरतहो उतना रखछोड़ना, इसमेसे १ माशा ताम्र और १ माशापीपल पानमे रखकर खिलानेसे यह १ पहरतक अच्छीतरह रेचन करावेगा उसमे चित्तका मिचलाना, मूर्च्छा, वान्ति तथा भ्रान्ति ये कुछभी उपद्रव नहोंगे । बाकीका बँचाहुआ जो तांबा है उसको मकोय, धतूरा इन प्रत्येककी तीनतीन भावनाएं देकर रखलेना यह कल्पपादप रस तैयारहोगया । इसकी ४ रत्ती त्रिकटु, त्रिफला, जायफल, लौंग, येसब समभाग लेकर इनके चूर्णमेसे १ माशाके साथ पानमे रखकर खिलावे ऊपरसे लगाहुआ पान दे तो घोरसन्निपात, विषमज्वर, मन्दाग्नि, कुष्ट, दुष्टव्रण, पवनकी अधिकता, सामअथवानिरामज्वर, कास, श्वास, पाण्डु, प्रवाहिका, वा विष्टम्भ उदररोग इनसबको यह नष्ट करताहै । घृतादियुक्तजो पथ्य भोजनहै उसको मात्रासे अधिक खालेनेपरभी यह भस्मसात् करदेता है । समयपर आये हुएभी वलीपलितको नष्ट करताहुआ आदमीको वज्रकायबनादेताहै । इसके खानेवाला दीर्घायु, कामरूपी, स्त्रियोंका अत्यन्तवल्लभ, उत्साही, स्मृतिऔर मेधावान्औरसुस्वर होजाताहै । यहरस बहुतही सुपरीक्षिततया कामको करताहै। इसीलिये इसकानाम कल्पपादप रक्खाहै । इसको यथोचितानुपानके साथ देनेसे रोगहरण और रसायन इनदोनोंका काम करताहै इसलिये इसको समस्तरोगोंमे तत्तद्रोगानुपानके साथ देकर वैद्यलोग अपने यशको कमावें । इसकी बराबरी करनेवाले रस बहुत कमहैं ॥ ११० ॥

१११ कल्परसः

गण्डदूर्वा भृङ्गराजः कुमारी कण्टकारिका ।
त्रिफला काकमाची च कदली वाजिगन्धिका
भार्गव्याश्च रसैरेतैः मुसल्याथ पुनर्नवैः
प्रत्येकं मर्दयेदेतैः पारदं प्रतिवासरम् ॥५१८॥
प्रस्थमानमतिश्लक्ष्णं गाढंगाढं निरन्तरम् ।
अनन्तरं सैन्धवेन प्रस्थद्वयमितेन च ॥५१९॥
एकैकं गैरिकं प्रस्थं खटिकामिष्टिकां तथा ।
कन्यकाद्रवमाकृष्य सरसं मर्दयेच्च तत् ॥५२०॥
दिनत्रयमतिश्लक्ष्णं नष्टपिष्टश्च खल्वके ।
नलिकायन्त्रमारोप्य मुद्रयेत्तन्मुखं भृशम्५२१॥
त्रयोदशदिनं यावद्वह्निं कुर्यान्निरन्तरम् ।
यन्त्रादादाय सूतेन्द्रं प्रकुर्यात्तस्य पूजनम्५२२॥
गुरूणां महतां पश्चाद्योगिनां क्रोधवर्जितः ।
मदमात्सर्यमुत्सृज्याऽहङ्कारं मानमेव च ५२३॥
ब्रह्मचर्यञ्च कर्तव्यं वैद्यवृन्दस्य पूजनम् ।
अर्द्धगुञ्जं रसं दद्याद्दिवसक्रमवर्धितम् ॥५२४॥
रक्तिकां कारयेद्दाहे नाधिकां तां कदाचन ।
भुक्तं भुञ्जीत भोज्यञ्च मुद्गान्नं चमृतंपयः ५२५
शर्करामधुखण्डानि पथ्यार्थे तत्र योजयेत् ।
एकविंशदिने याते तन्नखानिपतन्ति च ५२६॥
चत्वारिंशद्दिनेऽतीते तत्केशाः प्रक्षरन्ति च ।
एवंपष्टिदिनप्रान्ते त्वचोरोमाणि शीर्णताम् ॥
अशीतिदिवसस्यान्ते तद्दन्ताः प्रच्यवन्ति च ।
आलस्यमरुचिं देहे जायते सप्तकद्वयात्॥५२८॥
अंशेन च भवेद्देहे छर्दनञ्च मुखेन च ।
भवेत्तन्मनुजस्यापि सेवनाच्च रसायनम्॥५२९॥
एवं षण्मासपर्यन्तं सेवयेत्तं रसेश्वरम् ।
मासत्रये समायान्ति नूतनाः केशसञ्चयाः५३०
दृढा दन्ताश्च जायन्ते नवीनाः पुण्यभागिनः ।
पुनर्नवं वपुः कुर्याद्द्वितीयो मीनकेतनः ५३०॥
सिद्धमण्डलसिद्धाङ्गो ब्रह्मायुः कल्पपारगः ।
दन्तावलवलः साक्षो हरिवेगो दृढेन्द्रियः५३२॥
निरामयो महोत्साहो महाशिवमनोहरः ।
वनितानां शतं गच्छेत्पुत्राणां शतमाप्नुयात् ॥
कालातिकुलसङ्काशकुटिलालकपल्लवः ।
विशालशालसद्बाहु मार्तण्डोरःस्थलः सदा ॥
कपालप्रतिमप्रौढः हृदयावनिशोभितः ।
अत्युन्नतवपुर्येष्टि विलासी नयनाम्बुजः ५३५:
निर्गुण्डिकापत्ररसे त्रिलोहमनुपाययेत् ।
औषधस्य क्षणं स्थित्वा फलताम्बूलचर्वणम् ॥
कर्पूरशकलं चास्ये निर्मले विनिवेशयेत् ।
अमले सुखदे तल्पे वामशायी भवेत्क्षणम् ॥
भारतं भारतं वापि भाव्यकाव्यकथासुखम् ।
गीतं सङ्गीतकञ्चापि रामायणपरायणः ५३९॥
नाटकं शाटकं चैव शृणोति च निरीक्षते ।
महागन्धयुतो भाति कुसुमैः सुमनोहरः
मनोभिरामा रामा वा निर्विकारसमा मताः ॥
अनुकूलमना कामं चित्रं वा वीक्षते सुखम् ॥
अनन्यस्यास्य कल्पस्य सेवनं कुरुतेऽनिशम् ।
अपथ्यं न च कर्तव्यमातपं सर्वमेव तत् ॥५४१॥
जायते तत्तदाकल्पे सत्त्वेष्वपि महत्स्वपि ।
अनिच्छा देहिनः शास्त्रे दौर्मनस्यं शुभेऽपि च
एतदर्थं निषेधोऽस्ति कथितः पूर्वसूरिभिः ।
कर्तव्यस्यापि कर्तव्यः संकल्पः कल्पपूर्ववत् ॥
भविष्यति न संदेहो मोह उत्सृज्यते यदि ।
अष्टादशानि कुष्ठानि वातरक्तं महामयम् ॥
साध्यासाध्यं नाशयति महाकल्परसो भृशम् ॥

र. का. रसायने ।

भाषा—एकसेर पारेको लेकर गण्डदूर्वा, भंगरा, घीकुंआर, भटकटैया, त्रिफला, मकोय, केला, असगन्ध, भारङ्गी, मुसली और पुनर्नवा इन प्रत्येकके रसोंसे एकएकरोज भावना देकर २ सेर सेंधानमक, गेरू, फिटकड़ी और ईंट इनसबको पारेमे मिलाकर परिपक्व कुमारीके रससे ३ दिनतक मर्दनकरे जब देखेकि पारेकी चमक बिल्कुल नष्ट होगई तब अच्छीतरह धूपसे सुखाकर ६–७कपड़मिट्टीकीहुई आतशीशीशीमे भरकर ६–७ कपड़मि-

ड्डीसे मुँह बंदकरदे । फिर बालुकायन्त्रमे चढ़ाकर तेरहदिनकी निरन्तर अग्निदेवे । स्वाङ्गशीतलहोनेपर निकालकर उसका पूजनकर गुरू, सर्वेपरमेश्वरभक्त और योगिजनोंका यथाशक्ति सत्कारकर क्रोध, मद, मात्सर्य, अहंकार औरमानको छोड़कर उसजगह जितने वैद्यहों उनसबकाभी पूजनकरे । बादमे इसरसकी आधीरत्ती यथारोगहरानुपानके साथ देकर आधीआधी रत्तीसे बढ़ावे, कदाचित् दाहहोनेलगेतो एकहीरत्तीपर स्थिरताकरे अगाड़ी भूलकर बढ़ावे नही । भोजनमे भात, मूंग, पकायाहुआदूध, शक्कर और मधुरपदार्थखावे, ऐसेकरतेहुए २१दिन गुजरनेकेबाद इसके मल गिरजातेहैं चालीसदिनकेबाद केशगिरपड़तेहैं,साठरोज़केबाद रोमगिरकर चमड़ीफट जातीहै । अस्सीदिनबाद दांतगिर पड़तेहैं । आलस्य और अरुचि ये चौदहदिनके बादसे होनेलगतेहैं। सातवें रोज़से उल्टी होने लगतीहै । इसतरह ६महीनेतक इसपारदका सेवनकरे । तीनमहीनेबाद नये काले केश उत्पन्न होतेहैं। और नवीन मजबूत दांत उगआतेहैं और फिर नवीन शरीरको प्राप्तहोकर दूसरा कामदेव होजाताहै सिद्धोंके मण्डलमे जानेकी गतिहोजातीहै ब्रह्माने मनुष्योंके वास्ते जितनी अधिकसेअधिक आयुबनाईहै उसको भोगकर पूरी करता है । पराक्रममे हाथी, वेगमे घोड़ा, दिव्यदृष्टि, दृढेन्द्रिय और निरोगहोकर महोत्साही और मनोहर होजाताहै । अगरचाहेतो एकदिनमे २०० स्त्रियोंकेसाथ सङ्ग कर सक्ताहै और सैकड़ों पुत्रोंकी उत्पत्ति करसक्ताहै । इसदवाके खिलानेके बाद निर्गुण्डीके पत्तोंके रसमे सोना, चांदी और ताम्र इनकीभस्म डालकर अनुपानरूपसे देकर ऊपर ताम्बूलमे कपूरका टुकड़ा रख खिलाना चाहिये । विशुद्ध और कोमल शय्यामे सुलाना चाहिये । इसके पूरापड़जानेपर तमामविद्याओंको शीघ्रपारकर नवीन ग्रन्थोंको तैयार करसक्ताहै । इसकल्पके समानगुणप्रद औरकल्प थोड़ेहैं। इसकेसेवनमे अपथ्य भूलकर नकरे। इसके कुछदिनसेवन करनेसे १८ कुष्ट, वातरक्त, राजयक्ष्म और इनके सदृश और असाध्यव्याधियाँ सब नष्टहोजातीहैं ॥ १११ ॥

११२ कल्पलतारसः

अमृतं हिङ्गुलं धूर्तबीजं द्वादशरक्तिकम् ।
प्रत्येकमहिफेनश्च षट्त्रिंशद्रक्तिकं नयेत् ५४५
पिष्ट्वा दुग्धेनगुञ्जैकां वटीं दुग्धेन पाययेत् ।
दुग्धं पाने भोजने च देयं न लवणं जलम् ५४६॥
ग्रहणीं चिरकालीनां हन्ति शोथं सुदुर्जयम् ।
चिरज्वरं पाण्डुरोगं नाम्ना कल्पलता वटी ४५७

भै. र., वै. क., शोथयुक्तग्रहण्याम् ।

भाषा—शुद्ध बछनाग, शिंगरिफ, धतूरेकेबीज येप्रत्येक बारह १२ रत्ती, अफीम ३६ रत्ती, इनको दूधमे पीसकर एकएक रत्तीकी गोली बनाकर दूधकेसाथ देनीचाहिये । खानपानमे सबजगह दूधका सेवनकराना, लवण और जल भूलकरभी न देना। इसकेसेवनसे बहुतदिनकी सङ्ग्रहणी और दुर्जयशोथ, पुरानाज्वर, पाण्डुरोग, येसब नष्ट होतेहैं ॥ ११२ ॥

११३ कल्पवृक्षोरसः

सूतं ताप्यं दरदकुनटी टङ्कणं तालकांशौ,
वल्यांदित्यौ द्विगुणमयसस्तुल्यमम्ले विमर्द्य ।
स्वेद्यश्चाल्पं स्वसितविषयुक् षोडशांशेन गुञ्जा,
सर्वान् कुष्ठान् क्षपयति सलिलं
बाकुचीनां त्रिशाणम् ॥ ४५८ ॥
दौग्धं भक्तं सजलमथवा शाकमार्द्रं पटोलं,
दीर्घास्तापान्हरति सकलान् क्षौद्रयुक्तोऽथपाण्डुम्
शोफं शूलं सगुडशिवया सन्निपातेषु वाता-
नार्द्रातोयाद्धरति च तथा कल्पवृक्षो रसोऽयम् ॥
तालकं सोमराजी च छागमूत्रे दिनत्रयम् ।
स्थाप्यं दत्वा जपापुष्पं कासीसं भृङ्गराजकम् ॥
लेपाच्छ्वित्राणि नश्यन्ति मासादूर्ध्वं न संशयः

र. चि., कुष्ठे ।

भाषा—शुद्धपारा, सोनामाखी, शिंगरिफ, मैनसिल, सुहागा एक १ भाग, हरिताल, गन्धक और

तांबा ये प्रत्येक दो २ भाग, और इनसबकी बराबर लोहभस्मलेकर सबको नीबूवगैरहकी खटाईसे मर्दनकर गोलाबनाकर, थोड़ास्वेदनकरके सोलहवां हिस्सा शुद्धवछनाग मिलाकर एकएकरत्तीकी गोलियें बनाकर देनेसे। सबप्रकारके कुष्ठोंको यह दूरकरताहै। इसकेबाद ½ तोला बावचीके बीजोंका काढ़ा बनाकर पीनाचाहिये। खानेको दूधभात अथवा जलभात, परवलकाशाक देना। इसको मधुके साथ देनेसे बहुतदिनोंके ज्वरोंको दूरकरता है। पाण्डु, शोथ, शूल इनको गुड़ और हरड़ोंके साथ देनेसे दूरकरताहै। अदरखके रसकेसाथ देनेसे सन्निपात और वायुके रोगोंको दूरकरताहै। इसका श्वेतकुष्ठमे प्रयोग चलताहोतो, हरिताल और बाकुचीके बीज इनको तीन दिन बकरीकिमूत्रमें पीसकर जपापुष्प (ओडहुलकाफूल,) कसीस और भंगरा इनको मिलाकर श्वित्रस्थानमे लेपकरनेसे एकमहीनेमे श्वेतकुष्ठ दूर हो।

११४ कल्पसाधनम्

अथान्यत्सम्प्रवक्ष्यामि यथा सिध्यन्ति साधकाः।
लभन्ते भोगमतुलं मृत्युलोके न संशयः॥५५१॥
अभ्रकं कान्तलोहञ्च सूतकञ्च विमर्दयेत्।
वज्रतोयेन सम्मर्द्य तप्तखल्वोदरे प्रिये ॥५५२॥
धान्यराशीस्थितं मध्ये वर्षमेकञ्च धारयेत्।
अब्दान्ते जायते सूतो भस्मीभूतो न संशयः॥
भागन्तु रक्तिकायास्तु भक्षयेच्च महारसम्।
अब्दमेकप्रयोगेण द्व्यष्टवर्षाकृतिर्भवेत्॥५५४॥
अक्षरश्चाजरश्चैव कामरूपी महाबलः।
स्वच्छन्दो गमने सो हि जायते नात्र संशयः॥

र. सि., वाजीकरणे।

भाषा—अभ्रक और कान्तलोह इनदोनोंकी भस्म और शुद्धपारा, येसब समभागलेकर तप्तखल्वमे वज्रोदक (वज्रोदककाविधान शिलोदककल्पमे कहाहुआहै) मेखरलकरके गोली बनाकर १ वर्षतक धानकीराशिमे रखदे। संवत्सर पूर्णहोनेके बाद पारा भस्महोजायगा। इसमेंसे एकरत्ती रोज़खानेसे एकवर्षके प्रयोगसे १६ वर्षकी आयुकेसमान आकृति होजायगी, अजर, अमर होकर कामरूपी और महापराक्रमवाला होकर स्वच्छन्दचारी होजायगा। उसीको कल्पकहा करते हैं जिसमे मनुष्यसिद्ध होकर अलौकिक शरीर तथा सामर्थ्यको प्राप्त होते हैं॥११४॥

११५ कल्याणभैरवो रसः

रसो विषा विषं गन्धो नागं वङ्गं कणां समम्
दिनैकं चित्रकद्रावै र्मर्दितं गुलिकीकृतम्॥५५६
वज्रमूषागतं पाच्यं वालुकायन्त्रके दिनम्।
स्वाङ्गशीतलमुद्धृत्य मत्स्यपित्तेन भावितम्॥
चणमात्रं प्रदातव्यं कर्णिकं हन्ति तत्क्षणात्।
क्षीरान्नं शर्करायुक्तं पथ्यं दद्यात्प्रयत्नतः॥
भक्षयेदिक्षुखण्डानि रसः कल्याणभैरवः॥५५८॥

वै. चि., बा., सन्निपाते।

भाषा—शुद्धपारा, अतीस, शुद्ध बछनाग और गन्धक, नागभस्म बङ्गभस्मऔरपीपल येसब समभाग लेकर चित्रककेरसमे एकदिन मर्दनकरके वज्रमूषामें रखकर एकरोज़ बालुकायन्त्रमे पकाकर स्वाङ्गशीतल होनेपर निकाल कर मछलीके पित्तसे एकरोज़ भावना देकर चने प्रमाणकी गोली बनाकर देनेसे कर्णिक सन्निपातको यह तत्क्षण नष्टकरताहै। शक्करके साथ दूधभात पथ्यमे देना, अधिक दाह मालूम हो तो ऊख चूंसनेको देना॥ ११५॥

११६ कल्याणरसः

तालकं ग्रन्थिकं तुल्यं शङ्खक्षारं समंसमम्।
मर्द्यं जम्बीरनीरेण दोलायन्त्रे दिनं पचेत्॥५५९
तन्नीत्वा चूर्णितं कृत्वा देयं वल्लद्वयं हि तत्।
अनुपानविशेषेण सर्वज्वरहरं परम्॥
कल्याणरसनामाऽयं ब्रह्मणा निर्मितः पुरा॥५६०

वै. चि. ज्वरे।

भाषा—रसमाणिक्य अथवा शुद्धहरिताल, पिपलामूल, शङ्खभस्म और सुहागा समभाग लेकर जम्भीरी नीबूके रसमे एकरोज़ मर्दनकर और जम्भीरीके रससे एकदिन दोलायन्त्रमे स्वेदनकरके ६–६

रत्तीकी गोलियें बनालेना । तत्तद्रोगहरानुपानकेसाथ देनेसे समस्तज्वरोंको यह रस दूरकरताहै ॥११६॥

११७ कल्याणसुन्दराभ्रम्

वज्राभ्रमेकपलिकं पुटनैः सुजीर्णं,
धात्रीपयोदबृहतीशतमूलिकेक्षु- ।
बिल्वाग्निमन्थजलवामककण्टकारी,-
श्योनाक पाटलिबलाथ रसैरमीषाम् ॥५६१॥
सम्मर्दितं पलमितैः पृथगेकशश्च,
गुञ्जासमं सुघटितं वटिकीकृतञ्च ।
यक्ष्मक्षयौ सकलशोषबलासपित्तं,
श्वासं समीरमरुचिं सकलाङ्गसादम् ५६२॥
शोथं स्वरक्षयमजीर्णमुदरशूलं,
मेहं ज्वरं विषमुरोग्रहपाण्डुहिक्काः ।
कार्श्यं कृमिं बलविनाशनमम्लपित्तं,
प्लीहामयं सह हलीमकमस्रगुल्मम् ५६३॥
तृष्णामवातनिचयं ग्रहणीं प्रदुष्टां,
विस्फोटकुष्ठनयनास्यशिरोगदांश्च ।
मूर्च्छां वमिं विरसतां विनिहन्ति सद्यः,
कल्याणसुन्दरमिदं बलदं सुवृष्यम् ॥
मेध्यं रसायनवरं सकलामयानां,
नाशाय यक्ष्मनिवहे कथितं हरेण॥५६४॥

मै. र., वै. क., राजयक्ष्मणि ।

भाषा—बहुतसे पुटोंसे सिद्धहुवा वज्राभ्रक १पललेकर आँवला, नागरमोथा, बनभांटा, शतावर, ईख, बिल्व, अरणी, सुगन्धवाला, अडूसा, भटकटैया, सोनापाढ़ा, पाटला, बला, इनप्रत्येकके एक१ पलरससे भावना देकर गुञ्जाबराबरगोली बनाकर तत्तद्रोगहरानुपानकेसाथ देनेसे राजयक्ष्म, धातुक्षय, शोष, कफपित्त, श्वास, वातरोग, अरुचि, समस्तअङ्गकी शिथिलता, शोथ, स्वरभङ्ग, अजीर्ण, उदर्द, शूल, प्रमेह, ज्वर, विष, छातीकाजकड़ना, पाण्डु, हिचकी, कृशता, कृमि, बलक्षीणता, अम्लपित्त, प्लीह, हलीमक, रक्तगुल्म, पिपासा, आमवात, खराबग्रहणी, विस्फोट, कुष्ठ, नेत्रमुंह औरशिरोरोग, मूर्च्छा, वमि, मुंहका बदजायका, इनसबको बहुतशीघ्र दूरकरताहै, वृष्य व मेधाकान्तिमें यह अच्छीचीजहै। राजयक्ष्माके नष्टकरनेको महादेवजीने कहाहै ॥ ११७ ॥

११८ कल्याणसुन्दरोरसः

सिन्दूरमभ्रं तारञ्च ताम्रं हेम च हिङ्गुलम् ।
मर्दं खल्वतले क्षिप्त्वा मर्दयेद्वह्निवारिणा ५६५
हस्तिशुण्डयम्भसा पश्चाद्भावयित्वा च सप्तधा
गुञ्जामात्रां वटीं कृत्वा कोष्णतोयेन दापयेत्
उरस्तोयञ्च हृद्रोगं वक्षोवातमुरोऽस्रकम् ।
फुफ्फुसान् हन्ति रोगांश्च रसः कल्याणसुन्दरः

भै. र., हृद्रोगे।

भाषा—रससिन्दूर, अभ्रक, रजतभस्म, ताम्रभस्म, सुवर्णभस्म, मारा हुआ अथवा शुद्धकियाहुआ हिङ्गुल येसब समभागलेकर चित्रकके क्वाथसे भावनादेकर हस्तिशुण्डीके रससे सातबार भावनादेकर एकरत्तीप्रमाणकी गोली गरमपानीकेसाथ देनेसे उरस्तोय (प्ल्यूरसी अंग्रेजी) हृद्रोग हृदयकावायु, हृदयसे रक्तका निकलना इनको तथा इनके अतिरिक्त तमाम फुफ्फुसकी बीमारियोंको यह कल्याणसुन्दर रस नष्टकरताहै ॥ ११८ ॥

११९ कस्तूरीभूषणरसः

रसाभ्रटङ्कणंशुण्ठी कस्तूरी पिप्पली तथा ।
दन्तीमूलं जयाबीजं कर्पूरं मरिचं समम् ५६८ ॥
आर्द्रकस्वरसेनैव मर्दयेत्सप्तवारकम् ।
शृङ्गबेररसैर्युक्तं योजयेद्रक्तिकाद्वयम् ॥५६९॥
वातश्लेष्मणि मन्देऽग्नौ पित्तश्लेष्माधिकेऽपि च
त्रिदोषजनिते घोरे कासे श्वासे क्षये तथा ५७०॥
ऊर्ध्वजत्रुगरोगे च सशोथे विषमज्वरे ।
एष सर्वामयान्हन्ति शुक्रौजो बलवर्धनः५७०॥

भै. र.,

भाषा—शुद्धपारा, अभ्रकभस्म, भुनाहुआसुहागा, सोंठ, कस्तूरी, पीपल, दन्तीमूल, भांगकेबीज, कपूर और मिरच येसब समभागलेकर अदरखके

रससे सातबार भावनादेकर २रत्तीकी मात्रामें अदरखके रसके साथ देनेसे वातश्लेष्म, मन्दाग्नि, पित्त श्लेष्माधिकरोग, त्रिदोषजनित घोरकास, श्वास, क्षय ऊर्ध्वजत्रुगरोग, शोथ और विषमज्वर इनसबको यहरस नष्टकरके शुक्रऔर ओजको बढाताहै ।११९।

१२० कस्तूरीभैरवो रसः (स्वल्पः)

हिङ्गुलश्च विषं टङ्कं जातीकोषफले तथा ।
मरिचं पिप्पलीं चैव कस्तूरीं च समांशिकाम् ॥
रक्तिद्वयं ततः खादेत्सन्निपाते सुदारुणे।५७२।

र. सं., ध., र. सु., भै. र., ज्वराधिकारे ।

भाषा—शुद्धशिंगरिफ और बछनाग, भुनाहुआ सुहागा, जायफल, जावित्री, मिरच, पीपल और कस्तूरी येसब समभागलेकर खूबमर्दनकरके रखछोड़ना, इसकी दोरत्ती यथारोगानुपानसे देनेसे दारुणसन्निपातको दूरकरताहै ॥ १२०

१२१ कस्तूरीभैरवोरसः (मध्यमः)

मृतं वङ्गं खर्परश्च कस्तूरीस्वर्णतारके ।
एतेषां समभागेन कर्षमेकं पृथक् पृथक् ५७३ ॥
मृतं कान्तं पलं देयं हेमसारं द्विकार्षिकम् ।
रसभस्म लवङ्गश्च जातिकाफलमेव च ५७४॥
वक्ष्यमाणौषधैर्भाव्यं प्रत्येकं दिनसप्तकम् ।
द्रोणपुष्पीरसैर्वापि नागवल्ल्या रसेन च॥५७५
द्विश्चन्द्रं त्रिकटुं दत्त्वा यत्नतो वटिकां चरेत् ।
वातात्मके सन्निपाते महाश्लेष्मगदेषु च ५७६
त्रिदोषजनिते घोरे सन्निपाते सुदारुणे ।
नष्टगर्भे नष्टशुक्रे प्रमेहे विषमज्वरे ॥ ५७७॥
कासे श्वासे क्षये गुल्मे महाशोथे महागदे ।
स्त्रीणां शतं गच्छतश्च न च शुक्रक्षयो भवेत् ।
एतान्सर्वान्निहन्त्याशु भास्करस्तिमिरं यथा ॥

र. सं., र. सु., ध., ज्वराधिकारे ।

भाषा—वङ्गभस्म, खर्पर (जस्तभस्म) कस्तूरी, स्वर्णभस्म, और रजतभस्म येसब १ एकतोला, कान्तभस्म १पल, हेमसार (धतूरेकाचन), पारदभस्म, लौंग, जायफल येसब दोदोतोले लेकर सबको मर्दनकरके गूमा और नागरबेलके रसोंसे सात ७ दिन भावनादेकर २तोलेकपूर और २ तोले त्रिकटु डालकर ३रत्तीसे १ माशेतककी गोली बनाकर देनेसे वातोल्वण सन्निपात, महाश्वास, श्लेष्मरोग, त्रिदोषजनित घोरसन्निपात, विकृतगर्भाशय और विकृत शुक्रप्रमेह, विषमज्वर, कास, श्वास, क्षय, गुल्म, महाशोथ और राजयक्ष्म इनसबको यह रस इसतरह दूरकरताहै जिसतरह कि सूर्य अन्धकारको नष्टकरताहै ॥ १२१ ॥

१२२ कस्तूरीभैरवोरसः (बृहन्)

मृगमदशशिसूर्या धातकी शूकशिम्बी,
रजतकनकमुक्ता विद्रुमं लौहपाठे ।
कृमिरिपुघनविश्वा वारितालाभ्रधात्री,
रविदलरसपिष्टं भैरवः कादिपूर्वः ॥ ५७९ ॥
कस्तूरीभैरवः ख्यातः सर्वज्वरविनाशनः ।
आर्द्रकस्य रसैः पेयो विषमज्वरनाशनः ॥५८०॥
द्वन्द्वजान्भौतिकान्वापि ज्वरान्कामादिसम्भवान्
अभिचारकृतांश्चैव तथा शत्रुकृतान् पुनः ।
निहन्याद्भक्षणादेव डाकिन्यादियुतांस्तथा ॥
विल्वचूर्णं जीरकाभ्यां मधुना सह पानतः ।
आमातिसारं ग्रहणीं ज्वरातीसारमेव च५८३॥
अग्निर्दीप्तिकरः शान्तः कासरोगनिकृन्तनः ।
क्षपयेद्भक्षणादेव मेहरोगं हलीमकम् ॥५८४॥
जीर्णज्वरं नूतनं वा द्विकालीनश्च सन्ततम् ।
आक्षेपं भौतिकं वापि हन्ति सर्वान्विशेषतः ॥
ऐकाहिकं द्व्याहिकं वा त्र्याहिकं चातुराहिकम् ।
पाञ्चाहिकं वा षाष्ठाहं पाक्षिकं मासकं पुनः ॥
सर्वाञ्ज्वरान्निहन्त्याशु भक्षणादार्द्रकद्रवैः ५८६

भै. र., र. र., ध., र. सु., र. चं., र. सं., ज्वराधिकारे।

भाषा—कस्तूरी, कपूर, ताम्रभस्म, धायईके फूल, केवांचकेबीज, चांदीभस्म, मुक्ताभस्म या पिष्टी प्रवालभस्म, लोहभस्म, पाठा, विडङ्ग, नागरमोथा, सोंठ, सुगन्धवाला, हरिताल, अभ्रकभस्म, आंवले, येसब समभागलेकर आकके पकेहुएपत्तोंके रससे

एकदोरोज् मर्दनकर तीन ३ रत्तीकीगोलियें बनाकर अदरखकेरससे देनेसे सर्वज्वर और विषमज्वर द्वन्द्वज, भौतिक, कामसम्भव, अभिचारकृत, शत्रुकृत, इनको दूरकरताहै । विल्व, जीराऔरमधुकेसाथ देनेसे आमातिसार, सङ्ग्रहणी औरज्वरातीसार इनको दूरकरताहै । अग्निको दीप्तकर खांसी, प्रमेह, हलीमक, जीर्णज्वर, सतत, नवज्वरआक्षेप, भौतिकऔरचातुर्थिकवगैरह समस्तज्वरोंको यह नष्टकरताहै ॥ १२२॥

१२३ कस्तूरीरसः

लोहरजोगिरिजारज ईश्वरजोमृगजरेणवो वृद्धाः
क्रमतः खल्वेपिष्टाः कणाद्भि र्भाविता दिवसम्
कृत्वा गोलममीषां शुष्कं यन्त्रे प्रवेश्य कच्छपके।
कृतमुद्रं मृल्लिप्तं सिकतायन्त्रे पचेत्त्रिदिनम्५८८
मन्दाग्निना सुशीताद्यन्त्रादुद्धृत्यमेलयेन्मृगजैः।
षोडशमगधामधुभिरनुपानं सर्वरोगेषु ॥५८९॥
कस्तूरीरससंज्ञो जरारुजां नाशनोऽलवणभुजाम्
अतिवृष्यो वाजीकृत् क्षुद्बोधी कामिनीवश्यकृत्॥

र. का. ।

भाषा—लोहभस्म १भाग, गंधक २भाग, पारा३भाग, कस्तूरी४भाग, लेकर कस्तूरीको जुदीनिकालकर रखले बाकी सबचीजोंको खरलमे पीपलके काथसे मर्दनकर गोलाबनाकर सुखाकर वालुकायन्त्रमे रखकर मुद्राकर ३रोज मन्दअग्निसे पकाना । स्वाङ्गशीतलहोनेपर निकाललेना और कस्तूरीमिलादेना इसमेंसे ३ रत्ती या अग्निवलदेखकर १६ पीपल और मधुकेसाथ सर्वरोगोंमे दे । अगर इसकासेवन लवणछोड़कर करायाजाय तो यह बुढ़ापेको दूरकरताहै । अत्यन्तवृष्य और वाजीकरहै । क्षुधाको बढ़ाकर स्त्रियोंको वशकरनेवालाहै ॥ १२३ ॥

१२४ कस्तूर्यादिचूर्णम्

कस्तूरिकाम्बरस्वर्णपत्र—
सुमौक्तिकं रौप्यदलं प्रवालम् ।
सर्वं सुचूर्णं दृढखल्वमध्ये
सम्मर्दयेच्छ्लक्ष्णतरञ्च यावत् ॥५९१॥
सर्वैः समा शुभ्रसिता प्रदेया
ग्राह्यं प्रभाते मधुसर्पिषाढ्यम् ।
सर्वान् प्रमेहान्विनिहन्ति सद्यः
षण्ढो भवेद्वाजिसमानवीर्यः ॥५९२॥
सर्वामयं हन्ति च सेवनेन
साग्रं शतं जीवति मानवोऽयम् ।
टङ्कैकप्रमिता मात्रा पथ्यं मिष्टान्नभोजनम्।
कादिवर्ज्यं न सेवेत सर्वान् रोगान् व्यपोहति ॥

रसायनसं., प्रमेहाधिकारे ।

भाषा—कस्तूरी, अम्बर (आम्रेजारस०) सोनेकेवर्क, मोती, चांदीकेवर्क, प्रवाल येसब समभाग लेकर एकअच्छेखरलमे जोकि घिसनेवालानहो उसमे डालकर इनकाचूर्णबनाकर सबकीबराबर मिश्रीमिलाकर खानेसे यह तत्कालसमस्तप्रमेहोंको दूरकरताहै । औरनिरामयहोकर सौवर्षतकजीताहै । इसका खानेवाला नपुंसकभी वाजीकी तरह रमणकरसक्ताहै । इसकीमात्रा ४मासेकी अथवा वयोवलऔरप्रकृतिदेखकर कायमकरे । कादिवर्गको छोड़कर औरसवचीजें पथ्यहैं ॥ १२४ ॥

१२५ कस्तूर्यादि स्तम्भनम्.

एकभागा तु कस्तूरी द्विभागं कुङ्कुमं स्मृतम् ।
जातीफललवङ्गानां प्रत्येकं भागयुग्मकम् ५९४
अहिफेनं त्रिभागं स्याद्विजया सप्तभागिका ।
मधुना वटिका कार्या सेव्या नित्यं तु कामुकैः
सेव्या तेन प्रयत्नेन यस्यास्ति प्रमदाशतम्५९५

वै. ।

भाषा—कस्तूरी १भाग, कश्मीरीकेशर २ भाग, जायफल१भाग, लौंग१भाग, अफीम३ भाग, भांग ७भाग, इनसबका बारीकचूर्णकरके ३रत्तीकीमधुमेगोलीबनाकर जिनकेघरमे सैकड़ोंऔरतेंहैं वेलोग खावें ॥ १२५ ॥

१२६ कक्षपुटो रसः

निर्गुण्डी नीलिका वज्री ब्रह्मदण्डी त्रिदण्डिका
शतपुष्पा मुद्गपर्णी श्वेतार्को वानरी जया५९६॥

पेटारी कृष्णधत्तूरो विजया क्षीरकन्दकम् ।
एतैः समस्तैर्व्यस्तैर्वा द्रव्यैर्मर्द्य दिनत्रयम् ९७
शुद्धसूतं तप्तखल्वे तत्कल्कं क्षीरकन्दके ।
वज्रकन्देऽथवा रुद्ध्वा तन्मज्जाभिर्मृदा पुनः ९८॥
तं कन्दं वज्रमूषायां रुद्ध्वा लघुपुटे पचेत् ।
पुनर्मर्द्य पुनः पाच्यमित्येवं सप्तधा क्रमात् ९९
रसः कक्षपुटो नाम गुञ्जैकं मधुना लिहेत् ।
दीर्घायुरमितौजाः स्याद्वलीपलितवर्जितः ६००
वर्षैकेण न सन्देहो रसकायो भवेन्नरः ।
भल्लातबीजचूर्णञ्च हयगन्धाऽमृताघृतैः ॥
पलैकं भक्षयेच्चानु क्रामकं परमं हितम्॥६०१

र. सं., रसायने ।

भाषा—शुद्धपारेको तप्तखल्वमे रखकर निर्गुण्डी, नीली, थूहर, महादण्डी, त्रिदण्डी (मोरसेंडा—मराठी), सौंफ, मुद्गपर्णी, श्वेतआक, केवांचकेबीज, अरणी, कंघी, कालाधतूरा, भांग, क्षीरविदारीकन्द इनप्रत्येकके अङ्गस्वरसोंसे एक एकदिन मर्दनकरे अथवासबके मिलेहुएरससे तीनदिन मर्दनकरे । इसकागोलाबनाकर क्षीरकन्द अथवा वज्रकन्द (जङ्गलीसूरण अथवा मानकंद) मेरखकर उसीकीमज्जासे खड्ढेको भरकर कपडमिट्टीदेकर इससम्पुटको वज्रमूषामे बंदकर लघुपुटमे आंचदे । इसप्रकार बारम्बारस्वाङ्गशीतलहोनेपर निकाले औरमर्दनकरकरके आंचेदे । इसतरहसातबारकरनेसे यह कक्षपुटनामका रसतैयारहोगा । इसकी १रत्ती रोज़मधुकेसाथदेनेसे बलीपलितसे रहितहोकर विपुलपराक्रम और दीर्घायुवालाहोताहै । एकवर्षके प्रयोगसे आदमीकाशरीर रसमयहोजाताहै । भिलांवेकी मज्जा, असगन्ध समभागलेकर चूर्णकर घीमिलाकर सब४तोलेके अन्दाज़ रसके ऊपर देनाचाहिये । इससे रसका शरीरमे क्रामणहोगा ॥ १२६ ॥

१२७ काकणघ्नवटी

लोहभस्म विषं वह्निः कटुका च कटुत्रयम् ।
तुल्यांशं चूर्णितं भाव्यं क्काथेनानेन तद्दिनम् ।

पथ्यानिम्बविडङ्गानि खदिरं वासकामृते ।
जलैरष्टावशेषैस्तु कषायो भावने हितः ॥६०३॥
माषमात्रं लिहेत्क्षौद्रैः काकणं हन्ति तद्वटी ।
इन्द्रवारुणिकामूलबाकुचीत्रिफलाग्नयः॥६०४॥
निम्बभल्लातकौ शुण्ठी मरिचं चूर्णयेत्समम् ।
गोमूत्रैः पाययेत्कर्षमनुपानन्तु नित्यशः६०५ ॥

र. र., र. को., कुष्ठे ।

भाषा—लोहभस्म, शुद्धबछनाग, चित्रक, कुटकी, त्रिकटु, येसब समभागलेकर बारीक कपडछान चूर्णकर हरडें, नीमकीछाल, विडङ्ग, खदिरकासार, अडूसा, गिलोय, येसबसमभाग लेकर अष्टमांशावशेषकाढाबनाकर भावनादे । इसकी एक १ माशेकी गोलियां बनाकर रखछोडे, यह काकणघ्नवटी तैयारहुई । इनमेसे एकएक गोली सुबहशाम मधुमे मिलाकर चाटे, ऊपरसे इन्द्रायणकीजड, बाकुचीकेबीज, त्रिफला, चित्रक, नीमकीछाल, भिलांवे, सोंठ और मरिच ये समभागलेकर बारीकचूर्णकर इसमेसे १ तोला चूर्ण गोमूत्रकेसाथखिलावेतो एकमहीनेमे काकणकुष्ठ जडसेचलाजाय ॥ १२७ ॥

१२८ काङ्क्षायनयोगः (शुक्रपूर्णरसः)

रसाभ्रकञ्च पिप्पल्यो लवङ्गं त्रिफलात्वचः ।
अश्वगन्धा वरी शुण्ठी कसेरु जातिपत्रिका ६०६
मुशली भृङ्गराजश्च मधुकं वंशलोचनम् ।
त्वगेला क्षुरकं रेणु गुडूचीसारमेव च ॥६०७॥
एतानि समभागानि द्विगुणा स्यात्पुनर्नवा ।
नलिनं चात्मगुप्ता च घृतशर्करयोः पचेत्॥६०८
एष काङ्क्षायनो योगो बलमांसविवर्धनः ।
कासे श्वासे प्रतिश्याये क्षतक्षीणे च रोगिणि६०९
प्रयुक्तो नरनारीणां दृढीकरणमुत्तमम् ।
कामाभिलापसक्ताश्च न क्षीयन्ते कदाचन ६१०

रससारसङ्ग्रह, र. (मा.) रसायने ।

भाषा—शुद्धपारा, अभ्रकभस्म, पीपल, लौंग, त्रिफलाकीछाल, असगन्ध, शतावर, सोंठ,

जावित्री, मुसली, जलभंगरा, मुलहठी, वंसलोचन, तज, इलायची, तालमखाना, रेणुका, गिलोयका सत्व ये समभागले । और पारेसे द्विगुण पुनर्नवा, कमलगट्टा और केवांचकेबीज ये मिलावे । फिरइनसबसेदूनीशकरकीचाशनीकरके दवाओंके प्रमाणका घी डालकर उतारले । यह काञ्चायनयोग सिद्ध हुआ । इसकी एकएक तोलेकी मात्रा अथवा अग्निबलके अनुसार देकर ऊपरसे दूध पिलानेसे यह बल और मांसको बढ़ाता है । कास, श्वास, क्षतक्षीणता और प्रतिश्यायमे देनेसे यथार्थकाम करताहै । स्त्रीऔरपुरुषोंके अङ्गोंकोमजबूत करनेका उत्तमसाधन है । इसकोखाकर विषयकरनेसे आदमीका शुक्रक्षीणनहीं होताहै ॥ १२८ ॥

१२९ काञ्चनलोहरसः

मृतमूतं मृतं ताम्रं काञ्चनं मर्दयेत्समम् ।
अर्कवज्रीयदुग्धेन दिनान्ते वटिकीकृतम्६११॥
गुञ्जैकं गुडसंयुक्तं तथागन्धसुवर्चलम् ।
निष्कैकं गुल्मशान्त्यर्थं रसं काञ्चनलोहकम्
विशाला कटुका मुस्ता कुष्ठमिन्द्रयवं शुभम् ।
चूर्णयेद्देयकाष्ठञ्च कर्षेकं मधुना लिहेत् ६१३ ॥
गुल्मोदरज्वरश्वासमनुपानं निहन्त्यलम् ।
सैन्धवञ्च यवक्षारं त्र्यूषणं हिङ्गुदाडिमम्६१४॥
दशमूलयुतं चाज्यं पकान्तं पाययेद्धृतम् ।
कफगुल्मोदरं शोफं प्लीहशूलाच नाशयेत् ६१५

र. को., व. रा., गुल्माधिकारे । वगवराजीये " काञ्चनं मर्दयेत्समम् " इत्यस्यस्थाने " काञ्चनमाः मर्दयेद्रसः " इति पाठः नामच काञ्चनमोहनं स्थापितम् ।

भाषा—पारदभस्म, ताम्रभस्म, और सुवर्णभस्म येसबसमभागलेकर एकएकदिन आक औरसेहुण्डकेदूधसे मर्दनकर एकएकरत्तीकी गोलीबनाकर गुल्मीको खिलाना । ऊपरसे ४—४ मासे गन्धक और संचलनमक देना । अथवा इन्द्रायणकीजड़, कुटकी और नागरमोथा, कुठ, इन्द्रजव, येसब समभागलेकर बारीकचूर्णकर इसमेसे १ तोला मधुकेसाथचटाना । इससे गुल्म, उदररोग, ज्वर और श्वास येदूरहोतेहैं । यहरस पचजाय तब इसकेऊपर सेन्धानमक, यवक्षार, त्रिकटु, हींग, अनारदाना और दशमूल इनकेकल्क और काथसे तैयारकियाहुआ घी पिलाना इससे कफगुल्म, कफोदर, शोथ, शूल और प्लीह इनकानाश होता है ॥ १२९ ॥

१३० काञ्चनाभ्ररसः

काञ्चनं रससिन्दूरं मौक्तिकं लोहमभ्रकम् ।
विद्रुमश्चामयां तारं कस्तूरींचमनःशिलाम्६१६
प्रत्येकं कर्षमात्रन्तु सर्वं सम्मर्द्य यत्नतः ।
वारिणा वटिका कार्या द्विगुञ्जाफलमानतः६१७
अनुपानं प्रयोक्तव्यं यथादोषानुसारतः ।
क्षयं हन्ति तथा कासं श्लेष्मपित्तसमुद्भवम्६१८
प्रमेहं विविधञ्चैव दोषत्रयसमुत्थितम् ।
कफजान् वातजान्रोगान्नाशयेत्सद्य एव हि६१९
बलवृद्धिं वीर्यवृद्धिं लिङ्गदार्ढ्यं करोति च ।
श्रीकरः पुष्टिजननः नानारोगनिषूदनः ॥
गहनानन्दनाथोक्तो रसोऽयंकाञ्चनाभ्रकः ६२०

र. सं., भै. र., ध., र.सु., र. र., र. चं., यक्ष्मणि ।

भाषा—सुवर्णभस्म, रससिन्दूर, मोतीकीभस्म अथवा पिष्टी, लोहभस्म, अभ्रकभस्म, प्रवालभस्म, हरड़ें, रजतभस्म, कस्तूरी औरशुद्धमैनसिल येप्रत्येक एकएकतोले लेकर जलसेखूबबारीकपीसकर दो दो रत्तीकी गोलियां बनाकर यथादोषहरानुपानके साथ देनेसे क्षय, खांसी, श्लेष्मपित्तोद्भवरोग, प्रमेह, कफज और वातजरोगोंको बहुतही जल्दी नष्ट करता हुआ बल और वीर्यकी वृद्धि, दृढता, कान्ति, पुष्टि इनको करता है । अनेक रोगोंके नाशकरनेवाले इसरसको गहनानन्दने कहा है काञ्चनाभ्र इसका नाम है ॥ १३० ॥

१३१ काञ्चनाभ्रकरसः

काञ्चनं रससिन्दूरं मौक्तिकं लौहमभ्रकम् ।
विद्रुमं मृतवैक्रान्तं तारं ताम्रञ्च वङ्गकम् ६२१

कस्तूरिका लवङ्गश्च जातीकोषैलवालुकम् ।
प्रत्येकं कर्षमात्रञ्च सर्वं मर्द्यं प्रयत्नतः ॥६२२॥
कन्यानीरेण सम्मर्द्य केशराजरसेन च ।
अजाक्षीरेण सम्भाव्यं प्रत्येकं दिवसत्रयम् ६२३
चतुर्गुञ्जाप्रमाणेन वटिकां कारयेद्भिषक् ।
अनुपानं प्रयोक्तव्यं यथा दोषानुसारतः ॥६२४
क्षयं हन्ति तथा कासं यक्ष्माणं श्वासमेव च ।
प्रमेहान् विंशतिश्चैव दोषत्रयसमुद्भवान् ॥
सर्वरोगान् निहन्त्याशु भास्करस्तिमिरंयथा६२५

र. सं., भै. र., ध., र. सु., र. र., यक्ष्मणि ।

भाषा—सुवर्ण, रससिन्दूर, मोती, लोह, अभ्रक, प्रवाल, वैक्रान्त, रजत, ताम्र और बङ्ग ये सब विशुद्ध और मारे हुए, कस्तूरी, लौंग, जायफल, इलायची और मैंहुला ये सब प्रत्येक एक एक तोला लेकर घीकुंआर, भृङ्गराज, बकरीका दूध इन प्रत्येक की तीन ३ दिन भावना देकर ४–४ रत्तीकी गोलियें बनाकर दोषके अनुसार अनुपान कायमकरके देनेसे यह रस धातुक्षय, खांसी, राजयक्ष्मा, श्वास, बीसप्रकारके प्रमेह, इनके अतिरिक्त और सबरोगोंको इस तरह नष्ट करता है जैसे अन्धकारको सूर्य नष्ट करता है ॥ १३१ ॥

१३२ काञ्चनायसरसः (हेमायसम्) (प्रथमः)

मागधीमधुकरुष्णलोचटा
 चस्तमोदकविदारिकारजः ।
सान्द्रचूर्णितवयस्ययान्वितं
 मुष्टिमानमखिलं पृथक्पृथक् ॥ ६२६॥
हेममुष्टिकुडवोन्मितायसो-
 श्चूर्णमाज्यमधुनान्वितञ्जयेत् ।
स्थावरं विषमथापि जङ्गमं
 स्त्रीसहस्ररतमातनोति च ॥ ६२७ ॥

लो. प. (स०) स्थावरजङ्गमविषे ।

भाषा—पीपल, मुलहठी, सफेदगुञ्जाकीजड़, इङ्गिगण, बबईकीजड़, विदारी, मोटीहर्रे, गिलोय और सुवर्णभस्म ये प्रत्येक ४–४ तोले, लोहभस्म ४ पल, इनसबको बारीककूट कपड़छानकरके रख छोड़े। इसको १ माशेसे ४ माशे तक अग्निबल देख कर देनेसे स्थावर और जङ्गम दोनों प्रकारके विष तत्काल नष्ट होते हैं । हमेशां इसका सेवनकरनेवाला सैकड़ों स्त्रियोंके साथ रोजाना रमण करसक्ताहै१३२

१३३ काञ्चनायसरसः (द्वितीयः)

गोस्तनीककुभवल्कवानरी-
 बीजपिप्पलीबलाशटीयुतम् ।
भस्मितं विविधयोगराजकै
 र्लोहकाञ्चनसमुद्भवं रजः ॥ ६२८ ॥
सर्वतुल्यसितया प्रयोजितं
 वह्निकालबलमात्रया कृतम् ।
हन्ति यक्ष्म सपरिग्रहं नृणां
 सेवयादुरितमच्युतो यथा ॥ ६२९ ॥

लो. प. (स.) राजयक्ष्मणि ।

भाषा—द्राक्ष, कहुवेकीछाल, केवांचकेबीज, पीपल, बला, कचूर, राजयक्ष्मनाशनगणोंसेमारी हुईलोहऔरसुवर्णभस्म, इनसबकोसमभागमेंलेकर । सबकीबराबरशक्करमिलाकर २ माशे अथवाअग्नि-औरसमयकेबलकोदेखकर उचित प्रमाणमेंदेनेसे यह उपद्रवोंकेसाथराजयक्ष्मको इसतरहनष्टकरताहै जैसे अपनीसेवाकरनेवालेके पापोंको परमेश्वर नष्टकरतेहै ।

१३४ काञ्चनायसरसः (जातरूपायसम्) (तृतीयः)

भृङ्गपिप्पलीशुभैलवालुकं
 जीवनीयगणकं सुरान्वितम् ।
चूर्णितं समृमनेन सम्मितं
 जातरूपकमयश्च सान्वितम् ॥ ६३० ॥
शर्कराज्यमधुयुक्तमाशितं
 मात्रया हितभुजा दिनेदिने ।
वह्निनाशमरुचिं सपीनसं
 शोषमङ्गकृशतां नियच्छति ॥ ६३१ ॥

लो. प. (स.) अग्निमान्द्ये ।

भाषा—भंगरा, पीपल, गेंहुला, जीवनीयगण (देखोचरक अ. ४) मूर्वा येसबसमभाग, इनसबकी बराबर उत्तमरजतभस्म मिलाकर इसमेसे २ माशा लेकर शकर, घी और मधु, इनमे मिलाकर रोज़ २ खानेसे अग्निमान्य, अरुचि, पीनस, शोष, और अङ्गोंकी कृशता इनको यह दूरकरताहै ॥ १३४ ॥

१३५ काञ्चनार्कोरसः

जातिकाकललवङ्गपिप्पलीः
शाणसम्मितविभागकल्पिताः ।
कर्षभागमितचन्द्रबालिकां
शुक्तिसम्मितमथोषणन्तथा ॥ ६३२॥
शृङ्गवेरकपलद्वयान्वितं
सर्वसम्मितमिहार्ककाञ्चनम् ।
चूर्णमेतदखिलं समानमा—
योजितं च सितया निषेवितम् ॥६३३॥
हन्ति कासगुदजाग्निमार्दवं
श्वासगुल्ममरुचिं क्षयं ज्वरम् ।
प्लीहहानिमुदरातिसारकं
छर्दनग्रहणिकामयादिकम् ॥ ६३४ ॥

लो. प. (स.)कासे—

भाषा—जावित्री, अकलकरा, लौंग और पीपल ये प्रत्येक एकएकशाण, उड़ायाहुआकपूर १ तोला, मिरच १ शाण, सोंठ २ पल इनसबकी बराबर ताम्र और सुवर्णभस्म, इनसबको मिलाकर मर्दनकरके रखछोड़ना। इसकी २ माशा कीमात्रा २ माशा शक्कर अथवा मधु और दूधकेसाथ सेवन करनेसे खांसी, बवासीर, अग्निमान्य, श्वास, गुल्म, अरुचि, क्षय, ज्वर, प्लीहाका सिकुड़ना, उदररोग, अतिसार, उल्टी और संग्रहणी इत्यादिरोग नष्टहोते हैं ॥ १३५ ॥

१३६ काञ्चनायनो रसः

मृतं सूतं समं गन्धं काकमाच्या द्रवैर्दिनम् ।
मर्दितं चान्धितं पश्चात्करीषाग्नौ दिवानिशम्
दिव्यौषधदलद्रावै र्दिनं मर्द्य तमन्धयेत् ।
ध्मातं तस्मात्समुद्धृत्य तत्तुल्यं हाटकं मृतम् ॥
एकीकृत्य घृतैर्लेह्यं माषैकं वत्सरावधिम् ।
जरां मृत्युं निहन्त्याशु सत्यं काञ्चनसम्भवः ॥
काकमाचीद्रवैर्भाव्यं चूर्णं धात्रीफलोद्भवम् ।
मधुना भक्षयेत्कर्षमनुस्यात्कामकेपरम् ६३८॥

र. सं., रसायनक्ष. रसायने ।

भा०—पारेकी भस्म और गन्धक समभागलेकर मकोयके रससे एकदिन मर्दनकर गोलाबनाकर अन्धमूषामे रखकर एकअहोरात्रकरीषकी अग्निदेकर स्वाङ्गशीतलहोनेपर निकालके दिव्यौषधियों (दिव्यौषधियां रसेन्द्रचूडामणि वगैरहमे ६४ केलगभग बतलाईहैं उन्हींको रसप्रकाशसुधाकरमेभी लिखीहैं उनके यथालाभपत्तों) केरससे मर्दनकर अन्धमूषामे रखकर अग्निदे। इसप्रकारजितनीदिव्यौषधियांमिले उतनीहीपुटदेकरस्वाङ्गशीतलहोनेपर निकालकरउसकी बराबर उत्तमसुवर्णकीभस्म डालकर रखछोड़े यह काञ्चनायन रसतैयारहुआ इसमेसे १माशेकीमात्रा घीके साथचाटनेसे बुढ़ापे औरमृत्युकोनष्टकरती है। इसके ऊपरमकोयके रससे कईवारभावना दिया हुआ आंवलेका चूर्ण १ तोला मधुके साथ भक्षण करे तो इस रसकाशरीरमे क्रामण होगा ॥ १३७ ॥

१३७ कान्तपिष्टीरसः

हलीमके प्रयोक्तव्या शुद्धकान्तस्य पिष्टिका ।
तीक्ष्णगन्धसमायुक्ता युक्त्या हन्ति हलीमकम्

रसेन्द्रसं., हलीमके ।

भाषा—चुम्बकपत्थरसे निकालेहुएलोहकीभस्म बराबरके शुद्धपारेकेसाथ मिलाकर उसमे साधारणलोहभस्म और गन्धकमिलाकर दोतीनरोज़ घोट कर रख छोड़े। इसकी ३ रत्तीकी मात्रा देनेसे हलीमक नष्ट होता है ॥ १३७ ॥

१३८ कान्तभस्मयोगः

दशमूलीकषायेण मधुना च समन्वितम् ।
कान्तायोभस्म हिक्कानां पञ्चानां पञ्चतां नयेत्

र.क. ल., र..सु., हिक्कायाम् ।

भाषा—कान्तलोहकी भस्म मधुके साथ ३ रत्ती चढ़ाकर दशमूलका काढ़ा पिलानेसे पाँचों प्रकारकी हिचकियोंको दूर करती है ॥ १३८ ॥

१३९ कान्तयोगः

नीलज्योतिः कान्तचूर्णं रुदन्ती
धात्रीतोयै र्भावयेत्त्रैफलोत्थैः ।
मध्वाज्याभ्यां वत्सरार्धं प्रयोगा-
त्कुष्ठं शुभ्रं रोगजालं निहन्ति ॥
देहे दार्ढ्यं दिव्यदृष्टि र्बलश्च
वीर्यं शौर्यं जायते दीर्घमायुः ॥ ६४१ ॥

र. दी., र. र. स., रसायने ।

भाषा—बाकुचीके बीज, अपराजिताकी जड़, कान्तभस्म, रुदन्ती ये प्रत्येक समभागलेकर आंवले और त्रिफला इनकी अलग २ तीन तीन भावनाएं देकर। मधु और घीके साथ ३ माशेकी मात्रा खानेसे ६ महीनेमें सफेद कुष्ठ दूर हो। शिथिल पड़े हुए अङ्गमजबूतहोकर दिव्य दृष्टि हो। बल वीर्य और शौर्यको प्राप्त होता हुआ दीर्घायुको प्राप्त हो॥१३९॥

१४० कान्तरसः

कान्तलोहस्य पत्राणि कण्टवेध्यानि कारयेत्।
तत्समश्च रसो गन्धटङ्कणो निम्बवारिणा
ततः सम्पेष्य तं कल्कं मर्दयेत्त्रिदिनं पुनः ।
रसतुल्येन मत्स्यस्य पित्तेन परिभावयेत्६४३॥
सिद्धकान्तरसो ह्येष प्रयोज्योऽभिनवज्वरे ।
शृङ्गवेरानुपानेन मात्रया भिषगुत्तमैः ॥६४४॥

र. र. स., र. को., ज्वराधिकारे ।

भाषा—कान्तलोहके कण्टकवेधीपत्र बनाकर उसके बराबर पारेके साथ मिलाकर यहांतक मर्दन करे कि ये पत्र तमाम पारेमे एक जीव हो जावें। फिर उसमे पारेकी बराबर गन्धक और टङ्कण मिलाकर निम्बपत्रस्वरसदेकर ३ रोजमर्दनकरके सुखाकर सबकीबराबर मछलीकेपित्तेसे भावनादेनेसे यह कान्तरस सिद्धहोगा । एकएकरत्तीकी मात्रासे यथानुपान अथवा अदरखके रसके साथ देनेसे नवज्वरको दूर करता है॥ १४० ॥

१४१ कान्तरसायनम् (अमृतलोहः)

कान्तं तुल्याभ्रसत्त्वश्चरणपरिमितं
हेम तत्तुल्यमर्कं,
वैक्रान्तं ताप्यरूप्यं क्रिमिरिपुकटुकै
स्तुल्यभागैः समेतम् ।
लीढं देवद्रुतैले प्रवितरति नृणां
देहसिद्धिं समृद्धां,
पथ्यं पूर्वोक्तवत्तद्धरति च सकलं
रोगपूगं जवेन ॥ ६४५ ॥
तदेतत्सर्वरोगघ्नं रम्यं कान्तं रसायनम् ।
स्वर्यं वृष्यं सुपुत्रीयं मङ्गल्यं दीपनं परम् ॥

र. र. स., र. चू., रसायने ।

भाषा—कान्तलोह भस्म १ तो., अभ्रसत्व १ तो., सुवर्णभस्म $\frac{1}{4}$ तो., ताम्रभस्म $\frac{1}{4}$ तो., वैक्रान्त, सोनामाखी, रजतभस्म, विडङ्ग, सोंठ, मिरच पीपल ये सब एकएक तोला लेकर सबको चूर्णकर ३ रत्तीकीमात्रामे देवदारुकेतैलकेसाथ खानेसे मनुष्योंको देहसिद्धि प्राप्तहोतीहै । यह समस्त रोगोंको दूरकर मनुष्योंको दीर्घायुबनाताहै और पुत्रपौत्रादिवाला करताहै ॥ १४१ ॥

१४२ कान्तरसायनम्

रात्रौ कान्तशरावकस्थचणका-
भिन्नाजलैःस्वादुभिः,
प्रात र्मुष्टिमिताश्च ते प्रतिदिनं
षण्मासमासेविताः ।
हन्युः पित्तकफामयान्बहुविधान्
कुष्ठं प्रमेहांस्तथा,
पाण्डुं यक्ष्मगदञ्च कामलपदं
पथ्यञ्च तक्रं तथा ॥ ६४७ ॥
एतस्मादपुनर्भवं हि भसितं
कान्तस्य दिव्यामृतं,
सम्यक् सिद्धिरसायनं त्रिकटुकं
वेल्लाज्यमध्वन्वितम् ।
हन्याभिष्कमितं जरामरणजं व्याधींश्चसत्पुत्रदं,

दिष्टं श्रीगिरिशेन कालयवनोद्भूत्यै पुरा तत्पितुः

र. को., र. र. स., रसायने ।

भाषा—कान्तलोहकोनिरुत्थमस्मबनाकरत्रिकटु, विडङ्ग, मधु और घृतकेसाथखाकर रात्रिमें कान्तलोहके पात्रमें ४ तोले चने भिगोकर सुबहमें वे चने खाकर उस पानीको पीजावे । इस तरह ६ महीनेतक दररोज़ करनेसे यह कान्तरसायन सिद्ध होता है । इसमें तक्र पथ्य है । इसके खानेसे यह पाण्डु, राजयक्ष्म, कामला, जराव्याधि, इनको दूर करके अच्छी सन्ततिको देता है । यह प्रयोग महादेवजीने कालयवनकी उत्पत्तिके लिये उसके पिताको बतलाया था ॥ ६४९ ॥

१४३ कान्तलोहरसायनम्

गोमूत्रभृतकुम्भे तु स्थापयेत्त्रिफलार्मणम् ।
एकं द्वौ त्रींश्च सप्ताहान् यावत्सर्वं विलीयते ॥
रेतितं कान्तलोहस्य मणकं सूक्ष्मचूर्णकम् ।
त्रिफलामूत्रसंक्षुण्णं प्रक्षिपेच्छ्रावसम्पुटे ६५०॥
गर्ते हस्तप्रमाणे तु वेदाऽश्विच्छाणकै भृते ।
गर्तगर्भे पुटं क्षिप्त्वा युक्त्याग्निं ज्वालयेत्ततः६५१
स्वाङ्गशीतलवां प्राप्तं चूर्णं सम्पेषयेत्ततः ।
क्षुण्णं तेनैव मूत्रेण क्षिपेत्तच्छ्रावसम्पुटे ६५२॥
एकविंशतिवारांश्च देयो युक्त्यानया पुटः ।
सूक्ष्मं चूर्णं मुहुः कार्यं मूत्रं क्षुण्णं पुटेपुटे ६५३
चूर्णं कान्तायसन्नाम सिन्दूराभं पयस्तरम् ।
गद्याणकोऽस्य चूर्णस्य देयः सर्वेषु रोगिषु ६५४
यथौचित्येन रोगाणामौषधैः सहितः स हि ।
अष्टाष्टवल्लमाने द्वे गुडूचीसत्त्वशर्करे ॥६५५॥
शीतोदकसमं देयो गद्याणः पाण्डुरोगिषु ।
बलक्षीणे प्रमेहे च ताभ्यामेव विमिश्रितः६५६
मुस्तासत्त्वगुडूच्याश्च शर्करातिविषं तथा ।
वल्लाष्टकं पृथक् चैषां लोहञ्च मधुमिश्रितम्॥
ज्वरमष्टविधं हन्यादतिसारेषु सर्वतः ।
नाशयत्येव रोगांश्च कान्तलोहरसायनम् ६५८॥

र. कं., ली., रसार्चे., रसायने ।

भाषा—एक मज़बूतमिट्टीकेबासनमें गोमूत्रभरके १ मनत्रिफलाकोआठ अधकुट्टीकर उसमें छोड़दे, एक यादोयातीन सप्ताहतक पड़ारहनेदे, जबदेखे कि उसमें सब घुलगयी तब १ मन कान्तलोहकाचूर्ण रेतीसेघारीकरितवाकर उसमेंडालदे । और उसको खूब मिलादे । १० दिनकेबाद उसमेंसे १ सेरचूर्णको निकालकर कुछअरलमेंघुटवाकर किसीसम्पुटमें बंदकर एकहाथभरके गढ़ेमें कण्डोंकेबीचमें रख अग्नि देवे । स्वाङ्गशीतलहोनेपर निकालकर त्रिफलागोमूत्र-देकर मर्दनकरे औरपुटदेवे । ऐसे २१ पुट देनेसे यह सिन्दूरकेरंगका कान्तायस तैयारहोगा जोकि पानीमें डालनेसे डूबेगानहीं । इसकी एकरत्तीसे शुरूकर ९ रत्तीतकमात्रा बढ़ाकर तमामरोगोंमें ६ माशाखुराक नहोतबतक देवे । आपातोआतक इसका पूर्णप्रयोगहै । अनुपानमें जैसीयोग्यतादेखे वैसीदवाओंका कल्पनकरले, साधारणतः २४ रत्ती गुडूचीकासत्व, २४ रत्ती शक्कर और ३ रत्ती कान्तायस मिलाकर पाण्डुरोगीको ठंडेजलकेसाथदेना । बलक्षीणताऔरप्रमेहोंमेंभी इसी अनुपानकेसाथदेना । नागरमोथा, गिलोयकासत्व, शक्कर, अतीस, ये प्रत्येक ८ आठ रत्ती और कान्तायस ३ रत्ती मिलाकर देनेसे ज्वरसहित अतिसार नष्टहोताहै अन्यभीरोग इसके सेवनसे दूर होतेहैं ॥ १४३ ॥

१४४ कान्तवल्लभो रसः

तीक्ष्णं पारदशुल्बगन्धकरजः क्षारानलं पद्मकं
त्रायन्ती कुटजस्य बीजममृता भूनिम्बयुक्तां वटीं
कृत्वा पर्पटकद्रवेण सकफं पित्तं जयेदद्भुतं,
मुस्तोशीररसेन पर्पटरसेनैव स्वपथ्याशिनाम् ॥

र., रसेन्द्रसं., ज्वराधिकारे ।

भाषा—फोलाद, पारा, तांबा, गन्धक, सुहागा, चित्रक, पद्मकाठ, त्रायमाण, इन्द्रजव, गिलोय, चिरायता, इनसबको समभाग लेकर चूर्णकर लेना फिर पित्तपापड़े के काढ़ेसे एकदिन मर्दनकर इसकी तीनतीन रत्तीकीगोली बनाकर नागरमोथा

औरखसकेकाढ़ेकेसाथ अथवा पित्तपापड़ेके रसके साथ देनेसे कफकेसाथबिगड़े हुए पित्तको यह घटी दूरकरती है ॥ १४४ ॥

१४५ कान्तवल्लभो रसः

कान्तं षोडशभागं च लोहाच्चैव चतुर्दश ।
किट्टं द्वादशभागश्च दशभागं तु टङ्कणम् ६६०
मनःशिलामष्टभागां षड्भागं च शिलाजतु ।
सर्वेण च समं सूतं गन्धकं चापि तत्समम् ६६१
अन्धमूषोदरे न्यस्य वालुकायन्त्रके क्षिपेत् ।
पाचयेत्सप्तरात्रं तु सह्याद्यं सूक्ष्मचूर्णितम् ६६२
सेवितं मधुना युक्तं निष्कार्धेन समन्वितम् ।
पाण्डुरोगं क्षयं गुल्मं ग्रहणीरोगनाशनम् ६६३
कासं श्वासं ज्वरं हिक्कां प्लीहोदरमरोचकम् ।
मन्दाग्निं कुष्ठरोगं च मूलरोगं भगन्दरम् ६६४
वातशूलहरं वृष्यमत्यन्तमतिदीपनम् ।
तुष्टिपुष्टिकरं कान्तिवर्धनं बलवर्धनम् ६६५ ॥
कान्तवल्लभनामायं विष्णुना निर्मितः पुरा ।
सर्वपाण्डौ क्षये चैव लोकस्यारोग्यकारणम् ६६६

वै. चि., सर्वक्षये ।

भाषा—कान्तभस्म १६ भाग, लोहभस्म १४ भाग, मण्डूर १२ भाग, सुहागा १० भाग, मैनसिल ८ भाग, शिलाजतु ६ भाग, इनसबकीबराबर पाराऔरगन्धक लेकर घीकुआंरअथवा तुलसीकेरसमेअथवा वैसेहीमर्दनकर अन्धमूषामे रखकर बालुकायन्त्रमे ७ दिनकीआंचदेकर पकावे । स्वाङ्गशीतलहोनेपर निकालकर बारीकचूर्णकर २ माशेप्रमाण मधुकेसाथ सेवनकरनेसे पाण्डुरोग, क्षय, गुल्म, ग्रहणी, श्वास, कास, ज्वर, हिचकी, प्लीहा, उदररोग, अरुचि, मन्दाग्नि, कुष्ठ, बवासीर, भयंकरवातशूल, इनसबको यह दूर करता है । वृषता, तुष्टि, पुष्टि, कान्तिऔरबलकोबढ़ाताहै कान्तवल्लभ इसकानाम है । हरदरजेकेपाण्डु और क्षयकेलियेखास औषध है ॥ १४५ ॥

१४६ कान्तादिवटी

अयस्कान्तश्च कृष्णाभ्रं पञ्चनिष्कं पृथक्पृथक् ।
अयोमलाश्च तत्तुल्यं तेषां द्विगुणिताम्भसा ॥
एतच्चूर्णं परिस्राव्यं त्रिफलाक्वाथमर्दितम् ।
निष्कमात्रां तु गुटिकां सममाकुलिबीजकम् ॥
पिष्ट्वा तक्रेण मधुना सर्वमेहविनाशनम् ॥६६८

वा., मेहे ।

भाषा—कान्तलोहभस्म और कृष्णाभ्रकभस्म ५–५ निष्क, औरमण्डूरदोनोंकीबराबर औरइनसबसेदूना पानीलेकर इसमे इनकेचूर्णको डालदे और उसको थोड़ाहिलाकर थोड़ीदेरबाद पानीनिकालदे । फिरत्रिफलाकेक्वाथसे मर्दनकर १ टंककीगोलियें बना कर रखछोड़े । इसमेसे १ गोली औरउसीके बराबर अंकोलबीजकीमज्जा डालकर छाछमे पीसकर पीनेसे समस्तप्रमेह दूरहोते हैं ॥ १४६ ॥

१४७ कान्ताभ्ररसायनम् (प्रथमम्)

कान्ताभ्रकशिलाधातुविषसूतकमाक्षिकम् ।
शीलितं मधुसर्पिर्भ्यां व्याधिवार्धक्यमृत्युजित्

र. र. स., व्याधिवार्धक्ये ।

भाषा—कान्तभस्म, अभ्रकभस्म, मैनसिल, बछनाग, पारा, सोनामाखी, येसबशुद्ध औरमारेहुए बराबरलेकर खूबबारीककरके इसमेसे १ या १½ रत्तीकी मात्रा मधु और घीके साथ खानेसे मृत्यु और बुढ़ापेको दूरकरती है ॥ १४७ ॥

१४८ कान्ताभ्ररसायनम् (द्वितियम्)

कान्ताभ्रत्रिफला विडङ्गरजनी
ताप्याब्ददेवद्रुमम्,
व्योषैलाङ्घ्रिपुनर्नवार्द्रगिरिजा-
क्कोलैः समं गुग्गुलुम् ।
पिष्ट्वा भृङ्गजलेन सूक्ष्मगुटिकां
खादेद्यथासात्म्यतो,
मेदः श्लेष्मसमीरणोल्बणगदेष्वन्येषुवा पूरुषः॥

र. र. स., वातकफरोगे ।

भाषा—कान्तभस्म, अभ्रकभस्म, त्रिफला, विडङ्ग, हल्दी, सोनामाखी, नागरमोथा, देवदारु, त्रिकटु, इलायची, पिपलामूल, पुनर्नवा, सोंठ, शिलाजतु, और अङ्कोल इनसबकी बराबर गुग्गुलु लेकर

भंगरेकेरसके खूबसूरतपीसकर एकअथवा दोमासेकी मात्रा मेद, श्लेष्म और वायुप्रबलरोगोंमें खानेसे आदमी निरोग होता है ॥ १४८ ॥

१४९ कान्ताभ्ररसायनम् (तृतीयम्)

शुद्धमभ्रसमं कान्तं मर्दयेदार्द्रकद्रवैः ।
कलांशं हेमचूर्णस्य बीजपूररसे पुनः॥ ६७१ ॥
मर्दयेत्खल्वमध्यस्थं यावत्सप्तदिनावधि ।
आटरूपरसेनैव तथा मुण्डीरसेन वा ॥ ६७२ ॥
तालमूलीरसेनैव दशमूलरसेन वा ।
तत्तद्रोगहरैः क्वाथैः भावयेत्सप्तधा भिषक्
त्रिफलाव्योषचूर्णञ्च मध्वाज्याभ्यां प्रयोजयेत् ।
पञ्चकर्मविशुद्धेन सेव्यमेतद्रसायनम् ॥६७४॥
पाण्डुशोफोदरानाहग्रहणीशोषकासजित् ।
सन्ततं सततञ्चैव पुराणं विषमज्वरम्॥६७५॥
निहन्यात्सर्वकुष्ठानि प्रमेहान्विंशतिञ्जयेत् ।
कान्ताभ्रकमिदं श्रेष्ठं रसायनमनुत्तमम् ६७६ ॥

र. को., र. र. स, र. र. कौ., रसायने।

भाषा—अभ्रकभस्म, कान्तभस्म, ये समभाग, लेकर अदरखके रसमें १ रोज़ मर्दनकर अभ्रकका सोलहवांहिस्सा सुवर्णभस्म डालकर बिजौरा, अडूसा, गोरखमुण्डी, तालमूली, दशमूल, इनप्रत्येकके रसोंसे अथवा खास किसी रोगके लिये तैयार करना हो तो तद्रोगहरौषधके रस अथवा क्वाथसे सातसात रोजभावना देकर उसमेंसे २ रत्तीकी मात्रा त्रिफला, त्रिकटु एक एक माशा, मधु और घीमें मिलाकर खानेसे यह उत्तम रसायनका काम करता है । यह अगर पञ्चकर्म करके दिया जाय तो, पाण्डु शोथ, उदर, आनाह, ग्रहणी, शोष, कास, सन्तत, सतत, पुराना और विषमज्वर, तमामकुष्ठ और बीस प्रकारके प्रमेहोंको दूर करता है ॥ १४९ ॥

१५० कामकलारसः

मृताभ्रं पारदं स्वर्णं तुल्यं मर्द्यं दिनत्रयम् ।
मुशलीत्रिफलाक्वाथै र्वाजिगन्धाकपायकैः ६७॥
कदलीकन्दजै र्द्रावैस्तद्गोलं चान्धितं पुटेत् ।
भूधरे दिनमात्रं तु समुद्धृत्याथ मर्दयेत्॥६७८॥
दिनकं पूर्वजै र्द्रावै स्तद्वद्रुद्ध्वा पुटे पचेत् ।
पुन र्मर्द्यं पुनः पाच्यमेवमष्टपुटैः पचेत् ॥६७९॥
शाल्मलीजातनिर्यासैस्तुल्यं शर्करया सह ।
माषैकमिश्रितं नित्यं द्रावयेद्वनिताशतम्६८०॥
गोक्षीरं मर्कटीबीजं पलार्धं पाययेदनु ।
सर्वाङ्गोद्वर्तनं कुर्याद्यवैः शाल्मलीद्रवैः ॥
रसः कामकलाख्योऽयं महावीर्यकरो नृणाम्॥

र. सं., र. र., भ., वाजीकरणे।

भाषा—अभ्रकभस्म, शुद्धपारद और सुवर्णभस्म सबसमभाग लेकर । मुसली, त्रिफला, असगन्ध और कदलीकन्द इनप्रत्येकके रसोंसे तीनतीनदिनमर्दनकरके इसकागोलाबनाकर अन्धमूषामें रखकर एकदिनपकाना । स्वाङ्गशीतल होनेपर निकालकर पहिलेकहेहुए रसोंसे मर्दनकर पुटदे । इसतरह बारम्बारकरताहुआ आठपुटदे । फिरइसमेंसे १ माशा या दोमाशाकी मात्रालेकर बराबरभागमें मोचरसमिलाकर अन्दाजसे शक्करदेकर खिलानेसे यह सैकड़ों स्त्रियोंकेसाथ रमणकरातकाहै । इसरसको खानेकेबाद केवांचकेबीजोंकाचूर्णदोतोला गायकेदूधकेसाथ खिलाना । जवकाआटा सेमलकेरसमें सानकर तमामशरीरमें लगाना । यह कामकलाख्य रसहै यह अत्यन्तवीर्यको करनेवालाहै ॥ १५० ॥

१५१ कामकलावटी

अङ्कोठमूलं त्रिफला कुण्डली मरिचं निशा ।
सप्तच्छदा कुटी कुष्ठं प्रत्येकं कार्षिकं भवेत् ॥
विडङ्गमुस्तकं काचं तालकं टङ्कणं त्रिवृत् ।
रसगन्धकलोहानां प्रत्येकार्द्धपलं क्षिपेत् ॥६८२
गुग्गुलं त्रिपलं दत्त्वा घृतेन परिपेषितम् ।
वटी कामकला नाम महाबन्धप्रणीता
चतुर्माषा
वातरक्तं निह
कुष्ठं नानावि
दद्रं

भगन्दरोपदंशांश्च विद्रधीं गर्दभार्बुदे ।
श्लीपदं शोथशूलानि कासश्वासमरोचकम् ॥
प्लीहगुल्मोदराष्ठीलामेहमेदोगलामयान् ।
जीर्णज्वरं तथानाहं पाण्ड्वादि त्रितयं जयेत् ॥
सङ्ग्रहग्रहणीं दुष्टां बलवर्णाग्निवर्धनीम्॥६८८॥

र. र., कुष्ठाधिकारे—

भाषा—अङ्कोलकीजड़कीछाल, त्रिफला, गुडूची, मिर्च, हल्दी, सप्तपर्ण, कुटकीऔरकुठ येप्रत्येक १ तोला, विडङ्ग, नागरमोथा, काचभस्म, हरितालभस्म,सुहागा,निशोत,पारागन्धक औरलोह येप्रत्येक ३/२ पल, गुग्गुल ३ पललेना। पहिलेगुग्गुलको घीके साथ कुटवाना जबवह कुटतेकुटते पानीजैसाहोजाय तब उसमे अन्यऔषधियोंको बारीककरके धीरे२डालना और कूटतेजाना जबसाराएकजीवहोजाय तब उसकी ४–४ माशेकी गोलीबनाकर गोमूत्रकेसाथ लेनेसे नानादोषोंसे भयाहुआवातरक्त, दद्रु, कण्डु, विचर्चिका, व्रण, बवासीर, गुल्म, गण्डमाला, भगन्दर, उपदंश, विद्रधि, गर्दभ, अर्बुद, श्लीपद, शोथ, शूल, कास, श्वास, अरुचि, प्लीहा, गुल्म, उदर, अष्ठीला, प्रमेह, मेद, गलेकेरोग, जीर्णज्वर, पाण्डु, हलीमक, कुम्भकामला, सङ्ग्रहग्रहणी इनसबको दूरकर बल, वर्णऔर अग्निको बढ़ातीहै ॥ १५१ ॥

१५२ कामचूडामणिरसः

मौक्तिकं माक्षिकञ्चैव स्वर्णभस्म पृथक्पृथक् ।
कर्पूरं जातिकोषश्च जातीफलवङ्गकम्॥६८९॥
वङ्गभस्म तथा ग्राह्यं रूप्यं चापि तदर्धकम् ।
चातुर्जातञ्च सङ्ग्राह्यं सर्वमेकत्र चूर्णितम् ६९०
शतमूलीरसेनैव भावयेत्सप्तवारकम् ।
ततोगुञ्जाप्रमाणेन वटिका भिषजा कृता ६९१
अनुपानविशेषेण रोगाकरविनाशिनी ।
शीतं पयोऽनुपानञ्च कामिनीः कामयेच्छतम्
वीर्यहीनो भवेद्यस्तु यो वा स्यात्पतितध्वजः ।
सोऽशीतिवार्षिको वापि युवेव रमतेऽङ्गनाः६९३
भेषजै र्विविधैः किं स्यादन्यैश्च शतसङ्ख्यकैः ।

र. सा. ३४

फलं न किञ्चित्तत्रास्ति केवलं गौरवं मुहुः ॥
नातः परतरं किञ्चिदस्ति पुष्टिकरं भुवि ।
अतः सर्वप्रयत्नेन सेव्यं भूमिभुजा सदा ६९५
विशेषाद्ध्वजभङ्गांश्च सप्ताहेन विनाशयेत् ।
प्रमेहं मूत्ररोगञ्च मन्दाग्निं श्वयथुं तथा ॥
रक्तदोषञ्च नारीणां पानदोषं विनश्यति ६९६

आ. वि. शुक्रमेहे ।

भाषा—मोती, सोनामाखी, सुवर्णभस्म, कपूर, जावित्री, जायफल, लौंग, बङ्गभस्म, रजतभस्म सब एकएकभाग, इनसबसे आधाचातुर्जात (तज, पत्रज, इलायची, नागकेसर) लेकर सबकाबारीकचूर्णकर एकजगहमिलाकर शतावरकेरसकी सातभावनादेकर एकएकरत्तीकी गोलियें बनाकर तत्तद्रोगहरानुपानेके साथ देनेसे तत्तद्रोगोंको दूरकरताहै ।इसकेऊपर ठंढादूधपीनेसे स्त्रियोंमे सम्भोगेच्छा बढ़तीहै । जो आदमी वीर्यहीनहैं किंवा गतध्वजहैं या अस्सीबरसके बुड्ढेहैं वेभी इसकेसेवनसे जवानजैसे मालूमपड़ते हैं । इसविषयमे बहुतसीदवाइयांहैं परउनके खानेसे केवल शरीरमे मेदबढ़नेके सिवाय औरकुछफलनहीं होता, इसकेसेवनकरनेसे आदमी अपनेमनोरथको पूर्णकरसक्ताहै । असाध्यसेअसाध्य ध्वजभङ्गको यहयोग सातदिनमे अच्छाकरसक्ताहै । प्रमेह, मूत्ररोग, मन्दाग्नि, शोथ, रक्तदोषऔरस्त्रियोंकेसमस्तरोग इससे नष्टहोतेहैं ॥ १५२ ॥

१५३ कामदो रसः

हेमबीजविषवङ्गसूतकं हंसपादकरभश्च जारण
नागवल्लिदलजातभावितः
कामदःसकलमेहनाशनः ॥ ६॥७२१॥

रसायनसं., र. सं. क., रससारसङ्ग्रह.
प्रमेहाधिकारे । रससारसङ्ग्रहे, कनकसुन्दरी-से, पारा, लोह,

भाषा—धतूरेकेबीज, वछनाग, और मारेहुए शिंगरिफ, अकलकरा और अभ्रक केरसको एक दो पानकेरसमे एकदोरोजघोटकर शीशीमे रखकर गुड़चूबनालेना । यथोचितानुपानकर देना । सूखनेपर बालु- प्रमेहोंका नाशकरताहै ॥ १५ आंचदेना, स्याहशी-

तल होनेपर निकालकर आककादूध, कास, पद्मकन्द, मुसली, गोखरू, काकोली, असगन्ध, सोंफ और जवासा इन प्रत्येकके दूध, अङ्गस्वरस अथवा क्वाथसे एक एक अलग २ भावना देकर। सुखाकर इसमे त्रिकटु, कपूर, केसर, इलायची, लौंग, कस्तूरी, इन सबका चूर्ण पूर्वरससे छठा हिस्सा मिलाकर सबकी बराबर शक्कर मिलावे। यह कामदेव रस तैयार हुआ। इसमेंसे चार ४ माशेकी मात्रा देकर शक्कर मिलाहुआ दूध पिलावे। जीर्ण होनेपर मिष्टान्न खिलावे, अम्ल भूलकर न खाय, इससे ओज, तेज, बल सौन्दर्य ये बढ़तेहैं। स्त्रियोंका सम्भोग करनेपरभी वीर्यमें किसी तरहकी हानि नहीं पहुंचती। इस लिये वृष्ययोगोंमे यह सबसे श्रेष्ठ योग है ॥ १५९॥

१६० कामदेवोरसः (द्वितीयः)

तारं हिङ्गुलसीसकाभ्रसहितं लोहञ्च वङ्गं तथा,
वृद्ध्यांशै रसभस्मना विचिनुयात्सर्वं च खल्वे शुभे
मर्देद्धूर्त्तजयारसेन मुसलीनीरेण तत्सप्तधा,
सिद्धोऽयं किल कामदेवरसराड् राज्ञांभवेद्वल्लभः
वल्लैकप्रमितोऽनुपानसहितः सर्वान्गदान्नाशयेत्,
स्तम्भे निस्तुपभृष्टचाणकजया
जातीसिताज्यै र्युतम् ॥
पुष्टौ साज्यसिताविदारिमुसली
युक्तम्प्रभाते लिहेत् ॥
स्त्रीणांयौवनदर्पगर्वितशतानां द्रावणे विक्रमम्

वृ. यो. त., वाजीकरणे

भाषा—पारदभस्म १भाग, रजतभस्म२भाग, शिंगरफ ३ भाग, नागभस्म ४ भाग, अभ्रकभस्म ५ भाग, लोहभस्म ६ भाग, बङ्गभस्म ७ भागलेकर सबको खरलमे डाल धतूरा, भांग, मुशली, इनप्रत्येकके रससे सात२ भावनादेकर सुखाकर धररक्खे। यह कामदेव रसतैयारहुआ यहराजालोगोंकेलिये बहुतहीप्रियहै इसको ३ रत्तीकीमात्रामे अपने२ अनुपानके साथदेनेसे समस्तरोगोंको दूरकरताहै। यदिशुक्रस्तम्भनकेलिये इसकाप्रयोगकरनाहोतो छिलकेरहितसिकेहुएचने औरासेकीहुईभांग, जावित्री, शक्कर औरघीइनकेसाथ मिलाकर देनाचाहिये। पुष्टिकेलियेघीशक्कर, विदारीकंद औरमुशलीके चूर्णकेसाथ प्रभातमेचटाकर दूधपिलानाचाहिये। अनुपानकाप्रमाण अग्निबलको देखकर कायमकरले। इसकोखानेवाला मदोन्मत्त सो स्त्रियोंसेभी नहीं हारता ॥ १६० ॥

१६१ कामदेवोरसः (तृतीयः)

मृतसूतत्रयोभागा भागैकं हाटकं मृतम् ।
कदलीकन्दजैर्द्रावैः शाल्मलीसम्भवै दिनम् ॥
गोक्षीरैश्च दिनं मर्द्यं क्षणंकं पाचयेद्घृतैः ।
तन्मध्ये शर्करां द्राक्षां धात्रीं रम्भाफलं मधु ॥
गोक्षीरं मुशलीमाषान् कोकिलाक्षस्य बीजकम्
सूताच्चतुर्गुणं क्षिप्त्वा मर्द्यं शाल्मलिकाद्रवैः ॥
तत्सर्वं दिनमेकन्तु कामदेवो रसो भवेत् ।
निष्कमात्रं सदा भक्षेद्दवां क्षीरं पिबेदनु ॥
मैथुने दृढलिङ्गः स्याद्द्रावयेद्वनिताकुलम् ७२७

र. खं., र. र. स., र. को., वाजीकरणे।

भाषा—पारेकीभस्म३ भाग, सुवर्णभस्म १भाग, इनकोइकट्ठेकर कदलीकंदकारस, सेमलकीछालकारस औरगायकादूध इनप्रत्येकमे एकरएकदिन मर्दनकर गोलीबनाकर घीमेयहांतकपकानी कि गोलीलालहो जाय। फिरउसकोनिकालकर चूर्णकर शक्कर, द्राक्ष, आंवला, केलेकाफल, मधु, गायकादूध, मुशली, उड़द, तालमखाना येसबपारेसेचतुर्गुणित डालकर एकदिनशाल्मलीके रससे मर्दनकरेतो यह कामदेव-रस तैयारहोगा। इसकी ४ माशेकीमात्रा खाकर दूधपीनेसे स्त्रियोंमे दृढशक्ति होताहै ॥ १६१ ॥

१६२ कामदेवोरसः (चतुर्थः)

अभ्रं शुल्वं केशरं लोहचूर्णं
जातीपत्रं सर्पफेनं लवङ्गम् ।
एलासूतं क्षीरकङ्कोलनागं
जातीजातं कङ्कणीजैश्च युक्तम् ॥७२८॥
अब्धेःशोषं यष्टिकाक्षप्रमाण-
क्षौद्रै र्मिश्रं मिश्रमाकल्कनेन ।

क्षीणे वीर्ये रेतसां सागरोऽयं
दद्यात्प्रातर्वीटिकायांद्विवल्लम् ॥७२९॥
गच्छेन्नारीं साध्ययोगात्सहस्रं
वृद्धो देही यातितारुण्यलक्ष्मीम्।
रामावश्यं सर्वकाले ऋतौ च
प्रोक्तो वैद्यैः कामदेवो रसोऽयम्७३०॥

चि. र. भ., वाजीकरणे ।

भाषा—अभ्रकभस्म, ताम्रभस्म, केशर, लोह भस्म, जावित्री, अफीम, लौंग, इलायची, पारदभस्म, क्षीरकाकोली, नागभस्म, जायफल, शीतलचीनी, समुद्रशोष, अकलकरा, येसबसमभागले कर चूर्णकरके रखछोडे । यह कामदेवरस तैयार हुआ । इसमेसे ६ रत्तीकीमात्रा शहदमे खरलकर पानमेलगाकर देवे ऊपरसे दूधपिलावे, यह क्षीणवीर्यपुरुषोंकेलिये शुक्रसागरहै । कुछदिनोंतक इसका सेवनकरनेसे गतवीर्य औरवृद्धआदमीभी तरुणताको प्राप्तहोकर स्त्रियोंमे तरुणकेसमानही कामकरसक्ताहै । इसकेसेवनकरनेवालेके स्त्रियांवशीभूत रहती हैं १६२

१६३ कामदेवोरसः (पञ्चमः)

सूतं गन्धं कान्तभस्मापि तुल्यं
यामं नीरैः शाल्मलीसम्भवोत्थैः ।
गोलं कृत्वा वेष्टयित्वाऽथमाषै
राज्ये पक्त्वा काचकूप्यां निधाय ७३१
भूकूष्माण्डं नागवल्लीश्च पिष्ट्वा
तोयं दद्याद्रात्रिमेकां प्रयत्नात् ।
सिद्धः सूतः कामदेवोऽस्य वल्लं
मध्वाज्याभ्यां योजयेत्तत्रिसप्तम् ७३२
खण्डं दुग्धं चानुपाने च दद्या-
द्रात्रौ दुग्धं शक्तिमानेन देयम् ।
तिक्तं रूक्षं वर्जयित्वातिचाम्लं
पेयं नित्यं शाल्मलीनीरयुक्तम् ॥७३३॥
खण्डं धात्रीवानरीमूलदुग्धं
पुष्टिर्वीर्यं जायते तत्प्रभूतम् ।
कुर्यान्नित्यं रम्यकान्ताविनोदं
कृत्वा दिव्यं कामदेवं रसेन्द्रम्॥७३४॥

र. र., र. ल., र. मु., ध., र. दी., वाजीकरणे । रसदीपिकायां मदनकामदेवनाम ।

भाषा—शुद्धपारा, गन्धक, कान्तभस्म, येसबसमभागलेकर सेमलकीछालकेरससे मर्दनकर और गोलाबनाकर उड़दकेआटेसे वेष्टितकर गोलेकोवीमे यहांतकपकावेकि ऊपरकाआटालालहोकर जलनेकीतैयारीमेहोजाय फिर उसकोनिकालकर आतशीशीशीमे डालकर भुंईकुम्हड़ाऔरपानकेरसकोशीशीमेडालकर लघुवालुकायन्त्रमे रखकर रात्रिभरपकावे । सुबहमे गोलीकोनिकालकर पोंछकरधररक्खे । यह कामदेवरस तैयारहुआ इसकी२रत्तीकीमात्रा मधुऔरघीमेमिलाकर २१रोजतकदेवे ऊपरसे खांडमिलाहुआ दूधपिलावे । रातमेजितनादूधहजमकरनेकीशक्तिहो उतना पीनेकोदे, तिक्त, रूक्षऔरअम्ल इनकोछोड़कर सेमलकारसमिलाहुआ अथवा आंवलाऔर केवांचकीजड़काचूर्णमिलाहुआदूध पीनेकोदे । इससे पुष्टिऔरवीर्य अत्यन्तप्रमाणमे उत्पन्न होते हैं ॥ १६३ ॥

१६४ कामदेवोरसः(षष्ठः)

सूतो माषमितःस्वदोषरहितस्तत्तुर्यभागो बलिः,
स्तन्मानस्तुभुजङ्गफेनउदितःक्षुद्राफलस्याम्बुना
एतद्गोलकमाकलय्य विपचेत्क्षुद्राफलेहेमजे,
पिष्टारूयाष्टपुटैःपचेदितिरसःश्रीकामदेवाभिधः
मात्रांसूर्योदयेगुञ्जामेकांयामचतुष्टये ।
गुञ्जाचतुष्टयंदेयं नागवल्लीदलान्वितम् ॥
दुग्धौदनं स्वलवणं रात्रौक्षीरंपयेच्छया॥७३६॥

र. मु.,टो., वाजीकरणे, टोडरानन्देकामदेवस्तम्भनंनाम।

भाषा—सबदोषोंसेरहितपारा१माशा,शुद्धगंधक ३ माशा,अफीम३ माशा लेकर भटकटैयाके फलकेरससे मर्दनकर गोलीबनाकर भटकटैयाके फलमेरखकरइसको धतूरेके फलमेरखदे उसपर उड़दका आटालपेटकर धीमे आटालाल होनेतक पकावे। फिर गोलीको निका-

लकर पूर्ववत्पकावे। इसतरह आठवार पकानेसे यह कामदेवरस तैयारहोगा, इसकी १ रत्तीकीमात्रा सूर्योदय होनेकेवाद देनी चाहिये। ४पहरबीतनेके बाद पानमे ४ रत्तीकी मात्रा देकर दूध औरचावल नमकरहित खिलावे। रातमे जितनी इच्छाहो उतना दूधदे। इससे आदमी ध्वजभङ्गादिसे निवृत्तहोकर पुरुषत्वको प्राप्तहोतेहैं ॥ १६४ ॥

१६५ कामदेवो रसः (सप्तमः)

रसगन्धकताम्राणि काचं सीसं समंसमम्।
पिप्पली त्रिवृता शुण्ठी धान्याकश्च हरीतकी ॥
रसस्तत्त्रिगुणो ग्राह्यः प्रत्येकं चूर्णमेव च।
रसपादं प्रदातव्यंहिङ्गुचैवयवानिका ॥ ७३८ ॥
अर्धमाषा वटीकार्याखादेदेकांयथाबलम्।
निहन्तिश्लीपदंरोगंदोषत्रयसमुद्भवम् ॥७३९॥
पैत्तिके भक्षयेद्यूषं श्लैष्मिके शुण्ठिसैन्धवम्।
वातिके तक्रभक्तानि विष्टम्भं परिवर्जयेत् ७४०
कामदेवरसश्चायं तद्वद्देहं करोत्यलम्।
श्रीमद्गहननाथेन रचितो विश्वसम्पदि ७४१॥

र. र., श्लीपदे।

भाषा—पारा, गन्धक, ताम्रभस्म, काचभस्म, सीसवसमभाग, पीपल, निशोत, सोंठ, धनियां, हरडयेप्रत्येक पारेसेतिगुने, हींगऔरअजवाइन पारेसेचतुर्थांश लेकर। पानअथवा अदरखकेरससे घोटकर आधेआधेमासेकी गोलीबनाकर यथादोषानुपानसे देनेसे तीनोंदोषोंसे भयेहुएश्लीपदरोगको यहनष्टकरतीहै। पित्तप्रधानरोगमे इसपर मुद्गयूषदे, कफप्रधानमे सोंठऔरसैन्धवदे, वातप्रधानमे छाछभातदे औरविष्टम्भकरनेवाली चीजोंसे परहेजरक्खे। यहकामदेव रसहै कामजैसा शरीरबनादेताहै लोगोंकीशरीरसम्पत्तिकेलिये गहनानन्दने इसकोबनायाहै ॥ १६५ ॥

१६६ कामदेवोरसः (अष्टमः)

अहिफेनं चाब्धिशोषं त्रिसुगन्धश्च पिप्पली।
जातीफलं धूर्तबीजं गान्धारीबीजसंयुतम् ७४२
तद्द्रवै र्भावयित्वा त्रिः सूक्ष्मचूर्णानि कारयेत्।
सेवयेद्वल्लमात्रेण रमते कामिनीशतम् ॥७४३॥

टो., वाजीकरणे

भाषा—अफीम, समुद्रशोष, तज, पत्रज, इलायची, पीपल, जायफल औरमरसाकेबीज येसबसमभागलेकर मरसाकेरससे तीनभावनादेकर बारीकचूर्णकररक्खे, इसका ३ रत्तीचूर्ण दूधऔरशक्करके साथलेनेसे मनुष्य पुरुषत्वको प्राप्तहोताहै ॥ १६६ ॥

१६७ कामदेवोरसः (नवमः)

श्वेताङ्कोलरसेन पारदपलं सम्मर्द्य सप्ताहतस्तत्तुल्यं कनकं तयोःसमतुलं गन्धं विशुद्धं पुनः
मर्द्यं श्वेतहयारिरक्तदहनैस्तालीरसैः सप्तधा,
गोलं छागलमांसवेष्टितमथो माषैः प्रपिष्टैस्तथा
तप्ते तैलघृतेऽथवा विनिहितं सिन्दूरतुल्यं यदा,
जातं तत्क्षणमुद्धरेन्मधुसितासर्पिर्युतं क्षीरपः।
भोज्यंलड्डुकपायसं ह्यनुदिनं सेवेत वन्ध्यां स्त्रियं
भोगान्सर्वकृतद्भवान्सकुसुमान्
कन्दर्पकेलीप्रियान् ॥ ७४५ ॥

र. प., वाजीकरणे।

भाषा—शुद्धपारा४तो०, सुवर्णभस्म ४ तो०, गन्धक८तो० श्वेतअङ्कोलकेरससे७ दिनतकमर्दनकरे, फिरश्वेतकनेरऔर चित्रककेरसोंसे सातसातभावनादेकर गोलाबनाले, उसगोलेको बकरेकेमांसकी कीमामेरखकर उड़दकेआटेको भिगोकर उसकेऊपरलपेटदे। फिरइसगोलेको तैलऔरघृत समभागलेकर उसमे यहांतकपकावे कि गोलाएकदमलाल होजाय-उसको तुर्तनिकालकर रखछोड़े। इसमेसे २ रत्तीलेकर मधु, शक्करऔरघीकेसाथ सेवनकरे औरऊपरसे दूधपीवे। खानेको लड्डू और दूधपाक खाय, बन्ध्यास्त्रीसे सम्भोगकरे ॥ १६७ ॥

१६८ कामदेवोरसः (दशमः)

सूतं गन्धकसम्मितं त्रिकटुकं क्वाथेन सम्मिश्रितं
गोलं क्षीरविदारिकन्दविवरे न्यस्तं प्रलिप्तं पुनः
माषै र्लिप्तमथोऽङ्गुलेन विमले गव्ये घृते पाचितं

तच्चूर्णं पलसम्मितं द्विपलकं सत्त्वं गुडूच्याः पुनः
द्राक्षाकच्छुफलं तिला वरिजये
प्रत्येकर्कं पालिकम्,
मोचाया द्विपलं यवाःशरपला यष्टी द्विमुष्टिःशुभा
कृष्णाधात्रिवलात्रयेक्षुकदलीकन्दैः क्रमाद्भावये-
त्सर्वं सप्तदिनं निवेश्य विमले पात्रे सितामिश्रितं
मापद्वन्द्वमितं भजेत्तिलघृतं दुग्धेन पिष्टं पिबे-
द्रूष्ये ग्राम्यकलिङ्कचञ्च पतति श्रीकामदेवोरसः

र. प., वाजीकरणे ।

भाषा—पारा, गन्धक बराबरलेकर त्रिकटुके क्वाथसे दोतीनदिनतकमर्दनकर गोलीबनाकर क्षीरविदारीके कंदमे रखकर उसीकीमज्जासे मुंहबंदकरदेना । ऊपरसे उड़दके आटेका १ अङ्गुलमोटास्तरचढ़ाकर शुद्धगायकेघीमे उसकोपकावे । आटाजबलालहोजाय तबउसकोनिकालकर स्वाङ्गशीतलहोनेपर कंदमेसे निकालकर उसमेसे १ पललेकर गुडूचीकासत्व २ पल, द्राक्ष, केवांचकेबीज, तिल, शतावरी, भांगयेप्रत्येक एकएकपल, केलेकाकंद२पल, जव छिलकेरहित५पल, मुलहठी२पल, इनसबको इकट्ठे लेकर खरलमे मर्दनकर पीपल, आंवला, बला, नागबला, अतिबला, केलेकाकंद इनप्रत्येकके स्वरसअथवा क्वाथकी सातसातभावनादेकर अच्छेपात्रमे रखदे । यह कामदेवरस तैयारहुआ, इसमेसे २माशेकीमात्रा लेकर इसमे शक्कर, तिल, घृत, इनसबको दूधमे घोटकरपीवेतो घरकीचिड़ियोंकीतरह कामकलामे प्रवृत्तहो ॥ १६८ ॥

१६९ कामदेववटी

कुष्ठं कट्फलसैन्धवं त्रिकटुकं मेथी यवानीद्वयं,
वासा मोचरसंविदारिमुसलीजातीफलंचित्रकम्
जीरश्चापरजीरकं गजकणा द्राक्षामया वानरी,
तालीसं त्रिसुगन्धिकं त्रिलवणं चैभीतकं शृङ्गिका
रम्भाकन्दशतावरीहयशटीयष्टीप्रियालास्मृताः,
जातीपत्रलवङ्गकेसरजलं गोक्षुरकं शाल्मली ।
धात्रीमापपुनर्नवाथ कनकं शृङ्गाटकं मस्तकी,
मांसी चापिबलात्रयंच नलदंभार्गीमकर्णस्तिलाः
कङ्कोलं करहाटकं च विजयाश्रीरुग्रगन्धाकुहू-,
मज्जा पञ्चकबीजमेतदखिलं चूर्णीकृतंस्निग्धकम्
एतत्कर्पमितं पृथक्पृथगथो तुर्यांशतुल्यां जयां,
तस्या अर्धमितं मृताभ्रकमहो वङ्गं तदर्धं क्षिपेत्
लोहं मारितमेतदर्धममलं सूतं तदर्धं मृतं,
सर्वेभ्यो द्विगुणा सिताऽथ मधुना
चाऽऽज्येन सम्मिश्रयेत् ।
कार्यास्तस्य पलार्धमानवटिकाःखादेद्यथाग्नि प्रगे
नक्तं चापि जराविपत्तिशमनीमेकाश्च दुग्धं पिबेत्
एषा सौगतसिंहनामभिषजा लोके प्रकाशीकृता,
हम्मीराय महीभुजे शतवधूसम्भोगभाजे भृशम्
एषा वीर्यकरी महामयहरी क्षुद्बोधतेजस्करी,
कान्ति स्थौल्यमतिप्रकाश
जननी चित्तामयध्वंसिनी ॥
तारुण्योद्धतकामिनीजनमहादर्पद्विपानां महा,–
सिंही सर्वमनोविनोदनवती श्रीकामदेवाभिधा

बृ. यो.त., टो., वाजीकरणे । टोडरानन्देसितासमभागेन योजिता द्विचतुर्वस्तुपुव्यत्यासश्चास्तिनैतावता पाठान्तरता अतस्तस्याप्यत्रैवान्तर्भावः

भाषा—कुठ, जायफल, सैन्धव त्रिकटु, मेथी, अजवाइन, खुरासानीअजवाइन, अड़ूसा, मोचरस, विदारीकन्द, मुसली, जायफल, चित्रक, जीरा, स्याहजीरा, गजपीपल, द्राक्ष, हरड़ें, केवांचकेबीज तालीसपत्र, तज, पत्रज, इलायची, सांभर, सैन्धव, संचल, बहेड़ा, काकड़ासींगी, केलेकाकन्द, शतावर, असगन्ध, कचूर, मुलहठी, चिरोंजी, गुडूची, जावित्री, लौंग, केसर, खस, गोखरू, सेमलकामुसला, आंवले, उड़द, पुनर्नवा, सोना (अभावमेधतूरेकेबीज) सिंघाड़ा, मस्तगी, जटामासी, तीनों बला, सुगन्धवाला, भारङ्गमूल, माली, तिल, शीतल चीनी, अकलकरा, दन्ती, कौड़ियालोबान, बचा, काहूकेबीज, औरकमलगट्टा येसबसमभागलेकर बारीकचूर्णकर घीसेस्निग्धकरले । फिरइससे चतुर्थांश

सिकीहुईभांग, भांगसे आधी अभ्रकभस्म, अभ्रकसे आधी बङ्गभस्म, बङ्गसे आधी लोहभस्म, लोहभस्मसे आधा रससिंदूर या पारदभस्म, इससम्पूर्णऔषधसे दूनीशक्कर लेना इसमे मधु प्रमाणसे इतनादेनाकि जिसमे गोलीबनजाय। इसकी २ तोले अथवा यथाग्निबलदेखकर गोलीबनाकर प्रातः सायं एकएक गोली खाकर दूधपीवे। इसके खानेसे बुढापा तथा अन्य रोग दूर होकर अग्नि अत्यन्त प्रदीप्त होती है। अत्यन्त स्थूलता और चित्तके विकारोंको दूरकर अत्यन्तमदोमत्त स्त्रियोंके चित्तको प्रसन्न करती है। इस गोलीको सौगतसिंह नामके वैद्यने बनाकर सो स्त्रियों के साथ सम्भोगकरनेवाले हम्मीर राजाको दी थी और लोकोपकारकेलिये प्रसिद्धकीथी॥ १६९॥

१७० कामदेवेशरसः

बलिं पारदं नागफेनं समांशं
विमर्द्याहिवल्लीरसै र्यामामात्रम्।
गुटी वल्लमात्रा सिताढ्या हि सेव्या
पुनर्भोजनं नैव कार्यं तदन्ते॥७५३॥
पयो माहिषं सेवनीयं निशादौ
भजेन्मैथुनं निम्बुनीरं सिताढ्यम्।
पिबेद्बीजमुक्त्यै पुनर्मैथुनञ्च
रसः कामदेवेशनाम्ना प्रसिद्धः ७५४॥

रसायनसं., बृ. यो. त., वाजीकरणे। टि० अत्र रसे यद्यपि पारदः साधारणः लिखितस्तथापि न साधारणेन पारदेनैतत्कार्यं भवति, एतदर्थं पारदभस्म अथवा रससिन्दूराख्यं योजनीयमितिरहस्यम्।

भाषा—शुद्धगन्धक, पारा, अफीम, ये सब समभाग लेकर नागरवेलके पके पत्तोंके रससे १ पहर मर्दनकर ३ माशेकी गोली बनाकर शक्करके साथ खाकर भैंसका औटायाहुआदूध रात्रिके शुरूमे पीवे। फिर रात्रिमे भोजन न करे। स्त्रीसङ्गकरनेके बाद अगर शुक्र स्खलित न हो तो नीबूका रस निकालकर शक्कर मिलाकर पीलेना चाहिये॥ १७०॥

१७१ कामधेनुरसः (प्रथमः)

शुद्धसूतं द्विधा गन्धं लोहपात्रे क्षणं पचेत्।
शीतलं चूर्णयेत्खल्वे बद्ध्वा वस्त्रे चतुर्गुणे ७५५
आरनालघटान्तःस्थं दोलायन्त्रे चतुर्दिनम्।
पाचयेच्छोषयेत्पश्चाद्द्वाशांशं वत्सनाभकम् ७५६
क्षिप्त्वा सर्वं त्र्यहं भाव्यं तैले वै वाकुचीभवे।
कामधेनुं रसं खादेन्माषैकं मण्डलापहम् ७५७
गुग्गुलुं त्रिफलां गन्धं सममेरण्डतैलकम्।
द्विनिष्कमनुपानं स्याद्रक्तमण्डलकुष्ठनुत् ७५८

चि. र. भ., वै. चि., र. को., र. सु., र. क. ल., चि. क., कुष्ठे।

भाषा—शुद्धपारा १ भाग, गन्धक २ भाग, दोनोंको लोहेके पात्रमे रखकर थोडींदेरतक पकावे, जबगन्धक पिघलकर जलने लगे तब उतारकर खुरचकर ४ गुने वस्त्रमे बांधकर काञ्जीमे दोलायन्त्रमे ४ दिनपकाकर सुखाले, इसमे बारहवां हिस्सा शुद्ध बछनाग डालकर ३ रोज़ बाकुचीके तेलमे घोटे। बस यह कामधेनुरस तैयार हुआ। इसमेसे गुग्गुल, त्रिफला और गन्धक ये समभाग लेकर एरण्डीके तेलमे मिलाकर इसमेसे आठमाशेलेकर इसके साथ १ माशा कामधेनुरसको मिलाकर देनेसे रक्तमण्डल कुष्ठ दूर होता है॥ १७१॥

१७२ कामधेनुरसः (द्वितीयः)

सूतं गन्धं विषं व्योषं लोहमभ्रं समांशकम्।
मर्दयेत्त्रिफलाक्वाथैः सिद्धो भवति स रसः॥
पिप्पलीमधुसंयुक्तं सेव्यं द्विवल्लमात्रकम्।
धातुक्षयं पाण्डुरोगं पुराणं विषमज्वरम् ७६०
प्रमेहं रक्तपित्तञ्च अम्लपित्तं तथैव च।
सन्निपातं महावातं शूलगुल्मकृमींस्तथा ७६१
अर्शांसि ग्रहणीरोगान्नाशयेत्तत्क्षणादपि।
कामधेनुरसो नाम सर्वरोगेषु दापयेत्॥७६२॥

रसायनसं., सर्वरोगे।

भाषा—शुद्धपारा, गन्धक, बछनाग, त्रिकटु, लोहभस्म, और अभ्रकभस्म ये सब समभाग लेकर त्रिफलाकेकाढेसे मर्दनकरके रखछोडे, यह कामधेनुरस तैयारहुआ, इसको ६ रत्ती प्रमाणमे मधु

औरपीपलकेसाथखानेसे धातुक्षय, पाण्डुरोग जीर्णज्वर, विषमज्वर, प्रमेह, रक्तपित्त, अम्लपित्त, सन्निपात, प्रचण्डवात, शूल, गुल्म, कृमि, अर्श, ग्रहणी, इन रोगोंको यह रस तत्क्षण नष्ट करता है । इसकानाम कामधेनु है। तत्तद्रोगहरानुपानके साथ देनेसे यह समस्तरोगोंको नष्टकरता है ॥ १७२ ॥

१७३ कामधेनुरसः (तृतीयः)

सिन्दूरमभ्रं नागञ्च कर्पूरं हेममाक्षिकम् ।
खर्परं रजतञ्चापि मर्दयेत्कमलाम्भसा ॥७६३॥
ततो गुञ्जामिताः कृत्वा वटीश्छायाविशोषिताः।
एकैकां दापयेदासां कसेरुस्वरसेन च ॥७६४॥
प्रमेहान्विंशतिं हन्ति शुक्रमेहं विशेषतः ।
ज्वरं जीर्णञ्च यक्ष्माणं कामधेन्वभिधो रसः ।
भै. र., शुक्रमेहे ।

भाषा—रससिन्दूर, अभ्रकभस्म, नागभस्म, शुद्धकर्पूर, सोनामाखी, खर्पर (जस्तभस्म), रजतभस्म, इनसबकोसमभाग लेकर कमलपुष्पके रससे एकदोरोज़ मर्दनकरके रखछोड़े। यह कामधेनु-रस तैयारहुआ । इसकी दोदोरत्तीकी गोलियां बनाकर छायामे सुखाकर एकएकगोली कसेरूके स्वरससे देनेसे बीसप्रकारके प्रमेह, खासकर शुक्र-मेह, जीर्णज्वर, राजयक्ष्म, इनसबको नष्टकरतीहै ॥

१७४ कामधेनुरसः (चतुर्थः)

हेमाभ्रसत्त्वकान्तार्काः प्रत्येकं पलमात्रकाः ।
एकत्र द्रावितं सर्वं कर्पभूनागसत्त्वयुक्॥७६६॥
पलविंशतिसूतेन तैश्च पिष्टिं प्रकल्पयेत् ।
शतधा पातयेत्सूतं पिष्टिं कृत्वा पुनश्च तैः ७६७
शिष्टं द्विपलिकं सूतं सन्न्यासाद्भस्मतां नयेत् ।
भस्मीभूते रसे तस्मिँश्छिष्टे चैव पले ततः ७६८
वज्रं निष्कमितं चाभ्रसत्त्वं षट्पलिकं क्षिपेत्।
द्विपलं गन्धकं शुद्धं द्विदिनं मर्दयेत्ततः ७६९
तत्सर्वं लोहजे पात्रे क्षिप्त्वा च मृदुवह्निना।
शाल्मलीमूलजं क्वाथं चत्वारिंशत्पलोन्मितम् ॥
नाशयेद्रसराजेऽत्र दत्त्वाद्रत्वाऽल्पमल्पकम् ।
नालीपातेन तत्क्वाथरजो दुग्धं प्रदापयेत् ७७१
स्वाङ्गशीतं रसं कृत्वा सुगाढं परिमर्दयेत् ।
ततः करण्डके क्षिप्त्वा यत्नेन स्थापयेत्खलु ॥
सोऽयं गुञ्जामितघृतयुतः सेवितो हन्ति रोगा-,
स्तत्तद्दोषप्रभवकुटिलान् दुःखसाध्यान्समस्तान् ।
दद्याद्दीप्तिं जठरशिखिने स्त्रीशतं सेव्यमाने,
स्थैर्यं कुर्यादपि च वपुषो नामतः कामधेनुः ७७३
र. र. स., वाजीकरणे ।

भाषा—सुवर्ण, अभ्रकसत्त्व, कान्त, तांबाये सब एकएक पललेकर इनको इकट्ठेकर मूषामेंगला-कर एकतोला केंचुओंका तांबा डालना फिर २० पल शुद्धपारा डालकर पिट्ठी बनालेना । इसपिट्ठीको डमरू-यन्त्रमे रखकर पारेको उड़ाले। दूसरीबार फिरमिला-कर उड़ावे, इसीप्रकार १०० बार ऊर्ध्वपातित करले । सौबार ऊर्ध्वपातितकरनेसे २ पलपारा रहजायगा, सिद्धौषधौंके योगसे निरुत्थ भस्महोनेकेबाद १ पल उसका वजन होजायगा। इसमे हीराकीभस्म ४ माशे, अभ्रसत्त्व ६ पल, गन्धक २ पल, येसबदेकर २ दिनतक खरलमे खूबमर्दनकरना फिरलोहेकेपात्रमेरख अग्निपरचढ़ादे और सेमरकीजड़कीछालकाक्काथ-४० पल इसरसके ऊपर सुखावे । उसकाढ़ेकेनीचे जो घन रहजायउसको चमचीसे उठाकर इसके ऊपर डालताजाय, जब तमामजलकर खलासहोजाय तब ४० पल दूधजलावे । इसकेबाद स्वाङ्गशीतल-होनेपर रसको निकालकर खूबमर्दनकर शीशीमे रखछोड़े, यह कामधेनुरस तैयारहुआ । इसमेंसे १ रत्तीकीमात्रा घीकेसाथलेनेसे तत्तद्दोषोंसे भयेहुए दुःसाध्यरोगोंको यह बहुतजल्दी दूरकर जठराग्निको प्रदीप्तकरताहै और कामशक्तिको बढाताहै ॥१७४ ॥

१७५ कामनायको रसः

शाल्मल्युत्थद्रवै मर्द्यः पक्षैकं शुद्धपारदः ।
शुद्धगन्धं त्रिसप्ताहं तद्द्रवै मर्दयेत्पृथक् ॥७७४॥
समावेतौ पुनर्मर्द्यौ घृते यामचतुष्टयम् ।
तद्गोलं बन्धयेद्वस्त्रे घृते यामद्वयं पचेत्॥७७५॥

ततस्तं शाल्मलीद्रावैर्मर्दयेद्दिवसत्रयम् ।
निःक्षिपेत्काचकूप्यन्त र्वालुकायन्त्रगं पचेत् ॥
क्षिपेच्छाल्मलिजं द्रावं कूप्या गर्भे दिनावधिम् ।
सार्द्रमेव समुद्धृत्य मिश्र्यं तत्सितयासमम् ७७७
निष्कमात्रं सदा खादेद्रसोऽयं कामनायकः ।
मुशलीं ससितां क्षीरैः पलैकां पाययेदनु ॥
कामिनीनां सहस्रंतु क्षोभयेन्निमिषान्तरे ७७८

र. रां., र. सि., रसायन सं., वाजीकरणे । रसगन्धकहरिद्रान्ते मदनकामदेवेति नाम ।

भाषा—शुद्धपारेको शाल्मलीके अङ्गस्वरससे १५ दिनमर्दनकरे । इसीतरह शुद्धगन्धककी २१ रोज़ मर्दनकरके दोनोंको समभागमिलाकर घीके साथ ४ पहरमर्दनकर गोलाबनाकर ४ तहकपडेमे लपेटकर धीमे दोपहर पकाकर निकालले।फिर शाल्मलीके रससे ३ दिनतक मर्दनकरके सुखाकर आतशीशीशीमे रखकर एकदिन वालुकायन्त्रमे रसकेसाथही पकावे । इसको गीलाही निकालकर उसकीबराबर शक्कर मिलाकर ४ माशाखाकर २० तोले दूधमे ४ तोलामुशली उबालकर उसमे अन्दाजसे शक्कर डालकर पीनेसे यह क्षणभरमे अनेक स्त्रियोंको क्षुब्धकरा देताहै । तमाम प्रमेहोंको नष्ट करता है॥ १७५॥

१७६ कामबाणोरसः

सूतेन्द्रामृतमब्धिशोषसुमनाजातीफलाकल्करा,
फेनाश्वाह्वजवाह्वदेवकुसुमं कर्पूरकस्तूरिकाम् ।
पिष्ट्वा तत्समभागिकंमुनिमितैःकृष्णाह्विवल्लीरसैः,
भाव्यं पक्वफले निधायसजलेतन्नारिकेलोदरे ॥
क्षीरद्रोणयुगे विपाच्यविधिवत्तज्जीर्णदुग्धंहरेत्,
सूक्ष्मं स्वर्णयुतंविधाय पयसावल्लत्रयं सेवयेत् ।
ताम्बूलेन समं निशासु समये कामाग्निसन्दीपनं,
पण्ढोऽपिप्रमदांविजित्यतनुते
कान्तिंतनोतिस्त्रियाः ॥
वृद्धिं चातिबलं ददातिनितरांयुक्त्यानुपानैरयं,
वृद्धानां मदनोदयंवितनुतेस्यात्कामबाणोरसः ।

यू. मो. त., वाजीकरणे ।

भाषा—पारा, बछनाग, समुद्रशोष, चमेली, जावित्री, जायफल, अकलकरा, अफीम, असगन्ध, अजवाइन, लौंग, कपूर, और कस्तूरी ये सब समभाग लेकर । खूबबारीक पीसकर कालेपानके रसमे इसका गोला बनाकर पकेहुए सजलनारियलमे रखकर मुंह बन्दकर १६ सेर दूधमे इसको पकावे । जब दूध तमाम जलजाय तब नारियलके खोपड़े सहित बारीक चूर्ण करलेना । इसको ९ रत्तीकीमात्रामे लेकर १ रत्ती स्वर्णभस्ममिलाकर खाकर दूधपीवे । रात्रिको तान्बूलमे रखकर खानेसे यह कामाग्निको दीप्तकरता है इसको षण्ढ और वृद्ध आदमीभी खाकर स्त्रियोंको अच्छीतरह तृप्तिकरसक्ते हैं ॥ १७६ ॥

१७७ कामलान्तकः (कपर्दकरसः)

रसभस्मसमं गन्धमेलावालुकटङ्कणम् ।
अमृतोशीरकुष्ठाब्दान् समभागान् विचूर्णयेत् ॥
आर्द्रकस्य रसैः खल्वे द्वियामान्तं विमर्दयेत् ।
जीरकस्य कषायेण द्विगुञ्जं भक्षयेत्सदा ॥
कामलापित्तनाशाय दाहशान्तिकरःपरः ७८२॥

वै. चि., व. रा., कामलायां । टि० अत्र ऐलवालुकटङ्कणमितिपाठं प्रकल्प्य ऐलवालुकशब्देन 'एलुवा'इति प्राकृते प्रसिद्धं कुमारीघनं केचित्प्रक्षिपन्ति तदानेन विरेचनं भविष्यतीति बोध्यम् ।

भाषा—पारेकी भस्म, गन्धक, इलायची,गेहुंला, सुहागा, गिलोय, खस, कुठ, नागरमोथा, ये सब प्रत्येक समभाग लेकर चूर्णकरके अदरखके रसमे २ पहरमर्दनकर दोदोरत्तीकी गोलियां बनाकर रखछोड़े । यह कामलान्तक रस तैयार हुआ । इसमेसे १ गोली जीरेकेकाढ़ेके साथ लेनेसे कामला, पित्त और दाह इनका नाशहोवे ॥ १७७ ॥

१७८ कामलाप्रणुद्रसः

तीक्ष्णमाक्षिककान्ताभ्रशुल्वसूतकतालकम् ।
देवदालीरसैः पिष्टं वालुकायन्त्रसाधितम् ७८३
अमृतोत्पलकह्लारकन्दद्राक्षासमन्वितम् ।
पिष्टंपथ्यम्भसा क्षौद्रसिताभ्यां कामलाप्रणुत् ॥

र. चं., र. म. मा., कामलाधिकारे। र. म. मा. कामला हलीमकविध्वंसनं नाम । र. र., ध. रा., वै. चि., र. शं., र. का., एषु पद्यास्य इति नाम । टि० रसराजसुन्दरे माक्षिकस्थाने गन्धकंनियोज्य तीक्ष्णादि रस इति नाम स्थापितं तत्स्वकृतित्व प्रख्यापनाय भवेदित्यनुमीयते ।

भाषा—लोहभस्म, सोनामाखी, कान्त, अभ्रक, तांबा, पारा, हरिताल, येसबसमभागलेकर बंदालकेरससे मर्दनकर सुखाकर आतशीशीशीमे रख बालुकायन्त्रमे ४ पहरकीआंचदेना । स्वाङ्गशीतलहोनेपर निकालकर गिलोय, सफेदकमल और लालकमल इनकाकंद, द्राक्षइनकेकाढ़ेसे एकदोरोज़ मर्दनकरके रखछोड़ना । यह कामलाप्रणुत् रस सिद्ध हुआ । मधु और शक्करमिलाकर इसको खाकर मुलहठीकाकाढ़ापीनेसे कामलाका नाशहो ॥१७८॥

१७९ कामवर्धनोरसः (हर्षोदयः)

एककर्षमितं शुद्धं फणिफेनं विनिःक्षिपेत् ।
मरिचं रससिन्दूरं तावन्मानं पृथक्पृथक् ७८५
वल्लमात्रं मृगमदं तन्मानं चन्द्रजं रजः ।
जातीपत्रफलात्कोलौ केशराद्दरदात्तथा॥७८६॥
नागवल्लीमातुलानीद्रवैस्त्रेधा विभाव्य च ।
वल्लमानां वटीं नागवल्लीदलगर्भिताम्॥७८७॥
भुक्त्वा दुग्धं निषेवेत माहिषं पिच्छया युतम् ।
माषपिष्टमयान् भक्ष्यान् नित्यं सेवेत नूतनान् ॥
रमणी रमयेद्वह्वी मासमात्रनिषेवणात् ।
अतिसारग्रहणिकाविसूची नाशयेत्क्षणात् ७८९

नृ. क..

भाषा—शुद्धअफीम, मिरचऔर रससिन्दूर एकएकतोला, कस्तूरीऔरकपूर तीनतीनरत्ती, जावित्री, जायफल, केशरऔरशिंगरिफ ये प्रत्येक आधाआधा तोला लेकर सबको बारीककूट कपड़छानकर नागरवेल औरभांग इनके स्वरसोंसे तीनतीनभावना देकर तीनतीन रत्तीकी गोलियें बनाकर रखछोडे, यह कामवर्धन रस सिद्धहुआ । इसकी १ गोली पानमे रखकर खाजाय ऊपरसे भैंसकादूध मलाईसहित शक्करडालकरपीवे । उड़दकेआटेके पदार्थ रोज़२ नयेनये बनाकरखावेतो २ महीनेकेसेवनसे अतिसार, सद्ग्रहणी, विसूची, इनकानाशहोकर बहुतसीस्त्रियोंकेसाथ रमणकरसक्ताहै ॥ १७९ ॥

१८० कामविलासिनीवटी

एकभागो भवेचन्द्रो दरदश्चैकभागिकः ।
भागद्वयश्चाहिफेनं जातीपत्रन्तथैव च ॥७९०॥
गैरिका च त्रिभागा स्याद्वेदभागः पतङ्गकः ।
माषार्धं चूर्णितं तेन नागवल्ल्या दलै र्युतम् ॥
क्षीरं पिबेच्च तदनु रममाणो न मुह्यति ।
उत्तारो निम्बुनीरञ्च वटी कामविलासिनी ॥

वै. वि., वाजीकरणे

टि० यत्रयत्र स्तम्भनप्रयोगेषु कर्पूरदानंविहितं तत्रतत्र यदि रसकर्पूरोनिक्षिप्येत तर्हिचतुर्गुणाशक्तिरायाति परमयं प्रयोगो न सर्वदोपयोगी वैद्यैरेवयोजनीयश्चेति रहस्यम् ।

भाषा—शोधाहुआकपूर औरशिंगरिफ एकएकभाग, अफीमऔरजावित्री दोदोभाग, गेरू३भाग, पत्तङ्ग४भाग, येसब इकट्ठेकर पानकेरससे मर्दनकरके रखलेना । इसमेसे ४रत्तीकीमात्रालेकर पानमे रखकर खाकर ऊपरसेदूधपीवे । इसकेबाद सम्भोगमे प्रवृत्तहोतो वह असह्यहोजाताहै । कदाचित किसीको अधिकस्तम्भनहोजायतो निम्बूकारसलेनेसे स्खलन होगा ॥ १८० ॥

१८१ कामसुन्दरो मोदकः

मेथी गुडूची मुशली शटी च
विदारिकन्दस्त्रिसुगन्धिसिन्धुः ।
धात्री लवङ्गेक्षुरगोक्षुराश्च
शतावरी मोचरसश्च पर्ण्यः ॥ ७९३ ॥
कृष्णाश्वगन्धा कदलीजकन्द-
नागाह्वजातीफलजातिपत्रम् ।
भृङ्गी धनीयाद्वयकट्फलञ्च
चूर्णान्मृताभ्रं द्विगुणं नियोज्यम् ७९४
सर्वतुर्यांशविजया सर्वद्विगुणशर्करा ।
पिण्डितं मधुसर्पिर्भ्यां माषा टङ्कोऽथवा मितिः

वृ. यो. त., वाजीकरणे

भाषा—मेथी, गिलोय, मुसली, कचूर, विदारीकन्द, तज, पत्रज, इलायची, सेंधानमक, आंवला, लौंग, तालमखाना, गोखरू, शतावर, मोचरस, शालपर्णी, पृश्निपर्णी, मुद्गपर्णी, माषपर्णी, पीपल असगन्ध, केलेकाकन्द, नागकेसर, जायफल, जावित्री, काकड़ासींगी, धनियां, कायफल, येसब बराबर और इनसबसेदूनी अभ्रकभस्म, सबका चौथाभाग भाग और सबसे दूनीशक्कर येसब विधिपूर्वक एकजगहमिलाकर १ माशा, ४माशे अथवा योग्यता देखकर मात्रादे। ऊपरसे दूधपानिसे स्त्रियोंको अच्छीतरह सन्तुष्ट करसक्ताहै ॥ १८१ ॥

१८२ कामसुन्दरी गुटिका

स्वर्णचूर्णन्तु भागैकं त्रिभागं शुद्धपारदम् ।
पादभागं मृतं वज्रं तत्सर्वं क्षीरकन्दजैः ७९६॥
द्रवैश्च देवदाल्युत्थैस्तप्तखल्वे दिनावधिम् ।
मर्दयेत्कान्तचूर्णञ्च वज्रतुल्यं क्षिपेच्च वै ७९७॥
वज्रमूषान्धितं ध्माप्यं गुटिका कामसुन्दरी ।
जायते धारिता वक्त्रे वर्षान्मृत्युजरापहा ७९८
निष्कत्रयं भल्लतैलं गवां क्षीरं पलद्वयम् ।
मिश्रितं पाययेच्चानु दीर्घायु र्जायतेनरः ७९९॥

र. सं., वाजीकरणे ।

भाषा—स्वर्णभस्म १ भाग, रससिंदूरअथवा शुद्धपारद ३ भाग, हीराभस्म ¼ भाग, लेकर सबको तप्तखल्वमे क्षीरविदारी और वन्दाल्के रससे मर्दनकर कान्तभस्म वज्रकी बराबर डालकर अन्धमूषामे रखकर धमन करावे तो इसकी गोली बनजायगी। इसका नाम कामसुन्दरी है। इसको १ बरसतक मुंहमे रखनेसे बुढ़ापे और मृत्युको दूरकरती है। इसके ऊपर ४ माशे पलाशके बीजोंका तैल २ पल गायके दूधमे मिलाकर पिलानेसे आदमी दीर्घायु होता है॥१८२॥

१८३ कामाग्निसन्दीपनोमोदकः

कर्षो रसो गन्धकमभ्रकञ्च
द्विक्षारचित्रे लवणानि पञ्च ।
शटी यमानीद्वयकीटहारी-
तालीशपत्राण्यपरं द्विकर्षम् ॥ ८०० ॥
जीरं चतुर्जातलवङ्गजाती-
फलञ्च कर्षत्रयमेवमन्यत् ।
सद्वृद्धदारं कटुकत्रयञ्च
तथा चतुष्कर्षमितं निबोध ॥ ८०१ ॥
धन्याकयष्टीमधुरीकशेरु-
कर्षाः पृथक् पञ्च वरी विदारी ।
वरेभकर्णभवलात्मगुप्ता-
बीजं तथा गोक्षुरबीजयुक्तम्॥ ८०२ ॥
सबीजपत्रेन्द्ररजः समानं
समा सिता क्षौद्रघृतञ्च तुल्यम् ।
कर्षैकमिन्दोरथ मोदकं तत्
कामाग्निसन्दीपनमेतदुक्तम् ॥ ८०३ ॥
वृष्यं स्वतः परतरं सततं न दृष्ट-
मेनं निषेव्य मनुजः प्रमदासहस्रम् ।
गच्छन्नलिङ्गशिथिलत्वमवाप्नुयाच्च
नागाधिपं विजयते बलतः प्रमत्तम् ॥
कान्त्याहुताशनमपि स्वरतो मयूरान्
वाहं जवेन नयनेन महाविहङ्गम् ।
वातानशीतिमथ पित्तगदं समग्रं,
श्लेष्मोत्थविंशतिरुजः परमग्निमान्द्यम् ८०५ ॥
दुर्नामकामलभगन्दरपाण्डुरोग-
मेहातिसारकृमिहृद्ग्रहणीप्रदोषान् ।
कासज्वरश्वसनपीनसपार्श्वशूल-
शूलाम्लपित्तसहितांश्चिरजान् समस्तान् ८०६॥
हत्वा गदानपि च तत् पुमपत्यकारि,
सर्वर्तुपथ्यमथ सर्वसुखप्रदायि ।
वृष्यं वलीपलितहारिरसायनं स्या-
च्छ्रीमूलदेवकथितं परमं प्रशस्तम् ॥ ८०७ ॥

भै. र., र. र. क., ध., यो. र., र. सु., र. क., वाजीकरणे ।

भाषा—शुद्धपारा, गन्धक, अभ्रक, ये एकएक तोला, सज्जीखार, जवाखार, चित्रक, पांचों नमक, कचूर, अजवाइन देशी, अजवाइन खुरासानी, विडङ्ग, तालीसपत्र ये सब दो दो तोले, जीरा, चातुर्जात

(तज, पत्रज, इलायची, नागकेसर), लौंग और जायफल ये प्रत्येक ३ तीन तोले, विधारा और त्रिकटु चार चार तोले, धनियां, मुलहठी, सौंफ और कसेरू ये प्रत्येक ५-५ तोले, शतावरी, विदारी, त्रिफला, भुंई कुम्हड़ा, बला, केवांचके बीज, गोखरू, भांगके बीज और पत्ते सबकी बराबर, फिर सबकी बराबर शक्कर, घी और शहद। फिर कपूर १ तोला डालकर ४ मासेकी मात्रामे खाकर ऊपरसे दूध पीवे। इसके सेवनसे मनुष्य हज़ार स्त्रियोंसे सम्भोग करसक्ता है। इससे बढ़कर वृष्य दूसरा कोई नहीं है कामाग्निसन्दीपन इसका नामहै। कुछ दिनके सेवनसे अस्सी प्रकारके वातरोग, सम्पूर्ण पित्तरोग, बीसप्रकारके कफरोग, अग्निमान्द्य, बवासीर, कामला, भगन्दर, पाण्डुरोग, प्रमेह, अतिसार, कृमि, ग्रहणी-दोष, खांसी, ज्वर, श्वास, पीनस, पार्श्वशूल और अम्लपित्त ये बहुतदिनके पुरानेरोग नष्ट होते हैं। पुत्रोत्पत्ति होती है। और वलीपलितको नष्ट करता है। वृष्य और रसायन है। मूलदेवने इसको कहा है१८३॥

१८४ कामाग्निसन्दीपनो रसः

पलपरिमितशुद्धं सूतकं गन्धतुल्यं,
दरदकुटिलतुल्यं भावितं भृङ्गवेरैः।
तदनुकनकबीजै र्भावितं सप्तवारं,
तदनुसितजयन्त्या भृङ्गराजैश्चसर्वम् ॥
पुटितमुपरिशुष्कं काचकूप्यां निधाय,
पडहमुपरि पाच्यं वालुकायन्त्रकैश्च ॥ ८०८ ॥
एलाजातीजचन्द्रैर्मृगमदससितैः
सोपणैः साश्वगन्धै,
स्तुल्यै र्वल्लप्रमाणं प्रतिदिनमशितं
प्रातरुत्थाय शुद्धैः ॥
ओजःपुष्टिविवर्धनोऽतिबलकृत्सर्वेन्द्रियानन्दनः
सर्वातङ्कहरो रसायनवरः कामाग्निसन्दीपनः ॥

भै. र., र. क., वाजीकरणे।

भाषा—शुद्धपारा, गन्धक, शिंगरिफ और हीराभस्म येसबसमभागलेकर अदरखकेरस, कनकबीज, सफेदजैंत औरभृङ्गराज इनप्रत्येकसे सातसातभावना-देकर सुखाकर कपड़मिट्टीकीहुई आतशीशीशीमे भरकर बालुकायन्त्रमे ६ रोज़अग्निदेना। स्वाङ्गशी-तलहोनेपर निकालकर इलायची, जायफल, कपूर, कस्तूरी, मिश्री, मिर्च, असगन्ध इनकेचूर्णकेसाथ ३ रत्तीप्रमाणसे प्रातःकालमे खानेसे ओजऔर पुष्टिको बढ़ाताहुआ समस्तरोगोंको दूरकरताहुआ, समस्त इन्द्रियोंको बलदेताहुआ कामाग्निको सन्दीप्त करता है ॥ १८४ ॥

१८५ कामाङ्कुशो रसः

कालिन्दीसुफलोदरेविनिहितं स्वर्णं घनंरोचनां,
कृष्णोन्मत्तकमूलतारकुलिशं शुल्वायसं पुङ्खकम्
एतत्सूतसमन्वितं बुधजने र्वक्त्रेण संधार्यते,
वीर्यस्तम्भकरोविदग्धवनिताव्यामोहकामाङ्कुशः

रसेन्द्रसं., वाजीकरणे।

भाषा—सुवर्णभस्म, अभ्रकसत्त्व, रोचना, कालेधतूरेकीजड़, रजतभस्म, हीराभस्म, ताम्रभस्म, लोहभस्म और शरपुङ्ख येसब समभाग, इनसबकी-बराबर पारालेकर इन्द्रायणकेरसमे २१ दिनघोटकर गोलीबनाकर सुखालेना। फिरउसगोलीपर कचासूत लपेटकर इन्द्रायणके फलकेभीतर रखकर उसीकी डाटसे बंदकरके दोतीनकपड़मिट्टी देकर २ सेरक-ण्डोंकी आंचदेना। फिरउसमेसे निकालकर पूर्ववत दूसरेफलमे रखकर आंचदे। इसतरहसो आंच या कमसेकम २१ आंचदेनेसे यहगोली सख्तहोजायगी इसको मुंहमे रखनेसे वीर्यस्तम्भन होताहै। और काम-कलामे निपुणस्त्रियोंके चित्तको वशकरातीहै॥१८५॥

१८६ कामाङ्गनायकोरसः

वल्लैकं मारितं चाभ्रं खादेच्छर्करया समम्।
शाल्मलीमूलचूर्णन्तु भृङ्गराजस्य मूलकम् ॥
कर्षैकं सितया चानु सेवेत कामिनीशतम्८११

र. सं., र. सि., वाजीकरणे।

भाषा—निश्चन्द्रअभ्रकभस्म ३ रत्ती शक्करके-साथ खाकर सेमरकामुसला औरभंगरेकीजड़ समभाग

और दोनोंकीबराबर शक्कर मिलाकर उसमेंसे १तोला खाकर दूधपीवेतो बहुतसी स्त्रियोंकेसाथ सङ्गकरसक्ताहै ॥ १८६ ॥

१८७ कामिनीकामभञ्जनोरसः

पलंपलं पारदगन्धकञ्च कर्पांशके संमृतहेमताम्रे
मृतं तथा तालपलार्धभागं
मर्द्यं तु पञ्चामृतके दिनैकम् ॥८१२॥
तद्धर्मशुष्कं च पुटान्तरस्थं
पक्त्वा दिनैकं सिकताख्ययन्त्रे ।
पञ्चामृतेनाथ वटीं प्रकल्प्य
कोलास्थिमाना निशि भक्षयित्वा ८१३
वीर्याभिवृद्धिं कुरुते प्रकाशं
बुद्धिं क्षुधां सञ्जनयेत्प्रकामम् ।
शतत्रयं गच्छति कामिनीनां
महारसः कामविभञ्जनोऽयम् ॥८१४॥

चि. र. भ., वाजीकरणे ।

टि० द्वितीयानङ्गसुन्दरस्यैवायं द्विगवस्तुपुन्यत्यये कृत्वा प्रपञ्चः प्रतिभाति अनङ्गसुन्दरे क्रमेण रसगन्धहेमताम्रतारालि अष्टाष्टचन्द्राब्धिचन्द्रप्रमितानिगन्ति । अत्रतु रसगन्धहेमताम्रतालानिक्रमेण अष्टाष्टचन्द्रेन्दुवेदभागानि सन्तितारस्थानेतालकस्थितिस्तु लेखकप्रमादादपिसम्भाव्येत, अन्यत्सर्वं समानम् ।

भाषा—शुद्धपारा और गन्धक एकएकपल, ताम्रभस्म और सुवर्णभस्म एकएकतोला, हरितालभस्म २ तोले, इन सबको इकट्ठेकर पञ्चामृत (घृत, दूध, दही, मधु और शक्कर) मे १ दिन घोटकर सुखाकर सकोरोंमे बन्दकर कपड़मिट्टीदेकर सुखाकर बालुकायन्त्रमे एकदिनभर पकाना । स्वाङ्गशीतलहोनेपर बेरकी गुठलीके बराबर गोलियां पञ्चामृतमे घोटकर बनाले । इसमेंसे एकएकगोली रात्रिमे लेनेसे वीर्य, बुद्धि और क्षुधा इनकीवृद्धिको करती हुई स्त्रीसङ्गेच्छाको प्रकटकरतीहै बहुतसी स्त्रियोंके साथ रमणकरातीहै इसका कामिनीकामभञ्जन नामहै ॥ १८७ ॥

कामिनीमदभञ्जनोरसः

(मदनसुन्दरः) द्रष्टव्योऽनङ्ग सुन्दरः

भै. र., र. मे., र. सु., वृ. यो. त., रसायनसं., चि. र. भ., वाजीकरणे । चि. र. भ. कामिनी कामभञ्जनेति नाम ।

टि० अयंपाठोऽनङ्गसुन्दरादभिन्नोऽवस्तभैवास्यपाठो द्रष्टव्यः, अभिनयकामदेवमदनोदयाख्यरसान्यामस्यापाततः साम्यंप्रतीयते, परं तत्र भावनायां द्रव्यप्रक्षेपे च वैशेष्यात् पृथगेव तौ रसौ । गन्धकेन रसः स्थितः कल्हाररसमर्दितः । विषशोधाद्युपायन्त्रे पृष्ठो मदनसुन्दर इति रस रत्नगगुच्छये । र. को., र. च. यो., र. सं., इत्येतेषुमदनसुन्दरेति नामपाठः कृतोऽस्ति गौण्यतंपान्तर्भवनीति ।

१८८ कामिनीमदविधूननोरसः

कज्जलीकृतसुगन्धकशम्भो-
स्तुल्यभागकनकस्य च बीजम् ।
मर्दयेत्कनकतैलयुतं स्या-
त्कामिनीमदविधूननो रसः ॥ ८१५ ॥
अस्य वल्लयुगलं ससितश्चेत्
सेवितं हरति मेहगणौघम् ।
वीर्यदं करणं कमनीयं
द्रावणं निधुवने वनितानाम् ॥८१६॥

र. कौ., चि. र. भ., र. चं., यो. म., र. ल., र. क., वै. र., चि. क., भै. र., र. सं., (कामिनी दर्पघ्नः) वाजीकरणे । रसराजशङ्करे कामदेवेति नाम ।

भाषा—शुद्धपारे और गन्धककी कज्जली बनाकर उसकी बराबर धतूरेके बीज मिलाकर धतूरेके बीजोंके तैलसे मर्दनकर ६ अथवा ३ रत्तीकी गोलियां बनाकर रखछोड़े । इसमेंसे एक गोली शक्करके साथ खानेसे सबप्रकारके प्रमेहोंको दूरकरतीहै । वीर्यको बढ़ातीहै । और सुरतमे स्त्रियोंका द्रावण करतीहै १८८

१८९ कामिनीविद्रावणो रसः

आकारकरभः शुण्ठी लवङ्गं कुम्भकं कणाम् ।
जातीफलञ्च तत्कोषं चन्दनं कार्षिकं पृथक् ॥
हिङ्गुलं गन्धकं शाणं फणिफेनं पलोन्मितम् ।
गुञ्जात्रयमितां कुर्यात् संमर्द्य वटिकां भिषक् ॥
पयसा परिपीतोऽयं शुक्रस्तम्भकरो रसः ।
विद्रावणः कामिनीनां वशीकरण एव च ८१९

भै. र., वाजीकरणे।

भाषा—अकलकरा, सोंठ, लौंग, समुद्रशोष, पीपल, जायफल, जावित्री, औरचन्दन येप्रत्येक एकतोला, हिंगुलऔर गन्धक ४ चारमाशे, अफीम ४ तोले सबकोमिलाकर तीनतीनरत्तीकी गोलियें बनालेना इसमेसे एकएकगोली दूधकेसाथ लेनेसे शुक्रको स्तम्भित करता है। स्त्रियोंको विद्रावणकर वशमेकरताहै १८९॥

१९० कामेशवत्सरसः

सौतं भस्मबलिप्रवालगजकं सूर्य पृथग्भागिकं, वैक्रान्ताभ्रकवङ्गमुक्तकनकं द्विघ्नं ततो मर्दयेत् शालमल्यग्निकुमारिभीरुमुशलीभूशर्करामार्कवै–, निर्गुण्डीत्रिपदीरसै र्मुनिमितैः सम्भाव्य कूप्यां पचेत् ॥८२०॥

पूर्वैरेव रसैः पृथङ् मुनिमितै स्तूद्धृत्यघृष्टं ततः, पक्त्वाग्नौ च मृगाङ्कवत्पुनरिदं कामेशवत्साधयेत् पिण्डे माषमये निवेश्य सुदृढं तैले पुनर्भावयेत्, सिद्धस्यास्यपुनःकणामधुयुतःसेव्यः सदावल्लकः मेहश्वासचिरज्वरोदरमरुत्कासोदरार्शः क्षयं, गुल्मासृग्दरपाण्डुकुष्ठसहितं हन्त्यस्रपित्तादिकान् कन्दर्पकिलवीर्यवृद्धिमचिकांनष्टेन्द्रियस्यापि च, विश्वासं जनयत्यहर्निशमसौकान्ति च पुष्टिं बलम् र. शे.,

भाषा—पारेकीभस्म, गन्धक, प्रवालभस्म, नागभस्म, ताम्रभस्म, येसब एकएकभाग, वैक्रान्त अभ्रक, वङ्ग, मोतीऔरसुवर्ण सबकी भस्में दोदोभाग, इनसबको इकट्ठेकर सेमल, चित्रक, घीकुंआर लज्जावती, मुसली, दीमककाखासघर (जहां दीमककी विम्बी हुआ करतीहै। उसको दोतीन हाथ नीचे खोदनेसे एक गोला जैसा निकलताहै। उसमे एकमोटाजीव होता है। उसीको दीमककीरानी या राजा कहाकरतेहैं। उसगोलेकीमिट्टी अन्यमिट्टीकी अपेक्षा मीठी हुआ करतीहै। यहीमिट्टी भूशर्करा शब्दसे यहां विवक्षितहै। इस अकेलीकाभी प्रयोग लोग विशेपविधिसे कियाकरतेहैं) भंगरा, निर्गुण्डी लज्जालु, अथवा हंसराज, इन प्रत्येकके रसोंसे सातसातभावना देकर और सुखाकर आतशी शीशीमे भरकर वालुकायन्त्रमे रख पारेसे सातसात गुना प्रत्येकक्रारसदेकर सुखादेना। फिर शीशीमेसे निकालकर उन्हीं रसोंसे घोटकर सम्पुटमे बंदकर ६–७ कपड़मिट्टीदेकर लघुपुटमे पकाकर स्वाङ्गशीतलहोनेपर निकालकर उड़दके आटेकेभीतर उसगोलीको रखकर तैलमे यहांतकपकावे कि ऊपरकाआटा लालहोजाय। फिर उसमेसे निकालकर रखलें। इसमेसे तीनरत्ती मधुऔर पीपलकेसाथ देनेसे यह प्रमेह, श्वास, जीर्णज्वर, उदर, वातरोग, कास, बवाशीर, क्षय, गुल्म, प्रदर, पाण्डु, कुष्ठ, रक्तपित्त, इन्द्रियोंकी शिथिलता इनसबको नष्टकरताहुआ, कान्ति, पुष्टि औरबलको देताहुआ कामकी वृद्धिकरताहै ॥ १९० ॥

१९१ कामेश्वरोमोदकः (प्रथमः)

सम्यङ्मारितमभ्रकंकटुफलं कुष्ठाश्वगन्धाऽमृता मेथी मोचरसो विदारिमुशली गोकण्टकेक्षूरकाः रम्भाकन्दशतावरीह्यजमुदामाषास्तिला धान्यकं यष्टी नागबला कचोरमदनं जातीफलं सैन्धवम् भार्गी कर्कटशृङ्गिभृङ्गत्रिकटु द्वे जीरके चित्रकं, चातुर्जातपुनर्नवे गजकणा द्राक्षा शणं वासकः शालमल्यङ्घ्रिफलत्रिकंकपिभवं बीजंसमंचूर्णये–, चूर्णांशा विजया सिता द्विगुणिता मध्वाज्यमिश्रं तु तत् ॥ ८२४ ॥

कर्षार्धां वटिकां विलेह्यमथवा कृत्वासदा सेवये–, त्पेया क्षीरसिताऽनुवीर्यकरणे स्तम्भेऽप्यलं कामिनाम्। श्यामावश्यकरःसमाधिसुखदःसङ्गेऽङ्गनाद्रावकः क्षीणे पुष्टिकरः क्षयक्षयकरो नानामयध्वंसकः॥ कासश्वासमहातिसारशमनो मन्दाग्निसन्दीपनः ह्यर्शांसि ग्रहणीप्रमेहनिचयश्लेष्मातिसारप्रणुत्। नित्यानन्दकवेर्विशेषकवितावाचांविलासोद्भवः, दत्तेसर्वगुणान्महास्थिरदशां ध्यानावसाने भृशम् अभ्यासेननिहन्तिमृत्युपलितंकामेश्वरो वत्सरात्

सर्वेषां हितकारको निगदितः श्रीनित्यनाथेन वै।
वृद्धानामपि कामवर्धनकरः प्रौढाङ्गनासङ्गमे,
सिद्धोऽयोनवयस्त्वमोघसुखदो
भूपैःसदासेव्यताम् ॥ ८२७ ॥
इत्येतदुक्तंबहुवीर्यवर्धनं
रात्रौसदाक्षीरसितासमन्वितम् ।
भुक्तोत्तरं सेवितमाशुकामिनां
विदग्धरामाकुलवश्यकारकम् ॥८२८॥

र. खं., र. चि., र. मं., र. को., यो. म., टो., र. र. स., र. सि., र. क., वृ. यो. त., वाजीकरणे । भै. र. संग्रहण्याम्

भाषा—अच्छीतरहसे माराहुआ अभ्रक (निश्चन्द्र), कायफल, कुठ, असगन्ध, गुडूची, मेथी, मोचरस, विदारीकन्द, मुसली, गोखरू, तालमखाना, केलेकाकन्द, शतावर, अजमोद, उड़द, तिल, धनियां, मुलहठी, नागबला, कचूर, मैनफल, जायफल, सैन्धव, भारङ्गी, काकड़ासींगी, भंगरा, त्रिकुटु, सफेदजीरा, स्याहजीरा, चित्रक, चातुर्जात (तज, पत्रज, इलायची, नागकेसर) पुनर्नवा, गजपीपल द्राक्ष, शणकेबीज, अडूसा, सेमरकामुसला, त्रिफला और केवांचकेबीज येसब समभाग । चूर्णकर चतुर्थांश सिकीहुईभांग और सबसे दूनी शक्कर मिलाकर मधु और घीइसप्रमाणसे डाले कि गोलीबांधनेलायक होजाय । फिर आधेआधेतोलेकी गोलियां बनाले । अथवा घी और मधु अधिकडालकर अवलेह बनाले। यह कामेश्वरमोदक तैयारहुआ । इसमेंसे १ गोलीलेकर ऊपरसे शक्कर डालाहुआ दूधपीवे, यह वीर्यके बढानेमे औरशुक्रके रोकनेमे कामियोंके वास्ते बसहै। यह स्त्रियोंको वशकरताहै। योगियोंको समाधिमे सुखदेताहै । स्त्रियोंको पुरुष सङ्गमे द्रावित करताहै । क्षीणोंमे पुष्टिकरताहै। क्षयकोनष्टकरताहै। नानातरहके रोगोंको दूरकरताहै। खांसी, श्वास, महातिसार, मन्दाग्नि, अर्श, ग्रहणीऔर श्लेष्मातिसार इनसबरोगोंको यह कुछदिनके अभ्याससे दूरकर वृद्धोंकोभी रतिसौख्य कराताहै ॥ १९१ ॥

१९२ कामेश्वरोमोदकः (द्वितीयः)

चूर्णांशं गगनं घनार्धविमलं गन्धश्च कृष्णामृते,
मेथी मोचरसो विदारिमुसलीगोक्षूरकश्चेक्षुरः
भीरुश्चैव कशेरुकं यवनिका तालाङ्कुरं धान्यकं
यष्टीनागबलातिलामधुरिकाजातीफलं सैन्धवम्
भार्गी कर्कटशृङ्गकं त्रिकटुकं जीरद्वयं चित्रकं,
चातुर्जातपुनर्नवाकरिकणा द्राक्षाशटी कट्फलम्
शाल्मल्यङ्घ्रिफलत्रिकंकपिभवं बीजंसमंचूर्णयेत्,
चूर्णार्धाविजयासिताद्विगुणिता–
मध्वाज्यमिश्रन्तु तत् ॥
कर्षार्धा गुटिकाथ कर्षमथवा सेव्या सतासर्वदा,
पेयंक्षीरमनुस्ववीर्यकरणे स्तम्भेऽप्ययंकामिनाम्

भै. र., ध., वै. क., र. र., भै. सा., रसायनसं., र. क., वाजीकरणे ।

भाषा—कुष्ठ, गुडूची, मेथी, मोचरस, विदारीकन्द, मुसली, गोखरू, तालमखाना, लज्जालुकेबीज, कसेरू, अजवाइन, तालाङ्कुर, धनियां, मुलहठी नागबला, अतिबला (गंगेरन), सौंफ, जायफल, सेन्धा, भार्ङ्गी, काकड़ासींगी, त्रिकुटु, दोनोंजीरे, चित्रक, चातुर्जात, पुनर्नवा, गजपीपल, द्राक्ष, कचूर, कायफल, सेमरकामुसला, त्रिफला, केवांचकेबीज येसब समभागलेकर चूर्णकरले । इसचूर्णका चतुर्थभाग अभ्रकभस्म औरअभ्रकसे आधा रजतमाक्षिक तथागन्धकलेवे, चूर्णहीसे आधीभांगलेकर सबको मर्दनकरके चूर्णमे मिलादे । फिर सबसे दूनी शक्कर डालकर घीऔरमधुमे एकएकतोलेकी गोलियें बनाकर रखलेवे । इसमेंसे एकगोलीखाकर ऊपरसे दूधपीवे । यह समस्तप्रमेह, बवासीर, मन्दाग्नि, श्वास, कास इनकोदूरकर यथेष्ट स्तम्भनकरताहै १९२

१९३ कामेश्वरोमोदकः(महान्) (तृतीयः)

कङ्कोलो बृहदेलिका गजबला वीरा वरीन्दीवरी,
वासावत्सकबीजवारणकणा विश्वोपकुल्योपणम्।
बीजानित्रपुसत्रिकण्टकशणाऽध्यण्डेक्षुराणां तथा
मज्जानोबदरीबिभीतकशिवाधात्रीप्रियालोद्भवा

स्तालीसंशिवलिङ्गिकामृतलता गाङ्गेरुकीबीजकं, भृङ्गीधान्यकचित्रकंसमुसलीवीराशटीमेथिका । दार्वीयुग्वृषभोऽथमेदसुमहामेदे च काकोलिका, तद्वत्क्षीरकवायसी निगदिता वृद्धिस्तथा मृद्धिका शाल्कद्वयराजिकाद्वयपृथगृजीराजमोदाद्वयं, श्रीखण्डद्वयमब्धिशोपमुसली मांसीसवांशीमिसिः । जातीपत्रिलवङ्गमर्कटकरभः काश्मीरकं दाडिमं, चातुर्जातककोलिका कुमुदिकाजातीफलंयष्टिका द्राक्षा खाससवल्कलं मदनकं शृङ्गाटकं त्र्यूपणं, जम्बूपद्मकपुष्कराह्वकदलीकन्दाश्वगन्धास्तिलाः मापाः शाल्मलिबीजवल्कलरसा मूलंचपौनर्नवं, कर्पांशं सकलं सुभृष्टविजया देया तु पादांशिका॥ रसरसकभुजङ्गास्तारतापीजवङ्गा, गगनतरणिसारा वेदमुख्यास्तु साराः । [illegible] ...ऽनु ॥ भवति युवतिमत्तः कामरूपादरः स्याद्धरति सकलरोगान्कामदःकामुकानाम् ८३५ यक्ष्माणं ग्रहणीगदंगुदरुजामानाहगुल्मोदराचुन्मादानलमान्घदीर्घकलनापस्मारमेहाश्मरीः शूलश्वासमरोचकं ज्वरमुरोरोगं कृमिं कामलां, पाण्डुत्वञ्च हलीमकञ्च जयति श्रीमानयंलीलया रेतःक्षीणमलङ्करोति मदनोन्मादं महाबुद्धिदं, नागेन्द्रश्च पराक्रमेण तुरगं वेगेन तारापतिम् । कान्त्या चैवमुडोः पतिं चलबलं नादे मयूरं घनं, नासत्यावधरीकरोतिवपुपालावण्यलक्ष्मीयुतः॥ नारीणाञ्च शतंशतंप्रतिदिनंवाजीवशक्तोरतौ, श्रीकामेश्वरसेवयागतवयाआप्नोतियूनःश्रियम्

बृ. यो. त, र. क., पा, व., वाजीकरणे ।

भाषा—शीतलचीनी, बड़ीइलायची, नागबला, मुसली, शतावरी, गोरखमुण्डी, अडूसा, इन्द्रजव, गजपीपल, सोंठ पीपल, मरिच, खीरेकेबीज, गोखरू, शणकेबीज, केवांचकेबीज, तालमखाना, बेर—बिभीतक—हर्रें—आंवले—चिरौंजीइनकीमज्जा, तालीस, शिवलिङ्गी अथवा कपूर, गिलोय, गंगेरनकेबीज, काकड़ासींगी, धनियां, चित्रक, स्याहमुसली, सालममिश्री, कचूर, मेथी, हल्दी, दारुहल्दी, अडूसा, मेदा, महामेदा, काकोली, क्षीरकाकोली, मकोय, ऋद्धि, वृद्धि, सफेदऔरलालकमलकेकंद, छोटीऔरबड़ीराई, दोनोंजीरे, अजवाइन, अजमोद, लालचन्दन, सफेदचन्दन, समुद्रशोष, जटामांसी, बंसलोचन, काकजङ्घा, जावित्री, लौंग, अकलकरा, केसर, अनारकेबीज, चातुर्जात, बाराहीकंद, कुमुदकीजड़, जायफल, मुलहठी, द्राक्ष, पोस्तकेडोडे, मैनफल, सिंघाड़े, त्रिकटु, जामुनकी मज्जा, पद्मकाठ, पोहकरमूल, केलेकाकंद, असगन्ध, तिल, उड़द, सेमलकेबीजऔरवल्कल, मोचरस, पुनर्नवाकीजड़, येसबएकएकतोला, इनसबसे चतुर्थांशभुनीहुईभांग, पारा, खर्पर (जस्त) नाग, रजत, सोनामाखी, बङ्ग, अभ्रक, ताम्रऔरलोहइनसबकीभस्में बदाम, वगैरह मगजियात जितने मिलसकें चारचारतोले, सबसेदूनीशक्कर, घी, और मधु इतना लेना कि गोलीबंधजाय । इनको यथाविधि चूर्णकर एकतोला या आधातोलाकी गोलियें बनालेना । यह बृहत्कामेश्वरमोदक है। इसमेंसे १ गोलीखाकर ऊपरसे दूधपीवेतो राजयक्ष्मा, ग्रहणी, बवासीर, आनाह, गुल्म, उदररोग, उन्माद, मन्दाग्नि, अपस्मार, प्रमेह, पथरी, शूल, श्वास, अरुचि, ज्वर, उरःक्षत, कृमि, कामला, पाण्डु, हलीमक, धातुकीकमजोरी, बुद्धिकीमन्दता, इनसबको यह दूरकर वीर्यसे परिपूर्णकरदेताहै ॥ १९३ ॥

१९४ कामेश्वरोमोदकः (चतुर्थः)

चातुर्जातं शटी नागो जातीपत्रं पडूपणम् । चारधत्तूरबीजानि कङ्कोलं जीरकद्वयम्॥८३८॥ जातीफलं लवङ्गं तु विडङ्गोशीररेणुकाः । चन्दनातिविपामेध्यःशतपुष्पात्रयं फली८३९॥ पाठाद्वयं मोचरसो मालबिल्वं यवानिका ।

सर्वेषां हितकारको निगदितः श्रीनित्यनाथेन यो।
वृद्धानामपि कामवर्धनकरः प्रौढाङ्गनासङ्गमे,
सिद्धोऽयोनवयस्त्वमोघसुखदो
भूपैःसदासेव्यताम् ॥ ८२७ ॥
इत्येतदुक्तंवहुवीर्यवर्धनं
रात्रौसदाक्षीरसितासमन्वितम् ।
भुक्तोत्तरं सेवितमाशुकामिनां
विदग्धरामाकुलवश्यकारकम् ॥८२८॥

र. पं., र. चि., र. मे., र. को., यो. म., हो., र. र. स., र. चि., र. क., वृ. यो. त., शार्ङ्गधरे। भै. र. संग्रहण्याम्

भाषा—अच्छीतरहसे माराहुआ अभ्रक (निश्चन्द्र), कायफल, कुठ, असगन्ध, गुडूची, मेथी, मोचरस, विदारीकन्द, मुसली, गोखरू, तालमखाना, केलेंकाफन्द, शतावर, अजमोद, उडद, तिल, धनियाँ, मुलहठी, नागवला, कचूर, मैनफल, जायफल, सैन्धव, भारंगी, काकडासींगी, भंगरा, त्रिकटु, सफेदजीरा, स्याहजीरा, चित्रक, चातुर्जात (तज, पत्रज, इलायची, नागकेसर) पुनर्नवा, गजपीपल दाख, शणकेबीज, अडूसा, सेमरकामुसला, त्रिफला और कौंचकेबीज येसव समभाग। चूर्णकर चतुर्थांश सिकीहुईभांग और सबसे दूनी शकर मिलाकर मधु और घीइसप्रमाणसे डाले कि गोलीबांधनेलायक होजाय। फिर आधेआधेतोलेकी गोलियां बनाले। अथवा घी और मधु अधिकडालकर अवलेह बनाले। यह कामेश्वरमोदक तैयारहुआ। इसमेंसे १ गोलीलेकर ऊपरसे शकर डालाहुआ दूधपीवे, यह वीर्यके बढानेमें औरशुक्रके रोकनेमें कामियोंके वास्ते वसहै। यह स्त्रियोंको वशकरताहै। योगियोंको समाधिमें सुखदेताहै। स्त्रियोंको पुरुष सङ्गमें द्रावित करताहै। क्षीणोंमें पुष्टिकरताहै। क्षयकोनष्टकरताहै। नानातरहके रोगोंको दूरकरताहै। खांसी, श्वास, महातिसार, मन्दाग्नि, अर्श, ग्रहणीऔर श्लेष्मातिसार इनसबरोगोंको यह कुछदिनके अभ्याससे दूरकर वृद्धोंकोभी रतिसौख्य कराताहै ॥ १९१ ॥

१९२ कामेश्वरोमोदकः (द्वितीयः)

चूर्णांशं गगनं घनार्कविमलं गन्धञ्च कुष्ठामृते,
मेथी मोचरसो विदारिमुसलीगोक्षुरफल्गुः
भीरुश्च कशेरुकं यवनिका तालाङ्कुरं धान्यकं
यष्टीनागवलातिलामधुरिकाजातीफलं सैन्धवम्
भार्गी कर्कटशृङ्गकं त्रिकटुकं जीरद्वयं चित्रकं,
चातुर्जातपुनर्नवा करिकणा द्राक्षाशटी कट्फलम्
शाल्मल्यक्षिफलत्रिकंकपिभवं बीजंसमंचूर्णयेत्,
चूर्णार्धाविजयासिताद्विगुणिता—
मध्वाज्यमिश्रन्तु तत् ॥
कर्षार्धा गुटिकाथ कर्षमथवा सेव्या सदासर्वदा,
पेयंक्षीरमनुस्ववीर्यकरणे स्तम्भेऽप्ययंकामिनाम्

भै. र., घ., वै. क., र. र., भै. सा., रसायनसं., र. क., शार्ङ्गधरे।

भाषा—कुठ, गुडूची, मेथी, मोचरस, विदारीकन्द, मुसली, गोखरू, तालमखाना, लज्जालूकेबीज, कसेरू, अजवाइन, ताडाङ्कुर, धनियां, मुलहठी नागवला, अतिबला (गंगेरन), सौंफ, जायफल, सैन्धा, भारङ्गी, काकडासींगी, त्रिकटु, दोनोंजीरे, चित्रक, चातुर्जात, पुनर्नवा, गजपीपल, दाख, कचूर, कायफल, सेमरकामुसला, त्रिफला, कौंचकेबीज येसब समभागलेकर चूर्णकरले। इसचूर्णका चतुर्थभाग अभ्रकभस्म औरअभ्रकसे आधा रजतमाक्षिक तथागन्धकलेवे, चूर्णहीसे आधाभांगलेकर सबको मर्दनकरके चूर्णमें मिलादे। फिर सबसे दूनी शकर डालकर घीऔरमधुमें एकएकतोलेकी गोलियें बनाकर रखलेवे। इसमेंसे एकगोलीखाकर ऊपरसे दूधपीवे। यह समस्तप्रमेह, बवासीर, मन्दाग्नि, श्वास, कास इनकोदूरकर यथेष्ट स्तम्भनकरताहै १९२

१९३ कामेश्वरोमोदकः(महान्) (तृतीयः)

कङ्कोलो बृहदेलिका गजबला वीरा वरीन्दीवरी,
वासावत्सकबीजवारणकणा विश्वोपकुल्योपणम्।
बीजानित्रपुसत्रिकण्टकशणाऽध्यण्डेक्षुराणां तथा
मज्जानोबदरीविभीतकशिवाधात्रीप्रियालोद्भवा

स्वालीसंज्ञितलिङ्गिकागृतलता गाङ्गेरुकीबीजकं,
शृङ्गीधान्यकचित्रकंसमुसलीवीराशटीमेथिका ।
दार्वीपुष्करमोऽथमेदसुमहामेदे च काकोलिका,
तद्वत्क्षीरककापली निगदिता ऋद्धिस्तथा वृद्धिका
शाल्मकद्वयराजिकाद्वयपृथग्जीराजमोदाद्वयं,
श्रीखण्डद्वयमब्धिशोषमुसली
मांसीसवांशीमिति: ।
जातीपत्रिलवङ्गमर्ककरभः काश्मीरकं दाडिमं,
चातुर्जातककोलिका कुमुदिकाजातीफलंपाटिका
द्राक्षा तामरसवल्कलं मदनकं शृङ्गाटकं त्र्यूषणं,
जम्बूफलकपुष्कराडकदलीकन्दाश्वगन्धास्तिलाः
मापाः शाल्मलिबीजवल्कलरसा मूलंचपौनर्नवं,
कर्षांशं सकलं सुभृष्टविजया देया तु पादांशिका।
रसरसकभुजङ्गास्तारतार्पाजवङ्गा,
गगनतरणिशारा वेदमुख्यास्तु साराः ।
द्विगुणितसितमेतच्चूर्णगोलं विदध्या-
त्तदनुमधुदविभ्यां प्राश्य पेयं पयोऽनु ॥
भवति युवतिमत्तः कामरूपादरः स्या-
द्धरति सकलरोगान्कामदःकामुकानाम् ८३५
यक्ष्माणं ग्रहणीगदंगुदरुजामानाहगुल्मोदरा-
नुन्मादानलमान्द्यदीर्घकलनापस्मारमेहाश्मरीः
शूलश्वासमरोचकं ज्वरमुरोरोगं कृमिं कामलां,
पाण्डुत्वञ्च हलीमकञ्च जयति श्रीमानयंलीलया
रेतःक्षीणमलङ्करोति मदनोन्मादं महाबुद्धिदं,
नागेन्द्रञ्च पराक्रमेण तुरगं वेगेन तारापतिम् ।
कान्त्या चैवमुडोः पतिं चलचलं नादे मयूरं घनं,
नासत्यावधरीकरोतिवपुपालावण्यलक्ष्मीयुतः॥
नारीणाञ्च शतंशतंप्रतिदिनंवाजीवशक्तोरतौ,
श्रीकामेश्वरसेवयागतवयाआप्नोतियूनःश्रियम्

वृ. यो. त, र. क., पा, व., वाजीकरणे ।

भाषा—शीतलचीनी, बड़ीइलायची, नागबला, मुसली, शतावरी, गोरखमुण्डी, अड़ूसा, इन्द्रजव, गजपीपल, सोंठ पीपल, मरिच, खीरेकेबीज, गोखरू, शणकेबीज, केवांचकेबीज, तालमखाना, भेर-विर्गातज-हर्र-आंवडे-निर्गोंआइनकीमज्जा, तालीस, दिवडिड़ी अथवा कपूर, गिलोय, गंगेरनकेबीज, काकड़ासींगी, धनियां, चित्रक, स्याहमुसली, सालममिश्री, कपूर, मेथी, हल्दी, दारुहल्दी, अड़ूसा, मेदा, महामेदा, काकोली, क्षीरकाकोली, मकोय, ऋद्धि, वृद्धि, सफेदऔरलालकमलकेबीज, छोटीऔरबड़ीराई, दोनोंजीरे, अजवाइन, अजमोद, लालचन्दन, सफेदचन्दन, समुद्रशोष, जटामांसी, वंसलोचन, कायफल, जावित्री, लौंग, अपलकरा, केसर, अनारकेबीज, चातुर्जात, बाराहीकंद, कुमुदकीजड़, जायफल, मुलहठी, द्राक्ष, पोसतकेडोडे, मैनफल, सिघाड़े, त्रिकटु, जामुनकी मज्जा, पद्मकाठ, पोहकरमूल, केलेकाकंद, असगन्ध, तिल, उड़द, सेमलकेबीजऔरवल्कल, मोचरस, पुनर्नवाकीजड़, येसबएकएकतोला, इनसबसे चतुर्थांशभुनीहुईभांग, पारा, खर्पर (जस्त) नाग, रजत, सोनामाखी, बङ्ग, अभ्रक, ताम्रऔरलोह- इनसबकोभस्में बदाम, वगैरह मगजियात जितने मिलसकें चारचारतोले, सबसेदूनीशकर, घी, और मधु इतना लेना कि गोलीबंधजाय । इनको यथाविधि पूर्णकर एकतोला या आधातोलाकी गोलियें बनालेना । यह वृहत्कामेश्वरमोदक है। इसमेसे १ गोलीखाकर ऊपरसे दूधपीवेतो राजयक्ष्मा, ग्रहणी, बवासीर, आनाह, गुल्म, उदररोग, उन्माद, मन्दाग्नि, अपस्मार, प्रमेह, पथरी, शूल, श्वास, अरुचि, ज्वर, उरःक्षत, कृमि, कामला, पाण्डु, हलीमक, धातुकीकमजोरी, बुद्धिकीमन्दता, इनसबको यह दूरकर वीर्यसे परिपूर्णकरदेताहै ॥ १९३ ॥

१९४ कामेश्वरोमोदकः (चतुर्थः)

चातुर्जातं शटी नागो जातीपत्रं षडूषणम् ।
चारधत्तूरबीजानि कङ्कोलं जीरकद्वयम्॥८३८॥
जातीफलं लवङ्गं तु विडङ्गोशीररेणुकाः ।
चन्दनातिविषामेथ्यःशतपुष्पात्रयं फली८३९॥
पाठाद्वयं मोचरसो बालबिल्वं यवानिका ।

नताजमोदौ शैलेयं मांसी वांशीरसस्तुणिः८४०
विदारीपुष्करं भार्गी पारसीकयवानिका।
आकारकरभो दारु दार्वी हिंस्रेन्द्रवारुणी ८४१॥
पद्मतुम्बुरुकालिङ्गपद्मबीजाजगन्धिकाः।
कसेरु विषतिन्दुश्च मुसलीगजपिप्पली ॥८४२॥
सिन्धुशोपस्तवक्षीरी धात्री रजगुरुस्तथा।
कूष्माण्डवानरीबीजंमाषाश्चेक्षुरकोऽगुरुः ८४३॥
द्राक्षाशाल्मलिबीजानि गोक्षुरश्च शतावरी।
प्रत्येकं शाणिकानि स्युः षट्पट्शाणौ रसो बलिः
वङ्गाभ्रसीसलोहानि शाणद्वादशकानि च।
विजया सर्वतुल्यांशा सर्वेभ्यो द्विगुणा सिता॥
पृथक् शाणश्च कर्पूरं कस्तूरी कुङ्कुमं तथा।
सर्वमेकत्र सञ्चूर्ण्य मध्वाज्याभ्यां विमिश्रयेत्॥
बदरीफलमानाश्च वटीं कृत्वा तु भक्षयेत्।
तस्य चानु पिबेत्क्षीरं साक्षात्स मदनो भवेत्॥
बृहत्कामेश्वरो ह्येष ततोऽधिकतरो गुणैः।
सूतगन्धकयोः स्थाने भस्मसूतोऽमृतोऽथवा॥
नागस्थाने तथा ताम्रं समानगुणदं भवेत्॥

भै. सा., वाजीकरणे।

भाषा—चातुर्जात, कचूर, नागभस्म, जावित्री, षडूषण (मरिच, पीपल, पिपलामूल, चव्य, चित्रक और सोंठ), चिरोंजी, धतूरेके बीज, शीतलचीनी, दोनों जीरे, जायफल, लौंग, विडङ्ग, खस, रेणुका, चन्दन, अतीस, मेथी, सौंफ, सौंफरूमी, सोआ, बहुफली, छोटी व बडी पाठा, मोचरस, बेलगिरी, अजवाइन, तगर, अजमोद, छरीला, जटामांसी, वंशलोचन, वेतके बीज, तुण, विदारीकन्द, पोहकरमूल, भारङ्गी, खुरासानी अजवाइन, अकलकरा, देवदारु, दारुहल्दी, हँस, इन्द्रायण, कमलगट्टा, इन्द्रजव, पद्मकाठ, बवईकेबीज, कसेरू, कुचिला, मुसली, गजपीपल, सेन्धानमक, समुद्रशोष, तीखुर, आंवले, रजगुर, कुम्हडा, केवांचके बीज, उडद, तालमखाना, अगर, द्राक्षा, सेमलका मुसला, बीज मोचरस गोखरू और शतावर ये प्रत्येक चार ४ मासे, पारा और गन्धक प्रत्येक १½ डेढ़ तोला, बङ्ग, अभ्रक, नाग, लोह इनकी भस्में ३ तीन तोले भांग सबकी बराबर, शक्कर सबसे दूनी, कपूर, कस्तूरी और केशर ये प्रत्येक ४- ४ मासे लेकर सबको चूर्णकर मिलाकर मधु और घीकेसाथ बेरबराबर गोलीबनाकर रखछोड़े। यह कामेश्वरमोदक तैयार हुआ। इसमेंसे १ गोली खाकर ऊपरसे दूधपीवे तो प्रमेहादि समस्त व्याधियां दूर होकर मनुष्य वीर्यसे परिपूर्णहोजाता है। इसयोगमे पाराऔरगन्धकके ठिकाने पारेकी भस्म अथवा रससिन्दूर प्रभृति मूर्छित पारद डालना औरनागकेस्थानमे ताम्रभस्म दे सक्तेहैं॥१९४

१९५कामेश्वरो मोदकः(महान्) (पञ्चमः)

चूर्णांशं शोधितश्चैव गगनं शुद्धमारितम्।
तदर्धं शुद्धलौहश्च लौहार्धं वङ्गभस्मकम् ८४९॥
जातीकोषफलश्चैव चूर्णांशं तत्र दापयेत्।
त्रिकटु त्रिफलामुस्तं चातुर्जातं ससैन्धवम्॥
भृङ्गी जीरकयुग्मञ्च धान्याकं ग्रन्थिपर्णकम्।
मांसी शतावरी कुष्ठं तुगा द्राक्षा लवङ्गकम्॥
शालपर्णी च कण्टी च चित्रकं कुन्दुरु मुरा।
पुनर्नवाश्वगन्धाङ्घ्रिपद्मकं क्षुरबीजकम् ८५२
सितां तिलांश्च धान्याकं मेथिका हरिवालुकम्
बलातिबलयो मूलं चव्यं च देवदारु च८५३॥
यमानी शतपुष्पा च मर्कटीबीजबिल्वकम्।
काकोली क्षीरकाकोली तालांकुरकशेरुकम्॥
भृङ्गी लवणकश्चैव कर्पूरं देवताडकम्।
एतेषां समभागानां चूर्णं कुर्यात्प्रयत्नतः॥८५५॥
शोधितं विजयाचूर्णं सर्वचूर्णार्धसंयुतम्।
शर्करां द्विगुणां दत्त्वा मोदकं परिकल्पयेत्॥
मध्वाज्यमिश्रितं कृत्वा कर्षमेकन्तु मोदकम्।
खादेत्प्रतिदिनश्चैव सर्वव्याधिविवर्जितम्॥
महाकामेश्वरो ह्येष महादेवेन निर्मितः ८५७॥

र. र., ध., वाजीकरणे।

भाषा—त्रिकटु, त्रिफला, नागरमोथा, चातुर्जात, सेंधानमक, काकड़ासींगी, सफेदजीरा, धनियां, मदन-

मस्त, (फट्टकोंदा-मराठी), जटामांसी, शतावर, कुठ, वंशलोचन, द्राक्ष, लौंग, शालपर्णी, कांटीके-फल, चित्रक कुन्दुरू, मुरामांसी, पुनर्नवा, असगन्ध, पिपलामूल, पद्मकाठ, तालमखाना, शकर, तिल, धनियां, मेथी, गेहूँला, वला, अतिवलाकीजड़, चव्य देवदारु, अजवाइन, सौंफ, केवांचकेबीज, बेलकी गिरी, काकोली, क्षीरकाकोली, तालके अंकुर, कसेरू, मेढासींगी, सांभरनमक, कपूर, बंग, ये सब सम-भाग लेकर चूर्ण बनालेना ।

इसचूर्णसे चतुर्थांश जायफल तथा अभ्रकभस्म, अभ्रकसे आधी लोहभस्म, लोहसे आधी वङ्गभस्म, शोधितभांगका चूर्ण सबचीजोंसे आधा । शक्करसबसे दूनी, लेकर । घीऔर मधु मिलाकर आधे या १तो-लेकी गोलियें बनाकर रक्खे । यह कामेश्वरमोदक सिद्धहुआ । इसमेसे १गोली खाकर ऊपरसे दूध-पीनेसे सबरोगोंसे रहितहोकर अव्याहत स्त्रीसङ्ग करसक्ताहै । यह श्रीमहादेवजीका याहाहुआहै१९५॥

१९६ कामेश्वरोमोदकः(षष्ठः)

त्रिकटुत्रिफलाकुष्ठं त्रिसुगन्धं च चव्यकम् ।
केसरं चित्रकं भृङ्गी यष्टी भार्गी दुरालभा ॥
कट्फलोशीरकं दारु सैन्धवं मदनं फलम् ।
यमानी जीरके द्वे च कारवी गजपिप्पली ॥
जातीफलश्च पत्रश्च लवङ्गागुरु चन्दनम् ।
तालीसं तिलमाषौ च क्षुरकं गोक्षुरं तथा ॥
शतावरी शताह्वा च रम्भा दार्वी पुनर्नवा ।
निकुम्भकुम्भौमार्जारकन्दो नागबला तथा ॥
वासा मांसी मुरा मुस्तं पिप्पलीमूलमेव च ।
मुशलीवानरी ब्राह्मी शाल्मलीमूलमेव च ८६२
गजकणा मेथिका च कर्करा चाब्धिशोषकम् ।
माजूफलं चाश्वगन्धा द्राक्षा कर्पूरकं समम् ॥
शुद्धलोहरजो वङ्गौ क्षेप्यौ बहुगुणौ हि तौ ।
अभ्रकं द्विगुणं शुद्धं सूतगन्धकयो र्दलम् ८६४॥
सर्पिर्मधुभ्यां कुर्वीत मोदकानक्षसम्मितान् ॥
कर्पूरधूली कस्तूरीकुङ्कुमैरवचूर्णितान् ॥
प्रत्यहं भक्षयेदेकं शृतं चानु पिबेत्पयः ८६५॥
कासश्वासबलासनाशनकरं कामावबोधप्रदं,
रामावश्यकरं सुखातिसुखदं यक्ष्मादिरोगापहम्
बल्यं पाण्डुमहातिसारशमनं क्षुद्बोधनं शोधनं,
क्लृप्तो वैद्यवरेण राजपुरतः कामेश्वरो दुर्लभः ॥
र. क., वाजीकरणे ।

भाषा—त्रिकटु, त्रिफला, कुठ, त्रिसुगन्ध (कस्तूरी, अम्बर, और गोरोचन । अथवा तज, पत्रज इलायची), चव्य, केसर, चित्रक, काकड़ासींगी, मुलहठी, भारङ्गी, जवास, कायफल, खस, देवदारु सेंधानमक, मैनफल, अजवाइन, जीरा, स्याहजीरा, मगरैल, गजपीपल, जायफल, पत्रज, लौंग, अगर, चन्दन, तालीस, तिल, उड़द, तालमखाना, गोखरू, शतावर, सौंफ, केलेकाकन्द, दारुहल्दी, पुनर्नवा, दन्तीमूल, समुद्रशोष, मार्जारक (मालाकंदमराठी विलाईकंदहिंदी), नागबला, अडूसा, जटामांसी, मुरामांसी, नागरमोथा, पिपलामूल, मुशली, केवांचकेबीज, ब्राह्मी, सेमरकामुसला, मेथी, गजपीपल, अकलकरा, समुद्रशोष, माजूफल, असगन्ध, द्राक्ष, कपूर, लोह और बङ्गभस्म, ये प्रत्येक एकएकतोला लेकर बारीक चूर्ण करलेना । सबचूर्णसे दूनी अभ्रकभस्म और चूर्णको चतुर्थांश पारेगन्धककी कजली डालकर घीऔर मधु उचितप्रमाणमें मिलाकर दोदोमासेकी गोलियें बनाले । कस्तूरी, कपूर, औरकेसर बारीक पीसकर गोलियोंपर छिड़कदे । यह महाकामेश्वर मोदकतैयार हुआ । इसमेसे एकएकगोली लेकर दूधपीवेतो कास, श्वास, कफ, पाण्डु, राजयक्ष्मा, दारुणातिसार, येसब दूर-होतेहैं । यहरस स्त्रियोंको वशकराताहै । और मन्दाग्निको नष्टकरताहै ॥ १९६ ॥

१९७ कामेश्वरो मोदकः (अष्टमः)

पारदं दरदं गन्धमभ्रकं वङ्गताम्रकम् ।
लोहभस्म द्विगद्याणं प्रत्येकं तु समाहरेत्८६७॥
तोलकानां त्रयं व्योषाद् वत्सनाभं द्वितोलकम् ।

चातुर्जातं चतुस्तोलं द्वितोलं हेमबीजकम्८६८
तोलकं शुद्धकर्पूरं जातीपत्री फलं तथा।
लवङ्गमब्धिशोषश्च कपिकच्छूः शतावरी८६९॥
आकल्लकं कृष्णजीरं जीरं चैकैकतोलकम्।
मुशली चित्रकश्चेति तोलकद्वयसम्मितान्८७०
कङ्कोलबीजं मूर्वा च खुरासानी यवानिका।
अहिफेनं यष्टिमधु ज्योतिष्मती च केसरम्॥
विषमुष्टी चोचटा च पिप्पलीमूलमेव च।
एकैकं तोलकं सर्वं ग्राह्यं शुद्धं सुचूर्णितम्८७२॥
कुलिञ्जनं द्विगद्याणं भर्जिता च यवानिका।
द्वितोलकांस्तु सङ्गृह्य सिता च दशतोलका८७३
त्रैलोक्यविजयापत्रसत्त्वं दशपलं क्षिपेत्।
नागवल्लीदलद्रावैः स्त्रेधा भाव्यं विजानता॥
जीर्णं गुडं दशपलं दत्त्वा कार्यं तु मोदकम्।
आमलक्याः प्रमाणेन गद्याणेकेन वासितम्॥
कस्तूर्याः स्तम्भनकरं सिद्धं यामचतुष्टयम्।
बल्यं पुष्टिकरञ्चैवत्स्वानुभूतं रसायनम् ८७६॥
दुग्धान्नसेविनो नित्यं तेजोवृद्धिकरं परम्।
स्वादपेक्षा न कर्तव्या महान्तं गुणमिच्छता॥
नित्यताप्यस्ति योगेऽस्मिन् गुणाधिक्यं हि वर्तते
तस्मात्सर्वप्रयत्नेन अशनीयो हि कामुकैः८७८

र. सि., स्तम्भने।

भाषा—पारा, शिंगरफ़, गन्धक, अभ्रक, वङ्ग, ताम्र, लोहयेसब यथायोग्य शुद्ध और भस्मकियेहुए एकएकतोला, त्रिकटु ३ तो०, वछनाग २ तो०, चातुर्जात ४ तो०, धतूरबीज २ तो०, शुद्धकपूर, जायफल, जावित्री, लौंग, समुद्रशोष, केंवांच, शतावर, अकरकरा, स्याहजीरा, सफ़ेदजीरा येप्रत्येक एक-एक तोला, मुसलीऔर चित्रक २ दोतोले; शीतलचीनी, खुरासानीअजवाइन, अफीम, मुलहठी, मालकंगनी, शुद्धकुचिला, रातिंगन, पिपलामूल, कुलिंजन, येसब एकएकतोला, देशीअजवाइन-भुनीहुई २ तो०; शक्कर, भांगऔर गिलोयकासत्व दस१०तोले, इनसबको इकट्ठेकर नागरवेलकेपानके रससे, ३भावनादे। पुरानागुड़ ४० तोला डालकर ६–६माशेकी गोलीबनाकर ६माशाकस्तूरीसे वासितकर रखछोड़े। यह कामेश्वरमोदक तैयार हुआ। इसकी १गोली खाकर दूधपीनेसे ४पहरका स्तम्भनहोताहै, यह बल और पुष्टिको करता है। यह हजारोंवारका अनुभवकिया हुआहै। दुग्धान्नसेवनकरनेसे नित्यही तेजकी वृद्धि होतीहै। अधिकगुणकीइच्छाकरनेवालेको स्वादकीतरफ नहीं दौड़नाचाहिये। इसप्रयोगकेखानेसे कुछदिनबाद हमेशाकेलिये शक्ति कायमहोजातीहै। फिर इसको नखानेसेभी शक्तिमौजूद रहतीहै॥ १९७॥

१९८ कामेश्वरो रसः (प्रथमः)

पलं सूतं पलं गन्धं पथ्याचित्रकयोः पलम्।
मुस्तैलापत्रकाणाञ्च प्रतिसार्धपलं क्षिपेत्८७९॥
त्र्यूषणं पिप्पलीमूलं विषञ्चापि पलं न्यसेत्।
नागकेसरकं कर्षमेरण्डस्य पलं तथा॥८८०॥
पुरातनगुडेनैव तुल्येनैव विमिश्रयेत्।
मर्दयेत्कनकद्रावैः भावयेच घृतान्वितम् ८८१॥
वटिकां बदरास्थ्याभां कारयेद्दक्षवेदिनिशि।
पाण्डुरोगहरः सोऽयं रसः कामेश्वरः स्वयम्॥

र. सं., वै. वि., र. र., र. का., र. सु., नि. र., र. र. स., र. को., चि. क्र., वै. क., ना. वि., पाण्ड्वधिकारे। ना. विलासे पत्रकस्थाने त्रिफला दृश्यते।

टि॰ रसरत्नसमुच्चये पथ्याचित्रकयोः पलमित्यस्य स्थाने वज्रीपथ्यात्रयंत्र्यमिति पाठः सच पाण्डुशोफयो र्युक्तोऽपि प्रतीयते, । मृदुकोष्ठानां कृते यदा योगः क्रियते तदातु वज्री नैव योजनीया मृदुकोष्ठानां तद्दानस्य निषेधात्। यदा तु क्रूरकोष्ठानां कृते योगो निष्पाद्यते तदा चित्रकवज्यौ द्वेऽपि योजनायां मद्रैव निष्पद्यते इति–रहस्यम्।

भाषा—शुद्धपारा, गन्धक, हरड़ें, और चित्रक चारचारतोले, नागरमोथा, इलायची और पत्रज ६-६ तोले, त्रिकटु, पिपलामूल और शुद्धबछनाग ये ४–४तोले, नागकेसर१तोला, एरण्डमजा४तोले इनसबकी बराबर पुरानागुड़मिलाकर धतूरेके रससे मर्दनकर सुखाकर घीके संयोगसे बेरकीगुठलीके

बराबर गोलियें बनाकर रखछोड़े, यह कामेश्वर रस तैयारहुआ । इसकी एकएकगोली रातको खानेसे पाण्डुरोगका नाशहोताहै ॥ १९८ ॥

१९९ कामेश्वरो रसः (द्वितीयः)

जातीफलं च सौराष्ट्री कृष्णधत्तूरबीजकम् ।
जातीपुष्पमफेनञ्च नागं हिङ्गुलमेव च॥८८३॥
एतानि समभागानि खसक्वाथेन मर्दयेत् ।
गुञ्जामात्रां च वटिकां सितया सह भक्षयेत् ॥
नाम्ना कामेश्वरः प्रोक्तो रमयेत्कामिनीशतम्

यो. र., वै. र., चि. र. भ., र. चं., टो.,वाजीकरणे । चिकित्सारत्नाभरणे सौराष्ट्रीस्थाने आकल्लकं दृश्यते, नाम च कामेश्वरवटीति । टोडरानन्दे द्वितीयपाठे खसस्थाने शटी दृश्यते; उभयस्यापि भावनायां न कापि क्षतिः ।

भाषा—जायफल, फिटकड़ी, कालेधतूरेकेबीज, जावित्री, अफीम, नागभस्म, शिंगरिफ, येसब समभागलेकर कपड़छानकरके खसके काढ़ेसे एकदिन मर्दनकर एकएक रत्तीकी गोलियें बनाकर एकगोली शकरकेसाथ खाकर दूधपीनेसे यथेष्ट स्त्रीगमन करसक्ताहै ॥ १९९ ॥

२०० कामेश्वरो रसः (तृतीयः)

साभ्रं शुल्वं केसरं लोहचूर्णं
जातीपत्रं सर्पफेनं लवङ्गम् ।
एलासूतं क्षीरकङ्कोलनागौ
जातीजातं चन्द्रबोधं कवाना ॥८८५॥
अब्धेः शोषं सत्कुबेराक्षकेश्यौ
क्षौद्रैरेवं मिश्रमाकल्लयुक्तम् ।
क्षीणे वीर्ये रेतसः सागरोऽयं
कुर्वन्त्येवं कामदेवो रसोऽयम् ॥८८६॥
सायं भक्षेद्यो वटीवल्लयुग्मां
गच्छेन्नारीसङ्गमेतत्प्रसादात् ।
वृद्धो देहे याति तारुण्यभावं
रामावश्यं सर्वकाले रतिः स्यात्८८७॥

र. को., वाजीकरणे ।

भाषा—अभ्रकभस्म, तांबाभस्म, केसर, लोहभस्म, जावित्री, अफीम, लौंग, इलायची, शुद्धपारा, क्षीरकंकोल, नागभस्म, जायफल, चंमुर, शीतलचीनी, समुद्रशोष, कशाकेबीज, येसब कूटकपड़छानकर मधुमे ६-६ रत्तीकी गोलियां बनाकर रखछोड़े। यह कामदेव रस तैयारहुआ । इसमेसे १ गोली खाकर ऊपर दूध पीनेसे शुक्रस्तम्भित होकर स्त्रियोंमे यथेष्टरमणकरसक्ताहै ॥ २०० ॥

२०१ कामेश्वरो रसः(चतुर्थः)

लोहार्धं मृतताम्रश्च पारदं भागसप्तकम् ।
गन्धकं सर्वतुल्यांशं काचकूप्यां विनिःक्षिपेत् ॥
वालुकायन्त्रके पाच्यं यावद्द्वादशयामकम् ।
रसः कामेश्वरो नाम शम्भुना परिकीर्तितः८८९
गुञ्जापरिमितो देयो ह्यनुपानविशेषतः ।
स्त्रीणां शतसहस्रं तु रमयेन्नात्र संशयः ॥८९०॥

र. म. मा., वाजीकरणे ।

भाषा—लोहभस्म १ तो०, ताम्रभस्म ½ तो०, पारा७तो० और सबकीबराबर गन्धक लेकर सबको खरलमे मर्दनकर आतशीशीशीमे भरकर बालुकायन्त्रमे १२ पहरकी आंचदेना । स्वाङ्गशीतलहोनेपर निकालकर रखछोड़ना, यह कामेश्वर रस तैयारहुआ । इसकी १ रत्तीकीमात्रा अनुपानविशेषसे देनेसे यथेष्ट स्त्रीसङ्ग करसक्ता है ॥ २०१ ॥

२०२ कामेश्वरीवटी

हयारिरसमादाय पारदं तेन मर्दयेत् ।
कृष्णव्यालोदरे क्षिप्त्वा जलौकाबन्धमाचरेत् ॥
महाभोगपरै र्ग्राह्या समासात्कीर्तिता प्रिये ।
कामार्थी साधको यश्च मोक्षयेत्स्त्रीसहस्रकम् ॥
महाकामेश्वरी नाम्ना क्षोभयेद्भुवनत्रयम्८९२॥

र. सि., वाजीकरणे ।

भाषा—सफेदकनरेकी जड़कारसलेकर पारेको यहांतक मर्दनकरेकि नष्टपिष्टी होजाय । फिर इसकी गोली बनाकर कालेसांपके पेटमे भरकर लवणयन्त्रमे ४ पहरपकाकर स्वाङ्गशीतल होनेपर गोलीको निकालकर रखछोड़े। यह कामेश्वरी गुटिका तैयार हुई । इसगोलीको मुंहमे रखनेसे अथवा कमरमे बांधनेसे

अथवा दूधमे उबालकर पीनेसे हजारों स्त्रियोंको प्रसन्न करसक्ता है ॥ २०२ ॥

२०३ काम्बायनोरसः

भस्मसूतं समं गन्धं स्वर्जिकाक्षारकाञ्चनी ॥
प्रत्येकञ्च द्विभागं स्यात्सर्वतुल्यैं घृतैः सह ८९३
पिष्ट्वा मृद्वग्निना पाच्यंयावत्पिण्डत्वमागतम् ।
निष्कार्धं भक्षणाद्धन्ति कुष्ठं काम्बायनो रसः ॥
देवदाल्याः सुचूर्णन्तु मध्वाज्याभ्यां लिहेदनु॥

र. का., कुष्ठाधिकारे ।

भाषा—पारेकी भस्म, शुद्धगन्धक, सज्जीखार, हल्दी, येसब समभागलेकर सबकी बराबरघीडाल-गोलीबंधनेतक मर्दनकरे। इसमेसे २ माशेखाकर बन्दालकाचूर्ण आधातोला या योग्यतानुसार घी और मधुमिलाकर चाटनेसे यह समस्तकुष्ठोंका नाश-करताहै। **काम्बायन** इसका नामहै ॥ २०३ ॥

२०४ कारुण्यभैरवोरसः

पारदाभ्रं समं खल्वे भृङ्गनीरेण मर्दितम् ।
बालुकायन्त्रके पाच्यं मूपान्ते याममात्रकम्८९५
स्वाङ्गशीतलमुद्धृत्य वाराहशिखिपित्तकैः ।
भावितं मापमात्रञ्च दातव्यं च प्रलापजित् ८९६
तक्रभक्तं भवेत्पथ्यं नारिकेलजलं पिबेत् ।
सर्वे रोगा विनश्यन्ति रसात्कारुण्यभैरवात्८९७

वै. चि., वा., सन्निपाते ।

भाषा—शुद्धपारा और अभ्रकभस्म समभागले-कर भांगरेके रससे मर्दनकर सम्पुटमे बन्दकर दोचार कपड़मिट्टी देकर और सुखाकर बालुकायन्त्रमे एक-पहर पकाकर स्वाङ्गशीतलहोनेपर निकालकर सूवर, मोर अथवा मुर्गाके पित्तोंसे भावनादेकर एकएक-माशेकी गोलियां बनाकर रखलेवे, यह कारुण्यभै-रव रस तैयारहुआ । इसकी १ गोली अदरख-वगैरहके साथदेनेसे प्रलापक सन्निपातको दूर करती-है। छाछऔरभातइसमे पथ्यदेना। अधिक दाहहोतो नारियलका जलपिलाना ॥ २०४ ॥

२०५ कार्श्यहर लौहम्

श्वेतापुनर्नवादन्तीवाजिगन्धात्रिकत्रयैः ।
शतमूलीबलायुक्तै रेभि लौंहं प्रसाधितम्८९८
हिनस्ति नियतं कार्श्यमपि भृङ्गरसैः सह ।
नास्त्यनेन समं लौहं सर्वरोगान्तकं मतम् ॥
दीपनं बलवर्णाग्ने र्वृष्यदश्चोत्तमोत्तमम्८९९॥

र. सं., र. सु., कार्श्ये ।

भाषा—बच अथवा शिवकान्ता, पुनर्नवा, दन्तीमूल, असगन्ध, त्रिकटु, त्रिफला, त्रिजात, शतावर, बला, ये प्रत्येक १० तोले लेकर जवकु-टकर अष्टगुणितजलमे काढ़ाकर चतुर्थांशावशेष रह-नेपर स्वाङ्गशीतल होनेपर धीरेसे नितरे हुए पानीको २-३ बार छान लेना। इसमे अष्टमांश लोहभस्म अथवा मण्डूरभस्म डालकर मन्दाग्नि पर पकावे, जब इसकी गोली बंधनेलायक होजायतब उतारकर १-१ माशेकी गोलियें बनाकररखछोड़े। इसमेंसे १-१ गोली २ तोलेभंगरेकेरसकेसाथ देनेसे कृशता, मन्दाग्नि, धातुक्षीणता इनसबको यह अवश्य नष्ट करताहै। कृशताकोदूरकरनेवालाइसकीबराबरऔरलौह नहीं है।

२०६ कालकचूर्णम्।

गृहधूमो यवक्षारः पाठा व्योषं रसाञ्जनम् ।
तेजोह्वा त्रिफला लोहं चित्रकश्चेति चूर्णितम् ॥
सक्षौद्रं धारयेदेतद्गलरोगविनाशनम् ।
कालको नाम चूर्णोऽयं दन्तास्यगलरोगनुत् ॥

यो. म., भै. र., ध., र. र. क., वृ. मा., कण्ठरोगे।

भाषा—घरका धूंआं, यवक्षार, पाठा, त्रिकटु, रसौत, तेजबल, (अभावमे चिरफड़) त्रिफला, लोह, चित्रक, येसब समभागलेकर चूर्णकर मधुमे मिलाकर मुंहमे रखनेसे दान्त, मुंहऔरगलेके रोगोंको नष्ट-करताहै ॥ २०६ ॥

२०७ कालकण्टकोरसः (प्रथमः)

पारदाभ्रं मृतं तुल्यं द्वाभ्यां तुल्यं तु गन्धकम् ।
तत्सर्वं भृङ्गजे द्रावै मर्दयेद्दिनसप्तकम् ॥९०२॥

पञ्चारं चाङ्कोलतैलै र्भावयित्वाऽथ भक्षयेत् ।
माषमात्रन्तु वर्षैकं रसोऽयं कालकण्टकः ९०३
पिष्ट्वा करञ्जपत्राणि गवां क्षीरैः पिबेदनु ।
जरामृत्युविनिर्मुक्तो जीवेद्ब्रह्मदिनं नरः ९०४

र. सं., रसायन सं. ।

भाषा—पारदभस्म, अभ्रकभस्म, समभाग और दोनोंकी बराबर गन्धक इनको भांगरेके रससे सात दिन मर्दनकरके अङ्कोलके तैलमे ६ वार भावना-देकर रखछोड़े । यह कालकण्टक रस तैयारहुआ। इसमेसे १ माशाखाकर ऊपरसे करञ्जकेपत्ते गायके-दूधसे पीसकर पीनेसे बुढ़ापा, मृत्यु, इनसे निर्मुक्त-होकर जितनी ब्रह्माने मनुष्यकेलिये आयु दीहै उतने समयतकजीवे ॥ २०७ ॥

२०८ कालकण्टकोरसः (द्वितीयः)

वज्रसूताभ्रहेमार्कतीक्ष्णमुण्डं क्रमोत्तरम् ।
मारितं मर्दयेदम्लवर्गेण दिवसत्रयम् ॥९०५॥
त्रिक्षारं पञ्चलवणं मर्दितस्य समं मतम् ।
दत्त्वा निर्गुण्डिकाद्रावै र्मर्दयेदिवसत्रयम्९०६॥
शुष्कमेतद्विचूर्ण्याथ विषं चास्याष्टमांशतः ।
टङ्कणं विषतुल्यांशं दत्त्वा जम्बीरजद्रवैः९०७॥
भावयेद्दिनमेकन्तु रसोऽयं कालकण्टकः ।
दातव्यो वातरोगेषु सन्निपाते विशेषतः९०८॥
द्विगुञ्जमार्द्रकद्रावै र्घृते वा वातरोगिणाम् ।
निर्गुण्डीमूलचूर्णन्तु महिषाक्षं च गुग्गुलम् ९०९
समांशं मर्दयेदाज्ये तद्वटी कर्षसम्मिता ।
अनुयोज्या घृतै र्नित्यं स्निग्धमुष्णं च भोजनम्॥
मण्डलान्नाशयेत्सर्वान् वातरोगान्न संशयः ।
सन्निपाते पिबेच्चानु रविमूलकषायकम् ९११॥

र. चि., र. क., रसायनसं., नि. र., र. का., वै. चि. वातरोगेषु ।

भाषा—हीरा १ भाग, पारा २ भाग, अभ्रक ३ भाग, सुवर्ण ४ भाग, तांबा ५ भाग, लोहा ६ भाग, मुण्ड ७ भाग, ये सब विशुद्ध और मारे हुए लेकर अम्लवर्गसे ३ रोज़ मर्दनकर, सज्जीखार, जवाखार, टङ्कण और पञ्चलवण ये सब पूर्वद्रवाओंके बराबर लेकर निर्गुण्डीके रससे ३रोज मर्दनकर सुखाकर इनसबसे अष्टमांश वछनाग और सुहागा देकर जम्बीरके रससे १ दिन भावनादेनेसे । यह कालकण्टक रस तैयार होगा । इसकी २ रत्तीकी मात्रा अदरखके रस अथवा घीसे वातरोगोंमें और सन्निपातोंमे देना । निर्गुण्डीकी जड़, गूगल इनदोनोंको घी डालकर खूब कुटवाना, दोनों एक जीव-होजानेपर एक २ तोलेकी गोली बनाकर घीकेसाथ इस रसके पीछेदेना । स्निग्ध और गरम भोजनखिलाना, सात, चौदह या इक्कीस दिनमे यह तमाम वायुके रोगोंको नष्टकरता है । सन्निपातमे आककी जड़की छालका काढ़ा पिलाना ॥ २०८ ॥

२०९ कालकण्टकोरसः (तृतीयः)

शुद्धसूतं मृतं गन्धं चाभ्रकं तीक्ष्णताम्रकम् ।
हंसपादीरसै र्मर्द्यं काचकूप्यां निवेशयेत्९१२॥
वालुकायन्त्रके पाच्यं पच्यामान्ते समुद्धरेत् ।
मासमात्रप्रयोगेण मन्दवातो विनश्यति ९१३॥

वै. चि., व. रा., मन्दवाते ।

भाषा—शुद्धपारदभस्म, गन्धक, अभ्रकभस्म, लोहभस्म, और ताम्रभस्म येसब समभागलेकर हंस-राजके रससे दोतीन रोज़ मर्दनकरे । फिर सुखाकर कपड़मिट्टीकीहुई आतशीशीशीमे भरकर ६ पहर तक पकावे । स्वाङ्गशीतल होनेपर निकालकर एक माशेकी मात्रा देनेसे मन्दवायु नष्ट होता है । मन्द-वातके लक्षण वैद्यचिन्तामणि अथवा वसवराजीयमे देखना ॥ २०९ ॥

२१० कालकण्टको रसः (चतुर्थः)

शुद्धं सूतं रसं गन्धं मरिचं टङ्कणं कणा ।
त्रिफला धूर्तबीजञ्च समभागं च खल्वके ९१४
तिन्दुको बृहती फल्गुः सोमवल्ली कपित्थकः ।
आर्द्रको भृङ्गराजश्च द्रवै र्भाव्यं दिनत्रयम् ९१५
काचकूप्यां निवेश्याथ वालुकायन्त्रके पचेत् ।
यामद्वयं च मन्दाग्नौ स्वाङ्गशीतलमुद्धरेत् ९१६

वराहच्छागपित्ताभ्यां भावयेच दिनद्वयम्।
गुञ्जामात्रं प्रदातव्यं पक्षाघातं विनाशयेत्॥
त्रिकटुत्रिफलाक्वाथमनुपानं पिबेत्सदा ९१७

व. रा., वै. चि., पक्षाघाते।

भाषा—शुद्धपारा, वछनाग, गन्धक, मिरच, सुहागा, पीपल, त्रिफला, धतूरेके बीज ये सब समभाग लेकर। तेंद, भटकटैया, कठगूलर, लताकरञ्ज, कैथ, अदरख, भृंगराज, इन प्रत्येकके रसोंसे तीन तीन दिन भावना देकर सुखाकर कपड़मिट्टीकी हुई काचकी शीशीमे रख दो पहर मन्द अग्निसे बालुकायन्त्रमें पकाना। स्वाङ्गशीतल होनेपर निकालकर सूअर, बकरा इनदोनोंके पित्तोंसे दो२दिनभावनादेकर रखछोड़े। यह कालकण्टक रस तैयार हुआ। इसमेंसे एकरत्तीकी मात्रा त्रिकटु और त्रिफलाके काथकेसाथ देनेसे यह पक्षाघातको दूर करताहै। ॥ २१० ॥

२११ कालकन्धरोरसः (पित्तहिंसकः–वातमुद्गरः)

विषं मनशिलां सूतं गन्धकं टङ्कणं कणाम्
धूर्तबीजं समं खल्वे दिनं हंसपदीरसैः ९१८
मर्दित्वा कज्जलीं कृत्वा शरावेण पुटे पचेत्।
आरण्यकोत्पलशतैः स्वाङ्गशीतलमुद्धरेत् ९१९
स्नुहीक्षीरैर्विमर्द्याथ मत्स्यपित्तेन भावयेत्
गुञ्जामात्रं प्रदातव्यं सर्वज्वरहरं परम्॥९२०॥
अनुपानविशेषेण देयं दोषज्वरं हरेत्।
पथ्यं देयं सुशाल्यन्नं मुद्गसूपेन संयुतम् ९२१
दाहे शीतजलं देयमिक्षुखण्डानि भक्षयेत्।
हरिणा कथितः पूर्वं रसोयं कालकन्धरः ९२२

वै. चि., व. रा., सन्निपाते। टि० अयंपाठस्तूष्णापित्ते वैद्यचिन्तामणिवसवराजीययोःपित्तहिंसकनाम्नापठितः तत्रमत्स्यपित्तभावनायाःअभाव एतावानेवविशेषोऽतस्तस्याप्यत्रैवान्तर्भावः—

भाषा—शुद्धवछनाग, मैनसिल, पारा, गन्धक, सुहागा, पीपल, धतूरेकेबीज येसब समभागलेकर हंसराजकेरससे मर्दनकर कज्जली बनाकर सम्पुटमे बंदकर ४–५कपड़मिट्टीदेकर १००जङ्गली-कण्डोंकी आंचदे। स्वाङ्गशीतलहोनेपर निकालकर थूहरके दूधमे मर्दनकर मछलीके पित्तसे भावनादेकर रखछोड़े। यह कालकन्धर रस तैयारहुआ, इसमेसे १रत्तीकीमात्रा अनुपानविशेषसे देनेसे समस्तज्वरोंको दूरकरतीहै। पथ्यमे शालीचावल, मूंगके यूषकेसाथ देने चाहियें। दाहहोतो ठंढापानी, ईखवगैरहसे ठंढे उपचारकरे॥ २११ ॥

२१२ कालकलान्तकवटी

शुद्धं सूतं मृतं वङ्गं तालसिन्धूत्थलाङ्गलीः।
स्फटिका च पलैकैकं रसोनश्च चतुष्पलम्॥
कारवल्या द्रवैर्मर्द्य दिनैकं कारयेद्वटीः।
गुञ्जातुल्याः सदा खादेद्गुदद्वारे च ताः क्षिपेत्॥
रक्तवातकफोत्थानामर्शसां नाशनी ध्रुवम्।
वटी कालकलान्तेयमनुपानञ्च कथ्यते॥९२५॥
भल्लातं त्रिफला दन्ती वह्निचूर्णं समं समम्॥
सैन्धवं सर्वतुल्यं स्याद्वर्जयेत्खर्परे चिरम्॥
मृद्वग्निना भवेत्सिद्धं कर्षं तक्रैः पिबेदनु ९२६

नि. र., वै. क., अर्शःसु।

भाषा—शुद्धपारा, बङ्गभस्म, हरिताल, सेन्धानमक, करिहारी, फिटकड़ी येसब एकएकपल, लशुन ४पल, सबको इकट्ठेकर करेलेके रससे १दिन मर्दनकर एकएकरत्तीकी गोलियां बनाकर रखछोड़े, यह कालकलान्तक वटी तैयार हुई। इसमेसे एकएकगोलीखाकर भिलांवा, त्रिफला, दन्तीमूल, चित्रक येसब समभाग, और सैन्धव सबकी बराबर लेकर नयेखपड़ेमे इसको मन्दआंचसेसेके, जबलालहोजाय तब उतारकर इसमेसे एकतोलालेकर छाछमे डालकर ऊपरसे पीवे और १ गोली गुदाके भीतररक्खे। रक्तवात और कफसे भयेहुए बवासीरोंको यह गोली नष्टकरतीहै॥ २१२ ॥

२१३ कालकूटरसः

रुद्रसह्यविषं चैव त्रिभागः सूत एव च।
गन्धकः पञ्चभागः स्याच्छिला स्याद्द्विभागिका

ताम्रभस्म चतुर्भागमृतुभागश्च टङ्कणम् ।
तालकं रत्नसंख्याकं वह्निमूलं तथैव च ९२८॥
त्रिकटी द्वादश ज्ञेयास्त्रिफला दशभागिका ।
हिङ्गुनश्चन्द्रभागः स्याद्वचायाश्च तथैव च ९२९
एवं खल्वे च संस्थाप्यमार्द्रकं वह्निमूलकम् ।
जम्बीरं लशुनश्चैव शार्ङ्गेष्टार्कस्य मूलकम् ॥
लाङ्गली स्वर्णमूलश्च सिन्धुनागदलं तथा ।
अङ्कोलशिग्रुमूलानि प्रत्येकं याममात्रकम् ९३१
पञ्चकोलकषायेण पञ्चमूलेन मर्दयेत् ।
गुञ्जामात्रप्रमाणेन वटकान् कारयेत्ततः ९३२
वटीमेकां प्रयुञ्जीत शृङ्गवेराम्भसायुताम् ।
सर्वज्वरहरो योगः सन्निपातकुलान्तकः९३३॥
स्नानं कुर्यात्प्रयत्नेन श्रीखण्डालेपमाचरेत् ।
दध्यन्नं दापयेत्पथ्यं खर्जूरादिफलान्यपि९३४॥
ताम्बूलचर्वणं कुर्यात्क्रमादेवं समाचरेत् ।
कालकूटरसो नाम महेशेन प्रकाशितः ॥९३५॥

व. रा., रसायनसं. , वै. चि., ज्वराधिकारे ।

भाषा—शुद्धबछनाग१भाग, शुद्धपारा३भाग, शुद्धगन्धक५भाग, शुद्धमैनसिल६भाग, ताम्रभस्म४ भाग, सुहागा६भाग, हरिताल९भाग, चित्रक९भाग, त्रिकटु १२ भाग, त्रिफला१०भाग, हींग और बचा एकएकभाग इनसबको कूटकपडछानकर खरलमे डालकर,अदरख, चित्रकमूल, जम्भीरी, लशुन,काकजङ्घा,आकडेकीजड, करिहारी, धतूरेकीजड, मद्रासीपान,अंकोलकीजड, सहिजनकीजड, पञ्चकोल और पञ्चमूल इनप्रत्येकके अङ्गस्वरस अथवा क्वाथसे एकएकपहरमर्दनकर एकएकरत्तीकी गोलियें बनाकर रखछोडे । यह कालकूट रस तैयारहुआ । इसकी१ रत्ती अदरखकेसाथ देनेसे सबप्रकारके ज्वर तथा सन्निपात इनकेकुलको नष्टकरताहै । यहगोली देनेकेबाद मरीजको स्नानकराना । औरशरीरमे चन्दनका-लेपकरना । पथ्यमे दही,चावल,खजूरवगैरहदे,ताम्बूल भक्षणकरनेको देवे ॥ २१३ ॥

२१४ कालनाशनोरसः

ताम्रभस्म रसभस्म गन्धकं
लोहचूर्णजयपालगुग्गुलु ।
मर्दितश्च यवचिञ्चिकाद्रवै
र्भक्षितश्च चणकप्रमाणतः ॥
शोफपाण्डुविनिवृत्तिदं परं
श्वासमान्द्यबहुजं विनाशयेत् ॥९३६॥

र. दी., ।

भाषा—ताम्रभस्म,पारदभस्म,गन्धक,लोहभस्म, जमालगोटा, गूगल, इनसबको समभागलेकर यवचिञ्चिका (तितली)के रससे भावनादेकर चनेके बराबर गोलियें बनाले, यह कालनाशन रस तैयारहुआ। इसमेसे एकएकगोली तत्तद्रोगहरानुपानकेसाथ देनेसे शोथ,पाण्डु,श्वासऔर अग्निमान्द्य दूरहोतेहैं ॥ २१४ ॥

२१५ कालभैरवोरसः

तालकं गन्धकं ताम्रं हरवीर्यञ्च टङ्कणम् ।
त्रिक्षारं सैन्धवं बोलं मरिचं च समंसमम् ॥
सर्वं खल्वे दिनं मर्द्य दोलायन्त्रे दिनं पचेत् ।
मत्स्यवाराहमहिषकमठानां च पित्तकैः ९३८॥
दिनं सुभावितश्चाथ माषमात्रं प्रयोजयेत् ।
आर्द्रकस्यानुपानेन सन्निपातविनाशकम्९३९॥
दोषज्वरं निहन्त्याशु ह्यनुपानविशेषतः ।
दध्यन्नं दापयेत्पथ्यं तक्रभक्तमथापि वा९४०॥
नारिकेलोदकं दाहे पिबेच्च शर्करोदकम् ।
भक्षयेदिक्षुखण्डानि ह्युपचारैः प्रकल्पयेत् ॥
सर्वे रोगा विनश्यन्ति रसाद्वै कालभैरवात्९४१

वै. चि., सन्निपाते ।

नागेन निरुत्थं नागभस्म,नागबला च गृह्यते । **क्षितिधररुधिरमिति**-क्षितिधराः पर्वतास्तेषु रुधिरमिव रुधिरमिति व्युत्पत्त्या रुधिरं शरीरे धमनीस्थं रक्तवर्णं तिष्ठति शिरासु कृष्णतारक्तिमविशिष्टम्,तत्पुनरपि पार्वतपार्थिवभेदेन द्विविधम्—तत्र रक्तवर्णं माणिक्यादि रत्नजातम् । कृष्णतारक्तिमविशिष्टं गोमेदोगैरिकप्रभृति । वानस्पत्यं कम्पिल्लकम्—रोहिणीबीजक—शाल्मलीपलाशादिजातोनिर्यासनिकरः । **नीलं**नीली, नीलमणीराजावर्तकश्च । **अभ्र**मभ्रकभस्म तदुत्पादकं पाषाणश्च, यस्य रसग्रन्थेषु घनपाषाणमिति नाम । गुर्जरे घापाणेति नाम्ना प्रसिद्धम् । वानस्पत्यं-मुस्तकं देवताडश्च । **सुकान्तमिति**. सुष्ठुकान्ति यस्मिन्यस्यानेनवेति व्युत्पत्त्या कान्तपाषाणभस्म-कान्तलोहभस्म मौक्तिकञ्च गृह्यते । **हेमाङ्गमिति**-हेम्नोऽङ्गमिति व्युत्पत्त्या रजतं ताम्रञ्च । द्वन्द्वमेलापके अन्यधात्वपेक्षया शीघ्रमिलनशीलत्वात्, हेम च तदङ्गञ्चेति व्युत्पत्त्या यत्रान्यस्य कस्यचिदप्युपस्थितिं र्नास्ति तत्र स्वस्मिन्नङ्गशब्दव्यवहारो भवति, व्यपदेशिवद्भावात् । किञ्च उत्पाद्यमानरसापेक्षया तस्य रसाङ्गता अव्याहताऽस्त्येवेति, हेमभस्म ग्राह्यम् । हरिद्रा,दारुहरिद्रा,च । **भूमिसारमिति**—भूमि जंम्बूद्वीपरूपा तत्र सारो जम्बूवृक्षस्तन्नाम्ना एतद्द्वीपस्य प्रख्याप्यमानत्वात्, तस्य सारस्तत्फलमज्जा 'सारो बले स्थिरांशे च मज्ञि पुंसि जले धने । न्याय्ये क्लीवं त्रिषु' इति **मेदिनी**वाक्यात् । तदुक्तेष्वर्थेषु सारोऽथ च "सर्वतः सारमादद्यात्पुष्पेभ्य इव मक्षिका इति' साराण्यतो वक्ष्यामीति, चरकीयवचनात्सारशब्दस्य यत्किञ्चिद्विशेषमादाय सारस्यार्थनियत्तीकरणं दुर्वारं । तथाप्यत्र प्रकरणस्यार्थनिश्चयीकरणेसर्वतोऽप्यर्हितत्वादत्र (कासीसादिरसे) प्रमेहप्रकरणात् यानि प्रमेहघ्नेऽस्तीव शक्तिमन्ति द्रव्याणि, तानि सर्वाण्यपि सारशब्देन ग्राह्याणि—दोषोहिवस्तौसमुपेत्यमूत्रं सन्दूष्य मेहाञ्जनयेद्यथास्वमितिचरकीयसिद्धान्तायद्वस्तु मूत्रदोषहरणसमर्थं रसादिशुक्रान्तधातूनामविच्छिन्नानुकूलपरिणामपरम्परासम्पादकमोजसः शीघ्रमुत्पादकञ्च तत्तत्सर्वमपि प्रमेहहरणसमर्थं भवतीति निष्कृष्टसिद्धान्तादत्र प्रायो यत्तत्सारभूतं तत्सर्वमप्यत्र नियुज्यते । शरीरे ओजोधातोस्सर्वधातुसाररूपत्वात् । समानेन क्षीणा धातवो वर्धन्ते । तद्विपरीतेनतु क्षीयन्त इति चिकित्साशास्त्रसिद्धान्तात् । भूमिसारशब्देन प्रथमतो हेमादिधातवो गृह्यन्ते । धातुष्वपि रसेश्वरसिद्धान्तेन सर्वेषां धातूनामुत्पत्तिस्थितिलयकारणत्वात्पारदः समुपतिष्ठति । तदनु लोहादयः सर्वेऽपि । अथच भूम्यां खनिरूपायां सारो रत्नसमुदायस्तत्रापि हीरकं सारो वैक्रान्तश्च । **यद्वा** भूम्यां सारो गन्धो गन्धवती पृथ्वीति तस्याः स्वरूपस्य गन्धेनैव प्रकाश्यमानत्वात्, भूमिसारेण गन्धवर्गस्य ग्रहणम् वा । तेन यथौचित्या एलाकुङ्कुमकस्तूरिकाऽम्बरादीनां ग्रहणं कार्यम्, एलादिगणः सुश्रुते सू० ३८ अ. २४ श्लो., । यद्वा सितोपला,मधु,दुग्धघृतादयो ग्राह्यास्तेषां स्पष्टतया भूमिसारत्वात् । **सलिलरिपुदल**मिति—सलिलमितिजलराशिस्समुद्रस्तस्यरिपु रगस्त्यः पुरा तेन समुद्रशोषणात्—समुद्रशोषः । अथच अगस्त्याख्यो द्रुमस्तयोर्दलानि पत्राणि बीजानि वा । शुष्कावस्थायां प्रायशो बीजानां दलनस्वभावत्वात्,तन्मज्जग्रहीतृभिर्वा बीजानां निर्विवादं दाल्यमानत्वात् । अथवा सलिलं शुक्रार्तवरूपं तस्याधिकप्रमाणेन दोषवशात्प्रवर्तमानस्य रिपु अवरोधकं शीतवीर्यं बब्बूलिकादि तद्दलं—पत्रमिति वार्थः । **मेहतिष्यारिबीजमिति** मेहश्च तिष्यश्च तयोररिभूतं यद्बीजमिति समासे अरिबीजस्य द्वन्द्वान्तपातित्वान्मेहारिबीजं तिष्यारिबीजञ्चेति सञ्जाते मेहस्यायुर्वेदे प्रसिद्धस्य नानादोषजत्वादिभेदेन विंशतिभेदभिन्नस्य तस्यारिभूतानि बीजानि तुवरक, महानिम्बामलकाङ्कोलगोक्षुरकेक्षुरकचलोद्विङ्गणकमलबब्बूलादिजातानि ग्राह्याणि । 'तिष्यः कलियुगे ऋक्षे तिष्या धात्री च कीर्त्यते इति **धरणि**कोषात्तिष्याख्य कलिस्तस्य 'कर्कोटकस्य सर्पस्य दमयन्त्य नलस्य च । ऋतुपर्णस्य राजर्षेः कीर्तनं कलिनाशं

नमि'ति श्लोकोक्तानां बोधो भवति । कलेररित्येन तत्र लक्षणया कर्कोटक शब्देन कर्कोटकी तत्कन्दश्च ग्राह्यम्, तस्या बीजे कन्दे चेत्युभयत्र बीजशक्तिदर्शनात्। सर्पशब्देन गोनसी ग्राह्या, सा महाराष्ट्रे 'घोणसी, नाम्ना प्रसिद्धास्ति। तन्मूलेन केवलेनापिशर्करायुक्तेन असाध्यरूपा अपि प्रदरप्रमेहा नश्यन्ति । **दमयन्ती**शब्देन मल्लिकामूलानि ग्राह्याणि । **नलेन** सेव्यम्–अयच तद्बीजानि । ऋतुष्वविशेषात्सर्वर्तुषु यस्याः पर्णानि सन्तीति व्युत्पत्त्या कालानुसारिवा ग्राह्या, सा महाराष्ट्रे अनन्तमूलशब्देन. मध्यप्रान्ते च ' कपूरी'नाम्ना प्रसिद्धाऽस्ति । तन्मूलान्यपि प्रदर प्रमेहकृच्छ्रोपदंशविषोन्मादभूतबाधाप्रशमने अव्याहत शक्तिमन्ति सन्ति, अथवा करञ्जबीजानि ग्राह्याणि। **गोरेखेति**–गोरोचना अथच श्वेतमहासारिवा, या मगधादौ "गोलाखन" शब्देन, महाराष्ट्रे जाङ्गलभाषायां ' मोठीभूतमल्ली ' शब्देनव्यवह्रियते । **अरिमेद** इति—अरिमेदोविट्खदिरस्तदर्बुदं त्वग्वा ग्राह्या। द्वयोरपि मूत्रप्रमेहरक्तदोषहरत्वात् । **क्षितिरुहेति**क्षित्यामतिशयितमालिङ्गितमित्ररोहति-दशमूली तन्मूलानि ग्राह्याणि, सा मध्यप्रान्ते वनतम्बाकूइतिनाम्ना महाराष्ट्रे ' मोरसेंडेति' नाम्ना प्रसिद्धास्ति, तन्मूलानि, बालशोषे लालाप्रमेहे चाद्भुतकार्यकर्तॄणि सन्ति, मूत्रकृच्छ्रे तु महाराष्ट्रे जाङ्गलाः प्रायश उपयुञ्जन्ति । अथवा अर्जुनवृक्षमूलत्वग्ग्राह्या । **श्वेतगुञ्जाङ्घ्रिबीज**मिति–श्वेताया गुञ्जाया मूलानि बीजानिच ग्राह्याणि इति स्पष्टम् । **कापित्थास्थिविमिश्रमिति**–कपित्थस्यायं तन्मज्जा ग्राह्यः–**असृक्**शब्देन केसरं ग्राह्यम् । **क्षितिफलसहित**मिति क्षितेरन्तःफलं भूमिकूष्माण्डं क्षीरविदारी च, उभयोरपि फटाकृतित्वे सति भूमिमध्यवर्तित्वात् । **रोहिणीचान्द्रमिश्र**मिति–अत्र वर्तमानपुस्तके रोहिणीचाक्षमिश्रमितिपाठः समुपलभ्यते स लेखकप्रमादादिदोषादपभ्रष्ट इति बुध्यताम्'। चाक्षशब्दग्रहणे रोहिणीशब्दस्य निर्विभक्तिकत्वापत्तेः–' च इत्यव्ययेन ' व्यवधानात् । तस्माद्रोहिणीचान्द्रमिश्रमिति पाठः साधुः । तत्र **रोहिणी** मांसरोहिणी कटुरोहिणी च ग्राह्या, तत्रमांसरोहिणीं मध्यभारते, गुर्जरे, महाराष्ट्रे सर्व एव जाङ्गला जना रोहणनाम्ना प्रख्यापयन्ति । आबालवृद्धेषु च प्रसिद्धतमा, सुश्रुते अ० ३८ सू० न्यग्रोधादिगणे च तस्याः पाठोऽस्ति तस्मिन् गणे सर्वे महाविटपिन एव परिग्रहीतास्सन्ति, रोहिण्यपि महाविटपा जम्बूपत्रसदृशपत्रा गृहास्तरणे अतीवोपयुक्तकाष्ठास्ति त्वचिच्छिन्नासती मांसमिवाऽऽरक्ताऽऽस्रावस्राविणी छिन्नमांसस्य झटित्यारोहणकर्त्रीत्वादुच्यते मांसरोहिणीति । कटुरोहिणीतु कुटकीनाम्ना प्रसिद्धास्ति । सा हिमवदद्रिसम्भूतास्ति । **चान्द्रमिति**–चन्द्रस्येदं चान्द्रमिति व्युत्पत्त्या चन्द्रसादृश्याद्यद्धातुपोषकं शुभ्रं वस्तु तत्सर्वमपि गृह्यते तेन स्फटिकं नवनीतप्रस्तरम् (सङ्गजराहत) मुक्ता, रजतमित्यादीनि ग्राह्याणि । **करिविजयभुवा** इति— करिणो हस्तिनो विजयस्य भूः प्रधानं स्थानं शुण्डा तया 'हस्तिशुण्डीद्रवेणेत्यर्थः । अथवा हस्तिनो जठराग्निशक्तेः परीक्षायाः स्थानं कपित्थफलम् तद्धि निर्गलितं हस्तिनोगुदद्वाराद्यथावस्थितस्वरूपमेव निःसरति । तद्धि द्विधा भङ्क्त्वा दर्शयेत चेज्जलेन धौतमिव कपालद्वयं दृश्यतेऽनुमीयते च हस्ति जठरानलप्रभावः । इतिकृत्वा भवति तत्करिविजयभूस्तत्तोयेन वा मोदकान्कुर्यादित्यर्थः सम्पद्यते । अक्षमितानिति–अक्षोऽत्र रुद्राक्षेषु तानि च भवन्ति नानाविधानि विविधप्रमाणवन्ति च तत्कथनाद्यकृतिदोपदेशकालाग्निवयोबलादीन्निर्णीय तदनुकूलान्मोदकान् कुर्यादित्यर्थः समायाति, 'अक्षोज्ञानात्मशकटव्यवहारेषुपाशके । रुद्राक्षेन्द्राक्षयोःसर्पे विभीतकतरावपि । चक्रे कर्षे पुमान् क्लीबं तुत्ये सौवर्चलेन्द्रिय' इति मेदिनी—

योगनिष्पादनसौकर्यार्थं द्रव्यकोष्ठकं निःक्षिप्यते ऽतो निष्पाद्यन्तां स्वामीप्सिता योगाः ।

कासीसम्—कासीसम्

कृष्णम्—शिलाजतु, लोहभस्म, पिप्पली, मरिचम्, अहिफेनं, कृष्णवैक्रान्तम् ।

नागः—नागबला, नागभस्म, भूनागाः, भूनागसत्वम्

क्षितिधररुधिरम्—माणिक्यं, गोमेदः, गैरिकं, कम्पिल्लकं, रोहिणीनिर्यासः (गूंद,) बीजकानिर्यासः (हीरादाक्खिन), शाल्मलीनिर्यासः (मोचरस,) पलाशनिर्यासः (कमरकस)

नीलम्—नीलम, राजावर्तकः (लाजवर्द) नीली (गळी गु०) नीलोफर फा०, नीलोत्पलम्

अभ्रम्—अभ्रकभस्म, घनपाषाणं (गोदन्तीहरिताल हिं०—घापाण गु.) मुस्तकं, देवदाली (बंदाल हिं०—कूकडवेला गु.—देवडांगरी म.)

सुकान्तम्—कान्तपाषाणभ., कान्तलोहभ., मौक्तिकम्, पीतवराटिका, वंशरोचना.

हेमाङ्गम्—हेमभस्म, सुवर्णमाक्षिकभस्म, रजतभ., ताम्रभ., हरिद्रा., दारुहरिद्रा,

भूमिसारम्—जम्बूमज्जा, पारदः, गन्धकः, एला, कुङ्कुमं, कस्तूरिका, अम्बरम्, नवनीतं, घृतं, शर्करा, एलादिवर्गः–सु. सू. ३८–२४ एला, तगरं,—कुष्ठं—मांसी—रोहिषं—त्वक्—पत्रकं—नागकेसरं—प्रियङ्गुः—रेणुका—व्याघ्रनखं शुक्तिः (नखला), चण्डा (हिङ्गुपत्री—डीकामाळी म.), स्थौणेयकं (थुनेर), श्रीवेष्टकं (विरोजा हिं.), चोचं (कलमीतज.), चोरकं (खरजवायन हिं.), वालुकं (गेंहुला हिं.), गुग्गुलुः, राला, रसः, (बोल सं० हीराबोल-गु०—रंजनहिं, एळुआहिं. एतद्द्वयम्) तुरुष्कम् (लोबान हिं.) कुन्दुरुः, अगुरु, स्पृका, (अनन्तमूल) उशीरं, देवदारु, कुङ्कुमं, नागकेसरम्, इत्येलादिवर्गः ।

सलिलरिपुदलम्—समुद्रशोषबीजानि पत्राणि च, अगस्त्यमज्जा, पत्राणि च, बब्बूलिकापत्राणि बीजानि च ।

मेहारिबीजम्—तुवरकमहानिम्बामलकाङ्कोलेक्षुरकबलोटिङ्गणकमलबुब्बूलादिजातं बीजम् ।

तिष्यारिबीजम्—कर्कोटकीबीजकन्दे, गोनसीमूलम् (घोणसी म.) मल्लिकामूलम्, उशीरन्तद्बीजानि-च, कालानुसारिवा, करञ्जबीजम्

गोरेखा—गोक्षुरकं, गोरोचना, गोलक्ष्मणा च, (गोलाखनहिं०, मोठी भूतमल्ली म.)

अरिमेदः—विट्खदिरार्बुदं त्वचा,

क्षितिरुहम्—दशमूली (बनतमाखू हिं., मोरसेंडा म.), अर्जुनवृक्षमूलत्वम् ।

कापित्थं—कपित्थमज्जा

असृक्—केसरम्

क्षितिफलम्—विदारी, क्षीरविदारी च (भुंई कोहळा हिं.)

रोहिणी—मांसरोहिणी (रोहण हिं. म. गु.) कटुरोहिणी (कुटकी हिं.)

चान्द्रम् (चाक्षम्)—स्फटिकं, चन्द्रमृत् (संगजराहत हिं. संगजीरू गु०) कतकफलं चन्द्रवद्वर्तुलत्वात्, बिभीतकम् ।

करिविजयभूः—हस्तिशुण्डी—कपित्थफलम् ।

उपरि निर्दिष्टानि द्रव्याणि व्यस्तानि समस्तानि च मूत्रोक्तकार्यकराणि भवन्ति तद्यथा-कासीसं मापत्रयमितं, हस्तिशुण्डया द्रवेण कर्षैकप्रमितेन कपित्थमज्ञा सार्कं भक्षयित्वा यथेष्टं तक्रं पिबेत्तस्मिञ्जीर्णे तक्रौदनं दुग्धौदनं वा सेवयेत्—इत्येको योगः ॥१॥ अनेन मूत्रकृच्छ्राश्मर्यौ प्रशमं यातः । कासीसमुष्णमम्लञ्च तिक्तञ्च तुवरं तथा । वातश्लेष्महरं केश्यं नेत्रकण्डूविषप्रणुत् । मूत्रकृच्छ्राश्मरीश्वित्रनाशनं परिकीर्तितमिति भावप्रकाशवचनात्केवलस्यापि मूत्रकृच्छ्रादिहरणे अव्याहतशक्तिमत्त्वात् कासीसं मापत्रयं शिलाजतु शाल्मलीबीजकनिर्यासौ (मोचरस—हीरादक्खिन) नीलोत्पलं नीलीपत्राणि एतानि प्रतिद्विमापकाणि गृहीत्वा कपित्थस्वरसे हस्तिशुण्डीस्वरसेन वा मिश्रय्य तक्रेण सह पिबेदिति *द्वितीयोयोगः ॥ २ ॥ कासीसशिलाज*तुनीलोत्पलमहानिम्बबीजजम्बूलिकापत्राणि प्रतिद्विमापकाणि गृहीत्वा दुग्धेन जलेन वा पिष्ट्वा पिबेदिति तृतीयो योगः ॥ ३ ॥ कासीसशिलाजतुनागबलाबीजपत्रदशमूलीमूलानि प्रतिद्विमापकाणि तक्रेण दुग्धेन हस्तिशुण्डिकास्वरसेन कपित्थस्वरसेन वा पिष्ट्वा पिबेदिति चतुर्थः ॥ ४ ॥ कासीसनागबलापञ्चाङ्ग, समुद्रशोषपत्र, दशमूलीमूलैला, श्वेतगुञ्जापत्राणि प्रतिद्विमापकाणि गृहीत्वा पूर्ववत्पिबेदिति पञ्चमः ॥ ५ ॥ कासीसनीलोत्पलैलार्जुनमूलत्वक्केसरकम्पिल्लकानि प्रतिद्विमापकाणि० ॥ ६ ॥ कासीस मोचरसबीजकनिर्यासश्रीवेष्टकानि प्रतिद्विमापकाणि० ॥ ७ ॥ कासीसनागचम्पैलाटिङ्कणश्रीवेष्टकपलाशनिर्यास महानिम्बतुवरकबीजानि प्रतिद्विमापकाणि पूर्ववत्पिबेदित्यष्टमः ॥ ८ ॥ कासीसशिलाजतुनागबलामोचरसनीलीकान्तपापाणभस्म—मुस्तक—देवदाली—हरिद्राद्वय—जम्बूमज्ज—समुद्रशोप, तुवरक—महानिम्बबीज, गोनलीमूल, करञ्जबीज—गोक्षुरकारिमेदत्वग्दशमूली (मोरसेंढा म.) श्वेतगुञ्जामूल-कपित्थमज्ज, केसरविदारीमांसरोहिणीत्वगिति अर्धार्धमापकाणि पूर्ववत् पिष्ट्वा पिबेदिति नवमः० ॥ ९ ॥ यद्वा निम्नप्रयन्तानि प्रतिपदानि कासीसमिश्रितानि योगः—यथा—सकासीसं कृष्णनागम् । १ । स. क्षितिधररुधिरम् । २ । स. नीलम् । ३ । स. अभ्रम् । ४ । स. सुकान्तम् । ५ । स. हेमाङ्गम् । ६ । स. भूमिसारम् । ७ । स. सलिलरिपुदलम् । ८ । स. मेहतिष्यारिबीजम् ९ । स. गोरेखा १० । स. अरिमेदः ११ । स. क्षितिरुहम् १२ । स. श्वेतगुञ्जाङ्घ्रिबीजम् १३ । स.कपित्था० १४ । स. क्षितिफलम् १५ । स.अक्षमिश्रारोहिणी १६ । स.रोहिणीचान्द्रम् १७ । इतिसप्तदशयोगास्तक्रेण दुग्धेन यथाग्निबलं सेविताः त्रिरात्रान्मूत्ररोगं,सप्तरात्रात्कल्पस्य वमनविरेचनाद्यशोधनस्य नाशं हीनयोगाऽयोगमिथ्यायोगजनितमुपद्रवं (कल्पनाशं) *कासीसस्य संशमनप्रधानतया क्षाररूपत्वाच्चायोगज*निताध्मानादीनामतियोगेनातिसारगुदवहिर्निर्गमनादीनामपि भवति यौगपद्येन निवृत्तिः । एतेषु योगेषु तक्रस्य दुग्धस्य च यथोचिति भोजनपानयोरुभयोरपि स्थानेयोगेऽकृते । सप्ताहाऽभ्यन्तरे एव स्वास्थ्यलाभो भवति—अत्र धातुवर्गोऽपि निर्दिष्टोऽस्ति, तस्य वनस्पतिवर्गस्य च मिलित्वा योगो निष्पादितश्चेत्सोऽलौकिकः प्रयोगो दृष्टप्रभावः सम्पत्स्यते, स च समस्तप्रमेहान् मधुमेहसहितान् हठान्नाशयिष्यति उत्तमोत्तमो वृष्यो वाजीकरश्च सम्पत्स्यते । अस्य (द्रव्यगणस्य) प्रमाणतारतम्येन शतशो योगा भविष्यन्ति तत्सर्वस्य विवरणे ग्रन्थविस्तरः स्यादतो दिङ्मात्रप्रदर्शनेनात्रैव विरम्यते । कैश्चिन्महाशयैरसरत्नसमुच्चयस्य गुर्जरभापायां टीकाकारैः कृष्णनागशब्देन कृष्णसर्पवसा, क्षितिधरशब्देन तद्रुधिरं *गृहीतन्तत्तु न सम्यक्—यतः कृष्णसर्पं सर्पाशिनोऽपि* न भक्षयन्ति, कृष्णसर्पविषेण तृष्णाभिवृद्धिर्भवति अयं प्रयोगस्तु तृष्णाप्रशमनार्थस्तत्र कथं तृष्णावर्धयद्रव्याणां प्रक्षेपो न्याय्यः स्यादिति प्रत्यक्षमेव विरोधः । तथाच सुश्रुतः—तत्र दर्वीकरविषेण त्वङ्नयननखदशनवदनमूत्रपुरीषदंशकृष्णत्वं रौक्ष्य—

शिरसोगौरवं सन्धिवेदना कटीपृष्ठग्रीवादौर्बल्यं जृम्भणम्, वेपथुःस्वरावसादो घुर्घुरको जडता, शुष्कोद्गारः कासश्वासौहिक्का–वायोरूर्ध्वगमनं–शूलोद्वेष्टनं–तृष्णा-लालास्रावः फेनाऽऽगमनं स्रोतोऽवरोधस्तास्ताश्चवातवेदना भवन्ति इति । सु.क.४–४२ । तथाच सविषकीटोत्पत्तौ "सर्पाणां शुक्रविण्मूत्रशवपूत्यण्डसम्भवाः । वाय्वग्न्यम्बुप्रकृतयः कीटास्तु विविधाः स्मृताः ॥ सर्वदोषप्रकृतिभि र्युक्तास्ते परिणामतः । कीटत्वेऽपि सुघोरास्युः सर्व एव चतुर्विधाः" सु० । इत्यनेन सर्पशवस्य महाननर्थकारित्वं प्रतिपादितम् । अपिच–सौभाग्यार्थस्त्रियःस्वेदं रजोनानाङ्गजान्मलान् । शत्रुप्रयुक्तांश्चगरान् प्रयच्छन्त्यन्नमिश्रितान् तैः स्यात्पाण्डुः कृशोऽल्पाग्निर्गरश्चास्योपजायते । मर्मप्रधमनाध्मानं हस्तयोरशोथलक्षणम् ॥ जठरं ग्रहणीदोषा यक्ष्मा गुल्मः क्षयो ज्वरः । एवं विधस्य चान्यस्य व्याधेर्लिङ्गानि दर्शयेत् ॥ इति कृष्णसर्परुधिरस्य भक्षणेन महाननर्थः स्यात् । यद्यपि चीनदेशीयाः–मध्यभारते "मुसहर" नाम्ना प्रसिद्धजाङ्गला जनाश्च तल्लक्षणव्यापादितं निर्विषसर्पशवं खादन्ति परं कृष्णसर्पवर्जम् । कुथितं कृष्णसर्पशरीरन्तु चिल्हिकाप्रभृतिपक्षिणोऽपि दूरतः परिहरन्ति एतद्रहस्यमस्माभिर्वारम्वारं प्रत्यक्षीकृतमस्ति अतो नास्त्यस्मिन्विषये वितण्डावकाशः॥ अहिबधादिरससम्पादने भवत्युपयोगः कृष्णसर्पशरीरस्य, परं तस्याग्नौ भस्मीभावो भवति केवलं तेन पारदस्य संस्कारमात्रं भवति अतस्तद्दृष्टान्तदानं नालम् । अर्धनारीनटेश्वरादौ यत्रकुत्र स्थाने भावनायां यथाऽवस्थितं पित्तमवशिष्यते इति सत्यं, परन्तन्न साधारणावस्थायां प्रयुज्यते । अपितु दोषदूष्यसम्मूर्छनाऽवस्थया जातेनानिर्वचनीयविषेण साऽवयवव्यापारे क्षुब्धे शरीरे विषस्य विषमौषधमिति न्यायमङ्गीकृत्य पञ्चपित्तकृष्णसर्पविषादिघटिता अतितीक्ष्णतमाश्च योगाः प्रयुज्यन्ते । परन्तु सर्परुधिरदानस्य तस्यामप्यवस्थायामायुर्वेदमात्रे न कुत्रापि दृष्टचरतास्ति । किम्पुनः प्रमेहावस्थायां मूत्रकृच्छ्रे च कृष्णसर्पवसा रुधिरञ्च अमिकल्पं दातुमुचितं स्यादित्यलमतिप्रपञ्चितेन प्रकृतमनुसरामः ।

भाषा—कसीस, शिलाजीत, नागवला, मोचरस, नील, कान्तपाषाणभस्म, नागरमोथा, बंदाल, हल्दी;दारुहल्दी, जामुनकीमज्जा; समुद्रशोष, तुवरक, वकायनकेबीजोंकीमज्जा, गोनसी, (घोणसी म०) कांजड़, करंजबीज, गोखरू,विट्खदिरकीछाल (गु.-अणियारकीछाल), दशमूली (जंगलीतमाखू हिं०, मोरसेंडा म०), सफेदगुञ्जाकीजड़, कपित्थकीमज्जा, नागकेसर, विदारीकंद, रोहणकीछाल, येसबआधेआधे मासे लेकर हाथीशुण्डीका रस,अथवा छाछ या दूध इनकेसाथ पीसकर पीवे । और खानेपीनेमे केवल छाछकाही उपयोग करे तो तमाम मूत्रव्याधियें तीनरोजमे नष्टहों । और सातरोजमे विगडेहुए वमन विरेचनसे जायमान व्याधियां और अत्यन्त पिपासा नष्टहो । तथा पन्द्रह दिनमे सर्वाङ्गवृद्धिहो । यह प्रमेहियोंकेलिये मुनियोंने बहुत गुप्तयोग प्रकाशितकियाहै । रसरत्नसमुच्चयमे इस कासीसादि रसकी टीका गुजरातीभाषान्तर करनेवाले महात्माओंने अंडबंड लिखडालीहै जैसेकि कृष्णनागसे कालेसांपकी चर्वी और क्षितिधररुधिरशब्दसे कालेसांपका लोही इत्यादि० सो गुजराती भाषान्तर देखकर मेहरबानीकरके कोईभी इसयोगको तैयार नकरे। नहीं तो गुणकेबदले दूसरीहीबला गलेमे पडेगी । कासीसादिरसका विवरण बहुत लम्बाचौडाहै उसको इसके संस्कृत भाष्यमे देखलेना ॥ २६४ ॥

२६५ किन्नरकण्ठोरसः

रसं गन्धकमभ्रञ्च माक्षिकं लौहमेव च ।
कर्षप्रमाणं सङ्गृह्य वैक्रान्तं रसपादिकम् ११४७
वैक्रान्तार्द्धं तथा हेम रौप्यं हेमचतुर्गुणम् ।
वासायाश्च तथा भार्ग्या बृहत्योरार्द्रकस्य च ॥
स्वरसेन सरस्वत्या भावयित्वा पृथक्पृथक्
रक्तिद्वयमिताः कुर्याद्वटीश्छायाविशोषिताः ॥
स्वरभेदानशेषांश्च कासांश्श्वासांश्च दारुणान् ।

निखिलान्कफजान् व्याधीन्वातश्लेष्मसमुद्भवान्
हन्यात्किन्नरकण्ठाख्यो रसोऽसौ रुद्रनिर्मितः।
किन्नरस्येव कण्ठस्य स्वरोऽस्य प्राशनाद्भवेत् ॥
आ. वि., र. चं., स्वरभङ्गे।

भाषा—शुद्धपारा, गन्धक, अभ्रकभस्म, सोनामाखी, लोहभस्म येसब समभाग, वैक्रान्तभस्मसबकाचतुर्थांश, वैक्रान्तसेआधासुवर्ण, सुवर्णसेचारगुनीरजतभस्म, इनसबको इकट्ठेकर अडूस, भारङ्गी, भटकटैया, बनभांटा, अदरख इनप्रत्येकके अङ्गस्वरस अथवा क्वाथोंसे अलग२एकएकरोजभावनादेकर दो-दोरत्तीकी गोलियें बनाकर छायामेसुखाकर रखछोड़े। यह किन्नरकण्ठ रस तैयारहुआ। इसकी १ गोली तत्तद्रोगहरानुपानकेसाथदेनेसे तमामस्वरभेद, कास, श्वास, समस्तकफजविकार, और वातश्लेष्मसमुद्भूतसब कण्ठके विकारोंको बहुतशीघ्र दूरकरताहै ॥ २६५ ॥

२६६ किटिभभग्नोरसः

तत्राशुशुद्धस्य च पारदस्य
भागैकमेव त्रयमेव गन्धात्।
कटुत्रयं सूतसमं च चित्रं
प्रत्येकमारण्यभवस्य दुग्धैः ॥११५२॥
उदुम्बरस्य प्रहरं विमर्द्य
मधुप्लुतं माषमितञ्च खादेत्।
चित्रस्य चूर्णैः सह वाकुचीनां
निम्बस्य पञ्चाङ्गसमं सदैवम् ॥
नाशाय नूनं किटिभस्य विद्वान्
पथ्याशनं नित्यमलं प्रकुर्वन् ॥११५३॥
चि. क. कुष्ठे।

भाषा—शुद्धपारा१भा., गन्धक३भा., त्रिकटु और चित्रक एकएकभाग, इकट्ठेघोटकर कज्जलीकर जङ्गलीगूलरके दूधसे एकदोरोजघोटकर एकमाशेकीमात्रा मधुमेमिलाकर खिलावेऔर उसकेसाथ चित्रक, बाकुची और निम्बपञ्चाङ्गकाचूर्ण अनुपानके तौरपर देनेसे निश्चयकरके किटिभकुष्ठका नाशहोताहै २६६

२६७ किटिभहरोलेपः

सूतगन्धकयोः कृत्वा कज्जलीं समभागयोः।
तत्तुल्यं शङ्खजं भस्म तथैवोत्तरवारुणी ॥११५४
रजन्यौ क्षीरिणी चक्रमर्दो घनरवस्तथा।
मुनिपुष्पं स्त्रीपयश्च गोमूत्रं काञ्जिकं तथा।
सर्वमेकत्र संमर्द्य सर्वं तेन प्रलेपयेत्।
दद्रूकिटिभकुष्ठानि मण्डलानि विचर्चिकाः ॥
सम्मर्दनान्नित्ययोगाद्विनश्यन्ति न संशयः ॥
र., कुष्ठे

भाषा—शुद्धपाराऔरगन्धक समभागलेकर कज्जलीकर इनदोनोंको बराबर शंखभस्म और इन्द्रवारुणीकीजड़, दारुहल्दी, खिरनीकीछाल, चकवड़केबीज, अगस्त्यकीछालयाफूल, स्त्रीकादूध, गोमूत्र, काञ्जीयेसब इकट्ठेकर एकदोरोज मर्दनकर मल्हमजैसा बनाकर लेपकरनेसे दद्रु, किटिभ, मण्डल, विचर्चिका, येसब नष्टहोतेहैं ॥ २६७ ॥

२६८ किटिभारिरसः

मृतसूतं काकमाची वह्नि मुण्डी च वानरी।
वाकुचीबीजकं तुल्यं गवां मूत्रेण पेषयेत् ॥
निष्कैकं पाययेत्तेन किटिभारी रसस्त्वयम्।
निशा कणा नागरञ्च वेल्लचित्रकताप्यकम्।
क्रमोत्तरगुणं पिष्ट्वा गोमूत्रेण पिबेदनु ॥
र. का., चि. क., कुष्ठाधिकारे।

भाषा—पारदभस्म, मकोय, चित्रक, केवांचकेबीज, बाकुचीकेबीज, येसबसमभागलेकर गोमूत्रमे एकदिनपीसकर चारचारमाशेकी गोलियां बनारक्खे। इसको यथानुपानकेसाथ देवे और हल्दी, पीपल, सोंठ, विड़ङ्ग, चित्रक, सोनामाखी इनको क्रमवृद्धि सेलेकर गोमूत्रकेसाथ एकतोलाभरपीनेसे किटिभकुष्ठ नष्टहोताहै ॥ २६८ ॥

२६९ किरातादिमण्डूरम्
(अष्टादशाङ्गलोहम्)

किराततिक्तं सुरदारु दार्वी
मुस्ता गुडूची कटुका पटोलम्।

दुरालभा पर्पटकं सुनिम्बं
कटुत्रिकं वह्निफलत्रिकञ्च ॥ ११५९ ॥
फलं विडङ्गस्य समांशकानि
सर्वैः समं चूर्णमथायसञ्च ।
सर्पिर्मधुभ्यां वटिका विधेया
तत्रानुपानाद्भिषजा प्रयोज्या ॥ ११६० ॥
निहन्ति पाण्डुञ्च हलीमकञ्च
शोथं प्रमेहं ग्रहणीरुजञ्च ।
श्वासञ्च कासञ्च सरक्तपित्त-
मर्शांस्यथोर्वोर्ग्रहमामवातम् ॥
व्रणांश्च गुल्मान् कफविद्रधींश्च
श्वित्रञ्च कुष्ठं सततप्रयोगात् ॥ ११६१ ॥

नि. र., भा. प्र., यो. म., वै. चि., ग. नि., पाण्डुरोगे ।

टि० गदनिग्रहेअस्यनवायसमितिनामस्थापितन्तदपिविचाराऽभावप्रयुक्तम् ।

भाषा—चिरायता, देवदारु, दारुहल्दी, नागरमोथा, गुडूची, कुटकी, परवल, जवास, पित्तपापड़ा नीमकीछाल, त्रिकटु, चित्रक, त्रिफला, विडङ्ग येसब समभाग, सबकीबराबर मण्डूरभस्म अथवालोहभस्म, सबको इकठेघोटकर घीऔरमधुकेसाथ तीनमाशेकी गोलियें बनावें । इसकी एकगोली घीऔरमधु अथवादूधकेसाथ देनेसे पाण्डु, हलीमक, शोथ, प्रमेह, ग्रहणी, श्वास, कास, रक्तपित्त, बवासीर, ऊरुस्तम्भ, आमवात, तमामव्रण, गुल्म, कफविद्रधि, श्वित्र, कुष्ठ, इनसबको यह दूरकरताहै ॥ २६९ ॥

२७० किलासजेतारसः

रसस्यैकभागं बलेश्च द्विभागौ,
त्रिभागाश्च भानो विमर्द्याथ भृङ्गैः ।
द्रवं वाकुचीनां रसैः पेषयित्वा,
पुटे पाचितश्चामलक्याः कषायैः ॥
किलासारुणं मण्डलं हन्ति नित्यं,
निपीतो नितान्तं सुतक्राशिनाञ्च ११६२

चि. क., कुष्ठाधिकारे ।

भाषा—शुद्धपारा १भाग, गन्धक२भाग, ताम्रभस्म३भाग, सबकोइकठेकर भंगरेकारस औरवाकुचीकारस इनसे एकएकरोजघोटकर लघुपुटकी आंच देना । स्वाङ्गशीतलहोनेपर निकालकर आंवलेकेकाढ़ेकेसाथ ३रत्तीदेनेसे किलास, लालऔर मण्डलकुष्ठको यह दूरकरताहै । इसके मरीज़को बनतेतक छाछपर रक्खाजायतो अच्छाहै । अथवा छाछभातदेनाचाहिये ॥ २७० ॥

२७१ कीटारिरसः

शुद्धसूतकलिङ्गानि चाजमोदा मनःशिला ।
पलाशबीजं गन्धश्च देवदाल्या द्रवै र्दिनम् ॥
सम्मर्द्य विधिना नित्यं मुद्गपर्णीरसैः सह ।
सितायुक्तं पिबेच्चानु क्रिमिपातो भवत्यलम् ॥

भै. र., र. सु., र. क. ल. (कीटमर्दः), र. को (क्रिमिहरः), र. क.,

रसकल्पलतायां गन्धकस्याभावो दृश्यते ।

भाषा—शुद्धपारा, इन्द्रजव, अजमोद, शुद्धमैनसिल, ढाककेबीज औरगन्धक येसमभागलेकर बन्दालकेरससे एकदोरोज़ घोटकर इसकी गोलियें बनाले । फिर मुद्गपर्णिके रसमे मिश्रीडालकर एकगोलीकेसाथ पिलानेसे सबतरहके क्रमि नष्टहोजाते हैं ॥ २७१ ॥

२७२ कुटजादिलोहम्

लक्ष्मीफलप्रतिविषाम्बुबलासमङ्गा-
पाठेन्द्रबीजघनशाल्मलिधातकीनाम् ।
चूर्णैः समैः सममयः कुडवं सुसिद्धं
हैयङ्गवीनकुडवे गुडतुल्यमात्रम् ११६५
प्रस्थत्रयप्रमितवत्सकवारिपूरे
पक्त्वा त्रिजातकपलान्वितमेतदेव ।
शीतं युतञ्च मधुना कुडवोन्मितेन
हन्याच्चिरोत्थमचिरादतिसारमुग्रम् ॥

लो. प., अतिसारे ।

भाषा—बेलगिरी, अतीस, सुगन्धवाला, बला, मजीठ या लज्जालु, पाठा, इन्द्रजव, नागरमोथा, सेमरकेफूल, धावईकेफूल येसब एक १ तोलालेकर सबको कूटछानकर लोहभस्म १६ तोले, मक्खन १६ तोले

गुड़१६ तोले, कुरैयाकाक्काथ २५६ तोलेमे डालकर घनघनाकर त्रिजातक (तज; पत्रज, इलायची) ४तो., मधु १६ तोले मिलाकर रखदे । इसकी ४ मासेकी अथवा बलाबल देखकर मात्रा कायमकर यथानुपानकेसाथ देनेसे बहुतदिनका पुराना अतिसार नष्ट होताहै ॥ २७२ ॥

२७३ कुबेरपाकः

कुबेरं प्रस्थनीरे च क्षिप्त्वा रात्रौ चतुर्गुणे ।
क्षीरे प्रातः पचेत्सम्यग् घृतेन मृदुवह्निना ॥
शीतं कृत्वा सुनिष्पन्नं मध्ये मधु नियोजयेत् ।
चातुर्जातं त्रिकटुकं जातीपत्रफले तथा ११६८॥
देवपुष्पं विडङ्गं च मिसीं जीरं घनं वलाम्
निशाद्वयं तथा लोहं शुल्वं वङ्गं पलार्धकम्११६९
प्रत्येकं चूर्णितं क्षिप्त्वा भक्षयेच्च पलं बुधः ।
सर्ववातामयान्हन्ति ह्यग्निमान्द्यं बलक्षयम् ॥
प्रमेहं मूत्रकृच्छ्रञ्च ह्यश्मरीगुल्मपाण्डुताः ।
पीनसं ग्रहणीदोषमतीसारमरोचकम्॥११७१॥
धन्यः कौबेरपाकोऽयं भक्षयेन्नितरां बुधः ।
कामवृद्धिकरस्तस्य धातुवृद्धिश्च जायते११७२॥

वै. चि., नि. र., वाताधिकारे ।

भाषा—कजेकेबीजोंकीमज्जा ६४ तोलेलेकर रात्रिकोपानीमे भिगोकर सुबहमे ४ सेरदूधमे डालकरपकावे । जब खोआतैयारहोजाय तब उसमे १६ तोले घीडालकर मृदुआंचसेसेके । जब खोआ लाल होजाय तब चातुर्जात (तज, पत्रज, इलायचीऔर-नागकेसर) त्रिकटु, जावित्री, जायफल, लौंग, विडङ्ग, सौंफ, जीरा, नागरमोथा, वला, हल्दी, दारुहल्दी, लोह, ताम्रऔरवङ्ग इनकीभस्में, येप्रत्येक-देदोतोले, मधु ६४ तोले डालकर रखछोड़े । यह कुबेरपाक सिद्धहुआ । इसमेंसे चारतोलेअथवा योग्यतानुसार देनेसे समस्तवायुरोग, अग्निमान्द्य, बल-क्षीणता, प्रमेह, मूत्रकृच्छ्र, पथरी, गुल्म, पाण्डु, पीनस, ग्रहणीरोग, अतिसार, अरुचि, इनसबको यह नष्टकर कान्तिपुष्टिऔरबलकोबढ़ाताहै ॥ २७३ ॥

२७४ कुब्जविनोदो रसः

रसगन्धौ समौ शुद्धौ चामया तालकं तथा ।
कटुकी च विषं व्योषं ग्रोलजैपालकौ समौ ॥
भृङ्गराजरसैं मर्द्य स्नुह्यर्कस्वरसैस्तथा ।
गुञ्जाद्वयं भक्षयेच हृच्छूलं पार्श्वशूलकम् ॥
आमवाताढ्यवातादीन् कटिशूलञ्च नाशयेत् ।
अग्निञ्च कुरुते दीप्तं स्थौल्यञ्चाप्यपकर्षति ॥
रसः कुब्जविनोदोऽयं गहनानन्दभाषितः ॥

र. सं., र. म. मा., ध., र. सु., र. चं., र. क., टो., वाताधिकारे ।

टि॰ अस्य रसस्य बहुधा साम्यमश्वकञ्चुकीरसेन मिलति । परन्तु कटुकीबोलयोरधिकतया सत्वाद्भावनायाब स्नुह्यर्कस्वरसाभ्यामधिकृतया निष्पादितत्वात्स्वतन्त्र एवायं रस इति प्रतिपत्तव्यम् ।

भाषा—शुद्धपारा, गन्धक, हर्रे, शुद्धहरिताल, कुटकी, शुद्धबछनाग, त्रिकटु, एलुआ, शुद्धजमालगोटा, येसबसमभागलेकर, भांगरेकारस, थूहरऔर-आकके दूधसे क्रमसे एकएकभावनादेकर दोदोरत्तीकी-गोलियें बनारक्खे । यह कुब्जविनोद रस सिद्धहुआ । इसकी १गोली यथारोगानुपानकेसाथ देनेसे हृदयशूल, पार्श्वशूल, आमवात, ऊरुस्तम्भ, कटिशूल, मन्दाग्नि, अतिस्थौल्य इनसबको यह दूरकरताहै । गहनानन्दका कहाहुआहै ॥ २७४ ॥

२७५ कुमारकल्याणरसः

सिन्दूरं मौक्तिकं हेम व्योमायोहेममाक्षिकम् ।
कन्यातोयेन सम्मर्द्य कुर्यान्मुद्गमिता वटी ॥
वटिकां वटिकार्द्धं वा वयोवस्थां विविच्य च ।
क्षीरेण सितया सार्धं बालेषु विनियोजयेत् ॥
कुमाराणां ज्वरं श्वासं वमनं पारिगर्भिकम् ।
ग्रहदोषांश्च निखिलान् स्तन्यस्याग्रहणं तथा ॥
कामलामतिसारञ्च कृशतां वह्निवैकृतम् ।
रसः कुमारकल्याणो नाशयेन्नात्र संशयः११७९

भै. र., र. चं., बालरोगे ।

भाषा—रससिन्दूर, मोती, सुवर्णभस्म, अभ्रकभस्म, लोहभस्म, औरसोनामाखी येसब समभागले-

कर घीकुआरके रससे एकदोरोज् मर्दनकर मूंगबराबर गोलियें बनाकर रखछोडे, यह **कुमारकल्याण** रस तैयारहुआ। इसरसको देतेसमय अवस्था, हालतऔरसमयको देखकर एकयाआधीगोली दूधअथवाशक्करकेसाथ बालकोंको देनेसे ज्वर, श्वास, कास, वमन, पारिगर्भिक (मातुः कुमारोगर्भिण्याः स्तन्यं प्रायः पिबन्नपि । कासाग्निसादवमथुतन्द्राकार्श्यारुचिभ्रमैः । युज्यते कोष्ठवृद्ध्या च तमाहुः पारिगर्भिक मिति बालरोगनिदाने ॥) ग्रहदोष, दूधका न पीना, कामला, अतिसार, अग्निमान्द्य, औरकृशता येसबरोग नष्टहोतेहैं ॥ २७५ ॥

२७६ कुमारीपाकः

कुमारीकन्दमादाय पलविंशतिसङ्ख्यया ।
चतुर्गुणे च गोदुग्धे पाचयेन्मन्दवह्निना ११८०
यावच्च जीर्यते दुग्धं तावत्पाचनकं कुरु ।
छायाशुष्कश्च कुर्वीत चूर्णयेद्बुद्धिमान् भिषक् ॥
पिप्पली मरिचं शुण्ठी प्रत्येकञ्च पलत्रयम् ।
जातीफलं जातिपत्री लवङ्गं पलमेव च ११८२॥
गोक्षुरं कर्कटीबीजं प्रत्येकञ्च पलंपलम् ।
चातुर्जातपलं चैव चित्रकञ्च पलं तथा ११८३॥
सर्वेषां सूक्ष्मचूर्णञ्च कारयेद्बुद्धिमान् भिषक् ।
सितायाः पलविंशत्याः पलानि दश गोघृतात् ।
तत्समं महिषीदुग्धं तत्समं मधुमिश्रयेत् ।
लोहपात्रे विनिःक्षिप्य पाचयेन्मृदुवह्निना ॥
चूर्णं निक्षिप्य यत्नेन दर्व्या सम्यग्विचालयेत् ।
यावद्घृतञ्च दृश्येत तावत्सम्पाचयेद्बुधः ११८६
कर्षमेकं लोहभस्म सुवर्णं तत्समं ततः ।
सिन्दूरं कर्षमेकन्तु दापयेद्भिषगुत्तमः ११८७॥
कोलप्रमाणवटकान् भक्षयेद्बुद्धिमान्नरः ।
जीर्णज्वरं क्षयं कासं श्वासं सन्तापशूलनुत् ११८८
अजीर्णमामवातघ्नं पञ्चप्रदरनाशनम् ।
स्त्रीणां वन्ध्यत्वहरणं पुत्रश्चैव प्रसूयते ११८९॥
अण्डवृद्धिहरश्चैव स्त्रीणां रमयते शतम् ।
इदं गोप्यमिदं गोप्यमश्विनीदेवनिर्मितम् ॥

नि. र.,

भाषा—पकेहुएघीकुआरकीजड़ २५ पललेकर चौगुनेगायकेदूधमे मन्दआंचसेपकावे।जब दूधकाखोआ होजाय तब इसमेसे जड़ोंकोनिकालकर छायामे सुखाकर चूर्णकरले, फिरपीपल, मिरच, सोंठतीनतीनपल जायफल, जावित्री, लौंग, गोखरू, ककड़ीकामगज, चातुर्जात (तज, पत्रज, इलायचीऔरनागकेसर), चित्रक, येप्रत्येकएकपललेकर सबका बारीकचूर्णकरलेवे । फिर शक्कर२०पल, मधु२०पल, गायकाघी १०पल, भैंसकादूध१०पल, लेकरमन्दअग्निपर पकावे, अधपकाहोनेपर सबचूर्णडालकर धीरजसे कड़छुलसे रगड़ताहुआपकावे । जबतक तमामघी उसमे मिल न जाय तबतकपकावे । फिर उतारकर लोहभस्म, सुवर्णभस्म, रससिन्दूरये एकएकतोले डालकर खूबमिलाकर आधेआधेतोलेकी गोलियां बनाकर यथानुपानसे देनेसे जीर्णज्वर, क्षय, कास, श्वास, सन्ताप, शूल, अजीर्ण, आमवात, पांचतरहकेप्रदर, वन्ध्यत्वदोष, एकान्ततःकन्याजनन और अण्डवृद्धि इनसबको यह पाक दूरकरताहै ॥२७६ ॥

२७७ कुमारीवटी

कुमार्यद्भिर्हेम रौप्यं हरितालञ्च माक्षिकम् ।
शतशो भावयित्वाऽथ गुञ्जामात्रां वटीं चरेत् ।
धात्र्यम्भसा वटी सेयं कुमारीयोजिता हरेत् ।
निखिलान्स्नायुजान्रोगान्कुर्यात्तीक्ष्णं धनञ्जयम्

भै. र., स्नायुरोगे ।

भाषा—सुवर्णभस्म, रौप्यभस्म, हरितालभस्म और सोनामाखी येसब समभागलेकर कुमारीकेरसकी १००भावनादेकर एकएकरत्तीकी गोलियें बनाकर आंवलेकेरससे कुमारीकन्याकेहाथसे देनेसे समस्तस्नायुरोगोंको दूरकर अग्निको दीप्तकरतीहै ॥ २७७ ॥

२७८ कुमुदप्रकाशः

भार्गिका चाजमोदश्च सैन्धवं चित्रमूलकम् ।
त्रिफला त्रिकटु मुस्ता कर्चूरं च तथा स्मृतम्॥

भागार्द्ध हेमबीजानां गन्धकं विषसूतकम् ।
विडङ्गं पिप्पलीमूलमेला जातीफलं समम्
अश्वगन्धा वचा हिङ्गु त्रिफला च तथा स्मृता ।
पूर्वभागसमं युक्तं शुष्कचूर्णं तु कारयेत् ११९५
वारिणाऽऽमर्द्य गुटिकां कुबेराक्षसमां विदुः ।
एकैकां भक्षयेत्प्राज्ञः सर्वरोगापनुत्तये ११९६॥
तृतीये क्रमवृद्धिः स्याच्चतुर्थे बलवर्धनम्
पञ्चमे चायुषो वृद्धिः षष्ठे सौभाग्यमेव च ॥
जल्पनं तैलपिष्टादि वर्जयेद्विजितेन्द्रियः ।
विकारान् हरते सर्वान् बुद्ध्यारोग्यबलप्रदम् ॥
कुमुदप्रकाशसंज्ञं वै सोमो यतिरभाषत ।
सुगोप्योयं रसः श्रेष्ठो गात्रे ह्यभयदायकः ॥

र. शा.,

भाषा—भारङ्गी, अजमोद, सैन्धव, चित्रकमूल, त्रिफला, त्रिकटु, नागरमोथा, कचूर येसब एकएकतोला, धतूरेकेबीज, शुद्धगन्धक, बछनाग और-पारा येसब ½ आधातोला, विडङ्ग, पिपलामूल, इलायची, जायफल, असगन्ध, बच, हींग और त्रिफला येसब एकएकतोलालेकर कूटकपड़छानकर पानीसेपीसकर कंजेके बीजकीबराबर गोलियें बनाकर एकएकगोली तत्तद्रोगहरानुपानकेसाथ देनेसे तमामरोगोंको यह दूरकरताहै । लगातार तीनमहीनेतक खानेसे गमनशक्तिबढै । चौथेमहीनेमेबल, पांचवेंमे आयु, छठेमे सौभाग्य बढ़तेहैं । ज्यादा बोलना, तैल, पिट्ठीकीचीजें येसब छोड़देवेंतो यह समस्तरोगोंको दूरकर बुद्धि और आरोग्यको बढ़ाता है । कुमुदप्रकाश इसका नामहै । सोम यतींने इसको कहाहै २७८ ॥

२७९ कुमुदेश्वरोरसः (प्रथमः)

पारदं शोधितं गन्धमभ्रकं च समंसमम् ।
तदर्धं दरदं दद्यात्तदर्धाञ्च मनःशिलाम् ॥
सर्वार्द्धं मृतलोहञ्च खल्वमध्ये विनिःक्षिपेत् ।
द्विःसप्तभावना देयाः शतावर्या रसेन च ॥
ततः सिद्धो भवत्येष कुमुदेश्वरसञ्ज्ञकः ।
सितया मरिचेनाथ द्वित्रगुञ्जाप्रमाणतः ॥
भक्षयेत्प्रातरुत्थाय पूजयित्वेष्टदेवताम् ।
यक्ष्माणमुग्रं हन्त्येव वातपित्तकफामयान् ॥
ज्वरादीनखिलान् रोगान् यथादैत्याञ् जनार्दनः
सतताभ्यासयोगेन वलीपलितनाशनः ॥

बृ. यो. त., रसायनसं., र. चं., नि. र., वै. द., र.प्र., वै. क., यो. र., र. का., वै. र., वै. चि., चि. र. म., र. कौ., र. क. ल., यक्ष्मणि ।

भाषा—शुद्धपारा, गन्धकऔरअभ्रकभस्म येसब एकएकतोला, शिंगरिफ १॥ तोला, मैनसिल १॥। तो., इनसबसे आधीलोहभस्म डालकर शतावरीके रसकी चौदहभावनादेकर दो या तीनरत्तीकी गोलियें बनाकर रखछोड़े । यह कुमुदेश्वर रस तैयार हुआ । प्रातःकालइष्टदेवताका पूजनकर एकएकगोली तत्तद्रोगहरानुपानकेसाथ लेनेसे अत्यन्तभीषणराजयक्ष्माको दूरकर वात, पित्तऔरकफकेरोगों तथा समस्तज्वरोंको इसतरह नष्टकरताहै । जिसतरह जनार्दनभगवान् दैत्योंको नष्टकरतेहैं ॥ २७९ ॥

२८० कुमुदेश्वरोरसः (समहेममृगाङ्कः) (द्वितीयः)

हेमभस्म रसभस्म तुल्यकं
मौक्तिकं तु रसपादटङ्कणम् ।
गन्धकं कुरुत सर्वतुल्यकं
काञ्जिकेन परिपेष्य गोलकम् १२०५॥
मृत्स्नया च परिवेष्ट्य शोषितं
भाण्डके सलवणेऽथ पाचयेत् ।
एकरात्रमथ तं पुटेत वा
सिद्धिमेति कुमुदेश्वरो रसः ॥१२०६॥
वल्लमस्य मरिचैं घृतप्लुतं
राजयक्ष्मपरिशान्तये पिबेत् ।
पिप्पलीभिरथवा मधुप्लुतै-
राज्यगव्यपयसा युतैस्तुवा ॥१२०७॥
पथ्यमस्य मधुमांसतश्चरे
च्छालिमुद्गघृतदुग्धमस्तुभिः ।
व्यञ्जनैश्च घृतपाचितैरति-

क्षारहिङ्गुरहितै र्घृतैरपि ॥१२०८॥
हृद्यमत्र बलदं हितं हिमं
द्वित्रिवारमपि भोजयेद्भिषक्।
तैलबिल्वमपि कारवेल्लकं
राजिकादि रसमारकं त्यजेत्॥१२०९॥
क्रोधकामपरिवर्जितः शिवं
चिन्तयेद्धिकरुणामृतार्णवम्।
भग्नगात्रचिररोगिभोजनं
सक्तुकञ्च परिवर्जयेद्भिषक्।
सत्त्वमस्ति यदि दैवयोगत
स्तर्हि शुद्धवपुषो रसं ददेत् ॥१२१०॥

र. सं., र. क., र. प्र. सु., ध., र. चं., र. मु., र. दी., यक्ष्मणि।

टि० प्रथमसङ्ख्याकमृगाङ्केणायं तुल्यः, केवलं तत्र गन्धको मौक्तिकसमो नियोजितोऽस्ति। अत्र तु सपादचतुर्गुणितोऽस्ति, सौभाग्यन्तु तत्राप्यस्ति। कुत्रचिद्ग्रन्थेषु रसपादघ्न टङ्कणमिति न्यस्तं दृश्यते। रसपद्धत्यां सकलपादटङ्कणमस्ति कुत्रचिद् रसत्रिभागमस्ति नैतावता विशेषेण रसान्तरतां प्राप्तुमर्हति। वस्तुतस्तु अयङ्कुमुदेश्वराख्यः प्रथममृगाङ्केऽन्तर्भावनीय इति दिक्।

भाषा—सुवर्णभस्म, पारदभस्म समभाग, इनदोनोंकी बराबरमोती, पारेसे चतुर्थांशसुहागा औरसबकी बराबर गन्धकलेकर काञ्जीमे पीसकर गोलाबनाकर उसपर खालीकपड़ा लपेटकर दोतीनकपड़मिट्टी चढ़ाकर सुखालेना। फिर लवणयन्त्रमे अथवा भूधरयन्त्रमे चारपहर पकाना। स्वाङ्गशीतलहोनेपर निकाललेना। यह कुमुदेश्वर रस तैयारहुआ। इसमेसे ३ रत्तीलेकर २९ कालीमिर्च औरघीकेसाथ अथवापीपलऔरमधुकेसाथ। चटानेसे अथवा घी, दूधऔर पीपलकेसाथ पीनेसे यहरस राजयक्ष्मको बहुतशीघ्र निवृत्तकरताहै। इसमेतैल, खटाईऔरतीक्ष्णपदार्थ न खाय। घीमेबनायेहुए व्यञ्जनदेना। परन्तु उनमे अत्यन्तक्षार औरहींग न हों। जो हृद्य और बलको देनेवाली चीजें हैं वे भूखलगनेपर दिनमेदोतीनदफाखिलाना। अजीर्ण नहोनाचाहिये इसकाध्यानरखना, तैल, बेल, करेला, राई, तथा इसकोमारनेवाले ककाराष्टक को छोड़देना। क्रोध, काम इनसे रहितहोकर परमेश्वरका ध्यानकरे। यदि मांसाहारीहोतो वह जिसपशुका अङ्गभग्नहै या चिररोगीहै उसको औरसत्तू नखाय। इसकाप्रयोग करतेसमय जिसरोगीका मन काबूमेहैऔरदैवअनुकूलहै (अर्थात्ग्रहबलहै, मारकेशाकीदशान्तरदशानहो) तोरोगीकी शुद्धिकरके यहरस देना २८०॥

२८१ कुमुदेश्वरोरसः (तृतीयः)

मृतताम्रस्य भागौ द्वौ भागैकं वङ्गभस्मकम्।
यष्टीमधुरसै र्भाव्यं शुष्कं माषार्द्धकं शुभम्॥
सेवयेच्चानुपानेन वक्ष्यमाणेन बुद्धिमान्।
चन्दनं शारिवां मुस्तं क्षुद्रैलां नागकेसरम्१२१२
सर्वतुल्यां तथा लाजां पचेत् षोडशिके जलैः
अर्द्धशेषं हरेत्क्वाथं सिताक्षौद्रयुतन्तु तत्॥
छर्दिं तृष्णां निहन्त्याशु रसोऽयं कुमुदेश्वरः॥

र. सं., र. मु., ध., र. चं., र. क., तृष्णायां।

भाषा—ताम्रभस्म २ भाग, वङ्गभस्म १ भाग, इनकोइकट्ठेकर मुलहठीकेरस अथवा क्वाथसे कईरोज घोटकर सुखाकर रखछोड़े। यह कुमुदेश्वर रसतैयारहुआ। इसकी ४ रत्ती नीचेकहेहुए अनुपानकेसाथदेना—चन्दन, सारिवा, नागरमोथा, छोटीइलायची, नागकेसर येसब समभाग औरसबकीबराबर धानकी खीलें लेकर सोलहगुने पानीमे पकाकर आधाबाकीरहनेपर मिश्री औरमधु मिलाकर देनेसे उल्टी, अत्यन्तप्यास, इनको यह दूरकरताहै॥ २८१॥

२८२ कुमुदेश्वरोरसः (चतुर्थः)

तारं वङ्गं हेम लोहं गगनं नागविद्रुमम्।
वैक्रान्तं पारदं शङ्खं टङ्कणं गन्धकन्तथा१२१४
माक्षिकं रसकञ्चैव मौक्तिकं हिङ्गुलं समम्।
समस्तं गव्यदुग्धेन चेक्षुवासारसेन च १२१५
मुसलीकेतकीरम्भाशाल्मलीगोक्षुरद्रवैः।
वल्लमात्रं प्रयुञ्जीत सिताज्यमधुना सह १२१६
प्रमेहश्वासकासघ्नं ज्वरे जीर्णे प्रयोजयेत्।
बलवीर्यकरं पुंसां तेजोवृद्धिकरं परम्॥१२१७

अकृत्वा मैथुनं रेतः स्फुटित्वा लोचनं हरेत् ।
कुमुदेश्वरनामायं मेहं जयति दुस्तरम्॥१२१८॥

रसायनसं., र. सु., र. र. कौ., मेहे

भाषा—रजतभस्म, वङ्गभस्म, सुवर्णभस्म, लोहभस्म, अभ्रकभस्म, नागभस्म, प्रबालभस्म, वैक्रान्तभस्म, शुद्धपारा, शङ्खभस्म, मुनासुहागा, शुद्धगन्धक, सोनामाखी, खर्पर या जस्तभस्म, मोती, शिंगरफि, येसब समभागलेकर गायकादूध, ईखकारस, अडूसा, मुसली, केतकी, केलेकाकंद, सेमलकामुसला, औरगोखरू इनकेरसोंसे एकएकभावनादेकर तीनतीनरत्तीकी गोलियें बनाकर रखछोडे। यह कुमुदेश्वर रस तैयार हुआ। इसको मिश्री, मधुऔरघीके साथदेनेसे प्रमेह, श्वास, कास, जीर्णज्वर, बल, वीर्यऔरतेज इनकी हानिको यह दूरकरताहै।इसरसके सेवनकरनेमे स्त्रीसङ्गवर्जित न करे। उसकेवर्जितकरनेसे शुक्रआंखोंमे आकर खराबी करेगा ॥ २८२ ॥

२८३ कुलवधूरसः

शुद्धसूतं मृतं ताम्रं मृतं नागं मनःशिलाम् ।
तुत्थकं तुल्यतुल्यांशं दिनमेकं विमर्दयेत्॥१२१९
द्रवैश्चोत्तरवारुण्याश्चणमात्रा वटी कृता ।
सन्निपातं निहन्त्याशु नस्यमात्रेण दारुणम् ॥
एषा कुलवधू नाम जले घृष्ट्वा प्रयोजयेत्॥१२२०

र. सं., रसचिं., भै. र., वै. क., र. च., र. क. ल., र. सु., र. का. (कुलवटीति नाम्ना प्रथिता), र. को.,

भाषा—शुद्धपारा, ताम्रभस्म, नागभस्म, मैनसिल, तुत्थभस्म येसब समभागलेकर इन्द्रायणके रससे १ दिनघोटकर चनेप्रमाण गोलीबनाकर छायाशुष्ककरके रखछोड़ना। यह कुलवधू रस तैयारहुआ। जलमेघिसकर इसकानस्यदेनेसे ज्वरको तत्क्षणनष्टकरताहै ॥ ३८३ ॥

२८४ कुष्ठकालानलोरसः

गन्धं रसं टङ्कणताम्रलोहं
भस्मीकृतं मागधिकासमेतम् ।
पञ्चाङ्गनिम्बेन फलत्रिकेण
विभावितं राजतरो द्रवैस्तु ॥
नियोजयेद्वल्लयुगप्रमाणं
कुष्ठेषु सर्वेषु च रोगसङ्घे ॥ १२२१ ॥

र. चि., र. सु., र. सं. रसायनसं., र. क., र. का., यो. म., र. दी., कुष्ठे ।

भाषा—शुद्धगन्धक औरपारा, सुहागा, ताम्रभस्म, लोहभस्म औरपीपल इनको समभागलेकर निम्बपञ्चाङ्ग, त्रिफल [illegible] ज्ञमर्दनकर [illegible] कुष्ठकालानल रस तैयारहुआ। इसको तत्तद्रोगहरानुपानकेसाथ देनेसे समस्तकुष्ठऔर तमामरोगनष्ट होवैं ॥ २८४ ॥

२८५ कुष्ठकुठारोरसः (प्रथमः)

सूतभस्मसमं गन्धं मृतायस्ताम्रगुग्गुलुः।
त्रिफला विपमुष्टिश्च चित्रकश्च शिलाजतु १२२२
इत्येवं चूर्णितं कुर्यात्प्रत्येकं निष्कपोडश ।
चतुःषष्टि करञ्जस्य बीजचूर्णं प्रकल्पयेत्
चतुःषष्टि मृतं चाभ्रं मध्वाज्याभ्यां विलोडयेत्
स्निग्धभाण्डगतं खादेद्विमापं सर्वकुष्ठजित्१२२४
रसः कुष्ठकुठारोऽयं गलत्कुष्ठनिकृन्तनः ।
पथ्यं तु मधुरं देयं तदभावे गुडौदनम् १२२५
पातालगारुडीमूलं मधुपुष्पी च धान्यकम् ।
सितया भक्षयेत्कर्षमतितापप्रशुत्तये ॥
लिङ्गान्नागवलामूलं मध्वाज्यै र्हन्ति तापकम् ॥

र. र. स., र. र., र. सं., रसायनसं., र. चि., शा., र. क. ल., र. प्र. सु., चि. क., भै. सा., वृ. यो. त., र. प्र., र. क., र. कौ., र. मु., धो., यो. म., र. का., र. र. कौ., र. (मा.,) कुष्ठे ।

टि०—र. चि., र. सं., र. क. ल., रसायनसं., र. र. दी., र. चं., र. कं., र. सु., भा. प्र., यो. म., र. दी., एषुमन्येषु गलत्कुष्ठारिनाम। रसेन्द्ररत्नकोषे गलत्कुष्ठकुठार इति नाम, केषुचित्पुस्तकेषु सूतभस्मसमं, गन्धमित्यादि पाठं विधाय सर्वसमुदाये ताम्रस्य स्थितिं षोडशनिष्करूपां कृत्वा सर्वान्ते अभ्रकं निष्कास्य तत्स्थाने, चतुःषष्टि मृतं ताम्रं मध्वाज्याभ्यां विलोडयेत्, इति पाठः, लिखितोऽस्ति तत्र तेषां कोऽभिप्रायइति त एव महाशया जानन्ति। यदिच चतुःषष्टि निष्कप्रमाणेन ताम्रं दातुमभिलाषा चेत्तर्हि षोडश-

निष्कावधी पाठो निष्कातिलव्यः, यदि चोभयमप्यामिलपितं स्यात्तर्हि चतुःषष्टि मृतं ताम्रमित्यस्य स्थाने ताम्रादशीतिनिष्काणीत्येवरूपस्य पाठस्य ज्यायस्त्वं स्यात्तच्छ्रोतॄणां भ्रमानुत्पादकत्वादतोऽनुमीयते चतुःषष्टिमृतञ्चाभ्रमिति पाठस्यापभ्रष्टत्वेन चतुःषष्टि मृतं ताम्रमिति पाठः दैववशायेनकेन कारणेन सञ्जातस्तमविचार्यैवान्धस्यैवान्धलमस्य विनिपातः पदेपदे इति न्यायेन अविद्यामूलैवेयं द्वितीयपाठस्थितिरिति वयं मन्यामहे। अत्र सहृदयानां हृदयमेव प्रमाणमिति दिक्। चिकित्साक्रमकल्पवल्ल्यां करञ्जबीजाभ्रकयोः प्रमाणं प्रत्येकं द्वात्रिंशन्निष्कं समुद्दिष्टम्। भैषज्यसारामृतसंहितायां सूतभस्मादीनां प्रत्येकमष्टनिष्कं प्रमाणं निर्धार्य करञ्जबीजाभ्रकयोः प्रमाणं प्रत्येकं चतुःषष्टिनिष्कं निर्धारितम्, विषमुष्टिशब्दस्याभिधां महानिम्बे मत्वा महानिम्बस्यबीजानीति स्पष्टं प्रतिपादितम् रसादयस्तममात्राः, एतेषां चतुर्थांशेन अभ्रकम् करञ्जश्चेति रसावतारे माणिक्यचन्द्रजैनः। अस्यमात्रा द्विनिष्कपरिमिता अभिहितास्ति परमत्रैकमाषकादारभ्यशनैः शनैः सा वर्धनीया विषमुष्टिकमहानिम्बबीजानांविषमयत्वात्, धातुभस्मनां समयोगत्वाच्चास्माभि द्विनिष्कस्थाने द्विमाष मितिपाठः परिवर्तित इति।

भाषा—पारदभस्म, शुद्धगन्धक, लोहभस्म, ताम्रभस्म, गुग्गुलु, त्रिफला, शुद्धकुचिला, चित्रक, शिलाजतु येसब १६–१६शाण, करञ्जकेबीज औरअभ्रकभस्म येप्रत्येक६४शाण, इनसबको एकत्रितकूटकपड़छानकर मधुऔरघृत अन्दाजमाफिकदेकर चिकनेवर्तनमे रखछोड़े। यह कुष्ठकुठार रस तैयारहुआ। इसकी २माशेकीमात्रा कुष्ठहरानुपानकेसाथ देनेसे यह रस गलत्कुष्ठको दूरकरताहै। इसमे पथ्यमधुरदेना, उसकेअभावमे गुड़औरचावलदेना। इसकेखानेसे अत्यन्तदाहहोनेलगेतो पातालगारुडीकीजड़, ओइहलकेफ़ल, धनियांऔरमिश्री येसबसमभाग मिलाकर १तोलादेवे। अथवा नागबलाकीजड़काचूर्ण मधुऔरघृतकेसाथ चटावे॥ २८५॥

२८६ कुष्ठकुठारोरसः (द्वितीयः)

रसस्य कर्षः कर्षौ द्वौ गन्धकात्कज्जलं तयोः।
तिलपर्ण्यलिमुण्डीनां स्वरसैः कृतभावनम्॥
कर्षकर्षं वचाधात्रीकणातीक्ष्णकृमिच्छिदान्।
शाणं विषस्य कर्षार्धं जीरकस्य सितस्य च॥
पलार्धं मृतताम्रस्य तथा शुण्ठ्याश्च मर्दितम्।
भृङ्गाम्भसि घटे स्निग्धे पचेच्चणकसम्मिताः॥
वटिकाः कुष्ठविश्वाग्नित्रिफलासैन्धवान्विताः।
कुर्यात्कुष्ठकुठाराख्यो रसोऽयं सर्वकुष्ठजित्॥
र. र. स.,

भाषा—शुद्धपारा१तो., गन्धक२तो., दोनोंकीकजली बनाकर हुरहुर, भंगराऔरगोरखमुण्डी इनप्रत्येकके रसोंसे एकएकदिनमर्दनकरके बच, आंवला, पीपल, मिरच, विडङ्गयेसब एकएकतोला, शुद्धबछनाग४माशे, सफेदजीरा ½ तोला केकादिमे घोटीहुईताम्रभस्म २तोले, इनसबको इकट्ठेकर सबसे अष्टगुणित भंगरेकेस्वरसको चिकनेवर्तनमे डालकर उसमेसबचीजें डालदे, औरबहुतमन्दआंचसेपकावे जब गोलेबंधनेलायकहोजाय तब कुठ, सोंठ, चित्रक, त्रिफला, सैन्धवइनकाचूर्ण सबदवासे दशमांश डालकर खूबमर्दनकर चनेप्रमाणगोलियें बनाकर रखछोड़े। यह कुष्ठकुठार रस तैयार हुआ। इसको कुष्ठहरानुपानकेसाथ १ माशेसे२माशेतक देनेसे समस्तकुष्ठदूरहोतेहै॥ २८६॥

२८७ कुष्ठकुठारोरसः (पञ्चामृतः) ३

रसगन्धकलोहानां प्रत्येकं तुल्यभागिकम्।
मेलयित्वा क्षिपेत्तत्र समानश्चाभ्रजं रजः॥
षड्भागं तालकं दत्त्वा सर्वमेकत्र मर्दयेत्।
पक्वनिम्बुकतोयेन धान्याम्लेन च मर्दयेत्॥
ततस्तेन प्रकुर्वीत कोलमात्रमिता वटी।
छायाशुष्कां प्रकुर्वीत क्षिपेत्काचकरण्डके॥
एकैकां भक्षयेत्कुष्ठी हितपथ्यपरायणः।
मण्डलेन निहन्त्याशु कुष्ठरोगान् सुदुस्तरान्॥
श्वित्रादन्येषु रोगेषु कुष्ठरोगेषु शस्यते।
अयं पञ्चामृतः प्रोक्तो रसः सर्वगदापहः॥

रससागरे, कुष्ठे। अस्मिन्रसेपञ्चवस्तुविद्यमानतायामपि न पञ्चाननसंज्ञा तत्र प्रायःताम्रस्थितेर्दर्शनात्।

भाषा—शुद्धपारा, गन्धक, लोहभस्म समभाग, इनतीनोंकीबराबर अभ्रकभस्म, औरछभाग अर्थात्अ-

भ्रकसेद्विगुणहरिताळभस्म या रसमाणिक्य, मिलाकर पकेहुएनीबूकेरस और धान्याम्लसे एकएकरोजमर्दन-कर चारचार रत्तीकीगोलियें बनाकर छायामे सुखा-कर शीशीमेधररक्खे। इसमेंसे एकएकगोली कुष्ठहरा-नुपानकेसाथ देनेसे एकमण्डलमे श्वित्रकोछोड़कर अन्यसमस्तकुष्ठोंको यह दूरकरताहै। अनुपानभेदसे दूसरेभीसबरोगोंकोनष्टकरताहै ॥ २८७ ॥

२८८ कुष्ठकुलान्तकोरसः

सूताभ्रशुल्बकान्तानां मृतानां गन्धकं समम् ।
तेषाश्चतुर्गुणश्चाज्यमेभिः क्वाथं विपाचयेत् ॥
अमृता मुशली शुण्ठी हस्तिकर्णी शतावरी ।
अमुं पश्चामृतं क्वाथं घृतादद्वैदगुणं क्षिपेत् ॥
मार्कवो मधुजीवन्तीविदार्यां च कपायकम् ।
पूर्वांशं निःक्षिपेज्जीर्णे अस्मिञ्जीर्णे त्विदं क्षिपेत्
मेदायुग्मे बृहत्यौ द्वे ऋषभं नाकुलीद्वयम् ।
जीवकेन युतं सर्वं क्षिपेदाज्याच्चतुर्गुणम् ॥
श्रीपर्णी बृहती चैव गोक्षुरः शालिपर्णिका ।
व्याघ्रीवसन्तदूती च पृश्निपर्णी च बिल्वकम् ॥
टुण्टुकोऽरणिका चेति दशमूलीकपायकम् ।
घृताच्चतुर्गुणं योज्यं पाच्यं चाज्याऽवशेषितम् ॥
कटुत्रयं वह्निदण्डी चित्रकं चूर्णितं क्षिपेत् ।
प्रत्येकं सूततुल्यं स्यात्सर्वतुल्यं गुडं क्षिपेत् ॥
अवतार्य क्षिपेदुष्णे पलैकं मृतसूतकम् ।
गुडूचीसत्त्वसंयुक्तं द्वयोस्तुल्यं कटुत्रयम् ॥
आरक्तकचित्रमूलमभावेनिष्कं कं विषम् ।
त्रिफलायाः सप्तपलं सर्वमेकत्र मर्दयेत् १२४४
सितामध्वाज्यसंयुक्तं रसं कुष्ठकुलान्तकम् ।
दशमापमितं खादेत्त्रिकक्षादद्रुनाशनम् ॥
अष्टादशानि कुष्ठानि साध्यासाध्यानि हन्त्यलम्

र. का., र. क. यो., वै. चि., य. रा., अनयोः कुष्ठारि-रितिनाम । कुष्ठाधिकारे ।

टि०—रत्नाकरौषधयोगे शुल्बस्थाने तुत्थं नियोजितं, सर्वतुल्यं गुडं क्षिपेदित्यस्य स्थाने सर्वतुल्यश्चगन्धकमिति पाठः कृतोऽस्ति तत्र शुल्बस्थाने तुत्थनियोजनं नातिवैचि-त्र्यावहं परं गुडस्थाने गन्धकनियोजने दशमापमितं खादे-दिति वाक्येन विरोधः स्यादतः प्रमादादयं व्यत्यासः सञ्जात इति प्रतीयते अतस्तत्र न पाठान्तरता समायातीति बोद्धव्यम् ।

"अमृतामृतजीवन्तीविदारीणां कपायकम् । पूर्वांशं निःक्षिपेज्जीर्णे तस्मिञ्जीर्णे त्विदं क्षिपेदि"त्यतः पाठं विच्छिद्य "घृतावशेषकं पक्वा सदासेवेत बुद्धिमान् । सर्वकुष्ठनि-हन्त्याशु कच्छपश्च विनाशयेत्" इत्यत्र समापितमस्ति अतः स्पष्टैव तत्र त्रुटिरितिकृत्वा तस्य पाठस्याप्यत्रैवान्तर्भावोऽ-स्ति, सः पाठश्च वैद्यचिन्तामणिवसवराजीयभर्कैः पूरणीय इत्यस्माकं विज्ञप्तिः ।

भाषा—शुद्धपारद, अभ्रक, ताम्र, कान्त इन-प्रत्येककीभस्म और शुद्धगन्धक येसब समभागलेकर इनसबसे चतुर्गुणित घीडालकर गुडूची, मुसली, सोंठ, हस्तिकर्णपलाश (भुंइकोंहड़ा), शतावर, इनसबका क्वाथ घृतसे चौगुना डालकर भंगरा, अर्कपुष्पी, क्षीरविदारी इनकाकाढ़ा पहिलेकाढ़ेके जितनादेकर पकावे। इसके सूखजानेपर मेदा, महा-मेदा, भटकटैया, वनभांटा, ऋषभ, नाकुली, (नई; हिं–मामेजवो गुजराती औरराखा), जीवक इनसबका काढ़ा घीसेचतुर्गुणित डालकर पकावे। इसकेसूख-जानेपर गंभारी, वनभांटा, गोखरू, शालपर्णी, भट-कटैया, पाटला, पृश्निपर्णी, बिल्व, सोनापाठा, अरणी इसदशमूलके काढ़ेको घीसेचतुर्गुणितदेकर पकावे सूखजानेपर त्रिकटु, भिलांवां, ब्रह्मदण्डी औरचित्रक इनसबकाचूर्ण पारेकीबराबर डालकर सबकीबराबर गुड़मिलाकर गरमहीमे चारचारतोले पारेकीभस्म औरगुडूचीसत्त्व डाले। त्रिकटु ८ तोले, लालचित्रक ८ तोले (न मिलनेपर बछनाग ४ माशे डालना), त्रिफला ७ पल सबकोइकट्ठेमर्दनकर घीऔरमधु अन्दाजसेदेकर रखछोड़े यह कुष्ठकुलान्तक रस तैयारहुआ, इसकी दसमाशेकी मात्रा कुष्ठहरानुपान-केसाथदेनेसे तीसरे दर्जेमें पहुंचेहुए दद्रुऔर अठार-हप्रकारके साध्यवअसाध्यकुष्ठइनसबको यह नष्टक-रताहै ॥ २८८ ॥

२८९ कुष्ठगजकेसरीरसः (प्रथमः)

चत्वारः स्युः पृथग्भागाः शुद्धगन्धकसूतयोः
कलाख्याः शुद्धतालस्य मिलिता जिनसङ्ख्यकाः
धत्तूरकरसेनैतांस्त्र्यहं खल्वे विमर्दयेत् ।
चक्रीं कृत्वा च तां शुष्कां स्थालीमध्ये निवेशयेत्
अष्टभागेन ताम्रेण कर्तव्या च शराविका ।
पूपायाश्चोपरिस्थाप्याऽधोमुखी सा शराविका ॥
लवणं त्वश्मचूर्णञ्च जलपिष्टं सुसूक्ष्मकम् ।
तेन नीरन्ध्रयेत्सन्धिं स्थालीपात्र्योः समन्ततः ॥
स्थालिका कण्ठकं यावद्भर्तव्या लवणेन च ।
रक्षया च्छाणकानां वा शरावेण पिधाय च
वस्त्रमृत्तिकया पश्चात्सन्धिं नीरन्ध्रयेत्तयोः ।
चुल्यामारोपयेद्यामं मृद्वग्निं ज्वालयेदधः १२५१
यामत्रयं हठाग्निञ्च दद्यादुत्तारयेत्सुधीः ।
स्वाङ्गशीतां ताम्रपात्रीं चक्रीमिश्रां च पेषयेत्॥
पुनराम्रास्थिनीरेण चक्री कार्याऽथ सुन्दरा ।
कान्तलोहमये पात्रे घृताभ्यक्ते च तां क्षिपेत् ॥
चुल्यां तद्विन्यसेत्पात्रमाम्रास्थिजलपूरितम् ।
अधःसञ्ज्वालयेदग्निं यावच्छुष्यति तज्जलम् ॥
शुष्केशुष्के जले क्षेप्यं पुनराम्रास्थिजं पयः ।
इत्थं कृत्वा त्रिवेलञ्च पात्रमुत्तारयेत्ततः १२५५
गृहीत्वा लोहपात्राच्च खल्वे सम्पेषयेच्च तत् ।
निष्पन्नः कुष्ठनागानां केसरी नामतो रसः ॥
अष्टभिस्त्रिफलावल्लैः समो वल्लो रसस्य च ।
प्रातर्वैद्येन दातव्यः प्रत्यहं कुष्ठिनां सदा ॥
श्वेतवर्जितकुष्ठानि हन्ति सप्तदश ध्रुवम् ।
षण्मासे निश्चितं कुष्ठी कामदेवसमो भवेत् ॥
यदि संशोधनं कुर्यादष्टमे चाष्टमेऽहनि ।
पञ्चाङ्गा च यवासी स्यात्तत्समानेन्द्रवारुणी ॥
यवास्यर्धा त्रिवृच्चैव त्रिवृतोऽर्द्धा हरीतकी ।
सञ्चूर्ण्योष्णोदकै र्दद्याद्द्याणकचतुष्टयम् ॥
विरेकाज्जायते शुद्धिः शनैः कुष्ठेन मुच्यते ।
षाष्टिकास्तण्डुलाः पथ्ये मकुष्ठा मुद्गगोघृतम् ॥
शाकमार्द्रकतुण्डीरी हरिद्रा तण्डुलीयकम् ।
कर्कटान्याज्यपक्वानि तैलं दूराद्विवर्जयेत् ॥
पथ्यैः संसेवितः कुष्ठगजानां केसरी रसः ।
नियुक्तः सर्वकुष्ठानि निहन्त्येव न संशयः ॥
कुष्ठादन्यत्र रोगेषु दातुमिच्छा भवेद्यदि ।
रसेनानेन संयोगमौषधानां वदाम्यहम् ॥
त्रिवृता वृद्धदारुश्च शङ्खपुष्पी कुबेरदृक् ।
लवणानि यवक्षारं स्वर्जिक्षारं च पत्रकम् ॥
चित्रको वेतसं कुष्ठं पौष्करं सयवासकम् ।
समभागानि चैतानि तत्समानेन्द्रवारुणी ॥
चक्रीचूर्णस्य त्रिंशच्च दन्त्याः पञ्चदशाथ वै ।
अस्य चूर्णस्य सर्वस्य गद्याणैर्वेदसम्मितैः ॥
वल्लं नित्यंरसस्यास्य दद्यादुष्णेन वारिणा ।
कालोत्थेन जलेनैतत्तक्रेण दधिमस्तुना ॥
मद्यादीनां यथालाभे सुरसाया रसादिभिः ।
रोगोक्तैरनुपानैश्च देयोऽयं कुष्ठकेसरी ॥
कोष्ठवातजलप्लीहरक्तगुल्मोदरादिषु ।
अष्टास्वपि यथार्हेषु मेहश्लेष्मादिसञ्चये ॥
दातव्यो विधिनानेन रोगानेतान्निहन्त्ययम् ॥

र. कं. ली.,

भाषा—शुद्धपाराऔरगन्धक ४–४ तोले, शुद्ध-हरिताल १६ तोले, इनसबकीइकट्ठीकज्जलीकर धतूरेके-रससे तीनरोज़मर्दनकर चकत्तीबनाकर खूबसुखालेना । उसकोकपड़मिट्टीकीहुईहंडीमे रखकर वजनमे चकत्तीसे अठगुनी ताँबेकी कटोरीसे ढककर सैन्धवऔर-चूनेको पानीमे पीसकर उसकी सन्धिको बंदकरदेना । फिर हंडीकेमुंहतक पिसाहुआनमक अथवा कण्डोंकी राखभरकर ऊपरढकनदेकर तीनचारकपड़मिट्टी देदेना । सूखनेपर चूल्हेपर रखकर एकपहरकी मन्द-आंचदेना औरतीनपहरकी हठाग्नि देकर उतारकर रखदेना । स्वाङ्गशीतलहोनेपर तांबेकीकटोरीसहितरस-को पीसकर आमकीमज्जाकेपानीसे घोटकर चकत्तीबना कर घृताभ्यक्तकान्तलोहकेपात्रमे रखकर उसको चूल्हे-परचढाकर आमकीमज्जाके रससे कड़ाहीको भरकर नीचे जबतक रस न सूखे तबतक अग्निजलातारहे ।

सूखनेपर फिर उसीपानीसे भरकरजलावे । इसप्रकार तीनवारकरके कड़ाहीको उतारकर रसको निकालकर पीसकररखलेना । यह कुष्ठगजकेसरी रस तैयार हुआ, इसकी२रत्तीकीमात्रा २४ रत्तीत्रिफलाकेचूर्णकेसाथ हमेशः सुवहमेंदेना । श्वेतकुष्ठकोछोड़कर १७-कुष्ठोंको यह ६महीनेमें दूरकर कुष्ठीकोकामदेवकेसदृशबनादेताहै । बीच२मेंअगरशोधनकरनाहोतो व्याडवें२रोज नीचेकहाहुआजुलावदेवे, जवासा और इन्द्रायणकापचांगसमभाग, जवासेसेआधीनिसोत, निसोतसेआधीहरें, इनसबकाबारीकचूर्णकरगरमजलके साथदोतोलेदेना, इससेह्यादेलगकर कोष्ठकी शुद्धिहोजायगी । औरधीरे२कुष्ठसेनिवृत्तहोजायगा । साठीकेचावल, मोठ, मूंगऔरगायकावीखानेकोदेना । शाकमें अदरख, कुंदरू, हल्दी, चौलाईऔररोटीदेना । तेलभूलकरभी न खाय । पथ्यकेसाथ अगरयह (कुष्ठगजकेसरी) खायाजायतो समस्तकुष्ठोंको दूरकरताहै । कुष्ठके अतिरिक्त औररोगोंमें इसकोदेनाहोतो निशोत, त्रिधारा, शंखपुष्पी, कड़ा, पाचोंनमक, यवक्षार, सज्जीक्षार, पत्रज, चित्रक, बेत, कुठ, पोहकरमूल, जवासयेसब एकएकभागलेवे और इनसबकीबराबर इन्द्रायणकीजड़ और उसमेंथूहरकीजड़काचूर्ण-३०भाग, दन्तीकाचूर्ण१५भाग, इनसबको इकट्ठेकर रखछोड़े । इसमेंसे २तोलेचूर्णकेसाथ ऊपरवाले रसकी४रत्ती गरमपानीकेसाथ अथवा ताजेजलकेसाथ अथवा दहीकेतोड़ याछाछ अथवासानुकूलमद्योंकेसाथ, तुलसी-अदरखवगैरहकेरसकेसाथ अथवा यथारोगहरानुपानकेसाथ दीजायतो कुष्ठ, वातरोग, खराबजलसेउत्पन्नहुआरोग, प्लीह, गुल्म, रक्तदोष, उदररोग,प्रमेहऔरसन्निपात इनसबको यह नष्टकरताहै ॥ २८९॥

२९० कुष्ठगजकेसरीरसः (द्वितीयः)

सूतं गन्धं तालकञ्च गगनं योज्यं दशांशं रसात्,
कुपीलकज्जलिकां विमर्द्य दिवसं सुष्ठाखुकर्णीरसे
मञ्जिष्ठादिकषायकेण दिवसं मर्द्यं दृढं धीमता,
बीजं भल्लतरोः समुद्रफलकं आरोफलं वै नवम्॥
बीजं वै विषतिन्दुजं रससमं जन्तुघ्नकं श्लक्ष्णकं
चूर्णीकृत्य नियोज्यपारदसमं पालाशनिम्बत्वचम्
वंशव्योषविडङ्गमुस्तकरसैः सप्ताहसम्मर्दनं,
दूर्वायाः स्वरसैं विमर्द्य भिषग्ज्ञाकुल्यावटीमाषभा
एतां निम्बकषायकैः सहवटीं खादेद्विवारं पुमान्
कुष्ठप्लीहमहोदराणिश्वयथुंनिर्णाशयेज्ज्ञान्तवम् ।
कान्तिं पुष्टिमनामयं वितनुते मूलामयध्वंसिनी,
नाम्ना कुष्ठगजोत्थदुर्जयमदोघ्नंसे यथाकेसरी
र. र. मा., कुष्ठे ।

भाषा—शुद्धपारा१भाग, गन्धक, हरिताल और अभ्रकभस्म येप्रत्येक दशवां भाग लेकर सबकीकजलीकर मूषाकर्णीके रस और मञ्जिष्ठादिकषायमें एकएकदिन मर्दनकर पलाशबीज, समुद्रफल,नवीनजायफल, कुचिला, विडङ्ग येप्रत्येकपारेकी बराबरलेकर खूबचूर्णकर पूर्वगोलेकल्कमें मिलादे । फिर पलाशकीजड़कीछाल,नीमकीजड़कीछाल, बांस,विडङ्ग, त्रिकटुऔरनागरमोथा इनकेकाथोंसे सातरोजतक मर्दनकरके श्वेतदूबकेरसमें घोटकर एकएकमाशेकी गोलियें बनाकर रखछोड़े । यह कुष्ठगजकेसरी रस तैयार हुआ, इसगोलीको नीमकीछालकेकाढ़ेसे सुबहशामदेनेसे कुष्ठ, प्लीहा, असाध्यउदररोग, शोथ इनसबको दूरकर कान्तिपुष्टिऔरआरोग्य इनको करतीहुई बवासीरकोदूरकरतीहै । यहरस कुष्ठको इसतरहनष्टकरताहै जैसेगजोंकेमदको केसरीनष्टकरताहै ॥२९०॥

२९१ कुष्ठघोरसः (प्रथमः)

शुद्धं सूतं गन्धकं वै द्विभागं
कन्यानीरैः मर्दयेद्वासरैकम् ।
शुद्धं लोहं मारितं भागमेकं
गोलं कृत्वा लोहपात्रे निधाय१२७४॥
किञ्चित्किञ्चिद्दोजलं तत्रसिञ्चे
चुल्यामग्निं यामयुग्मं शनैश्च ।
तीव्राग्निं वै कारयेद्याममर्धं
स्वाङ्गशीतं चूर्णयेत्तत्प्रयत्नात् १२७५ ॥

वह्निः काष्ठोदुम्बरी सोमराजी
श्रेष्ठा तद्वद्राजवृक्षो विडङ्गम् ।
लेहं कृत्वा लेपयेद्दुष्टकुष्ठं
गुञ्जायुग्मं भक्षयेद्वै रसञ्च ॥
दद्रूकुष्ठं श्वेतकुष्ठं विचर्चीं
सत्यंसत्यं नाशयेत्त्वग्गदांश्च ॥१२७६॥

र. प्र. सु.,

भाषा—शुद्धपारा१भाग, गन्धक२भाग, इनदोनोंकी कज्जलीकर घीकुआंरके रससे एकरोज़मर्दनकर एकभाग लोहभस्ममिलाकर गोलीबनाकर लोहेकीकड़ाहीमें रखदे। फिरचूल्हेपर चढ़ाकर ऊपरसे थोड़ाथोड़ागोमूत्रकाचोआदे । अग्नि दोपहरमन्ददेकर आधे पहर तीव्रदेकररहनेदे। स्वाङ्गशीतलहोनेपर सबको घोटकर रखदे । इसकी२रत्ती कुष्ठहरानुपानकेसाथ खानेकोदे और चित्रक, कठगूलर, बाकुची, त्रिफला, अमिलतासऔरविडङ्ग इनसबका लेपबनाकर दुष्टकुष्ठपरलेपकरनेसे यहरस दद्रु, श्वेतकुष्ठ, विचर्चीऔर चमड़ीकेसमस्तरोगोंको नष्टकरताहै ॥ २९१ ॥

२९२ कुष्ठघ्नोरसः (द्वितीयः)

पारदं शरशाणं च तत्समञ्चामृतं क्षिपेत् ।
गन्धकं त्रिगुणं सूतात्तालकञ्च चतुर्गुणम् ॥
ताम्रं पञ्चगुणं प्रोक्तमेकीकृत्य विचूर्णयेत् ।
वल्लैकं भक्षयेद्विद्वान् वरामधुसमन्वितम् ॥
कर्षैकं वाकुचीवीजं घर्मपत्तनकन्तथा ।
टङ्कटङ्कप्रमाणन्तु सेवयेद्यत्नतो बुधः ॥
क्षाराम्लरहितं पथ्यं कुष्ठनाशाय कल्पयेत् ॥

र. र. कौ., कुष्ठाधिकारे ।

भाषा—शुद्धपारा५शाण, शुद्धबछनाग५शाण, शुद्धगन्धक१५शाण, शुद्धहरिताल२०शाण, ताम्रभस्म२५शाण इनसबको इकट्ठेकर रखछोड़े। यह कुष्ठघ्न रस तैयारहुआ । इसकी३रत्ती त्रिफला और मधुमें मिलाकर खायऔरऊपरसे १ तोलाबाकुचीकेबीज और४–४माशेपवांड़और जवासेकाचूर्ण दूधवग़ैरहके साथदेवे क्षारऔर अम्ल बिल्कुलनखाय २९२॥

२९३ कुष्ठदलनोरसः

हेमाख्यमाक्षिकयुतं बलितीक्ष्णमभ्रं,
साम्यं ततोद्विगुणशङ्करवीर्यकञ्च ।
सक्तुश्च दिग्लवमितं परिमर्दयेद्वै,
कुष्ठघ्नसेवनपरेण नरेण सेव्यम् ॥
मञ्जिष्ठादिकषायेण युक्तं कुष्ठनिबर्हणम् ।
वल्लद्वयमितं जग्ध्वा पथ्यं पूर्वोदितञ्चरेत् ॥

र. र. कौ., कुष्ठाधिकारे ।

भाषा—सुवर्णमाक्षिक, गन्धक, लोहभस्म, अभ्रकभस्म, येसब एकएकभाग, पारदभस्म ८ भाग सक्तुकविष अभावमें बछनाग १० भाग, इनसबको विडङ्ग, बाकुचीऔरसँभालू इनकेरसोंसे एकएकदिन मर्दनकर ६--६रत्तीकीगोलियें बनारक्खे । इसमेसे एकएकगोली मञ्जिष्ठादिकषायकेसाथ सुबहशामदेनेसे समस्तकुष्ठदूरहों। अम्लक्षारवग़ैरहसे परहेज़ रक्खे२९३

२९४ कुष्ठनाशनोरसः

सूतभस्म द्विनिष्कं स्याद्गन्धकं च चतुष्पलम् ।
सार्धं चतुष्पलं चित्रं चतुर्विंशत्पलं भवेत् ॥
वाकुचीवीजचूर्णस्य द्वादशांशं मरीचकम् ।
सर्वमेकत्र संयोज्य निष्कद्वितयसम्मितम् ॥
मधुना लेहयेत्प्रातः सर्वकुष्ठविनाशनः ॥

र. र. स., र. र. कौ., कुष्ठे ।

भाषा—पारदभस्म८माशे, गन्धक४पल, चित्रक४॥पल, वाकुचीकेबीज२४पल, मरिच१२पल, इनसबको कूटकपड़छानकर रखछोड़े । यह कुष्ठनाशन रस तैयारहुआ, इसकी ८ माशेकी मात्रा मधुकेसाथ सुबहशाम चटानेसे समस्तकुष्ठ नष्ट होवें २९४

२९५ कुष्ठनाशनोरसः

शुद्धसीसं समादाय खर्परोपरि निःक्षिपेत् ।
वह्निं चुल्यां समारोप्य ज्वालयेच्छनकैः शनैः
द्रुते नागे तदूर्ध्वञ्च तालचूर्णं प्रदापयेत् ।
किञ्चित्किञ्चिन्निघृष्याथ लोहदर्व्या भिषग्वरः
कज्जलाभं भवेद्भस्म तदुत्तार्य प्रदापयेत् ॥
गुञ्जाद्वयमितं जग्ध्वा दद्रुघ्नो रजनी तथा ॥

पाठ्गुडूचीत्रिनिम्बारग्वधानां तुल्यानि चूर्णयेत् ।
धात्रीरसगंधितामथ भोज्यं कुष्ठविनाशनम् ॥
र. र. कौ., कु॰ ।

भाषा—शुद्धपारेको [illegible] कूटकर [illegible] और २ [illegible] । [illegible] । [illegible] । [illegible], [illegible], [illegible] । [illegible] ॥ २९५ ॥

[illegible] । [illegible] । [illegible] । [illegible], [illegible] ॥ २९६ ॥

२९३ कुष्ठनिकृन्तनो रसः

शुद्धं सूतं विषं गन्धं तुल्यं ताम्रं नियोजयेत् ।
तुल्यं तीक्ष्णं मृतं लोहं मर्द्यं मर्द्यं दिनत्रयम् ॥
काकमाच्या देवदाल्या फलत्रिकाथरेण रक्तकम् ।
रुद्धाद्भूधरे पाच्यं त्रिदिनञ्च तुषाग्निना ॥
निष्काधं लेहयेत्क्षौद्रै रसः कुष्ठनिकृन्तनः ।
महानिम्बवाकुचीपथ्याविडङ्गं लाङ्गली तिलम् ॥
जीरकं भद्रीमूलं तुल्यं तुल्यगुडेन तु ।
भक्षयेदनुपानोऽयं हन्ति कुष्ठं विचर्चिकाम् ॥

र. चं., वै. चि., चि. क., र. रा. सुं., र. का., रसेन्द्र., [illegible] । [illegible] ।

टि॰—[illegible] । [illegible] । [illegible] ।

भाषा—शुद्धपारा, वच्छनाग, गन्धक, सोनामाखी, शिलाजतु, ताम्रभस्म, फौलादभस्म, साधारणलोहभस्म, मैनसिल समभागलेकर मकोय, वन्दाल, खेखसाकेरसोंसे एकएकरोजमर्दनकर सम्पुटकर भूध-

२९७ कुष्ठकेसरी रसः

पारदं गन्धकं शुद्धं पलद्वयमितं पृथक् ।
शुद्धनागं तथा वङ्गं प्रदत्तमथ गुरकम् ।
शुद्धविषमर्धेर्यं शुद्धं कान्तं पलैकम् ।
मर्दितं शुद्धलोहञ्च मारं तार्क्ष्यं पलैकम् ॥
एकीकृत्य च तत्सर्वं गन्धे पूर्वान्यं भावयेत् ।
त्रिफलापि पलं दद्यात् भावयेत् त्रिफलाम्भसा ॥
पुनश्च भृङ्गराजस्य राजवृक्षस्य भावना ।
बीजकस्य रसैः पश्चात्खदिरकाथमर्दनम् १२९४
महानिम्बस्य निम्बस्य क्वाथैरेवद्विभाव्यते ।
अर्कतोयुण्डदुग्धस्य भावनाः पञ्चपञ्च च १२९५
दातव्याः गोपयेन्मूषे क्षिप्त्वा स्थाप्यं पुटे महान्
देयः पश्चाद्गृहीतव्यं तप रूपेण सुप्रमम् १२९६
दीयते मापकेकं तच्चूर्णं चापि विचार्य च ।
पुनर्भास्करं दद्यादनुपानेन संयुतम् ॥१२९७॥
खदिरासनरोहीतक्वाथं कुर्यादनुपाचितम् ।
छागमूत्रेण संपक्वमनुपानं शुभावहम् १२९८॥
मण्डलानां प्रणाशाय पूर्वोक्तं लिप्यते तथा ।
मरिचाद्यं दिनं घर्मे स्नातव्यं तैलसेवनम् ॥
तथ्ये पथ्येऽपि वर्तेत शिवभक्तिपरायणः ।
उत्पथे गतपथ्यस्य भवेदुत्पादनं ध्रुवम् ॥१३००॥
श्वयथुः सर्वदेहस्य शीघ्रमेव विनश्यति ।
सप्तधातुगतं चापि साध्यासाध्यं तथैव च १३०१
वैद्यवृन्दैः परित्यक्तं त्यक्तं शास्त्रपरैरपि ।
तत्कुष्ठं पूर्वकर्मोत्थं शीघ्रमेतद्विनाशयेत् १३०२

कादिसे सातदिन, औरआकके दूध, सूरणकन्द-कुरैया, तुलसी, थूहरकादूधइनप्रत्येकसे ३—३दिन, मर्दनकर पोलीकौड़ियोंमेभरकर आकके दूधमेपिसे-हुएसुहागेसे इनकामुंहबन्दकर ६—७कपड़मिट्टीदीहुई-हंडीमे इनकोरखकर हंडीकामुंहभी बन्दकर गज-पुटकीआंचदे । स्वाङ्गशीतलहोनेपर निकालकर चूर्णकर इसकीवरावर पारेकीभस्ममिलाकर सातवार-सहिजनेकी जड़केकाढ़ेसेभावनादेकर चित्रकके काढ़ेसे इक्कीस, अदरखसे सात, भांगसेतीन औरजंभीरी, विजोरा, आंवले इनप्रत्येककी सातसातभावनाएंदे-कर सबकाचतुर्थांशसुहागा, शुद्धवछनाग और-मीरचमिलाकर लौंग,सोंठ,पीपल,हर्रे, जायफलयेप्रत्येक विषकेचतुर्थांशडालकर विजोरेकेरससेघोटकर कस्तू-रीकेद्रवकी १ भावनादेनेसे चिन्तामणि रस तैयार-होगा। इसमेंसे ६रत्ती ऋतु, देशवगैरहकी सानुकू-लताको देखकर तत्समयोचितअनुपानकेसाथदेनेसे यह तमामरोगोको दूरकरताहै ॥ १२२ ॥

१२३ चिन्तामणिरसः (पञ्चदशः)

रसाभ्रकृष्णाकृमिशत्रुगन्ध
नेपालदन्तीत्रिवृतामृतानाम् ।
कल्कोऽहिवल्लीवहुपत्रगर्भः
क्ष्मान्तर्गतश्चोर्ध्वपुटेन पक्वः ॥ ४६३ ॥
समुद्धृतश्चाथ निजाङ्गशीतः
सम्भावितो वज्ररसेन भूयः ।
स्विन्नस्तथैवार्द्ररसेन भिन्न-
श्चिन्तामणि र्नाम रसोऽभिरामः ॥४६४
ज्वरग्रहण्यल्परुचित्रिदोष-
दुर्नामशूलोदरविद्रधींश्च ।
वल्लार्धमात्रोऽपि कृतोनिहन्ति
रोगानुसारेण कृतानुपानः ॥ ४६५ ॥

र. (मा.) ज्वरे ।

भाषा—पारा,अभ्रकभस्म, पीपल, विडङ्ग,शुद्ध-गन्धक,जमालगोटा, दन्तीमूल,निशोत, बछनाग, ये-सबसमभागलेकर जंभीरीवगैरहके अम्लद्रवमेघोटकर गोलाबनाकर ६ अङ्गुलके गड्ढेमे पकेपानबिछाकर उनपरइसगोलेकोरख ऊपरवहुतसेपत्तेदेकर गड्ढेपर-सफेदअभ्रककाटुकड़ारख ऊपरढक्कनदेकर सन्धिव-न्दकरकुक्कुटपुटकीआंचदे । स्वाङ्गशीतलहोनेपर नि-कालकर जङ्गलीसूरणकेरससे अथवाथूहरकेदूधसेघोट-कर पूर्ववत्गोलाबनायस्वेदनकर स्वाङ्गशीतलहोनेपर निकालकर रखछोड़े। इसमेंसे ३—३रत्ती अदरखकेरस अथवातत्तद्रोगहरानुपानकेसाथदेनेसे ज्वर, ग्रहणी,अ-रुचि, सन्निपात, बवासीर, शूल, उदररोगऔरविद्रधि इनसबको यह नष्टकरताहै ॥ १२३ ॥

१२४ चिन्तामणिरसः (षोडशः)

रसं गन्धं मृतं ताम्रमभ्रकं लोहमेव च ।
जयपालं त्रिवृद्दन्ती तुम्बिनीबीजमेव च ४६६
व्योषं कनकबीजानि गिरिकर्णी तथा विषम् ।
एतानि समभागानि मर्दयेदतियत्नतः ॥४६७॥
मुण्डीकासार्द्रकाकिण्या विशालाशिग्रुभृङ्गकैः ।
नागवल्लीद्रवैरेषां भावना सप्तधा पृथक् ॥४६८
गुटिकां वल्लमात्राञ्च कारयेत्सुशुबुद्धिमान् ।
द्वात्रिंशन्मरिचै र्युक्तं दापयेदुष्णवारिणा ॥४६९
छादयेत्तं दृढं सम्यग्यावत्स्वेदोऽतिजायते ।
स्वेदादूर्ध्वं चरेत्पथ्यं जागरं च ततः परम्
रसश्चिन्तामणि र्नाम ज्वरं शीघ्रञ्च नाशयेत्४७०

र. मा., ज्वरे ।

भाषा—शुद्धपारा, गन्धक, ताम्र, अभ्रक, लोहभस्म, शुद्धजयपाल, निशोत, दन्तीमूल, तूम-डीकेबीज, त्रिकटु, धतूरेकेशुद्धबीज, अपराजिता, शुद्धवछनाग येसब समभागलेकर पारेगन्धककीनील वर्णकज्जलीकर सबचीजेंमिलाकर गोरखमुण्डी, कास, अदरख, भांग, इन्द्रायण, सहिजन, भंगरा, पान, इनप्रत्येकके रसोंकी सातसातभावनाएं देकर ३—३ रत्तीकी गोलियें बनाकररखछोड़े । इसकी १—१ गोली ३२ कालीमिर्चकेसाथ गरमपानीसेदेकर गरम कपड़ेओढादे । उससेअत्यन्तपसीनाहोकर बुखार

उत्तरजायगा, पर्सीनाहोनेकेबाद तुर्तही उचितपथ्य-लेकर सोजानेसे ज्वरबहुतशीघ्रउतरजाताहै ॥१२४॥

१२५ चिन्तामणिरसः (सप्तदशः)

अभ्रगन्धकसूतानां तोलैकैकं पृथक्पृथक् ।
गृहीत्वा विषतोलार्द्धं तोलार्द्धं तित्तिरीफलम् ॥
यावत्तच्छ्लक्ष्णतां याति द्रवैरम्लैर्विमर्दयेत् ।
विस्तारपरिणाहेन गर्तं कृत्वा षडङ्गुलम् ॥
फणिवल्लीदलान्यत्र गर्तायां प्रक्षिपेदथ ।
गर्तायाश्च ततो देयं पुटमारण्यकोत्पलैः ॥
स्वाङ्गशीतलमुद्धृत्य भृङ्गवेरैर्विमर्दयेत् ।
तोलार्धममृतं दत्त्वा तोलार्धं तित्तिरीफलम् ॥
स्थापयेत्खलितं खल्वे योजयेद्गुञ्जमात्रया ॥
भृङ्गवेराम्भसा युक्तं व्योषचित्रकसैन्धवैः ॥
सन्निपाते महावाते त्रिदोषे विषमज्वरे ।
अग्निमान्द्ये ग्रहण्याश्च तथा देयोऽतिसारिणे ॥
वाताधिक्ये यथा कुर्यादुदकं ढालयेत्सदा ।
एष योगवरः श्रीमान् प्राणिनां प्राणदायकः ॥
चिन्तामणिरिति ख्यातो रसः सर्वाङ्गसुन्दरः॥

र. शं., रससागर, रसालं., सर्वरोगे । र. सं., चि. क., र. प., र. (मा.) रससार सं., र. क. यो., अतिसारे ।

टि०—र. क. योगे ज्वरचिन्तामणीति नाम ज्वराधिकारेच। रसपद्धत्यां विषं द्विभागं नियोजितम्, नेपालबीजानि सङ्ख्यया विंशति निक्षिप्तानि, आर्द्रकरसेन तिस्रो भावनाश्च दत्ता इति-विशेषः। रसेन्द्रसारसङ्ग्रहे रसपद्धत्यां च ताम्रमधिकतया प्रक्षिप्तम्। रससारसङ्ग्रहे माणिक्यचन्द्रीयरसावतारे रसाभ्र-गन्धविषनेपालान् प्रथमसमान् नियोज्य पुटपाकानन्तरं विषदन्तीबीजे नैव नियोजिते, तत्र कश्चिद्विशेषं नोपलभामहे, अतस्तस्यात्रैवान्तर्भावः, पाकादुत्तरप्रक्षेपे तु वीर्योत्कटता स्पष्टमेव फलम् । भै. र., र. सु., र. क., रसायनसं., र. चि., र. ल., वृ. यो. त., र. शं., र. को., र. का., र. शि., र., एषु पुस्तकेषु 'सूतं गन्धकमभ्रकं समलवं सूतार्धभागं विषं तत्तुल्यं जयपालमम्लमृदितमि-त्यादिशार्दूलविक्रीडित-च्छन्दसि अयं योग उद्धृतः, तत्र तत्तुल्यं जयपालमित्यस्य स्थाने तत्र्यंशमिति ज्ञानाद्वा भ्रमाद्वा पाठः संवृत्तः, तदेवबीजं रसान्तरतायामुपलभ्यते । परं तत्र तत्तुल्यमित्येव पाठः समीचीनः बहुमन्थसम्वादात् । पुटपाकोत्तरं भागार्धं जयपालबीजममृतं सूतापेक्षया अर्धभागं पूर्वं नियोजितमासीत् अवशिष्टच भागार्धमत्र नियोजनीयमिति कवेरभिप्रायः, तत्रापि भागार्धशब्दस्य पूर्वनिक्षिप्तविषस्य विषभागादर्धभागं मत्वा ते सर्वे भ्रमगह्वरे पतिताः, नान्यत्किञ्चिद्बीजमुपलभामहे । अनुपाने च गुञ्जाश्यूषणसिन्धुचित्रकयुता इत्यत्र एकपदे आगमनाद्गुञ्जामप्यनुपानत्वेन मत्वा ते बभ्रमुः । परं तत्र गुञ्जा इति भक्षणमात्रात्वेन निहितास्ति नत्वनुपानत्वेन । विशेषे अनुपाने मरिचमधिकमस्ति, तदप्यकिञ्चित्करम् अनुपानानामनैकान्तिकत्वात् । अतः स योगः अत्रैव समाविशति इति सुधियो विभावयन्तु । अत्र पाठे रसकामधेनौ ज्वरभैरवेति नाम स्थापितम्, त्र्यूषणस्थाने यत्रकुत्र केवलं नागरमेव गृहीतं दृश्यते । रसराजशङ्करे शूलाधिकारे पठितः ।

भाषा—अभ्रकभस्म, शुद्धगन्धक, पारायेप्रत्येक १तोला,शुद्धबछनागऔरजमालगोटा आधाआधातोलालेकर पारेऔरगन्धककीनीलवर्णकज्जलीकर जंभीरीअथवा बिजौरेकेरससे १—२रोज़मर्दनकर गोलाबनाकर ज़िमीनमे ६अङ्गुलगहराचौड़ा औरगोलगड्ढाखोदकर उसमेपकेपानबिछाकर उनपर इसगोलेको रखकर पकेपानोंसे आच्छादितकर गड्ढेकेऊपर सफेद अभ्रकका ढक्कनदेकर अथवामिट्टीकासकोरासीधारखकर सन्धिबन्दकरदे, इसकेबाद २सेरजङ्गलीकण्डोंकी आंचदेवे । स्वाङ्गशीतलहोनेपर निकालकर पानोंसहित घोटकर इसमेआधाआधातोला शुद्धजमालगोटा औरबछनाग डालकर अदरखकेरससे १—२रोज़मर्दनकर १—१रत्तीकीगोलियेंबनाकर छायाशुष्ककर रखछोड़े । इनमेसे १—१गोली अदरखकेरसमे त्रिकटु, चित्रकऔरसेंधानमकडालकर इसकेसाथदेनेसे घोरसन्निपात, त्रिदोषविकार, विषमज्वर, अग्निमान्द्य, ग्रहणी, अतिसार, प्रबलवातप्रकोप येसब बहुतशीघ्र नष्टहोतेहैं । इसकेदेनेसे अगर अधिकदाहमालूमहोतो सिरपरठंढेपानीकीधारादेना, यह तत्तद्रोगहरानुपानकेसाथदेनेसे तमामरोगोंको दूरकरताहै । रसपद्धतिमे बछनाग २भाग डालागयाहै औरपुटपाकके बाद केवलबीसजमालगोटेकेबीजडालनेकोलिखेहैं इसलिये इसपाठमे केवलताम्रअधिक डालकर तैयारकरनेसे सबपाठोंकासारआजायगा । ताम्रके डालनेसे

गुणकीअधिकताछोड़कर किसीतरहकीखराबीनहीं है ॥ १२५ ॥

१२६ चिन्तामणिरसः १८ (ज्वरादिः)

विषगन्धकनेपालं दरदं ताम्रसूतकम् ।
मनःशिला मागधी च टङ्कणं कटुरोहिणी ॥
सर्वं जम्भाम्भसा मर्द्यं ताम्बूलीपत्रवेष्टितम् ।
गर्ते षडङ्गुले धृत्वा वालुकाद्यैः पिधापितम् ॥
कौक्कुटञ्च पुटं दद्यात्स्वाङ्गशीतं समुद्धरेत् ॥
गुञ्जाप्रमाणगुटिकां सेवयेदार्द्रकाम्भसा ॥४८०
ऐकाहिकं द्व्याहिकञ्च त्र्याहिकञ्च चतुर्थकम् ।
विषमज्वरदोषञ्च ज्वरान् सर्वान्निहन्ति च ।
चिन्तामणिरसो नाम ह्यनुपानविशेषतः ४८१

र. क. यो., ज्वरे ।

भाषा—शुद्धवछनाग, गन्धक, जमालगोटा, शिंगरिफ, पाराऔरमैनसिल, ताम्रभस्म, पीपल, भुनासुहागा, कुटकीयेसब समभागलेकर पारेगन्धककीनीलवर्णकज्जलीकर सबचीजोंकोमिलाकर जंभीरीकेरससेमर्दनकर गोलाबनाकर ६ अङ्गुलके गोलगड्ढेमे पकेपानबिछाकर उसमेइसगोलेको रखकर दूसरेपानोंसे अच्छीतरह ढककर गड्ढेपरअभ्रकका टुकड़ाधरके सन्धिबन्दकरदे। अथवा गड्ढेकोबालूसेभरदे औरऊपरकुक्कुटपुटदेवे । स्वाङ्गशीतलहोनेपर निकालकर पत्तेसहितअदरखकेरससेमर्दनकर १–१ रत्तीकीगोलियें बनाकररखछोड़े । इनमेसे १–१ गोली अदरखकेसाथदेनेसे ऐकाहिक, द्व्याहिक, त्र्याहिक औरचातुर्थिक इत्यादिसमस्तविषमज्वरोंको यह नष्टकरताहै । जहांजैसीयोग्यतादेखना वहांवैसा हीअनुपान बदलदेना ॥ १२६ ॥

१२७ चिन्तामणिरसः (ऊनविंशः)

सूतञ्च गन्धं द्विगुणं विमर्द्य
　कोरण्टनिम्बूत्थरसैर्दिनं तत् ।
चिञ्चात्वचःक्वाथजलेन चैकं
　दिनं च गोलं रविसम्पुटस्थम् ॥४८२
लिप्त्वा मृदा शुष्कमतीव कृत्वा
　सामुद्रयन्त्रेण पुटं ददीत ।
उद्धृत्य शीतं रसपादभागं
　प्रक्षिप्य गन्धं विपचेन्मनाक् च ॥४८३
विषञ्च दत्त्वा रसपादभागं
　लोहस्य पात्रे तु कृशानुतोयैः ।
रसस्तु चिन्तामणिरेष उक्तो
　वातारितैलेन समाक्षिकेण ॥ ४८४ ॥
वल्लेन मानं प्रददीत चाम्लं
　तैलञ्च शीतं परिवर्जयेच्च ।
आध्मानगुल्मौ च विबन्धशूले
　तूनीप्रतून्यौ विलयंप्रयान्ति ॥४८५॥

र. र. स., र. दी., र. को., शूले ।

भाषा—शुद्धपारा १ भाग, गन्धक २ भाग, इनकीनीलवर्ण कज्जलीकर पीयावासा, नीबू, इमलीकीछाल, इनकेस्वरसअथवाक्वाथोंसे एकएकरोज़ मर्दनकर गोलाबनाय इसगोलेकेप्रमाणकीतांबेकी डिब्बीमे रखकर ऊपरमिट्टीलपेटकर सुखाकर लवणयन्त्रमेबंदकर चारपहरकीआंचदेवे । स्वाङ्गशीतल होनेपर निकालकर पारेसेचतुर्थांश इसमे गन्धक डालकर घृताभ्यक्तलोहेकी कड़ाहीमेडालकरथोड़ी देरतकअग्निदेवे जिसमेकिइसकाद्रवहोजाय फिरउतारकरचित्रककेकाढ़ेसे १–२ दिन घुटवाकर सुखाकर रखछोड़े । यह चिन्तामणिरस तैयारहुआ इसमेसे ३–३ रत्ती मधुमिलेहुए एरण्डकेतैलकेसाथ अथवा तत्तद्रोगहरानुपानकेसाथ देनेसे यह आध्मान, गुल्म, विबन्ध, शूल, तूनी, प्रतूनीइत्यादिकव्याधियोंको नष्टकरताहै ॥ १२७ ॥

१२८ चिन्तामणिरसः (वृद्धः) (विंशः)

शुद्धं सूतं विषं गन्धं दरदं टङ्कणं शिवाम् ।
त्र्यूषणं सैन्धवं जातीफलाकंकरहाटकम् ॥
पारसीकयवानीं च जीरकञ्चाजमोदकम् ।
भृङ्गचञ्चगन्धाश्रीपुष्पंसमभागं विचूर्णयेत् ॥
भावनात्रितयं दद्याद्भृङ्गराजरसेन च ।

नागवल्ली रसेनैव तथार्द्रकरसैस्त्रिधा ॥४८८ ॥
ततः शुष्कं विधायाथ यथारोगं प्रयोजयेत् ।
सामं निरामं विज्ञाय दद्याद्गुञ्जाचतुष्टयम् ॥
महावातेऽपतन्त्रे च शून्यत्वे सर्वगात्रजे ।
सर्वज्वरहरः श्रेष्ठः सन्निपातांस्त्रयोदश ॥
हन्ति शीतं तथा स्वेदं श्वासञ्च प्रबलं कफम् ।
प्रलापश्चातिनिद्राश्च रोमहर्षारुची तथा ॥

र. सु. वातव्याध्यधिकारे ।

भाषा—शुद्धपारा, गन्धक, बछनागऔरशिंगरिफ, भुनासुहागा, हर्रे, त्रिकटु, सेंधानमक, जायफल, ताम्रभस्म, अकलकरा, खुरासानीअजवाइन, जीरा, अजमोद, काकड़ासींगी, असगन्ध, लौंग, येसब समभागलेकर पारेगन्धककीनीलवर्णकज्जलीकर सबकोकूटकपड़छानकर एकमेमिलाकर भंगरा, पान, अदरखइनकेरसोंसे क्रमसे ३–३भावनाएंदेकर सुखाकर रखछोड़े अथवा ४–४ रत्तीकी गोलियां बनारक्खे । इसमेसे ४ रत्तीअथवा १ गोली तत्तद्रोगहरानुपानकेसाथदेनेसे महावातव्याधि, अपतन्त्र, सर्वाङ्गशून्यता, १३प्रकारकेसन्निपात, अत्यन्त पसीना, श्वास, प्रबलकफ, प्रलाप, अतिनिद्रा, रोमहर्षऔरअरुचि इनको यह रस दूरकरताहै ॥१२८॥

१२९ चिन्तामणिरसः (एकविंशः)

रसगन्धाभ्रार्धविषं त्रिक्षारं पटुपञ्चकम् ।
द्वे जीरे त्र्यूषणश्चेति ताम्बूलैरार्द्रवारिणा ४९२
[illegible]

र. का., ग्रहण्यधिकारे ।

भाषा—शुद्धपारा, गन्धकऔरअभ्रकभस्म,सज्जीखार, जवाखार, सुहागा, पांचोंनमक (काच, सैंधव, सामुद्र, विडऔरसौवर्चल), दोनोंजीरे, त्रिकटुयेसब १–१ तोला, विष १॥ तो., लेकर पहिलेपारेगन्धककीनीलवर्णकज्जलीकर सबचीजें मिलाकर पान औरअदरख इनप्रत्येककेरसोंमे ३–३ बारभावनादेकर ६–६ रत्तीकी गोलियां बनाकररखछोड़े । इनमेसे एकएकगोलीतत्तद्रोगहरानुपानके साथ देनेसे यह जीर्णज्वर, ग्रहणी, मन्दाग्नि,श्वासऔरकास इनको दूरकरताहै ॥ १२९ ॥

१३० चिन्तामणिरसः (द्वाविंशः)

रसं गन्धं विषञ्चैव हरितालञ्च टङ्कणम् ।
त्रिकटु त्रिफला चैव प्रत्येकं कर्षसम्मितम् ॥
सर्वेषाञ्च समं ग्राह्यं दन्तीबीजं सुशोधितम् ।
खल्वे चैतानि निःक्षिप्य मर्दयेद्भृङ्गजै द्रवैः ॥
पुटं षष्टिमितं देयं वटीं कुर्याद्विचक्षणः ।
मुद्गप्रमाणवटिकाभक्षणाद्रेचनं भवेत् ॥ ४९६॥
आमवातरुजं हन्ति सन्धिवातञ्च निश्चितम् ।
ज्वरं पुरागमखिलं शूलमष्टविधञ्जयेत् ४९७॥

र. र. कौ., आमवाते ।

भाषा—शुद्धपारा, गन्धक, बछनाग, औरहरिताल, भुनासुहागा, त्रिकटु, त्रिफला ये प्रत्येक १–१ तोला, इनसबकीबराबर शुद्धजमालगोटालेकर पहिले पारेगन्धककीनीलवर्णकज्जलीकर सबचीजेंमिलाकर भंगरेकेरसकीसाठपुटेंदेकर मूंगबराबर गोलियें बनाकर रखछोड़े । इनमेसे योग्यतानुसार १–२ या ३ गोलियेंदेनेसे रेचनकराके आमवात, सन्धिवात, जीर्णज्वर, औरआठप्रकारकाशूल, इनको यह नष्टकरताहै ॥ १३० ॥

१३१ चिन्तामणिरसः (त्रयोविंशः)

सूतं गन्धकहेमताररसकं ताम्राभ्रकान्तायसं,
नागं वङ्गसुवर्णताप्यविमलावैक्रान्तवज्रं मृतम् ।
नीलं मौक्तिक विद्रुमं मरकतं माणिक्यगोमेदकं,
राजावर्तसुपुष्परागभिदुरं शङ्खं वराटाञ्जनम् ॥
तुत्थं तालशिलाशिलाजतु विषं कङ्कुष्ठनेपालकं,
श्यामाव्योषनिकुंभधूर्तगिरिकर्णीस्वाकुचीजैःसमं
भृङ्गाद्योद्भवनागवल्लिजरसैरेतैः पृथक् सप्तधा,
शुद्धः सिद्धरसेश्वरोऽहनिशुभे
सम्पूज्य धन्वन्तरिम् ॥ ४९९ ॥
देयो वल्लमितोऽथवायमरिचैर्द्वात्रिंशकैर्भृङ्गकैः,
स्वेदं सञ्जनयेत्प्रभावनिचयाद्दुःसन्निपाताञ्जयेत्।

पुंसामष्टविधज्वरौघशमनः सामं निरामं पृथग्,
द्वन्द्वं सर्वसमुद्भवं सुविषमं जीर्णं महायक्ष्मकम्॥
शारीरागममानसञ्च सहजं शापाभिचारोत्थितं
भूतप्रेतपिशाचराक्षससुरावेशज्ज्वरं नाशयेत् ।
रक्तस्थं गिरिसम्भवं सुविषमं स्यात्स्थावरं जङ्गमं,
चाखूत्थं व्रणजंज्वरञ्चसजयेदारोग्यचिन्तामणिः
वृद्धानां मदनोदयोदयकरः प्रौढाङ्गनासङ्गमे,
सद्यः प्रत्ययकारकोमम मतो,
राजन् सदा सेव्यताम् ॥ ५०१ ॥

र. सि., वाजीकरणे.

भाषा—शुद्धपाराऔरगन्धक, सुवर्ण, रजत, खपरिया, ताम्र, अभ्रक, कान्त, लोह, नाग, वङ्ग, सुवर्णमाक्षिक, रजतमाक्षिक, वैक्रान्त, हीरा, नीलम, मोती, प्रवाल, पन्ना, माणिक्य, गोमेद, राजावर्त (लाजवर्द), पुखराज, लसणियां, शंख, कौड़ी, तुत्थ, हरिताल, मैनसिल, येसब यथायोग्यशुद्ध अथवाभस्मकियेहुए, शुद्धशिलाजीत, बछनाग, कङ्कुष्ठ जमालगोटा, त्रिकटु, दन्तीमूल, निशोत, धतूरकेबीज, अपराजिता, कड़वीतूमड़ीकेबीज, येसबसममागलेकर रत्नोंकोगरमकरके सातसातबार गुलाबजलमे बुझावे फिरगुलाबजलहीमे घोटकर पिट्ठीबनाले । हीरेकोभी १०८ बार गुलाबजलमे बुझाकर फिरइसीमेघोटकर टिकड़ीबनाकर सम्पुटमेरख महागजपुटकीआंचदेवे । स्वाङ्गशीतलहोनेपर निकालकर कुमारीकेरसमेमर्दनकर गजपुटमेफूंके। ऐसेसात आंचदेनेसे इसकीउत्तमोत्तमभस्महोगी । इसकोभी रत्नोंकीपिट्ठीमेमिलादे फिरपारेऔरगन्धककी कज्जलीकरतमामचीजोंको इसमे मिलाकर भांगराऔरनागरबेलके रसोंसे सातसातभावनाएंदेकर ३–३ रत्तीकी गोलियें बनाकररखछोड़े । इनमेसे १ गोली धन्वन्तरिभगवानकीपूजाकरके ३२ कालीमिर्चभंगरेकेरसमेडालकरउसकेसाथ अथवा पानीकेसाथखिलावे । इसके प्रभावसे पसीनाहोकर मनुष्यके समस्तसन्निपात, आठप्रकारकाज्वर, साम अथवानिराम, द्वन्द्वज, त्रिदोषज, विषम, जीर्ण, राजयक्ष्मज, शारीरिक, मानसिक, सहज, शापाभिभूत, कृत्याजनित, भूत, प्रेत, पिशाच, राक्षस, देवावेश, रक्तस्थ, पहाड़की तलहटीमेहोनेवाला, (मलेरिया) विषम, स्थावर, जङ्गम चूहेकेविषसेहोनेवाला, अभिघातज इनसबज्वरोंको यह तत्कालदूरकरताहै औरवुड्ढेको प्रौढाङ्गनाओंके सङ्गकरनेमे समर्थकरताहै यह बहुतही चमत्कारिक रसहै ॥ १३१ ॥

१३२ चिन्तामणिरसः (चतुर्विंशः)

रसं गन्धकं ब्रह्मवृक्षस्य बीजं
समं मर्दयेदम्लनीरेण यामम् ।
क्षिपेत्सम्पुटे ताम्रजे सूततुल्ये
मृदा वेष्टयेत्सम्पुटं तं क्षिपेत ॥५०२॥
निदाघे खरे पञ्चरात्रं ततस्तं
धमेट्टङ्कणेनाज्ययुक्तं प्रयत्नात् ।
ततो जायते गोलकः कृष्णवर्णः
सुतप्तं क्षिपेद्वत्सनाभस्य नीरे ॥५०३॥
प्रतप्तं तथैवाजपित्तेऽथ चिन्ता-
मणिः सूतराजो भवेत्सिद्ध एषः ।
खरे सन्निपातज्वरे वातरोगे
महाश्लेष्मरोगे च गुञ्जाप्रमाणम् ५०४
मरीचार्धसिन्धूत्थवह्निप्रयुक्तं
ददेत्किं बहूक्तेन यस्यातुरस्य ।
प्रयोगं प्रयुञ्ज्यात्स एतेन युक्तो
निहन्ति द्रुतं सर्वरूपां रुजञ्च ॥५०५॥

र. दी., सर्वरोगे.

भाषा—शुद्धपारा, गन्धक, पलाशकेबीज, तीनोंसमभागलेकर अम्लद्रवसे १ पहर मर्दनकर पारेकेबराबरके ताम्रसम्पुटमे बन्दकर कपड़मिट्टीसेबन्दकर कड़ेधूपमे ५ दिनतकरखकर बड़ेसम्पुटमे धर ऊपरनीचेसुहागाऔरघीदेकर धमनकरावेतो इस गोलेकारङ्ग कालाहोजायगा । फिरउसकोगरमकरके बछनागकेकाढ़ेमे सातबार औरबकरीकेपित्तमे सातबार बुझानेसे यह चिन्तामणि रस तैयारहोगा । इस-

मेसे १–१ रत्तीकीमात्रालेकर मरिचकाचूर्ण १भाग, सेंधाऔरचित्रकआधाआधाभागलेकर कूटकपड़छानकर ३ माशे इसचूर्णकेसाथ देनेसे घोरावस्थामे प्राप्त जोसन्निपातहै उसको यह जल्दीनिवृत्तकरदेताहै । और रोगोंकीतो चर्चाहीक्याहै ॥ १३२ ॥

१३३ चिन्तामणिरसः (ज्वरादिः) २५

अभ्रकामृतनेपालं गन्धपारदसंयुतम् ।
नागवल्लीदलैः पिष्ट्वा कूष्माण्डान्तर्गतं पचेत् ॥
नानाव्याधिहरश्चायमनुपानविशेषतः ।
चिन्तामणिरितिख्यातो योगराजो महीतले ॥

र. क. यो., सर्वरोगे ।

भाषा—अभ्रकभस्म, शुद्धवछनाग, जमालगोटा गन्धकऔरपारा येसबसमभागलेकर पहिलेपारेगन्धककीनीलवर्णकज्जलीकर सबचीजेंमिलाकर पानके रसमेपीसकर गोलाबनाकर कूष्माण्डके अन्दररख कपड़मिट्टीकर साधारणपुटमेपकावे। स्वाङ्गशीतलहोनेकेबाद निकालकररखछोड़े । इसमेसे ३ रत्तीकी मात्रा तत्तद्रोगहरानुपानकेसाथदेनेसे यह समस्तरोगोंको दूरकरताहै ॥ १३३ ॥

१३४ चिन्तामणिरसः (षड्विंशः)

वत्सनाभं तुवरिकां मरिचं समभागिकम् ।
वत्सनाभाद्द्विगुणितं चुल्लिकालवणं क्षिपेत् ॥
तत्समौ रसगन्धौ च पिष्ट्वा सर्वं समाहरेत् ।
वल्लमात्रः प्रदातव्यश्चिन्तामणिरसोत्तमः ५०९
अजीर्णेषु त्रिदोषेषु प्रमेहगुल्मयोरपि ।
हृद्रोगे वातरोगे च योगोऽयं सिद्ध भाषितः ॥

र. सि., अजीर्णे.

भाषा—शुद्धवछनाग, फिटकड़ीऔरमरिच समभाग वछनागसेदूना नौसादर, पाराऔरगन्धक लेकर पहिलेपारेगन्धककी नीलवर्णकज्जलीकर सब चीजेंइकट्ठीमिलाकर रखछोड़े। इसमेसे ३–३ रत्ती तत्तद्रोगहरानुपानकेसाथ देनेसे अजीर्ण, त्रिदोष, प्रमेह, गुल्म, हृद्रोग, वातरोग, येसब नष्टहोतेहैं ॥

१३५ चिन्तामणिरसः (सिद्धाद्यः)२७

सूतं गन्धकटङ्कणं समरिचं शुण्ठी विषं पिप्पली,
स्वर्जीक्षारफलान्वितश्च लवणं पञ्चाभ्रकं जीरकम्
यावक्षारसमं समांशकमिदं खल्वे शनैर्मर्दयेत्,
स्यान्निम्बूकभुजङ्गमार्द्रकरसैः
सिद्धाख्यचिन्तामणिः ॥ ५११ ॥

र. को., ज्वराधिकारे.

भाषा—शुद्धपारा, गन्धक, सुनासुहागा, त्रिकटु शुद्धवछनाग, सज्जीखार, त्रिफला, पांचोनमक, अभ्रकभस्म, जीरा, यवक्षार येसबसमभागलेकर पारेगन्धककीनीलवर्णकज्जलीकर सबचीजेंमिलाकर नीबू, पान, अदरख, इनसबकीएकएकभावनादेकर रखछोड़े इसमेसे २–२ रत्तीकीमात्रा तत्तद्रोगहरानुपानकेसाथदेनेसे तत्तद्रोगोंको यह दूरकरताहै ॥ १३५ ॥

१३६ चिन्तामणिवटी (प्रथमा)

लवङ्गं चित्रकं शुण्ठी जैपालश्च समंसमम् ।
टङ्कणश्च प्रदातव्यं वृद्धदारु च कार्षिकम् ॥
सूतश्च गन्धगरलं मरीचं मेलयेत्समम् ।
दन्तीद्रवैः प्रकर्तव्या भावनाथ चतुर्दश ॥
वृद्धदारोथ दातव्यं भावनासप्तकन्तथा ।
निम्बूनीरैः प्रकर्तव्यं भावनात्रितयं तथा ॥
माषमात्रा प्रकर्तव्या वटिका ज्वरनाशिनी ।
वटीत्रयञ्च पूर्वाह्ने शीतं तोयं पिबेदनु ॥
जीर्णज्वरप्रशमनी पथ्यादेव नियच्छति ५१५

र. का., ज्वराधिकारे ।

भाषा—लौंग, चित्रक, सोंठ, शुद्धजमालगोटा, सुनासुहागा, विधारा, शुद्धपारा, गन्धक, बछनाग औरमरिच येसब १–१तोलालेकर पारेगन्धककी नीलवर्णकज्जलीकर दन्तीकेस्वरसकी १४, विधारेकी ७, नीबूकेरसकी ३भावनाएंदेकर १–१माशेकीगोलियें बनाकररखछोड़े । इनमेसे प्रातःकाल ३ गोली या ५गोली ठंढेपानीकेसाथदेनेसे जीर्णज्वर दूरहोताहै ॥ १३६ ॥

१३७ चिन्तामणिवटी (द्वितीया)

रसं गन्धं विषं तालं टङ्कणश्च हिङ्गिम्बिका ।

हिङ्गुलं जयपालश्च त्रिकटु त्रिफला तथा ॥
आकल्लमहिफेनश्च कालीयश्च वृहद्वला ।
ज्योतिष्मती लवङ्गैले पत्रं नागेन्दुकं मदः ॥
सर्वंश्चूर्णं भृङ्गरसैर्मर्दयेदेकविंशतिम् ।
चतुर्दशाथवा सप्त दिनानि त्रीणि वा भिषक् ॥
इयं चिन्तामणिवटी रक्तिका सर्वरोगजित्
हरेद्वातज्वरं धूर्तबीजैः कन्यारसैरथ ॥५१९॥
पित्तज्वरञ्च ताम्बूलीपत्रोत्थैः शर्करायुतैः ।
विषेण वा सन्निपातं द्रोणपुष्प्या च जीर्णकम् ॥
सर्वज्वरान् खण्डजीरसंयुता गुटिका जयेत् ।
तृतीयकं कुष्ठयुता हरत्येव न संशयः ॥
एवं तत्तत्क्रमकेण तत्तद्रोगहरी भवेत् ॥५२१

र. का., सर्वरोगे ।

भाषा—शुद्धपारा, गन्धक, बछनागऔरहरिताल, भुनासुहागा, दन्तीमूल, शिंगरिफ, शुद्धजमालगोटा, त्रिकटु, त्रिफला, अकलकरा, अफीम, अगर, कांगसी, मालकांगनी, लौंग, इलायची, पत्रज, नागकेसर, शुद्धकपूर, कस्तूरी, येसब समभागलेकर पारेगन्धककी नीलवर्णकज्जलीकर सबचीजें इकट्ठीकर भंगरेकेरससे २० अथवा १४ अथवा ७ यातीन भावनाएं देकर एकएकरत्तीकीगोलियेंबनाकररखछोड़े। इनमेंसे १—१गोलीधतूरेकेबीजोंकेसाथ अथवा घीकुंआंरकेरसकेसाथ देनेसे वातज्वरको । पानकेरसमे शकरमिलाकर उसकेसाथदेनेसे पित्तज्वरको । मरिचकेसाथदेनेसे कफज्वरको, सोंठकेसाथशीतज्वरको, आंवलेकेरसकेसाथ अथवात्रिकटुऔरत्रिफलाकेसाथदेनेसे दाहज्वरको । बछनागकेसाथदेनेसेसन्निपातको, गूमाकेसाथदेनेसे जीर्णज्वरको, खांडऔरजीरेकेसाथदेनेसे तमामज्वरोंको, कुठकेसाथतृतीयकको । इसीप्रकार तत्तद्रोगहरानुपानकेसाथदेनेसे सभीरोगोंको नष्टकरतीहै ॥ १३७ ॥

१३८ चूडामणिरसः (प्रथमः)

मृतं सूतं प्रवालञ्च स्वर्णं तारञ्च वङ्गकम् ।
शुल्वं मुक्ता तीक्ष्णमभ्रं सर्वमेकत्र योजयेत् ॥
पिष्ट्वा जलेन वटिका कार्या वल्लप्रमाणतः ।
धातुस्थं सन्निपातोत्थं ज्वरं विषमसम्भवम् ॥
कामशोकसमुद्भूतं त्रिदोपजनितं तथा ।
कासं श्वासञ्च विविधं शूलं सर्वाङ्गसम्भवम् ॥
शिरोरोगं कर्णशूलं दन्तशूलं गलग्रहम् ।
वातपित्तसमुद्भूतं ग्रहणीं सर्वसम्भवाम् ॥
आमवातं कटीशूलमग्निमान्द्यं विसूचिकाम् ।
अर्शांसि कामलां मेहं मूत्रकृच्छ्रादिकञ्च यत् ॥
तत्सर्वं नाशयत्याशु विष्णुचक्रमिवासुरान् ।
चूडामणिरसो ह्येष शिवेन परिकीर्तितः ५२७

र. सं., र. चं., ज्वराधिकारे ।

भाषा—पारद, प्रवाल, सुवर्ण, रजत, वङ्ग, तांबा, मोती, लोहा, अभ्रक, इनसबकीभस्में एकएकतोलालेकर सबइकट्ठेकर पानीकेसाथ अथवा पानवगैरहकेरससे १-२ रोज़घोटकर ३—३ रत्तीकी गोलियें बनाकररखछोड़े । इसकी १—१ गोली तत्तद्रोगहरानुपानकेसाथदेनेसे धातुस्थ, सन्निपातज, विषम, कामशोकज, ज्वर, कास, श्वास,--नानाप्रकारकेशूल, शिरोरोग, कर्णरोग, दन्तशूल, गलग्रह, वातपित्तजनितशूल, सबप्रकारकी सङ्ग्रहणी, आमवात, कटिशूल, अग्निमान्द्य, विसूचिका, बवासीर, कामला, प्रमेह, मूत्रकृच्छ्रप्रभृति समस्तरोग, इनसबको यह बहुतशीघ्रनष्टकरताहै ॥ १३८ ॥

१३९ चूडामणिरसः (द्वितीयः)

द्विनिष्कं रससिन्दूरं तदर्धं हेम जारितम् ।
निष्कद्वयं गन्धकञ्च मर्दयेच्चित्रकद्रवैः ॥५२८
कुमारिकाद्रवैः यामं छागीदुग्धैस्त्रियामकम् ।
मुक्ताविद्रुमवङ्गानां निष्कंनिष्कं विमिश्रयेत् ॥
गोलकं पूरयेद्भाण्डे रुद्ध्वा गजपुटे पचेत् ।
स्वाङ्गशीतं विचूर्ण्याथ भक्षयेद्रक्तिकाद्वयम् ॥
मधुना क्षयरोगघ्नं वातपित्तसमुद्भवम् ।
अजाघृतञ्चानु पिबेच्छर्करामधुसंयुतम् ॥५३१

भै. र., यक्ष्मणि ।

भाषा—रससिन्दूर २ टंक, सुवर्णभस्म १ टंक,

गन्धक २ टंक, सबको चित्रकऔरघीकुंआरकेरससे १—१ पहरमर्दनकर वकरीकेदूधसे ३ पहरतक मर्दनकरें फिर मोती, प्रवालऔरबङ्ग इनकीभस्में १—१ टंकमिलाकर गोलीबनाय शरावसम्पुटमे बन्दकर गजपुटकीआंचदे । स्वाङ्गशीतलहोनेपरनिकालकर इसमेसे २ रत्ती मधुकेसाथदेनेसें वातपित्तसे होनेवाले क्षयरोगको दूरकरताहे । ऊपरसे घीऔरशक्कर डालाहुआबकरीकादूधपिलाना चाहिये ॥ १३९ ॥

१४० चूडामणिरसः (बृहन्) (तृतीयः)

कस्तूरिकाविद्रुमरौप्यलोहं
तालं हिरण्यं रसभस्म दद्यात् ।
सुवर्णसिन्दूरलवङ्गमुक्ता
चोचं घनं माक्षिकराजपट्टम् ॥५३२॥
गोक्षूरजातीफलजातिकोषं
मरीचकर्पूरकतुत्थकञ्च ।
प्रगृह्य सर्वं हि समं प्रयत्ना-
दथाश्वगन्धां द्विगुणां हि वैद्यः ५३३

वक्ष्यमाणौषधै भाव्यं प्रत्येकं मुनिसङ्ख्यया ।
निर्गुण्डीफञ्जिकावासारविमूलत्रिकण्टकैः ५३४
तद्वीर्यं कथयिष्यामि वातिकं पैत्तिकं ज्वरम् ।
कफोद्भवं त्रिदोषोत्थं सर्वोपद्रवसंयुतम् ॥
सन्ततं सततं हन्ति तृतीयकचतुर्थकौ ॥
ऐकाहिकं द्व्याहिकञ्च विषमं भूतसम्भवम् ।
नाशयेदचिरादेव वृक्षमिन्द्राशनि यथा ।
चूडामणिरसो ह्येष शिवेन परिभाषितः ५३७

र. सं., ज्वराधिकारे ।

टि०—रसेन्द्रसारसंग्रहे अस्मादग्रे बृहज्ज्वरचूडामणिरिति नाम्ना पाठोऽस्ति तत्र केवलो मरीचाभावः । तत्स्थाने तालमूली नियोजिता । खल्वे तु चूर्णमादाय इति वाक्येन अश्वगन्धां परामृश्य स एव योगो निष्पादितश्चेत्तर्हि नास्ति तत्र रसान्तरता । यदि च खल्वे तु इति तु शब्दः केवलः पादपूर्त्यर्थः न तेनाश्वगन्धापरामर्शः क्रियते । तदा भवतु नाम रसान्तरमितिदिक् ।

भाषा—कस्तूरी, प्रवाल, रजत, लोह, हरिताल सुवर्ण, पारा, इनकीभस्में, स्वर्णसिन्दूर, लौंग, मोती, तज, अभ्रक, माक्षिक, लाजवर्द इनतीनोंकीभस्में, गोखरू, जायफल, जावित्री, मरिच, शुद्धकपूर, तुत्थ, भस्म येसबसमभागलेकर सबकोइकट्ठेखरलकर इनसबसे दूनाअसगन्धकाचूर्णमिलाकर संभालू, फांग, अडूसा, आककीजड़, गोखरू इनप्रत्येककीसातसात भावनाएं देकर १—१ माशेकीगोलियें बनाकररखछोड़े, इनमेंसे १—१ गोली तत्तद्रोगहरानुपानके साथ खानेसे वातिक, पैत्तिक, श्लैष्मिक, सन्तत, सतत, तृतीयक, चातुर्थिक, ऐकाहिक, द्व्याहिक, विषम, भूतज, इनसबज्वरोंको इसतरहनष्टकरताहै जैसे बिजली दरख्तकोनष्टकरतीहै ॥ १४० ॥

१४१ चूडामणिरसः (चतुर्थः)

रसस्य पञ्च भागाः स्यु र्गन्धकस्य तथैव च ।
सुवर्णताम्रलोहानां तारं वङ्गञ्च सीसकम्५३८॥
वैक्रान्तमाक्षिकशिलानीलाञ्जनकतुत्थकम् ।
रसकं मौक्तिकं श्चैकमानकं संहरेद्भिषक् ५३९
प्रत्येकं वज्रिदुग्धेन भावनाः सप्त दापयेत् ।
टङ्कणेन तथा पिष्ट्वा रविदुग्धेन माक्षिकम् ॥
भावयित्वा तथा सप्त दापयेद्व्रजमृत्तिकाः ।
कूर्पीं छादय यत्नेन ततस्तां विनिरोधयेत् ॥
लावणे सैकते वापि ततो गजपुटं ददेत् ।
स्वाङ्गशीतलमुद्धृत्य दापयेत्खल्वमध्यतः ५४२॥
ततस्तन्मर्दयेत्खल्वे सुश्लक्ष्णं कज्जलप्रभम् ।
गुञ्जाचतुष्टयं चास्य भक्षितञ्च यथाविधि ॥
पाण्डुरोगं रक्तपित्तं वासया मधुना सह ।
कपिकच्छुकचूर्णेन ग्रहण्याञ्च तथैव च ५४४॥
अर्कमूलरसेनामचिरज्ज्वरिणे तथा ।
अतिसारेषु सर्वेषु दुग्धिकामधुना सह ५४५॥
मधुना रुबुतैलेन शूलिने गुल्मिने तथा ।
वज्रीदुग्धेन दग्ध्वाच अग्निमान्द्येषु योजयेत् ॥
कपित्थमूलकल्केन सघृतेन नियोजयेत् ।
वीर्यवृद्धौ तथाश्वानां नागानां तु नृणां तथा॥
एष पानानुपानाद्यैः सद्यः प्रत्ययकारकः ।

रसश्चूडामणि दिंव्यो सेव्यते च नृभिः सदा ॥
र. शं., पाण्डुरोगे ।

भाषा—शुद्धपाराऔरगन्धक ५–५भाग, सुवर्ण, ताम्र, लोह, रजत, वङ्ग, नाग, वैक्रान्त, सोनामाखी, मैनसिल, नीलाञ्जन, तुत्थ, खपरिया, मोती, इनप्रत्येककीभस्में १–१तोलालेकर पारेगन्धककीनीलवर्णकज्जलीकर सबचीजें इकट्ठीमिलाकर थूहरकेदूधकी-७, सुहागेकेपानीकीसात, आककेदूधमे सोनामाखी-पीसकर इससेसातभावनाएंदेकर सुखाकर ६–७कपड़मिट्टीकीहुई शीशीमेभरकर डाटलगाकर अच्छीतरहसेबन्दकर लवणयन्त्र अथवावालुकायन्त्रमे ४ पहरपकाकर फिरउक्तचीजोंसेमर्दनकर गजपुटकीआंचदेवे। स्वाङ्गशीतलहोनेपरनिकालकर बहुतबारीकपीस ४ रत्तीकीमात्रा अडूसेकेरसमेमधुमिलाकर इसकेसाथदेनेसे पाण्डुरोगऔर रक्तपित्तको नष्टकरताहै। सङ्ग्रहणीमे केवांचकेबीजोंकेचूर्णकेसाथदेना, आकड़ेकीजड़केरससे जीर्णज्वरीकोदेना। समस्त अतिसारोंमे छोटीदूधीऔरमधुकेसाथदेना। शूलकेलिये मधुमिलेहुए ऐरण्डतैलकेसाथ, गुल्ममेथूहरकेदूधकेसाथ अथवा थूहरकीराखकेसाथ, समस्तअग्निमान्द्योंमे कपित्थमूलकेकल्कमे घृतमिलाकर उसकेसाथदेना। वीर्यवृद्धिकेलिये घोड़ोंको, हाथियोंको तथाराजाओंको उचितानुपानके साथदेना ॥ १४१ ॥

१४२ चैतन्यभैरवोरसः (प्रथमः)

सूतं गन्धं शिलां तालं सम्मर्द्य निम्बुजै र्द्रवैः ।
लिप्त्वा तन्वर्कपत्राणि यन्त्रे भस्माभिधे क्षिपेत् ॥
यामानष्टौ ददेताग्निं स्वाङ्गशीतं समुद्धरेत् ।
विशोषणं चतुर्थांशं दत्त्वा वल्लमिता गुटी ५५०
देवदालीरसैः वेष्ट्या रसश्चैतन्यभैरवः ।
दत्ताद्रकरसैः सर्वसन्निपातविघातकृत् ॥५५१॥
भूमौ गतं विसंज्ञश्च शीतार्तं तन्द्रितं नरम् ।
तत्क्षणाद्बोधयेद्दाहे कुर्याच्छीतोपचारकान् ॥
कोलमायूरमहिषमत्स्यच्छागसमुद्भवैः ।
मायुभिर्भावितश्चापि देयश्चैतन्यभैरवः ॥५५२
र. सं. क., र. को., रसायनसं., र. का., ज्वराधिकारे

भाषा—शुद्धपारा, गन्धक, मैनसिल, औरहरिताल येसबसमभाग लेकर सबकीकज्जलीकर नीबूकेरसमे १–२ रोज़मर्दनकर इनसबकी बराबर बहुबारीकताम्रेके पत्रोंपर लेपकर ६–७ कपड़मिट्टीदीहुईहंडीमेरखकर ऊपरएकशरावसेढककर सन्धिकेचूनाऔरगुड़से बन्दकर ऊपरसे कपड़ेसेछानीहुईएकदमसफेदराखभरकरदबादे औरहंडीपर शरावदेकर ३–४ कपड़मिट्टीकरके सुखाकरआठपहरकीअग्निदेवेस्वाङ्गशीतलहोनेपर धीरजसे राखकोनिकालकर रसकोनिकालले औरचतुर्थांशकालीमिर्चोंका चूर्णमिलाकर वंदालकेरससेघोटकर ३–३ रत्तीकी गोलियें बनाकररखछोड़े। इनमेसे १–१ गोली अदरखकेरससेदेनेसे सबप्रकारके सान्निपात, बेहोशी, अत्यन्तशैत्य तन्द्राइनसबको यह बहुतजल्दीनष्टकरताहै। दाहमालूमपड़ेतो शीतोपचारकरनाचाहिये, बराह, मोर, भैंसा, मछलीऔरबकराइनकेपित्तोंसे इनकोभावितकरनेपरभी इसकानामचैतन्यभैरवहै उसहालतमे इसकावीर्यबहुतउग्रहोजायगा ॥ १४२ ॥

१४३ चैतन्यभैरवो रसः (द्वितीयः)

विषार्कदरदं फेनं कृष्णां पञ्चकपित्तयुक् ।
राजिकामात्रतोदद्याद्रसश्चैतन्यभैरवः ॥५५४॥
सन्निपातान्निहन्त्याशु घोररूपाननेकशः ।
रसतापे समुत्पन्ने कुर्याच्छीतोपचारकम् ५५५॥
र. का., सन्निपाते ।

भाषा—शुद्धवछनाग, ताम्रभस्म, शिंगरफ, अफीम, पीपल, येसबसमभागलेकर बारीकचूर्णकर पांचपित्तोंसे भावनादेकर बड़ीराईकेबराबर गोलियें बनाकर रखछोड़े। इनमेसे १–१ गोली समयोचितानुपानकेसाथदेनेसे यह घोररूपनानाप्रकारके ज्वरोंको नष्टकरताहै। इसकेदेनेसे अगरदाह उत्पन्न हो तो शीतोपचारकरना ॥ १४३ ॥

१४४ चैतन्योदयोरसः

हेमाभ्रं मौक्तिकं सूतं गन्धकं जतुकायसी।
तुगाक्षीरं शशाङ्कश्च भावयित्वा वराम्भसा॥
रक्तिमाना वटीः कृत्वा च्छायायां परिशोषयेत्
शतावर्यम्भसा शान्त्यै तत्त्वोन्मादस्य पाययेत्॥
शतधौतघृताभ्यङ्गोऽसमे च मधुसर्पिषी।
आज्यं सलिलमिश्रञ्च ब्रह्ममोहे परौषधम्५५८
कदाचित्ताडनाद्यैश्च ब्रह्ममोहः प्रशाम्यति।
गदे त्वप्रकृते तस्मिन् प्रहार एव भेषजम्॥
अपस्मारहरं यच्च वातव्याधिहरं तथा।
घृततैलादिकं सर्वं ब्रह्ममोहे प्रशस्यते॥५६०॥
धारोष्णं गोपयः शस्तं शालयश्च पुरातनाः।
यवमुद्गतिलाश्चापि निखिलञ्चानुलोमनम्५६१॥
परिहासः प्रियैः सार्धं प्रियाभिश्च सहासनम्॥
इत्येतानि हितान्यत्र विपरीतानि शर्मणे ५६२

आ. वि., तत्त्वोन्मादे।

भाषा—सुवर्ण, अभ्रक, मोती इनकीभस्में, शुद्धपाराऔरगन्धक, शिलाजीत, लोहभस्म, वंशलोचन, कपूरयेसबसमभागलेकर पारेगन्धककी नीलवर्णकज्जलीकर सबचीजोंकोमिलाकर त्रिफलाकेक्वाथसे ३ रोज़मर्दनकर २ अथवा ३ रत्तीकी गोलियेंबनाकर छायामेंसुखाकर रखछोड़े। इनमेंसे १–१ गोली शतावरीकेस्वरससे देनेसे अदृढ़वैराग्य (जो किपुत्रकलत्रवग़ैरहकेमरनेसे अथवा भारीनुकसानहोनेसे हुआहो) नष्टहोताहै। इसमे शतधौतघृतका अभ्यङ्गकरना औरविषमप्रमाणमे मधुऔरघीपिलाना अथवागरमपानीमे घीमिलाकर पिलाना अदृढ़वैराग्यका परमौषधहै। कभी २ मारनेसेभी अदृढ़वैराग्य नष्टहोजाताहै औरबनावटीवैराग्यकातो डंडेबाजी परमौषधहै। अपस्मार औरवातव्याधिको नष्टकरनेवाली जोघृततैलादिकदवाएंहैं वेसब अदृढ़वैराग्यको शान्तकरतीहैं इसमेपथ्य धारोष्णदूध, पुरानेचावल, जव, मूंग, तिल औरअनुलोमन तमामचीजें, प्रियमित्रोंकेसाथहंसी, प्रियस्त्रियोंकेसाथ बैठना येसब इनकोशान्तकरनेवालीहैं इनसे विपरीतसब बढ़ानेवालीहैं॥ १४४॥

१४५ चोडसिद्धोरसः (पीयूषसुन्दरः)

द्वौ भागौ दरदस्य टङ्कणकणाशुण्ठीमरीचैरपि,
स्याद्भागस्तु समस्ततोऽपि तुलितः
स्यात्तित्तिरीमज्जतः।
सम्मर्द्य द्विदिनं दद्यं मृदुतरं श्रीचोडसिद्धं रसं,
दद्यात्तन्तु नवज्वरे च मतिमान्
दुःसन्निपाते भिषक्॥ ५६३॥

र. क. यो., ज्वरे

भाषा—शुद्धशिंगरफ २भाग, भुनासुहागा, पीपल, सोंठ, मरिच, येसब १–१भाग, इनसबकीबराबर शुद्धजमालगोटालेकर पानी वग़ैरहमेपीसकर एकएकरत्तीकीगोलियें बनाकररखछोड़े। इनमेसे एकएकगोली नवज्वरऔरखराबसन्निपातमेदेनेसे यह तत्क्षणउनको नष्टकरताहै॥ १४५॥

१४६ चोपचीनीपाकः

चोपचीनीं दशपलां गोदुग्धे चाढके पचेत्।
दुग्धे जीर्णे क्षिपेत्तत्र सिताकर्षशतद्वयम्॥
एलालवङ्गकर्पूरं चातुर्जातं कटुत्रयम्।
काश्मरी जातिपत्री च मालतीपुष्पमर्कटी॥
काकोली मृगनाभिश्च शृङ्गाटं वंशजं तथा।
मांसी तेजस्विनी चैव जाती नीलोत्पलन्तथा॥
विदारी मुसलीकन्दं कङ्कोलञ्च शतावरी।
एतानि शुक्तिमात्राणि सूतं ताम्राभ्रकन्तथा॥
द्विकर्षं मोदकं कुर्यादेकैकं भक्षयेन्नरः।
वातव्याधिषु सर्वेषु आमवातेऽतिदारुणे॥
अपस्मारे तथोन्मादे पक्षाघातेऽपतानके।
शिरोरोगेषु सर्वेषु सन्धिपीडाकटिग्रहे॥
अरोचके प्रतिश्याये कासे श्वासे क्षये तथा।
धातुक्षैण्ये बलक्षैण्ये योज्यःक्षीणे विशेषतः॥
उपदंशेषु सर्वेषु योजनीयो भिषग्वरैः।
पथ्यं दुग्धं रसं मांसं तथा निर्याससेवनम्॥

चोपचीनीयपाकोऽयं सुवैद्यपरिशीलितः ॥

पा. व., वाजीकरणे ।

भाषा—चोपचीनी ४० तो० को ४ सेरदूधमे-पकावे, दूधकाखोआहोजानेपर २०० तोलेशक्करडालकर चाशनीकरे। चाशनीहोजानेपर इलायची, लौंग, कपूर, चातुर्जात (तज, पत्रज, इलायची, नागकेसर), त्रिकटु, गंभारीकेफल, जावित्री, मालतीकेपुष्प, कैवांच, काकोली, कस्तूरी, सिंघाड़े, वंशलोचन, जटामांसी, तेजबल, जायफल, नीलोफर, विदारी, मुसली, कङ्कोल, (शीतलचीनी), शतावर, ताम्रभस्म, अभ्रकभस्म, येप्रत्येक २तोलेलेकर सबकोकूटपीसकर चाशनीमें अच्छीतरह मिलाकर २–२ तोलेकेलड्डूबनाकररखछोड़े । इनमेसे १–१तोला दूधकेसाथलेनेसे समस्तवातव्याधि, भीषणआमवात, अपस्मार, उन्माद, पक्षाघात, खेंच समस्तशिरोरोग, सन्धिपीडा, कटिग्रह, अरोचक, प्रतिश्याय, कास, श्वास, क्षय, धातुक्षीणता, बलऔरओजकीक्षीणता, सम्पूर्णउपदंश इनसबको यह दूरकरताहै इसकासेवनकरनेवाला वायुसे बँचकररहे । दूध, मांसरस ये इसकेलिये उपकारकहैं ॥ १४६ ॥

इति चकारः समाप्तः

अथ छ–कारादिरसाः

१४७ छर्दिसंहारोरसः

अजाजीधान्यपथ्याभिः सक्षुद्राभिः कटुत्रिकैः ।
एभिः सार्धं भस्मसूतः सेव्यो वान्तिप्रशान्तये ॥

र. सं., रसायनसं., भै. र., ध., र. का. छर्द्यधिकारे र. र. दी., र. क. ल., (सूतभस्म) ।

भाषा—जीरा, धनियां, हरें, भटकटैया, त्रिकटु, समभागलेना । इनके ३ माशेचूर्णकेसाथ २रत्ती पारेकीभस्म देनेसे वान्तिनष्टहोतीहै ॥ १४७ ॥

१४८ छर्द्यन्तकरसः

रसभस्म पलांशं स्यात्तत्पादः स्वर्णभस्मनः ।
ताम्रं भुजङ्गवङ्गे च मौक्तिकं तत्समांशकम् ॥
तेषां सममयश्चूर्णमभ्रकं तत्समं भवेत् ।
तत्समं गन्धकं दत्त्वा बीजपूरार्द्रकाम्बुना ५७४
सर्वं खल्वे विनिःक्षिप्य मर्दयेत्त्रिदिनावधि ।
तत्कल्कं भावयेत्सप्तदिनान्यामलकद्रवैः ५७५॥
पश्चात्तन्मूकमूषायां रुद्ध्वा भाण्डे विनिःक्षिपेत् ।
पांसुभिःपरिपूर्याथ क्रमवृद्धेन वह्निना ॥५७६॥
पचेद्यामत्रयं चुल्यां स्वाङ्गशीतलमुद्धरेत् ।
ततः सर्वं समाकृष्य चूर्णयेत्पट्टगालितम् ५७७
अजाजी दीप्यकं व्योषं त्रिफला कृष्णजीरकम् ।
कृमिशत्रुर्वराङ्गञ्च प्रत्येकं निष्कमानकम् ५७८
ततः सर्वं चूर्णयित्वा योजयेत्पूर्वभस्मना ।
इत्थं पञ्चरसैरेष प्रोक्तश्छर्द्यन्तको रसः ॥
तत्तद्रोगहरैर्द्रव्यैर्देयाद्वल्लप्रमाणतः ।
अम्लपित्तमसृक्पित्तं छर्दिं गुल्ममरोचकम् ॥
आमवातञ्च दुःसाध्यं प्रसेकच्छर्दिहृद्रुजम् ।
सर्वलक्षणसम्पूर्णं विनिहन्ति क्षयामयम् ॥
स्वस्थोचितो हितकरः सर्वेषाममृतोपमः ॥

यो. र., छर्द्यधिकारे.

भाषा—पारदभस्म १पल, स्वर्ण, ताम्र, नाग, वङ्ग, मोतीइनसबकीभस्में १–१तोला, इनसबकीबराबर लोहभस्म औरअभ्रकभस्म, औरइनदोनोंकीबराबर शुद्धगन्धकदेकर विजोरेकेरससे ३रोजमर्दनकर आंवलेकेरससे सातरोजभावनादेकर इसकागोलाबनाकर सुखाकर मृन्मूषामे बन्दकर अथवाआतशीशीमेबन्दकर बालुकायन्त्रमे क्रमवृद्धअग्निसे ३प्रहरपकावे । स्वाङ्गशीतलहोनेपर पीसकर इसमेजीरा, अजमोद, त्रिकटु, त्रिफला, कालीजीरी, विडङ्ग, तज ४-४ माशे, इनकाचूर्ण मिलाकर रखछोड़े । इसमेसे तत्तद्रोगहरानुपानकेसाथ ३–३ रत्तीदेनेसे यह अम्लपित्त, रक्तपित्त, उल्टी, गुल्म, अरुचि, दुःसाध्यआमवात, प्रसेक, हृद्रोग, समस्तलक्षणवान, क्षय, इनसबको नष्टकरताहै । स्वस्थऔररोगियोंकेलिये अमृतजैसाकाम करताहै ॥ १४८ ॥

१४९ छुरिकारोरसः (प्रथमः)

भागोत्तरं भवजगन्धकवत्सनाभं
विश्वाम्भसार्कजयपालफलं विमर्थ ।
वल्लोन्मितः कणशिवारसम्रकचेरैः
सामज्वरादिषु भवेदिह छुरिकारः ॥

र. सां., ज्वरे.

भाषा—शुद्धपारा १ भाग, गन्धक २ भाग, वछनाग ३ भाग, सोंठ ४ भाग, जमालगोटा ५ भाग, लेकरसबको अदरखकेरससे मर्दनकर ३-३ रत्तीकी गोलियें बनाकररखछोडे । इनमेसे १-१ गोली पीपल, हरेंमिलेहुए अदरखकेरससेदेनेसे साम-ज्वरको यह सरोतेकीतरहकाटडालताहै ॥ १४९ ॥

१५० छुरिकारोरसः (द्वितीयः)

गन्धकेन समः सूतो मृतं शुल्वं द्वयोः समम् ।
सर्वतुल्यन्तु जैपालं स्नुक्क्षीरेण विभावयेत् ॥
ग्रन्थिकस्य रसेनैव दन्तीमूलरसेन च ।
त्रिवृत्तोयेन सम्भाव्यो वज्रतोयेन भावयेत् ॥
सिद्धः स्यात्छुरिकाराख्यो कम्पिल्लेन प्रदापयेत्
वल्लमात्रो जयेद्रोगांस्त्रिवृत्तोयेन वा पुनः ५८५
कामलां पाण्डुरोगञ्च शूलं शोथञ्च दारुणम् ।
आनाहञ्च जयेच्छीघ्रं ज्वरं घोरं तथैव च ॥
सन्निपातं तथा वातं श्लेष्माणमपि दारुणम् ।
रेचयित्वा जयेदाशु छुरिकारो महारसः ५८७

र., पाण्डुविकारे.

भाषा—शुद्धपाराऔरगन्धकसमभाग, ताम्रभस्म दोनोंकीबराबर, शुद्धजमालगोटासबकीबराबर लेकर पारदगन्धककीनीलवर्णकज्जलीकर थूहरकादूध, पिपलामूलकाकाढा, दन्तीमूलस्वरस, निशोतकास्वरस, जङ्गलीसूरणकारस इनप्रत्येकसे १-१ भावनादेकर ३-३रत्तीकीगोलियें बनाकररखछोडे । इनमेसे१-१ गोली ३ रत्तीकमीलेकेसाथ अथवा ३रत्तीनिशोतकेसाथ देनेसे कामला, पाण्डुरोग, शूल, भयङ्करशोथ, आनाह, घोरज्वर, सन्निपात, वातव्याधि, भयङ्करश्लेष्मा, इनसबको झाडेकराकर साफकरदेता है ॥ १५० ॥

१५१ छुरिकारोरसः (तृतीयः)

गन्धकेन हतं सूतं मृतं शुल्वं च तत्समम् ।
तयोस्तुल्यश्च नेपालं सर्वमेकत्र कारयेत् ॥
त्रिवृता ग्रन्थिकं दन्ती तुम्बुरुं त्रिफला तथा ।
व्याधिघातश्च गन्धश्च विशालां वज्रिकापयः ॥
भावनात्रितयं दत्त्वा वल्लमात्रां गुटीं कुरु ।
एकैकां भक्षयेत्प्राज्ञो जलंशीतं पिबेदनु ॥
ज्वरे त्रिदोषजे शूले वाते वा सान्निपातिके ।
गुल्मप्लीहोदरादीनां नाशनं कुरुतेऽनिशम् ॥
पञ्च श्वासांश्च कासांश्च मूत्रकृच्छ्रं गुदामयान् ।
हरेदेहच्छुरीकारो रसो दिव्यमहौषधम् ५९२॥

र. (मा.) उदरविकारे.

भाषा—रससिन्दूर, गन्धकसेमाराहुआतांबा समभागदोनोंकीबराबर शुद्धजमालगोटालेकर सबको इकट्ठेखरलकर निशोत, पिपलामूल, दन्तीमूल, तुम्बुल, त्रिफला, अमिलतास, मरुआ, इन्द्रायण, थूहरकादूध, इनप्रत्येकसे ३-३ भावनाएंदेकर ३-३ रत्तीकीगोलियें बनाकररखछोडे । इनमेसे १-१ गोली ठंढेजलकेसाथदेनेसे त्रिदोषजज्वर, शूल, वायु, सन्निपात, गुल्म, प्लीहा, उदररोग, पांचोंकासऔर श्वास, मूत्रकृच्छ्र, बवासीर इनसबको यह सरोतेकीतरह काटदेताहै ॥ १५१ ॥

१५२ छुरिकारोरसः (चतुर्थः)

हिङ्गुलनेपालकदन्तिमूलैः
सटङ्कणैश्च त्रिवृतोषणाभ्याम् ।
मरीचमाना गुटिका विधेया
सर्वे गदा यान्ति विरेचनेन ॥ ५९३॥

र. (मा.) रससारसंग्रहे, विरेचने ।

भाषा—शुद्धशिंगरिफ, जमालगोटा, दन्तीमूल, भुनासुहागा, निशोत, कालीमिर्च येसबसमभागलेकर पानीवगैरहसे खूबघोटकर मिरचबराबर गोलियें बनाकररखछोडे । इनमेसे १-१ गोलीठंढेपानीके साथलेनेसे रेचनहोकर सबरोग नष्टहोजातेहैं १५२

१५३ छुरिकारोरसः (पञ्चमः)

रसो गन्धोऽभया शुण्ठी शुद्धं जैपालमेव च ।
क्रमवृद्धियुतं ग्राह्यं सर्वमेकत्र मर्दयेत् ५९४ ॥
छुरीकाररसो नाम सप्तगुञ्जो गुडै र्युतः ।
अनुपानं प्रदातव्यं तप्ततोयं विचक्षणैः ५९५ ॥
रेचना च्छूलगुल्मघ्नं मन्दाग्निज्वरनाशनम् ।
सर्ववातविकाराणां मलजानाञ्च शोधनम् ५९६

ना. वि., विरेचने ।

भाषा—शुद्धपारा १ भाग, गन्धक २ भाग, हर्रे, ३ भाग, सौंठ ४ भाग, जमालगोटा ५ भाग, लेकर पारेगन्धककीनीलवर्णकजलीकर सबचीजोंकेबारीक-चूर्णमेमिलाकर अदरखवगैरहकेरसके साथघोटकर सातसातरत्तीकी गोलियेंबनाकर रखछोडे । इनमेसे १–१ गोली गरमपानीकेसाथदेनेसे शूल, गुल्म, मंदाग्नि, ज्वर, समस्तवातऔरमलजरोग येसब नष्ट-होतेहैं ॥ १५३ ॥

१५४ जगन्मोहनरसः

नवरत्नाष्टलोहानां भस्म सूतस्य भस्म च ।
कृत्वा समांशं तत्सर्वं मेलयित्वा विचक्षणः ॥
तत्त्रिंशांशं विषं कुष्ठं त्रिकटु त्रिफला तथा ।
टङ्कणं गन्धकञ्चैव माक्षिकञ्च मनःशिला ५९८
एतत्सर्वं विनिःक्षिप्य मर्दयेच करण्डके ।
तस्य सर्षपमात्रन्तु भिषङ्‌ मात्रांप्रयोजयेत्
श्लेष्मज्वरेषु भृङ्गस्य रसेन गुडसंयुतम् ।
पित्तज्वरेषुत्वैलेयरसशर्करयान्वितम् ॥ ६०० ॥
वातज्वरेषु स्वरसै र्नागवल्या दलस्य च ।
ऐकाहिकेद्व्याहिके च भूधात्रीस्वरसेन च ६०१
त्र्याहिकेत्वाजदुग्धेन तथा चातुर्थिके ज्वरे ।
विषमेषु ज्वरेष्वेवं निम्बपत्ररसेन च ॥६०२॥
अभिघातेतु गोजिह्वारसेन मधुना सह ।
दोषज्वरे च वासायाः शिग्रुमूलरसेन च ६०३॥
तत्तन्निमित्तोत्पन्नेषु ज्वरेषु कण्टकीरसैः ।
त्रिदोषजेषुसर्वेषु ज्वरेष्वार्द्ररसेन च ॥ ६०४॥
ईदृग्विधानुपानैश्च ज्वरेषु च प्रयोजयेत् ।
सर्वाङ्गवातिकेत्वर्कमूलानां स्वरसेन च ६०५॥
धनुर्वाते च निर्गुण्ड्याः पक्षाघाते च पथ्यया ।
सुप्तवाते च गोमूत्रैः शुष्कवातेतु पूर्ववत् ६०६
तथा वृश्चिकवातेतु भृङ्गकेशरकान्वितम् ।
तदन्येषु च कुष्ठेषु मधुना सम्प्रयोजयेत्६०७॥
जलोदरेतु भूदन्तीमूलानां स्वरसान्वितम् ।
महोदरे च भूदन्तीवज्रतैलेन योजयेत् ६०८॥
अन्येषूदररोगेषु गिरिकर्णिकया समम् ।
अश्मर्यां शर्करायुक्तमश्मभेदि रसेन च ६०९॥
बहुमूत्रे च कण्टक्या मूलानां स्वरसेन च ।
मधुशुक्लेक्षुमेहेषु तलपोटकसंयुतम् ॥ ६१० ॥
रक्तमेहेतु गोक्षीरै र्नवनीतेन वा तथा ।
गोमूत्रैस्तक्रमेहस्य ह्युदुम्बररसेन वा ६११ ॥
तदन्येषु च मेहेषु तिलपिष्टिरसान्वितम् ।
अर्शस्सु गुडयुक्तेनकाकोदुम्बरिकान्वितम्६१२
शुण्ड्यार्द्रकरसै र्युक्तं शूलेषुच प्रयोजयेत् ।
गुल्मेषुच कुबेराक्षीचिञ्चाभस्मरसेन च ॥६१३
वह्निचूर्णेन पाण्डौच क्षयशोफेतु गोपयः
क्षये च गोघृतेनैव कदलीरससंयुतम् ॥६१४॥
कामलायां निशायुक्तं कण्टकीस्वरसेन च ।
शिरःशूलादिरोगेषु शुण्ठ्या नस्यं प्रदीयताम् ॥
व्रणेषुचाखिलेष्वेवं लेपयेद्गोघृतेन च ।
तुलसीरससंयुक्तो नाशयेत्सर्ववातिकम् ॥६१६
महागदेषु सर्वेषु सेवयेदेकमण्डलम् ।
अर्धमण्डलमात्रं तदन्येषु सम्प्रयोजयेत् ॥६१७
महारोगप्रयोगेषुह्यौषधं सर्षपद्वयम् ।
त्रिमासं सेवयेन्नित्यं देहसिद्धिर्भवेद्ध्रुवम् ६१८
त्रिसंवत्सरमात्रेण जरामरणवर्जितः ।
पातालमधुगोक्षीरनवनीतानुपानकैः ॥ ६१९ ॥
सेवयेच्छर्करायुक्तं तत्पथ्यनियमं विना ।
सेवयेद्बुद्धिमान् मर्त्यो ब्रह्मकल्पं स जीवति ॥
जगन्मोहननामायं रसो लोके प्रकीर्तितः ६२०

र. कौ., (ह्र) र. क. यो., ज्वरे.

भाषा—नवरत्न (हीरा-मोती-माणिक नलिम-

पन्ना-गोमेद-पुखराज-लसणियां-मूंगा), अष्टलोह (सोना-चांदी-तांबा-वङ्ग-नाग-कान्तिसार-विडलोह फोलाद) औरपाराइनकीभस्ममें समभागलेना और-बछनाग, कुठ, त्रिफला, त्रिकटु, भुनासुहागा, शुद्ध-गन्धक, सोनामाखीऔरमैनसिलये प्रत्येकपूर्वोक्तधातु-समुदायका तीसवांहिस्सालेकर पहिले सबकोइकहे-कर पानवगैरहकेरससे एकदोरोज़मर्दनकराके सुखाकर रखछोड़े। इसमेसे १-४सर्षपप्रमाणमात्रा श्लेष्मज्वरमे गुड़औरभंगरेके रसकेसाथ,पित्तज्वरोंमे एलियाऔरश-क्करकेसाथ,वातज्वरोंमेपानकेरसकेसाथ, ऐकाहिकतथा-द्व्याहिकमे भुंईआंवलेकेरसकेसाथ, त्र्याहिक औरचातु-र्थिकमें वकरीकेदूधकेसाथ विषमज्वरोंमे निम्बपत्ररसके-साथ, अभिघातज्वरोंमे वनगोभीकेरसऔरमधुकेसाथ, दोषज्वर (चेपीबुखार) मे अडूसाऔर सहिजनकीजड़-केरसकेसाथ, साधारणज्वरोंमे भटकटैयाकेरसकेसाथ, तमामसन्निपातोंमे अदरखकेरसकेसाथ, सर्वाङ्गवातमे आकड़ेकीजड़कीछालकेकाढ़ेकेसाथ, धनुर्वातमे संभा-लुकेरसकेसाथ, पक्षाघातमे हरेंकेसाथ, सुप्तवातऔर-शुष्कवातमे गोमूत्रकेसाथ, वृश्चिकवातमे सींगकी के-सरकेसाथ, समस्तकुष्ठोंमे मधुकेसाथ, जलोदरमेछोटी दन्तीकीजड़केसाथ, महोदरमेदन्तीकीजड़ औरजङ्गली-सूरणकेतैलकेसाथ, अन्यउदररोगोंमे अपराजिताके-साथ, पथरीमे शक्करमिलेहुए पाषाणभेदकेरसकेसाथ, बहुमूत्रमें भटकटैयाकी जड़केकाथकेसाथ, मधु-शुक्र-औरइक्षुमेहोंमे तुवरककेसाथ,रक्तमेहमे गायकेदूधअथ-वामक्खनकेसाथ, तक्रमेहमे गोमूत्रकेसाथ अथवागूल-रकेरसकेसाथ, साधारणमेहोंमे तिलपिष्टीकेरसकेसाथ, बवासीरोंमे गुड़युक्तगूलरकेफलोंकेसाथ, शूलमेगोरख-मुण्डीऔरअदरखकेरसकेसाथ, गुल्ममेकञ्जाऔरइम-लीकीभस्मकेपानीकेसाथ, पाण्डुमे चित्रककेचूर्णकेसाथ, क्षययुक्तशोफमे गायकेदूधकेसाथ, क्षयमे घी अथवा, केलेकेरसकेसाथ, कामलामे हल्दीअथवाभटकटैयाके-रसकेसाथ, शिरःशूलादिरोगोंमे सोंठकेसाथ नस्यदेना, समस्तव्रणोंमे गोघृतकेसाथ लेपकरना, समस्तवात-विकारोंमे तुलसीकेरसकेसाथ, बड़ेरोगोंमे १मण्डल (४९रोज़) तक, और साधारणरोगोंकेलिये आधे मण्डलतकपिलाना। महारोगोंकेलिये औषध २सर्ष-पकेबरावरदेना, इससे ३मर्हानेसेदेहसिद्धि होतीहै रसायनकेलिये पातालमधु, गायकेदूधऔरमक्खनके-साथदेना। तीनवरसतकखानेसे जरामृत्युसेरहितहो-जाताहै, इसमे पथ्यकरनेकीजुरूरतनहींहै। अगरइस-कोहमेशासेवनकरेतो ब्रह्माने मनुष्यकेलिये जितनीअ-धिकसेअधिकआयुबनाईहै उससमयतक जीसकताहै ॥ १५४ ॥

१५५ जठराग्निदीपनोरसः

लोहहिङ्गुलघनं च मागधी
विश्वभेषजमिदं क्रमैधितम्।
भुक्तमामलकतोयमर्दितं
सद्य एव जठराग्निदीपनम् ॥ ६२१ ॥

ना. वि., अग्निमान्द्ये।

भाषा—लोहभस्म १भाग, शिंगरिफ २भाग, अभ्रकभस्म ३भाग, पीपल ४भाग और सोंठ ५भाग, लेकर सबको कूटकपड़छानकर आंवलेकेरसमे घोट-कर बेरबराबर गोलियेंबनाले। इनमेसे १-१गोली खानेसे तत्काल जठराग्नि प्रदीप्तहोता है ॥ १५५ ॥

१५६ जन्तुघ्नीवटी

सूतगन्धौ समौ ताभ्यां मण्डूरं सप्तमांशतः।
विधाय कज्जलीमाखुकर्ण्या सम्मर्दयेद् द्व्यहम्
ततो मण्डूरमानेन क्षुद्रदीप्यं विनिःक्षिपेत्।
आरुष्करकषायेण दिनमेकं विमर्दयेत् ॥
ब्रह्मबीजं समुद्रस्य फलं जातीफलन्तथा।
विषतिन्दुकबीजञ्च ताप्यं सर्वं समांशकम् ॥
विडङ्गं सममेतैश्च सूक्ष्मचूर्णं प्रकल्पयेत्।
रसतुल्यं हि तच्चूर्णं रसेन सह मेलयेत् ॥
वासा च निम्बत्वग्वंशो बेलयोपाम्बुदं तथा।
एषां काथेन सप्ताहं त्र्यहं मूर्वाद्रयो रसे ॥
भावयित्वा चणप्रायाः कर्तव्याः वटिकाः शुभाः
अथनिम्बादिजकाथे प्रदद्यैका वटी शुभा ॥

पातयेज्जठराज्जन्तून्सर्वदेहगदान्हरेत् ।
कुष्ठं जन्तून्निहन्त्याशु द्वित्रिवारप्रयोगतः ॥

र. र. स., विसर्पकुष्ठे ।

भाषा—शुद्धपारा और गन्धक समभाग, इनसे सप्तमांश मण्डूरभस्म देकर नीलवर्ण कज्जलीकर मूषाकर्णीके रसमे दोरोज़मर्दनकर मण्डूरकी वरावर किरमानी जीराडालकर भिलविके काढेसे एकरोज़ मर्दनकर पलाशके वीज, समुद्रफल, जायफल, कुचिला, सोनामाखी ये प्रत्येक पोरकीबराबर, और सबकीबराबर विडङ्गदेकर पूर्ववालेलुगदेमेमिलाकर अडूसा, नीमकीछाल, बांसकीछाल, वन्दाल, त्रिकटु, नागरमोथा इनप्रत्येकके काढेसे सात ७ भावनाएंदेकर ३–३ दिन मूर्वाऔरअदरखकेरसमे मर्दनकर चनेप्रमाणगोलियें बनाकररखछोडे । इनमेसे १–१ गोलीअश्वगन्धादि औरनिम्बादि गणकेक्वाथसेदेनेसे पेटकेतमामकृमियोंको निकालकर कुष्ठको दूरकरतीहै ॥ १५६ ॥

१५७ जयन्तीवटी

विषं पाठाश्वगन्धा च वचा तालीसगन्धकम् ।
मरिचं पिप्पली निम्बमजामूत्रेण तुल्यकम् ॥
वटिका पूर्ववत्कार्या जयन्तीयोगवहिका ॥

जयाजयन्तीवटीप्रयोगविधिः—

जयन्ती वा जया वाऽथ क्षीरैः पित्तज्वरापहा ।
मुद्गामलकयूषेण पथ्यं देयं घृतं विना ॥६३०॥
जयन्ती वा जया वाऽथ सक्षौद्रमरिचान्विता ॥
सन्निपातज्वरं हन्ति रसश्चानन्दभैरवः ॥ ६३१
जयन्ती वा जया वाऽथ विषमज्वरनुद्घृतैः ।
सर्वज्वरं मधुव्योषैः गवां मूत्रेण शीतकम् ॥
चन्दनस्य कषायेण रक्तपित्तज्वरापहा ।
जयन्ती वा जया वाऽथ माक्षिकेणचकासजित् ॥
जयन्ती वा जया क्षीरैः पाण्डुशोथविनाशिनी ।
जयन्ती वा जया वाऽथ तण्डुलोदकपानतः ॥
अश्मरीं हन्ति नो चित्रं मूत्रकृच्छ्रन्तु दारुणम्
जयन्तीं वा जयां वाऽथ गोमूत्रेण युतां पिबेत् ॥
हन्त्याशु काकणं कुष्ठं सुलेपेन च तद्द्रुतम् ।
द्विनिष्कं केतकीमूलं पिष्ट्वा तोयेन पाययेत् ॥
जयन्ती वा जया वाऽथ मेहं हन्ति सुराह्वयम् ।
जयन्ती वा जया वाऽथ मधुना मेहजिद्भवेत् ॥
लोध्रमुस्ताभयातुल्यं कट्फलञ्च जलैः सह ।
क्वाथयित्वा पिबेच्चानु मधुना सर्वमेहजित् ॥
जयन्तीं वा जयां वाऽथ गुडैः कोष्णजलैः पिबेत्
त्रिदोषोत्थं हरेच्छूलं रसश्चानन्दभैरवः ६३९॥
जयन्ती वा जया हन्ति शुण्ठ्या सर्वं भगदरम् ।
जयन्ती वा जया वाऽथ तक्रेण ग्रहणीप्रणुत् ॥
जयन्ती वा जया वाऽथ रसश्चानन्दभैरवः ।
रक्तपित्ते त्रिदोषोत्थे शीततोयेन पाययेत् ॥
जयन्ती वा जया वाऽथ घृष्ट्वा स्तन्येन चाञ्जयेत्
स्रावणं सर्वदोषोत्थं मांसवृद्धिञ्च नाशयेत् ॥

र. सं., र. चं., र. र. स., ज्वराधिकारे । र. र. समुच्चये मुस्ता अजामूत्रञ्च निष्कासितम् ।

भाषा—शुद्धवछनाग, पाठामूल, असगन्ध, बच, तालीसपत्र, शुद्धगन्धक, मरिच, पीपल, निम्बपत्र येसबसमभागलेकर इनकाखूबबारीकचूर्णकर भेड़केमूत्रमे १–२ रोज़मर्दनकर चनेप्रमाणगोलियें बनाकररखछोडे । यह वटी औरजयावटी योगवाहिकाहैं अर्थात् जैसेअनुपानकेसाथ दीजायंगी वैसाकामकरेंगीं । इनकेअनुपान कुछनीचेदियेजातेहैं, दूधकेसाथ इनमेंसे कोई भी दीजायतो पित्तज्वर शान्त होता है, पथ्यमे आंवलेसहित मूंगका यूप देना । मधु और मरिच के साथ जयन्ती, जया और आनन्दभैरव ये सन्निपातको दूर करते है, घृतके साथ विषम ज्वरको, त्रिकटु और मधुकेसाथ समस्त ज्वरोंको, गोमूत्रके साथ शीतज्वरोंको, चन्दनके काढ़ेसे ज्वरसहित रक्तपित्तको, मधुकेसाथ खांसीको, दूधकेसाथ पाण्डु और शोथको, चावलोंके पानीसे पथरी और भयंकर मूत्रकृच्छ्रको, गोमूत्रमे लेप करनेसे और पिलानेसे काकणकुष्ठको, २ टंक केतकीकीजड़ पानीमे पीसकर इसके साथ देनेसे सुरामेहको, मधुकेसाथ गोली देकर ऊपरसे लोध्र, नागरमोथा, हर्रे, काय-

फल, इनका चतुर्थांशावशेष क्वाथ मधु मिलाकर देनेसे समस्त प्रमेहोंको, गुड और गरमपानीके साथ जया, जयन्ती अथवा आनन्दभैरवको देनेसे घोर-गुल्म नष्ट होता है । सोंठके साथ घोर भगन्दरको छाछके साथ ग्रहणीको, शीतजलकेसाथ त्रिदोषोत्थ रक्तपित्तको, स्त्रीके दूधसे घिसकर अञ्जन करनेसे सर्व दोषोत्थस्राव और मांसवृद्धिको नष्ट करती है १५७॥

१५८ जयमङ्गलोरसः (प्रथमः)

हिङ्गूलसम्भवं सूतं गन्धकं टङ्कणं तथा ।
ताम्रं वङ्गं माक्षिकञ्च सैन्धवं मरिचन्तथा ६४३
समं सर्वं समाहृत्य द्विगुणं स्वर्णभस्म च ।
तदर्धं कान्तलोहञ्च रौप्यभस्मापि तत्समम् ॥
एतत्सर्वं विचूर्ण्याथ भावयेत्कनकद्रवैः ।
शेफालीदलजैश्चापि दशमूलरसेन च ॥६४५॥
किराततिक्तकक्वाथैस्त्रिवारं भावयेत्सुधीः ।
भावयित्वा ततः कार्या गुञ्जाद्वयमिता वटी ॥
अनुपानं प्रयोक्तव्यं जीरकं मधुसंयुतम् ।
जीर्णज्वरं महाघोरं चिरकालसमुद्भवम् ६४७॥
ज्वरमष्टविधं हन्ति साध्यासाध्यमथापि वा ।
पृथग्दोषांश्च विविधान्समस्तान्विषमज्वरान् ॥
मेदोगतं मांसगतमस्थिमज्जगतन्तथा ।
अन्तर्गतं महाघोरं बहिःस्थं च विशेषतः६४९
नानादोषोद्भवञ्चैव ज्वरं शुक्रगतन्तथा ।
निखिलं ज्वरनामानं हन्ति श्रीशिवशासनात् ॥
जयमङ्गलनामायं रसः श्रीशिवनिर्मितः ।
बलपुष्टिकरश्चैव सर्वरोगनिबर्हणः ॥ ६५१ ॥

भै. र., व. रा., र. सु., ध., ज्वराधिकारे ।

भाषा—शिंगरिफसे निकालाहुआपारा, शुद्धगन्धक, सुनासुहागा, ताम्र-वङ्ग-माक्षिक इनकीभस्में, सेंधानमक और मरिच ये सब समभागलेकर इनसबसे दूनीसुवर्णभस्म, सुवर्णभस्मसे आधीलोहभस्म और रजतभस्म, इनसबको इकठ्ठे घोटकर धतूरा, हारसिंगार, दशमूल, चिरायता, इनप्रत्येकके स्वरस अथवा क्वाथोंसे तीनतीनवार भावना देकर २-२ रत्तीकी गोलियें बनाकर रखछोडे । इनमेंसे १-१ गोली जीरा और मधुकेसाथ देनेसे बहुत दिनका जीर्णज्वर, साध्यासाध्य अष्टविधज्वर, पृथक् अथवा त्रिदोषज्वर, नानाप्रकारके विषमज्वर, धातुगत, बाह्यवेग, अन्तर्वेग, इनसब ज्वरोंको यह नष्टकरताहै बल और पुष्टिको देताहै ॥ १५८ ॥

१५९ जयमङ्गलोरसः (द्वितीयः)

भस्मसूताभ्रकं तारं मुण्डतीक्ष्णालमाक्षिकम् ।
वह्निटङ्कणकं व्योषं समं संमर्दयेद्दिनम् ॥६५२
पाठा निर्गुण्डिका यष्टी बिल्वमूलकषायकैः ।
ततो मूषागतं रुद्ध्वा विपचेद्भूधरे पुटे ॥
माषकं दशमूलस्य कषायेण प्रयोजयेत् ।
अञ्जनेनाथवा न स्यात्सन्निपाते जयेद्ध्रुवम् ॥

र. सं., नि. र., र. का., र. सु., रसायनसं., र. क., र. कौ., र. चि., यो. म., र. क. यो., सन्निपातज्वरे ।

भाषा—पारद, अभ्रक, रजत, मुण्ड (विडलोह) फोलाद, हरिताल, सोनामाखी, इनसबकी भस्में, चित्रक, सुनासुहागा, त्रिकटु, सब समभागलेकर कूटकपडछानकर पाठा, संभालु, मुलहठी, बिल्वमूल इन प्रत्येकके काढेसे १-१ रोज़ मर्दनकर गोला बनाय सुखाकर भूधरपुटमें ४ पहरकी आंच देकर स्वाङ्गशीतलहोनेपर निकालकर दशमूलके काढेसे एकएक माशा देनेसे और अञ्जन करनेसे यह सन्निपातको अवश्य नष्ट करताहै ॥ १५९ ॥

१६० जयमङ्गलोरसः (तृतीयः)

तालं ताप्यजगन्धकं च विमलं
कान्ताऽऽरतीक्ष्णाऽभ्रकम् ।
मण्डूरं कुलिशं सुराऽऽयसघनं
चैभिः समं सूतकम् ॥ ६५५ ॥
वन्ध्याकन्दससिन्धुवारमधुकं
शृङ्गीविषं टङ्कणम् ।
चोलंचित्रकलाङ्गलीसुमरिचं
विश्वोपकुल्याविषाः ॥ ६५६ ॥
एभिः सर्वसमांशकैस्सुविधिना
बद्धा द्विगुञ्जा वटी,

माधूकेन रसेन दोषनिचये
नस्ये च पाने हिता ॥ ६५७ ॥
कृत्वा नेत्रयुगेऽञ्जनं च विधिना
तत्सन्निपातंजये-
द्वैद्यैस्त्यक्तमचेतनञ्च विषमं
सञ्जीवयेन्मानवम् ॥ ६५८ ॥

रसेन्द्रमं., सन्निपाते ।

भाषा—हरितालभस्म अथवा रसमाणिक्य, सोनामाखी, शुद्धगन्धक, रौप्यमाक्षिक, कान्तपाषाण, कान्तलोह, पित्तल, अभ्रक, मण्डूर, हीरा, सुवर्ण, इनप्रत्येककी भस्में, और वन्दाल, ये प्रत्येक एक भाग पारा इनसबकी बराबर अर्थात् १२ भाग, बांझखेखसाकाकन्द, संभालूके पत्ते, मुलेठी, शुद्धबछनाग, भुनासुहागा, एलुवा, चित्रकमूल, कलिहारीकाकन्द, मरिच, सोंठ, पीपल, अतीस, ये प्रत्येक दो भाग इनसबको कूटकपड़छानकर महुवेके फूलोंके अङ्गस्वरस अथवा काथोंसे २–३ रोज़ मर्दनकर दोदो रत्तीकी गोलियां बनाके रखछोड़े । एकेक गोली वन्दाल, अदरख प्रभृतिके रसमे घिसकर खिलावे । और नासिकामे फूंके । इसके प्रयोगसे जिस सान्निपाति तथा विषव्यासको वैद्योंने मृतप्राय समझके छोड़दिया है । वह तत्काल चेतन होजाताहै । और चातुर्थिक वगैरह विषमज्वरोंको यह तत्काल नष्ट करताहै ॥ १६० ॥

१६१ जयमङ्गलोरसः (चतुर्थः)

स्वर्णं तालकताप्यगन्धविमलं तारञ्चतीक्ष्णाभ्रकं
मण्डूरं कुलिशं समांशमिलितं तद्भागिकं पारदम्
तत्तुल्या वनकन्यकाऽथ सुरसा भृङ्गी विषा टङ्कणं
वेल्लाग्नित्रिकटूग्रयष्ट्यतिविषाः सम्मर्द्य चैषांद्रवैः
गुञ्जायुग्ममितो जयेदभिनवां-
स्त्रीन्सन्निपातान् द्रुता-,
न्सूतोऽसौ जयमङ्गलः प्रथमितः
पीतश्च नेत्रामयान् ।
भक्तं तक्रयुतं कुलित्थकमथो यूषोऽथवा मुद्गजो,

चिल्लीवास्तुकतुण्डिकाफलकृताः
शाका ज्वरेऽन्ये तथा ॥ ६६० ॥

र., सन्निपाते ।

टि० अयं पाठो रसेन्द्रमङ्गलादेत्रोद्धृतः परं तदभिप्रायज्ञाने जातोभ्रमोग्रन्थकारस्य तेनप्रक्षेपवस्तूनां भावनाद्रव्येणसङ्ग्रथनं कृतम् । चोलस्थाने वेलंगृहीतं–आरस्थानेतारं, देवदालीस्थानेशूल्यताकृताऽस्ति एतत्सर्वमप्यभिप्रायाज्ञानविलसितमस्त्यतो रसेन्द्रमङ्गलीय एव पाठःसाधुः ।

भाषा—सुवर्ण, हरिताल, सोनामाखी, रजतमाक्षिक, रजत, लोह, अभ्रक, मण्डूर, हीरा इनसबकी भस्में और शुद्धगन्धक ये सबसमभाग, पारदभस्म और खेखसेकाकन्द इनसबकी बराबर लेकर सबको इकट्ठे खरलकर घीकुंवार, तुलसी, काकड़ासींगी, बछनाग, सुहागा, विडङ्ग, चित्रक, त्रिकटु, बच, मुलहठी, अतीस, इनप्रत्येकके स्वरस अथवा काथोंसे एकएक रोज़ मर्दनकर २–२रत्तीकी गोलियें बनाकर रखछोड़े । इनमेंसे १–१गोली अदरख वगैरहके रसकेसाथ खिलानेसे तथा नस्य देनेसे समस्तसन्निपात और नेत्ररोगोंको यह दूरकरता है । पथ्यमे छाछभात, कुलथी अथवा मूंगका यूष, खरथुआ, बथुआ, कुंदरू ऐसे ऐसे शाकोंको देना इसके देनेसे समस्त ज्वर और प्रमेह नष्टहोते हैं ॥ १६१ ॥

१६२ जयवटी

सूते शिलातालशिवारजांसि
समानि सर्वार्धमिते प्रमर्थ्य ।
ताम्रस्य भस्मापि समस्ततुल्यं
मन्दारदुग्धेन रसेन वापि ॥ ६६१ ॥
व्याघ्रीगुडूचीत्रिफलाग्निचव्य–
क्काथेन सम्मर्द्य विधाय गोलम् ।
संशोष्य दद्याद्दशमृत्पटानां
योगान् पचेत्कुक्कुटनामधेये ॥६६२॥
विषं कणां भर्जितटङ्कणञ्च
विल्वं समस्तार्धमथापि शुद्धम् ।
जैपालचूर्णञ्च तदर्धमेव
निम्बूकनीरेण च मर्दयेत ॥ ६६३ ॥

आर्द्राम्बुना चापि वटी विधाय
मुद्गप्रमाणा ज्वरिशर्महेतोः ।
श्वासेषु कासेषु च वह्निमान्द्ये
चार्शःसु पाण्डौ च भगन्दरेषु ॥६६४
वह्वूपकुर्युर्वटिका मलानां
संशोधने तु प्रवरा मताः स्युः ।
योग्यानुपानेन समस्तरोगान्
जयन्ति शीघ्रञ्च नयन्ति शर्म॥६६५॥

र. सा., सर्वरोगे।

भाषा—शुद्धमैनसिल, हरिताल और गन्धक समभाग, पारासबसे आधाभाग, ताम्रभस्म सबकी बराबर लेकर पारेगन्धककी नीलवर्ण कज्जलीकर आकऋादूब, भटकटैया, गुडूच, त्रिफला, चित्रक, चव्य, इनके क्वाथोंसे १–१रोज़ मर्दनकर सुखाकर शरावमे बन्दकर ऊपर दसकपडमिट्टी देकर सुखाकर २ सेर कण्डोंकी आंचदेना । स्वाङ्गशीतल होनेपर इसमे शुद्ध बछनाग, पीपल, भुनासुहागा, मरिच-बेलगिरि ये सब सबसे अर्धभाग, और इससे आधा-जमालगोटा देकर नीबू और अदरखके रससे १-१ रोज़ मर्दनकर चने बराबर गोलियें बनाकर तत्तद्रोग-हरानुपानकेसाथ देनेसे यह गोली श्वास, कास, मन्दाग्नि, बवासीर, पाण्डु, भगन्दर इनसबको नष्टकरती है और पुराने मलको खारिज करती है ॥ १६२॥

१६३ जयविक्रमरसः

विषं मनःशिला तालं गन्धकं टङ्कणं समम् ।
सर्वं जम्बीरनीरेण दिनानि त्रीणि मर्दयेत् ॥
दोलायन्त्रे पचेद्यामं तन्नीत्वा चूर्णयेत्ततः ।
मत्स्यपित्ते दिनं भाव्यं देयं गुञ्जाप्रमाणतः ॥
सन्निपातान्निहन्त्याशु रसोऽयं जयविक्रमः ॥

वै. चि., सन्निपाते।

भाषा—शुद्धबछनाग, मैनसिल, हरिताल, गन्धक और सुहागा सब समभागलेकर इकट्ठेबारीक पीसकर तीनदिन जंभीरी नीबूके रसमे घोटकर गोलाबनाय जंभीरीके रसमे दोलायन्त्रसे १पहरपकाकर सुखाकर १रोज़ मछलीके पित्तमे घोटकर १–१रत्तीकी गोलियें बनाय अदरखकेरस या समयोचितानुपानके साथ देनेसे सम्पूर्ण सन्निपातोंको नष्टकरता है ॥ १६३ ॥

१६४ जयसुन्दरोरसः

सुवर्णं रजतं ताम्रं ताप्यं सत्त्वञ्च वैकृतम् ।
एकैकं निष्कमानेन संशुद्धं परिमारितम् ॥
एतच्चतुर्गुणं सूतं सूताद्द्विगुणगन्धकम् ।
मर्दयेल्लक्ष्मणातोयैर्बन्धुजीवरसैरपि ॥६६९॥
काचकूप्यां ततः क्षिप्त्वा ताम्रपात्रं मुखे न्यसेत्
विलिम्पेदभितः कूपीमङ्गुलोत्सेधया मृदा ॥
विशोष्य च पुटं दद्याद्भूमौ निःक्षिप्य कूपिकाम्
गजाख्यपुटपर्याप्तैः शाणकर्षमितोत्पलैः ॥
स्वाङ्गशीतं विचूर्ण्याथ भावयेल्लक्ष्मणाद्रवैः ।
सप्तवारं विशोष्याथ करण्डान्तर्विनिःक्षिपेत् ॥
अश्वगन्धारजोयुक्तस्ताम्रगोक्षुरसंयुतः ।
सेवितो गुञ्जया तुल्यः सितया च रसोत्तमः ॥
मासत्रयप्रयोगेण वन्ध्या भवति पुत्रिणी ।
पुत्रिण्याः स्नानशुद्धाया रजः कौशिकचक्षुषी ॥
गव्याज्येन च संसाध्य तत्तदानीं हि भोजयेत् ।
ऋताव्वृताविदं देयं यावन्मासत्रयं भवेत्॥६७५॥
रसेन्द्रः कथितः सोऽयं चम्पकारण्यवासिभिः ।
पूर्णामृताख्ययोगीन्द्रैर्नामतो जयसुन्दरः ॥
सेवितेऽस्मिन्रसे स्त्रीणां न भवेत्सूतिकागदः ।
भवेत्पुत्रश्च दीर्घायुः पण्डितो भाग्यमण्डितः ॥

र. र. स., र. म. मा., र. को., र. चं., ब्री. वि., र. र. कौ., वन्ध्यारोगे ।

टि०—पुत्रिण्याइति–एतद्वस्तुद्वयस्याऽलाभाद्धर्मसङ्कोचाद्वा उपयोगसङ्कोचस्तत्र आमन्त्रणपूर्वकं शतावरी कन्दान्याहृत्य छायाशुष्कचूर्णंविधाय गुग्गुल वालकं समानं नियुज्यतत्स्थानाय दातव्यमिति रहस्यम् ।

भाषा—सुवर्ण, रजत, ताम्र, सुवर्णमाक्षिकसत्त्व, वैक्रान्त इनसबकी भस्में १–१ टंक, इनसबसे चतुर्गुणित पारा और पारेसे दूना गन्धक, लेकर लक्ष्मणा और दुपहरियाके रसोंसे १–१ रोज़

मर्दनकर सुखाकर ६–७ कपड़मिट्टी दीहुई काचकी शीशीमे भरकर इसकामुंह तांबेके पत्रकीडाटसे वन्दकर शीशीके चारों तरफ एक अङ्गुल ऊंची कपड़मिट्टी करके सुखाकर ज़िमीनमें खड्डा खोदकर उसमे शीशीको रख ऊपर ४ अङ्गुल वालु देकर कंडोंके छोटे २ टुकड़े जो कि ४ माशेसे लेकर १ तोले तक वज़नसे अधिक न हों उनसे गजपुटकी आंचदे। स्वाङ्गशीतल होनेपर निकालकर लक्ष्मणाके स्वरससे सात रोज़ मर्दनकर सुखाकर घोटकर रखछोड़े। इसमेसे १–१ रत्ती, असगन्धका चूर्ण, ताम्रभस्म और गोखरू इनको समभाग लेकर इसमेसे १ माशा चूर्ण शक्कर मिलाकर खानेसे ३ महीनेतक लगातार देनेसे वांझस्त्रीके गर्भ होता है पुत्रवती स्त्रीका स्नानसे शुद्ध होनेकेबादका रज और घुग्घूके नेत्र ये गायके घीमे सेककर बन्ध्या स्त्रीको खिलाने चाहियें। ऐसे ३ महीनेतक लगातार इस रसके साथ देनेसे अवश्य वन्ध्याके पुत्र होता है। यह चम्पकारण्यवासी पूर्णामृत योगीका कहा हुआ है इस रसके सेवन करनेसे स्त्रियोंको सूतिका रोग नहीं होता और पुत्र दीर्घायु होकर भाग्यशाली और पण्डित होता है ॥ १६४ ॥

१६५ जयावटी

विषं त्रिकटुकं मुस्तं हरिद्रा निम्बपत्रकम् ।
विडङ्गं गन्धकं चूर्णंश्छागमूत्रैः समंसमम् ॥
चणकाभा वटी कार्या स्याज्जया योगवाहिका ॥

र.सं., र. सं.क., र.चं., र. चि., यो. म., ज्वराधिकारे।

दातव्या सन्निपातर्ते ततः शैत्यमुपाचरेत् ।
तरुणार्करसो नाम मृत्युञ्जयति निश्चयात् ॥
मृत्युवक्त्रगतं वापि रोगिणं जीवयेद्ध्रुवम् ३२

ब. रा., र. क. यो., सन्निपाते ।

भाषा—गोदन्ती हरिताल, शुद्धशिंगरिफ १–१ भाग, शुद्धवछनाग २ भाग, कृष्णसर्पविष ४ भाग लेकर सबको विजोरेकेरससे एकदिन मर्दनकर मूंगबराबर गोलियें बनाकर रखछोड़े । इनमेसे १–१ गोली नारियलके पानीके साथ देनेसे दुस्तर सन्निपातको यह दूरकरताहै । इसके देनेसे कदाचित् दाह होतो शीतोपचार करना ॥ ७ ॥

८ तरुणार्करसः (तृतीयः)

गन्धकं टङ्कणं चाभ्रमग्निं धुत्तूरबीजकम् ।
कृष्णसर्पस्य गरलं रक्तचन्दनवङ्गकम् ॥ ३३
एतानि समभागानिसर्वेभ्यो हिङ्गुलुः समः ।
मातुलुङ्गरसै मर्द्यं त्रिदिनञ्च महामृदु ॥ ३४॥
वटिकां सर्षपाकारां ह्यनुपानविशेषतः ।
तरुणार्करसः ख्यातः सर्वज्वरनिवारणः ॥ ३५

ब. रा., सर्वज्वरे ।

भाषा—शुद्धगन्धक, भुनासुहागा, अभ्रकभस्म, चित्रक अथवा भिलवे, धतूरेकेबीज, कृष्णसर्पका विष, लालचन्दन, वङ्गभस्म, येसब समभाग लेकर सबकी बराबर शिंगरिफलेकर सबकोकूटकपड़छानकर विजोरेके रससे ३ रोज़ मर्दनकर सरसोंके बराबर गोलियें बनाकर रखछोड़े । इनमेसे १–१ गोली समयोचितानुपानके साथ देनेसे यह समस्त ज्वरोंको नष्टकरताहै ॥ ८ ॥

९ तलभस्म

सूतश्चतुष्पलमितः समशुद्धगन्धः
स्याद्धूमसारपिचुरेक इदंक्रमेण ।
सम्मर्दयेद्विमलदाडिमपुष्पतोयै-
र्यत्नं विमिश्य सितसोमलमापकेण ॥
एतन्निधाय सकलं जलयन्त्रगर्भे
सम्मुद्रय सन्धिमुदिते तु पुरा क्रमेण।
आपूर्य यन्त्रमुदकेन दिनानि चाष्टौ
वह्निं क्रमेण तदधो विदधीत विद्वान्॥
पश्चाच तज्जलमुदस्य रसं तलस्थ-
मादाय भाजनवरे सुभिपङ्निदध्यात् ।
सम्पूज्य शम्भुगिरिजागिरिजातनूजा-
नद्याच्छुभेऽहनि रसं वरमेकगुञ्जम् ॥
ताम्बूलिकादलयुतं ससितं पयोऽनु
पीत्वाऽम्लमापलवणैरहितं सदन्नम् ।
अद्यात्कियन्त्यपि दिनानि ततो यथेच्छं
भक्षं भजेदथ नरो विगतामयः स्यात्॥

वृ. यो. त., रसायने ।

भाषा—शुद्धपारा और गन्धक ४-४ पल, गृहधूम १ तो., सफेदसंखिया १ माशा लेकर पारेगन्धककी नीलवर्ण कज्जलीकर धूंआं औरसंखिया मिलाकर अनारके फूलोंके स्वरससे १ रोज़ मर्दनकर गोला बनाकर जलयन्त्रमे रखकर जलमुद्रा देकर कड़ाहीमे रख ऊपर पानी भरदे । और ध्यान रक्खे कि जलमुद्रा पानीसे फटे नहीं, नहीं तो सब मिहनत बरबाद होजायगी । फिर उस सम्पुटपर भारी पत्थर रखदे । जिसमेकि वह वाष्पसे उछले नहीं फिर इसके नीचे ५ दिनतक मन्द, मध्य और तीक्ष्ण इसक्रमसे अग्निदेवे, पर यह ध्यानरक्खेकि पानी सूखने न पावे, कमपड़नेपर दूसरा गरमपानी डालदे । स्वाङ्गशीतल होनेपर कड़ाहीमेसे पानी निकालकर उस यन्त्रको निकालकर जलमुद्राको दूर कर पारेकीभस्म निकालकर शिव, पार्वती और गणेशकी पूजा करके अच्छी मज़बूत शीशीमे रखदे इसमेसे १–१ रत्ती लेकर अपने अनुकूल ग्रहोंको देखकर पके पानमे रखकर खावे । ऊपरसे शक्कर मिलाहुआ अधौटा दूध पीवे । खटाई, उड़द और लवणरहित उत्तम अन्न खाय । थोड़े दिनतक इसतरह पथ्य पालकर फिर यथेष्टाहारविहारकरे ।

इसके सेवन करनेसे समस्त रोगोंसे निवृत्त होकर नवीन यौवनावस्थाको प्राप्त होता है ॥ ९ ॥

१० ताण्डववारणरसः

रससिन्दूरकात्कर्पममृतं कर्पसम्मितम् ।
माक्षिकं गन्धकं सूतं तालं कर्पमितं पृथक् ॥
ऊपणं कट्फलं भृङ्गीं वचां जातीं लवङ्गकम् ।
कर्पद्वन्द्वप्रमाणेन प्रत्येकं योजयेद्भिषक् ॥४१॥
मातुलान्यार्द्रकद्रावै र्मातुलाद्भिश्च पेपयेत् ।
वितरेद्वल्लसम्मानां कण्टकार्यादियूषकैः ॥४२॥
अष्टादशाङ्गक्वाथेन दद्याद्वार्द्रकवारिणा ।
भूतवच्चेष्टमानाय नष्टज्ञानाय रोगिणे ॥ ४३ ॥
सञ्ज्ञास्थं कुरुते नित्यं रसस्ताण्डववारणः ।
श्वासकासाग्निमान्द्यादींश्शीघ्रमेव व्यपोहति४४

नू. क., कासश्वासाधिकारे ।

भाषा—रससिन्दूर, शुद्धबछनाग, सोनामाखी, शुद्धगन्धक, पारा और हरिताल १-१ तोला, मरिच, कायफल, काकड़ासींगी, वच, जावित्री, लौंग येप्रत्येक २ तोले लेकर पारे गन्धककी नीलवर्ण कज्जलीकर और चीजोंके बारीकचूर्णमे मिलाकर भांग, अदरख और धतूरेके रसोंसे १-१ रोज़ मर्दनकर ३-३ रत्तीकी गोलियें बनाकर रखछोड़े इनमेसे १-१ गोली कण्टकार्यादिकाथ अथवा अष्टादशांगक्वाथ (दशमूलादि) अथवा अदरखके रसकेसाथ देनेसे प्रेतकी तरह चेष्टा करता हुआ और तमाम ज्ञान नष्ट हुआ जो रोगी है उसको यह फिरसे होशमे लाता है और श्वास, कास, मन्दाग्नि वगैरहको बहुत जल्दी दूर करता है ॥१०॥

११ ताप्यादिरसायनम्

ताप्याभ्रकत्रिकटुतुत्थशिलाजकान्त-
मङ्कोल्ललोहमलटङ्कणसैन्धवश्च ।
भृङ्गीरसेन वटकांश्च मसूरमात्रान्
खादेद्रसायनवरं सकलामयघ्नम् ॥४५॥

र. र. स., र. र. कौ., रसायने ।

भाषा—सोनामाखी, अभ्रकभस्म, त्रिकटु, तुत्थ, शिलाजीत, कान्तलोहभस्म, अङ्कोलमूल, मण्डूर, भुनासुहागा, सेंधानमक, सबसमभागलेकर भांगरेके रससे १-२ रोज़ मर्दनकर ३-३ रत्तीकी गोलियें बनाकर रखछोड़े । इनमेसे १-१ गोली तत्तद्रोग हरानुपानके साथ अथवा दुग्धादिकके साथ देनेसे सबरोगोंको दूर करता है ॥ ११ ॥

१२ ताम्रकल्पः

अक्षपारदगन्धश्च कर्पद्वयमितं पृथक् ।
सर्वैः समं भवेत्ताम्रं जम्बीराम्लेन मर्दयेत् ४६
सूर्यावर्तरसैः पश्चात्कणामोचरसेन च ।
योजयेत्तीव्रधर्मे तु यावत्सर्वन्तु जीर्यति ॥४७॥
जम्बीरस्य रसै र्भूयो रसं दण्डेन चालयेत् ।
दृढे शिलामये पात्रे चूर्णयेदतिशोभनम् ॥४८॥
रक्तिद्वयक्रमेणैव योज्यं मापद्वयावधिम् ।
ह्रासयेच्च क्रमेणैव तथा चैव विवर्धयेत् ॥४९॥
जीर्णे भुञ्जीत शाल्यन्नं क्षीरं घृतसमन्वितम् ।
हन्त्यम्लपित्तं विविधां ग्रहणीं विषमज्वरम् ५०
चिरज्वरं प्लीहगदं यकृद्रोगं सुदुस्तरम् ।
अग्रमांसं तथा शोथं कांस्यक्रोडं सुदुर्जयम् ॥
कमठञ्च तथा शोथमौदरञ्च सुदारुणम् ।
धातुवृद्धिकरं वृष्यं बलवर्णकरं शुभम् ॥५२॥
सद्यो वह्निकरञ्चैव सर्वरोगहरं परम् ।
मुखशुद्धि र्विधातव्या पर्णैश्चूर्ण समन्वितैः ॥
ताम्रकल्पमिदं नाम्ना सर्वरोगप्रशान्तये ॥५३॥

र. सं., र. सु., र. चि., प्लीहाधिकारे ।

भाषा—बहेड़ा, शुद्धपारा और गन्धक २-२ तोले, सबकी बराबर ताम्रभस्म लेकर जंभीरी, हुरहुर, पीपल, मोचरस इनप्रत्येकके अङ्गस्वरस अथवाक्वाथसे धूपमे १-१ भावनादे । फिर जंभीरीकारस देकर खरलमे १-२ रोज़ मर्दनकर २-२ रत्तीकी गोलियें बनाकर रखछोड़े । इनमेसे १-१ गोलीसे आरम्भ करके रोज़ एकएक गोली बढ़ातारहे इसतरह २ मासेतक बढ़ाकर फिर क्रमसे घटावे । इसतरह ४९ दिनतक करनेसे असाध्य अम्लपित्त, ग्रहणी, विषम-

ज्वर, जीर्णज्वर, प्लीहा, यकृत, अग्रमांस (हृदयसंलग्नधमनीस्थमांसवृद्धि), शोथ, दुर्जयकांस्यक्रोड (प्ल्यूरसीइ०) कछुही, पेटका असाध्यशोथ, इनसबको दूरकरताहै। धातुओंकीवृद्धि, बल और वर्णको करताहुआ अग्निको प्रदीप्तकर समस्तरोगोंको दूरकरताहै। इसमे दवा जीर्णहोनेपर पुरानेचावल, दूध और घी खानेको देना भोजनके बाद चूना लगेहुए पानसे मुखशुद्धि करना॥ १२॥

१३ ताम्रचक्रिका

ताम्रचक्रिकया बद्धं सूतं तालं सतुत्थकम्।
वटाङ्कुररसे मर्द्यं तृष्णाहृद्वल्लमानतः॥ ५४॥

र. चि., र. चं., व. रा., र. की., र. का., र. सं., ध., र. सु., एषुमहोदधिरिति नाम, तृष्णायाम्।

टि०—ताम्रचक्रिकयाबद्धमिति तु भ्रष्टः पाठः बद्धस्थाने सञ्जातः। सक्षौद्रमाम्रजम्बूत्थं पिबेत्क्वाथं पलोन्मितम्। सकृष्णमधुना कुर्योद्गण्डूषं शीतले स्थित इत्यधिकः पाठोऽस्तिमहोदधौ। अत्र शुद्धताम्रचक्रिकां सूर्यभक्तादिरसे बहुशो निर्वाप्य ज्वलदङ्गारोपरि विन्यस्य तदुपरि शुद्धं पारदं स्थापयित्वा रसोनरसं पातयित्वा पारदं वस्त्रात्प्रगाल्य घनीभूतं पृथक्कुर्यात्, द्रवं पुनः पूर्ववत्कुर्यात्तत्तनष्टपिष्टितां भजते। तं पारदं तुत्थतालकयो भस्म च वटाङ्कुरे विमर्द्य रस उत्पाद्य इति तत्त्वम्। अथवाशुद्धताम्रोपरि पारदं विमर्द्य चक्रिका निष्पादनीया।

भाषा—ताम्रचक्रिकासे बांधाहुआपारा, रसमाणिक्य और तुत्थभस्म सब समभाग लेकर वटकी जटाओंके स्वरससे १–२ रोज मर्दनकर ३–३ रत्तीकी गोलियें बनाकर रखछोड़े। इनमेंसे एकएक गोली इलायची और शकरके साथ देनेसे तृष्णा नष्टहोती है॥ १३॥

१४ ताम्रपर्पटी (प्रथमा)

प्रत्येकं दशगद्याणान् शुद्धगन्धकसूतयोः।
मृतताम्रस्य पञ्चैव खल्वेवं पञ्चविंशतिम्॥५५
क्षिप्त्वा सम्मर्दयेत्तावद्यावन्निर्याति सत्त्वरम्।
निर्धूमाङ्गारके वह्नौ लोहपात्रे घृताक्तके॥ ५६
तावच्च स्थाप्यते यावच्चेलाभो जायते रसः।
प्रथमं कदली श्रेष्ठा ह्यलाभे पद्मिनीदलम् ५७
तदलाभे नागवल्ली ह्येकस्य च पलद्वयम्।
गोमयोपरि निक्षिप्ते पत्रे तं ढालयेद्रसम्॥५८
पुन र्दत्त्वाऽपरं पत्रं पत्रस्योपरि गोमयम्।
रसं तं शीतलीभूतं खल्वे सूक्ष्मं हि पेषयेत्॥
भृङ्गराजरसेनादौ दातव्याः सप्तभावनाः।
आटरूषकपत्राणां स्वरसैः सप्त भावनाः॥ ६०
कटुत्रयजलैः सप्त सप्तैवं त्रिफलाम्भसा।
सप्तार्द्रकरसेनैवं सप्त पत्रकजै र्द्रवैः॥ ६१॥
व्याघ्रीरसेन सप्तैव शिग्रुमूलरसेन च।
वत्सनाभविषेणैव श्रीखण्डेनैव सप्त च॥६२॥
संशुष्कश्च ततश्चूर्णं सूक्ष्मं सम्मर्दयेद् दृढम्।
प्रक्षिपेत्कूप्यके चूर्णं सम्भिन्नाञ्जनसन्निभम् ६३
ताम्रपर्पटिसञ्ज्ञोऽयं रसश्च परिकीर्तितः।
रोगिणे प्रत्यहं देयो वल्लयुग्मो जलान्वितः॥
त्रिभि र्दिनै र्ज्वरो याति श्लेष्मवातादिसम्भवः
वातरक्ते ह्यजीर्णेषु ग्रहण्यां कुष्ठरोगिषु॥
मासैकेन निहन्त्याशु रोगानेतान्सुदारुणान् ६५

रसचि., र. कं. ली., ज्वरे।

भाषा—शुद्धपारा और गन्धक ५–५ तोले, ताम्रभस्म २॥ तोले, लेकर यहांतक मर्दनकरे कि नीलवर्ण कज्जली होजाय। फिर घृताक्त लोहेकी कड़ाहीमे गलाकर भैंसके ताजे गोबरपर रक्खेहुए केलेके पत्रपर उसको ढालकर दूसरे पत्तेसे दबाकर ऊपर ताजागोबर रखदे। स्वाङ्गशीतल होनेपर निकालकर बारीक पीसकर भांगरा, अडूसा, त्रिकुटु, त्रिफला, अदरख, पत्रज, भटकटैया, सहिजनकीजड़, वछनाग, चन्दन इनप्रत्येकके रसोंकी सात ७ भावनाएं देकर ६–६ रत्तीकी गोलियें बनाकर रखछोड़े अथवा चूर्णही रक्खे। इनमेसे १–१ गोली जलके साथ अथवा तत्तद्रोगहरानुपानके साथ देनेसे श्लेष्मवातजज्वर तीनरोजमे नष्टहोताहै। वातरक्त, अजीर्ण, ग्रहणी और कुष्ठरोग इनको यह पर्पटी १ महीनेमे अच्छा करती है॥ १४॥

१५ ताम्रपर्पटी (द्वितीया)

तं ताम्रं त्रिभागश्च रसं गन्धश्च तत्समम् ।
ागमेकं वत्सनाभं कज्जलीं खल्वमध्यगाम् ॥
ोघृतेन कृतं कल्कं लोहपात्रे विपाचयेत् ।
ालयेदर्कपत्रस्थां पर्पटीं रससिद्धये ॥ ६७ ॥
ुञ्जाद्वयं त्रिगुञ्जं वा पिप्पलीमधुसंयुतम् ॥
त्रिसप्तरात्रयोगेन रोगराजश्च नाशयेत् ॥६८॥
ार्द्रकस्य रसेनैव सन्निपातं नियच्छति ॥
त्रिफलारससंयुक्ता सर्वपाण्डुं विनाशयेत् ॥६९
ातारितैलसंयुक्ता सर्वशूलनिवारिणी ।
कुमारीरसयोगेन वातपित्तोपशान्तिकृत् ॥७०॥
ाकुचीरससंयुक्ता सर्वदद्रुविनाशिनी ।
त्रिफलामधुसंयुक्ता सर्वमेहनिवारिणी ॥७१॥
ख़दिरक्वाथपानेन कुष्ठाष्टादशनाशिनी ।
मन्थानभैरवेणोक्ता लोकानां हितकाम्यया ७२

यो. र., र. चं., नि.र., वै. क., र. सु., वै.चि.,कासाधिकारे ।

भाषा—ताम्रभस्म, शुद्धपारा और गन्धक ३–३ भाग, शुद्धबछनाग १ भाग लेकर सबकी नीलवर्ण कज्जलीकर थोड़ा घीडालकर कल्क बनाले फिर इसको लोहेकी कड़ाहीमे गलाकर आकके पत्तोंपर ढालकर पर्पटी तैयारकरे । इसमेसे २–२ रत्ती पीपल और मधुकेसाथ देनेसे २१ रोज़मे राजयक्ष्मको दूरकरतीहै अदरखके रससे सन्निपातको, त्रिफलाके रससे समस्त पाण्डुको, एरण्डके तैलसे समस्त शूलोंको, घीकुंआरके रससे वातपित्तको, बाकुचीके रससे समस्त दद्रुओंको, त्रिफला और मधुके साथ सब प्रमेहोंको और खदिरक्वाथसे १८ कुष्ठोंको नष्टकरती है । लोकोंके हितके लिये मन्थानभैरवने कहीहै ॥ १५ ॥

१६ ताम्रपर्पटी (तृतीया)

रसगन्धकताम्राणां चूर्णं कृत्वा समांशकम् ।
पुटपाकविधौ पक्त्वा मधुनाऽऽलोड्य संलिहेत्
सर्वरोगहरश्चैतत्पर्पटाख्यं रसायनम् ॥ ७३ ॥

र. र., ध., वं. से., सर्वरोगे ।

भाषा—शुद्धपारा और गन्धक, ताम्रभस्म येसब समभाग लेकर पर्पटीकी क्रियासे पर्पटी बनाकर दोदोरत्ती तत्तद्रोगहरानुपानके साथ अथवा मधुके साथ देनेसे यह समस्तरोगोंको नष्टकरती है ॥१६॥

१७ ताम्रपर्पटी (चतुर्थी)

ताम्रञ्च पारदं तुल्यं मर्दयेत्त्रिफलाद्रवैः ।
सगन्धं सामृतं कुर्यात्ततः पर्पटिका शुभा ॥
मूर्च्छाभ्रमेषु तृष्णायां सा प्रयोज्या यथाबलम् ।

ना. वि., र. म. मा., मूर्च्छाधिकारे ।

भाषा—ताम्रभस्म, शुद्धपारा समभागलेकर त्रिफलाके क्वाथसे १-२ रोज मर्दनकर पारेकी बराबर गन्धक और शुद्धबछनाग देकर इसकी पर्पटी बनाकर दो दो रत्ती तत्तद्रोगहरानुपानके साथ देनेसे मूर्च्छा, भ्रम, अधिक पिपासा इनसबको यह नष्ट करती है ॥ १७ ॥

१८ ताम्रपिष्टिका (प्रथमा)

देवदालीरसे घृष्टा शुद्धताम्रस्य पिष्टिका ।
गन्धाश्मचूर्णसंयुक्ता महतीं कामलाञ्जयेत् ॥

यो. म., रसेन्द्र मं., कामलायाम् ।

भाषा—शुद्धताम्रका चूर्ण लेकर समभाग शुद्धपारेमें मिलाकर बन्दालके रससे ४-५ रोज मर्दनकर पिष्टी बनाले । इसमे सबकी बराबर गन्धक मिलाकर रखछोड़े । इसमेसे २-२ रत्ती यथारोगहरानुपानके साथ देनेसे अत्यन्त बढ़ी हुई कामलाको दूर करती है ॥ १८ ॥

१९ ताम्रपिष्टिका (द्वितीया)

शतावरीरसे घृष्टां तुत्थताम्रस्य पिष्टिकाम् ।
पाचितां कटुतैलेन मूत्रकृच्छ्रे प्रयोजयेत् ॥७६

यो. म., रसेन्द्रमं., मूत्रकृच्छ्रे ।

भाषा—शुद्धतुत्थ, ताम्र और पारा इनको शतावरीके रसमे घोटकर पिष्टी बनाकर सुखाले फिर कड़वे तैलका चोया देकर ४ पहरतक पकावे स्वाङ्गशीतल होनेपर इसकी २-२ रत्ती मूत्रकृच्छ्रहरानुपानके साथ देनेसे मूत्रकृच्छ्रको दूर करती है

२० ताम्रभैरवोरसः (प्रथमः)

ताम्रपत्राणि निष्पाद्य काकमाच्याश्च शोधयेत् ।

द्विगुणं गन्धकं कृत्वा भागैकं तालकं पुनः ॥
मनःशिलां चतुर्थांशां रसांशः पञ्चमः स्मृतः ।
अन्धमूषागतं सर्वं पचेद्यामचतुष्टयम् ॥ ७८॥
स्नुहीक्षीरेण सम्भिन्नं वत्सनाभसमन्वितम् ।
कटुत्रयसमायुक्तं गुटिका चणकोपमा ॥७९॥
ज्वरं हरति सद्यश्च सन्निपातांस्त्रयोदश ।
भोजने दधिभक्तश्च शर्कराक्षीरदाडिमम् ॥
सर्वत्र विदितो लोके रसोऽयं ताम्रभैरवः ८०

र. (मा.) र. का., रससारसंग्रह, ज्वराधिकारे ।

भाषा—तांबेके बारीक पत्र बनाकर मकोयके रसमे ४ पहर स्वेदनकर द्विगुण गन्धक और एक भाग हरिताल और चतुर्थांश मैनसिल तथा पञ्चमांश पारा देकर मकोयके रससे ४ पहर घोटकर सुखाकर सम्पुटमे बन्दकर ४ पहरतक वालुकायंत्रमे पकावे । स्वाङ्गशीतल होनेपर निकालकर शुद्ध-बछनाग, त्रिकटु, ये दोनों उसके बराबर २ मिलाकर थूहरके दूधमे मर्दनकर चनेप्रमाण गोलियें बनाकर रखछोड़े । इनमेंसे १-१ गोली शक्कर अथवा अष्टादशांगादि क्वाथके साथ देनेसे यह १३ सन्निपातोंको नष्ट करता है । भोजनमे दही, भात, शक्कर और दूध देना ॥ २० ॥

२१ ताम्रभैरवोरसः (द्वितीयः)

ज्वरे वा सन्निपाते वा शून्यतायां भ्रमे तथा ।
दातव्यरसमध्ये तु ताम्रं क्षेप्यं शिवाप्तये ॥८१
न कस्यापि प्रकाश्यं स्याद्यानुभूतं सहस्रशः ।
धन्वन्तरिप्रणीतं हि ताम्रं सर्वगुणाधिकम् ॥
अम्लान्तरस्थं त्रिदिनं दिनेश-
पत्रं ततो भूमिमलावगूढम् ।
तप्तं ततो हुण्डपुटत्रयेण,
क्षिप्तं ततो निम्बुरसे दिनैकम् ॥८३॥
ऐङ्गुदके किण्वरसेऽथ दुग्धे
त्रिस्त्रिर्निषिक्तं च रसार्धलिप्तम् ।
द्विभागगन्धाञ्चितदुग्धिकाम्बु-
प्लुतं ततो भस्मपुटे मृतश्च ॥ ८४ ॥
सगन्धसूर्याम्लगणार्द्रकाग्नि-
भृङ्गोद्भवाम्भोभिरनुक्रमेण ।
पञ्चामृतेनाथ च सप्तकृत्वः
पृथक् पुटैः सिद्धमिदं गदारि ॥८५॥
त्रिदोषादिगणैर्ग्रस्तं लोकमालोक्य भैरवः ।
तज्जीवनममुं ताम्ररसं चक्रे कृपापरः ॥८६॥
अभ्रकेण क्षये गूढआलगोलेन भैरवः ।
देयो व्योषेण हृद्रोगे विसूच्यां विश्वया सह ॥
गर्भगुप्तरसं भाण्डं भूत्वा कृत्वा निरुध्य च ।
ताप्यतेऽनलकीलायामेवं भस्मपुटं स्मृतम् ८८

र. (मा.), ज्वराधिकारे ।

टि०—आलं तालकं, गोला मनःशिला, अनयोः समाहार आलगोलं तेन आलगोलेन ।

भाषा—साधारणज्वरमे या सन्निपातमे संज्ञाशून्यता तथा भ्रममे जितने रस दिये जांय इनमे यदि इसताम्रका योग कियाजाय तो वह बहुतही चढ़बढ़कर कामकरताहै । यह हजारों बारका अनुभूतकियाहुआहै । इसकाविधान यहहै अत्यन्तखट्टीकांजीमे ताम्रके बारीकपत्रों को ३ रोज रखकर चौथेरोज उनसेदूना गन्धक कांजीमे पीसकर उनके ऊपर लगाकर गोला बनाय शरावसम्पुटमे बन्दकर बराहपुटमे आंचदे । ऐसे तीनबार आंचदेकर एकरोज नीबूके रसमे उन पत्रोंको भिगोकर दूसरेरोज उसीपात्रको अग्निपररख पत्रोंको गरमकरके इंगोरन, सुराबीज, आक और थूहरका दूध, इनप्रत्येकमे तीनतीन बार बुझावे । फिर उसतांबेसे आधापारा और दूना गन्धक देकर छोटी दूधीके रसमे घोटकर गोलाबनाकर सुखाकर ३–४ कपड़मिट्टी दीहुई हंडीमे रख ऊपरसे शराव ढककर सन्धिको गुड़चूने प्रभृतिसे बन्दकर हंडीके मुंहतक सफेद छनीहुई राखभरकर ऊपर कुल्हड़ी उल्टी रखकर सन्धिको गुड़चूने वगैरहसे बन्दकर कपड़मिट्टी देकर सुखाकर चूल्हेपर १२ प्रहरकी क्रमसे मन्द, मध्य और खर अग्नि देवे । स्वाङ्गशीतल होनेपर निकालकर द्विगुण गन्धक देकर इुरहुर या आकका

दूध, अम्लवर्ग (नींबू-जंभीरी-बीजपूर और अम्लवेत), अदरख, चित्रक, भिलावां और भांग इनप्रत्येकके रसोंसे मर्दनकर गोला बनाकर बराहपुटमे ७-७ आंचें देकर अखीरमे पञ्चामृतकी ७ आंचें देनेसे यह ताम्रभैरवरस सिद्धहोगा। त्रिदोषादि रोगोंसे जगत्को कवलित कियाहुआ देखकर उनके कल्याणकेलिये भैरवने इसको तैयार कियाहै। इसमेसे १ रत्ती द्विगुण कर्पूर प्रभृतिके साथ सन्निपातमे और अभ्रक, हरिताल और मैनसिल इनप्रत्येककी भस्म १-१ रत्तीके साथ क्षयमे, द्विगुण त्रिकटुके साथ हृद्रोगमे, द्विगुण सोंठके साथ हैजेमे, एवं तत्तदनुपानोंके साथ इसको देनेसे यह समस्त रोगोंको दूरकरताहै ॥२१॥

२२ ताम्रभैरवोरसः (तृतीयः)

विषं खदिरसारश्चाऽऽकल्लकं टङ्कणं तथा ।
व्योषं ताम्रं शुद्धफेनं चणमात्रा वटी कृता ८९
दीयते श्वासकासेषु पीनसे ग्रहणीकफे ।
नाशयेन्मात्र सन्देहस्तिमिरञ्च यथा रविः ॥
ताम्रभैरव इत्येष ज्वराणाञ्च निकृन्तनः॥९०॥

र. सु., यो. सं., ज्वराधिकारे ।

भाषा—शुद्धवछनाग, खैरसार, अकलकरा, भुनासुहागा, सोंठ, मिर्च, पीपल, ताम्रभस्म और शुद्ध अफीम सबसमभाग लेकर अदरखके रस वगैरहसे घोटकर चने प्रमाण गोलियें बनाकर रखलेना। इनमेसे १-१ गोली तत्तद्रोगहरानुपानके साथ देनेसे श्वास, कास, पीनस, ग्रहणी, कफरोग, इनसबको इसतरह नष्टकरताहै जैसे सूर्य अन्धकारको ॥२२॥

२३ ताम्रभैरवोरसः (चतुर्थः)

चिञ्चेङ्गुदीधूर्तपयःस्विनीनां
निर्गुण्डिपञ्चाङ्गरसेऽथयूपे ॥
वज्र्यर्कदुग्धे क्रमशस्त्रिवारा-
न्निर्वापितं शुद्धयति ताम्रपत्रम् ॥९१॥
सकाञ्जिकेन द्विगुणेन पञ्च-
कृत्वः सुगन्धेन कृतोपलेपम् ।
छायाविशुष्कं पुटपाकपक्वं
पञ्चत्वमप्यञ्चति शुभ्रताञ्च ॥ ९२ ॥
पुटानि पञ्चामृतजानि पञ्च
फलत्रयस्य त्रिपुटान्यवाप्य ।
सिद्धं सुधाभूतमिदं त्रिदोष-
ज्वरादिरोगापहमादिशन्ति ॥ ९३ ॥

र. (मा.) ज्वराधिकारे ।

भाषा—तांबेके बारीक पत्रोंको इमली, इंगोरन, धतूरा, दूधी, पञ्चाङ्गनिर्गुण्डी, इनका अङ्गस्वरस अथवा क्वाथ, थूहर और आकका दूध, इन प्रत्येकमे ३-३ बार बुझानेसे ये शुद्ध होते है। फिर इनमे द्विगुण गन्धकको कांजीमे पीसकर उनपत्रोंपर लेपकर छायामे सुखाकर भस्मयन्त्रमे १२ पहरकी आंच देनेसे इनकी भस्म हो जायगी। इसके बाद पञ्चामृतमे घोटकर पूर्ववत् आंचदे, ऐसे पञ्चामृतमे ५, त्रिफलामे ३, आंचें देनेसे यह ताम्रभैरवरस सिद्ध होगा। इसकी १-१ रत्ती तत्तद्रोगहरानुपानके साथ देनेसे यह समस्त रोगोंको दूर करता है ॥२३

२४ ताम्रयोगः (प्रथमः)

मृतं ताम्रं कणातुल्यं चूर्णं क्षौद्रविमिश्रितम् ।
निष्कार्धं भक्षयेन्नित्यं नष्टवह्निप्रदीप्तये ॥
आर्द्रकस्वरसं क्षौद्रं पलमात्रं भवेदनु ।
यथेष्टं घृतमांसाशी शक्तो भवति पावकः ॥

र. र. स., र. को., चि. र., वै. चि., र. क. यो., व. रा., अग्निमान्द्ये चि. र., (पञ्चवक्त्रः) र. क. यो., (अजीर्णकण्टकः)।

भाषा—ताम्रभस्म और पीपलका चूर्ण समभाग मिलाकर रखछोडे। इसमेसे ४-४ रत्ती मधुमिलाकर चाटकर ऊपरसे २ तोले अदरखकारस और २ तोले मधु मिलाकर पीनेसे नष्ट अग्नि प्रदीप्त होकर मांसादि भारीपदार्थ पचानेकोभी समर्थ होता है ॥ २४ ॥

२५ ताम्रयोगः (द्वितीयः)

मृतताम्रस्य वल्लैकं शुण्ठीचूर्णं द्विमाषकम् ।
विड्बद्धञ्च निहन्त्याशु पिबेदुष्णेन वारिणा ॥

शुण्ठीस्थाने यवक्वार्थ मलबन्धहरं भवेत् ॥९६
यो. म., टी., मतभेदे। गुल्माधिकारे।

टि०—मृतताम्रस्य माषैकं पिबेदुष्णजलेनवा। शुण्ठीक्वाथं पिबेत्तु हिङ्गुसौवर्चलान्वितमिति योगरत्नाकरे पाठोऽस्ति अतो हिङ्गुसौवर्चलशुण्ठीनां तुल्येन चूर्णेन दत्वा शुण्ठीक्वाथो दातव्य इत्यस्माकं सम्मतिः।

भाषा—ताम्रभस्म ३ रत्ती, सोंठकाचूर्ण २ माशे मिलाकर गरमपानीके साथ पीनेसे पतलेदस्तोंको दूर करता है। और केवल ताम्रभस्म मधुवगैरहके साथ चाटकर जवका क्वाथ पीनेसे मलबन्ध दूर होता है॥ २५॥

२६ ताम्रयोगः (तृतीयः)

वल्लैकं मारितं ताम्रं वह्निमूलककाञ्जिकैः।
पीत्वा जलोदरं हन्ति काञ्चनी वा भृता जले॥
अनुपिबेदितिशेषः। यो. म., जलोदरे।

भाषा—ताम्रभस्म ३ रत्ती, मधु वगैरहमे चाटकर चित्रकका क्वाथ अथवा काञ्जी अथवा हल्दीका क्वाथ पीनेसे जलोदर नष्ट होता है॥ २६॥

२७ ताम्रयोगः (चतुर्थः)

विषव्योषसमायुक्तं ताम्रश्चेत्परिशीलितम्।
वातशूलं तथा गुल्मं सद्यो हन्ति विसूचिकाम्
नृ. क., वातरोगे

भाषा—शुद्धवछनाग और त्रिकटुकेसाथ ताम्र सेवन करनेसे वातशूल, गुल्म और हैजा ये तत्काल नष्ट होते हैं॥ २७॥

२८ ताम्रयोगः (पञ्चमः)

केवलं जारितं ताम्रं भृङ्गवेररसैः सह।
दातव्यं पर्णखण्डेन सर्वगुल्मनिवारणम्॥ ९९
र. क., र. का., गुल्मे।

भाषा—केवल ताम्रभस्मको अदरखके रसके साथ अथवा पानके साथ देनेसे सब प्रकारके गुल्म नष्ट होते हैं॥ २८॥

२९ ताम्रयोगः (षष्ठः)

त्र्यूषणं पञ्चलवणं वल्लमात्रञ्च ताम्रकम्।
गुल्मशूलं हरत्येव विसूचीशूलवारणम्॥१००
वै. वि., गुल्माधिकारे।

भाषा—ताम्रभस्म ३ रत्ती, त्रिकटु और पाँचों नमक मिलकर ४ माशेकेसाथ लेनेसे गुल्म, शूल और हैजा इनको यह नष्ट करता है॥ २९॥

३० ताम्रयोगः (सप्तमः)

काकमाचीनृङ्गवेरजयालम्बुकजैः पृथक्।
सप्तधा मूर्च्छितं शैले रसं निर्मलताम्रतम्॥
सूक्ष्मपत्रीकृतं ताम्रं गन्धचूर्णेन योजितम्।
पुटेचदन्धमूषायां चूर्णं तक्रेण कारयेत्॥१०२
तच्चूर्णं त्रिकटूपेतं योजयेन्मधुसर्पिषा।
ग्रहणीक्षयरोगेषु हितं सोपद्रवेषु च॥
अम्लपित्ते च कुष्ठे च ज्वरे मेहे च कामले॥
र. र., प., ग्रहणीरोगे।

भाषा—मकोय, अदरख, भांग, अरनी, एरण्ड इन प्रत्येकके रसोंमे पत्थरकीखरलमे सात ७ दिन मर्दनकरके काञ्जीसे साफ किया हुआ पारा, बहुत बारीकपत्र किया हुआ ताम्र और गन्धक समभागलेकर नीबूके रससे मर्दनकर गोलाबनाकर सुखाकर अन्धमूषामेरख गजपुटकी आंचदे। स्वाङ्गशीतल होनेपर निकालकर ३-४ रोज खट्टी छाछकेसाथ मर्दनकर रखछोड़े। इसमेसे ३-३रत्ती लेकर ३ माशे त्रिकटुके साथ घी और मधुमे मिलाकर चाटनेसे उपद्रवसहित ग्रहणी, क्षय, अम्लपित्त, कुष्ठ, ज्वर, और कामला इनसबको यह नष्ट करता है॥ ३०॥

३१ ताम्रयोगः (अष्टमः)

ताम्रं मृतमपामार्गक्षारञ्च क्षारकद्वयम्।
समं गुञ्जाद्वयं प्रातःप्रातर्नित्यं निषेवयेत्॥
मध्याह्ने भोजनात्पूर्वं सायमेव द्वयं भवेत्।
औदुम्बरे महाकुष्ठे साध्यासाध्येऽपि निश्चितम्
सप्तसप्तकमध्ये तदवश्यं नाशयेदपि।
माषं न भक्षयेन्नूनं न मत्स्यं क्षीरमेवच॥
अन्यद्वस्तु न चाश्नीयाद्विदाहि न गुरूदकम्॥
र. का., कुष्ठे।

भाषा—ताम्रभस्म, अपामार्गकाक्षार, सज्जी, यवक्षार, ये सब समभाग लेकर मिलाकर २-२ रत्ती

प्रातःकाल और मध्याह्न तथा सायंकालको भोजनसे पहिले पानीकेसाथ लेनेसे ४९ दिनमे साध्य अथवा असाध्य औदुम्बर महाकुष्ठको यह नष्ट करता है । इसमे उड़द, मछली, दूध, दाह करनेवाली चीजें और भारी पानी इनका सेवन न करे ॥

३२ ताम्रयोगः (नवमः)

म्लेच्छतुल्यं विषं पिष्ट्वा प्रदद्याद्रक्तिकामितम् ।
ऐकाहिकं द्व्याहिकञ्च तृतीयकचतुर्थकौ ॥
निहन्यान्नात्र सन्देहो यथा सूर्योदयस्तमः ॥

मा. वि., र. क. ल., ज्वराधिकारे ।

टि०—रसकल्पलतायां विषस्थाने रसो गृहीतोऽतस्तद्द्वयस्यापि दाने न कापि क्षतिः ॥

भाषा—ताम्रभस्मकी बराबर बछनाग पीसकर रखलेवे । इसमेसे १-१ रत्ती मधु वगैरहके साथ देनेसे ऐकाहिक, द्व्याहिक, तृतीयक और चातुर्थिक ज्वरोंको इसतरह नष्ट करता है । जैसे सूर्य अन्धकारका नाश करता है ॥ ३२ ॥

३३ ताम्रयोगः (दशमः)

सताम्रो रस एवैकः पीतः शूलनिवारणः ।
कृमिजाते तुलस्या वा कषायः शर्करायुतः ॥

चि. क., शूले ।

भाषा—१ रत्ती ताम्रभस्मकेसाथ अकेली पारदभस्म १ रत्ती खानेसे शूल दूर होता है । यदि कृमिजशूल हो तो ऊपरसे शक्कर मिलाया हुआ तुलसीकारस या क्वाथ पिलाना चाहिये ॥ ३३ ॥

३४ ताम्रयोगः (एकादशः)

कन्यातोयेताम्रं पत्रंतप्तंवारान् विंशतिं क्षिपेत्तत् ।
रसतस्ताम्रं द्विगुणं ताम्रात्कृष्णाभ्रकं द्विगुणम् ॥
एतत्सिद्धं त्रितयं चूर्णितताम्रार्द्धिकैः पृथग्युक्तम् ।
पिप्पलीविडङ्गोषणैः श्लक्ष्णं द्वैमाषिकं योज्यम् ॥
शूलाम्लपित्तशोथग्रहणीयक्ष्मादिकुक्षिरोगेषु ।
रसायनं महदेतत्परिहारो नियमितो नात्र ॥

र. चि., शूले.

भाषा—घीकुंआरके रसमे तांबेके बारीक पत्रोंको तपाकर बीसवार बुझावे । यह तांबा २ भाग, शुद्धपारा १ भाग, कृष्णाभ्रक भस्म ४ भाग, इन सबको मिलाकर तुलसी, अथवा अदरख वगैरहके साथ मिलाकर इसमे पीपल, विडङ्ग और मिरच खूब बारीक पीसकर तांबेसे आधे आधे भाग मिलाकर रखछोड़े । इसमेसे २ माशे समयोचितानुपानके साथ देनेसे शूल, अम्लपित्त, शोथ, ग्रहणी, राजयक्ष्म और कुक्षिरोग इनसबको यह नष्ट करता है । इसमे कोई खास परहेज़ नहीं है ॥ ३४ ॥

३५ ताम्रयोगः (शुल्वसुन्दरः २) १२

रसेन ताम्रस्य दलानि लिप्त्वा
गन्धेन ताम्रद्विगुणेन पश्चात् ।
वस्त्रेण बद्ध्वाऽथ समुद्रजेन
क्षारत्रयेणापि च वेष्टयित्वा ॥११२॥
मृदा च संलिप्य पुटं ददीत
दलानि ताम्रस्य विचूर्णयेच ।
धत्तूरचित्रार्द्रकटुत्रयैश्च
विमर्दयेत्तत्त्रिदिनप्रमाणम्
कलाप्रमाणश्च विषञ्च दत्त्वा
वल्लं ददीतास्य च वातशूले ॥११३॥

र. दी., शूले । रसरत्नसमुच्चये क्षारताम्रमिति नाम । नि. र., रसायनसं., र. कौ., र.क., र. चि., र. का., वै.चि., एषु शुल्वसुन्दरेति नाम ।

टि०—समं ताम्रदलं लिप्त्वा रसेन्द्रेण द्विगन्धकम् । मृद्वस्त्रेण समाऽऽवेष्ट्य पुटयन्त्रे पुटं ददेदिति शुल्वसुन्दरस्य पाठोस्ति तदपेक्षया प्रकृतपाठ एव श्रेयानिति । शुल्वसुन्दरे आर्द्रकस्थाने भावनायां वालारिर्गृहीतस्तत्रद्वयोरपि भावनायां न कापि क्षतिरस्ति ।

भाषा—ताम्रके कण्टकवेधीपत्रलेकर पत्रोंसे दूने पारे गन्धककी कज्जली बनाकर नीबूके रसमे घोटकर पत्रोंपर लपेटकर गोला बनाय सुखाकर चारतह कपड़ेमे बांधकर गेंद जैसा बनाले फिर इसके वज़नसे दूना सेंधानमक नीबूके रसमे पीसकर कपड़ेपर लेपकर उस पोटलीपर लपेट दे । इसके बाद इसीतरह उस पोटलीके बराबर सज्जीको नीबूके रसमे पीसकर कपड़ेपर लेपकर पोटलीपर

लपेट दे। सूखनेपर इसीतरह सुहागेको लपेटे। फिर अच्छीतरह पोटलीको सुखाकर ३-४ कपड़-मिट्टी सुखासुखाकर देकर शरावसम्पुटमे बन्दकर गजपुटकी आंचदे। स्वाङ्गशीतल होनेपर निकालकर धतूरा, चित्रक, अदरख और त्रिकटु इन प्रत्येकके यथा सम्भव स्वरस अथवा क्वाथसे १-१ रोज़ मर्दनकर सुखाकर इसमे १६ वां हिस्सा शुद्धवछनाग मिलाकर रखछोड़े। इसमेसे ३-३ रत्ती अदरख के रस वगैरहके साथ देनेसे वातशूल नष्ट होता है॥

३६ ताम्रयोगः (त्रयोदशः)

ताम्रपत्रं रवेः क्षीरे निर्गुण्डीस्वरसे तथा।
त्रिकण्टजे स्नुहीक्षीरे ताम्रं दग्ध्वा क्षिपेत्ततः
रसस्यार्द्धपलं शुद्धं गन्धकस्य पलन्तथा।
कज्जल्यर्द्धेन जम्बीररसेन ताम्रतः पलम्॥
परिलिप्यान्धमूषायां दद्यात्पञ्चपुटांल्लघून्।
सम्मर्द्य मधुसर्पिर्भ्यां ततो रक्तिमितं लिहेत्॥
भगन्दरे सर्वभवे खाद्यं सर्वव्रणेषु च ॥११६॥

भै. र., भगन्दरे।

भाषा—तांबेके बारीक पत्रोंको खूबलालकर आक और थूहरका दूध, सँभालू और गोखरूके स्वरसमे सात ७ बार बुझावे। फिर यह तांबा १ पल, शुद्धपारा आधा पल, शुद्धगन्धक १पल, लेकर पारे गन्धककी नीलवर्ण कज्जलीकर कज्जलीसे आधाजंभीरीकारस मिलाय तांबेपर लेपकरके गोला बनाले। फिर अन्धमूषामे बंदकर लघुपुटकी आंच देवे। ऐसे पारे और गन्धकका लेपकर पाँच पुट देनेसे यह सिद्धहोजायगा। इसमेंसे १ रत्तीसे २ रत्तीतक औचिती देखकर मधु और घीमे मिलाकर देनेसे त्रिदोषज भगन्दर, और समस्तव्रण नष्ट होते हैं॥३६॥

३७ ताम्रयोगः (चतुर्दशः)

मृतताम्रस्य गुञ्जैकं सितया सह लेहयेत्।
द्राक्षां पथ्यासमां खादेदनुस्यादम्लपित्तजित्॥

यो. म., रसायनसं., व. रा., अम्लपित्ते।

टि० धमपराजीये द्राक्षापथ्ये ताम्रेण सह पिष्ट्वा वटिकाः कृता दृश्यन्ते फले नास्ति विशेषः। भवति भिषग्योगिणोश्च दाने भक्षणे च सौकर्यमिति विशेषः, नाम च ताम्रकल्प इति स्थापितम्।

भाषा—ताम्रभस्म १ रत्ती शक्कर और मधुके साथ चाटकर द्राक्ष और हर्रे मिलाकर इतनेप्रमाणमे खाय जिससे कि १-२ झाड़े आजांय। इस प्रयोगसे अम्लपित्त बहुतजल्दी नष्टहोताहै॥ ३७॥

३८ ताम्रयोगः (पञ्चदशः)

शुद्धं पारदगन्धकाभिकलितंयुक्त्याहतं यः पुमानद्यात्ताम्रमनूतने शशिकलाक्षौद्रान्वितं पथ्यभुक्
कोठोदर्दकशीतपित्तजरुजो नश्यन्त्यवश्यं दिनैरल्पैरस्य नरस्य यान्ति विलयं कुष्ठानि चाष्टादश

वृ. यो. त., रसायनसं., शीतपित्तोदर्दकुष्ठेषु।

भाषा—शुद्धपारे और गन्धकके योगसे मारेहुए २ रत्तीताम्रको ४ आनेभर बाकुचीके चूर्णके साथ मधुमे मिलाकर चाटनेसे और पथ्यपूर्वकरहनेसे कोठ, उदर्द, शीतपित्त और १८ प्रकारके कुष्ठ, थोड़ेही दिनोंमे नष्टहोजाते हैं॥ ३८॥

३९ ताम्रयोगः (षोडशः)

ताम्रचूर्णं समोशीरं केसरं शीतवारिणा।
पीतं मूर्च्छां द्रुतं हन्याद्वृक्षमिन्द्राशनि र्यथा॥

र. सु., यो. म., र. क. ल., र. चं., मूर्च्छायाम्।

भाषा—ताम्रभस्म, खस और केसर ३—३ रत्ती लेकर एकजगह मिलाकर ठंढे पानीके साथ पीनेसे मूर्च्छाको इसतरह नष्ट करताहै जैसे वृक्षको बिजली नष्टकरतीहै॥ ३९॥

४० ताम्रयोगः (सप्तदशः)

ताम्रं दुरालभाक्वाथैः पीतन्तु घृतसंयुतम्।
निवारयेद्भ्रमं शीघ्रं मूर्च्छाञ्चापि सुदुस्तराम्॥

र. सु., यो. म., वै. द., र. क. ल., र. क., र. चं., भ्रमे।

भाषा—शुद्ध ताम्रभस्म एकरत्तीसे तीनरत्तीतक घीके साथ चाटकर जवासाका क्वाथ पीनेसे भ्रम और दुस्तर मूर्च्छा इनको यह बहुत शीघ्र नष्टकरताहै॥ ४०॥

४१ ताम्रयोगः (अष्टादशः)

अथवा सुमृतं ताम्रं सूक्ष्मैलाविजयान्वितम् ।
माषमात्रं मधुयुतं मूत्रकृच्छ्रनिवारणम् ॥१२१

ना. वि., र. म. मा., मूत्रकृच्छ्रे ।

भाषा—अच्छीतरह माराहुआ तांबा, छोटी इलायची और भांग इनतीनोंको समभागमे मिलाकर १ माशाके प्रमाणमे मधुके साथ मिलाकर चाटनेसे मूत्रकृच्छ्रको नष्टकरताहै ॥४१॥

४२ ताम्रयोगः (ऊनविंशः)

रसगन्धकयोः कर्षं प्रत्येकं शोधयेद्भिषक् ।
ततः कज्जलिकां कृत्वा नैपालं ताम्रपत्रकम् ॥
कण्टवेध्यं विधातव्यं सर्वमेकत्र कारयेत् ।
पात्रे हि मृत्तिकोद्भूते परं दद्याद्रसं शुभम् ॥
पक्वजम्बीरसम्भूतं यथा प्लावितमेव तत् ।
आतपे स्थापयेत्पश्चाद्यावत्पङ्कोपमं भवेत् ॥
पाणिना मर्दयित्वा तु वटिकां कारयेत्ततः ।
विशोष्य भक्षयेद्रक्तिद्वयं तस्मान्महौषधात् ॥
दिनत्रयान्तरेणैव रक्तिरक्तिं विवर्धयेत् ।
परिहारविधिस्तेन धान्यजीरानुपानतः ॥
प्रातरेतद्विधातव्यं हन्ति पित्ताम्लसम्भवम् ।
ग्रहण्यामुद्भवं शूलमम्लपित्तञ्च दारुणम् ॥
अजीर्णं रक्तपित्तञ्च क्षयं कुष्ठं विशेषतः ॥

र. र., र. चं., अजीर्णे ।

भाषा—शुद्धपारा, गन्धक और नेपाली ताम्रके बारीकपत्र इनसबको जंभीरीका रसदेकर १-२ रोज घुटावे । फिर मिट्टीके सकोरेमें रखकर इतना रस देवे जिसमेकि यह आप्लुतहोजाय फिर उसको कड़े धूपमे रखदे । यह देखतारहे कि तांबेके पत्र गलकर उसमे अदृश्य होजांय । फिर उसकी २-२ रत्तीकी गोलियें बनाकर रखछोड़े । इनमेसे १-१ गोली खाकर चार ४ आनेभर जीरा और धनियांको पानीमे पासकर उसके ऊपरसे सुबहमे लेनेसे तीनदिनमे भयङ्कर अम्लपित्त और सङ्ग्रहणीसे उत्पन्न शूल, अजीर्ण, रक्तपित्त, क्षय और कुष्ठ इनको यह नष्टकरताहै ॥ ४२ ॥

४३ ताम्रयोगः (विंशः)

मृतं ताम्रं पलैकन्तु चिञ्चाक्षारं पलाष्टकम् ।
रामठं च शिवां व्योषं करञ्जबीजचोरकम् १२८
प्रत्येकं पलमात्रन्तु चूर्णं कोष्णोदके पिबेत् ।
कर्षैकं शूलशान्त्यर्थं सर्वोपद्रवसंयुतम् ॥१२९॥

र. र., र. को., र. क., र. चं., शूलाधिकारे । र.चं., शूलगजकेसरी ।

भाषा—विशुद्ध ताम्रभस्म १ पल, इमलीकाक्षार ८ पल, भुनीहींग, हर्रे, त्रिकटु, करंजबीज, खरजवायण ये प्रत्येक १-१ पल लेकर कूटकपड़छानकर मिलाकर रखछोड़े । इसमेसे १-१ तोला गरमपानीके साथ लेनेसे समस्त उपद्रवोंके साथ शूलको नष्टकरताहै ॥ ४३ ॥

४४ ताम्रयोगः (एकविंशः)

स्थाल्यां सम्मर्द्य दातव्यौ माषिकौ रसगन्धकौ
नखक्षुण्णं तदुपरि तण्डुलीयं द्विमाषिकम् १३०
ततो नैपालताम्रस्य विधाय सुकपालकम्
त्र्यूषणैः पूरयेदूर्ध्वं सर्वां स्थालीं ततोऽनलः ॥
स्थाल्यधो नालिकां यावद्देयस्तेन मृतस्य च ।
रक्तिकैकां समादाय त्रिफलाचूर्णरक्तिकाम्१३२
रक्तिमेकां त्र्यूषणस्य विडङ्गस्य च रक्तिकाम् ।
घृतेन मधुनाऽऽलोड्य प्रथमे दिवसे ततः ॥
रक्तिवृद्धिं प्रतिदिनं कुर्याच्चाम्रादिषु त्रिषु ।
स्थिराविडङ्गरक्तिस्तु यदा भेदोऽविवक्षितः ॥
रक्तदुष्टौ विडङ्गस्य भेदोऽयं सम्प्रदर्शितः ।
तदा विडङ्गं त्वधिकमन्यथा रक्तिकाद्वयम् ॥
द्वादशाहं योगवृद्धिस्ततो ह्रासक्रमोऽप्ययम् ।
ग्रहणीमम्लपित्तञ्च क्षयंशूलञ्चसर्वथा ॥
ताम्रयोगोजयत्येष बलवर्णाग्निवर्धनः ॥१३६॥

टो., च. द., ग्रहण्याम् ।

भाषा—एकनई मजबूतहंडीपर ६-७ कपड़मिट्टी देकर उसमे समभाग पारे और गन्धककी नीलवर्ण

कज्जलीरखकर कज्जलीकी बराबर कटेयाकी चौलाई को नखोंसे तोडकर कज्जलीपर डालकर कज्जलीकी बराबर शुद्धनेपाली ताम्रकीकटोरी ढकदे। और गुडचूने वगैरहसे सन्धि बंदकर त्रिकटुके बारीकचूर्णसेहंडीको ऊपरतक भरदे। फिर उसपर ढक्कन देकर ५-६ कपडमिट्टी करदे। सूखनेपर चूल्हेपर चढाय ४ पहरकी तीक्ष्ण अग्नि देकर स्वाङ्गशीतल होनेके बाद भस्महुई ताम्रकी कटोरीको निकालकर खरलकर रखछोडे। इसमेंसे एक एक रत्ती लेकर त्रिफला, त्रिकटु, विडङ्ग इनकी १-१ रत्तीके साथ मिलाकर घृत और मधुके साथ देवे। फिर प्रतिदिन १-१ रत्ती सबकी बढावे। पर विडङ्गकी एक रत्ती रक्खे। जब रक्तविकार कुष्ट प्रभृतिमे इसका प्रयोगकरना होतो प्रथमहीसे ताम्रादिकोंकी १-१ रत्ती और विडङ्गकी २ रत्ती से बढाना शुरूकरे। ऐसे १२ रोजतक बढाता जाय फिर १२ रोज तक उसीतरह घटावे। यह इसका १ कल्प हुआ। इसतरह करनेसे ग्रहणी, अम्लपित्त, क्षय, शूल, मन्दाग्नि, धातुक्षय प्रभृतिको यह बहुतशीघ्र नष्टकरताहै ॥४४॥

४५ ताम्रयोगः (शूलहरः) (द्वाविंशः)

अच्छं कण्टकवेध्यं शुद्धं नेपालजं ताम्रम् ।
हलिनीमूलककल्कैः लिप्त्वा पुटेच्छरावैस्त्रिः
आप्लाव्य जम्भनीरै र्लोहं सूतं सुगन्धकंशुद्धम्
दत्त्वा पुटेत्सुयुक्त्या स्वाङ्गेशीतंसुचूर्णयेद्वैद्यः ॥
सर्वाष्टांशं सूतं बद्धं वा गन्धकार्धसंयुक्तम् ।
भूयो दत्त्वा घृष्ट्वा यथानुपानं प्रयोजयेत्प्राज्ञः॥
रक्तित्रितयं प्रात र्वाते कफे च सर्वत्र ।
क्षीरं घृतमधुतोयं शीतं चोष्णं रसं वालु १४०
एतच्छूलहरं रसायनवरं गुल्माम्लपित्तापहं,
कासश्वासविनाशनं क्षयहरं पाण्ड्वामयध्वंसनम् ।
कोष्ठस्थान् ग्रहणीगदानपिजयेत्सर्वामयानामजां-
श्छोथार्शोगुदजाग्निमान्द्यमुदरं
प्लीहानमप्युद्धतम् ॥

र. क., शूले ।

भाषा—विशुद्ध नेपाली ताम्रके कण्टकवेधी पत्र बनाकर कलिहारी और मूलीकी जडके कल्कसे लेपित कर शरावसम्पुटमे बन्दकर गजपुटकी तीन आंचदे फिर लोहभस्म, शुद्धपारा और गन्धक ये प्रत्येक उस ताम्रकी बराबर उसमे मिलाकर जंभीरीके रससे मर्दनकर गोला बनाय सुखाकर शरावसम्पुटमे बन्द कर गजपुटकी आंचदे। स्वाङ्गशीतल होनेपर निकालकर इसतमामसे आधा शुद्धगन्धक और अष्टमांश बद्धसूत अथवा शुद्धपारा देवे। और नीलवर्ण कज्जलीकर रखछोडे। इसमेंसे ३-३ रत्ती लेकर सुबहमे दूध, घृत, मधु और पानी (ठंढा या गरम) केसाथ लेनेसे शूल, गुल्म, अम्लपित्त, कास, श्वास, क्षय, पाण्डु, ग्रहणी, उदररोग, शोथ, बवासीर, मन्दाग्नि, प्लीह इनको यह दूर करता है ॥ ४५ ॥

४६ताम्रयोगः (त्रयोविंशः)

शुद्धं ताम्रं समादाय सूक्ष्मपत्राणि कारयेत् ।
निर्वापयेत्तापयित्वा दशवारान् पृथक् पृथक् ।
हेमपुष्प्या स्तथा व्याघ्र्याः सन्धिभग्नकधूर्तयोः
शिरीषपुष्पाऽब्जपुष्प्योः शृगालपुच्छकस्यच ।
करीरपुष्पस्य तथा स्वरसेषु समाहितः ।
सूतगन्धकयोः कुर्यात्कज्जलीं समभागयोः ॥
शिरीषपुष्पस्वरसे मर्दयित्वाऽञ्जनप्रभाम् ।
ताम्रपत्राणि च तया लेपयेद्भिषगुत्तमः ॥
रुद्ध्वा लवणयन्त्रे तु पचेत्तानि दिनत्रयम् ।
निसर्गशीतान्युद्धृत्य सूक्ष्मचूर्णं समाचरेत् ।
उपर्युक्तद्रव्यरसै रेकैकं च पृथग्दिनम् ॥
चक्रिकाः कारयेत्सूक्ष्माः शोषयित्वा सराऽऽतपे
पुटेत्क्रोडपुटे सर्वं स्वरसैरेवमाचरेत् ॥
ताम्रयोगोऽयमुचितानुपानैः सर्वरोगहा ॥

नू. क., सर्वरोगे ।

भाषा—शुद्धताम्रपत्रोंको तपातपाकर स्वर्ण पुष्पी (सत्यानाशी) कटेरी, धतूरा, जोड़तोड़ (पंजाबी), गीदड़तमाखू, सिरसके फूल, करीर पुष्प, श ाहूली इनप्रत्येकके रसोंमें १०-१० बा

बुझाकर शुद्धपारा और गन्धककी समभाग कज्जली बनाय शिरीषपुष्पस्वरसमें घोटकर ताम्रपत्रोंपर चढ़ाय लवणयन्त्रमें बन्दकर तीन दिनकी आंच देकर स्वाङ्गशीतल होनेपर निकालकर उक्त द्रव्योंके रसोंमें एक एक रोज़ घोटकर टिकियां बनाय शराव सम्पुटमें बन्दकर पांचसेर कण्डोंकी आंचदे। ऐसे बारबार प्रत्येककी १०-१० आंचेंदेवे। फिर बारीक पीसकर रखछोड़े। इसमेंसे तत्तद्रोगहरानुपानके साथ एक एक रत्ती देनेसे समस्तरोग दूर होते हैं यह हजारों बारका अनुभूत है। लोकोपकारके लिये यहां प्रकट किया गया है। पाण्डु, प्लीहा, यकृत, गुर्दोंकासोजा मन्दाग्नि, उल्टी, श्वास, कास, हिचकी प्रभृतिमें रामबाणकीतरह कामकरता है॥ ४६ ॥

४७ ताम्ररसायनम्

तनु पत्रीकृतं ताम्रं नैपालं गन्धकं समम्।
दत्त्वा चोर्ध्वमधो मध्ये शरावे तु भिषग्वरः॥
कृत्वा स्वल्पपिधानञ्च स्थालीमध्ये निधापयेत्॥
शर्कराभक्तलेपेन तस्य सन्धीन्निरोधयेत्१५०॥
वालुकाभिः प्रपूर्याथाऽऽगलस्थालीं प्रयत्नतः।
चुल्ल्यामारोप्य यामैकमधो ज्वालां प्रदापयेत्॥
तत आकृष्टताम्रस्य मृतस्य त्विह योजना।
अथकर्षं गन्धकस्य वह्निस्थलोहपात्रगम्१५२
अश्मदण्डेन सम्मर्द्य द्रुतं घृष्टं पुनः पुनः।
रसोम्लमथितः शुद्धस्तावन्मानः प्रदीयते१५३
ततस्तथैवसम्मर्द्य पुनराज्यं प्रदापयेत्।
अष्टबिन्दुकमानञ्च मर्दयेन्मूर्छितं तथा१५४
सर्वं स्यात्तत आकृष्य अश्मदण्डादिकाद् दृढम्
संहृत्यालम्बुपरसप्रस्तेन विलोडितम्॥१५५॥
पुनस्तथैव वह्निस्थे लोहपात्रे विमर्दयेत्॥
अलम्बुपारसैः पश्चाद्गोलकं सम्प्रकल्पयेत् १५६
तं गोलं वस्त्रसंबद्धं पिण्डे त्रिकटुजे पुनः।
वसनान्तरितं कृत्वा पोट्टलीं कारयेत्सुधीः॥
ततस्तां पोट्टलीमाज्ये मग्नां कृत्वा विधारयेत्।
सूत्रेण दण्डसंलग्नां पाचयेत्कुशलो भिषक्१५८
यदा निष्फेनता चाज्ये गुटिका च दृढा भवेत्
तदा पक्वां समाकृष्य रक्तिमेकां तथा घृतम्॥
त्रिकटुत्रिफलाचूर्णं तुल्यं प्रातः प्रयोजयेत्
तक्रं स्यादनुपाने तु ह्यम्लपित्तोच्छ्रये पुनः॥
त्रिफलैव समा देया कोष्णं वारि पिबेदनु।
सप्तमं दिवसं यावदेकैकां वर्धयेत्क्रमात् १६१
यथा वृद्धिं गतो योगस्तं तथैवाऽपकर्षयेत्॥
योगोऽयं ग्रहणीयक्ष्मपक्तिशूलाम्लपित्तहा॥
रसायनं समुद्दिष्टं गुदकीलादिनाशनम्।
न चात्र परिहारः स्याद्विहाराहारकर्मसु १६३

वं. से., रसायने।

भाषा—तैलादिकमें शुद्धकरके बारीकपत्र बनायाहुआ नेपाली ताम्र और शुद्धगन्धक समभाग लेकर ६-७ कपड़मिट्टी दियेहुए शरावमें आधागन्धक पीसकर नीचेरख ऊपरसे तांबेके पत्रोंको उसमे दबाकर ऊपरसे फिर दूसरे पत्रे रख थोड़ा गन्धक छिड़ककर फिर बाकीके पत्रोंको रखदे। इसप्रकार जितने पत्रहों उनको तहबतह लगाकर ऊपर गन्धकसे ढककर शरावको दूसरे शरावसे बन्दकर सन्धिको शक्कर और भातसे बन्दकर हंडीमें रखके उसमें गलेतक बालूभरदे। फिर इसको चूल्हेपर चढ़ाकर एकपहर तीव्र अग्निसे पकावे। स्वाङ्गशीतल होने पर निकालकर खूब बारीक पीसकर रखछोड़े। फिर उसकी बराबर गन्धक मिलाकर अग्निपर चढ़ावे। गन्धकके गलजानेपर २-४ रोज़ नीबूके रसमें घोटाहुआ शुद्धपारा गन्धकके बराबर डालकर लोहेके डंडेसे मर्दनकरे। कज्जली होजानेपर ये सबचीज़ें तोले तोलेभर होंतो ८ बूंदके अंदाज उसमे घी डालकर आगसे नीचे उतारकर लोहेके डंडेसे खूब मर्दनकरे। फिर उसमे २ पल गोरखमुण्डीका अङ्गस्वरस देकर चूल्हेपर चढ़ाकर घोटते घोटते सुखादे। फिर नीचे उतारकर गोरखमुण्डीका रसदेकर १गोला बनाकर ४-५ तह कपड़ेके अन्दर लपेटकर पोटली बनाले। इसपोटलीको चतुर्गुणित त्रिकटुके कल्कमे

रखकर कपड़ेमे लपेटदे । फिर लोहेके पात्रमे गायका घी इतनाभरे कि पोटली उसमे डूबजाय और इस पोटलीको इसतरहलटकावे कि बर्तनके पेंदेसे २ अङ्गुल ऊंचीरहे । फिर धीरे २ आंच देकर पकावे जब घीमेसे फेन निकलना बंदहोजाय और पोटली एकदम कड़ी होजाय तब निकालकर रखछोड़े । स्वाङ्गशीतल होनेपर त्रिकटुका कल्क और वस्त्र वगैरहको निकालकर भीतरसे रसके गोलेको निकाललें इसमेसे १ रत्तीकी मात्रा लेकर त्रिफला और त्रिकटुकाचूर्ण ३–३ रत्ती मिलाकर घीके साथ चाटकर ऊपरसे छाछपीवे । अगर अम्लपित्तकी अधिकता होतो त्रिकटु न दे । और छाछकी जगह केवल गरमपानीदे इसतरह सातरोजतक १–१ रत्ती रसकी तथा अनुपानकी बढ़ाताजाय । आठवें रोजसे १–१ रत्ती घटानी शुरूकरे । इसतरह १४ रोजमे यह प्रयोग पूरा होगा । इससे ग्रहणी, राजयक्ष्म, पक्तिशूल, अम्लपित्त, बवासीर ये सब नष्टहोकर रसायनका फल होताहै । इसयोगमे विहार तथा आहारमे खासकोईबन्धन नहींहै ॥४७॥

४८ ताम्ररसायनम्

कण्टकवेधनयोग्यं ताम्रस्य पत्रं पलं समादाय।
कर्षाधिकपलमात्रेऽम्लेऽग्नौ निर्दहेद्भिषक्कुशलः
एवं पुनरपि वारद्वितयं विमर्द्यमतिगाढम् ।
प्रत्येकं मिलितेष्वपि तथैव वारत्रयं दद्यात् ॥
इन्द्रस्वरसभावितगन्धकलिप्तन्तुताम्रकं कृत्वा ।
खर्परसम्पुटमध्ये विनिधाय मृदा तमुपलिम्पेत्
हस्तप्रमाणवदने गर्ते चतुर्हस्तपरीणाहे ।
दत्त्वेन्धनं करीषन्तुपमध्ये दहनमाधाय १६७
तदुपरि दत्त्वा ताम्र-
सम्पुटनिहितं पुनश्च करीषाभिः ॥
संछाद्य तत्र वह्निं प्रज्वालयेद्भिषग्विशङ्कः १६८
तावत्पुटं प्रदेयं यावत्ताम्रश्च मृत्युमायाति ॥–
मृतमधिगम्य च भाण्डे
कचिदपि तत्स्थापयेत्पुटितम् १६९
तदनु तावत्प्रमाणं पारदमादायमर्दयेन्निपुणः ।
खल्वशिलाया मध्ये गृहधूमनिशेष्टिकाचूर्णैः ॥
पश्चाद्वारिविधानं पुनश्चत्रिकटुना खल्वयेन्निपुणः
मर्दितसूतस्यैवं पातनयन्त्रेण चोद्धारः ॥१७१॥
समकृतगन्धकसहितं
पुनरपि कृत्वा खल्वयेत्त्रिदिनम् ।
एवं च शुद्धसूतं मृतताम्रविमिश्रितं कुर्यात् १७२
दुग्धपलाष्टकमाज्यं तत्समश्च नारिकेलजलम् ।
द्विपलं कलितत्रिफलाकाथश्च चतुर्गुणं दद्यात्
सुदृढे ताम्रकटाहे मार्तेवास्थापयेद्विविधविधिज्ञः।
दर्व्याच ताम्रमय्याऽऽयस्या चाल्यं पुनःपचेद्वैद्यः
ज्ञात्वा पाकं भूयो झटितिकटाहमवतारयेन्निपुणः
तदनु च तस्मिन्निष्टाः
संस्कृती विचार्य विदध्यान्निपुणः ॥
त्रिकटुत्रिफलालोहित–
चित्रकविडङ्गकभद्रमुस्तानाम्
जीरकयोः प्रत्येकं कर्षकलितचूर्णनिक्षेपः १७६
पुनरैलाकङ्कोललवङ्गजातीफलजातिकोषाणाम् ।
चूर्णं गुडत्वचोऽपि माषाष्टपरिमितं दद्यात्१७७
ततः सुशीते ताम्रे
माषाष्टकमतिविकीर्य घनसारम् ।
ताम्रमयादिकभाण्डे स्निग्धे मार्ते वा स्थाप्यम्॥
मनसि च विधाय सूर्यपूजां कृत्वा शुभे दिने चर्क्षे।
आदाय माषमेकं दधिमधुना सह भक्षयेत्सुचिरम्
तदनु चकण्ठप्रांशक्षीरंकार्यमनुपानमधिकाल्पम्
नक्तमनल्पं पुनरपि ताम्बूलं भक्षयेत्सरुजः ॥
गुञ्जाद्वयं त्रयं वा पञ्चकं वृद्धिं माषकं यावत् ।
स्थितमतथोपरिष्टात्प्रतिलोमंहासयेत्तदनु १८१
खादितमेतन्नियतं यस्य न ताम्रं प्रवर्तते प्रायः
तत्रापि सयवक्षारस्त्रिफलाकाथोऽत्र पातव्यः
प्रारब्धेऽस्मिंस्ताम्रे
कतिचिद्दिवसान्न भक्षयेन्मत्स्यान् ।
क्रोधश्च दिवा निद्रां वेगनिरोधांस्त्यजेद्वैरम् ॥
शाकं चाम्लकवर्ज्यं दधिबहिरम्लं भक्षयेदेव ।

जह्यात्तिक्तकषायौजह्यात्तात्कालिकींपुष्टिम् १८४
घृष्यं मधुरं शीतलमथशाल्यन्नंमधुघृतमश्नीयात्
मद्गुररोहितशकुलशशमृगैणादिकं मांसम् १८५
खादन्नेतद्द्वेषजमजीर्णश्च न जानाति ॥
जयति च कफमतिगाढं
कासं श्वासञ्च निवारयति ॥ १८६ ॥
विरचितमेतत्ताम्रं धर्माध्यक्षेण धर्मपालेन ।
विन्ध्याटवीये पिण्डितमिडानिबन्धचर्याभिः ॥

बं. से., रसायने ।

भाषा—तांबेके कण्टकवेधी पत्र १ पल लेकर ५ तोले बिजोरे वगैरहके अम्लरसमे डालकर अग्निमे पकावे । रसजलजानेके बाद वैसेही फिर रस डालकर जलावे । इसतरह तीनबार करे । फिर कुरैयाके अङ्गस्वरससे शुद्धगन्धकको कईवार भावनाएं देकर और इसी रसमे पीसकर उनपत्रोंपर समान प्रमाणमे लेपकर सुखाकर मिट्टीके शरावमे बन्दकर ३-४ कपड़मिट्टी देकर सम्पुटको सुखाले । फिर ४ हाथ लंबा चौड़ा खड्डा खोदे । पर उसका मुंह एकही हाथ चौड़ारहे । उसमे सूखी लकड़ी और छानोंकी करसी आधेतक भरकर बीचमें थोड़ासा भूसा डालकर अग्नि रखदे । जिसमे कि वह तमाम अग्नि अंदर व्याप्त होजाय और बुझनेकी शंका न रहे । उस तुषाग्निपर इस तांबेके सम्पुटको रखकर ऊपरसे थोड़ासा भूसा और देकर करसी और लकड़ियोंसे खड्डेको भरदे । उसमेसे जब अग्निकी लपट निकलने लगे तब उसका मुंह खपड़े वगैरहसे इसतरह ढकदे कि अधिक हवा प्रवेश न करे और अग्निभी न बुझे । जब वह १०-१२ दिनमे ठंढा होजाय तब निकालकर खरलकरके रखछोड़े । इसके बाद घरका धूंआं, हल्दी, ईंट, त्रिकटु इनमे १-१ रोज मर्दनकर डमरूयन्त्रसे उडाकर पारेको शुद्धकरले फिर उसकी बराबर शुद्धगन्धक देकर घीकुंआर वगैरहके रसके साथ ३ रोज मर्दनकर सुखाकर आतशी शीशीमें भरकर वालुकायन्त्रमे पकाकर रससिन्दूर बनावे । यह रससिन्दूर और पूर्वोक्त ताम्रभस्म समभाग लेकर इकट्ठे मर्दनकरले फिर तांबे या मिट्टीकी कड़ाहीमे डालकर उसमे दूध घी ५-५ पल, नारियलका जल २ पल, त्रिफलाका काढ़ा सबसे चौगुना देकर मन्द आंचसे पकावे । और तांबे या लोहेकी कड़छीसे घोटतारहे, जबपानी जलजाय और मात्रा एकदम लालहोजाय तबनीचे उतारकर इसको जिसरोगके ऊपरदेनाहो उसरोगको नष्टकरनेवाले गणोंके क्वाथोंमे इसको परिपक्वकरके त्रिकटु, त्रिफला, रक्तचित्रककीजड़, विडङ्ग, नागरमोथा, स्याह और सफेद जीरा इनप्रत्येकका सूक्ष्मचूर्ण १—१ तोला मिलावे । और इलायची शीतलचीनी, लौंग, जायफल, जावित्री, दालचीनी इन प्रत्येकका चूर्ण, आठ आठ माशे मिलावे । इसके बाद अच्छी तरह ठंढा होनेपर १ माशे उड़ायाहुआ कपूर मिलाकर ताम्र अथवा लोहेके भाण्डको घीसे पोतकर अथवा घीके चिकने मिट्टीके पात्रमे रखदे । फिर मरीजको वमन विरेचनादिकसे शुद्धकर उसके शुभ जन्मनक्षत्रादि देखकर सूर्यका पूजनकर इस रसायनमेसे १ माशालेकर दही और मधुके साथ मिलाकर खाकर यथेष्ट दूधपीवे । फिर दिनभरकुछ न खाय । रात्रिमे यथेष्टदूधसे तृप्तिकर ताम्बूलका सेवनकरे । इसके बाद दूसरे दिनसे २—२ रत्ती अथवा तीन ३ या पांच ५ रत्ती रोज बढ़ाकर दूसरा १ माशा न बढ़े तबतक इसतरहक्रम जारी रक्खे । २ माशा मात्रा होनेपर जिसतरह बढ़ायाहै उसीतरह घटाकर २ रत्तीतक लावे । इसका योग पूरा होनेतक यदि मनुष्यके शरीरमे फेरफार न मालूमहो तो फिरसे इसयोगको चालूकरे । और उसके ऊपर १ पल त्रिफलाके क्वाथमे३ माशे यवक्षार डालकर पिलावे । इस ताम्रयोगके प्रारम्भ करनेपर थोड़े दिनतक मछली न खाय । और क्रोध, दिनकी निद्रा, वेगरोध, शाक, और अम्लपदार्थ इनका परित्यागकरे । दही खट्टा होय तो भी भक्षणकरे ।

तिक्तकषायरसोंका वर्जनकर तत्कालीन मेदवगैरहकी क्षीणता होनेके कारण जोकुछशरीरमे कृशता हो उसकी तरफ ख्याल न करे । वृष्य, मधुर और शीतवीर्य पदार्थ, पुराने चावल, मधु, घृत, मद्गुर और रोहित (रोहू मछली), शकुल (शलमांछ वं.), खरगोश, साधारण और कालामृग, इनका मांस खाय । इसरसके खानेवालेको अजीर्णनहीं होताहै और इससे अत्यन्त बढ़ाहुआ कफ, कास, श्वास, येसब नष्ट होतेहैं । इसको विन्ध्यवासीने बनाया है ॥

४९ ताम्ररसायनम् (तृतीयम्)

गन्धकं जीर्णताम्रञ्च सूतकञ्च समांशकम् ।
तण्डुलीयकमूलस्य रसे चाहिदलस्य च
लोहपात्रे पचेत्तावद्यावत्तद्गुलिकायते ।
वस्त्रे तत्पोट्टलीं बद्ध्वा वेष्टयेत्तां सुपिष्टया ॥
आमलक्या ततः पक्त्वा सर्पिषा मृदुवह्निना ।
शर्करामधुसर्पिर्भिरालोड्य विधिवल्लिहेत् ॥
नारिकेलपयः पेयं तक्रं चानुयथाविधि ।
आचरेद्ब्रह्मचर्यन्तु हितार्थं वैद्यवत्सलः ॥
दुर्नामप्लीहपाण्डुत्वज्वरकासादिकान्गदान् ।
अग्निमान्द्यकृतान्सर्वान्निहन्यात्क्षिप्रमेव तु ॥

वं. से., (रसायने), र. का., कासाधिकारे ।

भाषा—शुद्धगन्धक, ताम्रभस्म और शुद्धपारा समभाग लेकर कांटेवाली चौलाई और पान इनका अलग २ आठआठगुना रस देकर लोहेके पात्रमे पकावे । जब गोली बंधने लायक होजाय तब उसका गोला बनाकर कपड़ेमे लपेटकर पूर्वोक्त रसोंसे आंवलोंको बारीकपीस इसगोलीसे चतुर्गुणित कल्कमे इसपोटलीको रखकर लोहेके पात्रमे घी भरकर इस पोटलीको दोलायन्त्रमे लटकावे । परन्तु पोटली बरतनके पेंदेसे दो अङ्गुल उंची और घीमे डूबीहुई रहनी चाहिये । फिर धीरे २ आंच देकर पकावे । जब घीमेसे फेन आना बंद होजाय और गोली परिपक्व होकर कड़ी होजाय तब निकालकर रखछोड़े । इसकी १-१ रत्ती मधु और घीके साथ चाटकर नारियलका जल अथवा छाछ पीवे । और रोज़ १-१ रत्ती बढ़ावे । सातदिन बाद फिर १-१ रत्ती घटावे तो १४ दिनमे इसका प्रयोग पूरा होता है । अगर इतनेमे कार्य न होतो दूसरा अथवा तीसरा प्रयोगकरे । इसमें ब्रह्मचर्य रखना प्रधान है । यह रसायन बवासीर, प्लीह, पाण्डु, ज्वर, कास, श्वास, मन्दाग्नि इनसबको दूर करता है ॥ ४९ ॥

५० ताम्ररसायनम् (खण्डखाद्यं) ४

रसस्य कर्षमादाय कालिन्दस्य रसेन च ।
खल्वयित्वा च सप्ताहंदशाहं वाऽर्कवासरान् ॥
नैपालञ्च वरं ताम्रं कृतपत्रंप्रलेपयेत् ।
गन्धकस्य विशुद्धस्य सङ्गृह्य च पलार्धकम् ॥
सूर्यावर्तरसेनापि शोधयेत्सप्तवारकम् ।
पीतजामातृजरसे भावयेत्सप्तधा पुनः ॥१९५॥
पश्चाद्विशोष्य सञ्चूर्ण्य पत्राणाञ्च तथोपरि ।
चूर्णं दत्त्वा च संस्थाप्य स्थाल्याः पाकं समन्ततः
अहोरात्रगते पाके ताम्रात्तमुद्धरेत्सुधीः ।
चूर्णयित्वा ततस्ताम्रं पटघृष्टञ्च कारयेत् १९७
गुडूच्याः सप्तकर्षास्तु खण्डात्समार्धमुष्टिकम् ।
सूर्यावर्तगुडूचीभ्यां स्वरसं द्विशरावकम्॥१९८॥
घृतस्य च पलं दत्त्वा पाचयेन्मृदुनाग्निना ।
सम्यक् पाकं तु विज्ञाय ततस्तमवतारयेत् ॥
एलाकर्पूरजात्यौ च यथालाभं पलानि च ।
चूर्णयित्वा विनिःक्षिप्य भक्षयेच्च दिनेदिने ॥
शूलमामं विषं हन्ति अम्लपित्तं वमिं तथा ।
अन्नद्रवाह्वयं शूलं राज्युत्थञ्च सुदारुणम् २०१
परिणामसमुत्थञ्च सद्यो निर्मूलतां नयेत् ।
ताम्ररसायनं ह्येतन्मुनिभिः परिकीर्तितम् ॥

र. का., अम्लपित्ते ।

भाषा—एक तोले शुद्धपारेको पकेहुए कलौंदेके रससे ७—१० अथवा १२ रोज़ मर्दनकर उसके बराबर नेपाली तांबेके पत्रोंपर लेपकर गन्धकको गलाकर हुरहुरके रसमे ७ वार शुद्धकर पीले

फूलके धतूरेके रससे सातरोज़ मर्दनकर सुखाकर चूर्ण बनाकर ६–७ कपड़मिट्टी दीहुई हण्डीमे चूर्णको छिड़ककर उसपर एक सकोरा ढकदे। और उसकी सन्धि गुड़चूनेसे बन्दकर ऊपर नमक अथवा राख भरकर ढक्कन बंदकर अहोरात्रकी मध्यमाग्नि देवे। स्वाङ्गशीतल होनेपर निकालकर बारीक कपड़छान चूर्णकर गुडूचीका सत्त्व ७ तोले, खांड २८ तो., गुडूची और हुरहुरका रस ३२–३२ तोले, गायका घी ४ तोले लेकर उपरोक्त ताम्रको डालकर मन्द अग्निसे पकावे। जब चाशनीकी गोली बंधने लगे तब उतारकर इलायची, शुद्धकपूर जावित्री प्रत्येक ४ तोले लेकर बारीक चूर्णकर उसमे मिलाकर चिकने वर्तनमे रखछोड़े। इसमेसे ३ मासेसे आधे तोलेतक समय और अग्निबलादिका विचारकर मात्रा कायमकर खानेसे शूल, आमविष, अम्लपित्त, वमि, अन्नद्रवशूल, राज्युत्थ भयंकर शूल परिणामशूल इनसबको यह जड़से नष्ट करता है॥

५१ ताम्राष्टकम्

हिङ्गुव्योषं मधुकरुचकं तिन्तिडीक्षारताम्रं,
सर्वं चैतन्मसृणमृदितं पीतमुष्णोदकेन।
क्षिप्रं शूलं क्षपयति नृणां तीव्रपीडासमेतं,
ध्वान्तं भानोरिव समुदयः साधु ताम्राष्टकं हि

र. र. स., शूले।

भाषा—सुनाहींग, त्रिकटु, मुलहठी, संचल, इमलीका क्षार और ताम्रभस्म येसब समभागलेकर इकट्ठे खरलकर रखछोड़े। इसमेसे १–१ माशा गरमपानीके साथ लेनेसे तीव्र पीडायुक्त शूल गुल्म, और मन्दाग्नि इनसबको यह इसतरह नष्ट करता है जैसे सूर्य अन्धकारको नष्ट करता है॥ ५१॥

५२ ताम्रेन्द्ररसः (वङ्गेन्द्र-लोहसुंदर)

मृतशुल्वसमं सूतं गन्धश्च क्रमपाचितम्।
सम्भाव्य खदिरक्वाथै मंजिष्ठादिगणेन च॥
भृङ्गजेन वटीं बद्ध्वा कुष्ठाद्युदरनाशिनी।
ताम्रेन्द्रो नाम विख्यातः कफवातहरः स्मृतः
एवं रसौ प्रकर्तव्यौ वङ्गेन्द्रलोहसुन्दरौ २०५

रससार., र. का.,

भाषा—ताम्रभस्म, शुद्ध पारा और गन्धक समभाग लेकर पर्पटी बनाकर खैर और मजिष्ठादि गणके क्वाथसे भावनाएं देकर सुखाकर भंगरेके रससे घोटकर ३–३ रत्तीकी गोलियें बनाकर रखछोड़े। इनमेसे १–१ गोली समयोचितानुपानके साथ देनेसे कफवायु, कुष्ठ, शूल, गुल्म और उदररोग इनको यह नष्टकरताहै। इसीतरहसे इसयोगमे ताम्रके स्थानमे वङ्ग मिलानेसे वङ्गेन्द्र और लोह मिलानेसे लोहसुन्दर तैयारहोगा॥ ५२॥

५३ ताम्रेश्वररसः (प्रथमः)

गन्धकस्य पलं प्रोक्तं रसस्य द्विपलं तथा।
नैपालस्य विशुद्धस्य ताम्रस्य च पलं भवेत्॥
ततोगन्धार्धचूर्णेन ताम्रं संयोज्य चूर्णयेत्।
शेषार्धगन्धकं दत्त्वा पारदं मर्दयेद्भिषक्॥
रसेन हस्तिशुण्ड्याश्च लोहपात्रे पचेच्छनैः।
कृत्वा पङ्कसमं पाकं ताम्रेण सह योजयेत्॥
तच्च गन्धकचूर्णेन संवेष्ट्य हविषा सह।
पाचयेत भिषक् प्राज्ञः पाकविन्मृदुवह्निना॥
आलोड्य मधुसर्पिभ्यां भुक्त्वा तक्रं पिबेदनु।
अग्निमान्द्यमजीर्णश्च ग्रहणीपाण्डुकामलाः॥
परिणामरुजं चाशु नाशयेच्च प्रयोजितम्॥

वं. से., र. का., शूले।

भाषा—शुद्धगन्धक १ पल, पारा २ पल और नेपाली ताम्रभस्म १ पल लेकर आधापल गन्धक तांबेमे मिलाकर १–२ पहर घोटकर अलग रखछोड़े। और आधा बचाहुआ गन्धक पारेमे डालकर एकरोज़ घोटकर हस्तिशुण्डीका रसदेकर यहांतक मर्दनकरे कि उसमे पारेकी चमक न रहे। फिर इसको सुखाकर लोहेकी कड़ाहीमे डालकर मंद अग्निसे पकावे। जब कीचड़ जैसा होजाय तब गन्धक मिलेहुए ताम्रके चूर्णको मिलादे। और नीचे उतारकर उसकी गोली बनाकर एक कपड़ेमे कसकर

बांधकर पोटली बनाकर धीमे मन्द आंचसे दोघण्टे तक पकाकर निकालले। ठंढा होनेपर इसको साफ करके रखछोडे। इसमेंसे २-२ रत्ती घी और मधुमें मिलाकर चाटकर ऊपर छाछ पीनेसे मन्दाग्नि, अजीर्ण, ग्रहणी, पाण्डु, कामला, परिणामशूल इनसबको यह नष्ट करता है। इसके प्रयोगमें बीमारीका अधिक प्रमाण होतो केवल तक्रका प्रयोग चलावे ॥ ५३ ॥

५४ ताम्रेश्वररसः (द्वितीयः)

जीर्णं ताम्ररसञ्चैव गन्धकञ्च सुचूर्णितम् ।
स्वर्णमाक्षिकभस्माथ समभागान्प्रकल्पयेत् ॥
पचेद्धत्तरजे द्रावे मन्दंमन्दं दिनावधिम् ।
त्रिफलापिण्डमध्यस्थं विधिवत्सर्पिषा पचेत् ॥
ज्ञात्वा पाकं समुत्तार्य शीतं निष्कास्य भक्षयेत्
विमर्द्य मधुसर्पिर्भ्यां नरिकेलं पिबेदनु २१३
पाण्डुरोगञ्च कासञ्च ज्वरांश्च विषमांस्तथा ।
गुल्मं प्लीहामयञ्चैव विनाशयति भक्षणात्॥

बं. से., ध., र. र., र. का., (ताम्ररसायनम्) ।

भाषा—ताम्रभस्म, शुद्धपारा, गन्धक और स्वर्णमाक्षिक समभागलेकर नीलवर्ण कज्जलीकर कड़ाहीमे रखकर धतूरेका अङ्गस्वरस देकर बहुतमन्द आंचसे ४ पहरतक पकावे। फिर उसकी गोली बनाकर कपड़ेमें लपेटकर धतूरेके रसमें पिसीहुई त्रिफलाके चौगुने कल्कमे रखकर दोलायन्त्रसे घीमे मन्द आंचसे पकावे। जबघीमे फेन आना बंद होजाय और पोटली कड़ी होजाय तब उतारकर रखछोडे। इसमेसे २-२ रत्ती मधु और घीके साथ मिलाकर चाटकर नारियलका जल पीवे। और १-१ रत्ती रोज बढ़ावे। ऐसे सात रोज बढ़ाकर फिर वैसेही कमकरे। ऐसे १४ दिनमे इसका प्रयोग पूरा होगा। इसके सेवनसे पाण्डु, कास, विषमज्वर, गुल्म, प्लीहा येसब बहुत शीघ्र नष्ट होवें। पथ्य समयोचित कायम करे ॥ ५४ ॥

५५ ताम्रेश्वररसः (तृतीयः)

पलानि पञ्च शुद्धानि ताम्रपत्राणि बुद्धिमान् ।
गृहीत्वा योजयेत्तत्र तदर्धं शुद्धसूतकम्२१५
मर्दयेन्निम्बुकद्रावैस्त्रिदिनान्युभयं भिषक् ।
ताम्रपत्रैः समं शुद्धं गन्धकं तत्र निःक्षिपेत् ॥
मर्दयित्वा घटीयुग्मं काचकूप्यां च निःक्षिपेत्
यामानष्टौ पचेदग्नौ वालुकायन्त्रसंस्थितम्२१७
एष ताम्रेश्वरो हन्याच्छ्वासादीनखिलान्गदान् ।
धातुपुष्टिकरश्चैव सूतिकारोगनाशनः ॥२१८॥

बं. द., र. सु., श्वासे ।

भाषा—शुद्धताम्बेके बहुत बारीक पत्र ५ पल, शुद्धपारा २॥ पल, इनदोनोंको नीबूके रसके साथ ३ रोज मर्दनकरके ५ तोले शुद्धगन्धकके चूर्णको उसमेडालकर दोघड़ी मर्दनकर इसकल्कको ६–७ कपड़मिट्टीदीहुई आतशी शीशीमे डालकर आठपहरकी क्रमाग्निसे पकावे। स्वाङ्गशीतल होनेपर निकालकररखछोडे। यह ताम्रेश्वर तैयारहुआ इसकी ३–३ रत्ती समयोचितानुपानके साथ देनेसे श्वास, कास, प्लीह, गुल्म, उदररोग, धातुक्षयऔर सूतिकारोग इनसबको यह नष्टकरताहै ॥ ५५ ॥

५६ ताम्रेश्वरवटी

हिङ्गु त्रिकटुकं चैवापामार्गस्य च पत्रकम् ।
अर्कपत्रं स्नुहीपत्रं तथाच समभागिकम् २१९
सैन्धवं तत्समं ग्राह्यं लौहं ताम्रञ्च तत्समम् ।
प्लीहानं च यकृद्गुल्ममामवातं सुदारुणम् ।
अर्शांसि घोरमुदरं मूर्च्छां पाण्डु हलीमकम् ॥
ग्रहणीमतिसारञ्च यक्ष्माणं शोथमेव च ॥
एतानन्यांश्च जयति रोगानेष रसो वरः ।

र. सं., र. चि., र. सु., र. चं., ध., उदररोगे ।

भाषा—हींग, त्रिकटु, अपामार्ग, आकऔर थूहरके पीले पत्ते येसब समभाग और इन सबकी बराबर सेंधानमक, लोह और ताम्रभस्म लेकर इकट्ठे घोटकर ४–४ रत्तीकी गोलियें बनाकर रखछोड़े। इनमेसे १–१ गोली तत्तद्रोगहरानुपानके साथ

देनेसे प्लीहा, यकृत्, गुल्म, घोर आमवात, उदर-रोग, बवासीर, मूर्च्छा पाण्डु, हलीमक, ग्रहणी, अतिसार, राजयक्ष्म, शोथ इनको यह नष्ट करतीहै ॥

५७ तारकेश्वररसः

शुद्धसूतं समं गन्धं लोहं वङ्गं मृताभ्रकम् ।
दुरालभां यवक्षारं बीजं गोक्षुरजं शिवाम् ॥
समांशं भावयेत्सर्वं कूष्माण्डफलवारिणा ।
तृणपञ्चभवक्वाथे रसे गोक्षुरजे तथा ॥२२३॥
सम्पिष्य वटिका कार्या द्विगुञ्जाफलमानतः ।
मधुनाऽऽमर्दयेल्लिहेन्मूत्रकृच्छ्रविनाशनम् २२४
उदुम्बरफलं पक्वं चूर्णितं कर्षमात्रकम् ।
लेहयेन्मधुना सार्धमनुपानं सुखावहम् ॥
अजाक्षीरं भवेत्पथ्यं शर्करेक्षुरसोहितः ॥२२५॥

भै. र., मूत्रकृच्छ्रे ।

भाषा—शुद्धपारा, गन्धक, लोह, वङ्ग और अभ्रकभस्म, जवास, यवक्षार, गोखरू, हर्रे सब समभाग लेकर पारे गन्धककी नीलवर्ण कज्जलीमे बारीक चूर्णकर मिलाकर सफेद कोंहड़ा, पञ्चतृणमूल (कुश, कास, सरकंडा या रमसल, डाभ और ईखकी जड़), गोखरू इनके रसोंसे १–१ रोज़ मर्दनकर दो दोरत्तीकी गोलियें बनाकर रखछोड़े । इनमेसे १–१ गोली मधुके साथ मिलाकर चाटकर पके हुए गूलरके फलकाचूर्ण १ तोला मधुके साथ चाटे पथ्यमे बकरीका दूध, शक्कर और ईखकारस लेनेसे सबतरहके मूत्रकृच्छ्र नष्टहोते हैं ॥ ५७ ॥

५८ तारकेश्वरी वटी

काकमाच्यमृताद्रावैः पारदं तारकं समम् ।
मर्दयेद्दिनमेकन्तु कृत्वा गोलं विशोषयेत् २२६
निक्षिपेद्वज्रमूषायामाच्छाद्य लौहपर्पटैः ।
रुद्ध्वा सन्धिं धमेद्गाढं खोटबद्धो भवेद्रसः ॥
लोहपर्पटकं दत्त्वा तद्वद्ध्मेयं त्रिधा पुनः ।
वर्षैकं धारयेद्वक्त्रे गुटिकां तारकेश्वरीम् २२८
वाकुचीबीजकर्षैकं गवां क्षीरैः पिबेदनु ।
सर्वकुष्ठानि नश्यन्ति दिव्यकायो भवेन्नरः ॥

रसायनसं., रसायने ।

भाषा—शुद्धपाराऔरचांदी समभागलेकर मकोय और गिलोयके रसोंसे २–२रोज़ घोटकर गोला-बनाय सुखाकर लोहेके बारीकपत्रमे लपेटकर लोहेका बारीकचूर्ण और नदीकी पांकसे सन्धि बन्दकर धौंकनीसे खूबधमनकरे तो यह खोटबद्ध (झामा) हो जायगा । इसको फिरसे मकोय और गिलोयके रससे पूर्ववत् मर्दनकर लोहेके बारीकपत्रमे लपेटकर वज्रमूषामे रख सन्धि बन्दकर १ पहर धमनकरे ऐसे तीनवार करनेसे इसकी गोली बनजायगी । इस गोलीको १ बरसतक रोज़ मुंहमे रखकर बाकुचीके बीज १ तोला गायके दूधमे पीसकर पीनेसे समस्तकुष्ठ निवृत्तहोकर मनुष्य दिव्यशरीर होताहै ॥

५९ तारसुन्दरी गुटी

तारं कान्तं व्योम वङ्गं तावद्भागश्च सूतकम् ।
गन्धकेन समायुक्तं चक्रयन्त्रे स्थिरीकृतम् ॥
क्षुरको गोक्षुरः कच्छूः शतमूली बलात्रयम् ।
एभि र्बद्धा वटी श्रेष्ठा सुन्दरी तारसञ्ज्ञिका ॥
रमयेत्स्त्रीशतं रात्रौ दुर्दण्डविहितेन्द्रियः ।
वलीपलितनिर्मुक्तो दीर्घायु र्जायते नरः २३२

रससार., वाजीकरणे ।

भाषा—शुद्धचांदी, कान्तलोह, अभ्रक और वङ्ग, इनकी भस्में समभाग, सबकी बराबर पारा और गन्धकलेकर नीलवर्णकज्जलीकर सबचीज़े मिलाकर तालमखाना, गोखरू, केवांच, शतावर तीनोंबला, इनप्रत्येकके स्वरससे मर्दनकर गोलाबनाकर सुखाकर सम्पुटमेबन्दकर चक्रयन्त्रमे लघुपुटकी आंचदे । इसतरह प्रत्येकचीज़मे घोट घोटकर गोला बनाकर आंचदेनेसे यह तारसुन्दरी गोली तैयार होगी । इसको चाहे तो एकही गोली बनाके मुंहमे रक्खे अथवा इसमेसे ३–३ रत्ती मक्खनप्रभृतिके-साथखानेसे हस्तक्रियाप्रभृतिसे भग्नेन्द्रियभी बहुतसी स्त्रियोंकामनोरथ पूर्णकरसक्ताहै । वली और पलितसे निर्मुक्त होकर दीर्घायुको प्राप्तहोता है ॥ ५९ ॥

६० तारामण्डूरम् (प्रथमम्)

विडङ्गं चित्रकं चव्यं त्रिफलात्र्यूषणानि च ।
समभागानि चैतानि लोहकिट्टसमानि च२३३
गोमूत्रं द्विगुणं दत्त्वा मूत्रार्द्धिकगुडान्वितम् ।
शनैर्मृद्वग्निना पक्त्वा सुसिद्धं पिण्डतां गतम् ।
स्निग्धे भाण्डे विनिःक्षिप्य भक्षयेत्कोलमात्रया
प्राङ्मध्यान्तक्रमेणैव भोजनस्य प्रयोजितः ॥
योगोऽयं शमयत्याशु पक्तिशूलं सुदारुणम् ।
कामलां पण्डुरोगञ्च शोथं मन्दाग्नितामपि ॥
अर्शांसि ग्रहणीदोषं कृमिगुल्मोदराणि च ।
नाशयेदम्लपित्तञ्च स्थौल्यं चैवापकर्षति २३७
वर्जयेच्छुष्कशाकानि विदाह्यम्लगुरूणि च ।
पक्तिशूलान्तको ह्येष गुडो मण्डूरसंज्ञकः ॥
शूलार्तानां कृपाहेतो स्तारया परिकीर्तितः ॥

र. र., नि. र., यो. र., र. चं., र. क. ल., वै. चि., रसायन सं., र. का., ना. वि., वृ. यो. त., रससागर. वै. र., चि. र. भ., भै. र., यो. म., च. द., टो., वृ. मा. (गुडमण्डूरम्), र. क. ल. (सिद्धमण्डूरम्), शूलाधिकारे।

टि॰ नवायसएव गुडगोमूत्रे प्रक्षिप्य पाकेन तारामण्डूरेतिसंज्ञा कृता नतु नवीनः प्रयोगः । नवायसे मुस्तकमस्ति अत्रतु तत्स्थाने चव्यं प्रयोजितमिति विशेषः ।

त्रिरात्रादूर्ध्वतस्तस्य श्वेते स्फोटश्च जायते ॥
सन्देहो नाऽत्र कर्तव्यो भिषग्भिः श्वित्रनाशने

रसचि.,र. का.,कुष्ठे। र. कामधेनौ श्वित्रारिरसेति नाम।

भाषा— घीकुंआरके रससे शुद्धकिया हुआ पारा और हरिताल १–१ भाग, शुद्धगन्धक २ भाग इनसबकी नीलवर्णकज्जलीकर फलेकाफन्द, कठगूलर, चित्रक, त्रिफला, अमिलतास, बाकुची, विडङ्ग इनप्रत्येकके स्वरस अथवा क्वाथोंसे १–१ रोज घोटकर खैर और बाकुचीकेबीज येप्रत्येक सबकी बराबर, पूर्वोक्तचीजोंके चतुर्गुणित क्वाथमे डालकर एकअहोरात्र कड़ाहीमे पकाकर १–१ तोलेकी गोलियें बनाकर रखछोड़े । इनमेसे १–१ गोली पूर्वोक्त क्वाथसे देवे । अधिक प्यास लगनेपर त्रिफलाकाक्वाथ पिलावे । इसके देनेसे चौथेरोज श्वित्र-स्थानमे छाला उठेगा । उसको बेर प्रभृतिके कांटेसे फोड़देना । ऊपर विडङ्ग और कत्थेको हल्दीके पानीमे पीसकर लेपकरनेसे श्वेतकुष्ठ बहुतशीघ्र नष्ट होता है ॥१४७॥

१४८ तालकेश्वररसः (वृद्धाद्यः) ७५

एकैकं भागमाहृत्य शुद्धगन्धकसूतयोः ।
तालकस्य विशुद्धस्य भागांश्च चतुरः क्षिपेत् ॥
खल्वे सम्मर्दयेत्तावद्यावन्निर्याति सत्त्वरम् ।
स्थाल्योर्मध्ये मृदं लिम्पेच्चित्रकूटसमुत्थिताम्
अश्मचूर्णे चतुर्थांशं गुडं प्रक्षिप्य मर्दयेत् ।
बाह्यं तयोस्तेन लेप्यं द्वित्रवारान् प्रयत्नतः ॥
शुष्कं लेपं समाज्ञाय गौरमृत्तिकया पुनः ।
संशुष्के मृत्तिकालेपे लवणञ्च विनिःक्षिपेत् ॥
अङ्गुलाऽऽत्मकमानेन कुर्यात्तस्य च चक्रिकाम्।
किञ्चिज्जलेन सम्प्रोक्ष्य पाणिना तां दृढां कुरु
बालुकां वस्त्रसंशुद्धां तावन्मानां विनिःक्षिपेत्
सूक्ष्मचूर्णं विनिःक्षिप्य तावन्मानं प्रयत्नतः ॥
किञ्चिज्जलञ्च सम्प्रोक्ष्य तत्र तालं निवेश्य च
चूर्णपांशुपटूनीह स्थापनीयानि पूर्ववत्॥६४९॥
द्वितीयांखटिकाभ्यक्तांस्थालीं–
स्थाल्यां परिक्षिपेत् ।
यन्त्रं डमरुकं कृत्वा नीरन्ध्रं वस्त्रमृत्स्नया ॥
समारोप्यमहोरात्रं चुल्ल्यां मृद्वग्निना पचेत् ।
ततः पश्चाद्धठाग्निञ्च ज्वालयेद्दिनसप्तकम् ६५१
सूतो यात्युपरि स्थाल्यां मध्यादुड्डीय निश्चितम्
कर्पूराऽऽभो रसो जातो वृद्धोऽयं तालकेश्वरः॥
प्रभाते प्रत्यहं ग्राह्यो वल्लैको जलवर्जितः ।
प्राक् सरन्ति मला बद्धाः पश्चात्तापः प्रजायते
षष्टिकास्तण्डुलाः पथ्यं क्षुद्रा मुद्गगोघृतम् ।
शाकमार्द्रकतुण्डीरीहरिद्रातण्डुलीयकम् ६५४
कर्पटान्यामपक्वानि तैलं चाऽम्लादिकं त्यजेत्
श्वेतवर्जितकुष्ठानि हन्ति सप्तदश ध्रुवम् ६५५
अष्टावुदरजात्रोगान् सर्वान् रक्तविकारजान् ।
श्वासं कासञ्च मेदांसि क्षयथुं हन्ति तालकम्
रूपकान्ती शरीरस्य वर्धमाने प्रतिक्षणात् ।
सेवितो ह्यनया युक्त्या कुरुते वृद्धतालकः ॥

रसरा., कुष्ठे ।

भाषा—शुद्धपारा और गन्धक १–१ तोला, विशुद्ध हरिताल ४ तोला, लेकर नीलवर्ण कज्जली-कर मजबूतमिट्टीकी दो हंडी लेकर इनके भीतर चित्रकूटकीमिट्टी (रामरज) का लेपकर पत्थरके चूनेमे चतुर्थांश गुड़ डालकर पानीमे पकाय हंडि-योंके बाहिर २–३ लेपकर सूखनेपर पीलीमिट्टीसे २–३ लेप करदे । फिर सेंधेनमकको बारीक पीस हंडीके भीतर १–१ अङ्गुल बिछाकर थोड़ा जलका छींटा देकर इसकी रोटी जैसी बनाकर जमादे । फिर इसपर कपड़ेसे छानीहुई मीठीबालू १ अङ्गुल जमाकर इतनाही पत्थरका चूना जमादे । फिर थोड़ा जल छांटकर खूब जमाकर उसपर पूर्वोक्त कज्जलीको रखकर जमादे । और ऊपर उसीक्रम और प्रमाणसे चूना, बालू और नमक जमाकर दूसरी हंडीमे ख-ड़िया मिट्टी पोतकर ऊपर रखकर डमरूयन्त्र बनाय खूब मजबूत ४–५ कपड़मिट्टी देकर सुखाकर चूल्हे-पर चढाय एक दिनरातकी मन्द अग्निसे पकावे । फिर इसके बाद सात दिनकी कड़ी आंचदे । तो इसमेसे पारा उड़कर ऊपरकी हंडीके पेंदेमे सफेद कपूरके रंगका होकर लगजायगा । इसको स्वाङ्ग

शीतल होनेपर निकालकर रखछोडे । यह वृद्धतालकेश्वर रस तैयार हुआ । इसमेंसे ३–३ रत्ती प्रातःकाल बिना जलके देनेसे पहिले मल निकलेंगे। फिर ज्वर उत्पन्न होगा, इसमें पथ्य साठी चावल, मोठ, मूंग, गायका घी ये पथ्य हैं । शाक अदरख, कुंदरू, हल्दी, चौलाई, कच्ची पक्की रोटी, तैल और अम्ल इनसबको न खाय । इसके सेवन करनेसे श्वेतको छोडकर १७ कुष्ठ, ८ उदर, समस्त रक्तविकारजरोग, श्वास, कास, मंद, सूजन इनसबको नष्टकर मनुष्यको बलवर्णसे युक्त करता है ॥

१४९ तालकेश्वररसः (लघुः) ७६

शुद्धतालस्य चत्वारो भागाः शुद्धरसस्य च ।
भागैकं प्रक्षिपेत्खल्वे चतुर्यामं प्रमर्दयेत् ६५८
चन्दनस्य हरिद्रायास्तत्र चूर्णञ्च मेलयेत् ।
निःसहायारजन्योश्च गोले गोलं निरोधयेत् ॥
शरावसम्पुटे रुद्ध्वा नीरन्ध्रं तत्समाचरेत् ।
गर्ते हस्तप्रमाणे च निर्वाते दीपयेच्छनैः ६६०
स्वाङ्गशीतलतां ज्ञात्वा तस्य ग्राह्यं समग्रकम् ।
श्रीखण्डेन रजन्या च खल्वे यामचतुष्टयम् ॥
सम्मर्द्य स्थालिकायान्तु क्षिप्त्वा नीरन्ध्रताञ्चरेत्
वस्त्रमृत्तिकयाऽऽलिप्य नैरन्ध्र्यं कारयेद्भिषक् ॥
चुल्लिकोपरि संस्थाप्य वह्निं यामचतुष्टयम् ॥
दत्त्वा शीतं समाकृष्य वज्रीक्षीरेण पेषयेत् ॥
अर्कदुग्धेन गोमूत्रे यामयामं प्रमर्दयेत् ।
ततो गद्याणकार्द्धेन गुटीं कुर्यादनेकशः ६६४
दातव्या रोगिणे प्रातर्गुटिकैका जलं विना ।
घटीद्वयान्मला बद्धा निःसरन्ति ततो जलम् ॥
श्वेतवर्जितकुष्ठानि मासेनैकेन हन्त्ययम् ।
इतरेषाञ्च रोगाणां नाशार्थं भावयेदमुम् ६६६
वज्रीक्षीरेण चूर्णस्य देयाः प्राक् सप्तभावनाः ।
अर्कदुग्धेन सप्तैव गोमूत्रेणाऽपि सप्त च ६६७॥
निर्गुण्ड्याश्च रसेनैव देयाः सप्तैव भावनाः ।
भावनाभावितस्याऽस्य कार्या गुट्यस्त्रिमाषिकाः
रसोनाम्ना भुवि ख्यातोलघुःस्यात्तालकेश्वरः ।
एका प्रतिदिनं खादेद्रोगी प्रातर्जलं विना ॥
हृद्रोगे कण्ठरोगे च वटीद्वन्द्वं प्रयोजयेत् ।
रसोऽयं निश्चितं हन्ति बद्धमूलान्महागदान् ॥
अष्टावुदरजान्रोगान् सर्वान्रक्तविकारजान् ।
यद्वक्षोत्थश्चकान्तिश्च श्लेष्माणंहन्तिनिश्चितम् ॥
षष्टिकास्तण्डुलाः पथ्ये मकुष्ठं मुद्गगोघृतम् ।
शाकमार्द्रकतुण्डीर्यौ हरिद्रा तण्डुलीयकम् ॥
कर्पटान्यामपक्वानि क्षाराम्लकटुकं त्यजेत् ॥

रसकं., कुष्ठे ।

टि०—अस्मिन्योगेऽतीव मात्राधिक्यमस्ति, अतःप्रथमं त्रिचतुररक्तिमिता मात्रा दत्त्वा क्रमशो वर्धयित्वा ऽभ्यासिकी मात्रा करणीयेति सुधीभिर्विभावनीयम् ।

भाषा—शुद्धहरिताल ४ तोले, शुद्धपारा १ तोला, लेकर ४ पहर मर्दनकर कज्जली बनाकर चतुर्थांश चन्दन और हरिद्राका चूर्ण मिलाकर आकाशबेल और हल्दीके रससे चार पहर मर्दनकर गोला बनाकर आकाशबेल और हल्दीके चौगुने कल्कसे वेष्टित कर शरावसम्पुटमे रख २–३ कपडमिट्टी करके सुखाले फिर निर्वातस्थानमें खोदेहुए एकहाथ भरके खड्डेमे दोसेर जङ्गली छानोंकी आंच देवे । स्वाङ्गशीतल होनेपर निकालकर चन्दन और हल्दीका कल्क इसकी बराबर देकर चार पहर खरलकर गोला बनाय ६–७ कपडमिट्टी दीहुई हंडीमे रखकर मुंह बन्दकरदे फिर चूल्हेपर चढ़ाकर ४ पहरकी आंच देकर स्वाङ्गशीतल होनेपर निकालकर थूहर और आकका दूध, तथा गोमूत्र इनप्रत्येकमे १ पहर मर्दनकर ३–३ माशेकी गोलियें बनाकर रखछोडे इनमेसे एकएक गोली सुबहमे बिनाजलके निगलजाय, इससे २ घडी बाद पहिले बंधेहुए दस्तहोंगे फिर पानी निकलेगा। एकमहीनेमें सफेद कुष्ठको छोडकर सबकुष्ठ नष्ट होजाते हैं । यदि कुष्ठाऽतिरिक्त रोगोंमे इसका प्रयोग करना होतो इसमे थूहर और आकके दूध, गोमूत्र और निर्गुण्डीके रसकी सात ७ भावनाएं देकर ३–३ माशेकी गोलियें बनाकर बिना जलके सुबहमे १–१ गोली देवे । हृद्रोग और

रोगमे २–२ गोलियें देवे । इस प्रयोगसे वद्ध- महारोग, आठ उदररोग, समस्त रक्तविकार, कोष्ठता, ग्लानि, और कफ येसब नष्ट होते हैं । यमे साठी चावल, मोठ, मूंग, और घी देना । क, अदरख, कुंदरू, हल्दी, चौलाई, रोटी, पूड़ी, र, खटाई, तीक्ष्ण पदार्थ न खावे ॥ १४९ ॥

१५० तालकेश्वरः (तालाङ्कुरसः) ७७

खण्डितं चणवत्तालं कूष्माण्डाऽन्तर्गजाह्वयैः ।
दोलया विपचेद्यामैस्ततस्तैले सपादके ६७३
वेरूक्षितं तत्सितया क्षालयेदुष्णवारिणा ।
कन्याद्रवेण सम्मर्द्य द्विगुणैश्च वटाङ्कुरैः ६७४
विमिश्रं पञ्च दिवसान् कन्यातोयेन भावयेत् ।
दिनद्वयञ्च कूष्माण्डभवैश्चक्रीं प्रकल्पयेत् ६७५
स्थाल्यां पलाशजक्षारं दत्त्वा किञ्चित्ततोधिकम्
वटाऽवरोहजं चूर्णं तस्योपरि ततः पलम् ६७६
पुनस्तथैव तौ दत्त्वा कवचीं वालुकावृताम् ।
कृत्वा पचेद्दिनं दीपवह्निना मध्यमं दिनम् ॥
हठाऽग्निना च त्रीन्यामान् स्वाङ्गशीतं समुद्धरेत् ।
निम्बुजै र्भावयेत्सप्तवारान् धूमोदयेऽसति ६७८
ग्रीष्मे जलानुपानेन शीते पर्णानुपानतः ।
वातरक्तं महाकुष्ठं वातरोगं महागदम् ॥ ६७९ ॥
नाशयेत्सेवितं तच्च सर्वान्व्याधीन् व्रणक्रिमीन् ।
अग्निञ्च जनयेदत्र लवणाऽन्नं विवर्जयेत् ६८० ॥

र. क., कुष्ठे ।

भाषा—चनेके बराबर टुकडे कियेहुए हरितालको सफेदकूष्माण्डके जलमे ८ पहर स्वेदनकर हरितालसे चतुर्थांश तिलकातैल देकर इसकदर अग्निपर पकावे कि हरिताल न जले और तैल सूखजाय । फिर शक्करमे डालकर इसकी तमाम चिकनाई दूरकर गरमपानीसे धोकर सुखाकर कपड़छानचूर्णको घीकुंआरकारस और वटाङ्कुर ये हरितालसे दूने देकर ५ रोजतक मर्दनकर घीकुंआरके रसकी दोरोज भावनादेकर सफेद कूष्माण्डके रससे घोटकर टिकिया बनाय सुखाकर ६–७ कपडमिट्टी दीहुई हंडीमे पलाशकी राख टिकियासे दूनी बिछाय उसपर वटकी जटाकाचूर्ण टिकियासेबराबर बिछाय उसपर टिकियाको रख वटकीजटाके चूर्णसे ढककर पूर्वकी बराबर पलाशकी राखसे ढकदे । फिर हंडीको गलेतक वालूसेभरकर चूल्हेपर चढाय एक अहोरात्र दीपाग्नि देकर एकरोजमध्यमाग्नि और ३ पहर हठाऽग्नि देकर स्वाङ्गशीतलहोनेपर निकाल नीबूकेरसमे सातरोजभावनादेकर अग्निके ऊपर डालनेसे अगर निर्धूमहो तो ग्रीष्मकालमे जलानुपानसे, शीतऋतुमे पानकेसाथ देनेसे वातरक्त, महाकुष्ठ, तमाम वातरोग इनसबको यह दूरकर व्रण, कृमि और अग्निमान्द्यको दूरकरता है । लवण, और अन्न न खावे ॥ १५० ॥

१५१ तालकेश्वररसः (लघुः)

पलान्यादाय चत्वारि हरितालस्य चित्रकम् ।
अभ्रकं गन्धकं शुद्धं गिरिजञ्च पलद्वयम् ॥
हण्डिकान्तर्गतं पूर्वं चित्रकं धारयेत्सुधीः ।
पश्चाच्च तालकं दद्याद्गन्धकं तस्य चोपरि ॥
अभ्रकञ्च पुनर्दद्यात्पश्चाद्दद्याच्छिलाजतु ।
गव्यं मूत्रं पुनर्दद्या द्गव्यं क्षीरं पुनः क्षिपेत् ॥
प्रवेश्य मूत्रं दुग्धञ्च शनैर्वह्नौ च तद्रसे ।
कर्षमात्राञ्च हेमाह्वां यवक्षारञ्च तत्समम् ६८४
स्वर्जीक्षारं तथा दद्यात्क्षारं धत्तूरजन्तथा ।
पुनश्चूर्णं सितं दद्यात्कूष्माण्डक्षारमेव च ॥
सर्वमेकत्र सम्पाच्य गतज्वालमधूमकम् ।
तप्ताऽङ्गारनिभं यावत्तावज्ज्वालाश्च दा[illegible] ॥
स्वाङ्गशीतं समाकृष्य दद्यात्तत्पश्चा[illegible] ।
कुष्ठं वमिपुतं स्रावि पतिताङ्ग[illegible] ॥
गतश्रोत्राङ्गुलिप्रायं विधुरं वि[illegible] ।
यथातथाविधं भूयः कृमि[illegible]
नाशयत्यचिरेणाऽ[illegible]

रसचि., र. का., कु[illegible]

भाषा—[illegible]
चित्रकका चूर्ण [illegible]

उसपर २ पल शुद्धगन्धक रक्खे । गन्धकपर २ पल अभ्रकका चूर्ण रक्खे । अभ्रकपर २ पल शिलाजीत रक्खे । फिर ४८ पल गोमूत्र डालकर उतनाही गायका दूध डाले । और बहुत मन्द आंच देवे । द्रव सूखनेपर क्रमसे सत्यानाशीकी जड़का चूर्ण, यवक्षार, सज्जी, धतूरेका क्षार, पत्थरका चूना कोंहड़ेकाक्षार ये क्रमसे तहवतह देवे । हंडीमें आग लगकर ज्वाला शान्तहोजाय और भीतरका पदार्थ एकदम लालहोजाय तब अग्निसे उतारकर अलग रक्खे । स्वाङ्गशीतल होनेपर निकाल कर रखछोड़े । इसमेंसे ५–५ रत्ती कुष्ठहरानुपानकेसाथ देनेसे उल्टी और स्रावयुक्त तथा जिसमे कान, अङ्गुली, गिरगयेहों, गला बैठगयाहो, कीड़े निकलते हों, इसतरहके कुष्ठको यह बहुतशीघ्र नष्ट करता है ॥ १५१ ॥

१५२ तालकेश्वररसः (ऊनाशीतितमः)

तालं तुर्यांशतारोदरभृशनिभृतं तद्धताम्रभ्रपीतैः,
कृष्णाभ्रं टङ्कणेन भ्रमय तुपमृदो-
मूषिकायांदढायाम् ।
ताम्रक्षोद्रैः शनैर्वा वहिरतिनिभृतो-
रुद्धमूषास्थसिद्ध-,
स्तप्ते ताम्रेऽथवाऽयं निवसतिदहन-
क्षोभमेते सहन्ते ॥ ६८९ ॥
ताम्रवन्मारिता ह्येते त्रयः कुष्ठविनाशनाः ।
तालकाःसर्वरोगघ्ना ध्मापिता न व्रजन्त्यपि ॥

रसायनसं., यो. म., कुष्ठे ।

भाषा—एकतोले चांदीको गलाकर उसमे चार तोले हरितालको डालकर बहुत मधुर आंचसे गलावे । उसको सलाईसे चलातारहे । जब हरिताल और चांदी एकजीव होजाय तब इसको जिसक्रियासे ताम्रको मारते हैं उसक्रियासे मारकर भस्मकरे । यह प्रथम **तालकेश्वर** (भस्मतालकेश्वर) तैयार हुआ ॥ १ ॥

इसीतरह एकतोले ताम्रको गलाकर उसमे अभ्रकसत्त्व अथवा कालाअभ्रक एकतोला डालकर सुहागादेकर गलाना चाहिये । जब वह गलकर चक्कर खाने लगे तब उसमे चारतोले हरिताल डालकर लोहेकी शलाकासे चलातारहे । जब सब एकजीव होजाय तब इसकी ताम्रमारणकी प्रक्रियासे भस्मकरे । यह द्वितीय **तालकेश्वर** सिद्ध हुआ ॥ २ ॥

एकतोले तांबेमें एकतोला शहद मिलाकर इसको धातुद्रावण कोष्ठीमे रखकर गलावे । गलजानेपर ४ तोले हरितालका चूर्ण डालकर मन्द अग्निपर लोहेकी शलाकासे चलातारहे । जब एकजीव होजाय तब इसकी ताम्रमारक प्रक्रियासे भस्मकरे । अथवा केवल एकतोले तांबेको गलाकर उसमे चार तोले हरितालको डालकर उतारले और चलाता रहे । शीतल होनेपर मूषाको बंदकर धोंकनीसे धोंके जब मूषामेंसे श्वेतज्वाला निकलने लगे तब निकालकर इसमेंसे ताम्र और हरितालके खोटको खुरचकर मूषासे अलग करले । इसकी ताम्रमारणप्रक्रियासे भस्म बनावे । यह तृतीय **तालकेश्वर** सिद्ध हुआ ॥

इनसबके गलानेके लिये **गारमूषा** बनानी चाहिये। गारमूषाका लक्षण रसरत्नसमुच्चयमे इस प्रकार है—

गारभूनागधौताभ्यां शणैर्दग्धतुपैरपि ।
समैः समा च मूषामृन्महिषीदुग्धसंयुता ॥
एषा विरचिता मूषा वज्रद्रावणकारिका ॥

तालावका सड़ाहुआकीचड़, केंचुओंकातांबा, कुटा हुआ शण, जलाएहुएतुप ये सब समभाग इनचारोंकी बराबर सफेद अथवा लालमिट्टी लेकर सबको इकट्ठेकर भैंसकादूध डालकर चारपहरतक लोहेके मूसलसे हावनदस्तेमें कूटकर मूषा बनाकर काममें लेवे । ये तीनों ताल्केश्वर अग्निमें उड़ते नहीं । और समस्तरोगोंको विशेषकर कुष्ठोंको तत्तद्रोगहराऽनुपानकेसाथ देनेसे नष्टकरतेहैं ॥ १५२ ॥

१५३ तालमन्त्रेश्वरोरसः

सितामध्वाऽऽज्यगोक्षीरै स्तालकं मर्दयेद्दिनम् ।
तद्गोलं काञ्जिकैः पश्चाद्दोलायन्त्रेण पाचयेत् ॥
मर्द्य सेहुण्डदुग्धेन चन्द्रिकाक्षपणाऽवधिम्
तच्छुष्कं मर्दयेच्चावद्यावत्स्यात्कृष्णवर्णकम्६९२

व्योपं हयाऽरिमूलञ्च प्रत्येकं दशमांशतः ।
सर्वं तद्वाकुचीतैले दिनं खल्वे विमर्दयेत् ६९३
तालमन्त्रेश्वरो नाम द्विगुञ्जो मण्डलान्तकृत् ।
वाकुची देवकाष्ठञ्च पातालाऽगुरुटङ्कणम् ॥
लेह्यमेरण्डतैलेन त्रिनिष्कमनुपानकम् ॥६९४॥

र. का., कुष्ठे ।

भाषा—शुद्धहरितालके कपड़छानचूर्णमें शक्कर, मधु, घी और गायकादूध, इसप्रमाणमें दियेजाँय कि एकएकदिन मर्दन करनेपर अखीरमें दूधसे गोली बन सके । उसगोलीको इतना सुखावे कि पानीका अंश बिल्कुल न रहे फिर इसको चारतहकपड़ेमें ढीला बांधकर खट्टी काञ्जीमें दोलायन्त्रसे ४ पहर स्वेदनकर सुखाकर सेहुण्डके दूधमें चमकमिटनेतक मर्दनकर त्रिकटु, कनेरकीजड़ ये प्रत्येक दशमांश मिलाकर वाकुचीके तेलसे १–२ रोज मर्दनकर २–२ रत्तीकी गोलियें बनाकर रखछोड़े । इनमेंसे १–१ गोली खाकर ऊपरसे वाकुची, देवदारु, पातालगारुड़ी, अगर, सुहागा इनके समभाग तोलेभर चूर्णको बराबरके एरण्डतैलमें मिलाकर चाटनेसे मण्डलकुष्ठ दूर होताहै ॥ १५३ ॥

१५४ तालसिन्दूरम् (माणिक्यरसः)

दरदं गन्धकं तालं विशुद्धं गृहकन्यका—
पलाशपुष्पस्वरसैः प्रत्येकं दिनसप्तकम् ६९५
विमृद्य वालुकायन्त्रे त्र्यहं पक्त्वा समुद्धरेत् ।
जायते तालसिन्दूरं माणिक्यं केचिदूचिरे ॥
वातार्शःकुष्ठमेहेषु विद्रधीषु विशेषतः ।
कुष्ठाऽतिसारवातेषु गृध्रस्यामपचीषु च६९७॥
सर्वेषु सन्निपातेषु संसर्गजनितेषु च ।
तत्तद्रोगाऽनुपानेन तत्तद्रोगहरं परम् ६९८॥

नू. क., कुष्ठादौ ।

भाषा—शुद्धशिंगरफ, गन्धक और हरितालकी कज्जलीकर घीकुंआर और पलाशपुष्पके स्वरससे सात ७ रोज मर्दनकर सुखाकर ६–७ कपड़मिट्टी दीहुई आतशीशीशीमें डालकर मुंह बन्दकर वालुकायन्त्रमें रख तीनरोजको क्रमाग्नि देवे । स्वाङ्गशीतलहोनेपर निकालकर रखछोड़े । इसमेंसे ३–३ रत्ती कुष्ठहराऽनुपानकेसाथ देनेसे कुष्ट, अतिसार, वातरोग, गृध्रसी, अपची, संसर्गजरोग, तमाम सन्निपात इन सबको यह नष्ट करताहै । और तत्तद्रोगहरानुपानके साथ देनेसे समस्तरोगोंको दूरकरताहै । इसका नाम तालसिन्दूरहै । कोई लोग माणिक्यरसभी कहते हैं ।

१५५ तालसिन्दूरम् (द्वितीयम्)

रसबलिहरितालं टङ्कणं तुल्यभागं,
समभितनवसारं नागवल्ल्या च युक्तम् ।
पुनरपि रविमूलं चार्द्रकं चित्रमूलं,
त्रिफललशुनसारं नागवल्ल्याश्च सारम्
घृष्ट्वा तन्मुनिवारान् पश्चाद्गोलं विधाय सद्वैद्यः ।
मृत्कर्पटैर्विलिम्पेच्छायाशुष्कं समादाय ७००
काचे भाण्डे वालुकायन्त्रमध्ये,
पक्त्वा घस्रान्पञ्च तत्स्वाङ्गशीतम् ।
भासा रक्तं सूतसिन्दूररूपं,
कुष्ठं कासं सन्निपातञ्च हन्ति ॥७०१॥
व्याधीनुदरजान् हन्ति पञ्च गुल्मान्ज्वरन्तथा ।
ग्रहणीपाण्डुशोफौ च वातरोगांश्च नाशयेत् ॥

र. क. यो., वा० (रससिंदूरेतिनाम ।)

भाषा—शुद्धपारा, गन्धक, हरिताल और सुहागा येसब समभाग इनसबकी बराबर नौसादर लेकर नीलवर्णकज्जलीकर पान, आककीजड़, अदरख, चित्रकमूल, त्रिफला, लशुन और पान इनप्रत्येकसे सात ७ भावनाएं देकर गोला बनाकर सुखादेना फिर १–२ कपड़ेमें बांधकर ४–५ कपड़मिट्टीदेकर सुखादेना । और ६–७ कपड़मिट्टीदीहुई आतशीशीशीमें डालकर वालुकायन्त्रमें ५ रोजतक अग्निदेकर स्वाङ्गशीतल होनेपर चूर्णकर रखलेना । इसमेंसे ३–३ रत्तीकीमात्रा यथोचितानुपानके साथ देनेसे सन्निपात समस्तकास, कुष्ठ, उदर, पञ्चगुल्म इनसबको यह नष्ट करताहै । १५५ ॥

१५६ तालसिन्दूरम् (रससिन्दूरम्)

रसभागा रसतः पुनरेकैकस्तालमल्लगन्धकतः।
कूप्यांद्वयहंपरिपचेत्पवनकफौ हन्तितालसिन्दूरः

सि. भे. म., पवनकफे।

भाषा—शुद्धपारा ६ भाग, शुद्धहरिताल, सोमल और गन्धक १–१ भाग लेकर नीलवर्णकज्जलीकर घीकुंआर अथवा तुलसी प्रभृतिके रससे २–२ रोज घोटकर सुखाकर ६–७ कपड़मिट्टी दीहुई आतशी-शीशीमे रखकर डाटलगाकर गुड़चूनेसे मुंहबंदकर ६–७ कपड़मिट्टीलगाकर सुखाकर वालुकायन्त्रमे चाररोज पकावे। स्वाङ्गशीतलहोनेपर निकालकर रखछोड़े। इसमेंसे १ रत्ती तत्तद्रोगहरानुपानकेसाथ देनेसे वातज और कफज बीमारियोंको यह बहुत-शीघ्र नष्ट करताहै। १५६॥

१५७ तालसिन्दूरम् (चतुर्थम्)

शुद्धतालश्च भागैकं शिलाचूर्णश्च तत्समम्।
रक्तकार्पासनीरेण मर्दयित्वा दिनत्रयम्॥
मूषायां निक्षिपेत्सर्वं सप्तवारं पुटं भवेत्।
सिन्दूरं तालकाख्यं स्यादिन्द्रगोपसमप्रभम्॥
एतत्सर्वं समाऽऽलोड्य नानारोगेषु योजयेत्।
पत्रवल्लीरसै र्युक्तं रक्तक्षयविनाशनम्॥७०६॥
फलेन्दुस्वरसै र्युक्तं श्लेष्मक्षयविनाशनम्।
नारिकेलरसै र्युक्तं वातश्लेष्मविनाशनम्॥
हरीतकीचूर्णमिश्रं श्वासक्षयविनाशनम्।
पिप्पलीचूर्णयोगेन कासक्षयविनाशनम्॥७०८
सितामधुकसंयुक्तं पित्तक्षयविनाशनम्।
निर्गुण्डीचूर्णसंयुक्तं कफज्वरविनाशनम् ७०९
सुगन्धपुष्पसारेण पित्तज्वरविनाशनम्।
कटुत्रयसमायुक्तं ज्वरातीसारनाशनम्॥७१०
नवनीतेन संयोज्यं हिक्काछर्दिनिवारणम्।
तुलसीरससंयुक्तं चातुर्थिकनिवारणम्॥७११॥
अर्जुनस्य त्वचोयोगाच्छुक्रमेह विनाशनम्।
कार्पासबीजचूर्णेन बहुमूत्रं विनाशयेत्॥७१२॥
ग्रहणीं शङ्खचूर्णेन रक्तातिसृति मुल्बणाम्।
कुमुदोत्पलसारेण रक्तपित्तविनाशनम्॥७१३॥
उन्मत्तसारसंयुक्तं कृमिकुष्ठविनाशनम्।
अपामार्गस्य सारेण गुदकीलं विनश्यति ७१४
पृश्निपर्णीरसै र्युक्तं मेहकृच्छ्रं विनश्यति।
धूपचूर्णेन संयुक्तं ग्रहणीदोषनाशनम्॥७१५॥
सिद्धमूलरसै र्युक्तं ग्रहणीकुष्ठनाशनम्।
आर्द्रकस्वरसै र्युक्तं त्रिदोषज्वरनाशनम् ७१६
जातीफलेन संयुक्तं ग्रहणीपित्तनाशनम्।
तदेवातिविषायुक्तं ग्रहणीशूलनाशनम्॥७१७॥
दाडिमीकुसुमै र्युक्तं हिक्काग्रहणिकां जयेत्।
सर्वगन्धरसै र्युक्तं शोफज्वरविनाशनम् ७१८

र. क. यो., य. रा., वै. चि., नानारोगेषु.

टि०—"चातुर्जातककर्पूरं कक्कोलागुरुकुङ्कुमम्। लवङ्ग-सहितश्चैव सर्वगन्धं विनिर्दिशेत्,, अथवा सुश्रुतोक्त एलादिगणो ग्रहीतव्यः सुश्रु० सू. अ. अ. ३८।

भाषा—शुद्धहरिताल औरचूना १–१ भाग, लेकर लालकपासके फूलोंके स्वरससे तीनरोज मर्दन-कर गोलाबनाय मूषामे बंदकर ६–७ कपड़मिट्टी देकर सुखाकर एकसेर कण्डोंकी आंचदे। स्वाङ्गशी-तलहोनेपर निकालकर उपरोक्त स्वरससे मर्दनकर पुटदेवे। इसप्रकार सातवार पुटदेनेसे यह एकदम बीरबहुटीकेरङ्गका तालसिन्दूर तैयार होगा। अथवा इसको आतशीशीशीमे बन्दकर वालुकायन्त्रमे ४ रोज-की अग्निदेनेसे यह तालसिन्दूर तैयार होगा। इसमेंसे एकसे दोरत्ती तक पानके रससे देनेसे यह श्लेष्मजन्य-क्षयको निवृत्तकरताहै। त्रिफला और शुद्धकपूरके साथ देनेसे रक्तविकार अथवा रक्तकी क्षीणतासे होनेवाले क्षयको दूरकरताहै। नारियलके पानीके साथ देनेसे वातश्लेष्मक्षयको दूरकरताहै। हर्रके चूर्णके साथ श्वास और क्षयको, पीपलके चूर्णसे कासक्षयको, शक्कर और मुलहठीसे पित्तक्षयको, निर्गुण्डीके चूर्णसे कफज्वरको, त्रिजात और मधुसे पित्तज्वरको, त्रिकटुसे ज्वरातिसारको, मक्खनसे हिक्का और छर्दिको, तुलसीके रससे चातुर्थिकज्वरको

अर्जुनकी छालके चूर्णसे शुक्रमेहको, कपासकी-मज्जासे बहुमूत्रको, शङ्खभस्मसे सङ्ग्रहणी और अतिसारको, कुमुद और लालकमलके रससे रक्तपित्तको, धतूरेके रससे कृमि और कुष्ठको, अपामार्गके रससे गुदरोगको, पृश्निपर्णीके रससे प्रमेह और मूत्रकृच्छ्रको, राल अथवा कुन्दुरुसे सङ्ग्रहणीको, सिद्धेश्वर(संदेशरो-गु०) काजिड़के रससे ग्रहणी और कुष्टको, अदरखकेरससे त्रिदोषज्वरको, जायफलके साथ पित्तग्रहणीको, अतीसकेसाथ ग्रहणीशूलको,**समस्तगन्धोंसे** शोफज्वरको दूरकरता है। सबजगह चूर्णकाप्रमाण अग्निबल देखकर लेना।

टि०—तज, पत्रज, इलायची, नागकेसर, कपूर, शीतलचीनी,अगर, कुङ्कुम (केसर) और लौंग यह **सर्व गन्धगण** है। अथवा सुश्रुतके सूत्रस्थानके ३८ वें अध्यायमे एलादिगणको लेना ॥ १५७॥

१५८ तालसिन्दूरम् (पञ्चमम्)

चतुष्पलं तु गन्धस्य पारदञ्च चतुष्पलम् ।
पलैकं हरितालञ्च तालकार्धा मनःशिला ७१९
तालार्धं टङ्कणं शुद्धं नवसारं तदर्धकम् ।
सर्वं निक्षिप्य खल्वे च मर्दयेत्कज्जलीकृतम् ॥
शाकवृक्षस्य पत्राणां रक्तवर्णं द्रवं हरेत् ।
तद्द्रवे मर्दयेत्सम्यक् काचकूप्यां विनिःक्षिपेत्
खटिन्या मुखमाच्छाद्य वज्रमृत्तिकया तथा ।
कूपिकां लेपयेत्सप्त शोषयेदातपे खरे ॥७२२॥
बालुकायन्त्रमध्ये तु कूपिकां तां विनिःक्षिपेत् ।
चुल्लिकायां विनिक्षिप्य वह्निं प्रज्वालयेत्ततः ॥
यामषोडशमात्रन्तु दीप्तमध्यखराऽग्निभिः ।
स्वाङ्गशीतलमादाय खल्वमध्ये विनिःक्षिपेत् ॥
तत् सिन्दूरसमं द्रव्यं षोडशांशं विनिक्षिपेत् ।
मर्दयेत्पूर्ववद्द्रव्यं काचकूप्यां विनिःक्षिपेत्॥
एवं सप्तविधं कृत्वा क्षिप्त्वा कूप्यां विपाचयेत् ।
स्वाङ्गशीतलमादाय उदयार्कसमोरसः ॥७२६
सिन्दूरजं सूक्ष्मचूर्णं क्षिप्तं नागकरण्डके ।
तत्सिन्दूरं निषेवेत गुञ्जामात्रप्रमाणतः ॥
शर्करामधुपिप्पल्या प्रातरुत्थाय सेवयेत् ।
एकादशक्षयान्हन्ति सन्निपातांस्त्रयोदश ॥
आमवातं सशूलञ्च नाशयेन्नात्र संशयः ।
पाण्डुं पञ्चविधं चैव कामलात्रयनाशनम् ॥
अष्टावुदरजात्रोगान्गुल्मानाम्पञ्चकन्तथा ।
अरोचकं पञ्चकासान् पञ्चश्वासान् जडं हरेत्
स्थिरायुः कायसिद्धिश्च मेध्यं चाशु शुभप्रदम्
अनुपानविशेषेण सर्वरोगनिवारणम् ॥
इति धन्वन्तरिप्रोक्तं सिन्दूरं लोकपूजितम् ।

यृ. यो. त., रसायनसं., वै. चि., (ल.), रसायने

भाषा—शुद्धगन्धक और पारा ४—४ पल, शुद्धहरिताल १ पल, शुद्धमैनसिल और सुहागा आधाआधा पल, नवसादर १ तो. लेकर सबको नीलवर्ण कज्जलीकर पकेहुए शाकवृक्षके लालवर्ण स्वरससे ३—४ रोज मर्दनकर सुखाकर ४—५ कपड़मिट्टी दीहुई आतशीशीशीमे रख खड़ियामिट्टीकी डाट देकर वज्रमृत्तिकासे १—२ कपड़मिट्टी तमाम-शीशीपर करके कड़ी धूपमे सुखाकर बालुकायन्त्रमे सोलहपहरकी मन्द, मध्य, और तीक्ष्ण अग्निसे पकावे। स्वाङ्गशीतल होनेपर निकालकर हाथी दांतकी डिब्बीमे रखछोड़े। इसमेंसे १—१ रत्ती मात्रा शक्कर मधु और पीपलके साथ प्रातःकालमे देनेसे ११ प्रकारका क्षय, १३ प्रकारके सन्निपात, आमवात, शूल, पांचप्रकारका पाण्डु, ३ प्रकारकी कामला, ८ प्रकारके उदररोग, ५ प्रकारके गुल्म, अरोचक ५ प्रकारके कास, श्वास, इनसबको अनुपान विशेषसे दूरकर मेधा, कान्ति, और बलको बढ़ाता है॥

१५९ तालसिन्दूरम् (तालचन्द्रोदयः)

कूष्माण्डसंस्वेदनजातशुद्धिं
तालं सुपत्रं परिकुट्य वस्त्रे ।
आगाल्य मर्द्य समपारदेन
बुभुक्षुणा जीर्णसुवर्णकेन ॥ ७३२ ॥
द्विवृत्तगन्धेन पलङ्कषायां
शुद्धेन सर्पिःपयसोस्तथाऽपि ।

दिनत्रयं काचमयीं भरेत
कूपींचतुर्थांशतले मसीं ताम् ७३३ ॥
प्रारम्भतीव्रं कुरु हव्यवाहं
तालादिभसार्थविधात्रिकोष्ठयाम् ।
चन्द्रोदयिन्यां विनिधाय यन्त्रं
सर्वार्थकर्यामुत वालुकाख्यम् ॥ ७३४
दिनैकमात्रेण भवेद्विशुद्ध-
श्चन्द्रोदयो नाम च तालपूर्वः ।
कुष्ठादिरोगेष्वतुलप्रभावः
स्वास्थ्यप्रचारक्रमसत्स्वभावः ॥ ७३५

रसायनसारे, कुष्ठे ।

भाषा—कूष्माण्डके रससे ४ पहरके स्वेदनसे शुद्धकियेहुए हरितालके कपड़छान चूर्णमे बराबरका सुवर्णजीर्ण बुभुक्षित पारा डालकर गुग्गुलु अथवा दूध घीमे शुद्धकियाहुआ दूना गन्धक देकर ३ दिन कज्जलीकर ६–७ कपड़मिट्टी दीहुई आतशीशीशीमे भरकर खड़िया मिट्टीकी डाट देकर ३–४ कपड़-मिट्टी करदे । खूब सूखनेपर स्थालीयन्त्रमे अथवा बालुकायन्त्रमे रखकर ३ रोजकी तीक्ष्ण अग्नि देकर स्वाङ्गशीतल होनेकेबाद निकालकर रखछोड़े । इस-मेसे १ रत्तीसे २ रत्तीतक तत्तद्रोगहरानुपानके साथ देनेसे यह समस्तरोगोंको दूर करता है । स्वस्थ आदमी इसका सेवनकरे तो उसको सहसा रोग नहीं होते ॥

१६० तालसिन्दूरम् (तालचन्द्रोदयः)७

नलीडमर्वाऽऽख्यकयन्त्रमध्ये
षड्गन्धजीर्णं विदधीत सूतम् ।
तत्तुल्यगन्धेन विमर्द्य तालं
शुद्धेन शुद्धं प्रपचेत कोष्ठयाम् ॥ ७३६ ॥
सर्वार्थकर्यादिनमेकमग्नेर्मग्नेयसूर्येस्तगिरौक्रियांतां
संशीतयेच्छीतलयन्त्रतस्तं
चन्द्रोदयं तालमुखं प्रगृह्य ॥ ७३७ ॥
ज्ञातासु चाऽज्ञातचरासु रुक्षु
ततो मुमुक्षुं प्रददीत मङ्क्षु ।
गुञ्जैकमात्रं तु बुभुक्षुमेनं
संभक्षयेदक्षमवेक्ष्य वह्निम् ॥ ७३८ ॥

रसायनसारे, कुष्ठे ।

भाषा—नली अथवा डमरूयन्त्रसे षड्गुणगन्धक जारणकियाहुआपारा, गन्धक और हरिताल येसब समभागलेकर नीलवर्ण कज्जलीकर ६–७ कपड़-मिट्टीकीहुई आतशी शीशीमे डालकर सर्वार्थकरीभट्टीमे एकदिन सूर्योदयसे सूर्यास्ततक तीक्ष्णाग्नि देकर स्वाङ्गशीतलहोनेपर निकालकर रखछोड़े । इसमेसे १–१ रत्ती तत्तद्रोगहरानुपानके साथ ज्ञात अथवा अज्ञात व्याधियोंमे देनेसे यह शीघ्र आरोग्यदेताहै । इसमे पथ्य अग्निबलदेखकर देना ॥ १६० ॥

१६१ तालसिन्दूरम् (तालचन्द्रोदयः)८

नल्याख्ययन्त्रे डमरौ तु पूर्वं
गन्धं विशुद्धं शतवृत्तवृत्तम् ।
रसे बुभुक्षौ परिजारयन्तु
ततः सतालं परिपाचयन्तु ॥ ७३९ ॥

रसायनसारे, कुष्ठे ।

भाषा—नलीयुक्त डमरूयन्त्रमे सोगुना गन्धक सोवार जारणकिये हुए बुभुक्षित पारदमे तुल्यगन्ध-ककी कज्जलीकर ६–७ कपडमिट्टी दीहुई आतशी-शीशीमे चारपहरकी कड़ी अग्निदेकर स्वाङ्गशीतल-होनेपर निकाळकर रखछोड़े । इसमेसे १–१ रत्ती तत्तद्रोगहरानुपानकेसाथ देनेसे समस्तरोगोंको दूर करताहै । १६१ ॥

१६२ तालसिन्दूरम् (तालचंद्रोदयः)

भल्लातकस्नेहविलीनतालं
पचेत गन्धेन हिमांशुभालम् ।
दिनानि चत्वारि विपाच्य सम्य-
क्कुष्ठादिनाशाय नियोजयेत ७४०

रसायनसार, कुष्ठे ।

भाषा—भिलावेके तैलमें शुद्ध हरितालको डाल कर मन्द आंचसे पकावे । गलजानेपर उतारकर रख छोड़े । ठण्डा होनेपर हरितालके थक्केको कपड़ेसे

पोंछकर साफकरले । इसीतरह गन्धकको भी पकाले । फिर बुभुक्षान्तसंस्कार करके सुवर्णका ग्रास दियाहुआ पारा गन्धकके बराबर मिलाकर नीलवर्ण कज्जलीकर ६–७ कपड़मिट्टी दीहुई आतशीशीशीमें रखकर वालुकायन्त्रमें ४ रोजके क्रमवृद्ध अग्निमें पकाकर स्वाङ्गशीतल होनेपर निकालकर रखछोडे । इसमेंसे १–१ रत्ती तत्तद्रोगहरानुपानके साथ देनेसे वातपित्तजनितरोग तथा समस्तकुष्ठोंको दूर करताहै।

१६३ तालार्करसः

तालेन निहतं ताम्रं रसगन्धकसंयुतम् ।
बहुधा तालनिहतं वातश्लेष्ममहौषधम् ७४१

र. क., वातश्लेष्मरोगे ।

भाषा—शुद्धपारा, गन्धक और हरितालको नीबू वगैरहके रसमे घोटकर विशुद्ध ताम्रपत्रपर लेपकर सम्पुटमें बन्दकर लघुपुटकी आंचदे । ऐसे कईवार पुटदियाहुआ ताम्र वातश्लेष्मकी परमौषधिहै । अर्थात् वातश्लेष्महरानुपानके साथ देनेसे वायु और कफके रोगोंको समूल नष्ट करताहै ॥ १६३ ॥

१६४ तिक्ताद्यं लोहम्

तिक्ता निशा चन्दनपर्पटद्वयं
पाठा कणा दीप्यपटोल पत्रकम् ।
त्रायन्तिमूर्वेन्द्रयवाः किरातकं
संचूर्ण्य सान्द्रश्च रजो विधीयताम् ७४२
एतत्समं लोहरजो विधाय
क्षौद्रेण साऽऽज्येन भजेद्धिताशी ।
जयेज्ज्वरान् धातुगतान्समस्तान्
प्लीहानमग्नेर्मृदुतां च कासम् ७४३

र. प्र., लो. प., (स.), वै. र., टो., ज्वराधिकारे ।

भाषा—कुटकी, हल्दी, सफेदचन्दन, पित्तपापड़ा, बंगालीपित्तपापडा, पाठा, पीपल, अजवाइन, पटोलपत्र, त्रायमाण, मूर्वा, इन्द्रजव, चिरायता, ये सब समभागलेकर चूर्णकर बराबरकी लोहभस्म मिलाकर रखलेना । इसमेंसे १ माशेसे लेकर दो माशेतक धीरेधीर बढ़ाकर घी और मधुके साथ खानेसे और उचितपथ्य पालनेसे समस्त धातुगतज्वर, प्लीहा, मन्दाग्नि, कास, श्वास येसब नष्ट होतेहैं

१६५ तिन्तिडीमण्डूरम्

तिन्तिडीपिप्पलीयुक्तं मण्डूरं योजयेत्ततः ।
हरते योगराजोऽयं शोफपाण्डुक्षयादिकान् ॥

व. रा., वै. चि., पाण्डुरोगे ।

भाषा—इमली और पीपलके साथ उचितमात्रामें मण्डूरदेनेसे सूजन, पाण्डु और क्षय नष्टहोतेहैं।

१६६ तीक्ष्णमुखोरसः (प्रथमः)

मृतसूतार्कहेमाऽभ्रं तीक्ष्णं मुण्डश्च गन्धकम् ।
मण्डूरस्य समं ताप्यं मद्यं कन्याद्रवै र्दिनम् ॥
अन्धमूषागतं सर्वं ततः पाच्यं दृढाऽग्निना ।
चूर्णितं सितया माषं खादेत्तचार्शसां हितम् ॥
रसस्तीक्ष्णमुखो नाम चाऽसाध्यमपि साधयेत्॥

र. सं., र को., र. मु., नि. र., चि. र., ध., र.र. स., रसायनसं., रसेन्द्र मं., र. र., टो., र. क., र. का., र. र. दी., अर्शोरोगे। र. को. अर्शः शान्तिरितिनाम ।

टि०—अत्र स्थूलदृष्ट्या सर्वं सममानमेव प्रतिभाति परन्तु रसरत्नाकरे मण्डूरस्य सममिति पाठो दृश्यते तेन षष्ठी मण्डूरात्पूर्वं सूतादीनां सर्वेषां मण्डूरसमतामभिव्यनक्ति । मण्डूरादुत्तरं ताप्यस्य च समता निश्चीयते । प्रायशो मण्डूरेषु इयमेव स्रुतिः स्वीकृता दरीदृश्यते । अतः मृतसूतादीनां समं मण्डूरम् । मण्डूरेण तुल्यं ताप्यमिति निश्चितो योगः । रसरत्नसमुच्चये विड, तालक, बोला अधिकत्वेन निवेशिताः । र. का. अभ्रस्थाने विषं दृश्यते, अन्धमूषागतमितिपद्यस्थाने कलमस्यतुपामेस्तदधोमुखगतं पचेत्स्वाङ्गशीतं समुद्धृत्य इति पाठो दृश्यते ।

भाषा—पारा, तांबा सुवर्ण, अभ्रक, फौलाद, मुण्ड इनकी भस्में और शुद्धगन्धक ये सब समभाग-इनसबकी बराबर मण्डूर और सुवर्णमाक्षिकभस्म मिलाकर एकरोज घीकुंआरके रससे मर्दनकर गोला बनाय सुखाकर सम्पुटमे बन्दकर गजपुटकी आंचदे। स्वाङ्गशीतलहोनेपर निकालकर रखछोडे । इसमेंसे १–१ माशा शक्करके साथ देनेसे असाध्यभी बवासीर नष्ट होता है ॥ १६६ ॥

१६७ तीक्ष्णमुखोरसः (द्वितीयः)

तीक्ष्णंशुल्वसुरायसीसुगगनं ताप्यासहेताण्डवं,
गोदन्तं रसराजमिश्रितममुं धृत्वा सुखल्वेभिपक्
द्राक्षागारमृदापयोजविसिनीकन्दोत्थितैःसप्तशो
घृष्ट्वा यष्टिरसैः सितामधुयुता वल्लप्रमाणा वटी
क्षिप्रंहन्तिचपित्तसम्भवगदान्सर्वांश्च पित्तज्वरान्
कासश्वासगलामयक्षयतृपादाघश्च शोषं भृशम्।
प्रज्ञापारमिते निशीथसमये स्वप्ने प्रसादीकृतं,
नाम्नातीक्ष्णमुखं रसेन्द्रममलं श्रीनाथनाम्नेपुरा

रसेन्द्र मं., र., सर्वपित्ते

भापा—फौलाद, तांवा, सुवर्ण, अभ्रक, सुवर्णमाक्षिक, जस्तभस्म, हरिताल, गोदन्ती, पारदभस्म इनसबको समभागलेकर १–२ रोज खरलकर द्राक्ष, नदीकी कालीमिट्टी, कमलकापञ्चाङ्ग, कमलकीमिट्टी, मुलहठी, शक्कर और मधु इनमे १–१ रोज क्रमसे मर्दनकर ३–३ रत्तीकी गोलियें बनाकर रखछोड़े। इनमेसे १–१ गोली तत्तद्रोगहरानुपानके साथ देनेसे ज्वरादि समस्त पित्तरोग, कास, श्वास, गलामय, क्षय, तृपा, दाह, शोप, इन सबको यह नष्ट करता है। इसको श्रीनाथविद्वान्को स्वप्नमे देवता लोगोंने प्रसादरूपसे प्रकाशित किया है॥ १६७॥

१६८ तृप्तिसागररसः

रसभस्म च भागैकं रसाद्विगुणगन्धकम्।
गन्धकाद्विगुणश्चाऽभ्रं निश्चन्द्रं मर्दयेत्ततः॥
दिनैकं कटुतैलेन रुद्ध्वा चुल्यां विपाचयेत्।
यामैकं वालुकायन्त्रे समुद्धृत्यविमर्दयेत् ७५०॥
हयमारकमूलोत्थरसै यामं निरुद्ध्य च।
पूर्ववत्पाचयेच्चुल्यां समादाय विमिश्रयेत् ७५१
त्रिक्षारं पञ्चलवणं चव्याग्निद्वयजीरकैः।
विडङ्गेन च तत्तुल्यं युक्तोऽयं तृप्तिसागरः॥
भक्षयेन्मापमात्रश्च सन्निपाताऽतिसारजित्।
सज्वरां ग्रहणीं हन्ति ह्यनुपानं यथोचितम्॥

नि. र., र. सु., वै. चि., अतिसारे।

भापा—पारदभस्म १ भाग, शुद्धगन्धक २ भाग, निश्चन्द्रअभ्रकभस्म ४ भाग, लेकर एक दिन कटुतैलसे मर्दनकर गोलावनाय दो सकोरोंमे बन्दकर ६–७ कपड़मिट्टी देकर सुखादे। फिर वालुकायन्त्रमें एकपहर आंचदेकर स्वाङ्गशीतल होनेपर निकालकर सज्जी, सुहागा, यवक्षार, पांचोंनमक, चव्य, चित्रक, स्याह सफ़ेदजीरा, सब समभाग लेकर १–२ रोज मर्दनकर रखछोड़े। अथवा अदरखके रससे १–१ माशेकी गोलियें बनाकर रक्खे। इनमेंसे १–१ गोली अथवा १ माशा चूर्ण तत्तद्रोगहरानुपानके साथ देनेसे सन्निपातातिसार और ज्वरयुक्त ग्रहणीको यह नष्ट करताहै॥ १६८॥

१६९ तृष्णाछर्दिहरोरसः

गन्धपिष्टिसमायुक्तं तालं ताप्यञ्च गन्धकम्।
युक्त्या भस्मत्वमानीतं तृष्णाछर्दिनिवारणम्॥

रसेन्द्र मं., तृष्णायाम्।

भापा—शुद्धपारा १ तोले, गन्धक ३ माशे मिलाकर नीबूकेरसमें ४ पहर घोटकर शुद्धहरिताल, स्वर्णमाक्षिक और गन्धक १–१ तोला देकर नीबूके रससे १–२ रोज मर्दनकर गोली बनाकर सुखावे। सूखनेपर पुरानी ईटमें आठ अङ्गुलका खड्डा खोदकर इसगोलीको रखदे और नीचे आंचदे। ऊपरसे साफकियेहुए नीबूके रसका चोवादे। ऐसे लगातार ३ रोज चोवा देकर गोलीको निकालकर फिर एक रोज मर्दनकर गोली बनाकर सुखाकर सम्पुटमें वन्द कर ६–७ कपड़मिट्टी देकर सेरभर कण्डोंकी खुली जगहमें आंचदे। फिर निकालकर हरिताल और गन्धक १–१ तोला डालकर चार प्रहर घोटकर पूर्वकी तरह आंचदे। इसतरह जबतक पारेकी भस्म न होजाय तबतक करताजाय, जब अग्निस्थायी भस्म होजाय तब उसे निकालकर रखछोड़े। इसमेंसे १ रत्तीसे ३ रत्ती तक इलायची वंशलोचन, मुलहठी और पीपल १–१ रत्ती मिलाकर मधुमें चटानेसे अत्यन्त वढ़ीहुई प्यास, वमन, हैजा, दाह, रक्तपित्त, भ्रम इत्यादिरोगोंको यह नष्ट करताहै॥ १६९॥

१७० तृष्णारिरसः

मार्गेको मृतरङ्गस्य गगनस्यहतस्य च ।
मार्गेको मृततारस्य तत्सर्वं मर्दयेत्पुनः ७५५
द्राक्षाऽऽमलकतोयेन भावयेदातपे खरे ।
एकविंशतिवारान् हि ततो गजपुटे पचेत् ॥
स्वाङ्गशीतं ततो ग्राह्यं त्रिफलामधुयष्टिका-
शर्करासहितं खादेत्तृष्णार्तो रक्तिकाद्वयम् ७५७
अतिमूर्च्छोपशमनो गतवह्नेः प्रदीपनः ।
रसायनवरं चैतद्वाजीकरणमुत्तमम् ॥७५८॥

ना. वि., र. म. मा., तृष्णायाम् ।

भाषा—वङ्ग, अभ्रक और रजतभस्म समभाग लेकर द्राक्ष और आवलोंके अङ्गस्वरस अथवा क्वाथोंसे कड़ी धूपमें २१-२१ पुटें देकर शरावसम्पुटमें बन्द कर गजपुटकी आंचदेकर स्वाङ्गशीतल होनेपर निकालकर रखछोड़े । इसमेंसे २-२ रत्ती त्रिफला, मुलहठी और शक्करके साथ देनेसे अत्यन्त तृषा, मूर्च्छा, अग्निमान्द्य इन सबको यह नष्टकर अग्निको दीप्त करताहै । और उत्तम वाजीकरणहै ॥ १७० ॥

१७१ त्रिकट्वादि नस्यम्

त्र्यूषणं चित्रकश्चैव लाङ्गली चेन्द्रवारुणी ।
वचा मधूकबीजानि पाठानेत्रनदीफलम् ७५९
तालकं वत्सनाभश्च अङ्कोलक्षारयुग्मकम् ॥
एवं पञ्चदशैतानि समभागानि कारयेत् ७६०
सूक्ष्मचूर्णीकृतश्चैव निर्गुण्डीतिन्तिडीरसैः ।
आर्द्रकस्य रसैर्मर्द्य त्रिवारैश्च विचक्षणः ७६१
एवं नस्यं प्रदातव्यमर्कमूलरसेन च ।
अपस्मारञ्च हृद्रोगं वातसङ्कुलतां तथा ७६२
धनुर्वातं भ्रमं हन्ति ह्युन्मादं सन्निपातकम् ।
पूज्यपादकृतो योगो नराणां हितकाम्यया ॥

वै. चि., वाते ।

भाषा—त्रिकटु, चित्रक, करिहारी, इन्द्रायणकी-जड़, वच, महुएकीमजा, पाठा, सुगन्धवाला, मैनसिल, मैनफल, हरिताल, बछनाग, अङ्कोलकी मजा, सज्जीखार, यवक्षार, इन पन्द्रहचीजोंका कपड़छान चूर्णकर निर्गुण्डी, इमली, अदरख इनमेंसे एकके रसोंसे ३-३ भावनाएं देकर रखछोड़े । इसमेंसे आककी जड़की छालके रससे नस्य देनेसे अपस्मार (मृगी), हृद्रोग, वायुकी घबराहट, धनुर्वात, भ्रम, उन्माद, सन्निपात इनसबको यह नष्टकरताहै ॥ १७१ ॥

१७२ त्रिकट्वादिलोहम् (प्रथमम्)

त्रिकटुत्रिफलादन्तीमार्गत्रिमदशुण्ठिभिः ।
पुनर्नवासमायुक्तं शोथं हन्ति सुदुस्तरम् ॥
लोहं शोथोदरस्थौल्यजलोदरनिवारणम् ॥

र. सं., र. चि., र. मु., भ., र. क., र. चि., रसायनसं. र. र., र. चं., उदराधिकारे । कुत्रचित् व्योषादिलोह-मिति नाम्ना प्रथितोऽयं योगः ।

भाषा— त्रिकटु, त्रिफला, दन्तीमूल, अपामार्गकापञ्चाङ्ग, त्रिमद (नागरमोथा, चित्रक, विडङ्ग), सोंठ, पुनर्नवा येसब समभाग, इनसबकीबराबर लोहभस्म मिलाकर रखछोड़े । इसमेंसे ३-३ रत्तीसे शुरूकर १८ रत्तीतक बढावे । और दूध अथवा छाछपर रहे तो दुस्तर शोथ, उदरशोथ, अत्यन्त स्थूलता, जलोदर इनसबको यह दूर करताहै ॥

१७३ त्रिकट्वादिलोहम् (द्वितीयम्)

लोहचूर्णं त्रिकटुकं त्रिफला तिक्तरोहिणी ।
त्रिफलारससंयुक्तं पीतं चूर्णं गदान्तकृत् ॥

ना. वि., शोथाधिकारे ।

भाषा—त्रिकटु, त्रिफला, कुटकी, लोहभस्म येसब समभाग लेकर कूटकपड़छानकर मिलाकर रखछोड़े । इसमेंसे १-१ माशा त्रिफलाके हिम अथवा क्वाथके साथ लेनेसे यह मन्दाग्नि और शोथको दूरकरताहै ॥ १७३ ॥

१७४ त्रिकत्रयादिलोहम् (प्रथमम्)

पलं लोहस्य किट्टस्य पलं गव्यस्य सर्पिषः ।
सितायाश्च पलञ्चैकं क्षौद्रस्यापि पलन्तथा ॥
तोलैकं कान्तलोहस्य त्रिकत्रयसुभावितम् ।
ततः पात्रे विधातव्यं लौहे च मृन्मये तथा ॥
हविषा भावितश्चापि रौद्रे च शिशिरे तथा

भोजनादौ तथा मध्ये चाऽन्ते चापि प्रदापयेत्
अनुपानं प्रदातव्यं बुद्ध्वा दोषबलाबलम् ।
कामलां पाण्डुरोगञ्च सुदारुणहलीमकम् ॥
अम्लपित्तं तथा शूलं शूलञ्च परिणामजम् ।
कासं पञ्चविधं श्वासं ज्वरं प्लीहानमेव च ॥
अपस्मारं तथोन्मादमुदरं गुल्ममेव च ।
अग्निमान्द्यमजीर्णञ्च श्वयथुञ्च सुदारुणम् ॥
निहन्ति नाऽत्र सन्देहो भास्करस्तिमिरं यथा

र. सं., र. चं., र. मु., ध., भै. र., पाण्डुरोगे । धन्वन्तरावयमेव पाठो द्वितीयस्थाने सम्मोहलोहमिति नाम्ना प्रकल्पितः स अनुचितः । एकस्यैव योगस्य नानानामभिः पाठस्थापने भ्रमोत्पादकत्वात् ।

टि०—अत्र सर्पिःक्षौद्रसितानां त्रिषु पलेषु मण्डूरकान्तभस्मनोर्मिलितयोरेकपलेन योगाद् द्रवरूपतायां त्रिकत्रयभावनाया असम्भवादयं पाठस्त्रिकत्रयसमन्वित मित्यस्यस्थाने भ्रमप्रमादादिवशात्त्रिकत्रयसुभावितमिति सञ्जात इत्यनुमीयते, अतोऽस्माभिस्तथैव घृतोऽस्ति, तत्रापि कान्तलोहान्त समुदायेन तुल्यं त्रिकत्रयचूर्णं मिश्रय्य तत्क्वाथेन भावनां दत्वाऽन्ते घृतभावनांदत्वा योगो निष्पादनीय इत्यस्माकं सम्मतिः, यथास्थितपाठे त्वयमर्थः सुमहिम्ना ग्रहीतव्यः ।

भाषा—मण्डूरभस्म १ पल, गायकाघी १ पल, शक्कर १ पल, मधु १ पल, कान्तलोहभस्म १ तोला, इनसबको इकट्ठेकर त्रिकटु, त्रिफला, त्रिजात अथवा त्रिमद (नागरमोथा, चित्रक, विडङ्ग) इनका-चूर्ण पूर्वसमुदायके बराबर मिलाकर लोहे अथवा मिट्टीके बर्तनमे त्रिकत्रयकेक्वाथसे दिनमे धूपमे और रात्रिमे ओसमें रखकर ६–७ भावनाएं देकर खूब सुखाकर अखीरमें एकभावना धीकी देकर रखछोड़े । इसमेंसे अग्निबलके अनुसार मात्रा कायमकर भोजनके आदि मध्य तथा अन्तमे देवे । अनुपान औचिती देखकर कायम करे तो कामला, पाण्डुरोग भीषणहलीमक, अम्लपित्त, शूल, परिणामशूल, पांचप्रकारका कास तथा श्वास, ज्वर, प्लीहा, अपस्मार, उन्माद, उदर, गुल्म, मन्दाग्नि, अजीर्ण और भयंकरशोथ, इनसबको यह इसतरह नष्ट करताहै जैसे कि अन्धकारको सूर्य नष्ट करताहै ॥ १७४ ॥

१७५ त्रिकत्रयादिलौहम् (द्वितीयम्)

त्रिकत्रयसमायुक्तं जीवनीययुतं त्वयः ।
हन्त्यपस्मारमुन्मादं वातव्याधिं सुदुस्तरम् ॥

र. सं., ध., र. चं., र. चि., र. मु., र. का., उन्मादे अपस्मारे च ।

टि० अष्टवर्गश्चपर्णिन्यौजीवन्तीमधुकन्वया । जीवनीयगणः प्रोक्तो जीवनश्च पुनस्ततः ॥

भाषा—त्रिकटु, त्रिफला, त्रिजात अथवा त्रिमद और जीवनीयगण ये सब समभाग लेकर कूटकपड़छानकर बराबरकी लोहभस्म अथवा मण्डूरभस्म मिलाकर रखछोड़े । इसमेंसे यथारोगानुपानके साथ उचितमात्रामें देनेसे यह अपस्मार, उन्माद और दुस्तर वातव्याधियोंको नष्टकरताहै ॥ १७५ ॥

१७६ त्रिकत्रयादिलौहम् (तृतीयम्)

त्रिकत्रयत्रिवृद्दन्ती शशी भल्लातकानि च ।
लौहं स्थौल्यं निहन्त्याशु महावायुरिवाम्बुदम्

र. र. स्थौल्ये ।

भाषा—त्रिकटु, त्रिफला, त्रिमद, निशोत, दन्तीमूल, बाकुची और शुद्धभिलावे ये सब समभाग लेकर इनसबकी बराबर मण्डूरभस्म मिलाकर रखछोड़े । इसमेंसे यथारोगानुपानके साथ उचितमात्रामें देनेसे यह अत्यन्तस्थूलताको इसतरह नष्ट करताहै जैसे महावायु बादलोंको दूर करताहै ॥ १७६ ॥

१७७ त्रिकत्रयादिलौहम् (चतुर्थम्)

त्रिकत्रयगन्धरसैः सैन्धवग्रन्थिकैस्समम् ।
सुविशुद्धं लौहचूर्णं हन्ति सर्वोदराणि च ॥

र. का., उदररोगे ।

भाषा—त्रिकटु, त्रिफला, त्रिमद, (विडङ्ग, मुस्त, चित्रक,) शुद्धपारा और गन्धक, सैन्धव, पिपलामूल ये सब समभाग लेकर पारे गन्धककी नीलवर्ण कज्जलीकर मण्डूरभस्म सबकी बराबर मिलाकर रखछोड़े। इसमेंसे उचितानुपानकेसाथ उचितमात्रामे देनेसे यह समस्त उदररोगोंको नष्ट करताहै ॥ १७७ ॥

१७८ त्रिकत्रयादिलौहम् (पञ्चमम्)

त्रिकत्रयसमायुक्ततालमूलीशतावरी–
योगान्निहन्ति शूलानि दारुणान्ययसो रजः ॥

रसायन सं., र. चि., र. का., शूले ।

भाषा—त्रिकटु, त्रिफला, त्रिमद, तालमूली, शतावर, येसब समभाग लेकर बारीकचूर्णकर इसकी बराबर लोहभस्म अथवा मण्डूरभस्म मिलाकर रख छोड़े । इसमेंसे १ माशेसे २ माशेतक शूलहरानुपानके साथ देनेसे यह भीषणशूलोंको नष्ट करताहै ।

१७९ त्रिगन्धरसः

सुरसै राजवृक्षस्य तालगन्धमनःशिलम् ।
गुञ्जावाकुचिकाद्रावै र्भाव्यं कङ्गुणितैलके ॥
प्रतिद्रावै र्दिनैकन्तु भक्षयेदर्धनिष्ककम् ।
कुष्ठमौदुम्बरं हन्ति त्रिगन्धोऽयं महारसः ॥
गुञ्जाभल्लाततैलाभ्यां निष्कं वाकुचिचूर्णितम्
लेहयेदनुपानेन सर्वकुष्ठविनाशनम् ॥७७८॥

चि. र., र. को., र. क. ल., र. सु., र. का., चि. क्र., कुष्ठे । चि. क्र. त्रिदण्डेति नाम ।

भाषा—हरितालभस्म अथवा रसमाणिक्य, शुद्ध गन्धक और मैनसिल समभागलेकर सबका बारीक चूर्णकर अमिलतास, गुञ्जा, वाकुची इनप्रत्येकके अङ्गस्वरस अथवा काथोंसे १–१ रोज मर्दनकर मालकांगणके तैलमे एक रोज मर्दनकर रखछोड़े । इसमेंसे ४ रत्तीसे शुरूकर डेढ़माशेतक मात्रा सफेद गुञ्जा और भिलावेकातैल, वाकुचीकाचूर्ण ३–३ माशेके साथ मिलाकर चटावे तो औदुम्बर प्रभृति समस्त कुष्ठोंको यह नष्ट करता है ॥ १७९ ॥

१८० त्रिगुणाख्यरसः (त्रिनेत्ररसः)१

टङ्कणं हारिणं शृङ्गं स्वर्णं गन्धं मृतं रसम् ।
दिनैकमार्द्रकद्रावैर्मर्द्यं रुद्ध्वा पुटे पचेत् ॥७७९॥
त्रिगुणाख्यो रसो नाम्ना माषकं मधुसर्पिषा ।
सैन्धवं जीरकं हिङ्गु मध्वाज्याभ्यां लिहेदनु ॥
पक्तिशूलहरः ख्यातो याममात्रान्न संशयः ।

र. सं., शा., भै. र., नि. र., र. र. स., र. प्र, सु., चि. र. म., र. चं., र. को., र. सु., र. (मा), वृ. यो. त., र. मं., र. र., रसायनसं., र. कौ., टो., र० क., र. का., र. क. ल., ध., ना. वि., शूले । कुत्रचित्– टङ्कणं हारिणं शृङ्गं स्वर्णं गन्धं मृतं रसम् इत्यस्य स्थाने टङ्कणं आरितं स्वर्णं शुल्वं शङ्खं मृतो रसः इति पाठो दृश्यते

भाषा—सुहागा, हिरणकासींग, सुवर्णभस्म, शुद्धगन्धक और पारदभस्म ये सब समभागलेकर बारीक चूर्णकर एक दिन अदरखके रससे मर्दनकर शरावसम्पुटमे बन्दकर गजपुटकी आंचदे । स्वाङ्गशीतल होनेपर निकालकर १–१ माशा मधु और घीके साथ चाटकर सेंधा, जीरा और सिकाहुआ हींग समभाग लेकर इनका ३ माशे चूर्ण मधु और घीके साथ चटानेसे एक पहरभरके अन्दर पक्तिशूल दूर होता है ॥ १८० ॥

१८१ त्रिगुणाख्यरसः (द्वितीयः)

गन्धकोऽष्टगुणः सूताच्छुद्धो मृद्वग्निना क्षणम् ।
पक्त्वाऽवतार्य सञ्चूर्ण्य चूर्णतुल्याऽभयायुतम् ॥
सप्तगुञ्जामितं खादेद्वर्धयेच्च दिनेदिने ।
गुञ्जैकैकं क्रमेणैव यावत्स्यादेकविंशतिः ७८२
क्षीराज्यं शर्करामिश्रं शाल्यन्नं पथ्यमाचरेत् ।
कम्पवातप्रशान्त्यर्थं निर्वाते निवसेत्सदा ॥
त्रिगुणाख्यो रसो नाम त्रिपक्षात्कम्पवातनुत् ॥

र. चि., वै. वि., भै. सा., र. कौ., र. क. यो, र. मं., यो. म, र. र., र. का., नि. र., र. सं., ध., र. सु., र. चं., कम्पवाते । र. सं., ध., र. सु., र. चं., द्विगुणाख्यरसः ।

भाषा—शुद्धगन्धक ८ भाग, शुद्धपारा १ भाग लेकर दोनोंकी नीलवर्ण कज्जलीकर कड़ाहीमें घृत लगाकर अग्निपर रखकर उसमें कज्जलीको डालदे । गलजानेपर उतारकर दोनोंकी बराबर हर्रेका बारीक चूर्ण डालकर खूब घोटकर रखछोड़े । इसमेंसे ७ रत्ती लेकर मधु वगैरहके साथ खावे । और रोजाना १–१ रत्ती बढ़ावे जबतककि २१ रत्तीकी मात्रा न होजाय । इसके ऊपर दूध, घी और शक्करकेसाथ सफेद

चावलका भात खाना चाहिए। कम्पवातकी निवृत्तिकेलिए निर्वातस्थानमे रहनेसे ३ पक्षमे आराम होता है ॥ १५१ ॥

१८२ त्रिदशेश्वररसः

सूतो बलिस्तीक्ष्णकश्च ह्यमृतं व्यालपत्रकम् ।
हरेणुः कृमिहा मेघो ग्रन्थिकं त्रुटिकेसरम् ॥
त्र्यूपणश्च वरा चैव म्लेच्छभस्म तथैव च ।
एतानि समभागानि क्षौद्रं द्विगुणं भवेत् ॥
शुल्वभस्म समं बीजं दन्तीजातं विनिःक्षिपेत्।
त्रिदशेश्वरनामाऽयं रसः स्यात्सर्वरोगजित् ॥
श्वासं कासं तथा हिक्कामर्शांसि च भगन्दरम् ।
हृच्छूलं पार्श्वशूलञ्च कर्णशूलं कपालिकम् ॥
हरेत्सङ्ग्रहणीरोगमष्टौ च जठराणि च ।
प्रमेहान्विंशतिश्चैवमश्मरीश्च चतुर्विधाम् ॥
अनुपानविशेषेण सर्वान्रोगान्नियच्छति ॥

र. का., उदररोगाधिकारे।

भाषा—शुद्धपारा और गन्धक, लोहभस्म, शुद्धवछनाग, चित्रक, तज, रेणुका, विडङ्ग, नागरमोथा, पिपलामूल, इलायची, केसर, त्रिकटु, त्रिफला, ताम्रभस्म, शुद्धजमालगोटा, येसब १–१ तोला, मिश्री अथवा शक्कर सबसे दूनी डालकर एकजगह मिलाकर रखछोड़े। यह त्रिदशेश्वर रस तैयारहुआ। इसमेसे अग्निबलके अनुसार खानेसे श्वास, कास, हिचकी, बवासीर, भगन्दर, हृच्छूल, पार्श्वशूल, कर्णशूल, मस्तकशूल, सङ्ग्रहणी, आठप्रकारके उदररोग, २० प्रकारके प्रमेह, ४ प्रकारकी पथरी, इनसबको तथा अन्य तमाम रोगोंको तत्तद्रोगहरानुपानकेसाथ देनेसे नष्ट करताहै ॥ १८२ ॥

१८३ त्रिदोपदावानलकालमेघः

तालेन वङ्गं शिलया च नागं
रसैः सुवर्णं रवितारपत्रम् ।
गन्धेन लौहं दरदेन सर्वं
पुटे मृतं योजय तुल्यभागम् ॥ ७८९ ॥
तत्तुल्यसूतं द्विगुणञ्च गन्धं
तुत्थञ्च गन्धेन समानभागम् ।
निम्बूत्थ तोयेन विमर्द्य सर्वं
गोलं विधायाऽथ मृदा विलिप्य॥७९०
पुटञ्च दत्त्वाऽथ विमर्दयेनं
गन्धेन तुल्येन कृशानुनीरैः ।
विषञ्च दत्त्वाऽथ कलाप्रमाण-
मीपल्कृशानूत्थरसैः पचेत्तत् ॥७९१॥
पित्तैस्तथा भावित एप सूत-
स्त्रिदोपदावाऽनलकालमेघः ।
वल्लं ददीताऽस्य च पूर्वयुक्त्या
दाहोत्तरे तं मधु पिप्पलीभिः ॥
मुद्गाश्च शाल्यन्नमिहप्रशस्तं
पथ्यं भवेत्कोष्णमिदं दिवान्ते ७९२॥

भै. र., र. सु., र. दी., सन्निपाते।

भाषा—हरितालसे वङ्ग, मैनसिलसे नाग, पारेसे सुवर्ण, गन्धकसे ताम्र और चांदी, शिंगरिफसेलोह, समभागसे युक्तकर बिजोरे वगैरहके रससे घोटकर गोलाबनाय शरावसम्पुटमें बन्दकर यथोचित अग्निदेकर भस्म कर ले। फिर सब समभाग लेकर इनसबकी बराबर शुद्धपारा, द्विगुणगन्धक और तुत्थ देकर नींबूके रससे मर्दनकर गोलाबनाय शरावसम्पुटमे बन्दकर गजपुटकी आंचदे। स्वाङ्गशीतलहोनेपर निकालकर इसकी बराबर शुद्धगन्धक मिलाकर चित्रकके रससे एकदिन घोटकर इसतमामका सोलहवां हिस्सा शुद्धबछनाग मिलाकर चित्रकके रससे १–२ पहर घोटकर गोलाबनाय शरावसम्पुटमे लघुपुटकी आंचदेकर स्वाङ्गशीतलहोनेपर निकालकर पञ्चपित्तोंकी एक एक भावनादेकर रखछोड़े। इसमेसे ३–३ रत्ती मधुवगैरहकेसाथ देवे। अगर दाह होतो मधु और पीपलकेसाथ देवे। मूंग और शालीचावलका गरम भात सन्ध्याकालमें देवेतो यह समस्त सन्निपातोंको दूर करता है ॥ १८३ ॥

१८४ त्रिदोषदावानलरसः

प्रत्येकं भागवृद्ध्या विषरसबलय-
स्त्र्यूषणं स्यात्त्रिभागं,
वित्तेशस्याऽक्षबीजं निखिलपरिमितं
वह्निजं चाऽष्टभागम् ।
क्षुद्रातोयेन मर्द्यो मुनिदिवसमितं
सिद्धिमायाति सूतो,
वल्लो हन्याज्ज्वरौघं त्रिकटुकरसतः
शृङ्गवेराऽम्बुना च ॥ ७९३ ॥
मान्द्ये ग्रहण्यां मरिचाऽऽज्ययुक्तः
शूले च सामुद्रिकसर्पिषा च ।
पाण्डौ सुधाकाण्डरसेन देय-
स्त्रिदोषदावाऽनलसूतराजः ॥ ७९४ ॥
मुद्गयूषसहितं कलमान्नं
पथ्यमत्र गदितं ज्वरिणां तु ।
अन्यरोगहितकारि भोजनं
मांसवर्ज्यमपिशस्यतेऽखिलम् ॥७९५॥

र., सन्निपाते ।

भाषा—शुद्धबछनाग १ भाग, शुद्धपारा २ भाग, शुद्धगन्धक और त्रिकटु ३–३ भाग, करञ्जकीमज्जा सबकी बराबर, मरिच ८ भाग, लेकर सबको कूटकपड़छानकर पारेगन्धककी नीलवर्ण कज्जलीमे मिलाकर भटकटैयाके रससे सातदिनतक निरन्तर मर्दनकर तीन ३ रत्तीकी गोलियें बनाकर रखलेवे । इनमेसे १–१ गोली त्रिकटु अथवा अदरखके रसकेसाथ देनेसे ज्वर नष्ट होताहै । मन्दाग्नि और ग्रहणीमे मरिच और घीकेसाथ, शूलमे समुद्रनमक और घीकेसाथ, पाण्डुमे थूहरके डंडेकेरसके साथ देनेसे इनसबबीमारियोंको यह नष्टकरताहै । ज्वरमे मूंगके यूषकेसाथ शालीचावलका भातदेना । और दूसरे रोगोमे मांसको छोड़कर हल्की सबचीजें दे सक्तेहैं ॥

१८५ त्रिदोषनीहारविनाशसूर्योरसः

रसेन गन्धं द्विगुणं कृशानो
रसैर्विमर्द्योऽष्टदिनानि घर्मे ।
रसाऽष्टभागन्त्वमृतञ्च दद्या-
द्विमर्दयेद्वह्निरसेन किञ्चित् ॥
पित्तैस्तु सम्भावित एष देयः
त्रिदोषनीहारविनाशसूर्यः ॥ ७९६ ॥

र. सं., र. सु., वृ. यो. त., र. क., र. दी., रसायन सं., र. सि., र. चि., र. को., यो. म., र. ह्र., भै. र., र. का., सन्निपाते । र. सु., भै. र., प्रभाकरेतिनाम ।

भाषा—शुद्धपारा १ भाग, शुद्धगन्धक २ भाग, इनकी नीलवर्णकज्जलीकर अपामार्गके रससे ८ दिनमर्दनकर शुद्धबछनाग ८ भाग देकर १–२ पहर अपामार्गकेरससे खरलकर सुखाकर पांचपित्तोंसे १–१ भावना देकर १–१ रत्तीकी गोलियें बनाकर रखछोड़े । इनमेसे १–१ गोली तत्तद्रोगहरानुपानके साथ देनेसे त्रिदोषजनित ज्वरादि समस्तरोगोंको यह दूरकरताहै ॥ १८५ ॥

१८६ त्रिदोषमूलाऽनलरसः

उन्मत्तबीजोत्थरसेन सूतं
गन्धं विषं मर्दय तुल्यभागम् ।
ताम्रस्य पात्रे हि दिनैकमानं
निम्बूरसेनाऽपि च पित्तवर्गैः ७९७ ॥
क्षुद्राद्वयोत्थेन रसेन सूत-
स्त्रिदोषमूलाऽनल एष सिद्धः ।
गुञ्जाद्वयं त्र्यूषणयुक्तमस्य
दद्दीत चित्रार्द्ररसेन वाऽपि ॥
नासापुटे वाऽपि नियोजितव्या
गुञ्जाऽस्य शुण्ठीमरिचार्द्रयुक्ता ७९८॥

र. दी., सन्निपाते ।

भाषा—शुद्धपारा, गन्धक और बछनाग येसब समभागलेकर नीलवर्णकज्जलीकर धतूरेके बीजोंके रससे तांबेके वर्तनमे तांबेके डंडेसे एकरोज मर्दनकर नीबूकारस, पञ्चपित्त, भटकटैयाका अङ्गस्वरस, इनप्रत्येकसे १–१ रोज मर्दनकर सुखाकर रखछोड़े । इसमेसे २–२ रत्ती समभागत्रिकटुके चूर्णमे मिलाकर चित्रक अथवा अदरखकेरससे एकनासापुटमे

नस्य दे। और दूसरे नासापुटमें एकरत्ती रसको सोंठ, मिर्च और अदरखकेसाथ मिलाकर देनेसे मृतावस्थभी सञ्ज्ञाको प्राप्त होजायगा। इससे सन्निपात, अभिन्यास, अपस्मार, उन्माद, मूर्च्छा येसब तत्काल नष्ट होतेहैं ॥ १८६ ॥

१८७ त्रिदोषशमनरसः

स्वर्णं सूतं तथा गन्धं मर्दयेत्कन्यकाद्रवैः ।
पश्चाद्गोलं विधायाऽथ शरावसम्पुटे पचेत् ॥
स्वाङ्गशीतं समुद्धृत्य चूर्णं कृत्वा प्रयत्नतः ।
भक्षयेद्वल्लमात्रन्तु त्रिदोषजरुजं जयेत् ॥ ८००

र. प्र. सु., र. चं., र. म. मा. ज्वराधिकारे।

भाषा—सुवर्णभस्म, शुद्धपारा और गन्धक समभागलेकर नीलवर्णकज्जलीकर घीकुंआरके रससे १–२ रोज मर्दनकर गोलाबनाय सुखाकर शरावसम्पुटमे बन्दकर लघुपुटकी आंचदे। स्वाङ्गशीतलहोनेपर निकालकर ३–३ रत्ती तत्तद्रोगहरानुपानके साथदेनेसे यह तमाम त्रिदोषज रोगोंको दूर करताहै ॥

१८८ त्रिदोषहारीरसः

रसबलिसशिलाऽऽलताप्यतुत्थो-
दधिमलटङ्कनिकुम्भजाऽमृताख्यम् ।
विलुलितमहिपित्ततस्त्रिधा स्या-
द्रुधिरगतः शिरसि त्रिदोषहन्ता॥८०१॥

दो, र. चि., र. सु., र. सं., र. का. यो. म., त्रिदोषे। र. सं., प्रच्छन्नरसः।

भाषा—शुद्धपारा, गन्धक, मैनसिल, हरिताल, सुवर्णमाक्षिक, तुत्थ, समुद्रफेन, सुहागा, जमालगोटा, बछनाग, सबसमभाग लेकर बारीक चूर्णकर पारेगन्धककी नीलवर्णकज्जलीमे मिलाकर सर्पके पित्तकी तीनभावनाएं देकर १–१ रत्ती तालुऊपर पाछदेकर रक्त निकालकर इसचूर्णको रगडनेसे यह घोर सान्निपातको दूरकरताहै ॥ १८८ ॥

१८९ त्रिदोषाङ्कुशोरसः

गन्धकाच्च गगनाच्च पारदा-
च्चाऽपरः स्फुरति कोऽप्यहो रसः ।
व्यस्त सञ्चितदोषशोषणे
व्यक्तियुक्तिविहितत्रिकत्रयात् ८०२ ॥
त्रिस्वेदं वर्चलामाध्य(घी)कर्पूरोद्भववारिभिः
वट्रूत्कटमधूलीभिस्तूक्तमेवं त्रिकञ्च तत् ८०३
ऐलेयाऽफेनधूस्तूलैस्तत्त्रिकाऽऽवर्तितं त्रिकम् ।
रसायनविदामेतद्विज्ञेयं त्रिकं त्रिकम् ८०४ ॥

र. (मा.,) सन्निपाते।

भाष्यम्—व्यस्ताः–अनुबन्धं विना स्वतन्त्रतया प्रकर्षेण कुपिताः स्वस्वमर्यादामतिक्रान्ताः। सम्यक्प्रकारेण निचिता एकद्वित्र्युल्बणत्वादिभेदयुक्ततयाऽहमहमिकया स्वास्थ्यविनाशनोन्मुखा दूषयन्ति–विरुद्धाऽऽहारविहारादिभिः क्षोभं प्राप्य शरीरचक्रं विकृतियुक्तं कुर्वन्ति ये ते दोषाः विकृतवातपित्तकफास्तेषां **शोषणे**-तद्गतविकृतिप्रक्षालने ऽथ च संशमने **गन्धकाद्गगनात्पारदाच्च-अपरो**ऽधिकशक्तिकोरसः अन्यात्मकं सोमात्मकञ्चौषधं **न स्फुरति**-दृष्टिपथं नाऽऽरोहति। तत्कथमिति चेत् **वर्चलं**-सुवर्चला–वृहल्लोणिका, तदुत्थितं लवणमथ च सूर्यभक्ता ब्राह्मी च। **माध्य** इतिपाठे कुरुण्टकः, **माधीति** पाठे लाङ्गली, अथवा माधइतिपाठे लक्षणया तस्मिन् परिणतवीर्यत्वाद्द्वयमपि ग्राह्यम्। **कर्पूरं** प्रसिद्धमेषां **वारिभि**र्यथायोग्यं स्वरसकाथैस्त्रिस्वेदं (रसप्रकरणात्स्वेदशब्देन स्वेदनमर्दनपाका गृह्यन्ते। पारदोर्ध्वपातनस्यापि पाकेऽन्तर्भावः। त्रिष्वप्येतेषु संस्कारेषु स्वेदनाऽव्यभिचारात्। त्रिसञ्ज्ञाकरणन्तु व्यवहारसौकर्यार्थम्) कृत्वा अर्थात् स्वेदनमर्दनोर्ध्वपातनानि क्रमेणैकैकं दिनं विधाय **वट्रुः**–क्षुद्रेन्द्रवारुणी, **उत्कटो**वृहद्वारुणी, **मधूली** मूर्वा, ज्योतिष्मती च। (मूर्वागुणाः–मूर्वा सरा गुरुः स्वादुस्तिक्ता पित्तास्रमेहनुत्। त्रिदोषतृष्णाहृद्रोगकण्डुकुष्ठज्वरापहा ॥ भा० ॥ ज्योतिष्मती कटुस्तिक्ता सराकफसमीरजित्। अत्युष्णा वामनी तीक्ष्णा वह्निवृद्धिस्मृतिप्रदा ॥ भा. प्र.) इन्द्रवारुणी, महावारुणी, मूर्वा, ज्योतिष्मतीनां स्वरसैः पूर्वोक्तं त्रिस्वेदं विधायैषां बीजोत्थिततैलेन च पुनस्त्रिस्वेदं विधाय–**ऐलेयाऽफेनधूस्तूलैश्च** त्रिस्वेदं विधाय

पारदः संस्करणीयः । एवमभ्रकेऽपि यथाक्रममेतैः पुटानि दत्त्वा निश्चन्द्रता विधातव्या । गन्धकस्याप्येतैर्द्रव्यैरेकैकां भावनां दत्त्वा संस्कारः करणीयः । इत्थं स्वेदाख्यमेकम्, इन्द्रवारुण्यादि द्वितीयम्, ऐलेयादितृतीयम्, त्रिकमेतैस्त्रिकैरावर्तितं–क्रियाविशेषैस्संस्कृतं गन्धकगगन पारदात्मकं त्रिकं रसायनं भवतीत्यध्याहार्यम् । एतच्च त्रिकं रसायनविदां दुर्विज्ञेयमस्ति गुरूपदेशैकवेद्यत्वात् । हरीतकी विभीतकाऽऽमलकीभिः प्रथमं महत्त्रिफलाख्यं त्रिकम् । (१) इदं तावच्चतुर्विधम् । काश्मर्यमृद्वीकापरूषकैर्द्वितीयं ह्रस्वाख्यम् (२), जातीफललवङ्गपूगैस्तृतीयं सुगन्धाख्यम् । (३) द्राक्षादाडिमखर्जूरैश्चतुर्थं मधुराख्यम् (४) इति चत्वारि त्रिफलाख्यानि त्रिकाणि । शुण्ठीमरिचपिप्पलीभिस्त्र्यूषणाख्यं त्रिकम् ,(५) एलात्वक्तमालपत्रैस्त्रिजाताख्यम्, (६) विडङ्गमुस्ताचित्रकैस्त्रिमदाख्यम् (७) । गन्धकाद्यम् (१) स्वेदनाख्यम् (२) धर्चलाद्यम् (३) ऐलेयाद्यम् (४) वारुण्याद्यम् (५) मिलित्वा द्वादश त्रिकाणि सम्पन्नानि । तत्रैकैकशोद्विशस्सर्वशो वा प्रकुपितदोषेषु कालाऽग्निवयोबलप्रकृतिदेशाद्यौचितीं सम्यगाकलय्योक्तप्रकारेण संस्कृतान् गन्धकगगनपारदान् विधायैषां मध्यादुचितं स्वाऽभीष्टसाधकं रसं निर्धार्योक्तत्रिकेषूचितं त्रिकं निर्द्धार्य तदीयस्वरसकल्कफाण्टहिमक्वाथघनचूर्णादीनां मध्यादेकां विकृतिं स्वकार्यकरां निर्धार्य तया साकं रसः प्रयुक्तश्चेच्छीघ्रं तन्तं दोषं नाशयिष्यतीति निर्विवादम् । अथ चोक्तसंस्काराऽऽपन्नांस्त्रीनेकत्र समभागतया सम्मिश्रय्येन्द्रवारुण्यहिफेनधूर्तज्योतिष्मतीतैलैः प्रत्येकमेकैकदिनानि मर्दयित्वा काचकूप्यां संस्थाप्य युक्त्या वालुकायन्त्रे त्रिचत्वान् पाचयित्वा स्वाङ्गशीतलताङ्गतमाकृष्य पुनः पूर्ववन्मर्दयित्वा पाचयेत् । अभ्रकश्च तलस्थं पारदे प्रक्षिप्य गन्धकं नूतनं प्रतिपाकं प्रक्षिपेदेवं यावद्रसस्तलस्थो न भवति तावत् कारयेत् । सा तलस्थता पुनः सप्तकाचघटीषु पाकान्निश्चयेन भविष्यति । तच्च त्रिदोषाङ्कुशं रसं तत्तद्रोगहरत्रिकेण साकं प्रयोजयेत् । उदाहरणार्थं दिग्दर्शनं-यथा-ऐलेयाहिफेनधत्तूरतैलैर्वाते, वातकफे वा । त्र्यूषणेनकफे । काश्मर्यमृद्वीकापरूषकै र्द्राक्षादाडिमखर्जूरैर्वा पित्ते, वातपित्ते वा । सन्निपाते तु तात्सामयिकीमवस्थामालोच्योचितानि त्रिकाणि संयोज्य प्रयुक्तश्चेत्तद्विघाताऽयाऽलम्भविष्यति । कफवातोल्बणे सन्निपाते त्वौचितीं निर्द्धार्य त्रिप्रकारं स्वेदं प्रयोजयेत् । स च उष्णः, अत्युष्णः (यावत्सहनशक्तिकः) मृदुरिति भेदेन त्रिविधः । रोगाऽपेक्षः ऋत्वपेक्षः व्याधिताऽपेक्ष इति भेदेन वा । स्निग्धः, रूक्षः, स्निग्ध रूक्षः इति भेदेन वा स्वेदस्य त्रिविधत्वम् । तत्र वातश्लेष्मणि स्निग्धरूक्षः वातेस्निग्धः कफेरूक्षः । शीतव्याधौ महाबले शरीर महास्वेदः । शीतव्याधौ मध्यमे शरीरे मध्यमः । शीतव्याधौ दुर्बले शरीर दुर्बलः स्वेदः । शरीरत्रैविध्यादेव त्रिविधत्वं स्वेदस्य व्याधौ तु शीते एव स्वेदः प्रयोज्यो न पुनरुष्णे । स्वेदस्य विस्तरश्चरकादवगन्तव्यः स च—

अतः स्वेदाः प्रवक्ष्यन्ते यैर्यथावत्प्रयोजितैः ।
स्वेदसाध्याः प्रशाम्यन्ति गदा वातकफात्मकाः
स्नेहपूर्वं प्रयुक्तेन स्वेदेनाऽऽवर्जितेऽनिले ।
पुरीषमूत्ररेतांसि न सज्जन्ति कथञ्चन ॥
शुष्काण्यपि हि काष्ठानि स्नेहस्वेदोपपादनैः ।
नमयन्ति यथान्यायं किं पुनर्जीवतो नरान् ॥
रोगर्तुव्याधिताऽपेक्षो नात्युष्णोऽतिमृदुर्न च ।
द्रव्यवान् कल्पितो देशे स्वेदः कार्यकरो मतः
व्याधौ शीते शरीरे च महान् स्वेदो महाबले
दुर्बले दुर्बलः स्वेदो मध्यमे मध्यमो हितः
वातश्लेष्मणि वाते वा कफे वा स्वेद इष्यते ।
स्निग्धरूक्षस्तथा स्निग्धो रूक्षश्चाऽप्युपकल्पितः
आमाशयगते वाते कफे पक्वाऽऽशयाश्रिते ।
रूक्षपूर्वो हितः स्वेदः स्नेहपूर्वस्तथैव च ॥
वृषणौ हृदयं दृष्टी स्वेदयेन्मृदुनैव वा ।
मध्यमं वङ्क्षणौ शेषमङ्गावयवमिष्टतः ॥
सुशुद्धैर्नक्तकैः पिण्ड्या गोधूमानामथापि वा ।
पद्मोत्पलपलाशैर्वा स्वेद्यः संवृत्य चक्षुषी ॥

मुक्तावलीभिः शीताभिः शीतलैर्भाजनैरपि।
जलार्द्रैर्जलजैर्हस्तैः स्विद्यतो हृदयं स्पृशेत्॥
शीतशूलव्युपरमे स्तम्भगौरवनिग्रहे।
सञ्जाते मार्दवे स्वेदे स्वेदनाद्विरतिर्मता॥ इत्यादि

भाषा—वड़ीलोणी (पञ्जाबमें लाणी शब्दसे प्रसिद्ध है जिसको कि जलाकर सज्जी निकाली जाती है) का रस अथवा सज्जी, हुरहुर, ब्राह्मी, कुरण्टक (पीयावासा), कलिहारी, कचूर, छोटी और वड़ी इन्द्रायण, मदार, मूर्वा, मालकांगण, एलुवा, ताजे-पोस्तकारस (अभावमें अफीम डालना) इनप्रत्येक के यथासम्भव स्वरस-काथ-तैलोंसे यथाक्रमसे एक एक रोज शुद्धपारदका दोलायन्त्रसे स्वेदनकरे। बाद एकएक रोज तप्तखरलमें मर्दनकर ६—७ कपड़मिट्टी दीहुई हंडीमें डमरूयन्त्र बनाय ऊर्द्धपातनकरे। स्वाङ्गशीतल होनेपर तमाम पारेको निकालकर दूसरी दवामें मर्दनकर ऊर्द्धपातन करे। ऐसे प्रत्येकमें स्वेदन, मर्दन और ऊर्द्धपातनकर पारेका संस्कारकरे। इसीतरह इनतमामचीजोंके स्वरससे धान्याभ्रकको तीन ३ या १—१ रोज मर्दनकर बारीक २ टिकियां बनाय सुखाकर गजपुटकी आंचदे। स्वाङ्गशीतल होनेपर निकालकर दूसरी चीजमें घोट-कर टिकियां बनाय सुखाकर गजपुटकी आंचदे। ऐसे क्रमशः करतारहे जब निश्चन्द्र होजावे तब रहने दे। इसीतरह उपरोक्त दवाओंका रस कोरी हंडीमें गन्धकसे चौगुना अथवा बराबर डालकर ऊपर मलमलका कपड़ा बांधके उसपर गन्धक बिछा देवे। इस यन्त्रको खड्डेमें रखकर ऊपर शराव ढक-कर सन्धिको राखसे ढकदेवे। ऊपर जङ्गलीकण्डोंकी आंच इतनी दे कि गन्धक गलकर नीचे द्रवमें चला-जावे। स्वाङ्गशीतल होनेपर गन्धकको निकालकर कपड़ेसे पोंछकर धूपमें सुखादे। फिर इसीतरह क्रमसे तमाममें शुद्धकरलेवे। इनप्रत्येकको रोग और रोगी तथा समयका विचारकर उक्त त्रिकोंके साथ घोटकर अलग २ प्रयोगकरे। अथवा इन-की पर्पटी बनाकर काममें लेवे। अथवा इन-तीनोंको समभागमें लेकर नीलवर्ण कज्जलीकर वड़ी लोणी प्रभृति प्रत्येकके रसोंसे १—१ रोज घोटकर सुखाकर आतशीशीशीमें रख मुंह वन्दकर बालुका-यन्त्रमें मन्द, मध्य और खर ऐसे ३ अहोरात्रकी अग्निदेवे। स्वाङ्गशीतल होनेपर निकालकर ऊपर उड़ेहुए पारे तथा नीचे रहीहुई अभ्रक भस्मको निका-लकर गन्धक समभाग मिलाय उक्तद्रवोंमें एकएक रोज घोटकर सुखाकर आतशी शीशीमें पूर्ववत् ३ रोजका अग्निदेवे। ऐसे ७ मर्तबः पाककरनेसे यह तलस्थ होजायगा। इसमें गन्धक बारम्बार नया देता जाय, बस यह **त्रिदोषाङ्कुश** रस तैयार हुआ। इसमेंसे १—१ रत्ती एलुवा, अफीम, धत्तूरतैलकी उचितमात्राके साथ देनेसे वात अथवा वातकफ नष्ट होता है। त्र्यूषणसे कफ नष्ट होताहै। गम्भारी, द्राक्ष, फालसा, अथवा द्राक्ष, दाडिम, खजूरसे पित्त अथवा वातपित्त नष्टहोताहै। सन्निपातकी बहुतही भीषण अव-स्थाहै इसमें वर्तमानसमयकी हालतको देखकर भाष्यस्थ त्रिकोंमेंसे उचित त्रिकोंका संयोग करके देनेसे तमाम उपद्रव शान्त होकर सन्निपात नष्ट होता है। जहांपर फुप्फुसमें शोथ होकर कफ भरगयाहो वहांपर चरक सू. अ० १४ में कहेहुए प्रकारको ध्यानमें रखकर स्वेदन करनेसे सन्निपातोपद्रव बहुत आसानीसे शान्त होजाते हैं। इस अकेले **त्रिदोषाङ्कुशसे** प्रायः समग्र व्याधियां नष्ट होजाती हैं॥ १८९॥

१९० त्रिनेत्ररसः (त्रिलोचन)

शुद्धं सूतं तथा गन्धमभ्रकञ्च समंसमम्।
त्रिभिस्तुल्यैं गवांक्षीरैं र्मर्दयेदातपे खरे॥
निर्गुण्ड्याश्च द्रवै मर्द्य दिनैकं तच्च गोलकम्।
त्रियामं वालुकायन्त्रे ततो मूषागतं पचेत्॥
आदाय चूर्णयेत्खल्वे ह्यष्टमांशं विषं क्षिपेत्।
त्रिलोचनरसो नाम्ना देयं गुञ्जाद्वयंद्वयम्॥
पञ्चकोलं पिबेचान्नु पथ्यं छागपयस्तथा।
सन्निपातं त्रिदोषोत्थं साध्याऽसाध्यं न संशयः

पशुगन्धा पूतिकर्णी सिन्दुवारकचित्रकम् ।
मेषशृङ्गी ह्यपामार्गो ग्रन्थिकं त्र्यूषणं वचा ॥
क्वाथमष्टाऽवशेषन्तु सन्निपातान्निहन्ति तत् ।
त्रयोदशविधांश्चैव पुराणज्वरनाशनम् ॥
मृत्युञ्जयकषायेण सारकान्विनिहन्ति सः ॥

प. रा., र. क. यो., यो. म., र. सु., र. का., वै. द., र. कौ., भा. प्र., चि. क्र., र. चि., नि. र., सू. प्र., ज्वरे। वसवराजीयं विहाय सर्वत्र अभ्रस्थाने ताम्रं नियोजितम् । मृत्युञ्जयकषायोवसवराजीयादवगन्तव्यः ।

भाषा—शुद्धपारा, गन्धक और अभ्रकभस्म सब समभाग लेकर नीलवर्णकज्जलीकर बराबरके गायके दूधसे मर्दनकरे फिर निर्गुण्डीके अङ्गस्वरससे एकरोज मर्दनकर गोलावनाय सुखाकर शरावसम्पुटमे वन्दकर अथवा आतशी शीशीमे डालकर बालुकायन्त्रमे रख तीनपहर कड़ीआंचदेकर पकावे । यदि शरावसम्पुटकियाहोतो मृदु आंचदे । स्वाङ्गशीतल होनेपर निकालकर अष्टमांश शुद्धबछनाग मिलाकर रखछोड़े । इसमेसे २-२ रत्ती पञ्चकोलके साथ देकर ऊपर बकरीकादूध पिलानेसे साध्य अथवा असाध्य त्रिदोषोल्वण सन्निपात दूरहोताहै । असगन्ध, घुङ्करञ्ज, संभालू, चित्रक, मेढासींगी, अपामार्ग, पिपलामूल, त्रिकटु, वच, येसब समभाग लेकर इसके अष्टमांशाऽवशेष क्वाथके साथ देनेसे तेरह सन्निपात और जीर्णज्वरको नष्टकरताहै । मृत्युञ्जयकषायके साथ देनेसे समस्त अतीसारोंको दूरकरताहै

१९१ त्रिनेत्ररसः (द्वितीयः)

रसगन्धाऽभ्रभस्मानि पार्थवृक्षत्वगम्बुना ।
एकविंशतिधा घर्मे भावितानि विधानतः ॥
माषमात्रमदश्चूर्णं मधुना सह लेहयेत् ।
वातजं पित्तजं श्लेष्मसम्भूतं वा त्रिदोषजम् ॥
कृमिजश्चाऽपि हृद्रोगं निहन्त्येतन्न संशयः ॥

रसायनसं., बृ. यो. त., र. कौ., यो. र., वै. चि., नि. र., च. रा., र. म. मा. हृद्रोगे नि. र., वसवराजीययो र्हृदयार्णव इतिनाम रसरत्नमणिमालायामभ्रस्थाने ताम्रं नियोजितं, नाम तु हृदयार्णव इत्येव ।

भाषा—शुद्धपारा, गन्धक, और अभ्रकभस्म सब समभाग लेकर नीलवर्ण कज्जलीकर अर्जुनकी छालके रससे कड़ेधूपमे २१ भावनाएं देकर १-१ माशेकी गोलियें बनाकर रखछोड़े । इनमेसे १-१गोली तत्तद्रोगहराऽनुपानकेसाथ देनेसे अथवामधुकेसाथ चटानेसे वातज, पित्तज, श्लेष्मज और त्रिदोषजज्वर, कृमिजन्य हृद्रोग, इनसबको यह नष्ट करताहै ॥

१९२ त्रिनेत्ररसः (तृतीयः)

रसगन्धकताम्राणि सिन्धुवाररसैर्दिनम् ।
मर्दयेदातपे पश्चाद्वालुकायन्त्रमध्यगम् ॥ ८१३
अन्धमूषागतं यामत्रयं तीव्राऽग्निना पचेत् ।
पर्णखण्डेन सर्वेषु योज्यो रोगेषु वै रसः ॥
गुञ्जामितं देहसिद्ध्यै पुष्टिवीर्यबलाय च ।
रसोऽयं हेमताराभ्यामपि सिद्ध्यति कन्यया ॥

रसायनसं., र. चि., र. कौ., यो. म., रससागर, रसायने । रससागरे वृद्धाङ्कुशत्रिनेत्र इति नाम । रत्नाकरौषधयोगे अनुपाने पर्णखण्डस्थाने नीलकण्ठी गृहीता सा च यूनानिवैद्यके अनेनैव नाम्ना प्रसिद्धाऽस्ति ।

भाषा— शुद्धपारा, गन्धक और ताम्रभस्म येसब समभाग लेकर नीलवर्ण कज्जलीकर संभालूके रससे एकरोज धूपमे मर्दनकर सुखाकर वालुकायन्त्रमे आतशी शीशीमे रखकर तीनपहरकी कड़ी आंचदेकर स्वाङ्गशीतलहोनेपर निकालकर रखछोड़े । इसमेसे १-१ रत्ती पानके साथ देनेसे समस्तरोग दूरहोतेहैं । देहकी सिद्धि पुष्टि, वीर्य, बल इनको पैदा करताहै । ताम्रके स्थानमे शुद्धसोना और चांदी डालनेसे और कुमारीके रससे भावना देनेसे भी यह तैयार होसक्ताहै । इसको तत्तद्रोगहरानुपानके साथ देनेसे समस्तरोगोंको दूरकरताहै ॥ १९२ ॥

१९३ त्रिनेत्ररसः (चतुर्थः)

गरुत्मान्दरदस्तीक्ष्णं सुवर्णं वङ्गशुक्तिके ।
शुल्वञ्च गगनं फेनं रुधिरञ्च त्रिनेत्रकम् ८१६
पातालनृपतिश्चैव वह्निमूलञ्च रामठम् ।
त्रिकटुत्रिफला शिग्रुश्चाजमोदा यवानिका ॥
पिप्पलीमूलभार्ग्यौ च लशुनं जीरकद्वयम् ।
आर्द्रकस्य रसेनैव गुटिकां कारयेद्भिषक् ८१८

मन्दानलाऽऽमवातघ्नं श्लेष्माणञ्च जलोदरम् ।
अशीतिं वातजान्रोगान् प्रमेहांश्चैकविंशतिम् ॥
घ्राणाऽक्षिकर्णजिह्वानां गदश्चैव त्रिदोषजम् ।
गलिताङ्गं वातरक्तं सर्वमेतद् व्यपोहति ८२०

र. र., र. चं., वातरक्ते ।

भाषा—स्वर्णमाक्षिक, शिंगरफि, लोह-सुवर्ण-वङ्ग शुक्ति-ताम्र और अभ्रक इनसबकीभस्में, अफीम, केसर, रुद्राक्ष, गन्धक, चित्रकमूल, भुनाहींग, त्रिकटु त्रिफला, सहिजनके बीज, अजमोद, अजवाइन पिपलामूल, भारङ्गी, लहसुन, दोनोंजीरे, सबसमभाग लेकर पारेगन्धककी नीलवर्णकज्जलीकर ३–४ रोज अदरखके रससे मर्दनकर ३–३ रत्तीकी गोलियें बनाकर रखछोडे । इनमेंसे १–१ गोली तत्तद्रोग-हराऽनुपानकेसाथ देनेसे मन्दाग्नि, आमवात, श्लेष्मरोग जलोदर, अस्सी वातरोग; २१ प्रमेह, नासिका अक्षि कर्ण और जिह्वा इनके त्रिदोषजरोग, गलिताङ्ग वातरक्त इनसबको यह दूरकरताहै ॥ १९३ ॥

१९४ त्रिनेत्ररसः (पञ्चमः)

वङ्गं सूतं गन्धकं द्रावयित्वा
लोहे पात्रे मर्दयेदेकयत्नम् ।
दूर्वायष्टीगोक्षुरैः शाल्मलीभि-
र्मूषामध्ये भूधरे पाचयित्वा ॥८२१॥
तत्तद्रावै र्भावयित्वाऽस्य वल्लं
दद्याच्छीतं पायसं वक्ष्यमाणम् ।
दूर्वायष्टीशाल्मलीतोयदुग्धै
स्तुल्यैः कुर्यात्पायसं तद्ददीत ॥
प्रातःकाले शीतपानीयपाना-
न्मूत्रे जाते स्यात्सुखित्वं क्रमेण ॥

र. सं., घ., र. चि., र. सु., मूत्रकृच्छ्रे ।

भाषा—शुद्धपारा, गन्धक और वङ्गभस्म सम-भागलेकर नीलवर्णकज्जलीकर लोहेकीकडाहीमें थोडाबी चुपडकर गलाकर दूब, मुलहठी, गोखरू, सेंमलके-फूल या छाल इनप्रत्येकके रसोंसे १–१ दिन मर्द-नकर गोलाबनाय शरावसम्पुटमें बन्दकर भूधरयन्त्रमें चार पहरकी अग्निदेकर स्वाङ्गशीतलहोनेपर निकाल-कर पूर्वोक्तद्रवोंसे १–१ भावना देकर ३–३ रत्तीकी गोलियें बनाकर रखछोडे । इनमेंसे १–१, गोली दूब; मुलहठी, सेंमल इनकारस तथा दूध समभाग-लेकर खीर बनाकर इसके साथदेवे । प्यास लगनेपर ठंढा पानीदे । इससे पेशाबकी छूट होनेपर मूत्रकृच्छ्र छूटकर आदमी सुखी होताहै ॥१९४ ॥

१९५ त्रिनेत्ररसः (षष्ठः)

अथोच्यते त्रिनेत्राख्यो रसः परमदुर्लभः ।
सर्वरोगहरः पुंसां रसायनवरः परः ॥ ८२३॥
कृष्णाऽभ्रं चूर्णितं कृत्वा धान्याऽम्लैर्भावयेत्ततः।
त्रिदिनं वासयेत्तत्र तस्मादुद्धृत्य धारयेत् ८२४
आतपेऽथ ततो मेघनादमार्कववारिणा ।
त्रिदिनं स्थापयित्वा तु ततः खल्वे विनिःक्षिपेत्
मर्दयित्वाऽथ तत्रैव पारदं तच्चतुर्गुणम् ।
मर्दयेल्लोहजे खल्वे लोहमर्दकयोगतः ८२६
भृङ्गमेघरवानीरै र्यावत्पिष्टी भवेद्रसः ।
जम्बीरलुङ्गनिम्बोत्थरसं सैन्धवसंयुतम् ८२७
ताम्रपात्रे विनिःक्षिप्य मर्दयेत्ताम्रपात्रतः ।
यावत्कल्कं भवेन्नीलं पश्चात्कल्कं समाहरेत् ॥
सूताऽभ्रयो र्विनिःक्षिप्य चणकाऽम्लप्रयोगतः ।
मर्दनाज्जायते पिष्टिरभ्रकेण समं रसः ॥८२९॥
एवं जातां सूतपिष्टीं यन्त्रे विद्याधरे क्षिपेत् ।
अधिचुल्लि समारोप्य हठाग्निं ज्वालयेदधः ॥
प्रहरद्वयमात्रेण गृह्णीयान्मृतमूर्ध्वगम् ।
पुनः पूर्वोक्तमार्गेण पिष्टीं कृत्वा निपातयेत् ॥
तावन्निपातयेत्सूतं यावदग्नौ स्थिरीभवेत् ।
ततः संस्वेदयेत्सूतं पूर्वोक्तस्वेदनौषधैः ८३२
मुखं कुर्याच्च पूर्वोक्तैः षोडशांशेन जारयेत् ।
हेमबीजं ततो जार्यं बलिं शतगुणं ततः ८३३
अशक्तौ योगिनीसह्यं गन्धकं पूर्वयोगतः ।
तत्राप्यशक्तौ पूर्वार्धं ततो न्यूनं न जारयेत् ॥
एवं जीर्णं रसं कृत्वा खल्वमध्ये निवेशयेत् ।
उत्तरावारुणीक्षीरैः श्वेताङ्कोलजटारसैः ८३५

मर्दयेत्त्रिदिनं यन्त्रे क्षिप्त्वा सोमाऽनले क्षिपेत् ।
भस्मीभवति सूतेन्द्रो वज्रलोहादिमारकैः ॥
दशभिर्दिवसैः सूतः सर्वथा भस्मतां व्रजेत् ।
एवं भस्मीकृतं सूतं यत्नतः स्थापयेत्ततः ८३७
शुल्वं शोध्यं वक्ष्यमाणक्रमेण च तथा बलिः
शुद्धः शुद्धिप्रकारोऽत्र त्रिनेत्रे योग्य उच्यते
कांस्यमारं तथा ताम्रं खरलोहं ततः परम् ।
आवर्तलोहं वङ्गञ्च सीसं सर्वं समं क्षिपेत् ॥
त्रयः क्षाराश्च पटवः पञ्चैते समभागिकाः ॥
लोहवर्ज्यं सर्वमन्यद्द्रावयेदम्लवर्गतः ।
पूर्वोक्तं लोहजातञ्च मूषामध्ये निवेशयेत्८४१
धमेत्तद्वङ्कनालेन खदिराङ्गारयोगतः ।
स्तोकंस्तोकं क्षिपेच्चूर्णं यावदर्कोऽत्रशिष्यते ॥
तच्छिष्टं ताम्रमादाय शुद्धं दोषविवर्जितम् ।
पात्रिकां कारयेत्पश्चात्तत्पादं सूतमाहरेत् ८४३
अन्यं शुद्धं तद्द्विगुणं गन्धकं मर्दयेच्च तौ ।
जम्बीराद्यम्लयोगेन दिनमेकं निरन्तरम् ८४४
शुष्कं कल्कञ्च मृद्भाण्डे क्षिप्त्वोर्द्ध्वं ताम्रपात्रिकाम्
दत्त्वालिप्त्वा पूरयित्वा भस्मना भाण्डकं ततः
अन्येन सम्पुटीकृत्य दृढं चुल्ह्युपरि क्षिपेत् ।
अधस्ताज्ज्वालयेद्वह्निं खदिराङ्गारजं ततः ८४६
दिनत्रयं मन्दमध्यतीक्ष्णादिक्रमयोगतः ।
ज्वालयित्वाऽथ निर्भिद्य यन्त्रं गृह्णीत भास्करम्
भस्मितं सह सूतेन ततः खल्वे विचूर्णयेत् ।
अजादुग्धेन मृद्वीयान्निक्षिपेन्मल्लिकापुटे ८४८
विलिप्य पुटयेत्पश्चात्कुक्कुटाख्येन यत्नतः ।
स्वाङ्गशीतलमुद्धृत्य पुनः क्षीरेण मर्दनम् ८४९
पुनः पुटं ततश्चैवं पुटानां पञ्चविंशतिम् ।
दत्त्वा प्रमर्दयेद्दध्ना अजायाः पूर्ववत्पुटम् ८५०
दद्याद्दधिपुटान्येवं पञ्चविंशतिसङ्ख्यया ।
तदाज्येन पुटान्येवं पञ्चविंशतिमात्रया॥८५१॥
ततः खण्डेन पुटयेत्पञ्चविंशतिसङ्ख्यया ।
मधुना पुटयेत्पश्चात्पञ्चविंशतिमात्रया ॥८५२॥
एवं सिद्धो भवेदर्कः सर्वकर्मप्रसाधकः ।
उत्क्लेदभेदसन्तापभ्रममूर्च्छनवान्तिभिः ८५३
विमुक्तः सकलैर्दोषैः सुधारूपो न संशयः ।
एवं सुसाधयेदत्र ग्रन्थे सर्वत्र भास्करम् ८५४
ताम्रे शुद्धिरियं प्रोक्ता गुरुवक्त्रक्रमाऽऽगता ।
तत्रैव ढालयेद्बलात्प्रद्राव्य दनुजेश्वरम् ।
सप्त वारान् कृते चैव गन्धकः शुद्धतां व्रजेत्॥
पूर्वं भस्मीकृतं सूतं स्थापितं भास्करं तथा ।
शोधितं दानवञ्चापि प्रत्येकं त्रिपलं भवेत् ॥
कृत्वैकत्र प्रयत्नेन सिन्धुवारजलैस्ततः ।
मर्दयेत्त्रिदिनं यावत्सर्वं पङ्कात्मकं यथा ८५८
भवेत्तावच्च तं कल्कं मूषामध्ये निवेशयेत् ।
वालुकायन्त्रमध्यस्थां मूषां कृत्वाविचक्षणः ॥
अधस्ताच्च ततो वह्निं मन्दमानेन योजयेत् ।
प्रहरत्रितयं यावत्स्वाङ्गशीतलमुद्धरेत् ॥८६०॥
पूजां कृत्वा योगिनीनां भैरवस्य गणेशितुः ।
ब्रह्मविष्णुहराणाञ्च विप्राणां परिपूजनम् ८६१
कृत्वा संतर्पयेद्वह्निं घृतैश्च तिलसंयुतैः ।
रसेश्वरं सम्प्रपूज्य रसेन्द्रं सेवयेत्ततः ॥८६२॥
विधाय पञ्चकर्माणि रोगिणां शास्त्रयुक्तितः ।
रक्तिकाद्वयमानेन नागवल्लीदलेन च ॥८६३॥
दातव्यः सर्वदा वैद्यै रसेन्द्रो रोगशान्तये ।
अस्याऽनुपानं वक्ष्यामि यथाशास्त्रनिरूपितम् ॥
मन्देऽग्नौ त्र्यूषणैः सार्धं रसेन्द्रं विनियोजयेत् ।
वातव्याधिषु सर्वेषु घृतत्रिकटुसंयुतम्॥८६५॥
श्लेष्मजेषु विकारेषु व्योषाऽऽर्द्रकरसैर्युतम् ।
सन्निपाते तथा घोरे दत्त्वा व्योषयुतं रसम् ॥
आर्द्रकोत्थं रसं पश्चात्पाययेच्चुलुकत्रयम् ।
सन्निपातो निवर्तेत सर्वथा नाऽत्र संशयः ॥
अपस्मारे तथा घोरे ब्राह्मीघृतसमन्वितम् ।
नियुञ्जीताऽनुपाने च तदेव घृतमिष्यते ८६८
ग्रहण्यां शर्करायुक्तं चाङ्गेरीतक्रपाचितम् ।
प्रयुञ्जीत घृतं पश्चादनुपाने च भोजने ८६९
पथ्यं तक्रं प्रयुञ्जीत शाल्यन्नं चाऽम्ललवणिकाः।
शाकार्थे विनियुञ्जीत सर्वमन्यद्विवर्जयेत् ८७०

अतीसारे प्रदातव्यस्तवराजेन संयुतः ।
अनुपानमिदं दद्याच्छुण्ठी मुस्ता च वत्सकः ॥
यवभद्रं देवदारु बिल्वश्चातिविषा भवेत् ।
अष्टाऽवशेषं तं क्वाथमनुपाने नियोजयेत् ८७२॥
अतिसारो निवर्तेत दुःसाध्योऽपि दिनत्रयात् ।
पैत्तिकेषु विकारेषु तवराजेन योजयेत् ८७३॥
गुडूचीसारसंयुक्तं धारोष्णं गोपयः पिबेत् ।
पक्तिशूले प्रयोक्तव्यो रसेन्द्रो व्योषसंयुतः ॥
सशृङ्गवेराक्षरुचकहिङ्ग्वार्द्रकसमायुतम् ।
उष्णोदकानुपानश्च पक्तिशूलविनाशनम् ॥
पाण्डुरोगे प्रयोक्तव्यो रसो लोहसमन्वितः ।
मधुना चानुपानेन पश्चाद्दुग्धौदनं स्मृतम् ८७६
कामलाऽपि निवर्तेत पाण्डुरोगोक्तयोगतः ।
हलीमकोऽपि तद्वत्स्यात्प्रमेहेष्वधुनोच्यते८७७
वङ्गभस्मसमायुक्तं भुक्त्वा सूतं ततः पिबेत् ।
धात्रीरसञ्च मधुना सर्वमेहाद्विमुच्यते॥८७८॥
शुक्रमेहे तु रजनीं क्वाथयित्वाऽनुपाययेत् ।
हरिद्राचूर्णसंयुक्तं वङ्गभस्मसमायुतम् ॥८७९॥
विमुच्यते शुक्रमेहाद्रक्तमेहे तु बीजकम् ।
बोलचूर्णेन संयुक्तं क्वाथयित्वाऽनुपाययेत् ॥
जलोदरे प्रदातव्य उष्ट्रीक्षीरानुपानतः ।
चाङ्गेरीचूर्णसंयुक्तः खादिरक्वाथपानतः ८८१
सर्वकुष्ठं निहन्त्येव रसेन्द्रश्चिरकालजम् ।
पाषाणभेदगोकण्टक्वाथादश्मरिकां हरेत् ८८२
कम्बुचूर्णेन संयुक्तः प्लीहानमपहन्ति च ।
त्रिक्षारैः पञ्चलवणैः त्रिफलाव्योषहिङ्गुभिः ॥
गन्धर्वतैलसंयुक्तैः सर्वं गुल्मं निवारयेत् ।
निर्गुण्डीघृतसंयुक्तः पिप्पलीदशसंयुतः ८८४
निर्गुण्डीक्वाथसंयुक्तः कासश्वासौ निवर्तयेत् ।
क्षयरोगे प्रदातव्यो रसेन्द्रस्तवराजयुक् ८८५॥
अजादुग्धञ्च धारोष्णमनुपाने नियोजयेत् ।
रात्रौ क्वाथं प्रयुञ्जीत श्रीखण्डं रक्तचन्दनम् ॥
कर्पूरं प्रतिवापश्च शिलाजतु समन्वितम् ।
क्षयरोगाद्विमुच्येत रोगीनैवाऽत्र संशयः ८८७
रसायने प्रयुञ्जीत त्रिफलासंयुतं रसम् ।
घृतेन मधुना प्राश्य वलीपलितजिद्भवेत्८८८
रात्रौ क्वाथे प्रयुञ्जीत बीजकं खदिरं तथा ।
भृङ्गराजं क्वाथयित्वा प्रतिवापे विनिक्षिपेत् ॥
मूत्रं तीक्ष्णं शुक्तियष्टी मलाष्टकमतन्द्रितः ।
त्रिवत्सरप्रयोगेण दिव्यदेहो भवेन्नरः ८९०
वलीपलितनाशस्तु द्विवर्षाज्जायते ध्रुवम् ।
अर्शसां विनिवृत्तौ स्याद्रसेन्द्रो योगसंयुतः ॥
वत्सकाऽरुष्करं युक्तस्तयोः क्वाथोऽनुपानतः ।
शाकार्थे सूरणं देयं पक्वशुष्कं सहिङ्गुकम् ॥
मासत्रयान्निवर्तन्ते सर्वाण्यर्शांसि निश्चितम् ॥
भगन्दरे प्रयोक्तव्यः शिलाजतुसमन्वितः ।
त्रिफलागुग्गुलुयुतो भगन्दरहरो भवेत् ॥
ज्वरोक्तक्वाथयोगेन सर्वज्वरविनाशनः ८९४
वानरीबीजसंयुक्तः कामवृद्धिकरः परः ।
गोकण्टको वाजिगन्धा वानरीबीजसूकरौ ॥
गुडूचीसत्त्वसंयुक्तः समशर्करया युतः ।
एतत्सर्वं निशीथिन्यां दुग्धेन सह मर्दयेत् ॥
अतिप्रवृद्धकामः स्यादूर्ध्वलिङ्गः सदा भवेत् ।
एवं सूतेश्वरः सोऽयं सर्वरोगान्निवारयेत् ८९७
सर्वदा सेवनान्मर्त्यो वज्रदेहो भवेद्ध्रुवम् ।
अयं रसेन्द्रः सम्प्रोक्तस्त्रिनेत्रः शास्त्रवर्त्मना ॥
गुरूपदेशतो ज्ञात्वा तथा स्वानुभवेन च ।
देवीशास्त्रानुसारेण विविच्य प्रतिपादितः८९९

रसालं, सर्वरोगे ।

भाषा— काले वज्राभ्रकका धान्याभ्रक बनाकर धान्याम्ल (काञ्जी) में तीनरोज रखकर चौथेरोज निकालकर कड़ीधूपमे सुखावे । सूखनेपर काँटेवाली चौलाई और भंगराके रससे तीनतीनरोज कड़ीधूपमे भावना देकर लोहेकी खरलमे लोहेके बट्टेसे घोटकर अभ्रकसे चारगुना शुद्धपारा डालकर मिलनेतक मर्दनकर भंगरा और काँटेवाली चौलाईके रससे पिष्टी होनेतक मर्दनकरे फिर जंभीरी, बिजौरा और साधारणनीबूके रससे नमक मिलाकर ताँबेके पात्रमें

डालकर साथैमेंही रंदेसे यहांतक मर्दनकरे कि यह विशुद्ध नीलवर्णहोजाय। फिर उसको पूर्वपिष्टीमे मिलाकर चणकान्तके मर्दनकर टिकिया बनाय सुखाकर डमरूयन्त्रमें बन्दकर चूल्हेपर चढाय दोपहर तांची देवे। स्वाङ्गशीतल होनेपर निकालकर ऊपर कहेहुएके अनुसार इसकी पिष्टी बनाकर उडावे, जबतक पारा अग्निसाथी नहो तबतक इसीतरह करताजाय। अग्निस्थायी होनेके बाद पूर्वोक्त औषधोंके द्रवोंसे १–१ रोज स्वेदनकरनेसे यह बुभुक्षित होजायगा। फिर इसमे हेमबीज और गन्धक सौगुना जारणकरे, अगर इतना जारणकरनेकी शक्ति न होतो ६४ गुना जारणकरे। यदि इसमेभी अशक्त होतो ५० गुना जारणकरे। इससे न्यून जारण न करे। इसतरह इसजीर्णपारदको इन्द्रायणके रस और सफेद अंकोलकी जडके रससे ३–३ रोज मर्दनकर डमरूयन्त्रमें बन्दकर आंचदेवे। इसतरह दसरोज लगातार आंच देनेसे पारेकी भस्म होजाती है। स्वाङ्गशीतल होनेपर निकालकर देखे यदि भस्म न हुई होतो हीरा और लोहको मारनेवाली चीजोंसे मर्दनकर इसीतरह डमरूयन्त्रमे बन्दकर आंच देतो इसकी अवश्य भस्म होजाती है इसको संभालकर निकालकर रखछोडे। इसके बाद तांबे और गन्धकको वक्ष्यमाणप्रकारसे शुद्धकरे। कांसा, पीतल, तांबा, विडलोह, फूल (ताम्र-वङ्गमिश्रण), वङ्ग, सीसा, सफेदकाच, तुत्थक, शिंगरफ, गेरू, कासीस, सज्जी, सुहागा, यवक्षार, पांचोंनमक ये सब समभाग लेकर काचादि समस्तवस्तुओंका चूर्णकर अम्लवर्गसे भावना देकर रखछोडे। यह विड तैयार हुआ। फिर ताम्रादि सीसकान्त समस्त धातुओंके पाउडरको वज्रमूषामे डालकर धमनकरे और विडको वङ्कनालसे देताजाय, जब तमाम धातुएं जलकर ताम्रभाग अवशिष्ट रह जाय तब इसका एकसम्पुट बनावे फिर सम्पुटसे चतुर्थांश पूर्वोक्त शुद्धपारद भस्म लेवे और इससे द्विगुण गन्धक डालकर जंभीरी वगैरह किसी अम्लयोगसे एकदिन निरन्तर मर्दन कर सुखाकर ६–७ कपडमिट्टी कियेहुए मिट्टीके वर्तनमे रखदे फिर उसतांबेके सम्पुटको उल्टा रखकर गुडचूने वगैरहसे सन्धि बन्दकर पञ्चशवगैरहकी कपडछान कीहुई राखसे गलेतक हंडीको भरकर ढकन देकर २–४ कपडमिट्टी लगाय सुखाकर चूल्हेपर खैरकी लकडियोंसे मन्द, मध्य और खर इसक्रमसे ३ रोजकी अग्नि देकर उस तांबेके सम्पुटको निकालकर पारेसहित ४ पहरतक बकरीके दूधसे मर्दनकर गोला बनाय एक कुल्हडीमे बन्दकर ६–७ कपडमिट्टी देकर कुक्कुट पुटकी आंचदे। शीतलहोनेपर निकालकर फिर उसीतरह मर्दनकर गलाकर उसीके रसमे बुझावे। इसतरह सातवार करनेसे गन्धक शुद्धहोजाताहै। यह गन्धक और ऊपरकहाहुआ ताम्र प्रत्येक ३–३ पल-लेकर संभालूके रससे तीनरोज मर्दनकर पङ्कके सदृश बनाकर गोलाबनाय सुखाकर आतशीशीशी अथवा वज्रमूषामे रख वालुकायन्त्रमे धरके तीनपहर मन्दाग्नि-देकर स्वाङ्गशीतल होनेपर निकालकर योगिनी, गणेश, ब्रह्मा, विष्णु, महेश और ब्राह्मण इनकी यथाशक्ति पूजाकरके घृततैलसे अग्निको तृप्तकर रसेश्वरकी पूजा-कर रोगीकी शास्त्रोक्तविधिसे पञ्चकर्मसे शुद्धिकर दो रत्तीकी मात्रा पानके साथ देवे। मन्दाग्निमे त्रिकटुसे समस्तव्याधियोंमे घृत और त्रिकटुसे, समस्त श्लेष्म-विकारोंमे त्रिकटु और अदरखके रससे, घोरसन्निपातमे त्रिकटुकेसाथ देकर ऊपरसे अदरखका रस ३ चुल्लू पिलावे तो सन्निपात अवश्य दूरहोताहै। घोर अपस्मारमे ब्राह्मीघृतसे, ग्रहणीमे शक्करके साथ देकर चाङ्गेरीस्वरस और तक्रके साथ पकाया हुआ घी पिलावे। पथ्यमे छाछ, भात, चावल और तिपतिया के शाकके अतिरिक्त और कुछ नदे। अतिसारमे वंशलोचनकेसाथ देकर सौंठ, नागरमोथा, कुरैयाकी छाल, इन्द्रजव, देवदारु, वेलगिरी अतीस इनका अष्टमांशाऽवशेष क्वाथकर अनुपानकी जगह देनसे

तीनरोगके अन्दर दुःसाध्य अतिसार निवृत्तहो। पैत्तिकविकारोंमे वंशलोचनके साथ देकर गुडूचीका सत्त्व धारोष्णदूधकेसाथ देवे। पक्तिशूलमे त्रिकटुकेसाथ देकर करञ्ज, सञ्चल, भुनाहींग अदरखकारस यथाग्निबल देकर गरमपानी पिलानेसे पक्तिशूल नष्ट होताहै। पाण्डुरोगमे लोहभस्मकेसाथ मधुमिलाकर चटाकर दूधभात खिलावे। पाण्डुरोगघ्न अनुपानकेसाथ देनेसे कामला और हलीमक निवृत्तहोवें। प्रमेहमे वङ्ग भस्म, आंवलेकारस और मधुकेसाथ, शुक्रमेहमे हल्दीके साथदेकर हल्दीका क्वाथ पिलावे अथवा हरिद्राचूर्ण वङ्गभस्मके साथदे। रक्तमेहमे बोलचूर्णकेसाथ विजयसारका क्वाथ पिलावे। जलोदरमे उष्ट्रीदूधकेसाथ देवे। कुष्ठमे वाकुचीकेचूर्णकेसाथ देकर खैरसारका काढ़ा पिलावे तो बहुतदिनका भी कुष्ठ दूरहो। पाषाणभेद और गोखरूके साथ देनेसे पथरी दूरहो शङ्खभस्मकेसाथ देनेसे प्लीहा नष्टहो। सज्जी, सुहागा, यवक्षार, पञ्चलवण, त्रिफला, त्रिकटु, हींग और एरण्डतैलकेसाथ देनेसे समस्त गुल्म नष्टहों। निर्गुण्डीघृत १ तो., पीपल १० नगकेसाथ चटाकर निर्गुण्डीका क्वाथ पिलानेसे कास, श्वास, निवृत्तहो। क्षयरोगमे वंशलोचनकेसाथ देकर धारोष्णबकरीका दूध पिलावे। रात्रिमे लाल और सफेद चन्दनके काढ़ेमे कपूर और शिलाजतु मिलाकर देनेसे अवश्यही क्षयरोगसे निवृत्तहो। पीपल, घी और मधुके साथ देनेसे वलीपलित नष्टहों। रातमे बीजक, खदिर और भंगरेका क्वाथ बनाकर इसमे लोहभस्म, शुक्तिभस्म मुलहठी और बलाष्टक (८ प्रकारकी बला) इनका चूर्ण डालकर पिलावे। ऐसे ३ बरसतक लगातार प्रयोग करनेसे दिव्य शरीर होवे। दोवर्षमे वलीपलित नष्ट होते हैं। अर्शोघ्न अनुपानके साथ देकर कुरैया और मिलांबेका काढ़ा देवे। शाकमे परिपुष्ट सूरणको सुखाकर घीमें तलकर हींग और नमकके साथ दे। ऐसे ३ महीनेतक करनेसे समस्त बवासीर दूरहों। भगन्दरमे शिलाजतुके साथ अथवा त्रिफलागुग्गुलके साथ दे। ज्वरोक्तकार्योंके साथ देनेसे समस्तज्वर नष्टहों, केवांचके बीजोंके साथ देनेसे कामकी वृद्धिहो। रात्रिमे गोखरू, असगन्ध, केवांचके बीज, बाराहीकन्द, गिलोयसत्त्व के साथदेकर दूध पिलानेसे अत्यन्त कामान्ध होजाता है। इसतरह इसरसके सेवनकरनेसे सब रोग नष्ट होते हैं। इसका सेवन यदि हमेशः रक्खे तो वज्रदेह होजाता है। यह प्रयोग शास्त्रसिद्धान्त, गुरूपदेश तथा स्वीयानुभवसे लिखा गया है ॥ १९५ ॥

१९६ त्रिनेत्ररसः (सप्तमः)

रसताम्रगन्धकानां द्विगुणान्तरवर्धितांशानाम्।
हस्तेन मर्दितानां पुटपक्वानां निषेवितं भस्म
[illegible] ॥

उपचूर्णैरनुपानैस्तैस्तैः सहितंकफानिलार्तिहरम्
एतच्च हरिणशृङ्गं मृतकाञ्चनहरिणटङ्कणोपेतम्
सघृतमधुपक्तिशूलं शमयति नक्तं त्रिनेत्ररसः

रससारसङ्ग्रहे, र. र. स., शूले।

भाषा—शुद्धपारा १ भाग, ताम्रभस्म २ भाग और शुद्धगन्धक ४ भाग, लेकर जंभीरी वगैरहके रससे एकरोज मर्दनकर गोलाबनाय सुखाकर सम्पुटमे बन्दकर चारपहर वालुकायन्त्रमे स्वेदितकर स्वाङ्ग शीतल होनेपर निकालकर १—१ रत्ती सोंठ और सैन्धवके चूर्णके साथ अथवा एरण्डतैल और मधुके साथ अथवा हींग और दूधके साथ लेनेसे समस्तशूलोंको यह नष्टकरताहै। तत्तद्रोगहरौषधोंके क्वाथोंसे कईबारभावना देकर उन्हींके चूर्णोकेसाथ देनेसे यह तत्तद्रोगोंको, कफ और वायुकी पीडाको दूरकरता है। यह रस और हरिणशृङ्ग, सुवर्णभस्म बारहसिङ्गाकी भस्म, भुनासुहागा सब समभागलेकर घी और मधुकेसाथ रात्रिमे लेनेसे यह समस्त पक्तिशूलोंको दूरकरता है॥ १९६ ॥

१९७ त्रिनेत्ररसः (अष्टमः)

पूर्वौषधीशोधितसूतकस्य
तथैव संशोधितगन्धकस्य ।
कर्षेण कर्षोन्मितमभ्रकञ्च
सिद्धं यथावल्लघुना पुटेन ॥ ९०४ ॥
सम्भावितं तद्बहुधा च घर्मे
लज्जावतीस्वाङ्गभवद्रवेण ।
सौवर्चलत्र्यूषणहिङ्गुयुक्तं
भुक्तं वयोवह्निबलाऽनुरूपम् ॥ ९०५ ॥
हरत्यतीसारमुदग्ररूपं
ज्वरं कफोत्थं ग्रहणीविकारम् ।
आध्मानमग्नेर्बलसादमर्शो-
विकारशोथानविनिद्रताञ्च ॥ ९०६ ॥

लो. प. (स०), अतिसारे ।

भाषा—त्रिफला, शतावरी, नागरमोथा, सुगन्धवाला, मुसली, इनप्रत्येकके रसोंसे शुद्धपारेको १-१ रोज मर्दनकर डमरूयन्त्रसे ऊर्ध्वपातित करले । इसी तरह इनप्रत्येकके स्वरसोंमे गन्धकको गलागलाकर बुझावे । इनदोनोंमेसे १-१ तोले लेकर नीलवर्ण कज्जलीकर एकतोला अभ्रकभस्म मिलाकर पूर्वोक्तऔषधियोंके रसोंसे १-१ रोज मर्दनकर गोला बनाय सुखाकर शरावसम्पुटमें बन्दकर लघुपुटकी आंचदेकर स्वाङ्गशीतल होनेपर लज्जालुके अङ्गस्वरससे जितनीहोसकें उतनी भावनाएं देकर संचल, त्रिकटु, हिङ्गु इनसबकाचूर्ण बनाय सममात्रामे पूर्वरसमे मिलाकर रखछोड़े । इसमेसे अवस्था, अग्नि और बलके अनुसार मात्रा खाकर ज्वर, कफोत्थग्रहणीविकार, आध्मान, मन्दाग्नि, बवासीर, शोथ, और निद्रानाश इनसे निवृत्त होता है ॥ १९७ ॥

१९८ त्रिनेत्ररसः (नवमः)

पूर्वौषधीशोधितशुद्धसूत-
गन्धाश्मशुल्वानि समानि कृत्वा ।
रसाम्बुदस्वाङ्गसमुद्भवेन
द्रवेणचाऽऽप्लाव्य पुटे लघिष्ठे ॥
सिद्धं सजीरोषणहिङ्गुयुक्तं
निहन्त्यतीसारमिदं न चित्रम् ॥९०७॥

लो. प., (स.), अतिसारे ।

भाषा—पूर्वरसकीतरह पारा और गन्धक शुद्धकर १-१ तोलेकी नीलवर्ण कज्जलीकर एकतोला पारदभस्म मिलाकर खैरसार और नागरमोथेके अङ्गस्वरस अथवा क्वाथमे १-१ रोज मर्दनकर गोला बनाय शरावसम्पुटमे बन्दकर लघुपुटमे पकावे । स्वाङ्गशीतल होनेपर निकालकर रखछोड़े । इसमेसे १ रत्तीसे ३ रत्तीतक जीरा, मरिच और हींगके समभाग चूर्णकेसाथ लेनेसे यह अतिसारको निवृत्त करता है । इसमे आश्चर्य करनेकी जरूरत नहीं ॥

१९९ त्रिनेत्ररसः (दशमः)

शुल्वं वज्रं गगनमुरगं हेमवङ्गाऽऽलताप्यं,
तारं तीक्ष्णं रसकगरलं टङ्कणं तुत्थकञ्च ।
सूतं गन्धं सममिति सुधाभास्करक्षीरपिष्टं,
वारान्सप्त त्रुटितमनिले चारुचूर्णीकृतञ्च ॥
तालीकृष्णाकनककिणिहीकङ्गुणीकाकजङ्घा-
कौन्तीकन्याकुलककटभीकोलकुद्दालकुष्ठैः ।
श्वेतास्फोतासहचरशमीशल्लकीसोमवल्ली-,
चक्राचक्राऽशनशतमखै भावयेत्सप्तवारम् ॥
युग्मोवल्लोऽखिलगदचये योजितः साऽनुपानैः,
वाते पित्ते कफगदचये सन्निपाते तथैव ।
शूलाऽऽध्माने ग्रहणिगुदजोन्मादमन्दाग्निहन्ता
पुष्टिंवीर्यंबलमतिरसोऽयं त्रिनेत्रो विधत्ते ॥

र. शं., सन्निपाते ।

भाषा—तांबा, हीरा, अभ्रक, नाग, सुवर्ण, वङ्ग, हरिताल, सोनामाखी, रजत, लोह इनसबकी भस्में, शुद्धखपरिया और बछनाग, भुनासुहागा, शुद्धतुत्थक, पारा और गन्धक ये सब समभाग लेकर पारेगन्धककी नीलवर्ण कज्जलीमें मिलाकर थूहर, आक इनके दूधमें सात ७ वार घोटकर गोला बनाय सुखाकर शरावसम्पुटमें बन्दकर लघुपुटकी आंचदेकर स्वाङ्गशीतल होनेपर निकालकर कालीमुसली, पीपल,

धतूरा, अपामार्ग, मालकांगण, काकजङ्घा, रेणुका, घीकुंआर, कुल्फा अथवा पटोल, कटभी-(श्वेताऽपराजिता), वेर, कोदो, वच, अपराजिता, पीयावासा, शमी, शल्लकी, वाकुची, गुडूची, पाठा, असन, कुटज, इन प्रत्येकके रसोंसे ७-७ भावनाएं देकर ६ रत्तीकीमात्रा तत्तद्रोगहराऽनुपानके साथ देनेसे वात, पित्त, कफके रोगोंका संघ, सन्निपात, शूल, आध्मान, ग्रहणी, बवासीर, उन्माद, मन्दाग्नि, इन सबको नष्टकर वल्वीर्य और पुष्टिको करताहै ॥१९९॥

२०० त्रिपुरभैरवरसः (प्रथमः)

भागो रसस्याऽश्महेम्नो भागो ग्राह्योऽतियत्नतः
तेभ्यो द्वादशभागानि ताम्रपत्राणि लेपयेत् ॥
पचेच्छूलहरः सूतो भवेत्त्रिपुरभैरवः ।
माषो मध्वाऽऽज्य संयुक्तो देयोऽस्य परिणामजे
अन्यस्मिन्नुवुतैलेन हिङ्गुत्रययुतो रसः॥९१२॥

र. सं., र. क. ल., ध., र. चं., यो. र., र. का., नि. र., र. को., रसायनसं., र. सु., भै. शा., र. र. दी., टो; र. (मा.), शूले ।

भाषा—शुद्धपारा, गन्धक और सुवर्णभस्म, १-१ भाग लेकर नीलवर्ण कज्जलीकर नीबूवगैरहके रसमें मर्दनकर इन तीनोंसे १२ गुने ताँबेके वारीक पत्रोंपर लेपकर सुखाकर शरावसम्पुटमें बन्दकर वालुकायन्त्रमें रख ४ पहरकी आंचदे । स्वाङ्गशीतल होनेपर निकालकर १-१ माशा मधु और घीके साथ देनेसे यह परिणामशूलको दूरकरताहै । और दूसरे शूलोंमें एरण्डतैल, हींग, सोंठ, और मिर्चके साथ देनाचाहिये ॥ २०० ॥

२०१ त्रिपुरभैरवरसः (द्वितीयः)

विषटङ्कवलिम्लेच्छदन्तिबीजं क्रमैधितम् ।
दन्त्यम्बुमर्दितं यामं रसस्त्रिपुरभैरवः ९१३
वल्लं व्योषेण चाऽऽर्द्रस्य रसेन सितयाऽथवा ।
दत्तो नवज्वरं हन्ति मान्द्यामाऽनिलशोथहा ॥
हन्ति शूलं सविष्टम्भमर्शांसि कृमिजान्गदान् ।
पथ्यं तक्रेण भुञ्जीत रसेऽस्मिन्रोगहारिणि ॥

र. चि., र. च., ध., र. का., भै. र., वृ. यो. त., रसायनसं., र. सु., र. क., नि. र., प. रा., यो. म., नवज्वरे ।

भाषा—शुद्धवत्सनाग १ भाग, सुहागा २ भाग, गन्धक ३ भाग, ताम्रभस्म ४ भाग, शुद्धदन्तीबीज ५ भाग, क्रमवृद्ध लेकर पारेगन्धककी नीलवर्ण कज्जलीकर सबको इकट्ठे मिलाकर दन्तीमूलके स्वरससे मर्दनकर ३-३ रत्तीकी गोलियें बनाकर रखछोडें । इनमेंसे एक २ गोली त्रिकटु अथवा अदरखके रस या शक्करके साथ देनेसे यह नवज्वर, मन्दाग्नि, वातशोथ, शूल, विष्टम्भ, बवासीर कृमिजरोग, इन सबको नष्ट करताहै । इसमें पथ्य छाछभातदेना ।

२०२ त्रिपुरभैरवरसः (तृतीयः)

मृताऽर्कगोलकाविन्दुनिधिभागौ सुमर्दितौ ।
प्रक्षणाक्तौ स्नुहीक्षीरमग्नौ कर्षा विपाचयेत् ॥
रक्तयर्धमात्रो हन्त्येष रसस्त्रिपुरभैरवः ।
बीजपूरसितायुक्तो ग्रीष्मे शरदि वा ज्वरान् ॥
बीजपूराऽऽर्द्रकयुतो मधौ शेषऋतुत्रिके ।
आर्द्रकेणाऽहिवल्ल्या वा पत्रखण्डेन वेष्टितः ॥

र. (मा.), ज्वराधिकारे ।

भाषा—ताम्रभस्म १ तोला, शुद्धजयपाल ९ तोला, लेकर थोडासा मक्खन देकर एकपहर घोटकर १ तोले थूहरका दूध डालकर मन्द अग्निसे पकावे । जब गोली बनाने लायक होजाय तब आधी आधी रत्तीकी गोलियें बनाकर रखछोडे । इनमेंसे १-१ गोली ग्रीष्मऋतुमें बिजोरेके रससे सर्दीमें शक्करकेसाथ, वसन्तमें बिजोरा और अदरखके रसकेसाथ बाकी तीन ऋतुओंमें अदरख अथवा पानके साथ देनेसे समस्त ज्वरोंको यह नष्टकरताहै ।

२०३ त्रिपुरभैरवरसः (चतुर्थः)

सूतकं मरिचं शुण्ठी टङ्कणं चाऽमृतं तथा ।
गन्धकं चैकचत्वारि वेदवह्निधराधराः ॥
चूर्णितो मधुना लीढो वाते त्रिपुरभैरवः ९१९

र. प्र. सु., वाते ।

भाषा—शुद्धपारा १ भाग, मरिच ४ भा., सोंठ

४भा., सुहागा ३ भा., शुद्धवछनाग और गन्धक १-१ भाग, लेकर एकदोदिन मर्दनकर रखलेवे। इसमेसे ३—३ रत्ती वातहराऽनुपानकेसाथ देनेसे यह समस्त-वातरोगों को दूरकरताहै ॥ २०३

२०४ त्रिपुरभैरवरसः (पञ्चमः)

विषमहौषधमागधिकोषण-
शुभणिरक्तकमार्द्रकमर्दितम्।
क्रमविवर्धितशुद्दलति ज्वरं
त्रिपुरभैरव एष रसो ज्वरान् ॥९२०॥

भा. प्र., र. शं., टो., र. को.. र (मा.), नि. र., त्रि., यो. म., र. मु., रससारसङ्ग्रह, वा., ज्वराऽधिकारे।

भाषा—शुद्धवछनाग १ भाग, सोंठ २ भाग, पीपल ३ भा., मरिच ४ भा., ताम्रभस्म ५ भा., शिंगरिफ ६ भा., लेकर सबका बारीकचूर्णकर शिंगरिफकेसाथ मिलाकर अदरखके रससे चारपहर घोटकर एक या दोरत्तीकी गोलियें बनाकर रखछोड़े। इनमेसे १—१ गोली समयोचिताऽनुपानकेसाथ देनेसे यह समस्तज्वरोंको दूरकरताहै ॥ २०४ ॥

२०५ त्रिपुरभैरवरसः (षष्ठः)

गन्धेशाऽर्कशिलाऽलकाऽमृततप-
स्युद्भूतहृद्धात्रिका,
तुत्थं टङ्कणमाखुहा सुदरदो-
वैक्रान्तनागाऽयमम्।
भाव्यश्चाऽग्निमुखीजयात्रिकटुह-
द्धात्रीहलिन्यग्निभि-
र्भृङ्गैः सिन्धुफलैः क्रमेण भिषजा
पित्तैस्ततः पञ्चभिः ॥ ९२१ ॥
गुञ्जयाऽर्द्रकरसेन रसोऽयं
सन्निपातमखिलं विनिहन्ति।
पथ्यमस्य दधिभक्तकमुक्तं
स्नापनं त्रिपुरभैरवनामा ॥ ९२२ ॥

र. शं., र. चि., ज्वरे। र. चि., तुत्थस्थाने वज्रं दृश्यते। भृङ्गस्थाने आभा श्रूयते। आभाशब्देन बब्बूलिका ग्राह्या।

भाषा—शुद्धगन्धक, ताम्रभस्म, मैनसिल, हरितालभस्म अथवा रसमाणिक्य शुद्धवछनाग, सोनामाखी, कसीस, तुत्थ, सुहागा, सोमल, शिंगरिफ, वैक्रान्त, नाग, लोह येसब विशुद्ध और भस्म-किये हुए समभागलेकर अग्निशिखा भांग, त्रिकटु, अमलोनियां, करिहारी, चित्रक, भंगरा समुद्रफल, इन प्रत्येकके स्वरससे १—१ रोज मर्दनकर पञ्चपित्तोंसे १—१ भावना देकर एकएक रत्तीकी गोलियें बनाकर रखछोड़े। इनमेंसे १—१ गोली अदरखके रसकेसाथ देनेसे यह तमाम सन्निपातोंको दूरकरताहै। इसमे पथ्य दहीभात देना और ठंडे जलसे स्नानकराना। अधिक दाह होतो ठंढेजलकी सिरपर धारा देना ॥ २०५ ॥

२०६ त्रिपुरभैरवरसः (सप्तमः)

त्रिंशांशहेमसहितार्धरसेन लिप्तं,
शुल्वं सगन्धमृगशृङ्गकटङ्कयुक्तम्।
ग्रन्थीयकाऽम्बुपुटसिद्धमथद्विवल्लं,
क्षौद्राऽऽज्ययुग्व्यपनयेत्परिणामशूलम्॥९२३॥
मासत्रयप्रयोगेण रसोऽयं शूलनोदनः।
साऽम्बूल्वूकमूलाद्यक्षीरक्वाथाऽनुपानतः ९२४

र. (मा.), शूले।

भाषा—सुवर्णभस्म तीसवां भाग, शुद्धताम्रपत्र १ भाग, शुद्धपारा आधाभाग, शुद्धगन्धक, मृगशृङ्ग, सुहागा येसब १—१ भाग लेकर इनमेसे सुवर्ण भस्म और पारेको नीबूवगैरहके रससे खरलकर ताम्रपत्रपर लेपकरदे। फिर बाकीकी चीजोंको पिपलामूलके रसमें मर्दनकर इसपर लेपकरदे। सूखजानेपर शरावसम्पुटमे बन्दकर ४—५ कपडमिट्टी देकर सुखाकर लवण, भस्म अथवा वालुकायन्त्रमे बन्दकर ४ पहरकी तीक्ष्ण अग्निसे पकाकर स्वाङ्गशीतल होनेपर निकालकर खरलकर रखछोड़े। इसमेसे ६—६ रत्तीकी मात्रा मधु और घीके साथ देनेसे यह परिणामशूलको दूरकरताहै। तीनमहीनेतक लगातार इसको लेकर सुगन्धवाला, एरण्डकी जड़की छाल प्रभृति शूलघ्न औषधोंसे क्षीरपाक

अथवा क्वाथकरके पीनेसे यह असाध्यसे असाध्य शूलको दूरकरताहै ॥ २०६ ॥

२०७ त्रिपुरभैरवरसः (अष्टमः)

ताम्रश्चतुर्थांशरसोपलिप्तं
निम्बुद्रवस्थं रवितापतप्तम् ।
गन्धोपगुप्तं त्रिकटुद्विभागं
मृत्स्नाऽतिरुद्धं पुटितं दिनांशम् ॥
निसर्गशीतश्च ततोऽपनीत-
मेरण्डतैलेन निपीतमेतत् ।
गुञ्जामितं वाऽथ सितामधुभ्यां
हन्त्येष शूलं परिणामनाम ॥९२६॥
रात्रौ च चिञ्चिणीक्षारतोयं वा शीतलंजलम् ।
पीतं निवारयेच्छीघ्रं वैद्यवृन्दविवर्जितम् ॥

र. (मा.), टि०-त्रिकटुद्विभागमित्यस्य स्थाने पुस्तकान्तरे द्वयद्विगूढमिति पाठो दृश्यते तत्र मत्स्याक्षीकल्केन निगूढं कृत्वा पुटनीयमिति बोध्यम् ।

भाषा—एकतोले पारेको नीबूके रसमें मर्दनकर चार तोले तांबेके पत्रोंपर लेपकर नीबूकेरसमें डुबाकर कड़ीधूपमे रक्खे। जब यह एकदम गरम होजाय तब उसीरसमें तांबेसे द्विगुण गन्धकको पीसकर तांबेके पत्रोंपर लेपकरके सुखाले । फिर इस गोलेसे दो गुने त्रिकटुके चूर्णको नीबूकेरसमे पीसकर अथवा मत्स्याक्षीके कल्कको इसपर लपेटकर सुखाले । सूखनेपर चारतह कपड़ेमें लपेटकर डोरेस बांधकर ऊपर ६-७ कपड़मिट्टी देकर शरावसम्पुटमे बन्दकर लवण, भस्म अथवा वालुकायन्त्रमे रखकर एकदिनरात अग्निदेकर स्वाङ्गशीतल होनेपर निकालकर खरलकर रखछोड़े । इसमेसे १-१ रत्ती एरण्डतैल, शक्कर अथवा मधु इनमेंसे चाहेजिसके साथ लेकर रात्रिमें इमलीके क्षारके पानी अथवा ठण्डे जलके साथ लेनेसे यह परिणाम शूलको नष्ट करता ह ॥ २०७ ॥

२०८ त्रिपुरराजमदनरसः

कर्पूरफेनं रसजं समांशं
धत्तूरतोयैश्च विमर्द्य सूक्ष्मम् ।
मरीचमात्रं शुभपर्णयुक्तं
खादेन्नरेशस्त्रिपुरक्षितीशम् ॥ ९२८

रसायनसं., स्तम्भने ।

भाषा—शुद्धकपूर, अफीम, पारदभस्म, अ यमे रसकर्पूर (रसयोगसागर नं० ७३) समभाग लेकर धतूरेके तेल अथवा रससे एक मर्दनकर मरिच बराबर गोलियें बनाकर रखछोड़े इनमेसे १-१ गोली पकेपानकेसाथ खानेसे वीर्य स्तम्भन होता है ॥ २०८ ॥

२०९ त्रिपुरसुन्दररसः

सिन्दूरमभ्रं त्वथ हेममाक्षिकं
मुक्ताफलं हेम च तुल्यभागिकम् ॥
कन्याऽम्बुना मर्दय सप्तवासरान्
गुञ्जाप्रमाणां वटिकां विधेहि च ॥

भै. र., आमाशयरोगे ।

भाषा—रससिन्दूर, अभ्रकभस्म, सोनामाख मोती, सुवर्णभस्म, ये सब समभाग लेकर घीकुंआ रके रससे सातरोज मर्दनकर १-१ रत्तीकी गोलि बनाकर रखछोड़े । इनमेंसे १-१ गोली मन्दा नाशनानुपानकेसाथ लेनेसे यह तमाम आमाशय रोगोंको नष्टकरताहै ॥ २०९ ॥

२१० त्रिपुरान्तकरसः (पित्तभञ्जनः

रसगन्धाऽभ्रकं तुल्यं दिनमेकं विमर्दयेत् ।
भृङ्गराजरसैः खल्वे वज्रमूषान्तरे क्षिपेत् ॥
कुक्कुटाऽऽख्यपुटे पाच्यं स्वाङ्गशीतलमुद्धरेत
मत्स्याऽजकोलजैः पित्तै स्त्रियामं मर्दयेत्पृथक
आर्द्रकस्याऽनुपानेन गुञ्जामात्रं पिबेत्तथा ।
वातिकं पैत्तिकञ्चैव श्लैष्मिकञ्चाऽऽहिकं ज्वरम
त्रिदोषं द्वन्द्वजं हन्ति ह्यनुपानविशेषतः
तक्रभक्तं भवेत्पथ्यं तृषार्ते शर्कराजलम् ॥
शम्भुना कथितः पूर्वं रसोऽयं त्रिपुरान्तकः

वै. चि., व. रा., ज्वराधिकारे ।

टि०—वसवराजीयवैद्यचिन्तामण्योरयमेव योगः द्वि यस्थाने पित्तभावनारहितोऽस्ति सः क्षुधापित्ते नियो तोऽस्ति । तस्य नाम च पित्तभञ्जन इति ।

भाषा—शुद्धपारा और गन्धक, अभ्रकभस्म ये सब समभागलेकर भंगरेके रससे मर्दनकर गोला बनाय वज्रमूषामें बन्दकर कुक्कुटपुटमें पकाकर स्वाङ्गशीतहोनेपर निकालकर मछली, बकरा, सूअर इनके पित्तोंसे १–१ रोज मर्दनकर १–१ रत्तीकी गोलियें बनाकर रखछोडे । इनमेसे १–१ गोली अदरखके रसकेसाथ देनेसे वातिक, पैत्तिक और श्लैष्मिक, त्र्याहिक, त्रिदोषज और द्वन्द्वज ज्वरोंको यह अनुपानभेदसे नष्ट करता है । इसके ऊपर छाछभात पथ्यदेना । प्यासलगने पर शक्करका शरबत देना ॥ २१० ॥

२११ त्रिपुरान्तकरसः (द्वितीयः)

रससमभृतभृङ्गं शृङ्गवेरं विडङ्गं,
मधुरदहनपाठाः सिन्धुवारश्च वन्ध्या ।
त्रिफलकनकबीजान्यृद्धिवृद्धी निशे द्वे;
छगलसलिलपिष्टं सर्वमेतेन जाता ॥
लघुबदरसमानस्थूलगोली नराणां,
हरति पवनपित्तश्लेष्मसञ्जातकुष्ठम् ॥ ९३४ ॥
उक्तस्त्रिपुरया पूर्वं रसोऽयं त्रिपुरान्तकः ।
सर्वदोषोत्थकुष्ठघ्नः कृपानिघ्नमनस्कया ९३५

र. र. स., र. को., कुष्ठे ।

भाषा—पारद और मुर्दासङ्गभस्म, सोंठ, विडङ्ग, मुलहठी, चित्रक, पाठा, निर्गुण्डी, बांझखेखसाकाकंद, त्रिफला, धतूरेकेबीज, ऋद्धि, वृद्धि, दोनों हल्दी, सब समभाग लेकर बारीक चूर्णकर बकरेके मूत्रमें १–२ रोज मर्दनकर छोटे बेर बराबर गोलियें बनाकर रखछोडे । इनमेंसे १–१ गोली कुष्ठहराऽनुपानके साथ देनेसे तथा चने, घी और शक्कर पर रखनेसे यह वातज, पित्तज, श्लेष्मज, तमामकुष्ठोंको दूर करताहै । मनुष्योंपर दया करके इसको त्रिपुरादेवीने कहाहै ॥ २११ ॥

२१२ त्रिपुरारिरसः

हुताशमुखसंशुद्धं रसं ताम्रञ्च गन्धकम् ।
लौहमभ्रविषश्चैव सर्वं कुर्यात्समांशकम् ९३६
रसार्धं मृतरूप्यञ्च शृङ्गवेराऽम्बुमर्दितम् ।
द्विगुञ्जं मधुना देयं सितयाऽऽर्द्ररसेन वा९३७
ज्वरमष्टविधं हन्ति वारिदोषभवन्तथा ॥
प्लीहानमुदरं शोथमतिसारं विनाशयेत् ॥
रोगानेतान्निहन्त्याशु शङ्करस्त्रिपुरं यथा ९३८

भै. र., र. मु., ज्वरे ।

भाषा—अग्निस्थायी किया हुआ पारा, शुद्धताम्र और गन्धक, लोहभस्म, अभ्रकभस्म, शुद्धवछनाग ये सब १–१ तोला, रजतभस्म आधा तोला इन सबकी कज्जली बनाय अदरखके रसमें १–२ रोज मर्दनकर २–२ रत्तीकी गोलियें बनाकर रखछोडे । इनमेंसे १–१ गोली मधु, शक्कर, अथवा अदरखके रसके साथ देनेसे आठप्रकारका ज्वर, जलदोषज्वर, प्लीहा, उदर, शोथ, अतिसार इन सब रोगोंको यह इसतरह नष्ट करताहै जैसे कि शङ्करने त्रिपुरका नाश किया था ॥ २१२ ॥

२१३ त्रिफलागुटी

त्रिफलारुष्करलौहैःसावल्गुजभृङ्गलाङ्गलीव्योषैः
सगुडैवराहकन्दैः पलिकैरेकत्र सम्मिश्रैः ॥
गुटिकां प्रकल्प्य खादेदेकैकामक्षसम्मितांप्रातः
कुष्ठं दद्रुकिलासं जित्वा वर्षेण सर्वथा पलितम्
जीवति वर्षशतं वै दीप्तहुताशो युवेव सोत्साहः

नि. र., यो. र., त्वग्दोषे ।

टि०—अत्र योगे अक्षसम्मितामित्यस्य स्थाने मापसम्मितामिति पाठोऽस्माभिर्नियोजितोऽस्ति, मापकप्रमाणात्क्रमेण यावत्सात्म्यं वृद्धिः करणीया ।

भाषा—त्रिफला, भिलांवा, लोहभस्म, बाकुची, भंगरा, करिहारी, त्रिकटु, गुड, वाराहीकन्द, ये प्रत्येक १ पल लेकर सबका बारीक चूर्णकर १–१ माशेकी गोलियें बनाकर रखछोडे । इनमेसे १–१ गोलीसे शुरूकर जहांतक सहन होसकें वहांतक रोज बढ़ाताजाय । इसमे पथ्य चनेकी रोटी, घी और शक्कर के सिवाय कुछ न खायतो दद्रु, कुष्ठ, श्वित्र, बली, पलित इनसबसे निवृत्तहोकर एकवर्षमे दिव्यशरीर होकर दीप्ताऽग्नियुक्त सौवर्षतक जीताहै ॥

२१४ त्रिफलापारदयोगः

त्रिफला पारदः कृष्णा गुडेन सह मोदकः ।
सप्तरात्रेण हन्त्येतत्परिणामभवां रुजम् ९४१

र. क. परिणामशूले ।

भाषा—त्रिफला, पारदभस्म अथवा रससिन्दूर और पीपल सब समभाग लेकर बराबरके पुराने गुड़केसाथ ३–३ माशेकी गोलियें बनाकर रखछोड़े इनमेसे १–१ गोली परिणामशूलहरानुपानके साथ देनेसे सातदिनमे यह परिणामशूलको नष्टकरता है॥

२१५ त्रिफलाऽभ्रकम्

फलत्रिकक्षोदसमानमभ्रकं
यदा विलीढं मधुना ससर्पिषा ।
समाः सहस्रं वितनोति जीवितं
विजित्य नूनं पलितं वलीयुतम् ९४२

लो. प. (स.) रसायने ।

भाषा—त्रिफलाके चूर्णकी बराबर अभ्रकभस्म मिलाकर १–१ माशा मधु और घीकेसाथ रोज खानेसे १०० वर्षतक वलीपलित रहित होकर जीता है॥ २१५ ॥

२१६ त्रिफलामण्डूरम् (प्रथमम्)

त्रिफला कुण्डली भृङ्गकेशराजाऽटरूपकम् ।
शतावरी श्रावणी च बलाकूलकपर्पटाः ९४३
भार्ङ्गी किराततिक्तश्च निम्बं मण्डूकपर्णिका ।
कषायै भावयेदासां मण्डूरं बहुवार्षिकम् ९४४
त्रिफलाया रसे पूते पचेदष्टगुणे ततः ।
मण्डूरेण समं दद्यात्सिता सर्पिः सुमाक्षिकम्
त्रिकटुत्रिफलामुस्तं विडङ्गाऽजाजिचित्रकम् ।
यवानी मधुकं धान्यं चातुर्जातं च पादिकम् ।
भक्षयेत्तद्यथाकालमम्लपित्तेन पीडितः ९४६

र. का., पाण्डुरोगे ।

भाषा—त्रिफला, गुडुच, भंगरा, कालाभंगरा, अडूसका पञ्चाङ्ग, शतावर, गोरखमुण्डी, बला, पटोल, पित्तपापड़ा, भारङ्गी, चिरायता, निम्बपञ्चाङ्ग, ब्राह्मी, इनसबकी १–१ भावना मण्डूरभस्ममे देकर मण्डूर से अठगुनीत्रिफलाके काढ़ेमे इसको मधुर आंचसे पकाकर सुखाकर बराबरकी शक्कर, मधु और घी मिलावे । तथा त्रिकटु, त्रिफला, नागरमोथा, विडङ्ग, जीरा, चित्रक, अजवाइन, मुलहठी, धनियां, चातुर्जात, सब समभाग लेकर कूटकपड़छानचूर्णकर मण्डूरसे चतुर्थांश उसमे मिलावे । इसमेसे अपनी प्रकृतिके अनुसार मात्रामे अम्लपित्तहरानुपानकेसाथ खानेसे यह अम्लपित्तको दूरकरताहै॥ २१६ ॥

२१७ त्रिफलामण्डूरम् (द्वितीयम्)

गोमूत्रसिद्धमण्डूरं त्रिफलाचूर्णसंयुतम् ।
विलीढं मधुसर्पिर्भ्यां शूलं हन्त्यम्लजित्परम्

र. र., भै. र., ध., र. क. ल., च. द., वै. वि., टो., ध. रा., नि. र., शूले । नि. र., च. द., गोमूत्रमण्डूर । कुत्रचित् शूलं हन्ति त्रिदोषजमिति पाठान्तरम् ।

भाषा—बहेड़ेके कोयलोंमें पुराने मण्डूरको गरम कर गोमूत्रमें यहांतक बुझावे कि उसका बारीक चूर्ण होजाय फिर उसी गोमूत्रमें पीसकर टिकियां बनाकर आंचदे । जब वारितरभस्म होजाय तब बराबरका त्रिफलाका चूर्ण मिलाकर रखछोड़े । इसमेसे ३–३ माशे मधु और घीकेसाथ चाटनेसे यह शूल और अम्लपित्तको दूरकरता है ॥ २१७ ॥

२१८ त्रिफलामण्डूरम् (तृतीयम्)

त्रिफलारसे विपक्वं द्विगुणगुडं लोहजं किट्टम् ।
भुक्तं जयति च शूलं चिरजं हृद्रोगजं सपदि॥
कलायचूर्णभागौ द्वौ तावल्लौहस्य चूर्णकम् ।
कारवेल्लपलाशस्य रसेनैव विमर्दयेत् ॥ ९४९ ॥
मण्डाऽनुपानं तल्लिह्यात्कर्षमात्रं यदृच्छया ।
जरत्पित्तं जयत्याशु घोरमन्नद्रवं तथा ९५० ॥

र., च. द., शूले । टि०–प्रथममण्डूरेण समानोऽयं योगः । मूत्रेण भस्मीकृतं गोमूत्रमण्डूरेऽस्ति मण्डूरम्, अत्र तु त्रिफलासिद्धमित्येव विशेषोऽस्ति, अनुपानकृतविशेषस्तु न योगान्तरे हेतुस्तस्याऽनवस्थिततत्वात् । अत्र यद्यपि कर्षपरिमिता मात्रोक्ता परं माषत्रयादारम्भः करणीय इति ।

भाषा—त्रिफलाके अङ्गस्वरस अथवा क्वाथमे मण्डूरको गरम करकरके यहांतक बुझावे कि जीर्णशीर्ण होजाय फिर इसीमे घोटकर टिकियां बनाय सुखाकर यहांतक पुटें दे कि वारितर भस्म होजाय फिर द्विगुणगुड़ मिलाकर खिलानेसे पुरानेशूल और हृद्रोगको बहुतशीघ्र नष्टकरताहै । इसमण्डूरका १ भाग, खिसारी अथवा मटरकाचूर्ण २ भाग लेकर करेला और पलाशके रससे एकरोज मर्दनकर गोलियें बनाकर रखछोड़े । इनमेसे १–१ गोली मांडके साथ देनेसे जरपित्त और घोरअन्नद्रवजशूल नष्ट होताहै ॥ २१८ ॥

२१९ त्रिफलामोदकः

त्रैफलस्य तु चूर्णस्य पलानि दशपञ्च च ।
सप्त चैव विडङ्गानां लोहचूर्णं पलद्वयम् ९५१
शतं भल्लातकानाञ्च पलानि दश वाकुची ।
शिलाजतु पलार्द्धन्तु द्वे पले गुग्गुलोस्तथा ॥
पलं पुष्करमूलस्य पलार्द्धं त्रैवृतं तथा ।
सचित्रकं समरिचं पिप्पलीविश्वभेषजम् ९५२
त्वक्पत्रं कुङ्कुमं मुस्ता कार्षिकानुपकल्पयेत् ।
यावन्त्येतानि चूर्णानि तावत्खण्डं प्रदापयेत् ॥
पालिकान्मोदकान्कृत्वा प्रातरुत्थाय नित्यशः।
एकैकं भक्षयेत्प्राज्ञो यथेष्टं चाऽत्र भोजनम् ॥
कुष्ठान्यष्टादशाऽपीह प्लीहगुल्मभगन्दरान् ।
अशीतिं वातजान्रोगांश्चत्वारिंशच्च पैत्तिकान् ।
विंशतिश्लैष्मिकांश्चाऽपिसंसृष्टान्सान्निपातिकान्
शलाकाजेयरोगांश्च शिरोऽक्षिभ्रूगतांस्तथा९५७
कण्ठतालुगतांश्चापि जिह्वायामुपजिह्वकम् ।
ऊर्द्ध्वजत्रुगते रोगे भुक्तस्योपरि दापयेत् ९५८
शारीरे दापयेत्पूर्वमौदरे मध्यभोजने ।
निर्दिष्टरोगाञ्छमयेत्क्रियमाणं रसायनम् ९५९
यो. र., नि. र.,रसायने ।

भाषा—त्रिफलाका चूर्ण १५ पल, विडङ्गतण्डुल ७ पल, लोहभस्म २ पल पकेहुए भिलावे १०० नग, वाकुचीके बीज १० पल, शिलाजतु आधापल, गुग्गुलु, २ पल, पोहकरमूल १ पल, निशोत आधापल, चित्रक, मरिच, पीपल, सोंठ, तज, पत्रज; केसर, नागरमोथा ये प्रत्येक १ तोला लेकर कपड़छान चूर्णकर गुग्गुलु और भिलावोंको कूटकर उनदोनोंकी बराबर गोमूत्रमे पिसाहुआगुडूचीका कल्क देकर गोमूत्रकेसाथ एकदोरोज खरलकरे । फिर सुखाकर इस चूर्णमे मिलादें । इस समस्त चूर्णकी बराबर मिश्री अथवा शक्करकी चाशनी बनाकर १–१ तोलेके लड्डू बनाकर रखछोड़े । इनमेंसे शरीरशोधनकर १–१ लड्डू रोज खाकर ऊपरसे दूधपीवे । जैसे जैसे सात्म्य होताजाय, वैसे वैसे मात्रा बढ़ाकर एकपलतक कायमकरे । इसके सेवनसे १८ कुष्ठ, प्लीह, गुल्म, भगन्दर, अस्सीप्रकारके वातरोग, ४० पित्तरोग और २० श्लेष्मरोग, द्वन्द्वज और सान्निपातिक, शलाकासे जीतनेयोग्यरोग, शिर-आंख और भ्रूगतरोग, कण्ठ-तालु-जिह्वागत रोग नष्ट होते हैं । ऊर्द्ध्वजत्रुगतरोगोंमे भोजनकेऊपर देना, साधारणरोगोंमे भोजनके पहिले, उदररोगोंमे भोजनके बीचमें देना। इसमे आहार विहारका विशेष नियन्त्रण नहीं है ॥ २१९ ॥

२२० त्रिफलायसचूर्णम्

त्रिफलाद्विकरञ्जाऽग्निकुण्डलीचूर्णसंयुतम् ।
पाण्डुरोगी पिबेल्लोहरजस्तक्रेण मण्डलम् ९६०
व-रा., पाण्डुरोगे ।

भाषा—त्रिफला, दोनों करञ्ज, चित्रक, गुडुच, येसब समभागलेकर चूर्णकर सबकी बराबर लोहभस्म मिलाकर रखछोड़े । इसमेसे ३–३ माशे पाण्डुहरानुपानकेसाथ देनेसे अथवा तक्रके साथदेनेसे एक मण्डलमे यह पाण्डुरोगको दूरकरताहै ॥२२०॥

२२१ त्रिफलारसायनम् (प्रथमम्)

त्रिफलायाः पलशतं पृथग्भृङ्गजभावितम् ।
विडङ्गं लोहचूर्णञ्च दशभागसमन्वितम् ॥
शतावरीगुडूच्यग्निपलानां शतविंशतिः ।

मध्वाऽऽज्यतिलजं लिह्याद्वलीपलितवर्जितः ॥
शतमब्दान् हि जीवेत सर्वरोगविवर्जितः ॥
आग्नेयपुराणे, रसायने ।

भाषा—१०० पल त्रिफलाकाचूर्ण लेकर भांगरेके रसकी सातभावनाएं देकर विडङ्गतण्डुल और लोहभस्म प्रत्येक १० भाग, शतावर, गुडूची, मिलावे और चित्रक येप्रत्येक ४० पल लेकर बारीक कपडछान चूर्णकर रखलेवे । इसमेसे १ तोलेसे आरम्भकर २॥ तोलेतक घी और मधुकेसाथ मिलाकर सालभर खानेसे वलीपलित और समस्तरोगोंसे रहितहोकर सो वर्षतक जीताहै ॥ २२१ ॥

२२२ त्रिफलारसायनम् (द्वितीयम्)

त्रिफलायाः पलशतं चूर्णं भृङ्गभवाऽम्बुना ।
भावयेत्सप्त वारांस्तु छायाशुष्कन्तु कारयेत् ॥
पादं गन्धकचूर्णस्य तदर्धं पारदं क्षिपेत् ।
लिह्यान्मधुघृताभ्याञ्च मात्रया प्रत्यहं पुमान्॥
जीर्णे भुञ्जीत लघ्वन्नं गुणानेतानवाप्नुयात् ।
प्रसन्नदृष्टिरव्याधि र्जीवेद्वर्षशतत्रयम् ॥९६५॥
र. र., ध., रसायने ।

भाषा—१०० पल त्रिफलाके चूर्णको भांगरेके रसकी सात भावनाएं देकर छायाशुष्ककरे । इसमे चतुर्थांश शुद्धगन्धक और गन्धकसे आधी पारदभस्म या शुद्धपारद लेकर पारेगन्धककी नीलवर्ण कज्जलीमे मिलाकर रखछोडे । इसमेंसे तीनमाशेसे १ तोलेतक घी और मधुकेसाथ चाटकर जीर्णहोनेपर हलका अन्न खानेसे समस्तव्याधियोंसे निवृत्त होकर दिव्यदृष्टियुक्त ३०० वर्षतक जीसकताहै ॥

२२३ त्रिफलारसायनम् (तृतीयम्)

त्रैफलेनाऽऽयसीं पात्रीं कल्केनाऽऽलेपयेन्नवाम्
तमहोरात्रिकं लेपं पिबेत्क्षौद्रोदकाऽऽप्लुतम् ।
प्रभूतस्नेहमशनं जीर्णे तत्र प्रशस्यते ।
अजरोऽरुक् समाभ्यासाज्जीवेच्चैव समाः शतम्
च., सं., र. (मा.), रसायने । र. (मा.) त्रिफलाकान्तयोगः ।

भाषा—एकतोले अथवा एकपल त्रिफलाके कल्कसे कान्तलोह अथवा लोहके नये घड़ेमें भीतर लेपकर एक रात्रिभर रहनेदे । सुबहमे पानीसे धोकर उसपानीमे अन्दाजसे मधुमिलाकर पीवे और अधिक स्निग्ध भोजनकरे । इसके १ वर्ष प्रतिदिनके अभ्याससे १०० वर्षतक नीरोगहोकर जीसक्ता है ॥ २२३ ॥

२२४ त्रिफलारसायनम् (चतुर्थम्)

सर्वलोहैः सुवर्णेन वचया मधुसर्पिषा ।
विडङ्गपिप्पलीभ्याञ्च त्रिफला लवणेन च ॥
संवत्सरप्रयोगेण मेधास्मृतिबलप्रदा ।
भवत्यायुःप्रदा धन्या जरारोगनिबर्हणी ॥
च. सं., रसायने ।

भाषा—समस्तलोहभस्मोंकेसाथ अथवा सुवर्णभस्म अथवा वचा अथवा मधु,घृत अथवा विडङ्ग,पीपल अथवा लवण इनमेंसे चाहे जिसकेसाथ त्रिफलाका एक वर्षभर प्रयोग करनेसे यह मेधा, स्मृति, बल और आयु इनको देती है । और बुढ़ापेको दूर करती है ॥

२२५ त्रिफलालोहम् (प्रथमम्)

त्रिफलामुस्तवेल्लैश्च सितया कणया समम् ।
खरमञ्जरिबीजैश्च लौहं भस्मकनाशनम् ॥
र. सं., यो. म., र. रा., र. क., र. चि., भस्मके ।

भाषा—त्रिफला, नागरमोथा, विडङ्ग, शक्कर, पीपल, अपामार्गके बीज, इन प्रत्येकमेसे चाहे जिसकेसाथ लोहभस्म लेनेसे भस्मकरोगका नाश होता है ॥ २२५ ॥

२२६ त्रिफलालोहम् (द्वितीयम्)

तीक्ष्णाऽयश्चूर्णसंयुक्तं त्रिफलाचूर्णमुत्तमम् ।
क्षीरेण पाययेद्धीमान्सद्यः शूलनिवारणम् ॥
र. सं., र. चि., ध., भा. प्र., र. सु., यो. म., र. छो. प्र., चि. क्र., च. द., टो., वृ. मा., र. क., शूले । भा. प्र., सितामधिकतया प्रक्षिप्य मधुना लेहनमुक्तम्, प्रमेहाधिकारे पाठः-यो. म., र. क., वृ. मा., चि. क्र., मधुसर्पिभ्यां लेहनमुक्तं, लोहपद्धत्यां रसकामधेनौ च तीक्ष्णस्थाने ताम्रं नियुज्य त्रिफलाकं इति नाम स्थापितम् । अम्लपित्ताऽधिकारे चेति विशेषः ।

भाषा—त्रिफलाकाचूर्ण और लोहभस्म ये समभाग मिलाकर दूधकेसाथ पिलानेसे तत्क्षण शूल दूर होताहै।

२२७ त्रिफलालोहम् (तृतीयम्)

त्रिफलामृतलोहञ्च भृङ्गराजञ्च चूर्णितम्।
चूर्णमर्जुनपत्रस्य त्रिजातकशिलाजतु ॥९७२॥
त्र्यूषणं तुल्यतुल्यांशं सर्वेषाञ्च समांशतः।
क्षौद्रेण वटिका कार्या कर्षमात्रान्तु भक्षयेत् ॥
सर्वज्वरहरः श्रेष्ठो ह्यनुपानं प्रकल्पयेत् ९७३

र. र., ग. नि., र. क. ल., र. का (लोहगुटी) ज्वराऽधिकारे-ग.नि., घृतक्षौद्ररसायनं विहितम्-र. क. ल., सर्वसमा सिता निक्षिप्ता। तथा च त्र्यूषणं तुल्यतुल्यांशमित्यस्यस्थाने त्र्यूषणं तुल्यतुल्यांशमिति पाठो दृश्यते नाम च ज्वरान्तकेति स्थापितम्।

भाषा—त्रिफला, लोहभस्म, भंगरा, अर्जुनकेपत्र, त्रिजात, शिलाजतु, त्रिकटु ये सब समभाग लेकर सबकी बराबर मधु मिलाकर १—१ तोलेकी गोलियें बनाकर रखछोड़े। इनमेंसे १—१ गोली समयोचिताऽनुपानकेसाथ देनेसे यह समस्तज्वरोंको दूर करता है॥ २२७॥

२२८ त्रिफलालोहम् (बृहत्) ४

द्व्याढकं त्रिफलायाश्च चतुर्गुणजलेपचेत्।
पादाऽवशिष्टं विज्ञाय कषायमवतारयेत् ९७४
सुतप्तं निर्वपेल्लोहं गुडूच्यर्द्धं शतं तथा।
सर्पिषः षोडशपलं तच्चूर्णैः सह योजयेत् ॥
गुडूचीकन्दकदलीतालमूलीयवासकम्।
चित्रकं पिप्पलीमूलं चविका जीरकद्वयम् ॥
त्वगेलाऽरुष्करव्योषद्विक्षारलवणत्रयम्।
विडङ्गं टङ्कणक्षारं यवानी द्विपलिकांशिकान्॥
लोहं पचेत्तदैकध्यं यावत्सान्द्रत्वमागतम्।
भक्षयेन्मधुसर्पिर्भ्यां यथासात्म्यञ्च भोजनम् ॥
वातजं पित्तजं शूलं कफजं द्वन्द्वजं तथा।
परिणामसमुत्थञ्च सन्निपातसमुद्भवम्॥९७९॥
अष्टादशविधं कुष्ठं पाण्डुरोगं भगन्दरम्।
मन्दाग्निं गुदजञ्चैव जयेदेतन्न संशयः॥९८०॥

र. र., परिणामशूले।

भाषा—दोआढक त्रिफलाके जवकुटचूर्णको चौगुने पानीमें पकाकर चतुर्थांशाऽवशेषरहनेपर उतारकर छानकर ५० तोले लोहभस्मको अग्निसात् कर इसमें बुझावे। फिर इतनाही गुडूचीकाचूर्ण और १६ पल घी डाले। फिर गुडूचीकन्द, केलेकाकन्द, तालमूली, जवास, चित्रक, पिपलामूल, चव्य, दोनोंजीरे, तज, इलायची, भिलावे, त्रिकटु, सज्जी, यवक्षार, तीनोंनमक, विडङ्ग, सुहागा, अजवाइन ये प्रत्येक २—२ पल डालकर पकावे। और चलातारहे। जब वह घट्ट होजाय तब उतारकर रखछोड़े। इसमेंसे उचित मात्रामें अर्थात् १ तोलेसे २ तोले तककी मात्रा मधुकेसाथ मिलाकर खाकर जो अनुकूलहो वह भोजनकरे। इससे वात, पित्त, कफज तथा द्वन्द्वजशूल, परिणामज और सन्निपातजशूल, अठारहप्रकारके कुष्ठ, पाण्डुरोग, भगन्दर, मन्दाग्नि, बवासीर, ये सब रोग दूर होते हैं ॥२२८

२२९ त्रिफलालोहम् (पञ्चमम्)

त्रिफलालोहशिलाजतुपथ्याचूर्णञ्च लीढमेकैकम्
मधुनाऽसुरान्सुरा इव सर्वान्मेहान्निवारयति ॥

टो०, प्रमेहाऽधिकारे।

भाषा—त्रिफला, लोहभस्म, शिलाजतु, हर्रे ये प्रत्येक मधुकेसाथ चाटनेसे समस्तप्रमेह नष्ट होते हैं॥

२३० त्रिफलालोहम् (षष्ठम्)

त्रिफलां कटभीं चव्यं बिल्वमध्यमयोरजः।
रोहिणीं कटुकां मुस्तं कुष्ठं पाठाञ्च हिङ्गु च ॥
मधुकं मुष्ककयवक्षारौ त्रिकटुकं वचाम्।
विडङ्गं पिप्पलीमूलं स्वर्जिकां निम्बचित्रकौ ॥
मूर्वाऽजमोदेन्द्रयवान् गुडूचीं देवदारु च।
कार्षिकं लवणानाञ्च पञ्चानां पलिकान् पृथक्॥
भागान् दध्नि त्रिकुडवे घृततैलेन मूर्च्छितान्
अन्तर्धूमं शनैर्दग्ध्वा तस्मात्पाणितलं पिबेत् ॥
सर्पिपाकफवातार्शो ग्रहणीपाण्डुरोगवान्।
प्लीहमूत्रग्रहश्वासहिक्काकासक्रिमिज्वरान् ॥
शोफातिसारौ श्वयथुं प्रमेहानाहहृद्ग्रहान्।

हन्यात्सर्वविषञ्चैव क्षारोऽग्निजननो वरः ॥
जीर्णे रसे यो मधुरैरन्नं स्यात्पयसाऽपि वा ॥
• च. सं., ग्रहणीरोगे ।

भाषा—त्रिफला, मालकंगनी, चव्य, विल्व-मज्जा, लोहभस्म, कुटकी, नागरमोथा, सुंठ, पाठा, हींग, मुलहठी, मुष्ककक्षार, यवक्षार, त्रिकटु, वचा, विडङ्ग, पिपलामूल सज्जी, नीमकीछाल, चित्रक, मूर्वा, अजमोद, इन्द्रजव, गुडूची, देवदारु, ये प्रत्येक १ कर्ष, पांचोंनमक १–१ पल, दही १२ पल, घी और तैल इतना डाले कि सब चीजें तर हो-जायें । फिर इन सब चीजोंको कूटकपड़छानकर नये मजबूत मिट्टीके घड़ेमे डाल मुंह बन्दकर ३–४ कपड़मिट्टी समस्तपर देकर सुखाकर चूल्हेपर रखकर यहांतक आंचदे कि तमाम जलजॉयँ । स्वाङ्ग शीतल होनेपर निकालकर खरलकर रखछोड़े । इसमेसे १–१ तोला घीकेसाथ देनेसे कफ और वायुके बवासीर, ग्रहणी, पाण्डु, प्लीहा, मूत्रग्रह, श्वास हिचकी, कास, कृमि, ज्वर, शोष अतिसार, शोथ, प्रमेह, आनाह, हृद्रुह, समस्तविष इन सबको दूरकर अग्निको पैदा करता है । दवा पचजानेपर मधुर मांसरसोंसे अथवा दूधकेसाथ भोजनदे ॥ २३० ॥

२३१ त्रिफलालोहम् (सप्तमम्)

फलत्रयं लोहरजोविडङ्गं
शैलोत्थमुस्ताऽग्निसुताप्यचूर्णम् ।
क्षौद्रेण लीढं प्रकरोति दार्ढ्यं
कोष्ठाऽग्निवृद्धिं कृशतां क्षिणोति ॥
ना. चि., रसायने ।

भाषा—त्रिफला, लोहभस्म, विडङ्ग, शिला-जीत, नागरमोथा, चित्रक, सुवर्णमाक्षिक, सब सम-भागलेकर इकट्ठेकर रखछोड़े । इसमेसे एकमाशेसे तीनमाशेतककी मात्रा मधुकेसाथ चाटनेसे शरीरकी दृढताको करता है । मन्दाग्नि और कृशताको दूर करता है ॥२३१॥

२३२ त्रिफलालोहम् (अष्टमम्)

चूर्णानि लोहत्रिफलानिशानां
क्षौद्रेण लीढानि पृथक् समं वा ।
मेहान्समस्तानपि नाशयन्ति
पीतः सहाऽनेन रसो गुडूच्याः ॥
र. को., प्रमेहाधिकारे ।

भाषा—लोहभस्म, त्रिफला, हल्दी, दारुहल्दी, ये सब समभागलेकर चूर्णकर रखछोड़े । अथवा इन सबको अलग अलग या इकट्ठे मिलाकर उचितमात्रा-से लेनेसे और ऊपर गुडूचीका रस पीनेसे समस्तप्रमेह नष्ट होते हैं ॥ २३२ ॥

२३३ त्रिफलालोहम् (नवमम्)

वरावरीव्योषबलाद्वयानां
रजोरजोलोहसमुद्भवञ्च ।
समं विलीढं मधुना घृतेन
क्षयं ससैन्यं विनिहन्त्यवश्यम्॥९९०॥
लो. प. (स.), क्षये ।

भाषा—त्रिफला, शतावरी, त्रिकटु, बला, नागबला, येसब समभाग लेकर बराबरकी लोहभस्म मिलाकर रखछोड़े । इसमेसे अवस्थोचितमात्रा मधु और घीकेसाथ चटानेसे यह समस्त उपद्रवसहित क्षयको दूर करता है ॥ २३३ ॥

२३४ त्रिफलालोहम् (सोमलसत्त्व)१०

गण्डमालां जयेल्लोहं पटुक्षारफलत्रयैः ।
लवङ्गत्र्यूषसंयुक्तं सत्त्वं सोममलस्य वा ९९१
र. का., गण्डमालायाम्

भाषा—तीनोंलवण (विड, सैन्धव और रुचक), सज्जी, यवक्षार, सुहागा, त्रिफला येसब समभाग, इनसबकी बराबर लोहभस्म मिलाकर उचितमात्रामे खानेसे अथवा लौंग और त्रिकटु ६–६ रत्तीकेसाथ सोमलकासत्त्व आधे चावलभर खानेसे मनुष्य गण्डमालाको जीतताहै ॥ २३४ ॥

२३५ त्रिफलालोहम् (एकादशम्)

त्रिफला मुस्तकं व्योषं विडङ्गं पुष्करं वचा ।
चित्रकं मधुकञ्चैव पलांशं श्लक्ष्णचूर्णितम् ॥

अयश्चूर्णपलान्यष्टौ तावानेव च गुग्गुलुः ।
आलोड्य मधुनोपेतं पलद्वाशकेन च ॥९९३॥
प्रातर्विलिह्य भुञ्जानो जीर्णे तस्मिञ्जयेद्ध्रुवः ।
दुःसाध्यमामवातञ्च पाण्डुरोगं हलीमकम् ॥
जीर्णान्नसम्भवं शूलं श्वयथुं विषमज्वरम् ९९४

भै. र., र. र., आमवाते । र. चं., वृ. यो. त., नि. र., यो. र., र. का., लोहगुग्गुलुः शूलाऽधिकारे । र. र. त्रिफलागुग्गुलुः ।

भाषा—त्रिफला, नागरमोथा, त्रिकटु, विडङ्ग, पोहकरमूल, बचा, चित्रक, मुलहठी ये प्रत्येक १ पल, लोहभस्म और गुग्गुलु ८–८ पल, लेकर सबको कूटकपड़छानकर लेवे । गुग्गुलुको गायका-घीदेकर एकरोजकूटे जिसमें कि इसका द्रव होजाय, फिर सबचीजोंका चूर्ण और १२ पल मधु मिलाकर एकजीव करलें । इसमेसे एकमाशेसे तीनमाशेतककी मात्रालेकर उचिताऽनुपानसे देनेसे दुःसाध्य आमवात, पाण्डु, हलीमक, परिणामशूल, शोथ, विषमज्वर, इनको यह नष्टकरताहै ॥ २३५ ॥

२३६ त्रिफलालोहम् (निशालोहम्)१२

लोहचूर्णं निशायुग्मं त्रिफलां कटुरोहिणीम् ।
प्रलिह्य मधुसर्पिर्भ्यां कामलाऽऽर्तः सुखी भवेत्

र. कौ., वै. चि., च. सं.,यो. र.,वै. क., र. का., ध., र. क. ल., र. सु., र. सं.. यो. म., र. चं., र. चि., कामलायाम् । क्वचिन्निशालोहमिति नाम्ना व्यवहृतम् ।

भाषा—लोहभस्म, दोनोंहल्दी, त्रिफला, कुटकी सब समभाग लेकर कूटकपड़छानकर रखछोड़े । इसमेसे ३–३ माशेकी मात्रा मधु और घीकेसाथ लेनेसे प्रमेह, कामला, प्लीह, यकृत्, जीर्णज्वर, नष्टहोताहै ॥ २३६ ॥

२३७ त्रिभुवनकीर्तिरसः (प्रथमः)

हिङ्गुलञ्च विषं व्योषं टङ्कणं मागधीं शिफाम् ।
सञ्चूर्ण्य भावयेत्त्रेधा सुरसाऽऽर्द्रकहेमभिः ॥
रसस्त्रिभुवने कीर्तिर्गुञ्जैकाऽऽर्द्ररसेन वै ।
विनाशयेज्ज्वरान् सर्वान् सन्निपातांस्त्रयोदश ॥

यो. र., रसायनसं., चि. सा., र. चं., नि. र.,र.र.कौ., ज्वरे । र. र. कौ व्योषस्थाने कणा दृश्यते।

भाषा—शुद्धशिंगरिफ, बछनाग, त्रिकटु, भुना-सुहागा, पीपल, पिपलामूल सब समभागलेकर बारीक कपड़छानचूर्णकर तुलसी, अदरख और धतूरेके रसोंसे ३–३ भावनाएं देकर एकएकरत्तीकी गोलियें बनाकर रखछोड़े । इनमेंसे १–१ गोली समयोचिताऽनुपानके साथ अथवा अदरखकेसाथ देनेसे १३ सन्निपात और समस्तज्वरोंको यह नष्टकरताहै ॥

२३८ त्रिभुवनकीर्तिरसः (द्वितीयः)

शुद्धस्य ताम्रस्य दलानि कुर्यात्
पलानित्रीण्येव च गन्धकस्य ।
पलद्वयं वै रुचकस्य चैकं
पलं रसस्याऽपि विमर्द्यखल्वे ॥९९८॥
चूर्णं विधायाऽथ च सिन्धुवार-
रसेन पत्राणि विलेपयेच्च ।
तत्सम्पुटस्याऽन्तरतो निधाय
विमुद्रय तत्सम्पुटमेव वह्नौ ॥९९९॥
यामं तथैकं छगणैःपुटेत्त-
ज्ज्ञातंसुशीतं हि विचूर्णयेच्च ।
तन्नागवल्लीदलमध्यतोऽपि
वल्लैकमात्रं सकलोदरघ्नम् ।

र. प्र. सु., र. चं., उदरे ।

भाषा—शुद्धतांबेके बारीकपत्र और गन्धक ३–३ पल, संचल २ पल, शुद्धपारा १ पल, लेकर सबको संभालूकेरसमे ४ पहर खरलकर तांबेके पत्रोंपर लगाकर सुखाले । फिर ३–४ रोज कपड़मिट्टी दियेहुए शरावमे बन्दकर सुखाकर एक-पहरकी आंचदे । स्वाङ्गशीतलहोनेपर निकालकर पकेपानोंके रससे २–३ रोज घोटकर रखछोड़े । इसमेसे ३–३ रत्ती पकेपानमे देनेसे समस्त उदर-रोग नष्ट होते हैं ॥ २३८ ॥

२३९ त्रिभुवनकीर्तिरसः (तृतीयः)

मुक्ता सुवर्णदरदौविषटङ्कणौ च
व्योषं रसेन दहनस्य दिनं सुमर्धम्
चूर्णाऽऽक्तजीर्णवटमध्यगतं निरुध्या-

दत्वं पुटेच्च भुवनत्रयकीर्तिरेषः॥
सद्योज्वरग्रहणिकाक्षयसन्निपाता-
ऽतीसारमेहनिखिलाऽनिलकासकेषु।
स्वस्वाऽनुपानमथवा मधुपिप्पलीभ्यां
पथ्यं तथैव हितमस्य ददीत गुञ्जाम्॥

र. शं., ज्वरे।

भाषा—मोती, सुवर्णभस्म, शुद्धशिंगरिफ और वछनाग, भुनासुहागा, त्रिकटु सब समभागलेकर कपड़छानकर चित्रकके अङ्गस्वरससे १–२ रोजमर्दनकर गोला बनाय पुराने मिट्टीके पात्रमे चूनेके दो तीन लेपदेकर सुखाकर उसमे गोलेको रखकर चूने पुतेहुए शरावसे बन्दकर ३–४ कपड़मिट्टी देकर सुखाकर दोसेर कण्डोंकी खुली आंचदे। स्वाङ्गशीतलहोनेपर निकालकर रखछोड़े। इसमेसे १ रत्तीसे ३ रत्तीतक यथारोगानुपानकेसाथ अथवा मधु और पीपलकेसाथ देनेसे नवीनग्रहणी, क्षय, सन्निपात, अतिसार, प्रमेह, समस्तवातरोग, श्वास, इनसबको यह नष्टकरता है॥ २३९॥

२४० त्रिमूर्तिरसः (प्रथमः)

सूतगन्धमयोभस्म समं सम्मेल्य भावयेत्।
निर्गुण्डीपत्रतोयेन मुसलीकन्दवारिणा॥
ततः सिद्धमसुं माषमात्रं रसमनुत्तमम्।
लोध्रक्षौद्रेण चाऽश्नीयाच्चूर्णं खादेत् पिचून्मितम्
षट्कटुत्रिफलापञ्चलवणाऽवल्गुजोद्भवम्।
मेदःशोथाऽग्निमान्द्याऽमवातश्लेष्मगदप्रणुत्॥

यो. र. र. कौ., व. रा., रसायनसं., नि. र., वृ. यो. त., वै. क., वै. चि., मेदोरोगे।

भाषा—शुद्धपारा और गन्धक, लोहभस्म सब समभागलेकर निर्गुण्डीकेपत्ते और मुशलीके कन्दके रससे १–१ रोज मर्दनकर १–१ माशेकी गोलियें बनाकर रखछोड़े। इनमेसे १ गोली लोध और मधुके साथ खाकर षट्कषण (पीपल, पिपलामूल, चव्य, चित्रक, मिरच और सोंठ); त्रिफला, पांचोंनमक (काच, सैन्धव, सामुद्र, विड और सौवर्चल), बाकुचीके बीज, सब समभागलेकर बारीक चूर्णकर १ तोला ऊपरसे लेनेसे मेद, सूजन, मन्दाग्नि, आमवात और श्लेष्मरोग नष्ट होतेहैं॥ २४०॥

२४१ त्रिमूर्तिरसः (द्वितीयः)

रसमन्यं प्रवक्ष्यामि सर्वोदरविनाशनम्।
पातितात्स्वेदितात्सूतात्पलद्वयमुपाऽऽहरेत्॥
शुद्धस्य दानवेन्द्रस्य ग्राह्यं पलचतुष्टयम्।
निर्गुण्डीसलिलं मर्द्यो दिनत्रयमतन्द्रितः॥
पश्चाद्गोलं समाऽऽपाद्य दृढे भाण्डे निवेशयेत्।
वक्ष्यमाणक्रमेणाऽथ शुल्वं संशोध्य बुद्धिमान्॥
पलद्वयप्रमाणेन ताम्रपात्रीं पिधापयेत्।
अधोमुखीं ताम्रपात्रीं सूतगोलोपरि क्षिपेत्॥
सन्धिं निरोधयेद्यत्नादुपरिष्टात्पटुं क्षिपेत्।
पारदोपरि सन्दध्याच्छरावं सुदृढाऽऽननम्॥
सन्धिं निरोध्य तत्सावं वालुकाभिः प्रपूरयेत्।
भाण्डेनाऽन्येन संरुध्य सम्पुटं सन्धिलेपतः॥
उपरिष्टाच्चुल्लिकायां यन्त्रमारोपयेद्बुधः।
अधस्ताज्ज्वालयेद्वह्निं मध्यमानेन सर्वदा॥
दिनानि पञ्च यत्नेन स्वतः शैत्येऽवतारयेत्।
म्रियते सह शुल्वेन रसेन्द्रो नाऽत्र संशयः॥
विचूर्णयेत्ताम्रपात्रीं तच्चूर्णं विभजेत्त्रिधा।
एकं भागं समादाय भावयेदौषधैरथ॥
मदनस्य फलोत्थेन वारिणाऽऽदौ विभावयेत्
पुटयेच्छतवारं तमङ्कोलत्वग्भवैः रसैः॥
कुसुम्भनीरैः पुटयेत्प्रत्येकं शतशस्ततः।
पञ्चपैश्छाणकैर्दद्यात्पुटमारण्यकोद्भवैः१०१६
मदनस्य फलाम्भोभिस्त्रीन्वारान् भावयेद्रसम्।
अङ्कोलमूलत्वक्क्वाथे देवदालीरसैस्तथा १०१७
एवं सिद्धरसं पश्चाद्वल्लमानेन योजयेत्।
गोमूत्रजेन मण्डेन चुलुकत्रयमानतः॥
दत्त्वा धर्मे स्थापयेच्च क्षणमात्रमतन्द्रितः।
आबाल्यात्सङ्गृहीतं यन्मलं देहे व्यवस्थितम्॥
तत्सर्वं घटिकामध्ये वमत्येव न संशयः।
वमनीयो रसो नाम्ना जलोदर विनाशनः॥

द्वितीयं भागमादाय पुटयेदौषधैस्ततः ।
त्रिवृत्तिक्ता च सगुडा रेचनी शङ्खिनी तथा ॥
इन्द्रवारुणिका चैषां क्वाथं कुर्याद्विचक्षणः ।
तेन क्वाथेन पुटयेच्छतं वारान् रसेश्वरम् ॥
ततश्च भावना देया लिङ्गिनीस्वरसे त्रिधा ।
कम्पिल्लक्वाथतस्तिस्रो दन्तीनीरैश्च तावतीः ॥
त्रिवृत्क्वाथेन तिस्रः स्युश्शङ्खिनीक्वाथतस्तथा ।
लिम्पाकफलनीरेण मूलनीरेणवा पुनः ॥
अष्टादशैवं जायेरन् भावना रेचने रसे ।
यत्नतः स्थापयेत्पश्चात्करण्डे तं रसेश्वरम् ॥
अर्धवल्लप्रमाणेन रसं दद्याच्च रोगिणे ।
अनुपाने जलं देयं सुशीतं चुलुकावधि ॥
यावद्वारांश्च चुलुकान् पिबेत्तावद्विरेचयेत् ।
अयं चुलुकभेदाख्यो रसो जठररोगिणः ॥
जलोदरादि रोगाणां मूलकर्तनदक्षिणः ।
तृतीयं भागमादाय पुटयेत्त्रिफलोदकैः ॥
शतं वारान् रसेन्द्रोऽयं सिद्धत्येव न संशयः ।
रसेन्द्रस्याऽस्य योग्यं स्याद्द्विवल्लं तु रसायने ॥
खदिराऽसनजैः क्वाथैस्त्रिफलां भावयेच्छतम् ।
वारान् सा त्रिफला योज्या रसायनविधौ नरैः ॥
संवत्सरेण पलितं नाशयेत्पारदेश्वरः ।
द्वाभ्यां रोगान्हरेत्सर्वान् दीर्घं सञ्जीवयेन्नरम् ॥
कालारिसञ्ज्ञया सोऽयं रसेन्द्रः परिकीर्तितः
एवं त्रिमूर्तिनामाऽयं रसः शङ्करनिर्मितः ॥
जीर्णशाल्योदनं पथ्यं गोघृतं कृत्स्नमुद्गकाः ।
गोपयस्तद्भवं तक्रं यत्नादधि विवर्जयेत् १०३३
शाकं न किञ्चिद्योज्यं स्याद्रसायनविधौ नरैः ।
मद्यं मांसं मैथुनञ्च वर्जयेद्रससेवने ॥१०३५॥
रसेन्द्रोऽयं त्रिमूर्त्याख्यः स्वस्थैः सर्वैश्च सेव्यते
रसायनार्थिनः कुर्यु र्दशभि र्दशभिर्दिनैः ॥
वान्तिं विरेकं कालारिं नित्यं खादेत्पुरातनम्
जलोदरी तु कालारिमिच्छया सेवनेन वा ॥
त्रिदिनात्त्रिदिनात्कुर्याद्वान्तिमेकाञ्च बुद्धिमान् ।
दृष्टप्रभावः सृष्टोऽत्र लोकोपकृतिहेतवे ॥
देवीशास्त्राऽनुसारेण विविच्य प्रतिपादितः ॥

रसार्ण., टो., । टोडरानन्दे त्रिफलया संसिद्धया इत्यस्य स्थाने संसिद्धया त्रिवृतया इति पाठो दृश्यते ।

टि०—चतुर्दशोदयभास्करेणाऽऽपाततोऽस्य साम्यं प्रतिभाति, परमानयो र्भावनाऽऽदौ महान्विशेषोऽस्ति इतिकृत्वा भिन्नावतौ रसाविति बोध्यम् । गुणेषु तु प्रायः साम्य मस्त्येवेति बोध्यम् ।

भाषा—पातनादि संस्कारकियाहुआपारा २ पल, शुद्धगन्धक ४ पल, इन दोनोंकी नीलवर्णकज्जलीकर निर्गुण्डीके रससे तीनरोज लगातार मर्दनकर गोला-बनाय सुखाकर मिट्टीके मजबूत भाण्डमें रखदे । फिर दोपल शुद्धतांबेकी कटोरी बनाय इसगोलेके ऊपर उल्टी रखकर सन्धि यत्नपूर्वक बन्दकर ऊपरसे ४ अङ्गुलऊंचा पिसा हुआ नमक डालकर उसपर कपड़छानकीहुई बालू दबादबाकर भरदे । और ढक्कन देकर समस्तपर २—४ कपड़मिट्टीकर सुखाकर चूल्हेपररख ५ दिनकी मध्यमाऽग्निदे । स्वाङ्गशीतल-होनेपर इसमेंरहेहुए ताम्रको धीरजसे निकालकर इसके तीन विभागकरे । इनमेंसे एकभागको लेकर मैनफ-ल, अङ्कोल और कुसुम्भ इनके रसोंकी सो१०० भावनाएं देकर गोलाबनाय सुखाकर शरावसम्पुटमें बन्दकर ५ जङ्गलीकण्डोंकी आंचदे । स्वाङ्गशीतलहो-नेपर मैनफलकारस, अङ्कोलकी जड़काक्वाथ, बन्दा-लकारस इनप्रत्येकसे तीन भावनाएं देकर रखछोड़े । इसमेंसे ३ रत्तीलेकर २ चुल्लू गोमूत्रके मंड (एक दोपहरतक रक्खेहुए गोमूत्रका ऊपरि घनभाग) के-साथ पिलाकर थोड़ीदेर धूपमें बैठावे । इससे वच-पनकाभी सङ्गृहीत देहकामल एकघड़ीमें वमनहोकर निकलजायगा । इसरसका **वमनीय** नामहै और जलोदरको दूरकरताहै ।

इसीतरह दूसरे भागको लेकर निशोत, कुटकी, थूहरकादूध, कालादाना, इन्द्रायण इनके अङ्गस्वरस अथवा क्वाथोंसे सो १०० भावनाएं देकर अन्तमें शिवलिङ्गी, कमीला, दन्तीमूल, निशोत, काला-

दाना, अमिलतासकागूदा और जड़कीछाल इनप्रत्येकके यथासम्भव स्वरस अथवा क्वाथोंकी ३–३ भावनाएं देकर डेढ़ १॥ रत्तीकी गोलियें बनाय छायामे सुखाकर रखछोड़े। इनमेंसे १ गोलीलेकर २ चुल्लू पानीकेसाथ निगलजाय। उसकेबादमे जितने चुल्लू पानी पीयेगा उतनेही वार दस्त होंगे। इसका चुलुक भेद नामहै। जलोदरादिरोगोंको यह जड़से नष्टकरताहै।

तीसरे भागमे त्रिफलाके क्वाथकी १०० भावनाएं देकर २–२ रत्तीकी गोलियें बनाकर रखछोड़े। इनमेंसे १–१ गोली खदिर और असनके क्वाथोंसे त्रिफलाको १०० भावनाएं देकर उसके एकतोले चूर्णकेसाथ एकवर्षभर लगातार खानेसे पलितका नाश होता है। दीर्घपलगातार लेनेसे समस्तरोगोंको दूरकर मनुष्योंको दीर्घायु करदेता है। इसका **कालारि**भी नाम है। पथ्यमें पुराने चावल, गायका घी, मूंग, गोदुग्ध और छाछदेवे। शाक और दहीका भूलकरभी उपयोग न करे। मद्य, मांस, मैथुन ये रसायनार्थीको वर्जित हैं। रसायनकेलिये जो आदमी इसका प्रयोगकरे वह १०–१० दिनका अन्तरदेकर वमन और विरेचनका सेवनकरे तो पुराना जलोदर नष्ट होता है। अथवा केवल ३–३ रोजके अन्तरसे केवल वमनके लिये **कालारि**रसका सेवनकरे। यह देवीशास्त्रके अनुसार लोगोंके कल्याणके लिये कहागया है॥२४१

२४२ त्रिमूर्तिरसः (तृतीयः)

सूतगन्धकताम्राणि समभागानि कारयेत्।
सर्वार्धश्चाऽपिजैपालं गोमूत्रे मर्दयेच्चिरम्॥
स्नेहे नष्टे वटीःकुर्याद्गुञ्जात्रयमिता भिषक्।
रसस्त्रिमूर्तिसिद्धोऽयं हन्यात्पाण्डुं जलोदरम्॥

र. क. यो., वै. चि., पाण्ड्वधिकारे।

भाषा—शुद्धपारा और गन्धक, ताम्रभस्म समभाग, सबसे आधे शुद्धजमालगोटे लेकर सबकी नीलवर्ण कज्जलीकर गोमूत्रमे यहांतक मर्दनकरे कि इसकी चिकनाई बिल्कुल जातीरहे। फिर ३–३ रत्तीकी गोलियें बनाकर रखछोड़े। इनमेंसे १–१ गोली जलोदरहरानुपानकेसाथ देनेसे यह पाण्डु और जलोदरको दूरकरता है॥ २४२॥

२४३ त्रियोनिरसः

ताम्रस्य तुर्यभागेन रसेनोत्प्लुत्य लेपयेत्।
निम्बुद्रावेण संयोज्य सूर्यतापे विनिक्षिपेत्॥
ऊर्ध्वाधो गन्धकं दत्त्वा पाचयेदतियत्नतः॥
मत्स्याक्षीमभितो दत्त्वा मृत्स्नया सन्निरुध्य च
यामद्वयं तु पक्श्च स्वाङ्गशीतं समुद्धरेत्।
गुञ्जामात्रं ददीताऽस्य सामयं गुडसंयुतम्॥
त्रियोन्याऽऽख्यो रसो ह्येष शोफपाण्ड्वपनोदनः

र. र. स., र. (मा.), र. को., र. सु., र. सि., कामलापाण्ड्वधिकारे।

टि०—माणिक्यचन्द्रीयरसावतारे चूर्णकलिकानां मध्ये हण्डिकायामग्निप्रदानमभिहितम्। रसेन्द्ररत्नकोषरसराजसुन्दरयोः केवलं हण्डिकायां अग्निप्रदानमभिहितम्—तत्केवलमज्ञानविलसितम् प्रतिभाति। यामद्वयपरिमितोऽग्निरत्र न कार्यकारी भविष्यति। नायमपूर्वो रसः किन्तु शार्ङ्गधराऽभिहिततात्रमारणस्य प्रयोगएव तत्र स्पष्टतया प्रतिपादितः स एव क्रमोऽत्रापि अनुसरणीयः तेन निर्विघ्नो भविष्यति इति अस्माकं मतम्।

भाषा—शुद्धपारेको नीबूकेरसमे ४ पहरघोटकर पारेसे ४ भाग शुद्धतांबेके पत्रोंपर लेपकर धूपमे सुखादे। सूखनेपर ताम्रपत्रोंसे द्विगुणगन्धककी नीबूके रसमे पिट्ठी बनाय इनपत्रोंपर लपेटकर एकगोला बनाले। और गोलेसे अठगुनी मत्स्याक्षीको पीसकर गोलेपर चढ़ादे और ६–७ कपड़मिट्टी देकर सुखाले फिर ६–७ कपड़मिट्टीदीहुई हंडीमें रखकर ऊपर एकढकन उल्टामारकर उसकी सन्धि गुड़चूनेसे बन्दकर ऊपर कलीका चूना, नमक अथवा छनीहुईसफेदराखको गलेतक भरकर दबादे। और ऊपरसे सेंधानमक बारीकपीसकर १–१ अङ्गुलमोटी तहमे बिछाकर पानीका छींटा इतना दे कि नमक तरहोजाय। फिर ढकन देकर ६–७ कपड़मिट्टीकर सुखादे। सूखनेपर चूल्हेपर रख ४ पहर-

की पुट तीक्ष्ण आंचदेकर स्वाङ्गशीतल होनेपर निकालकर जङ्गली सूरणके रसमें २-३ रोज घोटकर गोलाबनाय सुखाकर सूरणके कन्दमें गर्त्तबनाकर इसमें गोलेको रख सूरणकीही डाटदेकर ६-७ कपडमिट्टी देकर सुखाले । फिर इसको छै गजपुटमें जङ्गलीकण्डोंकी आंचदे । स्वाङ्गशीतल होनेपर निकालकर खरलोंदे । इसको गर्द्दभमें थोडासा डालकर रातभर रक्खे यदि दहीका रङ्ग वैसाही रहे तब काममें लेवे यदि नीला होजायतो फिरसे सूरणके रसमें घोटकर पहिलेकीतरह आंचदे । स्वाङ्गशीतल होनेपर निकालकर १ रत्तीमें ३ रत्तीतक हरेंकेचूर्ण और गुड ३-३ माशेकेसाथ मिलाकर देनेसे शोफ और पाण्डु को नष्टकरता है । श्वास, कास और रक्तप्रदरकेलिये यह रामबाणकी तरह कामकरता है ॥ २४३ ॥

२४४ त्रिरात्रज्वरगजकेसरीरसः

तालकस्य च द्वौ निष्कावेकनिष्कं तु सूतकम् ।
मर्दयेत्तालवल्ल्यद्भिः शुल्वपात्रे विपाचयेत् ॥
पलमेकं गृहीत्वा तु शुद्धस्येश्वररेतसः ।
नागस्य च तथैवैकं तालकस्य पलद्वयम् ॥
कारवल्लीदलद्रावैर्मर्दयित्वैकगुञ्जिकाम् ।
मर्दयेद्धूर्त्तजद्रावैस्त्र्याहिकस्य निवृत्तये १०४५

र. क. यो., ज्वरे ।

भाषा—शुद्धहरिताल २ टंक, शुद्धपारा १ टंक लेकर कज्जलीकर ताड्वाडीके रससे मर्दनकर बराबरके शुद्धताम्बेके पत्रपर लेपकर शरावसम्पुटमें बन्दकर गजपुटकी आंचदे । अथवा लवणयन्त्रमें पकाकर भस्मकरले । स्वाङ्गशीतल होनेपर निकालकर शुद्धपारा १ पल, नागभस्म १ पल, हरिताल भस्म अथवा रसमाणिक्य २ पल लेकर सबकी नीलवर्ण कज्जलीकर करेलेके रससे २-३ रोज मर्दन कर १-१ रत्तीकी गोलियें बनाकर रखछोडे । इनमेंसे १-१ गोली बुखार आनेके एकघंटा पहिले धतूरेके रसकेसाथ देनेसे त्र्याहिक ज्वरको नष्टकरता है

र. सा. ७९

२४५ त्रिलोचनरसः

त्रिलोचनो हरिः पक्षी पार्वती नागभूषणम् ॥
दरदं तीक्ष्णपुष्पं कां वसुं रुधिरवासकौ ॥
विडङ्गसैन्धवं हिङ्गु पटोलाऽमृतमुस्तकम् ।
पिप्पलीचविकैरण्डचित्रकोषणगोक्षुरम् १०४७
देवदारुसमं चूर्णं गुडेन वटकीकृतम् ।
उदरं कुक्षिरोगश्च प्लीहगुल्मौ विनाशयेत् ॥
नेत्ररोगं पार्श्वशूलं शिरःशूलं प्रमेहकम् ।
हृच्छूलमरुचिं सर्वं दुर्नामं चाऽश्मरीं पराम् ॥
मूत्रकृच्छ्रं तथा वातं सर्वमेतद् व्यपोहति

र. र., यकृत्प्लीहोदरे ।

भाषा—शुद्धपारा, हरिताल, सुवर्णमाक्षिक, गन्धक, सीसा, कौडी, शिङ्गरफ, लोह, कसीस, कान्तपाषाण, कान्तलोह, सुवर्ण इनसबकी भस्में, केसर, अडूसा, विडङ्ग, सैन्धव, हींग, पटोलपत्र, बछनाग, नागरमोथा, पीपल, चव्य, एरण्ड और चित्रककीजड, मरिच, गोखरू, देवदारु, येसब समभागलेकर कपडछान चूर्णकर पारेगन्धककी नीलवर्ण कज्जलीमें मिलाकर बराबरके गुडमें १-१ माशेकी गोलियें बनाकर रखछोडे । इनमेंसे १-१ गोली तत्तद्रोगहरानुपानकेसाथ देनेसे उदररोग, कुक्षिरोग, प्लीह, गुल्म, नेत्ररोग, पार्श्वशूल, शिरःशूल, प्रमेह, हृदयशूल, अरुचि, बवासीर, अश्मरी, मूत्रकृच्छ्र, आमवात, इनसबरोगोंको यह दूरकरताहै॥

२४६ त्रिविक्रमरसः (प्रथमः)

मृतताम्रमजाक्षीरे पाच्यं तुल्ये गते द्रवे ।
तत्ताम्रं शुद्धसूतश्च गन्धकश्च समंसमम् ॥
निर्गुण्ड्युत्थद्रवै र्मर्द्यं दिनं तद्गोलमन्धयेत् ।
यामैकं वालुकायन्त्रे पाच्यं योज्यं द्विगुञ्जकम्॥
बीजपूरस्य मूलन्तु सजलं चाऽनुपाययेत् ।
रसस्त्रिविक्रमो नाम्ना मासैकेनाऽश्मरीप्रणुत् ॥

र. र. स., र. सं., यो. म., यो. र., र. सु., र. प्र., भै. रा., चि. र. भ., नि. र., रसचि., र. चि., शा., र. धे., र. सं. क., र. र. दी., ध., र. र., वृ. यो. त., र. क., रसायनसं., व. रा., ढो., र. प्र. सु., र. (मा.), वै. चि.,

र. चि., र. क. ल., चि. क., र. र. की., ना. वि., अश्मरीरोगे।

भाषा—ताम्रभस्मको बराबरके बकरीके दूधमें धीरेधीरे पकावे। दूधसूखजानेपर उसके बराबर शुद्ध पारा और गन्धक मिलाकर नीलवर्ण कज्जलीकर निर्गुण्डीकन्द अथवा संभालूके पत्तोंके रससे एकरोज मर्दनकर गोलाबनाय सुखाकर शरावसम्पुटमें बन्दकर ६–७ कपड़मिट्टी समस्तपर देकर सुखाले। फिर ३–४ कपड़मिट्टी दीहुई हंडीमे यन्त्रको रखकर ऊपरसे बालू भरकर एकपहर कड़ी आंचदेकर उन्हींकोयलोंपर रहनेदे। स्वाङ्गशीतल होनेपर निकालकर रखछोड़े। इसमेसे २–२ रत्ती मधु वगैरहमे चाटकर विजोरेकी एकतोला जड़को पानीमे पीसकर ऊपर पिलानेसे यह एक महीनेमे असाध्य पथरी को नष्ट करता है॥ २४६॥

२४७ त्रिविक्रमरसः (द्वितीयः)

शुद्धसूतं विषं तालं भृङ्गनीरेण मर्दितम्।
प्रहरद्वयमात्रञ्च वालुकायन्त्रके पचेत् १०५३
वज्रमूषागतं पक्वं स्वाङ्गशीतं विचूर्णयेत्।
वल्लद्वयप्रमाणेन देयं निर्गुण्डिकाद्रवैः॥
त्रिविक्रमरसो नाम सन्निपातकुलान्तकः॥

वै. चि., सन्निपाते।

भाषा—शुद्धपारा, बछनाग और हरिताल समभागलेकर नीलवर्णकज्जलीकर भंगरेकेरससे एकरोज मर्दनकर गोलाबनाय सुखाकर शरावसम्पुटमे बन्दकर ऊपरकी तरह वालुकायन्त्रमे दोपहरस्वेदनकर स्वाङ्गशीतलहोनेपर निकालकर रखछोड़े। इसमेंसे ६–६ रत्तीकी मात्रा संभालूके पत्तोंके एकतोले रसकेसाथ देनेसे यह सन्निपातको नष्टकरताहै॥

२४८ त्रिविक्रमरसः (तृतीयः)

दरदश्चाऽहिफेनश्च टङ्कणं बर्बरस्तथा।
क्षौद्रेण योजयेद्वैद्यो गुञ्जाद्वयमितं रसम्॥
त्रिविक्रमरसो नाम रक्तातीसारमुल्बणम्।
सशूलमामसहितं नाशयेन्नाऽत्रसंशयः १०५६

रसायनसं., अतिसारे।

भाषा—शुद्धशिंगरफ, अफीम, भुनासुहागा, लोबान ये सब समभागलेकर सबका बारीकचूर्णकर मधुमिलाकर २–२ रत्तीकी गोलियें बनाकर रखछोड़े। इनमेंसे १–१ गोली समयोचितानुपानके साथ देनेसे अत्यन्तबढ़ेहुए रक्ताऽतिसार और आमसहितशूलको यह नष्टकरताहै॥ २४८॥

२४९ त्रिविष्टपरसः (प्रथमः)

रौप्यगन्धकताम्राणां कृत्वा चैकत्र पिष्टिकाम्।
तत्समश्चाऽभ्रकं श्लक्ष्णं गन्धकं पञ्चमांशतः॥
विषञ्च षोडशांशेन द्वौ भागौ सूतकस्य च।
एकीकृत्य प्रयत्नेन जम्बीररसमर्दितम् १०५८
भाजने मृन्मये स्थाप्य वराक्वाथे विपाचयेत्।
दशमूलशतावर्योः क्वाथे पाच्यः क्रमेण हि॥
तथोद्धार्य प्रयत्नेन वटिकाः कारयेद्बुधः।
गुञ्जात्रयप्रमाणेन शूलोदावर्तहृद्ग्रहे॥१०६०॥

यो. र., रसेन्द्रसं., शूले

भाषा—रजतभस्म, शुद्धगन्धक और ताम्रभस्म समभागलेकर अदरखवगैरहके रसमे १–२ रोज मर्दनकर पिट्ठीबनाले। इसपिट्ठीके बराबर अभ्रकभस्म और पञ्चमांश शुद्धगन्धक, सोलहवांहिस्सा शुद्धबछनाग और दोभाग शुद्धपारद मिलाकर सबको इकट्ठेकर जंभीरीके रससे १–२ रोज मर्दनकर मिट्टीकेबर्तनमे रखकर इससे अष्टगुणित अथवा षोडशगुणित त्रिफलाकाक्वाथ देकर बहुतमन्द आंचसे पकावे। फिर दशमूल और शतावरीका दस दस गुणित रस डालकर पकावे। जब गोलीबंधनेलायक होजाय तब उतारकर ३–३ रत्तीकी गोलियें बनाकर रखछोड़े। इनमेसे १–१ गोली समयोचिताऽनुपानकेसाथ देनेसे शूल, उदावर्त, हृदयकाजकड़ना येसब नष्टहोतेहैं॥ २४९॥

२५० त्रिविष्टपरसः (द्वितीयः)

भागद्वयं सूतवरस्य तार–
ताम्राऽभ्रगन्धं पृथगेकभागम्।

जम्बीरनीरेण दिनं विमर्द्य
विपाचयेन्मृन्मयभाजनस्थम् ॥१०६१॥
वर्या वरायाः दशमूलजेन
क्वाथेन घस्रत्रितयं सुयुक्त्या ।
त्रिविष्टपो नाम रसस्त्रिदोषजं
शूलंजयेद्वातरुजं तथोग्रम् ॥ १०६२ ॥
घृतोपणै र्वल्लयुगो घृताढ्यः
सामुद्रयुक्तस्त्रिफलाऽनुपानः ।
वा पुष्कराऽङ्घ्र्यम्बुसुरामठाढ्यो
कणाऽभयासैन्धवहिङ्गुयुग्वा ॥१०६३॥

र., शूले ।

भाषा—शुद्धपारा २ भाग, रजत–ताम्र–अभ्रकभस्म और शुद्धगन्धक एकएक भाग लेकर सबकी नीलवर्ण कज्जलीकर जंभीरीकेरससे एकदिन मर्दनकर मिट्टीके वर्तनमें शतावर, त्रिफला और दशमूलके क्वाथोंसे क्रमसे १–१ रोज मन्द अग्निपर पकावे और निरन्तर चलाताजाय । गोली बंधनेलायक होजानेपर ६–६ रत्तीकी गोलियें वनाकर रखछोडे । इनमेंसे १–१ गोली एकतोला घी और २९ कालीमिर्चोंके चूर्णकेसाथ अथवा गायके घीकेसाथ अथवा सेंधेनमककेसाथ अथवा त्रिफलाके काढेके साथ अथवा पोहकरमूलके काढेकेसाथ अथवा हींग–पीपल–हर्रे–सेंधानमक इनके चूर्णकेसाथ अथवा केवलहींगकेसाथ देनेसे त्रिदोषजशूल और घोर वातव्याधिको यह नष्टकरताहै ॥ २५० ॥

२५१ त्रिवृताद्ययस्कृतिः

त्रिवृच्छ्यामाऽग्निमन्थसप्तलाकेवुकशङ्खिनीतिल्वकत्रिफलापलाशशिंशपानां रसमादाय पलाशद्रोण्यामभ्यासिच्य खदिराङ्गारतप्तमयःपिण्डमेकविंशतिवारान्निर्वाप्य ततस्तं रसमासिच्य स्थाल्यां गोमयाऽग्निना साधयेत् । सिद्ध्यति चाऽवपेत् । पिप्पलीचूर्णस्य भागं द्वौ मधुनस्तावन्तौघृतस्य ततश्चतुर्भागाऽवशिष्टेऽवतीर्णे भूयोऽग्नितप्तमयःपिण्डं तस्मिन् प्रक्षिपेत्, प्रशान्तं च लोहपात्रे सुगुप्तं निदध्यात् । इयमयस्कृतिर्दुस्साध्यमपि कुष्ठं मेहं वा साधयति । स्थूलं कर्षयति शोफमुपहन्ति, सन्नमग्निमुद्धरति, विशेषेण राजयक्ष्मिणामुपदिश्यते । वर्षशतायुश्चैनामुपयुज्य पुरुषो भवति ॥ १०६४ ॥

अ. सं., रसायने ।

टि०—पिप्पलीचूर्णस्य भागमित्यत्र भागशब्देन अंशोऽभिप्रेतस्स न कलार्थकत्वात्पोडशांशपरो वोध्योऽन्यथा चतुर्भागाऽवशिष्टेऽवतीर्णे इत्यादि न निष्पद्येतेति सुधीभिर्विभावनीयम् ।

भाषा—सफेद तथा लाल निशोत, अरणी, सीकाकाई, केउवांघास, कालादाना, देशीलोध अभावमे रेवनचीनी, त्रिफला, पलाश, शीशम, इनसबका अङ्गस्वरस लेकर तत्कालवनाईहुई पलाशकीजड़ अथवा स्तम्भकी द्रोणीमें भरके खैरके कोयलोंमे लालकिया हुआ लोहेका गोला उसमे २१ बार बुझावे । फिर उसरसको निकालकर मिट्टीकी हंडीमे अग्निपरएकआधा उफान आजाय तब उससे पोडशांश पीपलकाचूर्ण और पीपलसे दूना मधु तथा घृत मिलाकर जङ्गलीकण्डोंकी मधुर आंचसे पकावे । जब चतुर्थांश बाकीरहे तब उतारकर पूर्ववत् लोहेके गोलेको लालकर उसमें एकबार बुझाकर मिट्टीकेवर्तनसे निकालकर लोहेके वर्तनमे रखकर एकान्तस्थानमे रक्खे । एकसप्ताहके बाद इसमेसे यथाग्निबलकीमात्रा लेकर दूधभातपररहे । इससे दुःसाध्यकुष्ठ और प्रमेह नष्टहोता है । यह स्थूलको कृशाकरती है सूजनको मिटाती है नष्टअग्निको दीप्तकरती है राजयक्ष्मियोंकेलिये खास दवा है । इसके सेवनकरनेसे मनुष्य १०० वर्षतकजीसक्ता है ॥ २५१ ॥

२५२ त्रिशक्तिकाञ्चनम्

विशुद्धगन्धाऽश्मपलं पलं रसात्
पलं तथा शोधितशुद्धकाञ्चनात् ।
पुटेन वह्नौ पुटितं कनीयसा
क्षौद्रेणसाऽऽज्येन यथाऽग्निभक्षितम् ॥

जयेद्ग्रहण्यामयमाशुघोर-
मर्शांस्यतीसारमुरःक्षतञ्च ।
क्षयं ससैन्यं जठरं प्रवृद्धं
गुल्मान्प्रमेहानथ वह्निमान्द्यम्१०६६॥
लो. प. (स.), उदररोगे ।

भाषा— शुद्धगन्धक, पारा और सोनेकेवर्क समभागलेकर तुलसीके रससे एकरोजमर्दनकर गोला-बनाय शरावसम्पुटमें बन्दकर ३–४ कपड़मिट्टीदेकर सुखाकर २ सेर अङ्गार्यकण्डोंकी खुलीआंचदेकर स्वाङ्गशीतलहोनेपर निकालकर रखछोड़े । इसमेंसे ३ रत्तीसे ६ रत्तीतक अग्निबलदेखकर मधु और घीकेसाथ देनेसे उत्कट ग्रहणी, अर्श, उरःक्षत, उपद्रवसहित क्षय, बढ़ाहुआ उदररोग, गुल्म, प्रमेह और मन्दाग्नि इनको यह नष्टकरता है ॥ २५२ ॥

२५३ त्रिशक्तिपारदः

पारदं गन्धकं तुल्यं सीसकञ्च समं शुभम् ।
विमर्घ पोट्टलीं गाढं स्वर्जिका सर्वतः समा ॥
बन्धयेत्तां शरावस्थां मुद्रयित्वा दृढं पुनः ।
पुटेद्गजपुटे सम्यक् ततः सिद्धो भवेद्रसः ॥
गुञ्जामितः प्रदातव्यो लवङ्गस्याऽनुपानतः ।
अरोचके क्षये श्वासे कासे चैव सुदुस्तरे ॥
ग्रहण्यां पाण्डुरोगे च सर्वरोगेच शस्यते ।
अनुपानस्य भेदेन शीघ्रं वह्निविवर्द्धनः ॥
शतशो ह्यनुभूतश्च पारदोऽयं महागुणः ॥
ना. वि., र. म. मा., अरोचके ।

भाषा—पारदभस्म, शुद्धगन्धक दोनों समभाग, सीसाभस्म दोनोंकी बराबर लेकर सबको अदरख वगैरहके स्वरस अथवा पानीसे घोटकर गोला बनाकर चारतह मलमलमें लपेटकर डोरेसे कसदे । फिर पोटलीके बराबर लोटासज्जी लेकर एकदूसरे कपड़ेमें सज्जीकेभीतर इसपोटलीको बांधदे जिसमेंकि सज्जी इसपोटलीके चारों तरफ आजावे । फिर इसको शरावमें बन्दकर ४–५ कपड़मिट्टीदेकर सुखाकर गजपुटकी आंचदे । स्वाङ्गशीतलहोनेपर निकालकर रखछोड़े । इसमेंसे १–१ रत्ती लौंगकेसाथ देनेसे अरुचि, क्षय, श्वास, दुस्तरकास, ग्रहणी, पाण्डु इनसबको और अनुपानभेदसे मन्दाग्नि वगैरह बहुतसे रोगोंको यह नष्ट करता है । यह सैंकड़ों वारका अनुभूत है ॥ २५३ ॥

२५४ त्रिशक्तिरसः

रसगन्धकलोहमाक्षिकं
क्रमवृद्धं कुनटीं त्रिभागिकाम् ।
अविमूत्रकणाशमीरसैः
पृथगेकैकदिनं विमर्दयेत् ॥ १०७१ ॥
कृत्वा गोलं तस्य संशोष्य घर्मे
मृत्पात्रान्तर्वालुकान्तर्निदध्यात् ।
द्वित्राः कार्या मृत्पटानां प्रलेपा-
मन्दाऽग्नौ तत्पाचयेच्छक्रवस्रान् ॥
स्वाङ्गशीतं समुद्धृत्य कुर्यान्मात्रास्त्रिगुञ्जिकाः ।
यथोचिताऽनुपानैस्तु रसोऽयं सर्वरोगहा ॥
र. क. यो., सर्वरोगे ।

भाषा—शुद्धपारा १ भा., गन्धक २ भा., लोहभस्म ३ भा., सोनामाखी ४ भा., शुद्धमैनसिल ३ भा., लेकर सबको भेड़केमूत्र, पीपल और शमीके स्वरसमें एक एक रोज मर्दनकर गोलाबनाय सुखाकर ४–५ कपड़मिट्टीदीहुई हंडीमें एक बिलस्तभर बालूभरके उसपर सम्पुटको रख ऊपरसे बालूभरके हंडीपर शरावसम्पुट देकर १४ रोजकी बहुत मन्द अग्निदेकर स्वाङ्गशीतलहोनेपर निकालकर रखछोड़े । इसमेंसे ३–३ रत्ती तत्तद्रोगहराऽनुपानकेसाथ देनेसे यह समस्तरोगोंको दूरकरता है तीनों दोषोंपर एकजैसा गुण करता है इसलिये इसको त्रिशक्ति रस कहते है ॥ २५४ ॥

२५५ त्रिसङ्गदरसः

सूताऽर्कहेमताराणां समां पिष्टिं प्रकल्पयेत् ।
जम्बीरनीरसंयुक्तामातपे शोषयेद्दिनम् १०७४
ऊर्ध्वाऽधोद्विगुणंगन्धंदत्त्वा सावे निरोधयेत् ।
भाण्डगर्भे निरुद्धयाऽथ द्वियामं पाचयेल्लघु ॥

आदाय चूर्णयेच्छ्लक्ष्णं त्रिसङ्कृष्टो महारसः ।
हरीतक्या समं देयं द्विगुञ्जं पाण्डुरोगजित् ॥
र. सु., र. का., पाण्ड्वधिकारे ।

भाषा—शुद्धपारा, ताम्र और सुवर्णभस्म समभागलेकर जंभीरीकेरससे एकरोजमर्दनकर गोलीबनाकर एकरोज धूपमे सुखाकर इससे द्विगुण गन्धक नीचे ऊपर देकर शरावसम्पुटमे बन्दकर ३–४ कपड़मिट्टीदेकर सुखाकर ३–४ कपड़मिट्टीदीहुई हंडीमे वालुके बीचमे इसको बन्दकर ४ पहरकी मन्दाग्निसे स्वेदितकर स्वाङ्गशीतलहोनेपर निकालकर रखछोड़े । इसमेसे २–२ रत्ती हर्रेकेचूर्णकेसाथ देनेसे यह पाण्डुरोगको दूर करता है ॥२२५

२५६ त्रैलोक्यकीर्तिरसः

गोलाहिङ्गुलतालकाऽमृतवलित्रध्नाभ्रसूतायसं,
वङ्गं सीसकताम्यकाञ्चनमिदंतुल्यंत्र्यहंमर्दितम्।
भूतालीस्वरसेन वह्निशुकजर्नैरस्ततःकाचजे,
संरुध्याऽऽथ मृदाऽऽप्लुते तरणिना
संशोष्य तत्पात्रकम् ॥ १०७७ ॥
वन्यैरुत्पलकैःपुटेल्लघुतरंत्यक्त्वामृदोवेष्टनं,
शुद्धंकाचजपात्रगंरसवरंखल्वेदिनंमर्दितम् ।
ज्वालाऽऽस्याऽतलभृङ्गिभङ्गशिखरि-
क्षाराऽजमोदाऽमृतं,
स्वर्णाम्भोधिफलैःपुरेणलवणैरार्द्रेणभाव्यंत्रिशः
पित्तैःपञ्चभिरेवसप्तगुणितंभाव्यंततःसूतक–
स्याऽर्धेनाऽपिविषेणधूपितमिदंतच्छृङ्गबेराम्बुना
बद्धागुञ्जदलोन्मितासुगुटिकादत्तानिजैर्भेषजै–
रश्वानामपिदन्तिनामपिनृणांदुःसन्निपाताञ्जयेत्
वारांकुम्भशतानितत्रविकिरेद्विण्मूत्रकम्पावधि,
द्राक्षादाडिमबीजपूरकफलं दध्योदनं शर्करा ।
गुल्मानौदरशूलकुष्ठमरुत्ताऽतीसार दुर्नामक–
प्लीहाऽपस्मृतिमुख्यरोगदलनस्त्रैलोक्यकीर्तीरसः
र. शं., र. ल., र. का., टो., ज्वराऽधिकारे ।

भाषा—शुद्धमैनसिल, शिंगरिफ, रसमाणिक्य, वछनाग, गन्धक, तांबा, अभ्रक, पारा वङ्ग, सीसा, सोनामाखी, सुवर्ण, येसब यथासम्भव शुद्ध और भस्मकियेहुए समभागलेकर नीउवर्ण कज्जलीकर मुसली, चित्रक, अनार इनप्रत्येकके रसोंसे एकएकरोज मर्दनकर सुखाकर ६–७ कपड़मिट्टी दीहुई आतशी शीशीमे डालकर खड़ियामिट्टी वगैरहसे शीशीका मुंह बन्दकर २–३ कपड़मिट्टी देकर सुखाकर दोसेर जङ्गली कण्डोंकी आंचदेवे । अथवा वालुकायन्त्रमें रखकर चारपहरकी आंचदे । स्वाङ्गशीतल होनेपर निकालकर ज्वालामुखी, चित्रक, भंगरा, भांग, अपामार्गक्षार, अजमोद, वछनाग, धतूरेकेफल, समुद्रशोष, गुग्गुल, बड़ीलोनी, अदरख इन प्रत्येकके अङ्गस्वरसोंसे तीनतीन भावनाएं देकर पांचपित्तोंसे ६–७ भावनाएं सुखासुखाकरदेकर इसरससे आधे वछनागकी धूपदेकर अदरखके रससे घोटकर आधी आधी रत्तीकी गोलियें बनाय छायाशुष्ककर रखछोड़े । इनमेसे १–१ गोली समयोचिताऽनुपानकेसाथ देनेसे घोड़ा, हाथी और मनुष्य इनके असाध्य सन्निपातोंको यह दूरकरता है । इसके देनेसे गर्मी लगनेपर ठंढेपानीके १०० घड़ोंकी धारा मस्तकपर छोड़े अथवा झाड़ा, पेशाबहोकर कम्पहोनेतक पानीकी धारादे । द्राक्षा, अनार, विजोरेकाफल, दही, भात और शक्कर ये खानेकोदे । इसके सेवनसे गुल्म, उदर, शूल, कुष्ठ, वाताऽतिसार, बवासीर, प्लीह, अपस्मार प्रभृति रोगनष्ट होते हैं॥२५६

२५७ त्रैलोक्यचिन्तामणिरसः (प्रथमः)

भागद्वयं स्वर्णभस्म द्विभागं तारमभ्रकम् ।
लौहात्पञ्च प्रवालञ्च मौक्तिकं वह्निभागिकम्॥
भस्मसूतं सप्तभागं सर्वं मर्धन्तु कन्यया ।
छायाशुष्का वटी कार्या छागीदुग्धाऽनुपानतः
क्षयं हन्ति तथा कासं गुल्मश्चाऽपि प्रमेहनुत् ।
जीर्णज्वरहरश्चाऽप्युन्मादस्य निकृन्तनः ॥
सर्वरोगहरश्चाऽपि वारिदोषनिवारणः १०८३
र. सं., र. चं, ज्वरे ।

भाषा—सुवर्ण-रजत और अभ्रकभस्म २-२ भाग, लोहभस्म ५ भाग, प्रवाळ और मोती ३-३ भाग, पारदभस्म ७ भा., लेकर सबको इकट्ठेकर घीकुंआरके रसमे १-२ रोज मर्दनकर १-१ रत्तीकी गोळियें बनाकर छायामे सुखाकर एकएक गोळी बकरीके दूधकेसाथ देनेसे क्षय, कास, गुल्म, प्रमेह, जीर्णज्वर, उन्माद, जलदोष इनसबको यह नष्टकरताहै । तत्तद्रोगहरानुपानकेसाथ देनेसे औरभी तमामरोगोंको दूरकरता है ॥ २५७ ॥

२५८ त्रैलोक्यचिन्तामणिरसः(द्वितीयः)

हीरं सुवर्णं सुमृतञ्च तार-
मेषांसमं तीक्ष्णरजश्चतुर्णाम् ।
समं मृताऽभ्रं रसभस्मकञ्च
निष्पिष्य तीक्ष्णस्य तथाऽश्मनोवा ॥
खल्वे द्रवेणैव कुमारिकाया-
गुञ्जाप्रमाणां वटिकां प्रकुर्यात् ।
त्रैलोक्यचिन्तामणिरेष नाम्ना
सम्पूज्य सम्यग् गिरिजां दिनेशम् ॥
हन्त्यामयान् योगशतैर्विवर्ज्या-
नथ प्रणाशाय मुनिप्रणीतः ।
अस्य प्रसादेन गदानशेषान्
जरां विनिर्जित्य सुखं प्रयाति १०८६
स्निग्धे श्लेष्मण्यार्द्रकस्य रसेन पाययेत्सुधीः ।
शुष्के च माक्षिकेणैव पित्ते घृतसितायुतम् ॥
श्लेष्मणा मारुते युक्ते दुष्टे च समतां गते ।
कणाचूर्णं क्षौद्रयुतं प्रमेहे दुग्धसंयुतम् ॥
बलवर्णोऽग्निजननः कासघ्नः कफवातजित् ।
आयुःपुष्टिकरो वृष्यः सर्वरोगनिषूदनः ॥

र. सं., र. चं., ध., आ. वि., र. सु., वाताधिकारे ।

भाषा—हीरा, सुवर्ण, रजतभस्म १-१ भाग, लोहभस्म ४ भाग, इनसबकी बराबर अभ्रक भस्म और पारदभस्म लेकर सबको इकट्ठे मिलाय खूब चिकने लोहे अथवा पत्थरके खरलमे घीकुंआरके रससे १-२ रोज मर्दनकर १-१ रत्तीकी गोलियें बनाकर छायाशुष्ककर रखछोड़े । इनमेंसे १-१ गोली गिरिजा और सूर्यकी पूजाकर आर्द्रकफमें अदरखके रसकेसाथ, सूखेहुएमें मधुकेसाथ, पित्तमे घी और शक्करकेसाथ, श्लेष्मयुक्त वायुमे पीपलके चूर्ण और मधुकेसाथ, प्रमेह प्रभृतिमे दूधकेसाथ देनेसे यह इनतमामको नष्टकर बलवर्ण और अग्निको पैदाकरताहै । खांसी और कफको दूरकर सबरोगोंको नष्टकरताहुआ आयु और पुष्टिको बढ़ाताहै और अत्यन्त वृष्यहै । जोरोग हजारों दवाओंके देनेसे शान्त न हुए हों उनकोभी यह दूरकरताहै॥२५८॥

२५९ त्रैलोक्यचिन्तामणिरसः (तृतीयः)

रसभस्मत्रयोभागा द्विभागश्च भुजङ्गमम् ।
कालकूटश्च पङ्भागं भागिकं तालकन्तथा ॥
गोदन्तं गगनं तुत्थं शिलागन्धकटङ्कणम् ।
जयपालोन्मत्तदन्त्यः करवीरश्च लाङ्गली ॥
पलाशमूलजं नीरैः सप्तधा भावितं दृढम् ।
चित्रमूलकषायेण चार्द्रकस्य च वारिणा ॥
मात्स्यमाहिषमायूरच्छागवाराहडौण्डुभैः ।
मायुभिर्दशधा मर्द्य शिलाखल्वे च संक्षयात् ॥
धान्यद्वयां वटीं कुर्याच्छुद्धभाण्डे च धारयेत् ।
दातव्यश्चाऽनुपानेन नारिकेलोदकेन च ॥
ताम्बूलञ्च ततो दद्याद्रक्ष्यं शीतोपचारकम् ।
तिलतैलैः सदास्नानं घृतमत्स्यादि भोजनम् ॥
शीताम्लदधिसंयुक्तं पुराणान्नञ्च भक्षयेत् ।

भै. र., र. सु., ज्वराधिकारे ।

भाषा—पारदभस्म ३ भाग, नागभस्म २ भाग, शुद्धबछनाग ५ भाग, हरितालभस्म १ भाग, गोदन्ती हरिताल, अभ्रकभस्म, तुत्थ, मैनसिल, गन्धक और सुहागा येसब यथासम्भव विशुद्ध और मारेहुए १-१ भाग लेकर सबको इकट्ठे मिलाय जमालगोटा, धतूरा, दन्ती, सफेदकनेर, करिहारी, पलाशकी जड़ इनके यथासम्भव स्वरस अथवा क्वाथोंसे ७-७ भावनाएं देकर चित्रकमूलक्वाथ, अदरखकारस, मछली भैंसा, मोर, बकरा, वराह, दुमुहींसांप इनके पित्त,

इनप्रत्येकमे १०–१० रोज मर्दनकर २–२ चावल भरकी गोलियां बनाकर छायाशुष्ककर शीशीमे रखछोड़े। इनमेसे १–१ गोली नारियलके पानीके साथ देकर पानका बीड़ा खिलाना चाहिए। गर्मी, मालूम होतो ठंढीचीजें खिलावे। तिलकेतैलकी मालिशकर स्नानकरे। घी, मछली, खट्टीदही, पुराने चावल ये यथायोग्य खानेको देवे ॥ २५९ ॥

२६० त्रैलोक्यचिन्तामणिरसः (चतुर्थः)

सूताऽभ्रस्वर्णताराऽरुणभिदुरशिला
ताप्यगन्धप्रवाला-
ऽयोमुक्ताशङ्खतालं वरमिदमनल–
क्वाथतः सप्तभाव्यम्।
निर्गुण्डीसूरणाऽम्भःपविरविपयसा
त्रिः पृथग्भावयित्वा,
तेनाऽऽपूर्या वराटा अथ मिहिरपय–
ष्टङ्कणाऽऽलिप्तवक्त्रान् ॥ १०९६ ॥
कृत्वा भाण्डे च रुद्ध्वा गजपुटजठरे
युक्तितस्तांस्तु पक्त्वो–
द्धृत्यैतान्मर्दयित्वा तदखिलतुलितं
सूतभस्माऽत्र दद्यात्।
वैक्रान्तं सूततुर्यांशकमथ मिलितं
सप्तशः शिग्रुमूल–
त्वङ्नीरै श्चित्रमूलोद्भवसलिलकृता
भावनास्त्वेकनेत्राः ॥ १०५७ ॥
आर्द्रैर्जम्बीरनीरैः पृथगथ
विजयालुङ्गतोयैश्च सप्त-
भाव्यं शुष्कञ्च कृत्वाऽप्यथसकलचतु–
र्थांशकं टङ्कणञ्च।
टङ्कात्पादं विषं तत्समरिचमथो
नागरं देवपुष्पं,
पथ्याजातीफलाख्यं पृथगथ मिलितं
पादभागं विषस्य ॥ १०९८ ॥
पश्चाल्लुङ्गाऽऽर्द्रनीरैरपि मृगमदै
र्भावयेत्तच्च सर्वं,
गोलं कृत्वा सुलग्ने विधिवदथभजे-
द्राजयोग्यो रसेन्द्रः।
एष त्रैलोक्यचिन्तामणि रखिलगद-
ध्वान्तविध्वंसहंस–
स्तत्तद्रोगानुपानादुपसि कवलितः
सार्धवल्लप्रमाणः ॥ १०९९ ॥
वातव्याध्याऽऽमवातज्वरजठरकृमि
श्वासशूलाऽस्रवाता-,
ऽसृक्पित्तक्षैण्यकासक्षयकफजगदो–
रःक्षताजीर्ण मेहे।
कुष्ठातीसारपाण्डुग्रहणिमुखमुखो-
ग्रव्रणार्शः प्रकष्टे,
खाञ्ज्येखञ्जाढ्यवातश्रुतिसकलगदे
सर्वथैष प्रशस्तः ॥ ११०० ॥

वृ. यो. त., र. मु., रसायन सं., वै. चि. (ल.), र. चं., र. सु., भै. र., नि. र., र. रा., र. प., यो. र., र. क. यो., वै. चि., वै. वि., बा., क्षयाऽधिकारे।

भाषा—पारा, अभ्रक, सुवर्ण, रजत, ताम्र, हीरा, मैनसिल, सोनामाखी, गन्धक, प्रवाल, लोह, मोती, शङ्ख, हरिताल येसब यथासम्भव शुद्ध और मारेहुए समभागलेकर चित्रकके क्वाथसे सातरोज मर्दनकर निर्गुण्डीकन्द अथवा संभालूकेपत्ते, सूरण, थूहर, आक इनप्रत्येकसे ३–३ रोज मर्दनकर इसकल्कको पीलीकौड़ियोंमे भरकर आकके दूधमे सुहागेको पीसकर कौड़ियोंका अच्छीतरह मुंहबन्दकर मिट्टीका मजबूत नया वर्तन लेकर भीतर चूना पोत सुखाकर उसकेभीतर इनकौड़ियोंको रख शरावसे ढकर आकके दूधमे पिसेहुए सुहागेसे मुंहबन्दकर ६–७ कपड़मिट्टीदेकर सुखाकर गजपुटकी आंचदे। स्वाङ्गशीतलहोनेपर निकालकर इसकी बराबर पारदभस्म और पारेसे आधीवैक्रान्तभस्म मिलाकर सहिजनकी जड़ और चित्रकमूलके अष्ट स्वरससे इक्कीस २१ भावनाएं देकर अदरख जंभीरी, भांग, बिजोरा इन प्रत्येकके स्वरससे ७–७ भाव-

नाएं देकर सुखाकर इससमस्तका चतुर्थांश शुद्ध सुहागा, सुहागेका चतुर्थांश शुद्धवछनाग, मरिच, सोंठ, लौंग, हर्रे और जायफल मिलावे। फिर इस-समस्तसे चतुर्थांश शुद्धवछनाग मिलाकर विजोरा, अदरख, इनकी १-१ भावना और कस्तूरीकी १ भावनादेकर साढेचार रत्तीकी गोलियें बनाकर छाया-शुष्ककर रखछोड़े। इनमेसे १-१ गोली तत्तद्रोग-हरानुपानकेसाथ प्रातःकालदेनेसे समस्त वातरोग, आमवात, ज्वर, मन्दाग्नि, कृमि, श्वास, शूल, वातरक्त, रक्तपित्त, क्षीणता, कास, क्षय, कफरोग, उरःक्षत, अजीर्ण, प्रमेह कुष्ठ, अतिसार, पाण्डु, ग्रहणी, मुखरोग, ओष्ठरोग, बवासीर, खञ्जता, उरु-स्तम्भ, कान, मस्तक प्रभृतिके समस्तरोग नष्टहोतेहैं॥

२६१ त्रैलोक्यचूडामणिरसः

सूतं सुगन्धं दरदेन तुल्यं
विमर्दयेदम्लजलैर्दिनैकम्।
निर्गुण्डिकाभृङ्गकृशानुहिङ्गु-
कोरण्टतोयेन दिनत्रयञ्च ॥ ११०१ ॥
सूतेन तुल्ये रविसम्पुटेऽथ
निक्षिप्य संवेष्टय पुटं ददीत।
गुडूचिकात्र्यूपणजातवारा
विमृद्य यत्नेन पचेत्सकृत्तम् ॥ ११०२
दत्त्वा विपश्चाऽस्य कलाप्रमाणं
गुडूचिका शुण्ठिकृशानुतोयैः।
त्रैलोक्यचूडामणिरेष सूतः
कणाऽऽर्द्रकेणाऽस्य ददीत वल्लम्११०३
अष्टाऽवशेषं त्वमृतासुशुण्ठी-
कषायकश्चाऽनु नियोजयेत।
दिनान्तकाले च ददीत पथ्यं
घृतभदिकश्चाऽत्र विवर्जयेत ॥११०४॥
वातज्वरे भोजनपूर्वकाले
जातेऽप्ययं तत्र विधिर्नियोज्यः।
विरेकशोषाऽऽस्यकटुत्वतीव्र-
तापप्रलापभ्रममूर्च्छितानि ॥ ११०५॥
एतानि पित्तज्वरलक्षणानि
पूर्वोक्तसूतं मधुपिप्पलीभिः।
गुडूचिकानीरकणैस्तुयद्वा
भूनिम्बयूषं तमनुप्रदद्यात् ॥
यद्वाऽमृतापर्पटनागरोत्थं
गुडूचिकाशुण्ठिसुधान्यजं वा।
नीरं सुशीतं क्वथितं ददीत
मुद्राऽम्भसा भक्तमिहाऽऽज्यवर्ज्यम् ॥
सुतीव्रतापे तु रसं नियोज्य
नीरं क्षिपेच्छीतमुपैति यावत्।
पित्तज्वरः शान्तिमुपैतितेन
दिनत्रयेणाऽपि नवोऽपि तीव्रः ॥
र. रा., ज्वरे।

भाषा—शुद्धपारा, गन्धक, शिंगरिफ, येसव समभागलेकर जंभीरीवगैरहके रससे एकरोज मर्दनकर निर्गुण्डीकन्द अथवा सेभाळूके पत्ते, भंगरा, चित्रक, हींग, कटसरैया इनप्रत्येकके रसोंसे ३-३ रोज मर्दनकर पारेकी बराबर तांबेकी चद्दरमें लपेटकर शरावसम्पुटमें बन्दकर ३-४ कपड़मिट्टिदेकर सुखा-कर भस्म, लवण अथवा वालुकायन्त्रमें ४ पहरकी कड़ी आंचदेकर स्वाङ्गशीतलहोनेपर निकालकर गिलोय, त्रिकटुकाक्वाथ, थूहरऔर आककादूध इनमें १-१ रोज मर्दनकर टिकिया बनाय सुखाकर शरावसम्पुटमे बन्दकर २ सेरकण्डोंकी आंचदे। स्वाङ्गशीतलहोनेपर निकालकर सोलहवां हिस्सा शुद्धवछनाग मिलाकर गिलोय, सोंठ और चित्रक इनके अङ्गस्वरस अथवा क्वाथोंसे १-१ रोज मर्दनकर रखछोड़े। यह **त्रैलोक्यचूडामणि** रस तैयार हुआ। इसमेसे ३-३ रत्ती पीपल और अदरखके रसके साथदेकर गिलोय और सोंठ १-१ तोले लेकर अष्टगुणितपानीमें काढाबनाय अष्टाऽव-शेष रहनेपर पिलावे। और दिनभर कुछ खानेको नदे। सन्ध्याकालमे घीरहित उचितपथ्य देवे। वातज्वरमे सुबहके भोजनका समय होगयाहो

तोभी भोजन न देकर इसदवाका प्रयोगकरे । विरेचन, शोप, मुंहका कड़वापन, ज्वरका अत्यन्तवेग, प्रलाप, भ्रम और मूर्च्छा ये जिसरोगमें हों उसे पित्तज्वर समझकर इसरसको मधु और पीपलकेसाथ अथवा गिलोय और जलपीपलकेसाथ देकर चिरायतेका क्वाथ अथवा गिलोय और पित्तपापड़ेका क्वाथ अथवा गिलोय, सोंठ और धनियेकाक्वाथ इनमेंसे किसी एकको पिलावे । ठंढा कियाहुआ गरमपानी पीनेको दे । मूंगके पानीके साथ विना घीका भातदे । अत्यन्त दाहमें इसरसको देकर ऊपर ठंढेपानीकी धारा ठंढलगनेतकदे । इस तरह तीनरोजमें पित्तज्वर और नवज्वर शान्तहो जातेहैं ॥ २६१ ॥

२६२ त्रैलोक्यडम्बररसः (प्रथमः)

रसगन्धकताम्राणि लोहमभ्रं विषं तथा ।
टङ्कणं स्वर्जिकाक्षारं दरदञ्च कपर्दिकाम् ॥
अर्कक्षीरेण खल्वे च वज्रीक्षीरेण भावयेत् ।
निर्गुण्डीभृङ्गराजेन चाऽऽर्द्रद्रावेण भावयेत् ॥
गुल्मे जलोदरे रोगे शोथे पाण्डौ क्षये तथा ।
शूले विसूचिकायाञ्च ह्यनुपानैः प्रयोजयेत् ॥
त्रैलोक्यडम्बरो नाम कथितो रोगशान्तये ।
वल्लमात्रप्रमाणेन त्रिःसप्ताहं प्रदापयेत् ॥

वै. क., नि. र., चि. सा., रसायनसं., वै. चि., उदराऽधिकारे ।

भाषा—शुद्धपारा और गन्धक, ताम्र-लोह-अभ्रकभस्म, शुद्धबछनाग, भुनासुहागा, सज्जी, शुद्धसिंगरिफ, कौड़ीभस्म, सबसमभागलेकर आक और थूहरके दूध तथा संभालु, भंगरा और अदरख इन प्रत्येकके स्वरसमें एकएकरोज मर्दनकर ३—३ रत्तीकी गोलिये बनाकर रखछोड़े । इनमेसे १—१ गोली तत्तद्रोगहरानुपानकेसाथ देनेसे गुल्म, जलोदर, शोथ, पाण्डु, क्षय, शूल, हैजा इनसबको यह २१ रोजमें नष्टकरताहै ।

२६३ त्रैलोक्यडम्बररसः (द्वितीयः)

द्वौ भागौ शिवबीजस्य गन्धकस्य चतुष्टयम् ।
अभ्रवह्निविडङ्गानां गुडूचीसत्त्वनागयोः ॥

र. सा. ८०

कृष्णजीरकटूनाञ्च लवणक्षारयोरपि ।
प्रत्येकं भागमादाय मर्दयेत्सुरसाद्रवैः ॥
बीजपूररसैर्भूयो मर्दयित्वा विशोषयेत् ।
त्रैलोक्यडम्बरो नाम वातोदरकुलान्तकः ॥
गुञ्जाद्वयं ततश्चाऽस्य ददीत घृतसंयुतम् ।
भोजयेत्स्निग्धमुष्णञ्च पायसञ्च विवर्जयेत् ॥

र. सं., रसायनसं., र. चि., र. च., र. क., र. का., उदराऽधिकारे ।

भाषा—शुद्धपारा २ भाग, शुद्धगन्धक ४ भा., अभ्रकभस्म, चित्रकमूल, विडङ्ग, गुडूचीसत्त्व, नागभस्म, कालीजीरी, त्रिकटु, सेंधानमक, यवक्षार १—१ भागलेकर सबका बारीक चूर्णकर तुलसी और बिजौरेके रससे ७—७ भावनाएं देकर २—२ रत्तीकी गोलियें बनाय सुखाकर रखछोड़े । इनमेंसे १—१ गोली घीकेसाथ देनेसे वातोदरका समूल नाश होताहै । स्निग्ध और उष्णभोजनदे, दूधपाक न दे ।

२६४ त्रैलोक्यडम्बररसः (तृतीयः)

शुद्धगन्धस्य गद्याणा ग्रहीतव्यास्त्रयोदश ।
शुद्धरौप्यस्य वा ग्राह्याः गद्याणाश्च त्रयः खलु ॥
ताम्रपत्रस्य गद्याणा ग्राह्याः पञ्च भिषग्वरैः ।
एकविंशतिगद्याणान्खल्वे कृत्वा दिनाऽष्टकम्
नैम्बुकेन रसेनैव पेषयेच्च निरन्तरम् ।
पिष्ट्वापिष्ट्वा प्रकर्तव्या पिष्टिः सूक्ष्माऽतिसुन्दरा
वस्त्रे बध्वाऽथ तां पिष्टिं स्वेदनीयन्त्रके ततः ।
निम्बूरसाऽऽरनालेन सक्षारेण प्रपूरिते ॥
स्वेद्या दिनाऽष्टकं यावच्छुष्के देयः पुना रसः
ततो बहिर्विनिष्कास्य कुर्याच्चूर्णं हि खल्वके ॥
शुद्धगन्धकगद्याणास्त्रिचत्वारिंशदाहृताः ।
सप्तभिः स्वर्णमाक्षीकैरेकसप्ततिसम्मितैः ॥
सर्वं सार्धञ्च सम्पिष्य चैकरूपं ततो नयेत् ।
त्र्यहं सेहुण्डदुग्धेन रविदुग्धेन च त्र्यहम् ।
काञ्चनारस्य मूलेन सश्रीखण्डेन च त्र्यहम् ।
चित्रकस्य रसेनाऽथ दिनमेकञ्च भावयेत् ॥
दशाहभावितं चूर्णं कुर्याद्रम्यञ्च गोलकम् ।

शरावसम्पुटे क्षिप्त्वा तत्सन्धिं वस्त्रमृत्स्नया ॥
वेष्टयित्वा पुटो देयस्तत्तिर्भिञ्छाणकैर्ध्रुवम् ।
वारम्वारं तोलयित्वा पुटो देयो मुहुर्मुहुः ॥
दह्यते गन्धको यावद्वर्द्धते हेमवच्छाणकैः ॥
शरावसम्पुटे मृत्स्नां वस्त्रयुक्तां ददेत्पुटेत् ॥
अष्टाविंशतिगद्याणाः शेषास्तावत्पुटेच्च तम् ।
पेषितापाश्च निर्गुण्ड्या गुडूच्याश्च रसेन वै ॥
त्रिकटोः पयसा वाऽपि त्रिफलावारिणा तथा।
प्रत्येकेन पृथग्देया भावनाश्चैकविंशतिः ११२९
सर्वाश्चतुरशीतिश्च मिलित्वा भावनाः खलु ।
करवीरस्य पुष्पाणि पुष्पाणि कनकस्य च ॥
तुल्यतुल्यानि सम्मेल्य रविदुग्धेन मर्दयेत् ॥
दातव्या तद्रसेनैका वत्सनाभ वर्षेण च११३१
श्रीखण्डकरसेनैका सप्ताऽशीति समाश्च ताः ।
भावनाःस्युस्ततःखल्वेसम्मर्द्योऽथविचूर्णयेत् ॥
तच्चूर्णं कूप्यके धार्यं रसस्त्रैलोक्यडम्बरः ।
वल्लैकः प्रत्यहंप्रातर्ग्राह्योऽप्यश्वपलान्वितः ॥
सन्निपातेषु सर्वेषु शूलेषु विविधेषु च ।
प्रमेहेषु च सर्वेषु सर्वेषूदररोगिषु ॥ ११३४ ॥
समस्तेष्वपि वातेषु गुल्मयो र्वातरक्तयोः ।
तैलक्षाराऽम्लवर्ज्यश्च भोजनं मधुरं स्मृतम् ॥
मासैकेन समस्ताश्च रोगा नाशं व्रजन्ति हि ॥

रसचि., रसकं., सन्निपाते ।

भाषा—शुद्धगन्धक ६॥ तो., शुद्धचांदी १॥ तो., शुद्धताम्रपत्र २॥ तो. लेकर नीबूकेरससे आठरोजतक लगातार मर्दनकर गोलीबनाय चारतह मलमलके कपडेमें बांधकर नीबूकारस, कांजी, यवक्षार मिलाकर हंडीभरकर उसमें उसको लगातार ८ रोजतक स्वेदनकरे। कांजी वगैरह सूखनेपर दूसरी देताजाय । नवें रोज स्वाङ्गशीतलहोनेपर निकालकर खरलकर शुद्धगन्धक २१॥ तोले, सुवर्णमाक्षिक ३॥ तोले मिलाकर थूहर और आकके दूधसे ३–३ रोज, चन्दनमिलेहुए कचनारकी जड़केरससे ३ रोज, त्रिचकके रससे १ रोज घोटकर गोलाबनाय शरावसम्पुटमें रख ३–४ कपड़मिट्टीदेकर सुखाकर चार जङ्गलीकण्डोंकी आंचदे इसतरह वारम्वार भावनादेकर आंचदेवे । पर यह ख्याल रक्खे कि पुटदेनेसे केवल गन्धकही जले पारद वगैरहको नुकसान न पहुंचे । इसतरह प्रत्येक पुटमें ३॥ तोले स्वर्णमाक्षिक और २१॥ तोले गन्धक तथा तमाम भावनाएं देवे । प्रत्येक पुटके अन्तमें इसका वजनकरे जब १४ तोले वजन आजावे तब सिद्ध हुआ समझे । फिर निर्गुण्डीकन्द अथवा संभालूके पत्ते गिलोय, त्रिकटु, त्रिफला, इनप्रत्येकके यथासम्भव अङ्गस्वरस अथवा कार्योंसे २१–२१ भावनाएं देकर सफेद कनेर और धतूरेके फूल येप्रत्येक १४–१४ तोले मिलाकर आकके दूधसे १ रोज मर्दनकर शुद्धबछनागके क्राथसे एकरोज, चन्दनकल्कसे एक रोज, भावनादेकर ३–३ रत्तीकी गोलियें बनाय छायाशुष्ककर शीशीमें रखछोडे । इनमेंसे १–१ गोली प्रातःकालमें पीपलकेसाथ देनेसे समस्त सन्निपात, नानातरहके शूल, समस्तप्रमेह और उदररोग तमाम वातव्याधि, गुल्म, वातरक्त इनसबको एक महीनेमें यह नष्ट करता है । तैल, क्षार और अम्ल को छोड़कर मधुर भोजनदे ॥ २६४ ॥

२६५ त्रैलोक्यडम्बररसः (चतुर्थः)

भास्करक्षीरजम्बीररसैः शुल्वस्य पिष्टिकाम् ।
कृत्वाऽथ पातयेत्प्राग्वद्दशधा पारदेश्वरम् ॥
मुखमुत्पादयेत्ताभ्यां चूलिकालवणैः सह ।
यन्त्रे सोमाऽनले बीजं जारयेत्स्वरभागतः ॥
बलिश्च षोडशगुणं जारयेद्भावितश्च तैः ।
पादेन गन्धकं दत्त्वा पयसा मर्दयेद्द्रवैः ११३८
दिनानि सप्त यत्नेन दिवानक्तमतन्द्रितः ।
कृष्णधत्तूरकरसैस्तद्वत्तिलदलारसैः ॥११३९॥
सूतकल्कश्च तद्यन्त्रे रुद्ध्वा सोमाऽनले ततः ।
दिनानि सप्त तं सूतं भस्मीभूतं समुद्धरेत् ॥
पलद्वयश्च सूतेन्द्राद्भस्मीभूतं समाहरेत् ।
दैत्येन्द्रं द्विगुणं तस्य विशुद्धं तत्र निःक्षिपेत् ॥

मृताऽभ्रं पलमेकं स्यात्त्रीण्येकत्रविमर्दयेत् ।
सुरसासलिलैस्त्रीणि दिनानि तदनन्तरम् ॥
वह्निमूलत्वचः कृष्णजीरकं त्रिकटुं पटु ।
कृमिशत्रुं गुडूचीजं सत्त्वं क्षारत्रयं तथा११४३
मृतनागमिदं सर्वं प्रत्येकं पलमाहरेत् ।
सम्यग्विचूर्ण्य तत्सर्वं सूतकल्के विनिःक्षिपेत्॥
पुनश्च सुरसानीरैः स्त्रिदिनं मर्दयेद्बुधः ।
फलपूररसैः पश्चात् षड्दिनानि प्रमर्दयेत् ॥
छायायां शोषयेत्कृत्वा रसस्य वटिकास्ततः ।
गुञ्जाचतुष्टयमितास्त्रिगुञ्जामानकाश्च वा११४६
वातोदरविनिर्भेत्ता नाम्ना त्रैलोक्यडम्बरः ।
घृतेन संयुतं दद्याद्रसेन्द्रं चाऽर्जुनीशृता११४७
पथ्यं देयं सदैवोष्णं सुस्निग्धं गोघृतेन वै ।
पायसं वर्जयेच्छश्वद्यावद्रोगनिवर्तनम् ११४८

रसालं., उदररोगे ।

भाषा—शुद्धतांबेकाचूर्ण और शुद्धपारा समभाग मिलाकर आकके दूध और जंभीरीके रससे १–१ रोज मर्दनकर सुखाकर डमरूयन्त्रमें बन्दकर ४ पहरकी अग्निदेकर उड़ावे । स्वाङ्गशीतल होनेपर पारेको निकालकर डमरूयन्त्रमे नीचे रहेहुए तांबेको मिलाकर पहिलेकीतरह घोटकर उड़ावे । इसतरह दसबार ऊर्ध्वपातनकर इसका चतुर्थांश नोसादर देकर आकके दूध और जंभीरीके रससे मर्दनकर ऊर्ध्वपातनकरे तो इसमे मुख उत्पन्न होजायगा । इसके बाद सोलहवां हिस्सा बीजसंस्कार दियाहुआ ताम्रदेकर त्रिडोंसे जंभारीके रसके साथ मर्दनकर काञ्जीमें ४ रोज स्वेदनकर ऊर्ध्वपातनकरे । नीचे बचे हुए सुवर्णको फिरसे मिलाकर मर्दनकर ऊर्ध्वपातनकरे । जबतक सुवर्णबीजका ग्रास न होजाय तबतक इसीतरह स्वेदन, मर्दन और ऊर्ध्वपातन करताजाय । इसके बाद १६ गुना गन्धक देकर जारणकरे । इकट्ठा सोलहगुना गन्धक जारण न होसके तो बराबरका गन्धक १६ वार जारणकरे फिर पारेसे चतुर्थांश गन्धक और नोसादर मिलाकर कालाधतूरा और हुरहुर इनप्रत्येकके रसोंसे ७-७ रोज मर्दनकर सुखाकर डमरूयन्त्रमे बन्दकर ७ रोज लगातार अग्नि देनेसे इसका भस्म होजायगा । स्वाङ्गशीतल होनेपर निकालकर इसमेंसे भस्म २ पल, शुद्धगन्धक ४ पल, अभ्रकभस्म १ पल, तीनोंको इकट्ठेकर तुलसीके रससे ३ रोज मर्दनकर चित्रकमूलकीछाल, कालीजीरी, त्रिकटु, सेंधानमक, विडङ्ग, गिलोयकासत्त्व, सज्जी, सुहागा, यवक्षार, कस्तूरी ये सब १–१ पललेकर बारीकचूर्णकर पूर्वकल्कमें मिलाय फिर तुलसीके रससे ३ रोज, बिजौरेकेरससे ६ रोज मर्दनकर ३ या ४ रत्तीकी गोलियें बनाकर छायाशुष्ककर शीशीमें रखछोड़े । इनमेंसे १–१ गोली नागार्जुनीमें सिद्धकियेहुए घीके साथ देनेसे वातोदरको यह जड़से नष्ट करदेताहै । इसमें पथ्य स्निग्ध और गरम गायकेघीके साथदे, जबतक-रोगनिवृत्त न हो तबतक खीर न दे ॥ २६५ ॥

२६६ त्रैलोक्यतिलकरसः

शुक्लकृष्णाऽभ्रजं सत्त्वं शोधितं काचटङ्कणम् ।
घर्षणेन रजः कृत्वा भर्जयित्वा घृतेन तत् ॥
अष्टांशमस्यकोपेतं पुटेद्वारत्रयं ततः ।
त्रिवारं नृपवर्तेन लुङ्गस्वरसयोगिना ॥ ११५०
चतुर्वारञ्च वर्षाभूवासामत्स्याक्षिकारसैः ।
गुग्गुलुत्रिफलाक्वाथैस्त्रिशद्वाराणि यत्नतः ॥
तुल्यांशरसगन्धोत्थकज्जल्याऽष्टांशभागया ।
पुटेत्पश्चाशतं वारान् मर्दयेच्च पुटेपुटे ॥
शोधितं रेतितं कान्तं सत्त्वञ्च घृतभर्जितम् ।
पुटेदष्टांशदरदैः संयुतं लकुचाऽम्बुना ॥
दशवारं तथा सम्यक् तारं शुद्धं मनोह्वया ।
तथा त्रिंशतिवाराणि बलिना मीनदग्रसैः ॥
दशवाराणि ताप्येन कृष्णगोघृतयोगिना ।
उभयं समभागं तत्पुटेन्निर्गुण्डिकारसैः ११५५
रसगन्धोत्थकज्जल्या दशवारं पुटेत्पुनः ।
तस्मिन्नष्टांशभागेन क्षिपेद्वैक्रान्तभस्मकम् ॥
राजावर्तं कलांशेन समभागेन पर्पटी ।

तत्सर्वं परिमर्द्याऽथ भावयित्वाऽऽर्द्रकाम्बुना ॥
गुडूच्याः स्वरसेनाऽपि भूकदम्बरसेन वा ।
भृङ्गराजरसेनाऽपि चित्रमूलरसेन च ॥
व्योषगञ्जाकिनीकन्दै भूयोऽप्याऽऽर्द्रद्रवेण च ।
पटचूर्णमतः कृत्वा क्षिपेत्क्षुद्रकरण्डके ॥
त्रैलोक्यतिलकः सोऽयं ख्यातः सर्वरसोत्तमः
सर्वव्याधिहरः श्रीमाञ्छम्भुना परिकीर्तितः ॥
उदावर्तञ्च विड्बन्धं व्यथाञ्च जठरोद्भवाम् ।
लोहलं मन्दबुद्धित्वं शूलित्वमपि वन्ध्यताम् ॥
सूतिरोगानशेषांश्च शूलं नानाविधं तथा ।
परिणामाऽऽख्यशूलञ्च तथा भिन्द्यात्समुत्कटम्
रक्तगुल्मञ्च नारीणां रजःशूलञ्च दुःसहम् ।
अनुपानञ्च पथ्यञ्च तत्तद्रोगानुरूपतः ११६३

र. र. स., र. सु., र. कौ., अर्शोरोगे ।

भाषा—सफेद और काले अभ्रकका शुद्धकिया-हुआसत्त्व, काचका बारीकरेता, भुनासुहागा, सब समभागलेकर घीमे सेककर अष्टमांश तुत्थ डालकर शरावसम्पुटमें बन्दकर दोसेर जङ्गलीकण्डोकी आंचदे । इसतरह तीनबार करे । फिर अमिलतासकी जड़की छालके रससे घोटघोटकर ३, बिजौरेकेरससे ४, इटसिट, अडूस, मछेछी, गुग्गुलु, त्रिफला, इनके क्वाथोंसे ६–६ भावनाएं देकर इससे अष्टमांश तुल्यपारेगन्धककी कज्जली मिलाकर घीकी एक और उपरोक्त सात चीजोंकी ७–७ भावनाएं दे । और प्रत्येकभावनाके पीछे २–३ सेर कण्डोंकी आंचदे । ऐसे ५० बार मर्दनकर पुटदेवे । कज्जलीका योग प्रत्येकपुटमे करता जाय। इसकेबाद शुद्धकान्तलोहके रेतेहुये सत्त्वको घीमे सेककर उसमे आठवां हिस्सा शिंगरिफ डालकर बड़हलकेरससे घोटकर टिकिया बनाय सुखाकर शरावसम्पुटमेंबन्दकर दोसेर कण्डोंकी आंचदे। इसप्रकार शिंगरिफका योगकर मर्दनकरके१० पुटदे । फिर शुद्धचांदीकेरेतेमें शुद्धमैनसिल आठवां हिस्सा देकर लकुचकेपानीसे मर्दनकर पूर्ववत् दस आंचें दे। इसकेबाद गन्धक आठवांहिस्सादेकर मछेछीकेरससे मर्दनकर सुखाकर बीसपुटदे । इसके बाद आठवां-हिस्सा सोनामाखीदेकर काकीमायकेबीकेसाथ मर्दनकर दसपुटदे । प्रक्षेपवस्तु प्रत्येकपुटमें देताजाय । फिर सिद्ध कान्तसत्त्व और रजतको पूर्वरसकी बराबर २ इकट्ठे मिलाकर निर्गुण्डीकन्द अथवा संभाळूके पत्तोंके रससे मर्दनकर पूर्ववत् १० पुटदे, पर इन प्रत्येक पुटोंमें सममागपारदगन्धककी कज्जली आठवाँ हिस्सा मिलाताजाय । इसके बाद इन दोनोंसे अष्टांश वैक्रान्तभस्म, षोडशांश वाजवर्दभस्म और इनसबकी बराबर रसपर्पटी और पूर्वोक्तरसमिलाकर अदरख, गिलोय, गोरखमुण्डी, भंगरा, चित्रकमूल, त्रिकटु, सूरण, अदरख इन प्रत्येकके रसोंसे १–१ भावना देकर १–१ रत्तीकी गोलियें बनाकर छायाशुष्ककर रखछोड़े अथवा कपड़छान चूर्णही रहनेदे । इनमेंसे १–१ गोली तत्तद्रोगहरानुपानके साथ देनेसे उदावर्त, विबन्ध, उदरकीपीडा, तुतला-पन, मन्दबुद्धित्व, शूल, बन्ध्यात्व, समस्त सूतिकारोग, तमामशूल, परिणामशूल, रक्तगुल्म, दुःसह रजःशूल, इनसबको यह दूरकरताहै ॥ २६६ ॥

२६७ त्रैलोक्यनाथरसः

पलानि चत्वारि रसस्य पञ्च
गन्धस्य सत्वस्य गुडूचिकायाः ।
व्योषस्य चूर्णस्य च तालमूल्याः
सशाल्मलस्यापि पलत्रयं स्यात् ११६४
पृथक्पृथक् षड् गगनस्य चाऽष्टौ
लोहस्य सर्वं त्रिफलाजलेन ।
घृष्टं चतुःपष्टिमितं तदधः
स्युर्भावना मार्कवजद्रवस्य ॥११६५॥
शिग्रुत्थनीरेण च षोडशाऽथ
तथाऽनलोत्था गृहकन्यकायाः ।
आर्द्रद्रवस्येति रसोऽयमुक्तः
पाण्डुक्षयश्वासगदान्निहन्ति ॥११६६॥
क्षौद्रेण वा शर्करया घृतेन
निष्कार्धमेतस्य भजेत्प्रयत्नात् ।

रसेन सार्धं यवचिञ्चिकायाः
शोफाऽधिके वा जयपालमिश्रः११६७
वज्रीघृतेनाऽपि समस्तमथा-
न्मृगाङ्कघृतप्रतिपादितं यत् ।
त्रैलोक्यनाथप्रकटीकृतोऽयं
नरेन्द्रयोगीन्द्रमतादनर्घ्यः ॥११६८॥

रसायनसं., यो. र., र. र. दी., र. कौ., र. च., चि. क., भै. सा., नि. र., वृ. यो. त., र. (सा.), र. मृ., र. का., वै. नि., र. क. ल., ध. रा., र. क. यो., पाण्डुरोगे । ध. रा. र. क. यो., मुसलीत्रिफलात्रिकटुशाल्मली गुडूची-सत्वानां पञ्चभागाः नाम च त्रैलोक्यसुन्दरेति ।

भाषा—शुद्धपारा ४ पल, शुद्धगन्धक ५ पल; गिलोयसत्व, त्रिकुटु, मुसली, मोचरस, येप्रलेफ ३–३ पल, अभ्रकभस्म ६ पल, लोहभस्म ८ पललेकर सबको इकट्ठेकर त्रिफलाके क्वाथसे ६४, भंगरेके रससे ३२, सहिजन, चित्रक, घीकुंआर और अदरख इनके स्वरसोंसे १६–१६ भावनाएं देकर एकमाशेसे आरम्भकर २ माशेतककी मात्रा मधु, शक्कर अथवा घी इनकेसाथ देनेसे पाण्डु, क्षय और श्वास इनको यह दूरकरताहै । अथवा यवचिञ्चिका (तितली)के रससे देवे । शोफ अधिकहोतो शुद्धज-मालगोटेके साथदे, अथवा थूहरके दूधमें पकायेहुए-घीके साथ देवे । अन्य पथ्य सब मृगाङ्ककी तरह देवे

२६८ त्रैलोक्यमोहनरसः

शुद्धसूतस्तथागन्धो वङ्गभस्म शिलाजतु ।
मौक्तिकञ्च समं सर्वं शुष्कमादौ विमर्दयेत् ॥
पाषाणभेदक्वाथेन कुमारीस्वरसेन च ।
मूर्वागुडूचीत्रिफलाकषायेण पृथक्पृथक्
दिनानि पञ्च सम्मर्द्य घर्मे संशोषयेत्ततः ।
काचकूप्यां विनिःक्षिप्य मुखं तस्या विमुद्रयेत्
माषान्नविषचूर्णानां कल्केन भिषगुत्तमः ।
संस्थाप्य वालुकायन्त्रे चतुर्यामं विपाचयेत् ॥
चोपचीनीयचूर्णेन माषमानेन योजितः ।
त्रैलोक्यमोहनो नाम्ना गुञ्जामात्रो रसोत्तमः
पर्णखण्डेन दातव्यः प्रमेहमथनः परः ११७३

र. सु., र. प्र., प्रमेहे ।

भाषा—शुद्धपारा और गन्धक, वङ्गभस्म, शिलाजीत, मोती, सब समभागलेकर १–२ पहर सूखे खरलकर पाषाणभेद, घीकुंवार, मूर्वा, गिलोय, त्रिफला इनके स्वरस अथवा क्वाथोंसे ५–५ रोज मर्दनकर धूपमें सुखाकर ६–७ कपड़मिट्टी दीहुई काचकी शीशीमें भरके उड़द, वच्छनाग और चूनेसे मुंह बन्दकर वालुकायन्त्रमें रख चारपहरकी आंचदे-कर स्वाङ्गशीतल होनेपर निकालकर इसमेंसे १–१रत्ती लेकर १ माशा चोपचीनीके चूर्ण अथवा पानके-साथ देनेसे यह तमाम प्रमेहोंको नष्टकरताहै २६८॥

२६९ त्रैलोक्यविजयरसः

अष्टकद्वयषट्पट्कुञ्जरगणितलवा-
न्भूरसाऽश्मोषणानां,
तिन्दोष्टङ्कस्य भागांस्तनुतरमृदितान्
खल्वके वासरैककम् ।
वर्षाभूभृङ्गगुञ्जाऽऽर्द्रकजनितरसै
र्दीप्यकेनाऽपि भाव्यं,
प्रत्येकं त्रिस्त्रिवारं तरणि-दलवृतं
स्वेदयेद्धाणशस्तम् ॥ ११७४
खल्वे चूर्णीकृतोऽथ प्रबलबलगदे
रोगराजे ग्रहण्यां,
शस्तो वल्लैकमात्रः क्षितिधरतनया-
निर्मितः स्वानुपानैः ।
रोगानेकोऽप्यशेषानिव जयतिसदा
क्षत्रियाञ्जामदग्न्यः,
सोऽयं विख्यातकीर्तिस्त्रिभुवनविजयो
भूर्भुवःस्वःप्रसिद्धः ॥ ११७५ ॥

र. ल., र. श., सर्वरोगे । टि०—अत्र भूशब्देन रस-साहचर्याद्गन्धकोग्राह्यः । गुणगुणिनोस्समवायाद्गन्धवतीपृ-थ्वीति गन्धस्य पृथ्वीगुणत्वात्तद्वाचकधात्वन्तराऽभावाच्च ।

भाषा—गन्धक ८ भाग, पारा १ भा., कान्त-पाषाणभस्म अथवा शुद्ध सोमल २ भा., मरिच

८ भा., शुद्धचुचिला ६ भा., भुनासुहागा ८ भा., लेकर सबकी एकरोज कज्जलीकर इटसिट, भंगरा, गुञ्जाकेपत्ते, अदरख, अजवाइन इनके रस अथवा क्वाथोंसे ३–३ रोज मर्दनकर गोलावनाय आकके-पकेहुए पत्तोंमे लपेटकर एकवितस्तभरके गढ्ढेमे रखकर ऊपर अभ्रकके पटलसे अथवा ढकनसे खड्डेका मुंह-बन्दकर २ सेर जङ्गलीकण्डोंकी आंचदेकर स्वेदनकरे। स्वाङ्गशीतल होनेपर निकालकर पूर्वोक्तरसोंसे मर्दनकर पुटदे । ऐसे ५ वार स्वेदनकरनेके वाद ३–३ रत्तीकी गोलियें बनाकर रखलेवे । इनमेंसे १–१ गोली तत्तद्रोगहरानुपानकेसाथ देनेसे समस्त उपद्रवयुक्त राजयक्ष्म और सङ्ग्रहणी इनको यह बहुतजल्दी नष्टकरताहै । अन्यरोगाऽनुपानके साथ देनेसे अन्य बहुतसे रोगोंको यह दूरकरताहै २६९

२७० त्रैलोक्यसम्मोहनरसः

मातुलानीं घृते भृष्टां कर्षद्वादशसम्मिताम् ।
घृतादिपकं दरदं रससिन्दूर मभ्रकम् ॥
लवङ्गाऽऽकरभौ शङ्खभस्म कर्षमितं पृथक् ।
गोकण्टवानरीवीजं चन्द्रकर्कटमृङ्गिकाः ॥
पृथक्कर्षद्वयं सर्वं मातुलानीवरीरसैः ।
विभाव्य मुनिवेलं तद्यथाशक्ति निषेवयेत् ॥
वाजीव रमते स्त्रीषु न च शुक्रक्षयं व्रजेत् ।
कासश्वासक्षयाऽर्शांसि नाशयेदतिवेगतः ॥

र. क., वाजीकरणरसायनयोः । टि०—अत्र चन्द्रस्थाने रसकर्पूरश्चेन्नियुज्येत तर्हि वाजीकरणे अद्वितीयोऽयं भविष्यति । परं तदा अत्यद्भुपयोगो न करणीयोऽन्यथा लालास्रावादिभीतिः स्यात् ।

भाषा—माल्कांगन, भिलावे, निम्बमज्जा बीस २० तोले को कूटकर कड़ाहीमें आधाकल्क बिछाकर एकएकतोलेकी रूमी शिंगरिफकी डली मलमलके कपड़ेमें बांधकर उसपर रक्खे, ऐसे थोड़ेथोड़े अन्तरपर पांच डलियें रखकर ऊपर बचा हुआ आधाकल्क जमादे । फिर इसकल्ककी बराबर घी और मधु डालकर खुलीहवामें चूल्हेपर मन्द अग्निसे पकावे । यह ध्यान रक्खेकि इसमेंसे उफान खाकर दवा नीचे न गिरे । अखीरमें कड़ाहीमे आग लगजायगी उसवक्त आग्नि लगाना बन्दकरदे । स्वाङ्गशीतल होनेपर शिंगरिफकी डलियोंको निकालले । यह शिंगरिफ, रससिन्दूर, अभ्रकभस्म, लवङ्ग, अकलकरा, शङ्खभस्म ये प्रत्येक १–१ तोला, गोखरू, दूधमे स्वेदनकरके छिल्के निकालेहुए केवांचकेबीज, रसकपूर, काकड़ासींगी ये प्रत्येक २–२ तोले, साफकरके घीमें भूनीहुई भांग १२ तोले, लेकर सबको इकट्ठे खरलकर भांग और शतावरीकाकंद इनके रसोंसे सातसातवार भावनाएं देकर १ माशेसे तीन माशेतककी गोलियें बनाकर रखलेवे । इनमेंस १–१ गोली दूधकेसाथ देनेसे कास, श्वास, क्षय, अर्श और प्रमेह इनसबको यह बहुतशीघ्र नष्टकरता है । रतिसमयसे १ घंटापहिले इसकासेवनकरनेसे यथेष्टस्तम्भनहोताहै । टि०—जब रसकपूर देना होतो इसका रोजसेवन नहीं करना नहींतो मुंह आनेका सम्भव रहताहै । यह योग स्तम्भनके लिये अद्वितीय है ॥ २७० ॥

२७१ त्रैलोक्यसुन्दररसः (प्रथमः)

शुद्धसूतं द्विधा गन्धं ताम्राऽभ्रं सैन्धवं विषम् ।
कृष्णजीरं विडङ्गञ्च गुडूचीसत्त्वचित्रकम् ॥
उग्रगन्धा यवक्षारं प्रत्येकं कर्षमात्रकम् ।
निर्गुण्डिकाद्रवैरग्निवीजपूरद्रवैर्दिनम् ॥११८१
मर्दयेच्छोषयेत्सोऽयं रसस्त्रैलोक्यसुन्दरः ।
गुञ्जाद्वयं घृतैर्लेह्यं वातोदरकुलान्तकम् ११८२
वह्निचूर्णं यवक्षारं प्रत्येकञ्च पलद्वयम् ।
घृतप्रस्थं विपक्तव्यं गोमूत्रैश्च चतुर्गुणैः ॥
घृताऽवशेषं कर्तव्यं कर्षमात्रं पिबेदनु ११८३

र. सं., र. र. स., र. र. का., र. र., र. सु., रसायनसं., चि. र. भ., र. कौ., च. रा., र. चि., ध., र. चं., ना. वि., र. का., र. क. यो., उदराऽधिकारे ।

भाषा—शुद्धपारा १ भा., शुद्धगन्धक २ भा., ताम्रभस्म, अभ्रकभस्म, सेंधानमक, शुद्धबछनाग, काली-

जीरी, विडङ्ग, गुडूचीसत्त्व, चित्रकमूल, वचा, यवक्षार, येप्रत्येक एकतोलालेकर सबका बारीकचूर्णकर पारे-गन्धककी नीलवर्ण कज्जलीमें मिलाकर संभालूके पत्ते, चित्रकमूल, बिजोरा इनके रसोंसे १-१ भावना देकर २ या ३ रत्तीकी गोलियें बनाकर छायामें सुखाकर रखलेवे। इनमेंसे १-१ गोली घीके साथ देनेसे वातोदरका समूल नाशहोताहै। चित्रकमूल, यवक्षार २-२ पल, घी १ सेर, गोमूत्र ४ सेर लेकर एकजगह पकावे। घीमात्र बाकीरहने-पर उतारकर रखछोड़े। इसमेसे एकतोला गोली देनेके बाद पिलावे ॥ २७१ ॥

२७२ त्रैलोक्यसुन्दररसः (द्वितीयः)

रसगन्धकलोहाऽभ्रगुडूचीसत्त्वसूकराः।
त्रिफला शिग्रुमूलानि भृङ्गसारेण भावयेत् ॥
त्रैलोक्यसुन्दरः सोऽयं सघृतक्षौद्रशर्करः।
मृगाङ्कवत्पथ्यभुजः पाण्डुशोपौ नियच्छति ॥
युतः किञ्चिद्घृतक्षौद्रगुडतित्तिरिगुग्गुलैः।
त्रिनेत्रेण युतो योज्यः शोपे तोयाऽनुपानतः॥

र. र. स., र. चं., वै. चि., पाण्डुरोगे।

भाषा— शुद्धपारा और गन्धक, लोहभस्म, अभ्रकभस्म, गिलोयसत्त्व, वाराहीकन्द, येसब समभाग लेकर बारीकचूर्णकर सहिजनकी जड़कीछाल, भँगरा इनके रसोंसे १-१ भावना देकर ३-३ रत्तीकी गोलियें बनाकर रखछोड़े। इनमेसे १गोलीसे ३ गोलीतक घी, शक्कर और मधुकेसाथ अथवा मधु, घी, गुड़, गुग्गुल, १-१ माशा और शुद्धजमालगोटा योग्यतानुसार मिलाकर इसकेसाथ देनेसे पाण्डु और शोपको दूरकरताहै। इसकी १ गोली त्रिनेत्ररस, (रसयोगसागर, त्रिगुणाख्य १) केसाथ मिश्रितकर पानीकेसाथ देनेसे शोप दूरहोताहै। इसमें पथ्य मृगाङ्ककी तरह देना ॥ २७२ ॥

२७३ त्रैलोक्यसुन्दररसः (तृतीयः)

रसगन्धकयोः कर्षौ प्रत्येकं कज्जलीकृतौ।
शक्रश्च मुशली चैव धुस्तूरं केशराजकम् ॥
देवदाली जयन्ती च तथा मण्डूकपर्णिका।
पृथग्गुणमितैः कर्षैः रसैरासां विमर्दयेत् ११८८
माषमात्रां वटीं कृत्वा स्वाऽनुपानैः प्रयोजिता
त्रिदोषजं ज्वरं हन्ति तथा प्रबलकोष्ठकम् ॥
दाहे तु नारिकेलस्य जलं देयं प्रयत्नतः।
त्रैलोक्यसुन्दरो नाम सन्निपातहरोरसः ११९०

र. सं., ज्वराऽधिकारे।

भाषा— शुद्धपारा और गन्धक १-१ तोला-लेकर नीलवर्ण कज्जलीकर कुरैया, मुशली, धतूरा, काला भंगरा, बन्दाल, जैंत, ब्राह्मी इनप्रत्येकके पत्तोंके ३-३ तोलेरससे अलग अलग खरलकर १-१ माशेकी गोलियें बनाकर छायाशुष्ककर रखछोड़े। इनमेसे १-१ गोली समयोचिताऽनुपा-केसाथ देनेसे त्रिदोषजज्वर और प्रबल उदरको यह नष्टकरताहै। इसकेदेनेसे दाह मालूमहो तो नारियल-का जल देना। यह सन्निपातको बहुतशीघ्र दूरकरताहै।

२७४ त्रैलोक्यसुन्दररसः

मानश्चैकं ततः सूतं षडभ्रं वसुलौहकम्।
गन्धकं त्रिफलाव्योषचूर्णं मोचरसस्य च ॥
मुशली चाऽमृतासत्त्वं प्रत्येकं पञ्चभागिकम्।
भावयेत्सर्वमेकत्र त्रिफलानां कषायके ११९२
भावना विंशति र्देया दशरात्रं सुभावनाः।
शिग्रुचित्रकमूलाभ्यामष्टधा च पृथक्पृथक् ॥
त्रैलोक्यसुन्दरो नाम रसो माषमितो हितः।
सितया च समं क्षौद्रैः शोथपाण्डुक्षयौ जयेत्॥
ज्वराऽतिसारमत्युग्रं सर्वोपद्रवसंयुतम् ११९४

र. सं., रो., पाण्डुरोगे। अयं त्रैलोक्यनाथादभिन्नः पाठः द्रव्यप्रमाणे भावनासु च काल्पनिको भेदः कृतोऽस्ति।

भाषा— शुद्धपारा १ भाग, अभ्रकभस्म ६ भा., लोहभस्म ८ भा., शुद्धगन्धक, त्रिफला, त्रिकटु, मोचरस, मुशली, गिलोयसत्त्व, येप्रत्येक ५-५ भाग, लेकर सबका बारीकचूर्णकर गन्धक-पारका नीलवर्ण कज्जलीमे मिलाकर त्रिफलाके काढ़ेसे १० रोजमें २० भावनाएं देकर सहिजन-

कीजड़कीछाल और चित्रकमूलके स्वरससे आठआठ भावनाएं देकर १-१ मासेकी गोलियें बनाकर रखछोड़े । इनमेसे १-१ गोली शक्कर और मधुकेसाथ देनेसे शोथ, पाण्डु, क्षय, औरसभी उपद्रवोंकेसाथ बढ़ाहुआ ज्वराऽतिसार इनको यह नष्टकरताहै

२७५ त्र्यम्बकाऽभ्रम्

अभ्रं मेचकमारितं पलमितं व्याघ्रीबला गोक्षुरं,
कन्यापिप्पलिमूलभृङ्गवृषभाः पत्रं तथा बादरम्
धात्रीरात्रिगुडूचिकाः पृथगतःसत्त्वैःपलांशैर्युतं,
सम्मर्द्याऽतिमनोरमंसुवलिनंकृत्वायदासेवितम्
कल्पोत्थंकफपित्तजंस्वरगतंयश्चत्रिदोषात्मकं-
मत्युच्चैर्वदतोहतं बहुविधं पानीयदोषोद्भवम् ।
कासंश्वासमुरोग्रहंयकृतिजंहिक्कांतृषांकामला-
मर्शांसिग्रहणींज्वरंबहुविधंशोथंक्षयश्चाऽर्बुदम् ॥
हन्ति त्र्यम्बकमभ्रमद्भुततरं वृष्याऽतिवृष्यं परं,
वह्नेर्वृद्धिकरंरसायनवरंसर्वाऽऽमयध्वंसि तत् ॥

भै. र., स्वरभेदे ।

भाषा— निश्चन्द्र अभ्रकभस्म १ पल लेकर वनभांटा, बला, गोखरू, घीकुंआर, पिपलामूल, भंगरा, अड्डूसा, पत्रज, बेर, आंवले, हल्दी, गिलोय, इनप्रत्येकका १-१ पल घन मिलाकर मर्दनकर १-१ मासेकी गोलियें बनाकर रखछोड़े । इनमेसे १-१ गोली समयोचितानुपानकेसाथ खानेसे प्रातःकाल होनेवाला ज्वर, कफपित्तज, जिह्वकसन्निपात,नानातरहका स्वरभङ्ग, खराबपानीसे उत्पन्नहोनेवालाज्वर, कास, श्वास, उरोग्रह, यकृत्, हिक्का, तृषा, कामला, बवासीर, ग्रहणी, शोथ, क्षय, अर्बुद इनसबको यह दूरकर धातुओंको अत्यन्त बढ़ाताहै । और अग्निको दीप्तकर आयुको बढ़ाताहै॥

२७६ त्र्याहिकारिरसः (प्रथमः)

रसकेन समं शङ्खं शिखिग्रीवञ्च पादिकम् ।
गोजिह्वया जयन्त्या च तण्डुलीयैश्च भावयेत् ॥
प्रत्येकं सप्तसप्ताऽथ शुष्कं गुञ्जाचतुष्टयम् ।
जरणेन घृतेनाऽद्यात्त्र्याहिकज्वरशान्तये ॥ ११९८

र. सं., र. सु., र. चं., र. क., व. रा., ज्वराधिकारे।

अमृतं धूर्तबीजञ्च हिङ्गुलञ्च समंसमम् ।
धूर्तपत्ररसेनैव मर्दयेद्याममात्रकम् ॥ १३९२ ॥
मुद्रोपमां वटीं कृत्वा दुग्धेन सह पाययेत् ।
दुग्धेन भोजयेदन्नं वर्जयेल्लवणं जलम् १३९३
शोथं नानाविधं हन्ति पाण्डुरोगं सकामलम् ॥
सेयं दुग्धवटी नाम्ना गोपनीया प्रयत्नतः ॥

भै. र., वै. क., ध., शोथे ।

भाषा—शुद्धबछनाग, धतूरेकेबीज और शिंगरफ समभागलेकर कपड़छानचूर्णकर धतूरेकेपत्तोंकेरससे १ पहरमर्दनकर मूंगबराबर गोलियें बनाकर रखछोड़े । इनमेंसे १—१ गोली खानेकोदे । दूधकेसाथ भोजनदे । लवण और जल बिल्कुल छुड़ादे तो यह (दुग्धवटी) नानाप्रकारकेशोथ, पाण्डु, कामला, इनसबको नष्टकरतीहै ॥ ३१९ ॥

३२० दुग्धवटी (द्वितीया)

गृहीत्वा दरदात्कर्षं तदर्द्धं देवपुष्पकम् ।
फणिफेनं विषं जातीफलं धुस्तूरबीजकम् ।
सम्मर्द्य विजयाद्रावैर्मुद्गमात्रां वटीश्चरेत् ॥
अनुपानं प्रदातव्यं शोथे क्षीरं भिषग्वरैः ।
ग्रहण्यां विजयाक्वाथः पथ्यं दुग्धान्नमेव हि ॥
जलञ्च लवणञ्चापि वर्जनीयं विशेषतः ।
प्रबलायामुदन्यायां सलिलं नारिकेलजम् ॥
पातव्यं वटिका चैषा शोथं हन्ति न संशयः ॥
ग्रहणीमतिसारञ्च ज्वरं जीर्णं निहन्ति च ॥

भै. र., शोथाधिकारे ।

भाषा—शुद्धहिंगरिफ १ तो., लौंग, अफीम, बछनाग, जायफल, धतूरेकेबीज ये प्रत्येक आधा-तोला लेकर पश्चात्‌खलकर भांगकेरसमें घोटकर मूंगबराबर गोलियें बनाकर रखछोड़े । इनमेंसे शोथरोगी देखकर १ या २ गोली दूधकेसाथशोथमें और भांगके काढ़ेसे संग्रहणीमें देवे । पथ्यमें दूधके-साथ अन्नदे । लवण और जल भूलकर न दे । कदाचित् जलबिना न रहसकेतो नारियलका पानी देना चाहिये । इसके सेवनसे भीषणशोथ, ग्रहणी, अतिसार, जीर्णज्वर येसब नष्टहोतेहैं ॥ ३२० ॥

३२१ दुग्धवटी (तृतीया)

अमृतं सूर्यगुञ्जं स्यादहिफेनं तथैव च ।
पञ्चरक्तिकलौहञ्च षष्टिरक्तिकमभ्रकम् ॥
दुग्धै गुञ्जाद्वयमिता वटी कार्या भिषग्विदा ।
दुग्धाऽनुपानं दुग्धेश्च भोजनं सर्वथा हितम् ॥
शोथं नानाविधं हन्ति ग्रहणीं विषमज्वरम् ।
मन्दाऽग्निं पाण्डुरोगञ्च नाम्ना दुग्धवटी परा ॥
वर्जयेल्लवणं वारि व्याधिनिःशेषताऽवधि ॥

भै. र., शोथे ।

भाषा—शुद्धवच्छनाग और अफीम १२–१२ रत्ती, लोहभस्म ५ रत्ती, अभ्रकभस्म ६० रत्ती, लेकर सबको इकट्ठेकर गोदुग्धसे घोटकर २–२ रत्तीकी गोलियें बनाकर रखछोड़े । इनमेंसे १–१ गोली दूधकेसाथदेनेसे और केवलदूध अथवा दूध-भात देकर जलकापरहेज रखनेसे नानाप्रकारका शोथ, संग्रहणी, विषमज्वर, मन्दाऽग्नि, पाण्डुरोग, इनसबको यह नष्टकरती है । जबतक व्याधि निःशेष न हो तबतक जल और लवण न दे ॥ ३२१ ॥

३२२ दृष्टप्रभावः

प्रागुक्तेन विधानेन रसं सम्यग्विशोधितम् ।
आदाय सूतं खल्वे न निक्षिप्याऽथ प्रमर्दयेत् ॥
हंसपाद्यर्कताम्बूलीलाङ्गलीचक्रमुण्डिकाः ।
एषां रसैः सम्मिलितं दिनानि त्रीणि मर्दयेत् ॥
तस्य सूतस्य भागैकं गन्धकं द्विगुणं मतम् ।
कुमारीपत्रनिर्यासैस्त्रिदिनं मर्दयेद् दृढम् ॥
ततोगोलकमापाद्य भाण्डमध्ये निवेशयेत् ।
सूतत्रिगुणताम्रस्य पात्रेणाऽधो मुखेन च ॥
निरुद्ध्य मृत्पङ्कलेपेन पात्रं पूर्येत भस्मना ।
उपरिष्टाच्छरावं तु दत्त्वा सम्यङ्निरोधयेत् ॥
चुल्ल्यामारोपयेत्पश्चादग्निं प्रज्वालयेदधः ।
प्रचण्डं प्रहरांस्त्रींस्तु स्वाङ्गशीतलमुद्धरेत् ॥
तत्सर्वं सूतकं ग्राह्यं सह ताम्रेण भस्मितम् ।
जम्बीरवारिणा घृष्ट्वा रोधयेत्सावसम्पुटे ॥
आरण्यच्छागकं वैद्यः पुटं दद्यात्तु कौक्कुटम् ।
स्वाङ्गशीतलमाकृष्य पुनस्तेनैव मर्दयेत् १४०९
पूर्ववत्पुटनं कृत्वा मर्दयित्वा पुनः पुटेत् ।
त्रिःसप्तवारान् कुर्वीत पुटान्यत्र रसेश्वरे ॥
ततः सूतं समादद्यात्क्षिपेत्पूर्वोक्तभाण्डके ।
ज्वरेऽतिविषमे घोरे जीर्णे वा सान्निपातिके ॥
नवे वा तं प्रयुञ्जीत रसेन्द्रं चन्द्रसंयुतम् ।
गुञ्जामात्रं ददीताऽस्मै ज्वरितायाऽनुपानकम् ॥
भद्रमुस्तापर्पटककाथमष्टाऽवशेषितम् ।
ज्वरो निवर्तते सद्यो ज्वरपीडा च या भवेत् ॥
पथ्यं तस्मै प्रदातव्यं शाल्यन्नं घृतवर्जितम् ।
मुद्गक्वाथेन संयुक्तं दिनाऽन्ते भोजयेल्लघु ॥
एवं दिनत्रयं कार्यं यथेष्टञ्च ततो भजेत् ।
दृष्टप्रभावः सम्प्रोक्तो योगिनीभिरुदाहृतः ॥

मिलत्रिकी मज्जा, अभ्रकभस्म सबसमभाग, मिश्री अथवा शक्कर सबसे दूनी मिलाकर रखछोडे। इसमेसे १-१ तोला दूधमें मिलाकर पीनेसे पित्त-क्षय, रक्तपित्त, पाददाह, रक्तप्रदर, प्रमेह, सोमरोग, पथरी, मूत्राऽऽघात, मूत्रदोष, वातकुण्डलिका, अम्ल-पित्त, अङ्गदाह, धातुगतज्वर, त्रिदोषजरोग, पाण्डुरोग, कामला, खुजली, सिध्मकुष्ठ, विड्विबन्ध, अन्त्रकूजन, वन्ध्यात्वदोष, वार्धक्य इनसबको यह नष्टकरताहै। समस्त धातुओंसे पूर्णकर यथेष्टरतिसुखको देताहै॥

३२७ द्राक्षापाकः

द्राक्षादुग्धसिताः पृथक् परिमिताः
प्रस्थेन सम्पादिताः,
युक्त्या वैद्यवरेण चूर्णितमिदं
देयं पलार्धं पृथक्।
चातुर्जातकटुत्रयं मृगमदं लोहाऽभ्रकं केशरं,
पत्री जातिफलं मृगाङ्करजतं
कस्तूरिकाचन्दनम्॥ १४३६॥
सम्यग्जातरसं प्रभातसमये सेव्यं द्विकर्षोन्मितं,
स्निग्धं शुक्रकरं प्रमेहशमनं
पित्ताऽऽमयध्वंसनम्।
मूत्राऽऽघातविबन्धकृच्छ्रशमनं
रक्ताऽर्तिनेत्रार्तिहृत्,
पादे पाणितले विदाहशमनं
सौख्यप्रदं प्राणिनाम्॥ १४३७॥

रसायनसं., यो. र., प्रमेहे।

भाषा—द्राक्ष, दूध, शाकर येप्रत्येक १ सेर, चातुर्जात (तज, पत्रज, इलायची, नागकेसर), त्रिकटु, कस्तूरी, लोहभस्म, अभ्रकभस्म, केसर, जावित्री, जायफल, मृगाङ्क, रजतभस्म, लताकस्तूरी, चन्दन, इनसबको इकट्ठे मिलाय बहुतमन्द आंचसे चलाताहुआपकावे। जब गोलीबँधनेलायकहोजाय तब उतारकर रखछोडे। सातरोजकेबाद इसमेंसे २ तोले दूधवगैरहकेसाथ लेवे। जीर्णहोनेपर भोजनकरे। इससे प्रमेह, पित्तरोग, विबन्ध, मूत्रकृच्छ्र, रक्त-विकार, नेत्ररोग, हाथपैरोंकादाह ये सब नष्टहोतेहैं॥ ३२७॥

३२८ द्रुतिसाररसः

युक्तं हि व्योमद्रुत्या तुल्यांशबलिना रसम्।
लक्ष्मणारसतः पिष्ट्वा मल्लसम्पुटके क्षिपेत्॥
वस्त्रमृत्तिकयाऽऽलिप्य शतं वारान् पुटेत्ततः।
सम्यङ् निष्पिष्यसङ्क्षाल्य करण्डे तं विनिःक्षिपेत्
इत्युक्तो द्रुतिसारनामकरसो वन्ध्यामयध्वंसनः,
मात्रातःखलुसूतिकाऽऽमयहरोधृष्यथिरायुःप्रदः
सम्यक्सिद्धबलिद्रुतिप्रकृतिको
गुञ्जोन्मितः सेवितः,
कुर्यात्तीव्रतरांक्षुधांक्षयहरोरोगादिरोगाञ्जयेत्॥
विभुः सर्वामयध्वंसी रसोऽयं नन्दिनोदितः।
जीवत्पुत्रप्रदः स्त्रीणां स्थिरयौवनदायकः॥
भूतप्रेतपिशाचानां भयेष्वभयदायकः।
जडानां लोहलार्तानां मन्दबुद्धिमतामपि॥
मण्डूकीरससंयुक्तो दातव्यो वचया सह।
वन्ध्या च लभते पुत्रं नाऽत्र कार्या विचारणा॥

स्त्री. चि., पुत्रप्राप्तये।

भाषा—अभ्रकद्रुति, शुद्धपारा और गन्धककी कज्जलीबनाय लक्ष्मणाकेरससे १-२ रोज मर्दनकर गोलाबनाय शरावसम्पुटमें बन्दकर ६-७ कपडमिट्टी देकर सुखाकर कुक्कुटपुटकी आंचदे। ऐसे १०० बार करनेसे पारदभस्महोगी। इसमेंसे उचितमात्रा उचितानुपानकेसाथ देनेसे सूतिकारोग, शोष, अल्पायु, मन्दाग्नि, क्षय इनसबको नष्टकर अत्यन्त क्षुधाको बढ़ाताहै। और समस्तरोगोंको दूरकर दीर्घायुपुत्रको पैदा करता है। मनुष्योंके यौवनको स्थिर करता है गद्गददोष, और मन्दबुद्धियोंको ब्राह्मीकेरस अथवा वचाकेसाथ देना चाहिये। इसके सेवन-से वन्ध्याको अवश्य पुत्रकी प्राप्ति होती है॥३२८॥

३२९ द्वादशाऽऽयसम्

गरुत्मान्दरदस्तीक्ष्णो शर्वाख्यो वङ्गशुक्तिके।
शुल्वश्च गगनं हेम रुधिरश्च त्रिनेत्रकम्॥

तालनृपतिश्चैव वह्निमूलं सरामठम्।
त्रिकटु त्रिफला शिग्रु ह्यजमोदा यमानिका॥
पिप्पलीमूलभार्ग्यौ च लशुनं जीरकद्वयम्।
आर्द्रकस्य रसेनैव वटिकां कारयेद्भिषक्१४४६
वातरक्तं महाकुष्ठं गलिताङ्गं त्रिदोषजम्।
शोथं कण्डूञ्च रुधिरं सर्वमेतद्व्यपोहति॥
मन्दाऽनलाऽऽमवातांश्च श्लेष्माणञ्जलोदरम्।
घ्राणाऽक्षिकर्णजिह्वानां सर्वान्रोगान्विनाशयेत्॥
भै. र., वातरक्ते।

टि॰—अत्र एकादशभागेषु धातवो गृहीताः द्वादशे भागे काष्ठौषधिवर्गैकत्वं निधाय द्वादशायसमिति नाम बोद्धव्यम्।

भाषा—सोनामाखी, शिंगरिफ, शुद्धपारद, लोह, वङ्ग, शुक्ति, ताम्र, अभ्रक, सुवर्ण, माणिक्य इनकी भस्में, रुद्राक्ष, गन्धक, चित्रकमूल, हींग, त्रिकटु, त्रिफला, सहिजनमूल, अजमोद, अजवाइन, पिपलामूल, भारङ्गी, लशुन, स्याहसफेदजीरा, इनसबका बारीकचूर्णकर पारेगन्धककी नीलवर्ण कज्जलीमें मिला कर अदरखके रससे १—२ रोज घोटकर १—१ रत्तीकी गोलियें बनाकर छायाशुष्ककर रखछोड़े इनमेंसे १—१ गोली समयोचिताऽनुपानके साथ देनेसे वातरक्त, महाकुष्ठ, गलित, त्रिदोषज, शोथ कण्डू, दुष्टरक्त, मन्दाग्नि, आमवात, श्लेष्मजलोदर, नाक, आंख, कान और जिह्वाके तमाम रोगोंको यह नष्ट करता है॥ ३२९॥

३३० द्वाविंशत्यायसम् (हरिद्राद्यवलेहः)

हरिद्रे त्रिफला दन्ती व्योषं चित्रक आहुली।
कटुका रोहिणी श्यामा पिप्पलीमूलमेव च॥
वचा विडङ्गं त्रिफला त्रिवृता हस्तिपिप्पली।
चूर्णान्येषां तु तुल्यानि द्विगुणं स्यादयोरजः॥
तानि क्षीराऽनुपानानि लेहयेन्मधुसर्पिषा।
पाण्डुरोगं नुदत्येष श्वयथुञ्चाऽपकर्षति १४५१
ग. नि., र. सु., पाण्डुरोगे।

टि॰—रसराजसुन्दरे पञ्चसु वस्तुषु व्यत्ययं कृत्वा पलत्रं लोहभस्म सर्वाधिकं किञ्च नियुज्य षड्नवायसचूर्णमिति नाम स्थापितम्, तस्याप्यत्रैवाऽन्तर्भावः, नवायसमिति नामस्तत्र दुर्व्यूहत्वात्। अस्मापूर्वोक्तत्र गुणाऽतिरेकाऽभावाच।

भाषा—हल्दी, दारुहल्दी, त्रिफला, दन्तीमूल, त्रिकटु, चित्रकमूल, हुरहुर, कुटकी, कालीनिशोत, पिपलामूल, वच, विडङ्ग, त्रिफला, (सुपारी, जायफल, लौंग), लालनिशोत, गजपीपल येसब समभाग, इनसबसे दूनी लोहभस्म मिलाकर रखछोड़े। इसमेंसे १—१ माशा मधु और घृतके साथ देनेसे पाण्डुरोग और शोथ नष्ट होता है॥ ३३०॥

३३१ द्विगुणाऽऽयसम्

दन्ती विडङ्गं त्रिफला त्र्यूषणं कटुरोहिणी।
चित्रकं देवकाष्ठञ्च त्रिवृता हस्तिपिप्पली॥
चूर्णान्येतानि तुल्यानि द्विगुणं स्यादयोरजः।
क्षीरेणाऽऽलोडय तत्पीतं श्रेष्ठं श्वयथुनाशनम्
भै. सं., श्वयथौ।

भाषा—दन्तीमूल, विडङ्ग, त्रिफला, त्रिकटु, कुटकी, चित्रक, देवदारु, निशोत, गजपीपल, येसब समभाग, लोहभस्म सबसे दूनी लेकर कपड़छान चूर्णकर उचितमात्रामें लेकर दूधकेसाथ पीनेसे शोथ (सूजन) नष्ट होता है॥ ३३१॥

३३२ द्विजरोपणी गुटिका

नागस्य त्रिफलाक्वाथे रसे भृङ्गस्य गोघृते।
अजादुग्धे च गोमूत्रे शुण्ठीक्वाथे मधुन्यपि॥
वापान्सप्तपृथग्दत्त्वा तत्समं ग्राहयेद्रसम्।
लौहपात्रे द्रावयित्वा युक्त्या च गुटिकाञ्चरेत्
सा मुखे धारिता हन्ति दन्तरोगानशेषतः।
दृढीकरोति दशनान् बद्धमूलानशेषतः १४५६
र. कौ., र. कं., रसायनसं., र. चि., र. का., र. सि., दन्तरोगे।

भाषा—त्रिफलाक्वाथ, भांगरेकारस, गोघृत, बकरीकादूध और मूत्र, शुण्ठीक्वाथ और मधु इनप्रत्येकमें नागको गलाकर सातसातबार बुझाकर फिर गलाकर इसकीबराबर शुद्धपारा मिलाकर गोली

बनाले । इसगोलीको मुंहमें रखनेसे दांतोंकी तमाम व्याधियां दूर होकर दांत मजबूत हो जाते है ३३२

३३३ द्विजेन्द्ररसः

अभ्रकं तालकं ताप्यं शिलाजित्कुनटीरजः ।
भूलतासत्त्वसंयुक्तं समांशैः समपारदम् ॥
त्रिसह्यक्षारसंयुक्तं चणकाऽम्लसुभावितम् ॥
त्रिकटुत्रिफलापाठासुरदालीसुमर्दितम् ॥
द्विजेन्द्रनाम सूतोऽयं विषदोषं द्रुतं जयेत् ॥

रसेन्द्रमं., विषविकारे ।

भाषा—अभ्रक और हरितालभस्म, शुद्धसोनामाखी, शिलाजीत, मैनसिल, केंचुओंके तत्विकीभस्म सज्जी, सुहागा, यवक्षार, येसव समभागलेकर सबकी बराबर पारदभस्म मिलाकर चणकक्षार, त्रिकटु, त्रिफला, पाठा, वन्दाल इन प्रत्येकके रसोंसे १–१ रोज मर्दनकर ३–३ रत्तीकी गोलियें बनाकर रख-छोड़े । इनमेंसे १–१ गोली समयोचिताऽनुपानकेसाथ देनेसे यह समस्तविषाको दूरकरताहै ॥३३३॥

३३४ द्विभुजरसः

म्लेच्छाद्विगुणजैपालं जम्बीररससमर्दितम् ।
रक्तिकाप्रमितं दत्तं नवज्वरविनाशनम् ॥

नू. क., नवज्वरे ।

भाषा—शिंगरिफसे दूना शुद्धजमालगोटा लेकर जंभीरीकेरससे मर्दनकर १–१ रत्तीकी गोलियें बनाकर रखछोड़ । इनमेंस १–१ गोली उचितानुपानकेसाथ देनसे नवीनज्वर नष्ट होताह॥ ३३४ ॥

३३५ धत्तूरतैलवद्धवटी

पलं रसस्य शुद्धस्य तथैव द्विपलं बलेः ।
तयोः कज्जलिकां कृत्वा खुतैलेन मर्दयेत् ॥
अथवाऽप्यणुतैलेन गुटिकां कारयेत्ततः
दृढं वस्त्रेण संवेष्ट्य दाडिमीपत्रजं ततः ।
कल्कं तदुपरि स्थाप्य वालुकामध्यगं पचेत् ।
विधिना कुक्कुटपुटे यावद्गन्धो विलीयते
लेपं पुनः पुनर्दत्वा देयः साग्निपुटस्ततः ।
एवं वा गुटिकां सिद्धां तैले धत्तरजे पचेत् ॥
ततः खाखसवल्कोत्थे तोये क्षीरे पचेत्पुनः ।
क्षणं तदुपरि न्यस्य वह्निस्तत्र रसं क्षिपेत् ॥
तं रसं त्वरितं भूमौ सङ्क्षिपेदथ युक्तितः ।
सङ्गृह्य गुटिकां कृत्वा तैले धत्तूरजे पचेत् ॥
बहुशो दृढतां यावद्याति तावत्पचेत्सुधीः ।
पश्चात्क्षीरादिके पाच्या गुटिका कार्यसिद्धिदा॥
निरास इति विख्याता कथिता रसवादिभिः ॥

यो. म., रसायनाधिकारे ।

भाषा—शुद्धपारा १ पल शुद्धगन्धक २ पल, इनकी नीलवर्ण कज्जलीकर एरण्डका तैल अथवा अणुतैल थोड़ासा डालकर मर्दनकरे जिसमेंकि इसकी कड़ीगोली बनजाय फिर इसको मलमलके टुकड़ेमें बांधकर इससे चतुर्गुणित अनारके पत्तोंकाकल्क इसके ऊपर चढ़ाकर एककपड़मिट्टी देकर शरावसम्पुटमें वालूकेबीचमें रखकर सम्पुटपर १–२ कपड़मिट्टी देकर कुक्कुटपुटकी आंचदे जिसमेंकि केवलगन्धकजलजाय । स्वाङ्गशीतलहोनेपर निकालकर एरण्डतल अथवा अणुतैल मिलाकर पूर्ववत् अनारपत्रके कल्कमें रखकर आंचदे । ऐसे जबतक इसमेंसे गन्धकका अंश बिल्कुल न जलजाय तबतक आंच देताजाय । गन्धक निकलजानेपर गोलीकारंग लालहोजायगा । इसकेबाद धतूरेके बीजोंके तैलमें मर्दनकर अनारके पत्रोंकेकल्कमें कवलितकर दोलायन्त्रसे धतूरेके बीजोंके तैलमें ४ पहर पकावे । स्वाङ्गशीतलहोनेपर निकालकर पोस्तके ताजे डोडोंके कल्कमें कवलितकर दोलायन्त्रमें डोडोंकेहीरससे स्वेदनकरे । फिर उसीतरह डोडोंके कल्कमें रखकर दूधमें स्वेदनकरे । फिर कपड़ेसे निकालकर जलतेहुए अङ्गारोंमें थोड़ीदेरतक रक्खे जिसमेंकि यह गरमहोजाय । इसकेबाद इसपर थोड़ापारा रक्खे और उसको तुर्त जिमीनपर गिरादे । फिर इसगुटिकाको धतूरेके तैलमें कईबार पकावे । जब यह एकदम कठिन होजाय तब दूध और पोस्तके डोडोंके रसमें

पकाकर रखछोडे । धातुवादमें इसका नाम निरास है । यह युक्ति विशेषसे तमामकार्योंको करती है ॥

३३६ धनुर्वातभञ्जनरसः

तुत्थं गन्धकतालकं शुकुनटी ताप्यं रसं तैत्तिरं, क्ष्वेडं टङ्कणसंयुतं मधुफलं सर्व समं मर्दयेत् । कृष्णाऽक्षप्रभवेणमायुपयसाताम्रोत्थपात्रेन्यसेत्, ग्रक्षद्वारिविभिन्नरोमनिचयेप्रच्छानिकेनिक्षिपेत् दुश्चाल्येऽनिलदंष्ट्रशृङ्खलपदे शङ्खे हिमे मारुते, ह्युन्मादे स्मृतिनाशने त्रिकगदेतन्द्राविमोहादिषु

र. र्सं., धनुर्वाते ।

भाषा—शुद्धतुत्थक, गन्धक, हरिताल और मैनसिल, सोनामाखी, शुद्धपारा, जमालगोटा, बछनाग, भुनासुहागा, नरियल, सब समभागलेकर कृष्णसर्प और रोहूमछलीके पित्तोंसे ७ भावनाएं देकर तांबेके पात्रमें रखछोडे । इसमेंसे १ रत्तीकी मात्रा उचिताऽनुपानकेसाथ खिलानेसे सन्यास, दन्तबन्ध, शृङ्खलवात, शङ्खरोग, सर्वाङ्गशैत्य, उन्माद, अपस्मार, त्रिकग्रह, तन्द्रा, प्रमोहप्रभृति रोग नष्ट होतेहैं । और इन्हींरोगोंमें तालुके ऊपरसे बालोंको निकालकर पाछदेकर उसपर घिसनेसे ये नष्ट होतेहैं

३३७ धन्वन्तरिरसः (प्रथमः)

सूतगन्धाऽर्कसौभाग्यंकङ्कुष्ठं रक्तचन्दनम् ।
कणा चैतानि तुल्यानि मर्दयेल्लुङ्गवारिणा ॥
एकाऽहमथ संशोप्य स्थापयेदतियत्नतः ।
रसो निःशेषकुष्ठघ्नो धन्वन्तरिरितिस्मृतः ॥
निर्दिष्टः शम्भुना सर्वरोगभीतिविनाशनः ।
पथ्याघृतयुतो वायुं सिन्धुविश्वान्वितोऽपि वा

र. र. स., चि. क., कुष्ठे ।

भाषा—शुद्धपारा, गन्धक, ताम्रभस्म, भुनासुहागा, कङ्कुष्ठ, लालचन्दन, पीपल, येसब समभाग लेकर कूटकपड़छानकर पारेगन्धककी नीलवर्णकज्जलीमें मिलाकर बिजौरेकेरसमें १ रोजमर्दनकर १–१ माशेकी गोलियें बनाय सुखाकर रखछोडे । इनमेंसे १–१ गोली समयोचिताऽनुपानकेसाथ देनेसे यह समस्तकुष्ठोंको दूरकरताहै । हर्रे और घृत अथवा सैन्धव और सोंठकेसाथ देनेसे तमामरोगोंको दूरकरताहै

३३८ धन्वन्तरिरसः (द्वितीयः)

शुद्धसूतं विषञ्चाऽभ्रं स्वर्णलोहञ्च मौक्तिकम् ।
त्रिक्षारं माक्षिकं वङ्गं हिङ्गुलं गन्धकं समम् ॥
चित्रमूलकषायेण हंसपादीरसेन च ।
अर्कमूलकषायेण भृङ्गराजरसेन च ॥१४७२॥
पञ्चकोलकषायेण चैभिर्मर्द्य दिनत्रयम् ।
काचकूप्यां निवेश्याऽथ वालुकायन्त्रके पचेत् ॥
त्रियामाऽन्ते समुद्धृत्य पञ्चपित्तैश्चभावयेत् ।
माषमात्रमिदं खादेदनुपानविशेषतः ॥
सन्निपातन्निहन्त्याशु धन्वन्तरिमतो रसः ॥

वै. चि., बा., सन्निपाते ।

भाषा—शुद्धपारा और बछनाग, अभ्रक-सुवर्ण लोह और मोतीभस्म, सज्जी, सुहागा, यवक्षार, सोनामाखी, वङ्गभस्म, शिंगरिफ, गन्धक येसब समभागलेकर कूटकपड़छानकर पारेगन्धककी नीलवर्ण कज्जलीमें मिलाकर चित्रकमूलक्वाथ, हंसराजस्वरस, अर्कमूलक्वाथ, भृङ्गस्वरस, पञ्चकोलकषाय इनसे १–१ रोज मर्दनकर सुखाकर ६–७ कपड़मिट्टीदीहुई आतशीशीशीमें डालकर मुंहबन्दकर ३ पहर वालुकायन्त्रमें अग्निदेकर ५ पित्तोंसे भावना देकर १–१ माशेकी गोलियें बनाकर रखछोडे । इनमेंसे १–१ गोली अनुपानविशेषसे देनेसे यह तमाम सन्निपातोंको दूरकरताहै ॥ ३३८ ॥

३३९ धन्वन्तरिवटी

निम्बूकबीजं विनिकास्य सम्यक्
तदन्तरे दन्तिफलन्निधाय ।
दलीकृतं वै दिवसत्रयं पृथक्
पश्चात्समुद्धृत्य विशोध्य सम्यक् १४७५
क्षिपेत्ततो वै दरदस्य टङ्कं
सस्यैकटङ्कञ्च मरीचटङ्कम् ।
एकत्र सञ्चूर्ण्य विमर्द्य नीरे
निम्बूद्रवे वै वटकं विधेयम् ॥१४७६॥

गुञ्जैकमानाऽखिलरोगवृन्दं
धान्वन्तरी जूर्तिचयन्निहन्ति।
सामे ज्वरे चैव निरामके च
विरेकमेकैव मलान्भिनत्ति ॥१४७७॥
द्वाभ्यां द्विवारं वटिकात्रयेण
विरेचयेद्रामामितञ्जवेन।
विबन्धशूलं परिकर्त्तयन्ति
प्लीहाऽऽमशूलज्वरगुल्मशोथान् ॥

र. र., कौ., शूले।

भाषा—कागजीनीबूको बीचमेंसे चीरकर बीज-निकालकर जमालगोटेकी दाल बीजोंके स्थानमें दबादे। फिर बन्दकर ३ रोजतक रखछोड़े। चौथे-रोज इसमेंसे दन्तीबीजोंको निकालकर अच्छीतरह पोंछकर ४ माशे शुद्धशिंगरिफ, धनियां और मरिच १–१ टङ्क मिलाकर नीबूके रससे १–२ पहर घोंटकर १–१ रत्तीकी गोलियें बनाकर रखछोड़े। इनमेंसे १–१ गोली उचिताऽनुपानके साथ देनेसे साम और निरामज्वरको दूरकरतीहै। एकगोली देनेसे बद्धमल द्रुतहोजातेहैं, २ गोलियोसे दोवार और ३ से तीनवार रेचन करके विबन्ध, शूल, प्लीहा, आमशूल, ज्वर, गुल्म, शोथ इनको यह दूरकरतीहै ॥ ३३९ ॥

३४० धर्मसुन्दररसः (कैशोरगुग्गुलुः)

अश्मजातरसभस्म किशोर-
व्योमलोहरजसामथ कल्कः।
धर्मघोप इव काकणिमात्रः
शोपमेपमशितः परिमाष्टि ॥१४७९॥
मगधामधुभिर्मरिचैः
सघृतं वा नित्यमेवसेव्योऽसौ।
त्रिफलामृताम्बुसिद्धं
किशोरमिति गुग्गुलुं प्राहुः ॥१४८०॥

र. (मा.) शोपे।

भाषा—सोमल और पारेकीभस्म, किशोर-गुग्गुल, अभ्रक, लोहभस्म सब समभागलेकर इकट्ठे-कूटकर १–१ रत्तीकीगोलियें बनाकर रखछोड़े। इनमेंसे १–१ गोली पीपल और मधुकेसाथ अथवा मरिच और घीकेसाथ लेनेसे यह शोपको जड़से नष्टकरताहै ॥ ३४० ॥

३४१ धातुज्वराङ्कुशरसः

लोहाऽभ्रकं ताम्रमस्म पारदं गन्धकं विषम्।
व्योषं फलत्रिकं कुष्ठं समभागेन मर्दयेत् ॥
भृङ्गनीरेण चाऽर्द्रस्य वारा निर्गुण्डिकारसैः।
त्रिदिनं मर्दयित्वा तु मुद्गमाना वटी कृता ॥
यथारोगाऽनुपानेन सर्वव्याधिविनाशिनी।
अजीर्णवातकासघ्नी दीपनी रुचिवर्धनी ॥
सर्वधातुज्वरान्हन्ति सोऽयं धातुज्वराङ्कुशः ॥

नि. र., ज्वरे।

भाषा—लोह, अभ्रक और ताम्रभस्म, शुद्ध-पारा, गन्धक और बछनाग, त्रिकटु, त्रिफला, कुठ ये सब समभागलेकर बारीकचूर्णकर पारेगन्धककी नीलवर्णकज्जलीमें मिलाकर भंगरा, अदरख, निर्गुण्डी इनप्रत्येकके रसोंसे ३–३ रोज मर्दनकर मूंगबराबर गोलियें बनाकर रखछोड़े। इनमेसे १–१ गोली तत्तद्रोगहराऽनुपानकेसाथ देनेसे अजीर्ण, वातकास, मन्दाग्नि, समस्तधातुज्वर इनको यह नष्टकरतीहै ॥

३४२ धातुपञ्चाऽमृतरसः (प्रथमः)

सौराष्ट्रिका हिङ्गुलवत्सनाभं
भागार्धभागं नवसारकश्च।
कर्कोटिकाचूर्णसमञ्च सर्वं
निष्पिष्य खल्वे परिवर्तितं तत्
गुञ्जैकमात्रो मधुपिप्पलीभ्यां
जीर्णे ज्वरे धातुगते त्रिदोषे।
योज्यो रसोऽयं विषमज्वरे च
स्याद्धातुपञ्चाऽमृतनामधेयः ॥

रसायनसं., ज्वरे।

टि०—अस्य योगस्य रसायनसङ्ग्रहे स्थानद्वये पाठस्तत्र द्वितीयस्य पञ्चामृतमिति नाम, तत्र कर्कोटिकायाख्यो-भागा नियोजिता, अत्र तु सर्वसमा नियोजिता, योगाऽनुग-

ण्यात्सर्वसमेव ग्राह्या । गन्धकप्रक्षेपस्तु प्रमादात्संजातस्त त्प्रक्षेपात्पञ्चाऽमृतमितिनामाऽभावात् ।

भाषा—फिटकड़ी, शुद्धशिंगरिफ और वछनाग समभाग इनसबसे आधेप्रमाणमे नोसादर और इनसबकी बराबर बांशखेखसेकेकन्दकाचूर्ण मिलाकर खेखसेके कन्दके रससे मर्दनकर १–१–रत्तीकी गोलियें बनाकर रखछोड़े । इनमेसे १–१ गोली उचिताऽनुपानकेसाथ देनेसे जीर्णज्वर, धातुगतज्वर, त्रिदोषज, विषमज्वर इनसबको यह नष्टकरताहै ॥

३४३ धातुपञ्चाऽमृतरसः (द्वितीयः)

द्विपलं भस्म सूतस्य द्विपलं हेमभस्मकम् ।
तारं वङ्गञ्च गगनं वैक्रान्तं विद्रुमाऽऽयसम् ॥
शुल्वमौक्तिकयोर्भस्म गन्धटङ्कणकन्तथा ।
सर्वाण्येतानि शुद्धानि कर्षमात्राणि कारयेत् ॥
कुमारीभृङ्गनीरेण त्रिफलापत्रकेसरैः ।
विजयादेवकुसुमैर्मर्दितं दिनसप्तकम् ॥
कर्पूरकुङ्कुमैश्चाऽपि गन्धाऽऽढ्यं सुमनोहरम् ।
पञ्चाऽमृतमिति ख्यातं सर्वरोगेषु योजयेत् ॥
मन्दज्वरे क्षये कासे हृद्रोगे च हलीमके ।
पाण्डौ शोफे ग्रहण्याञ्च श्वासहिक्कावमिज्वरे ॥
[illegible] सर्वथा ।
[illegible] ·ाय च ॥

रसायनसं., रसायने ।

भाषा—पारद और सुवर्णभस्म २–२ पल, रजत-वङ्ग-अभ्रक-वैक्रान्त-प्रवाल-लोह-ताम्र-मोती इन सबकीभस्में, शुद्धगन्धक और सुहागा ये सब १–१ तोलालेकर कपड़छानचूर्णकर घीकुंवार, त्रिफला, पत्रज, केसर, भांग, लौंग इनप्रत्येकके यथासम्भव स्वरस अथवा क्वाथोंसे ७–७ रोज मर्दनकर षोडशांश कपूर और केशर मिलाकर १–१ रत्तीकी गोलियें बनाकर रखछोड़े । इनमेंसे १–१ गोली तत्तद्रोगहराऽनुपानकेसाथ देनेसे मन्दज्वर, क्षय, कास, हृद्रोग, हलीमक, पाण्डु, शोथ, ग्रहणी, श्वास, हिक्का, वमि, ज्वर, बहुमूत्र, पथरी, प्रमेह, मूत्राऽऽघात, इनसबको नष्टकर आयुको बढ़ाताहै ॥३४३॥

३४४ धातुबद्धरसः

गन्धकेन शिला वाऽपि सीसको माक्षिकेण वा ।
अभ्रं लौहेन वा तद्वत्समभागेन पारदः ॥
सुभृष्टटङ्कणेनाऽपि रसपादेन संयुतः ।
रसेन पारिजातस्य कारवेल्ल्या रसेन वा ॥
द्रवन्तीतण्डुलीयोत्थैरेकाहं मर्दयेद्रसम् ।
अर्धं सञ्चूर्ण्य मण्डूरं दिनान्तं परिमर्दयेत् ॥
तज्जलं भाजने क्षिप्त्वा सूर्यतापे निधापयेत् ।
जलादुत्सृज्य मृत्स्नाञ्च पथ्यया सह मर्दयेत् ॥
पूर्वसूतस्य तं कल्कं मृत्स्नया परिलेपयेत् ।
अङ्गुलोत्सेधमानेन ततः संवेष्टय मृत्पटैः ॥
विशोष्य तं धमेद्गाढं सार्धैकघटिकावधि ।
तस्मादुद्धृत्य तं भित्वा शीतलाऽङ्गाञ्च मूषिकाम् ।
धातुबद्धरसस्सोऽयं सर्वरोगनिकृन्तनः ॥

र. र., ध., सर्वरोगे ।

भाषा—शुद्धगन्धक, मैनसिल अथवा नाग, माक्षिक अथवा अभ्रक, लोह, समभागलेकर इनकी बराबर शुद्धपारा डालकर पारेसे चतुर्थांश भुनासुहागा डालकर हारसिंगार अथवा करेलेके रससे मर्दनकर द्रवन्ती (धनसर), चौलाई इनके रसोंसे १–१ रोज मर्दनकर इससे आधी मण्डूरभस्म डालकर पूर्वोक्तरसोंसे मर्दनकरे, रसकुछ अधिक प्रमाणमें डाले और अखीरी मर्दनकरनेके बाद इसमेंसे कुछपानी बाकीरहे उसको नितारकर धूपमें रखदे । नितरनेके बाद पानीको अलगकर जो कुछ धातुओंका कल्क नीचे जमगयाहो उसको धातुकल्कमें मिलाकर गोला बनाकर सुखादे और नितारेहुए रसमें हर्रेका चूर्ण मिलाकर थोड़ीदेर मर्दनकर इसगोलेपर लेप करदे । सूखनेपर इसपर १ अङ्गुलऊंची कपड़मिट्टी देकर सुखाकर इसको खुलीमूषामे रख १॥ घड़ीतक तीक्ष्णाग्निमें धमनकरे फिर अग्निपरसे हटाकर ठंढाहोनेके बाद सम्पुटको फोड़कर रसको निकालले । यह धातुबद्धरस तैयार होगा । इसमेंसे १–१ रत्ती

तत्तद्रोगहराऽनुपानकेसाथ देनेसे यह तमामरोगोंको दूर करेगा ॥ ३४४ ॥

३४५ धात्रीखण्डाऽऽयसम्

धात्रीरसेनाऽऽढकसम्मितेन
लौहं रजश्चाऽष्टपलप्रमाणम् ।
सितां समानां कुडवोन्मिताऽऽज्ये
विपाच्य तस्मिन्नथ किञ्चिदुष्णे ॥
क्षिपेद्रजोविश्वकणोपणोत्थं
त्रिजातकोत्थञ्च फलत्रिकोत्थम् ।
पलप्रमाणं पृथगेव शीते
मधु प्रदेयं कुडवप्रमाणम् ॥ १४९९ ॥
तद्भक्षयेद्वह्निबलं विदित्वा
हिताऽन्नसेवी जयति प्रसह्य ।
चिराऽनुबन्धं परिणामशूलं
प्लीहान्त्रवृद्धिं जठराऽग्निमान्द्यम् १५००

लो. प., (स.), शूले ।

भाषा—आंवलेकारस ४ सेर, लोहेका बारीकरेता आधासेर, शक्कर आधासेर, गोघृत पावभर, लेकर बहुतमन्द आंचसे पकावे । जब इसकी चाशनीहोजाय तब उतारकर सोंठ, मिर्च, पीपल, त्रिजात, त्रिफला, इनप्रत्येकका १—१ पलचूर्ण डालकर खूब चलादे । शीतलहोनेपर पावभर मधु मिलाकर रखछोड़े । ६—७ रोजकेबाद अग्निबल देखकर मात्रा कायमकर खाकर हिताऽन्नभोजन करनेसे बहुतदिनका परिणामशूल, प्लीहा, अन्त्रवृद्धि, मन्दाऽग्नि इनसबको यह नष्टकरताहै ॥ ३४५ ॥

३४६ धात्रीपाकः

धात्रीफलानि पक्कानि तीक्ष्णलोहेन वेधयेत् ।
विश्वावरुणपत्रैश्च फलानि स्वेदयेद्भृशम् १५०१
ततो दुग्धे च संस्वेद्य जले च तदनन्तरम् ।
मधुमध्ये क्षिपेद्भाण्डे स्थापयेद्दिनविंशतिम् ॥
विनष्टं मधु सन्त्याज्यं क्षौद्रमन्यं पुनः क्षिपेत् ।
सितां धात्रीं गजकणां लवङ्गं मुस्तकं बलाम्
एलां चैव तुगाक्षीरीं लोहं वङ्गं तथैव च ।
षोडशांशेन सम्मिश्र्य प्रातः कर्षमितं भजेत् ॥
बले क्षीणे क्षये चैव पथ्यं मधुरमाचरेत् ।
प्रमेहं मूत्रकृच्छ्रञ्च नाशयेत्तत्क्षणादपि १५०५
वीर्यवृद्धिकरश्चैव वाजीकरणमुत्तमम् ।
कुष्ठं पित्तप्रकोपञ्च नाशयेन्नाऽत्र संशयः १५०६
अन्येऽपि पित्तजा रोगाः शोणिताद्यास्तथैव च ।
ते सर्वे प्रशमं यान्ति धात्रीपाकस्य सेवनात् ॥

नि. र., क्षये ।

भाषा—पके आंवलोंको सूईके मुंहसे गोदकर सोंठ और वरुणके पत्तोंके काढ़ेमें स्वेदनकर गायकेदूध और जलसे स्वेदनकरे । इसकेबाद धूपमे रखकर उनकापानी सुखादे फिर चिकनेवर्तनमें धीरजसे जमाकर मधु भरकर एकान्तस्थानमें रखदे । २१ रोजकेबाद इसकामधु (जोकि कालापड़गयाहो) निकालकर दूसराभरदे । फिर शक्कर, आंवले, गजपीपल, लौंग, नागरमोथा, बला, इलायची, वंशलोचन, लोहभस्म, वङ्गभस्म येसब मिलकर १६ वां हिस्सा मिलाकर रखछोड़े । इसमेसे १—१ तोला प्रातःकाल खाकर मधुराहारपर रहनेसे क्षीणता, क्षय, प्रमेह, मूत्रकृच्छ्र, वीर्यहानि, पुरुषत्वनाश, कुष्ठ और पित्तप्रकोप, वातरोग, रक्तविकार येसब नष्टहोते हैं ।

३४७ धात्रीलोहम् (प्रथमम्)

धात्रीलोहरजोव्योपनिशाक्षौद्राऽऽज्यशर्कराः ।
भक्षणाच्च विनिघ्नन्ति कामलाश्च हलीमकम् ॥

र. सं., र. र., वृ. मा., र. सि., ध., लो. प. (स.,) र. सु., र. क. ल., रसायनसं., र. चि., टो., र. क., भि. र., च. द., र. का., यो. म., ना. वि., कामलायाम् ।

भाषा—आंवला, लोहभस्म, त्रिकटु, हल्दी येसब समभाग मिलाकर रखछोड़े । इसमेंसे उचित मात्रामेलेकर मधु, घृत और शक्करकेसाथ खानेसे कामला और हलीमक नष्टहोतेहैं ॥ ३४७ ॥

३४८ धात्रीलोहम् (द्वितीयम्)

प्रस्थंप्रस्थं सिता ग्राह्या धात्रीफलगुडूचिकाः ।
प्रस्थैकं गुग्गुलुं दत्त्वा लोहपात्रे सुकुट्टयेत् ॥

त्रिकटुत्रिफलान्यष्टौ लोहं पलचतुष्टयम् ।
यष्टीमधु पलद्वन्द्वं चूर्णयित्वा तु दापयेत् ॥
भावयेदमृताकाथं यावत्सप्तदिनावधि ।
चण्डाऽऽतपेन संशुष्कं चूर्णयित्वा च तत्क्षणात्
मध्वाऽऽज्येन समायुक्तं घटे स्थाप्यं तदौषधम् ।
आदौ मध्ये तथा चान्त्ये भक्षयेत्सुसमाहितः ॥
तैस्तैः खादेत्प्रकारैश्च पथ्यं दोषाऽनुसारतः ।
भुक्तस्तु हरते दोषान्वातपित्तसमुद्भवान् १५१३
मध्ये विष्टम्भिदोषश्च तथाऽन्ते सलिलञ्जयेत् ।
अन्नपानकृतान्दोषांश्शूलञ्च परिणामजम् ॥
अम्लपित्तकफद्वन्द्वपाण्डुत्वं कामलामपि ।
जयेद्रोगांस्तथा चान्यान्धात्रीलोहं न संशयः॥

रससागर, शूले ।

भाषा—एकएकसेर गिलोय और आंवलेका कपड़छान चूर्णकर शकर और गुग्गुलु प्रत्येक१—१ सेर मिलाकर लोहेके हावनदस्तेमें लोहेके मूसलसे थोड़ा घी चुपड़कर इसतरह कूटे कि इसका द्रव होजाय । इसकेबाद त्रिकटु, त्रिफला, ८-८ पल लोहभस्म ४ पल, मुलहठी २ पल, इनसबको मिलाकर गिलोयके काढ़ेसे ७ दिनतक भावनादे फिर कड़ीधूपमें सुखाकर चूर्णबनाकर मधु और घी मिलाकर अवलेह बनाले । फिर चिकने वर्तनमें रख ७ रोजतक रहनेदे । इसमेंसे अग्निबल देखकर मात्रा-कायमकरके भोजनके आदि मध्य तथा अन्तमें खावे । और रोगानुकूल पथ्य सेवनकरे तो वात, पित्त, कफज व्याधियोंको यह दूरकरताहै । मध्यमें खानेसे विष्टम्भताको और अन्तमें खानेसे जलदोष, अन्नपानजदोष, परिणामशूल, अम्लपित्त, कफद्वन्द्व, पाण्डु, कामला वगैरह सबरोगोंको नष्टकरताहै ॥

३४९ धात्री लोहम् (तृतीयम्)

धात्रीचूर्णस्याऽष्टौ पलानि चत्वारि लोहचूर्णस्य ।
यष्टीमधुकस्य रजो द्विपलं दद्यात्पटे घृष्टम् ॥
अमृताकाथेनैतच्चूर्णं भाव्यश्च सप्ताहम् ।
चण्डाऽऽतपे विशुष्कंभूयः पिष्ट्वानवेघटेस्थाप्यम्
घृतमधुना संयुक्तं भक्तास्यादौ भक्तमध्येऽन्ते च
त्रीनपि वारान्खादेत्पथ्यं दोषाऽनुबन्धेन ॥
भक्तस्याऽऽदौनाशयतिव्याधीन्पित्तानिलोद्भूतान्
मध्येऽन्ने विष्टब्धं जयतिचनृणांविदह्यतेनाऽन्नम्
पानान्नकृतान्दोषान्भक्तान्ते शीलितो जयति ।
एवं जीर्यति चाऽन्ने शूलं नृणां यत् सुकष्टम् ॥
हरति च सहसा युक्तो योगश्चाऽयं जरत्पित्तम् ।
चक्षुष्यः पलितघ्नः कफपित्तसमुद्भवाञ्जयति॥
प्रसादयति च रक्तं पाण्डुत्वं कामलाञ्जयति ॥

यो. म., र. सं., र. र., लो. प. (स.), र. चं., वृ. यो. त., र. सु., र. को., रसायनसं., भै. र., टो., च. द., र. का., पित्तरोगे शूले च । लो. प. (स.) यष्ट्यादिलोह । टो. लोहाऽमृत ।

भाषा—आंवलेकाचूर्ण ८ पल, लोहभस्म ४ पल, मुलहठीकाचूर्ण २ पल, लेकर गिलोयकेक्काथसे ७ रोजभावनादेकर प्रचण्डधूपमें सुखाकर चूर्णकर मधु और घृत उचितमात्रामें मिलाकर नयेघड़ेमें रखछोड़े । इसमेंसे उचितमात्रामें दोषाऽनुकूलपथ्य भोजनके आदि, मध्य और अन्तमें सेवनकरे। भोजनके आदिमें लेनेसे वातपित्तव्याधियोंको, मध्यमें विष्टम्भ और अन्तर्दाहको, और अन्तमें लेनेसे अन्नपानकृतदोषोंको नष्टकरताहै और शूल, जरत्पित्त, कफपित्तजरोग, पाण्डु, कामला वगैरहको दूरकर रक्तकोसाफकरताहै ॥ ३४९ ॥

३५० धात्रीलोहम् (चतुर्थम्)

कुडवं शुद्धमण्डूरं यवश्च कुडवं तथा ।
पाकार्थश्च जलं प्रस्थं चतुर्भागाऽवशेषितम् ॥
शतावरीरसस्याऽथधामलक्या रसस्य च ।
तथा दधिपयोभूमिकूष्माण्डस्य चतुःपलम् ॥
चतुःपलमिक्षुरसं दद्यात्तत्र विचक्षणः ।
प्रक्षिपेज्जीरकं धान्यं त्रिजातं करिपिप्पलीम्॥
मुस्तं हरीतकीश्चैवमभ्रं लोहं कटुत्रयम् ।
रेणुका त्रिफला चैव तालीसं स्वर्णकेसरम् ॥
कटुका मधुकं रास्ना हयगन्धा च चन्दनम्।
एतेषां कार्षिकं भागं चूर्णयित्वा विनिःक्षिपेत् ॥

भोजनाद्यवसाने च मध्ये चैव समाहितः ।
तोलैकं भक्षयेन्नित्यमनुपानं पयस्तथा १५२७॥
शूलमष्टविधं हन्ति साध्याऽसाध्यमथापि वा ।
वातिकं पैत्तिकं चैव श्लैष्मिकं सान्निपातिकम् ॥
परिणामसमुत्थश्च ह्यन्नद्रवभवन्तथा ।
द्वन्द्वजान्यपि शूलानि ह्यम्लपित्तं सुदारुणम् ॥
सर्वशूलहरं श्रेष्ठं धात्रीलोहमिदं शुभम् ॥

र. सं., र. सु., ध., भै. र., यो. र., शूले ।

भाषा—शुद्धमण्डूर और जव ४–४ पल, जल १६ पल डालकर पकावे । चतुर्भागाऽवशेष रहनेपर छानकर शतावर और आंवलेकारस ८–८ पल, दही, दूध, भूमिकूष्माण्डकारस, ईखकारस ४–४ पल डालकर पकावे । जब पाकहोनेपर आवे तब जीरा, धनियां, त्रिजात, गजपीपल, नागरमोथा, हर्रे, अभ्रक और लोहभस्म, त्रिकटु, रेणुका, त्रिफला, तालीसपत्र, नागकेसर कुटकी, मुलहठी, रास्ना, असगन्ध, चन्दन, इनप्रत्येकका १–१ तोले चूर्ण मिलाकर रखछोड़े । इसमेसे भोजनके आदि मध्य तथा अन्तमें १–१ तोला खाकर दूधपीवे तो वातिक, पैत्तिक, श्लैष्मिक, सान्निपातिक, परिणामज, अन्नद्रवज और द्वन्द्वज शूल तथा घोर अम्लपित्त येसब नष्टहोतेहैं ॥ ३५० ॥

३५१ धात्रीलोहम् (पञ्चमम्)

धात्रीफलस्य चूर्णन्तु भावयेत्त्रिफलाद्रवैः ।
एकविंशतिवारान्वै शोष्यं पेष्यं पुनःपुनः ॥
तत्पादांऽशं मृतं लोहं मध्वाज्यशर्करान्वितम् ।
पलैकं भक्षयेन्नित्यं सिताक्षीरं पिवेदनु ॥
धात्रीलोहप्रभावेण रमयेत्कामिनीशतम् ॥

र. सं., र. र., ध., वाजीकरणे । धन्वन्तरिरसरत्नाकरयोरस्तव्यस्ततया पाठोऽस्ति ।

भाषा—आंवले के चूर्णको त्रिफलाके स्वरससे एकरोज भावितकर सुखाडाले । सूखनेपर फिर दूसरे रोज घोटकर सुखावे । इसतरह २१ वार होनेके-बाद चतुर्थांश लोहभस्म मिलाकर इसकी बरावर शकर और अन्दाजसे मधु और घी मिलाकर रखछोड़े । इसमेंसे १–१ पल खाकर शकर डाला हुआदूधपीनेसे मनुष्य उत्साहयुक्त अनेकस्त्रियोंके साथ रमणकरसक्ताहै ॥ ३५१ ॥

३५२ नयनचन्द्रलोहम्

त्रिकटु त्रिफला भृङ्गी शटी रास्ना महौषधम् ।
द्राक्षा नीलोत्पलश्चैव काकोली मधुयष्टिका ॥
वाप्यालकं केशरश्च कण्टकारीद्वयं तथा ।
लौहाभ्रयोः पलं दत्त्वा भावयेदौषधैरथ ॥
त्रिफलाक्वाथतैलेन भृङ्गराजरसेन च ।
भावयित्वा वटी कार्या बदरास्थिमिता शुभा ॥
यावन्तोनेत्ररोगाश्च तान्निहन्ति न संशयः ॥

भै. र., ध., र. सं., र. सु., नेत्ररोगे । रसेन्द्रसारसङ्ग्रहरसराजसुन्दरयोः नयनाऽमृतलोहेति नाम ।

भाषा—त्रिकटु, त्रिफला, काकड़ासींगी, कचूर, रास्ना, अतीस, द्राक्ष, नीलोफर, काकोली, मुलहठी, कंघी, भंगरा, छोटी और बड़ी कटेरी, लोह, अभ्रक भस्म सब समभागलेकर वारीकचूर्णकर त्रिफलाक्वाथ, तिलकातैल, भंगरेकारस इनप्रत्येकमें १–१ रोज घोटकर बेरकीगुठलीके बराबर गोलियें बनाकर रखछोड़े । इनमेंसे १–१ गोली खाने तथा लगानेसे नेत्रके तमामरोग दूरहोतेहैं ॥ ३५२ ॥

३५३ नयनामृतम् (प्रथमम्)

रसेन्द्रभुजगौ तुल्यौ तयोर्द्विगुणमञ्जनम् ।
सूततुर्यांशकर्पूरमञ्जनं नयनाऽमृतम् ॥
तिमिरं पटलं काचं शुक्रमर्माऽर्जुनानि च ।
क्रमात्पथ्याऽशिनोहन्ति तथान्यानपि मृद्विकाम्

वृ. यो. त., शा., र. कौ., नि. र., रसायनसं., र. को., र. क., नेत्ररोगे । शार्ङ्गधरे कृष्णाञ्जनं नागसूतयोस्तुल्यं द्वयोर्दशमांशेन कर्पूरं नियोजितमिति विशेषः । प्रत्यञ्जनं नयनामृतमिति च नामद्वयमिति विशेषः ।

भाषा—शुद्धपारा और नाग समभाग, दोनोंसे दूना सुरमा, पारेकीबराबर कपूर लेकर नागको गलाकर पारामिलाकर उतारले । फिर सबचीजें डालकर लोहेकी कड़ाहीमें लोहेके डंडेसे ६–७

रोजतक इसतरहघोटेकि एकदम यह कज्जलजैसा होजाय । इसको सुबहशाम सीसा अथवा जस्तकी सलाईसे डालनेसे धुंधलापन, जाला, मोतिया, फूला, अर्म, अर्जुन इनसबको और एवंविध अन्यरोग तथा किचनीको यह नष्टकरताहै । इसकाअञ्जन करनेके समय पथ्यसे रहे ॥ ३५३ ॥

३५४ नयनाऽमृतम् (द्वितीयम्)

वरा वेदमुख्या नदीजातयुग्मं
स्फुटत्काचकासीसकर्पूरलोध्रम् ।
वचापीतमुक्ताफलस्फाटिकाऽऽख्यान्
समंखर्परीयेणसञ्चूर्ण्यचारु ॥ १५३७ ॥
दिनंनिम्बुनीरेणसौवीरकेण
विमर्दीकृताछाययाशुष्कवर्ती ।
जलस्रावतैमिर्यकेचार्बुदादी-
ञ्जयत्यञ्जनादम्बुनैवोपितेन ॥

र. कौ., नेत्ररोगे ।

भाषा—त्रिफला, खदिरसार, नदीकीसीप और घोंघा, सफेद काचकी भस्म, कसीस, कपूर, लोध, वचा, हल्दी, दारुहल्दी, केसर, मोती, फिटकड़ी, इनसबकी बराबर खपरियालेकर कपड़छानचूर्णकर नीबू और कांजीमें १–१ रोजमर्दनकर बेरकीगुठली के बराबर गोलियें बनाकर छायामें सुखाकर रखछोड़े । इनमेंसे १–१ गोली उचिताऽनुपानकेसाथ घिसकरलगानेसे जलस्राव, तिमिर, अर्बुद इत्यादिरोगोंको यह नष्टकरताहै ॥ ३५४ ॥

३५५ नयनाऽऽमृतम् (तृतीयम्)

कर्पूरमञ्जनं तुत्थताक्ष्र्यपीतकरोहिणीः ।
वराटं सैन्धवं व्योपं फेनं मधुकचन्दनम् ॥
शङ्खश्च तत्समं पिष्ट्वा मातुलुङ्गरसेन तु ।
मधुसर्पिर्युतश्चैतदञ्जनं नयनाऽमृतम् ॥

व. रा., नेत्ररोगे ।

भाषा—कपूर, सुरमा, तूतिया, सोनामाखी, हल्दी, दारुहल्दी, केसर, कुटकी, कौडीभस्म, सेन्धानमक, त्रिकटु, समुद्रफेन, मुलहठी, चन्दन, शङ्खभस्म सब समभागलेकर कपड़छानकर विजोरेके रससे २–३ रोज मर्दनकर गोलियें बनाकर रखछोड़े । इनमेंसे १–१ गोली मधु और घीकेसाथ अञ्जनकरनेसे यह नेत्रकेरोगोंको नष्टकरताहै ॥ ३५५ ॥

३५६ नयनाऽमृतम् (चतुर्थम्)

मयूरतुत्थसिन्धूत्थं तुत्थं फेनं रसाञ्जनम् ।
टङ्कणं मरिचं तुल्यं जम्बीररसपेषितम् १५४१
त्रिरात्रं ताम्रपात्रस्थं काचाऽर्मपटलाऽपहम् ॥
कण्डूव्रणहरं नाम्ना नयनाऽमृतमुत्तमम् १५४२

व. रा., नेत्ररोगे ।

भाषा—तूतिया, सेंधानमक, खपरिया (अभाव मे जस्तभस्म) कसीस, रसाञ्जन, समुद्रफेन, रसोत, सुहागा, मिरच येसब समभाग लेकर कपड़छान चूर्णकर तांबेके पात्रमें डाल जंभीरीके रसमें ताम्रके डंडेसे तीनरोजतक घोटकर बेरकी-गुठलीकेबराबर गोलियें बनाकर छायाशुष्ककर रखछोड़े । इनमेंसे १–१ गोली उचिताऽनुपानके साथ अञ्जनकरनेसे मोतिया, अर्म, जाला, खुजली और घाव येसब नष्टहोतेहैं ॥ ३५६ ॥

३५७ नवग्रहरसः (प्रथमः)

रसश्च गन्धकश्चैव मौक्तिकश्च मनःशिला ।
कङ्कुष्ठं शङ्खभस्माऽपि टङ्कणं माक्षिकं तथा ॥
नेपालश्च समांशानि निक्षिपेत्खल्वमध्यतः ।
मर्दयित्वा शनैः सम्यक् त्रिफलास्वरसेन च ॥
निम्बदाडिमभूर्वाश्च बालचित्ररसैः पृथक् ।
काचकूप्यां विनिक्षिप्य वालुकायन्त्रमध्यतः ॥
पटमृत्तिकयोगेन सप्तवारं विपाचयेत् ।
पक्त्वा सप्तदिनान्येतत् स्वाङ्गशीतलमुद्धरेत् ॥
गुञ्जामात्रं प्रयुञ्जीत नागवल्लीदलाऽन्वितम् ।
सर्वे ज्वरा विनश्यन्ति शीतिकाविपमादयः ॥
मरीचमागधीविश्वैः पित्तवातकफोत्तरे ।
कूष्माण्डफलनीरेण तापज्वरनिवारणम् १५४८
तिन्तिडीभस्मनीरेण पञ्च गुल्मान्विनाशयेत् ।
सैन्धवेन समायुक्तमष्टशूलनिवारणम् ॥१५४९

भृङ्गस्वरससंयुक्तं श्लेष्मरोगं निहन्ति च ।
तत्तत्सौम्याऽनुपानेन सर्वरोगहरं भवेत् ॥
नवग्रहरसो नाम्ना प्रसिद्धो भुवि राजते १५५०

र. क. यो., र. कौ. (ज्ञा.), सर्वज्वरेषु ।

भाषा—शुद्धपारा, गन्धक, मोती, मैनसिल, कङ्कुष्ठ, शङ्खभस्म, भुनासुहागा, सोनामाखी, ताम्रभस्म येसब समभागलेकर कपड़छान चूर्णकर पारेगन्धककी नीलवर्णकज्जलीमे मिलाकर त्रिफला, नीम, अनार, मूर्वा, सुगन्धवाला, चित्रक इनके स्वरसोंसे १-१ रोज मर्दनकर सुखाकर आतशी शीशीमें बन्दकर ६-७ कपड़मिट्टी देकर वालुकायन्त्रमे चढ़ाय सातरोजतक अग्निदेकर स्वाङ्गशीतल होनेपर निकालकर रखछोड़े इसमेंसे १-१ रत्ती पानकेरसकेसाथ देनेसे शीतज्वर और विषमज्वरको नष्टकरताहै। त्रिकटुकेसाथ देनेसे त्र्युल्बणसन्निपात नष्टहोताहै । कूष्माण्डके रसकेसाथ प्रभापातज्वर दूरहोताहै । बकरीके दूधसे शीतज्वर, इमलीकीराखके पानीसे गुल्म; सेंधेनमककेसाथ आठोंशूल भंगरेके रसकेसाथ श्लेष्मरोग और तत्तद्रोगहराऽनुपानकेसाथ देनेसे सभीरोगोंको यह नष्टकरताहै ॥ ३५७ ॥

३५८ नवग्रहरसः (द्वितीयः)

गौरी शिला हिङ्गुलगन्धकञ्च
रसश्च दुग्धाऽश्ममयूरतुत्थम् ।
तालं शिला खर्परसंयुतञ्च
कृत्वा समांशं नवखल्वमध्ये॥१५५१॥
सकारवल्लीरसनिम्बतोयैः
यामद्वयेनाऽपि विमर्द्य गाढम् ।
कूप्याश्च मध्ये विनिवेशयेच्च
सवालुकाऽग्निं च दिनं ददीत १५५२॥
सुस्वाङ्गशीतञ्च समुद्धरेत्तं
व्रीहिप्रमाणं नवनीतयुक्तम् ।
समस्तवातादिसपायुजञ्च
सग्रन्थिकोटिम्बिहुमार्गजालम् १५५३
निवारयेच्चाऽपि विचित्रमेत-
न्नीरोगदेही सुखमाप्नुयाच्च ।
नवग्रहो नाम रसोत्तमो हि
समस्तगुल्मोदरशूलनाशी ॥१५५४॥

र. क. यो. गुल्मे शूले च ।

भाषा—सोमल, शिंगरिफ, गन्धक, पारा, गोदन्ती तुत्थ, हरिताल, मैनसिल, खपरिया येसब समभाग लेकर बारीक चूर्णकर करेला और नीमके रसोंसे २-२ पहर मर्दनकर सुखाकर ६-७ कपड़मिट्टीदीहुई आतशी शीशीमे डालकर मुंहबन्दकर वालुकायन्त्रमे रख एकरोज अग्नि जलाकर स्वाङ्गशीतलहोनेपर निकालकर रखछोड़े। इसमेंसे १चावलभरमात्रा मक्खनकेसाथ देनेसे समस्तवातविकार, बवासीर ग्रन्थि, फैलनेवाला फोड़ा,इनसबको यह नष्टकरताहुवा शरीरको नीरोगकर गुल्म तथा शूलको नष्टकरताहै ॥

३५९ नवजीवनरसः

सिन्दूरं विषमुष्टिश्च चित्रकाऽभ्रकलोहकम् ।
पृथक्कर्षद्वयं सर्वं त्र्यूषणं वेदकर्षकम्॥१५५५॥
चित्रकाऽऽर्द्रकनिर्यासैर्नागवल्लीदलद्रवैः ।
भावयित्वा वटीं कुर्यात्त्रिगुञ्जाफलमानतः ॥
तत्तद्रोगाऽनुपानेन सर्वान्रोगान्नियच्छति ।
दीपनः पाचनश्चैव बलसञ्जननः परः ॥
हृदयोत्थापने दक्षो रतौ प्रीतिविवर्धनः ।
शूलाऽऽध्मानाऽतिसारांश्च नाशयेन्नवजीवनः ॥

नृ. क., सर्वरोगे ।

भाषा—रससिन्दूर, लोह और अभ्रकभस्म, शुद्धकुचिला, चित्रकमूल, येप्रत्येक २—२ तोले, त्रिकटु ४ तो. लेकर सबकाबारीक चूर्णकर चित्रक, अदरख, पान इन प्रत्येकके रसोंसे १—१ रोज घोटकर ३—३ रत्तीकी गोलियें बनाकर रखछोड़े । इनमेंसे १—१ गोली तत्तद्रोगहराऽनुपानकेसाथ देनेसे मन्दाऽग्नि,बलहानि, हृदयव्यापारकी शिथिलता, शूल, आध्मान, अतिसार इनसबको यह नष्टकरताहै।

स्त्रीसङ्गमें अधिकइच्छाको उत्पन्नकरताहै तथा स्तम्भनकरताहै ॥ ३५९ ॥

३६० नवज्वरभैरवीवटी

सूताऽमृताऽनलविषा बृहती सपाठा
तालो हलो बलिवसा विषतिन्दुकञ्च ।
ताप्यं रसो वनसुतासुरसारसेन
सम्मर्दयेन्मुनिमितान्मिलितं समांशम् ॥
क्षुद्रारसेन दिवसत्रितयं गुडूची-
तोयेनवासरयुगं परिमर्द्य यत्नात् ।
शाणाऽधिकाः प्रविकिरेद्गुलिकास्ततस्ताः
सच्छृङ्गवेरसलिलेन सितायुतेन १५६०
संसेविता जयति तापमशेषमुग्रं
नव्यक्षयं ज्वलनमान्द्यमपीह कृच्छ्रम् ।
श्रीभैरवेण कथिता किल भैरवीयं
पथ्याऽशिनां मधुरमुद्गरसाशिनाञ्च ॥

रसावतारे, ज्वरे ।

भाषा—शुद्धपारा, बछनाग, चित्रक, अतीस, भटकटैया, पाठा, हरितालभस्म अथवा रसमाणिक्य, कलिहारीकीजड़, शुद्धगन्धक और कुचिला, सोनामाखी, पारा सब समभागलेकर सबचीजोंका बारीकचूर्णकर पारेगन्धककी नीलवर्णकज्जलीमें मिलाकर अनन्तमूल और बाकुचीके रसोंसे सातदिन मर्दनकर भटकटैयाके रसमें ३दिन और गिलोयके रसमें२ दिन मर्दनकर ४–४ माशेकी गोलियें बनाकर रखछोड़े। इनमेंसे १–१ गोली अदरखकेरसमें शक्कर मिलाकर इसके साथ लेनेसे तमामज्वर, नवीनक्षय, मन्दाऽग्नि, मूत्रकृच्छ्र इनसबको यह नष्टकरतीहै । इसमें मूंगके यूषके साथ मधुरभोजन देना ॥ ३६० ॥

३६१ नवज्वरमुरारिरसः

हरश्च गन्धकश्चैव कुनटी च समंसमम् ।
मर्द्य कर्कोटिकायाश्च रसेन विनियोजयेत् ॥
नवज्वरमुरारिः स्याद्दल्लं शर्करया सह ।
तन्दुलीयरसेनाऽनुपानं शर्करयाऽपि वा ॥
गुञ्जाद्वयप्रमाणेन ज्वरान्हन्ति नवान् हठात् ॥

र. र. स., नवज्वरे ।

भाषा—शुद्धपारा, गन्धक, मैनसिल समभाग लेकर नीलवर्णकज्जलीकर बांझककोड़ेके कंदकेरससे १ रोज मर्दनकर २–२ रत्तीकी गोलियें बनाकर रखछोड़े । इनमेंसे १–१ गोली शक्करमिलेहुए चौलाईके रसकेसाथदेनेसे यह तमामज्वरोंको नष्टकरताहै । नवीनज्वरकोतो दोही रत्तीमें दूरकरताहै ॥ ३६१ ॥

३६२ नवज्वररिपुरसः

ताम्रं पत्रमयं प्रताप्य बहुशो निर्वाप्य पञ्चाऽमृते
गोमूत्रेऽग्निजलेबलिद्विगुणितंम्लेच्छेनपिष्टेन च ।
लिप्त्वा सम्यमृदंशुकैरथपुनः सायुद्रयामान् पचे-
द्यन्त्रेलावणिकेनवज्वररिपुःस्याद्गुञ्जयासम्मितः

र. चि., रसायनसं., र. सु., र. का., यो. म., नवज्वरे । योगमहार्णवे आर्द्रकरसः अनुपानत्वेन उपदिष्टः ॥

भाषा—तांबेके बारीकपत्र बनाकर गरमकर पञ्चामृतमें ७ बार बुझावे । फिर गोमूत्र और चित्रककेक्काथमे ७–७ बार बुझाकर दूने गन्धक और सिंगरिफको नींबूके रससे पीसकर पत्रोंपर चढ़ाय गोलाबनाय सुखाकर शरावसम्पुटमें रख ७ कपड़मिट्टीदेकर सुखाकर लवणयन्त्रमें बन्दकर ४ पहरकीकड़ीआंचमे पकाकर स्वाङ्गशीतलहोनेपर निकालकर रखछोड़े । इसमेंसे १–१ रत्ती समयोचितानुपानकेसाथ देनेसे यहतमामज्वरोंको नष्टकरताहै ॥

३६३ नवज्वरहरी वटी

सूतगन्धविषव्कत्रिफलाभि-
र्व्योषमार्द्ररसतो वटिकैषा ।
हन्ति मुद्गतुलिता नवमद्धा
स्वागतेव वनिताऽखिलतापम्॥१५६५॥

र. सं., र. शि., ज्वराधिकारे ।

भाषा—शुद्धपारा, गन्धक और बछनाग, कुठ, त्रिफला, त्रिकटु, सबसमभाग लेकर सबकाबारीकचूर्णकर पारेगन्धककी नीलवर्णकज्जलीमें मिलाकर अदरखकेरससे एकरोज मर्दनकर मूंगबराबरगोलियें बनाकर रखछोड़े । इनमेंसे १-१ गोली

समयोचितानुपानकेसाथ देनेसे एकरोजमें यह तमाम नवीनज्वरोंको नष्टकरतीहै। ३६३

३६४ नवज्वरहरो रसः

रसबलिटङ्कणदरदं सशुल्वजैपालकं क्रमतः।
द्विद्विद्वित्रिद्विकरसतुलितं दन्तीरसैस्त्रिदिनम्॥
भावितमथ तद्गुञ्जाद्वयमिह देयं सितासहितम्।
सद्राक्षं वा तक्रं दद्यात्पथ्यं ज्वरहरो यामात्॥

र. का. ज्वरे।

भाषा—शुद्धपारा, गन्धक और भुनासुहागा२-२ भाग, शिंगरिफ३ भाग, ताम्रभस्म २ भाग, शुद्धजमालगोटा ६ भा., लेकर पारेगन्धककी नीलवर्णकज्जलीमें सबको मिलाकर दन्तीमूलके स्वरससे ३ रोजमर्दनकर गोलाबनाय शरावसम्पुटमे बन्दकर सुखाकर गजपुटकीआंचदे। स्वाङ्गशीतल होनेपर निकालकर रखछोड़े। इसमेंसे१—१रत्ती शक्करअथवाद्राक्षकेसाथ देनेसे यह तत्काल नवीनज्वरकोएकपहरमे दूरकरता है पथ्यमे छाछदेना। ३६४

३६५ नवज्वराङ्कुशरसः

क्रमेण वृद्धात्रसगन्धहिङ्गुला-
नैकुम्भबीजान्यथ दन्तिवारिणा।
विमर्द्य गुञ्जाऽस्य नवज्वरापहा
जलेन चार्द्रासितया प्रयोजिता॥

र. सं., र. र. स., र. क. ल., र. च., टो., वृ. यो., त., र. शं., र. सु., र. का., ध., रसायनसं., भै. र., यो. म., नि. र., र. सि., र. र. दी., चि. र. म., भै. सा., चि. र., र. (भा.), र. क., भा. प्र., चि. क., र. र. कौ., भा. वि., र. को., नवज्वरे। र. र. समुच्चये गन्धको निष्कासितः नाम च वृद्धज्वराङ्कुशेति। र. र., कौ., नारायणविलासयोः रसगन्धहिङ्गुलाः समभागेन नियोजिताः नाम च शीतभञ्जीति स्थापितम्। रसायनसङ्ग्रहे जयरसेति नाम द्वितीयस्थाने ज्वराऽङ्कुशेति नाम। वृ. यो. त., योगमहार्णवे च ज्वरभ्नीति नाम। र. सि., चिन्तामणिः। चि. क. शीघ्रज्वरारिः।

भाषा—शुद्धपारा १ भाग, गन्धक २ भा. शिंगरिफ ३भा. दन्तीबीज ४ भा. लेकर पारेगन्धककी नीलवर्णकज्जलीकर दन्तीमूलकेरससे मर्दनकर १-१ रत्तीकी गोलियें बनाकररखछोड़े। इनमेंसे १-१ गोली अदरख, शक्कर अथवा जलकेसाथ देनेसे यह तमामनवीनज्वरोंको नष्टकरताहै॥ ३६५॥

३६६ नवज्वरारण्यकृशानुमेघरसः

विमर्दिताभ्यां रसगन्धकाभ्यां
नीरेण कुर्यादिह गोलकं तम्।
भाण्डे नवीने विनिवेश्य पश्चा-
त्तद्गोलकस्योपरि ताम्रपात्रम्॥१५६९
सार्धं मुहूर्तं विनिरुद्ध्य धीमा-
नुद्दीपयेद्दीप्तकृशानुनाऽस्य।
अधस्ततः सिद्ध्यति पर्पटीयं
नवज्वरारण्यकृशानुमेघः॥ १५७०॥
विलिप्य पूर्वं रसनाश्च तालु-
देशश्च सिन्धूद्भवजीरकार्द्रैः।
वल्लोन्मितां चाऽऽर्द्रकतोयमिश्रा-
मेनां नियोज्य स्थगयेत्पटेन॥१५७१
घर्मोद्गमो यावदतः परश्च
तक्रौदनं पथ्यमिह प्रयोज्यम्।
कुर्याद्दिनानां त्रितयं यदीत्थं
ज्वरस्य शङ्काऽपि तदा भवेत्किम् १५७२

र. र. स., र. च., र. कौ., र. सु., र. र. का., र. म.मा., नवज्वरे। र. चं. ज्वराङ्कुशेति र. र. स., र. र. कौ.दयोः द्वितीयस्थाने नवज्वरारिः इति नाम स्थापितम् र. सु., पर्पटीरसः।

भाषा—शुद्धपारा, गन्धक समभागलेकर नीलवर्ण कज्जलीकर पानीसे पीसकर गोलाबनाय नवीन भाण्डमें रखकर इसकी बराबरके ताम्रपत्रसे ढकदे और सन्धिबन्दकर ३ घड़ीकी तीव्र अग्निमें पकावे स्वाङ्गशीतल होनेपर निकालले यह पर्पटीरस तैयार हुआ इसको पीसकर रखछोड़े। फिर अदरखके रसमें सेंधानमक और जीरा डालकर जीभ और तालुको पोतकर इस पर्पटकी ३ रत्ती अदरखके रसकेसाथ देकर गरमकपड़ेसे ढकदेवे, इससे नव-

पसीना होजाय तब छाछभात खानेको दे । ऐसे ३ रोज करनेसे ज्वरकी शङ्कातक नहीं रहती ॥३६६॥

३६७ नवज्वरारिरसः

सूताऽयोऽभ्रकताम्रगन्धरसकंतुल्यांशकं मर्दयेत्,
कन्यापर्पटनिम्बवासकशिवा-
तिक्ताम्बुभि र्नामियुक् ।
सिद्धोवल्लमितो जयेदभिनवं तापं कणाक्षौद्रयुक्,
गोक्षूरत्रिफलापटोलमधुयुग्द्राक्षाऽत्र विश्वायुता

र. अम्लपित्ताऽधिकारे ।

भाषा—शुद्धपारा, गन्धक, लोह, अभ्रक और ताम्रभस्म, खपरिया येसब समभागलेकर पारेगन्धककी नीलवर्ण कज्जलीमें मिलाकर घीकुंआर, पित्तपापड़ा नीम, अडूसा, हर्रे, कुटकी, इनके यथासम्भव स्वरस अथवा क्वाथोंसे १–१ रोज मर्दनकर ३–३ रत्तीकी गोलियें बनाकर रखछोड़े । इनमेंसे १–१ गोली पीपल और मधुकेसाथ अथवा गोखरू, त्रिफला, परवल इनके क्वाथ अथवा चूर्ण और मधुकेसाथ अथवा द्राक्षायुक्त सोंठके साथ देनेसे अभिनवज्वर दूरहोता है ॥ ३६७ ॥

३६८ नवज्वरारिरसः

मरिचं पिप्पलीं शुण्ठीं दरदाऽऽमलटङ्कणम् ।
कर्षमानमिदं सर्वं नेपालं पलसम्मितम् ॥
मातुलाऽऽर्द्रकतोयेन गुटीं गुञ्जोन्मितां भिषक्
कृत्वा शीताऽम्भसा दद्यान्नवज्वरहरं परम् ॥

नृ. क., ज्वराऽधिकारे ।

भाषा—त्रिकटु, शुद्धशिंगरफ, आंवले, सुनासुहागा, येप्रत्येक १–१ तोला, शुद्धजमालगोटा ४ तोले लेकर सबको बारीक पीस धतूरा और अदरखके रससे १–१ रोज मर्दनकर १–१ रत्तीकी गोलियें बनाकर रखछोड़े । इनमेंसे १–१ गोली ठंढेपानीसे देनेसे, यह नवज्वरोंको नष्टकरता है ॥

३६९ नवज्वरेभसिंहोरसः

शुद्धसूतं तथा गन्धं लोहं ताम्रञ्च सीसकम् ।
मरीचं पिप्पलीं विश्वं समभागं विचूर्णयेत् ॥

र. सा. ८५

अर्धभागं विषं दद्यान्मर्दयेद्वासरद्वयम् ।
भृङ्गेराऽनुपानेन दद्याद्गुञ्जाद्वयं भिषक् ॥
नवज्वरे महाघोरे वातसङ्ग्रहणीगदे ।
नवज्वरेभसिंहोऽयं सर्वरोगे प्रयोजयेत् १५७८

र. सं., र. का., र. चं., यो. म., वै. क., र. मु., भै. र., र. मं., रसायनसं., व. रा., र. प्र., भै. सा., नि. र., र. चि., नवज्वरे । रसराजसुन्दरस्य द्वितीयस्थाने मन्थानभैरव नाम्ना दृश्यते भै. सा., रोगमुरारीति ।

भाषा—शुद्धपारा, गन्धक, लोह, ताम्र, नागभस्म, त्रिकटु येसब १–१ तोला, शुद्धबछनाग ६ माशे लेकर सबको बारीक पीसकर पारेगन्धककी नीलवर्ण कज्जलीमें मिलाकर रखछोड़े । इनमेंसे २–२ रत्ती अदरखके साथ देनेसे महाघोर नवज्वर, वातज संग्रहणी, कास, श्वास, इनसबको यह नष्टकरताहै ॥

३७० नवज्वरेभाङ्कुशरसः

बीजं भवस्याऽथगिरेशपुत्र्या-
स्सशोषणं टङ्कणशुभ्रखण्डम् ।
मीनस्य पित्तैरथ भावितं वै
नवज्वरारिः प्रथितस्तु लोके ॥ १५७९
खण्डं समानञ्च वदन्ति चाऽत्र
तद्भक्षणे वल्लयुगञ्च मानम् ।
तथाऽऽर्द्रकोत्थेन रसेन देय-
स्त्रिरात्रितोऽयं ज्वरनाशनेऽलम् ॥
शान्ते तापे तत्र युक्तश्च पथ्यं
वृन्ताकाद्यं तक्रयुक्तञ्च भक्तम् ।
पित्ताऽऽधिक्ये मूर्ध्नि तोयं निपात्यं
तापाऽपायं कारयेत्सद्भिषग्यः ॥१५८१

चि. क., र. चं., नि. र., र. मु., र. रा., रसायनसं, वै. वि., र. ल., र. सं., वै. चि., यो. र., नवज्वरे । रसेन्द्रसारसङ्ग्रहे ऊषणस्थाने तालकं नियोजितम् । चि. क. कल्प वल्लीं विहाय सर्वत्र शर्करायाः अभावो दृश्यते ।

भाषा—शुद्धपारा, गन्धक, मरिच, सुनासुहागा, मिश्री येसब समभागलेकर मछलीकेपित्तेसे २-४ भावनाएं देकर ६-६ रत्तीकी गोलियें बनाकर रखछोड़े । इनमेंसे १-१ गोली अदरखके रसकेसाथ

देनेसे ३ रोजमे यह तृतीयकज्वरको नष्टकरतीहै। बुखारउतरजानेपर वृन्ताक, और छाछयुक्तभातदे। पित्तकी अधिकतामे शिरपर जलकी धाराएँदे और पित्तघ्न तमाम उपचारकरे॥ ३७०॥

३७१ नवज्वरेभाऽङ्कुशरसः

रविरसगन्धकटङ्कणवृद्धया
जयपालरेणुना सहितम्।
सम्मर्घाऽऽर्द्रकनीरे दिनत्रयं याति सिद्धत्वम्॥
ससितं वल्लमितं तद्विरेचनं स्वेच्छया कुरुते।
पथ्यं ससितं देयं दधियुक्तं तक्रयुक्तं वा॥
एवं विशुद्धदेहो यो मृगाङ्कं सेवते युक्त्या।
स जयति यक्ष्मरोगं प्राप्नोति च चिराऽऽयुष्यम्
उपद्रवोपचारस्तु रसमात्रे प्रयोजयेत्।
क्षयोपयौगिकं पथ्यं यदुक्तं तन्नियोजयेत्॥

र., क्षये।

भाषा—ताम्रभस्म १ भा; शुद्धपारा २ भा; गन्धक ३ भा; सुहागा ४ भा; शुद्धजमालगोटा ५ भा., लेकर पारेगन्धककी नीलवर्णकज्जलीकर सबको इकठे मिलाय ३ रोज अदरखकेरससे घोटकर ३ रत्तीकी गोलियें बनाकर रखछोडे। इनमेंसे १—१ गोली ठंढेपानीकेसाथलेकर जितनीवार ठंडापानी-पीवेगा उतनेहीदस्तहोंगे, गरमपानीपीनेसे बंदहोजां-यगे। पथ्यमे शक्कर, दही, भात और छाछदे। इसतरह विशुद्ध शरीरहोकर बादमें जो मृगाङ्कका सेवनकरताहै वह यक्ष्मरोगसे निवृत्तहोकर दीर्घायुको-प्राप्तहोताहै। इसमे दाहादिकउपद्रवहोंतो उनका-उपचार दूसरे रसोंकीतरहकरे। क्षयकेलिये जो पथ्य कहागयाहै वह देवे॥ ३७१॥

३७२ नवनाथरसः

विषं विषां द्वितुल्यश्च रसको हि शिला वचा।
तालकं गन्धकं तुल्यं मर्दितं लशुनद्रवे॥
दोलायन्त्रे दिनं पाच्यं भाव्यं जम्बूकपित्तकैः।
गुञ्जामात्रं प्रदातव्यमजाक्षीराऽनुपानतः॥
आह्निकास्थिगतं दोषं शीतजूर्तिं हरेत्परम्।
क्षीराऽन्नं शर्करायुक्तं भोजयेद्घृतसंयुतम्॥
दाहे शीतजलं पेयं नारिकेलोदकं तु वा।
प्राणिनां हितदो नित्यं नवनाथरसोत्तमः॥

वै. चि., भा., अस्थिगतज्वरे।

भाषा—शुद्धवछनाग, अतीस, तुत्थ, कसीस, खपरिया, मैनसिल, वच, हरिताल और, गन्धक सबसमभागलेकर लशुनके पानीसे एकरोज मर्दन-कर गोलाबनाय दोलायन्त्रमें १ रोज लशुनके द्रवसे स्वेदनकर शृगालके पित्तसे भावनादेकर १-१ रत्तीकी गोलियें बनाकर रखछोडे। इनमेंसे १—१ गोली बकरीके दूधकेसाथ देनेसे रोजका अस्थिगत शीतपूर्वकज्वर नष्टहोताहै दूधभात, शक्कर और घीकेसाथ भोजनकरावे। दाहहोनेपर शीतलजल और नारियलकापानी पिलावे॥ ३७२॥

३७३ नवनेत्रदाम्रीवटी

ताम्राऽभ्यलवणशङ्खै
स्तुल्यामगधोद्भवाऽथ वै धात्री।
जलपिष्टा गुलिकेयं सायंसमयाऽऽन्ध्यमपहरति

र. र. स., नेत्ररोगे।

भाषा—ताम्रिकाचूर्ण, सैन्धव, शङ्ख, येसबसम-भाग, इनतीनोंकीबराबर पीपल और आंवलेकाचूर्ण मिलाकर पानीकेसाथ ४—५ रोज मर्दनकररखछोडे सायंकालमे इसको पानीकेसाथ घिसकर अञ्जनक-रनेसे रतोंधी दूरहोतीहै॥ ३७३॥

३७४ नवनेत्रदावटी

द्विरष्टौ ताम्ररजसो मधुकस्य चतुर्दश।
कुष्ठस्य द्वादशांशाः स्युर्वचायाश्च दशैव तु॥
रजतस्य च चत्वारो द्वौ भागौ कनकस्य च।
सैन्धवस्याऽष्टसङ्ख्याता पिप्पल्याश्च षडेव तु॥
अजाक्षीरेण सम्पेष्य ताम्रपात्रे निधापयेत्।
अभिष्यन्दमधीमन्थं व्रणशुक्रं कुकूणकम्॥
तिमिरं पटलं काचं कण्डूं हन्ति विशेषतः॥

र. र. स., नेत्ररोगे।

भाषा—तांबेका बारीकचूरा १६ भाग, मुलहठी १४ भाग, कुठ १२ भा., वच १० भा., चांदीका चूरा ४ भा., सोनेका चूरा २ भा., सैन्धव ८ भा., पीपल ६ भा., इनसबको इकट्ठेकर बकरीके दूधसे ताम्रपात्रमें तांबेके सोटेसे ६–७ रोज मर्दनकर गोलियें बनाय सुखाकर रखछोड़े। इनका बकरीके दूधसे अञ्जनकरनेसे अभिष्यन्द, अधिमन्थ, व्रण, धौलापन, कुकूणक, तिमिर, जाला, मोतिया, खाज इनसबको यह नष्टकरतीहै ॥ ३७४ ॥

३७५ नवायसम् (महत्)

चपला मरिचं विश्वं शिवा पथ्या च पारदः।
विडङ्गमुस्ते वह्निश्च निशे दार्वी च धान्यकम्।
रेणुका पिप्पलीमूलं गगनं तीक्ष्णलोहकम्।
कान्तलोहं समांशानि मण्डूरं द्विगुणं भजेत् ॥
निष्कमात्रं घृतक्षौद्रैर्ग्रहणीपाण्डुशोफके।
अष्टोदरेषु गुल्मेषु कामलाक्षयरोगिषु ॥
महानवायसं ख्यातं जठरे परमौषधम् १५९६

र. क. यो., पाण्डौ। टि०—अत्रयोगेऽष्टादशद्रव्ययोगत्वादुचितमेवमहानवायसमिति संज्ञा।

भाषा—त्रिकटु, आंवले, हर्रे, पारा, विडङ्ग, मोथा, चित्रक, हल्दी दारुहल्दी, धनियां, रेणुका, पिपलामूल, अभ्रक, फौलाद, कान्तलोहभस्म येसब समभागलेकर सबसे दूनी मण्डूरभस्म मिलाकर रखलेवे। इसमेंसे ३–३ माशे घी और मधुकेसाथ खानेसे पाण्डु, ग्रहणी, शोथ, आठप्रकारके उदररोग, गुल्म, कामला, क्षय, मन्दाग्नि येसब नष्टहोतेहैं ॥

३७६ नवायसरसायनम्

विडङ्गत्रिफलाकाथश्चित्रको वृक्षको परः।
इन्द्रलेखायसश्चूर्णं भृङ्गराजरजोऽपि च १५९७
क्रमाद्विवृद्ध्या संयुक्तं तेनैव सुपरिप्लुतम्।
नवायससन्निभं नाम रसायनमनुत्तमम् १५९८
कुष्ठानि शमयत्येतत् षडर्शांसि न संशयः।
सर्वाङ्गव्यापकमपि श्वित्रमाशु निहन्ति च ॥
शूलश्वासक्रिमीन्हन्ति यक्ष्महृद्रोगनाशनम्।
एषां मध्ये क्षिपेत्ताप्यं भस्माऽऽयसमिदं ततः
एकादशाऽऽयसं वाऽपि भवत्यश्मजतूत्कटम्।
द्वादशाऽऽयसमेतच्च नीलाऽभ्रकसमन्वितम्
इदं रसायनवरं सर्वव्याधि विनाशनम्।
कुष्ठं श्वित्रं जरां हन्यात् किं चित्रं बलवर्णदम्
सर्वान्रोगान्निहन्त्याशु कृपया शम्भुनोदितम् ॥

र. क., कुष्ठे। अत्र त्रिफलायास्त्रित्वगणनया नवसङ्ख्या पूर्णाभवति।

भाषा—विडङ्गकाक्वाथ १ भा., त्रिफलाकाक्वाथ २ भा., चित्रक ३ भा., थूहरकादूध ४ भा., बाकुची ५ भा., लोहभस्म ६ भा., भंगरा ७ भाग लेकर सबका बारीकचूर्णकर भंगरेके रससे १ भावनादेकर रखछोड़े। यह त्रिफलारसायनतैयारहुआ। इसमेंसे ३–३ माशे घी और मधुकेसाथ देनेसे समस्तकुष्ठ, सबप्रकारके बवासीर, समस्ताङ्गव्यापकश्वित्र, शूल, श्वास, कृमि, राजयक्ष्म, हृद्रोग, इनसबको यह नष्टकरताहै। इसमें सबकीबराबर सोनामाखी डालदेनेसे भस्माऽऽयस होताहै। भस्मायसमें उसकी बराबर शिलाजतु डालनेसे एकादशायस होताहै। एकादशायसमें समभाग अभ्रकभस्म डालनेसे द्वादशाऽऽयस होताहै। यह द्वादशाऽऽयस पथ्यपूर्वक सेवनकियाजायतो कुष्ठ, श्वित्र, बलवर्णनाश वगैरह समस्तरोगोंको नष्टकरताहुआ बुढ़ापेको दूरकरताहै ॥ ३७६ ॥

३७७ नवाऽऽयसलोहम् (प्रथमम्)

त्र्यूषणं त्रिफला मुस्तं विडङ्गं चित्रकाः समाः।
नवाऽयोरजसोभागास्तच्चूर्णं क्षौद्रसर्पिषा ॥
भक्षयेत्पाण्डुहृद्रोगकुष्ठार्शःकामलाऽपहम्।
नवाऽऽयसमिदं चूर्णं कृष्णात्रेयेण भाषितम् ॥
गोमूत्रेण पिबेद्वातपाण्डुरोगञ्च नाशयेत्।
शोथहृद्रोगमुदरं कृमिकुष्ठभगन्दरम् ॥
नाशयेदग्निमान्द्यञ्च दुर्नामकमरोचकम्।
आर्द्रकस्य रसेनाऽपि लीढं कफसमुद्भवम् ॥
गुञ्जामेकां समारभ्य यावत्स्यु र्नवरक्तिकाः।

तावल्लोहं समश्नीयाद्यथादोषबलं नरः ॥
नवायसमिदं चूर्णं नरोऽष्टादशरक्तिकाः ।
प्रलिह्यान्मधुसर्पिर्भ्यां पिबेत्तक्रेण वा सह ॥

च. सं., सु. सं., ना., वि., र. प्र., रसायनसं., र. क. ल., वृ. यो. त., लो. प. (स.), र. चं., अ. हृ., ग. नि., वै. र., यो. म., र. सु., यो. र., भा. प्र., चि. र. भ., नि. र., चि. र., वै. द., वै. क., र. क., वै. वि., र. र., र. का., भै. र., वृ. मा., च. द., या., ना. सं., वै. चि., अ. सं., टो., र. (मा.), यो. त., ध. रा., पाण्डुरोगे । वसवराजीये मुस्तं न दृश्यते नाम च महायसच्चूर्णेति स्थापितम् । *योगमहार्णवे–एवं सति प्रथमदिवसे त्र्यूषणादिसहितं* रक्तिकाद्वयमितं खादेत् । ततः प्रतिदिनं रक्तिकाद्वयंद्वयं वर्द्धयेत् । एवं त्र्यूषणादिसहिता अष्टादशरक्तिकाः स्युस्ततस्ताः प्रतिदिनं खादेत् इत्यधिकः । चि. र. भ., **शोथाग्निवटीतिनाम** स्थापितम् ॥

भाषा—त्रिकुटु, त्रिफला, नागरमोथा, विडङ्ग, चित्रक येनव चीजें समभाग, लोहभस्म ९ भाग, लेकर सबको इकट्ठेमिलाय रखछोड़े । इसमेंसे १ माशाचूर्णमधु और घीकेसाथलेनेसे पाण्डु, हृद्रोग, कुष्ठ, ववासीर और कामला इनको दूरकरताहै । गोमूत्रकेसाथ लेनेसे वातपाण्डु, शोथ, हृद्रोग, कृमि, कुष्ट, भगन्दर, अग्निमान्द्य, बवासीर और अरोचक इनको यह नष्टकरताहै । अदरखकेरससे लेनेसे अत्यन्तबढ़ेहुए कफको दूरकरताहै । अत्यन्त कमजोर आदमीको १ रत्तीसे आरम्भकर ९ रत्तीतकबढ़ावे । बलवान् आदमीकेलिये १८ रत्तीतकबढ़ावे । मधु और घी इसका साधारण अनुपानहै । ग्रहणीवगैरहमें तक्रकेसाथभी देसक्तेहै ॥ ३७७ ॥

३७८ नवायसलोहम् (द्वितीयम्)

[illegible]
[illegible]म् ।
चूर्णं नवायोरसभागसंयुतं
समाक्षिकं पाण्डुगदाऽपहं परम् ॥

र. (मा.) पाण्डुरोगे । नवायोरसभागसंयुतमित्यत्र–अयोनव, रसस्य–सिद्धपारदस्य भागेन-एकभागेन संयुतं पूर्व चूर्णं कर्तव्यमित्यर्थः करणीयः ।

भाषा—शुद्धपारद भस्म १ भा., नागरमोथा १ भा., गिलोय २ भा., चित्रक ३ भा., मुलहठी ४ भा., पीपल ५ भा., विडङ्ग ६ भा., सोंठ ७ भा., त्रिफला ८ भा., लोहभस्म ९ भाग, लेकर सबको इकट्ठेमिलाकर रखछोड़े । इसमेंसे १ रत्तीसे आरम्भकर ९ रत्तीतक बढ़ाकर मधुकेसाथ लेनेसे पाण्डुरोगको यह नष्टकरताहै ॥ ३७८ ॥

३७९ नवायसलोहम् (तृतीयम्)

त्रिकटुत्रिफलैलाभिर्जातीफललवङ्गकैः ।
नवभागोन्मितैरेतैः समं तीक्ष्णं मृतं भवेत् ॥
सञ्चूर्ण्याऽऽलोडयेत्क्षौद्रे नित्यं यः सेवते नरः ।
कासं श्वासं क्षयं मेहं पाण्डुरोगं भगन्दरम् ॥
ज्वरं मन्दाऽनलं शोफं सम्मोहं ग्रहणीञ्जयेत् ॥

ग. नि., यो. र., वृ. यो. त., यो. म., वै. क., नि. र., राजयक्ष्मणि । यो. म. अग्निरस । वै. क., नि. र. त्रिकट्वादिलोहम् ।

भाषा—सोंठ, मिर्च, पीपल, हर्रे, बहेड़ा, आंवला, इलायची, जायफल, लौंग येप्रत्येक १–१ भागलेकर बारीकचूर्णकर सबकीबरावर लोहभस्म मिलाकर रखछोड़े । इसमेंसे १–१ माशा मधुमें मिलाकर खानेसे कास, श्वास, क्षय, प्रमेह, पाण्डु, भगन्दर, ज्वर, मन्दाग्नि, शोथ, चित्तविक्षेप, ग्रहणी इनसबको यह नष्टकरताहै ॥ ३७९ ॥

३८० नवायसलोहम् (चतुर्थम्)

त्र्यूषणं त्रिफला मुस्ता विडङ्गं चित्रकं समम् ।
भागमेकं लोहचूर्णं भावयेदिक्षुजै रसैः ॥
अष्टभागञ्च मण्डूरं दत्त्वा भाव्यञ्च पूर्ववत् ।
शीलितं तु मधुनाऽपि घृतेन
पाण्डुरोगहृदयाऽऽमयाऽपहम् ।
सेवितं प्रखरकामलाऽर्शसां
नाशनं खलु हलीमकस्य च ॥

हा. सं पाण्डुरोगे ।

भाषा—सोंठ, मिर्च, पीपल हर्रे, बहेड़ा, आंवला, नागरमोथा, विडङ्ग, चित्रक, लोहभस्म

ये प्रत्येक १ भाग और मण्डूर ८ भागलेकर सबका बारीकचूर्णकर इक्ष्वेरीक्साय ईसके रसकी भावना देकर रखछोड़े । इसमेंसे १—१ माशा घी अथवा मधुकेसाथसे सेवनकरनेसे पाण्डु, हृद्रोग, भीषणकामला अर्श, हलीमक, इनसबको यह नष्टकरताहै ३८० ॥

३८१ नवायसादियोगः

नवायसं निशायुग्ममभ्रकञ्च समाक्षिकम् ।
लीढमात्रमवता नित्यमामपाण्डुक्षयापहम् ॥

र. (मा.) पाण्डुधिकारे

भाषा—द्वितीयनवायसलोह, हल्दी, दारुहल्दी अभ्रकभस्मयेसबसमभाग मिलाकर १—१ माशालेकर पथ्यपूर्वक रहनेसे आम, पाण्डु और क्षय इनको यह नष्टकरताहै ॥ ३८१ ॥

३८२ नव्यचन्द्ररसः

शम्भोर्वीर्यं गलगतमथाङ्कोलबीजञ्च तीक्ष्णं,
चेतोधात्री समलवमिदं मार्कवं वेदभागम्,
श्लक्ष्णं पिष्ट्वा दहनसलिले याममात्रं त्रियामं,
भृङ्गस्याद्रि भवति रसराण्नव्यचन्द्राभिधानः,
वल्लंनिम्बाऽऽर्द्रकभवरसैः सेवितोयाममात्रा-,
चित्रं हन्याज्ज्वरमभिनवं तस्य तीव्रत्वशान्त्यै ।
दद्यादिक्षून्मधुरसयुतं दाडिमं शर्कराञ्च,
द्राक्षामुख्यं सदधिवितरेत्पथ्यमन्नं सुतक्रम् ॥

र. रा., र. प., र. सु., रसचि, टो., ना., वि., ज्वराधिकारे।

भाषा—शुद्धपारा और वछनाग, अङ्कोलमजा लोहभस्म, खड़ी तिपतिया येसब १—१ भाग, भंगरा ४ भाग लेकर बारीकचूर्णकर चित्रकके रससे १ पहर, भंगरेकेरससे ३ पहर मर्दनकरनेसे यहनव्यचन्द्ररस तैयार होगा । इसमेंसे२—२रत्ती नीम अथवा अदरखके रससे सेवनकरनेसे एकप्रहरमे नवीनज्वर को दूरकरदेताहै । इसकेदेनेसे अगर दाहमालूमहोतो ईखकारस, शकरकाशरबत, अनार, शकर, द्राक्षप्रभृति मेवा, दही और छाछ येचीजें देवे ॥३८२॥

३८३ नस्यभैरवः (प्रथमः)

कट्फलं देवदालीञ्च छिक्किकां समचूर्णिताम् ।
भावितां रविदुग्धेन शुष्कोऽयं नस्यभैरवः ॥
रसटङ्कसमायोगात्तन्महानस्य भैरवः ॥

र. चि., ज्वराऽधिकारे ।

वृत्तैःपाठभिदैव सङ्ग्रहकरै-
र्योगस्य भेदः क्वचित्।
भ्रान्त्या यो विहितोऽस्ति तत्र विहितं
योगैक्यमस्याकृतौ,
टिप्पण्यां निहिताऽस्ति तस्य विवृतिः
सन्दृश्यतान्तत्र सा ॥ १० ॥

भाषा—और भी बहुतसे स्थान ऐसे हैं जिनका कि मूलसे कुछभी पूर्वापर नजर नहीं आता। किसी २ रसमें वस्तुभेद न रहने पर भी दोतीनजगह एकही ग्रन्थमें नामान्तर करके पाठ लिखे हुए हैं। कहींपर वृत्तभेदसे पाठभेद कर दिये हैं। ऐसे २ रसग्रन्थोंमें गर्त पड़े हुए हैं उनका संशोधन इस ग्रन्थमें किया गया है। रसोंके नीचे जो टिप्पणी दी गई हैं उनमें दृष्टि देनेसे उनका पता लगेगा। इसको एकबार आद्योपान्त वांचे विना इस सूक्ष्मता का पता लगना मुश्किलहै कि ग्रन्थस्थ पाठोंके संशोधनमें कितना परिश्रम पड़ा है।

दुर्ज्ञेया परपूर्वतः क्वचिदपि ग्रन्थे विवक्षा तदा
पाठस्तत्रविशोधितः स्वधिषणाप्तप्रमाणानुगः
एतस्मिन्प्रभविष्णुतेश्वरदयाभावात्समासादिता
ग्रन्थान्ते विवृतिं तथैव विततां कर्तुंयतिष्यामहे

भाषा—कहीं २ पर पूर्वापरका बहुत विचार करने पर भी वक्तव्यार्थ स्पष्ट नहीं होताहै वहां पर स्वानुभवसामान्य तथा विशेषरसशास्त्रसिद्धान्त और आप्तोपदेशों की एकवाक्यता करके उचित पाठ करदिया गया है। दैववशात् कहींपर कुछ त्रुटी रहगई होगी तो उसका खुलासा ग्रन्थकी समाप्ति होनेपर किया जायगा। इतने बड़े कार्यमें सफल-होना केवल सर्वनियन्ता परमेश्वरकी कृपापर निर्भर है उसके विना मनुष्य कुछभी नहीं कर सक्ताहै ११

शब्दानां निगमन्तथैव विवृतिं
सर्वां रसानां क्रमात्,
आम्नायादिभिरन्यतोऽपि च यथा-
लाभं विधास्यामहे।
संस्कारांश्च यथाविधि स्वमतितः
शास्त्राद्रसानान्तथा,
नानौषध्यभिधा प्रमाणसहिता
तत्रैव चाऽऽलोक्यताम् ॥ १२ ॥

भाषा—इस (रसयोगसागर) में आये हुए रसोपरसों (धातूपधातुओं) की उत्पत्ति, गुणा-पगुण, शोधनमारणादि प्रकरणमें शास्त्र, परम्परा (सम्प्रदाय) तथा स्वानुभावसे सिद्ध प्रकार दिये जायंगे। इनके बाद रसयोगसागरीय द्रव्यों का वर्णन दिया जायगा ॥ १२ ॥

रोहिण्यादिपदानि यान्यविदिता-
नीह क्वचित्तत्र च,
शब्दार्थः सुनिदर्शितोऽवगतये
तेषामिह प्राकृते।
वेदेऽथर्वणि सूक्तमेकमखिलं यद्रोहिणीवर्णने,
तत्रार्थः किल सायणेन विहितो
लाक्षेति मान्यो न सः ॥ १३ ॥

भाषा—रोहिणी प्रभृति जो अप्रसिद्ध शब्द हैं उनका अर्थ टीकामें दिया गया है। **रोहिणी, मांसरोहिणी, कटुरोहिणी,** ऐसे तीन शब्द आये हैं उनमेंसे प्रथम दो शब्द तो रोहणवाचक हैं। और **कटुरोहिणी** यह कुटकी का नामहै। '**रोहिणी**' यह वृक्ष आम्रादि की तरह बहुत विशाल है इसके पत्तोंका सादृश्य जामुनके पत्तोंसे मिलता जुलता है। इसकी छाल बहुत मोटी होती है उसमें थोड़ीसी भी चोट लग जानेसे साफ़ लोही के सदृश द्रव निकलता है उसको एक पात्रमें रखकर लोहीके पात्रके साथ रख देवें. तो अच्छे २ लोगोंको भी व्यामोह हो जाता है। साधारणतः दोनों पात्रोंमें लोही ही बतावेंगे। इसको जङ्गली लोग सभी प्रायः सब देशोंमें '**रोहण**' नामसे जानते हैं। इसकी लकड़ी बहुत मज़बूत होती है। गृहाच्छादन प्रभृतिमें खासकर लगाई जाती है और हड्डी वग़ैरह टूट जाती है तो उस स्थानपर इसका द्रव लगा देते हैं बस लगानेकी ही देरी है रक्तप्रवाह तो उसी समय बन्द हो जाता है। और साधारण घाव तो २–४ घंटों में ही भर जाता है। अस्थिभग्नपर द्रव लगाकर इसकी छाल अथवा पत्तोंका कल्क लगाकर बांधनेसे तीनरोज़में घावका पताभी नहीं लगताहै कि कहांगया। सब जगह द्रव मिलना मुश्किल है इसलिये इसका शुष्क चूर्ण भी इस कामको करता है। इसके पुष्पोंकी धूलीभी इस कामको करती है। औरतों के प्रदर, मनुष्योंके उरःक्षत में भी इसके प्रत्येक अङ्गका उपयोग दूधके साथ करनेसे यह अत्यन्तही विलक्षण कार्यको करती है इसलिये (व्रणका आरोहण करनेसे) इसका नाम रोहिणी रक्खा है सुधन्वाके पुत्र ऋभ्वादिक (ऋभू १ विभ्व २ वाज ३) रोहिणीके काष्ठके रथसे समस्त अवयव बनाकर उसमें बैठकर अभेद्यशरीर होकर देवत्वको प्राप्त हुये हैं ऐसा **रोहिणीसूक्त**के सप्तम मन्त्रमें कहाहै । देखिये **रोहिणीसूक्त** "रोहण्यसि रोहण्यस्थ्न श्छिन्नस्य०" हे देवि त्वं यतश्छिन्नस्य अस्थ्नः रोहणीरोहणकर्त्र्यसि, अथ च अरुन्धतीं रुन्धासीति. अरुन्धति-वाह्याऽभ्यन्तरोभयरूपव्रणस्य रोहणकर्त्र्यसि अत इदं-मदीयं छिन्नमङ्गं त्वं रोहयेत्-रोहयेः, **व्यत्ययोबहुलमिति** व्यत्ययात्प्रथमपुरुषः । अथर्व कां० ४।१२।१ ॥ हे रोहणि ! ते-तव यत् **रिष्टं**-बहिर्भागादवघर्षणादिना कोमलशाखादिभ्योऽत्रमुक्तं सूक्ष्मं कोमलरजः यत्ते-तव **द्युत्तम्**-अधिकक्षतेन प्रकाशीभूतत्वग्यादिरूपमङ्गमस्ति, यच्च ते-तव पेष्ट्रम्-कल्कीकृतमथवा सम्यक् पिष्टं चूर्णितरूपमङ्गमस्ति तत् पूर्वोक्तं आत्मनि स्वशरीरे यः कश्चिदपि धाता-धारयाति स भद्रया-रोहण्या परुषा पर्वणा जातावेकवचनम्। परुः-पर्व पुनः-यथाऽवस्थितं सन्दधत् सन्दधाति-अच्छिन्नाऽवस्थमिव तत्स्थानं प्राप्नोति ॥ २ ॥

हे रोहिणि ते—मज्जाफलान्तर्गर्भेण मज्जा—मदीयशरीरमज्जा सम्भवतु अर्थात् दुग्धादिना पौष्टिकानुपानेन सह प्रयुक्तेन तव फलमज्जा अथवा स्तम्भसारेण नष्टाऽवस्थोऽपि मदीयशरीरमज्जा पुनः पूर्णावस्थो भवत्वित्यर्थः । ते-तव परुषा-सूक्ष्मस्नायुभिः, परुः मदीयाः स्नायवः सम्भवन्तु पुनः प्रादुर्भवन्तु । ते-तव मांसस्य शेषे षष्ठी व्यत्ययाद्वा तृतीयास्थाने षष्ठी बोध्या। मांसेन अन्तस्त्वचा विस्रस्तम्-अवलम्बितम्-सादृश्यन्मांसम्, अस्थि अपि संरोहतु-संहितं भवतु ॥ ३ ॥

"मज्जा मज्ज्ञा सन्धीयतां चर्मणा चर्म रोहतु ।
असृक् ते अस्थि रोहतु मांसं मांसेन रोहतु ॥ ४ ॥
लोम लोम्ना सङ्कल्पया त्वचा संकल्पया त्वचम् ।
असृक् ते अस्थि रोहतु छिन्नं सन्धेह्यौषधे" ॥ ५ ॥

प्रतिपादितस्यार्थस्यैव चतुर्थपञ्चममन्त्राभ्यामुपसंहारोऽस्ति ॥४॥ पञ्चम मन्त्रे लोमशब्देन पुष्पगुच्छके कर्कशं यद्रजो भवति तद्रजोऽजादुग्धेन जलेन वा पिष्ट्वा लेपनाद्रोमसञ्जननं भवतीति बोध्यम् ॥५॥ षष्ठसप्तममन्त्रयोरर्थः सायणभाष्यादवगन्तव्यः ॥ ६।७ ॥

सायणभाष्ये रोहिणीसूक्तविनियोगः

"रोहिण्यसि" इतिसूक्तेन शस्त्रायभिघातजनितरुधिर प्रवाहनिवृत्तये अस्थ्यादिभङ्गनिवृत्तये च लाक्षोदकं क्वथितं अभिमन्त्र्य उषःकाले क्षतप्रदेशं अवसिञ्चेत्। तथा अनेन सूक्तेन घृतदुग्धमभिमन्त्र्य क्षताङ्गं पुरुषं पाययेत्। तथा तेनैव द्रव्येण क्षतदेशं अभ्यञ्ज्यात्।

सूत्रितं हि। "रोहिणीत्यवनक्षत्रेऽवसिञ्चति पृषातकं पाययत्यभ्यनक्ति" इति (कौ. ४।४)

अथर्व ४।१२।१

रोहिण्यसि रोहिण्यस्थ्नश्छिन्नस्य रोहिणी।
रोहयेदमरुन्धति ॥ १ ॥

सा० भा० हे रोहिणि लोहितवर्णे लाक्षे। त्वं (रोहिणी) रोहित्री प्ररोहयित्री असि भवसि। अतस्त्वं खड्गादिधारया छिन्नस्य अङ्गस्य सकाशात् प्रवहतः अस्नः-असृजः। रुधिरस्य रोहिणी रोधयित्री स्वस्थाने स्थापयित्री भव। हे अरुन्धति अन्यैरनभिभूते अवरोधनशीले वा देवि इदम्-क्षुतरक्तम् अङ्गं रोहय प्ररोहय। सम्पूर्णरुधिरं अव्रणं कुर्वित्यर्थः ॥ १ ॥

यत् ते रिष्टं यत् ते द्युत्तमस्ति पेष्ट्रं त आत्मनि।
धाता तद् भद्रया पुनः सं दधत् परुषा परुः।

हे शस्त्राघभिहित ते तव यद् अङ्गं रिष्टम्-हिंसितम्। यच्च ते त्वदीयम् अङ्गं द्युत्तम् द्योतितं शस्त्रप्रहारादि जनितवेदनया प्रज्वलित मिव (अस्ति) भवति। तथा ते-तव आत्मनि शरीरे प्रेष्ठम्-प्रियतमं यद् अन्यद् अङ्गं मुद्गर प्रहारादिभिर्भग्नं भवति धाता सर्वस्य जगतो विधाता देवः तत् सर्वम् अङ्गं भद्रया कल्याण्या लाक्षारूपया ओषध्या परुषा पर्वणा परुः अन्यत् पर्व भग्नं पुनः सं दधत् संदधातु संयुनक्तु ॥ २ ॥

सं ते मज्जा मज्ज्ञा भवतु समु ते परुषा परुः।
सं ते मांसस्य विस्रस्तं समस्थ्यपि रोहतु ॥३॥

हे प्रहृत ते तव शरीरस्थो मज्जा एतत्संज्ञः षष्ठोधातुः प्रहारेण विभक्तः मज्ज्ञा-मज्जाख्यधातुना प्रहारविभक्तेन शम्-सुखं यथा भवति तथा भवतु संयुक्तो भवतु यद्वा भवतु प्राप्नोतु। तथा ते-त्वदीयशरीरस्य परुषा भग्नेन पर्वणा परुः-भग्नं पर्व शम् सुखं यथा भवति तथा प्राप्नोतु संधीयतामित्यर्थः। ते तव शरीरगतस्य प्रहाराभिघातेन यद् विस्रस्तं तत् शम् सुखं यथा भवति तथा (अपिरोहतु) अपिरोढं प्ररूढं पुनस्तथं भवतु। तथा तव शरीरगतं यद् अस्थि भग्नम् आसीत्तच (शम्) सुखेन प्ररूढं संहितं भवतु ॥ ३ ॥

मज्जा मज्ज्ञा संधीयतां चर्मणा चर्म रोहतु।
असृक् ते अस्थि रोहतु मांसं मांसेन रोहतु

मज्जाख्यो धातुः मज्ज्ञा मज्जधातुना संधीयताम्-संहितः संयुक्तो भवतु। चर्मणा शस्त्रादिप्रहारभिन्नेन चर्म रोहतु प्ररूढं भवतु। संयुज्यताम् इत्यर्थः। असृक्-रक्तं ते-त्वच्छरीरगतं यद् अस्नः सकाशाद् विश्लिष्टं पुनस्तद् अस्थि रोहतु प्राप्नोतु। मन्त्रौषधि-सामर्थ्येन संयुज्यतामित्यर्थः। यद्वा। चर्मणा चर्मेति तृतीयान्तस्य तत्र दृष्टत्वात् असृजा अस्थ्ना इति तृतीयान्ते पदे अध्याहृत्य योज्यम्। (असृजा) असृग् रोहतु अस्थ्ना अस्थि रोहत्विति। शिष्टं निगदसिद्धम् ॥ ४ ॥

लोम लोम्ना सङ्कल्पया त्वचा संकल्पया त्वचम्
असृक् ते अस्थि रोहतु छिन्नं संधेह्योषधे ॥

हे लाक्षात्मिकेऔषधे शरीरस्थं लोम लोम्ना प्रहारविश्लिष्टेन संकल्पय संक्लृप्तं पुनः स्वस्थानगतं कुरु। तथा त्वचमपि विश्लिष्टत्वचा संकल्पय संक्लृप्तां कुरु। असृक् ते अस्थि रोहतु इति पूर्ववत्। एवम् अन्यदपि छिन्नं भग्नम् यदङ्गमस्ति तत् सर्वं संधेहि संहितं संश्लिष्टं व्यापारक्षमं कुर्वित्यर्थः ॥ ५ ॥

स उत् तिष्ठ प्रेहि प्र द्रव रथः सुचक्रः सुपविः सुनाभिः। प्रतितिष्ठोर्ध्वः ॥ ६ ॥

हे शस्त्रप्रहारादिभिर्विश्लिष्टावयव पुरुष स तादृशः मन्त्रौषधिसामर्थ्येन संहितगात्रः सन् उत् तिष्ठ शयनाद् उद्गच्छ प्रेहि तस्मात् स्थानात् प्रगच्छ। प्रद्रव प्रधाव वेगेन गच्छ। उक्तम् अर्थं दृष्टान्तेन द्रढयति रथ इत्यादिना। सुचक्रः सुदृढैश्चक्रैर्युक्तः सुपविः सुदृढः पविर्नेमिश्चक्रधारा यस्य स तथोक्तः सुनाभिः सुदृढया नाभ्या अक्षच्छिद्रेण युक्तः एवंगुणविशिष्टो रथः यथा प्रगमनादिव्यापारं कुर्वन् प्रतिष्ठितो भवति एवं त्वमपि सुदृढाङ्गो भूत्वा ऊर्ध्वः उत्थितः सन् प्रतितिष्ठ प्रतिष्ठितो भव ॥ ६ ॥

यदि कर्तं पतित्वा संशश्रे यदि
वाश्मा प्रहृतो जघान।
ऋभू रथस्येवाऽङ्गानि संदधत्
परुषा परुः ॥ ७ ॥

यदि कर्तम्-कर्तकं छेदकम् आयुधं पुरुषशरीरे पतित्वा संशश्रे संश्रृणाति संहिनस्ति। यदि वा अपि वा अश्मा पाषाणः प्रहृतः परेण पुरुषशरीरे प्रक्षिप्तः सन् जघान

हन्ति पुरुषं हिनस्ति । तेन आयुधेन अश्मना (च) हिंसितं परुः पर्व परुषा पर्वान्तरेण संदधत् मन्त्रौषप्रभावः संदधातु । तत्र दृष्टान्तः । ऋभू रथस्येवेति । सुधन्वन अङ्गिरसस्य त्रयः पुत्रा बभूवु ऋभुर्विभ्वा वाज इति (नि० ११।१६) इति यास्कवचनात् सुधन्वनः पुत्रा ऋभ्वादयो रथनिर्माणादिना देवत्वं प्राप्ताः तथा त्वं च दाशतय्याम् 'तक्षन् रथं सुवृतं विद्मनापसः"(ऋ.१।१११।१) इत्याद्यार्भवसूक्तेषु प्रसिद्धम् । ऋभुर्यथा रथस्य अङ्गानि अक्षचक्रेषायुगादीनि निर्माय संदधाति एवं आथर्वणो मन्त्रो विश्लिष्टम् अङ्गं संदधातीत्यर्थः ॥ ७ ॥

अ. ४।१२।७॥

शाखादीनि तु तत्र यानि
निहितान्यस्यास्तरूणामिव,
लाक्षाया नहि सम्भवन्ति
निचयो लाक्षाक्रिमीणां यतः ।
वैद्यास्तां चिरकालतोऽव्यवहृते-
र्जानन्ति नैवाऽथ च,
वन्या " रोहण" इत्यनेन तु
पदेनैनां विदुः साम्प्रतम् ॥ १४ ॥

भाषा—यहां पर सायणने रोहिणीका अर्थ लाक्षा किया है वह ठीक नहीं है (लक्षैःकीटैर्निर्वृत्ता तेषां समूहो वा लाक्षा) लाक्षाशब्दार्थ ही लाखों कीटसमुदाय है उसके चर्म, मांस, मज्जा, लोम प्रभृति और रथनिर्माणोपयुक्त काष्ठ लाक्षामें मिलनेका असम्भव है। इसलिये सायणका यह अर्थ असङ्गत है सायण चिकित्सक तो थे नहीं और व्रणसन्धानार्थ सूक्तको देखकर किसी वैद्यको पूछा होगा कि उरः-क्षत प्रभृतिमें लोहीको रोकनेके लिये आप किस चीजका उपयोग करते हैं ?। वैद्यने साधारणतया कहदिया होगा कि लाक्षा लोहीको बन्द करती है बस इतने से ही सन्दर्भ जोड़ दिया होगा कि ठीक है रोहिणी रक्तवर्णविशिष्टमें बहुत स्थानोंमें आती है इसलिये अनुमानसे लाक्षा लिख डाली है उसपर विश्वास न करना । भला सायणका तो यह विषय नहीं था इसलिये उनने जो कुछ लिखा वह क्षन्तव्य है । पर वैद्य लोगोंकेभी हृदयसे इसका परिज्ञान जातारहा इस वातको विचारते हुये चित्तमें अत्यन्त आघात पहुंचताहै ॥ १४ ॥

सर्वेषामुपकारको रसविदामानन्दनः सर्वदा
वैद्यानामुपयोगवानुपदिशन्ब्रह्मेप्सतोऽप्यागमम्
साहाय्यं रसवादिनोऽपिविदधद्वित्तार्थिनामर्थदः
ग्रन्थोऽयं रसिकैर्विवेकयुतया
दृष्ट्या समाऽऽलोक्यताम् ॥ १५ ॥

भाषा— यह (रसयोगसागर) ग्रन्थ रस-चन्द्रोदयादि अथ च शृङ्गाररसवेत्ताओंको आनन्द देने वाला है । वैद्योंके लिये प्रतिक्षण पासमें सङ्ग्रहकरने योग्य है । ब्रह्मविद्याभिलाषी के लिये रास्ता बताने-वाला है । द्रव्याभिलाषीको अर्थ देनेवाला है इसलिये रसिक लोगोंसे यह सारग्रहणबुद्धिसे देखाजाय ऐसी नम्र प्रार्थना है ।

विदुषां कृपाऽभिलाषुकः—
वै. पं. हरिप्रपन्नः

भावना देकर भूधरयन्त्र मे १ प्रहर तक पुट देना फिर चूर्ण कर लेना। यह अष्टमूर्ति रस क्षय, पाण्डुरोग और विषमज्वर को नष्ट करता है। इसकी मात्रा एक रत्ती की है। यथोचित अनुपान से यह सभी रोगों को जड़ से उखाड़ डालता है ॥ २७४ ॥

२७५ अष्टमूर्तीरसः (तृतीयः)

तुल्यांशं मृतसूतताम्ररजतस्वर्णाहि वङ्गामृता-
म्भोराट्फेनमिदं सुवर्णफलजक्वाथेन तत्सप्तधा
पित्तै र्मीन लुलायकेकिजनितै रेकैकशो भावये-
द्गुञ्जैकः सनवज्वरादिषु हितः स्यादष्टमूर्ती रसः

र. सा., ज्वराधिकारे।

भाषा—पारा, तांबा, चांदी, सोना सीसा, बङ्ग, (सबकी भस्में) बछनाग और समुद्रफेन सबको बराबर लेकर धत्तूरे के फलों के क्वाथ से ७ बार भावना देना और मच्छी, भैंसा और मोर के पित्तों से ७ सात बार भावनाएं देना। इस अष्टमूर्ति रस की १ रत्ती की मात्रा नवीन ज्वरों में हितकर है ॥ २७५ ॥

२७६ अष्टयामिक वटी
(अष्टप्रहरिका वटी)

चाङ्गेरी रजसः षडीशरजनीसिन्धूद्भवेभ्यश्चपद्।
अंशाःद्वादशनिर्मिता इतिगवां दध्नाविमर्द्यैकतः
बद्धाकोलशलाटुवत्त्रिदिवसादूर्ध्वं निपीतोष्णकै
र्यामैरष्टभिरष्टयामिकवटी छिन्द्यान्नवीनज्वरम्।

र. प., र. शं., नवज्वरे-रसराजशङ्करे दुग्धस्थाने दधिग्रहीतम्.

भाषा—अमलोनियांका चूर्ण ६ भाग, पारा, हल्दी, सेंधानमक, इनका प्रत्येक दो दो भाग मिलकर १२ भाग हुये इनको गायके दहीमें मर्दन करके झरबेर के बराबर गोली बनाके ज्वर आनेके तीन रोज बाद गरम पानीसे यह गोली देने से आठ प्रहर के अन्दर नवीन ज्वर को नष्ट करती है इसी लिये इसका अष्टयामिक वटी यह अन्वर्थ नाम है ॥ २७६ ॥

२७७ अष्टाङ्गोरसः

गन्धं रसेन्द्रं मृतलोहकिट्टं
फलत्रयं त्र्यूषणवह्निभृङ्गम्।
कृत्वा समं शाल्मलिकागुडूची-
रसेन यामत्रितयं विमर्द्य ॥११११० ॥
निष्कप्रमाणं गदितानुपानैः
सर्वाणि चार्शांसि हरेद्रसस्य।
लोकोपकृत्यै करुणामयेन
रसोऽयमुक्त स्त्रिपुरान्तकेन ॥ ११११ ॥

र. स., र. क., र. चं., र. दी., अर्शोरोगाधिकारे।

भाषा—गन्धक, पारा, लोहभस्म, मण्डूरभस्म, त्रिफला, त्रिकटु, चीता और भांगरा सब को बराबर लेकर सेमल और गिलोय के क्वाथ से ३ पहर घोटकर छाया में सुखा लेना। इस रस की ४ माशे की मात्रा उचित अनुपान के साथ लेने से सभी प्रकार की बवासीरों को हरती है। कृपालु शिवजी महाराजने संसार के उपकार के लिये इस रस को प्रकट किया है ॥ २७७ ॥

२७८ अष्टावक्ररसः

रसराजस्य भागैकं द्विभागं गन्धकस्य च।
भागमेकं सुवर्णस्य भागार्द्धं रजतस्य च
नागं ताम्रं खर्परं च वङ्गं चैव निरुत्थितम्।
प्रत्येकं रजतार्द्धंच सर्वमेकत्र मर्दयेत् ॥१११३॥
वटाङ्कुररसै र्यामं यामं कन्या रसैः सह।
कूपीमध्ये च संस्थाप्य त्रिदिनं पाचयेत्सुधीः
दाडिमीकुसुमप्रख्यं जायते ह्यविकल्पतः।
वलीपलितविध्वंसि बलपुष्टिकरं महत्
आरोग्यजननं मेधा कान्तिकृच्छुक्रवर्धनम्।
महौषधवरं चैतदष्टावक्रेण निर्मितम् ॥

भै. र., र. ङु., रसायनाऽधिकारे।

भाषा—पारा १ भाग, गन्धक २ भा०, सोना १ भा०, चांदी आधा भाग, सीसा, तांबा, खपरिया प्रत्येक चौथाई भाग, सब को लेकर बट के अङ्कुरों के रस से १ पहर तक भावना देना फिर शीशी में यथाविधि रखकर बालुका यन्त्र में

३ दिन तक पकाना यह रस अनार के फूल की तरह लाल रंग का हो जावेगा, यह रस वली पलित को नष्ट करता है और पुष्टि को देता है, आरोग्य, बुद्धि, कान्ति और वीर्य को बढाता है। यह अष्टावक्र महाराज ने बनाया है ॥२७८॥

२७९ असिताङ्गभैरवोरसः

त्रिसूतं टङ्कणं स्वर्णरसेन प्रहरद्वयम् ।
मर्दयित्वा त्रिशो भाव्यं रसतुल्यविषाम्बुना ॥
व्योषाद्भि र्वीजपूराद्भिरेकैकं सान्निपातिके ।
नवज्वरे वा गुञ्जैकमश्नीयादार्द्रकाम्बुना ॥
दंष्ट्राविषे धनुर्वाते ददीतामुं विशेषतः ११११८।
टी० वातरोगाधिकारे ।

टि०—त्रिसूतमित्यनेन सूततालगन्धका ग्राह्याः कार्याऽनुगुणत्वात् ।

भाषा—पारा, गन्धक और हरताल, सब को बराबर लेकर धतूरे के रस से भावना देना फिर पारे के बराबर बछनाग लेकर उसके क्वाथ से ३ बार भावना देना त्रिकटु के क्वाथ और बिजोरे के रस से एक २ भावना देना इसकी मात्रा १ रत्ती की है। सन्निपात, नवज्वर, दंष्ट्राविष और विशेष करके धनुर्वात में अदरख के रस के साथ इसको देना ॥ २७९ ॥

२८० अहिफेनपाकः

शुद्धाहिफेनात्कुडवं क्षीरद्रोणे विपाचयेत् ।
प्रस्थार्धं घृतयुक्तञ्च ततो मन्दाग्निना पचेत्॥
सुशीते सार्धप्रस्थं च शर्कराया नियोजयेत् ।
जातीफलं लवङ्गञ्च जातीपत्रञ्च केसरम् ॥
आकल्लकाब्धिशोषञ्च कर्पूरं चन्दनं तथा ।
कोषं कनकबीजञ्च मुशलीं तगरं तथा ॥
रक्तिकां चविकां बीजं कुबेराक्षञ्च चित्रकम् ।
ग्रन्थिकं जीरकं दीप्यं बलागोक्षुरतन्तुमत् ॥
द्रव्याणि पिचुमात्राणि चूर्णितानि विनिःक्षिपेत्
विजयाकुडवं तत्र सम्प्रदायाद्विशारदः ११२३॥
वङ्गं शुल्बं तथा लोहं पारदं चाभ्रकं तथा ।
कर्षैकमानं प्रत्येकं भस्मीभूतं समावपेत् ॥
मृगनाभ्यगुरुभ्यां वै वासितं घट्टितं तथा ।
सुशीतमवलेहन्तु यथाशक्ति प्रयोजयेत् ॥
माहिषञ्च पिबेदुग्धं भक्षयित्वा नरोऽनिशम् ।
अनेन सेव्यमानेन गच्छेन्नारीशतं नरः ॥
गर्भञ्च लभते वन्ध्या षण्ढोऽपि पुरुषो भवेत् ।
कासं श्वासं तथा शीतमपस्मारमुरःक्षतम् ॥
उन्मादं नाशयत्येषः पाण्डुं पञ्च भगन्दरान् ।
अशीतिं वातजान् रोगान् कफजांस्तु विशेषतः
हिक्काध्मानौ प्रमेहांश्च कफवातोद्भवांस्तथा ।
आमवातं प्रतिश्यायमतीसारं विनाशयेत् ॥
अपुत्री लभते पुत्रान्नरो जीवेत्समाः शतम् ॥
चि. र. भ०, ॥ ११२९ ॥

भाषा—शुद्ध अफीम पावभर (१६ तो०) लेकर उसको १६ सेर दूध और आधसेर घी मे मन्द अग्नि से पकाना । ठंढा हो जाने पर १½ सेर शक्कर मिला देना और जायफल, लोंग, जावित्री, नागकेसर, अकरकरा, समुद्रशोष, कपूर, चन्दन, त्रिकटु, धतूरे के बीज, मुसली, तगर, सफेद गुंजा (शुद्ध की हुई), चव्य, बीजबंद, करंज, चित्रक, पिपलामूल, जीरा, अजवाइन, बला, गोखरू, और कीकर का गोंद या शिलाजीत इन सब को प्रत्येक १ एक तोला लेकर चूर्ण कर के मिलाना और पावभर भांग का चूर्ण तथा बङ्ग, तांबा, लोहा, पारा और अभ्रक (भस्में) प्रत्येक एक १ तोला उस मे मिला देना और घोट कर कस्तूरी तथा अगर से सुवासित कर के रखलेना। पाचन शक्ति के अनुसार इस को रोज खा कर ऊपर से भैंस का दूध पीना । इस को सेवन करता हुआ मनुष्य १०० स्त्रियों से गमन कर सक्ता है। यदि बांझ स्त्री इसको खावे तो गर्भ को धारण करे, नपुंसक खावे तो युवा पुरुष बन जावे । खांसी, दमा, शीत, अपस्मार, उरःक्षत, उन्माद, पाण्ड-

रोग, ८० वातरोग, कफरोग, हिचकी प्रमेह, कफ और वात से होनेवाले रोग, आमवात, जुकाम और अतिसार को यह पाक नष्ट करता है। पुत्र-हीन पुरुष के इस पाक को खाने से पुत्र हो जाता है। और सौ वर्ष तक जीवित रहता है॥२८०॥

२८१ अहिविषो रसः

सुपक्वस्थाल्यन्तर्गलिमपि निधायाथ विमलं,
विचूर्ण्याविस्तीर्य प्रतुलितशरावांशमथच।
शरावार्धं ताम्रं तनुतरसुपत्रीकृततमं,
शरावार्धं नागं तनुतनुसुपत्रीकृतमलम्॥
क्रमात् ताम्रं नागं बलिमुपरितश्चेति नियमः
पुनस्ताम्रं नागं सकलमपि सन्धाय विधिवत्।
बलीशीयश्चूर्णं त्रिपलमुपरिष्टात् सुनिहितं
मुखं स्थाल्या रुद्ध्वा खदिरगुडचूर्णैश्च बहुधा॥
विशोष्य स्थालीं तामलघुदहनज्वालमथ च
निराखण्डं यावद्भवति रवियामावधिततः
यदा स्वाङ्गे शीतं सकलमथवा भाण्डगमिदं,
प्रपिष्टं पूतं तद्दहनवसनेनाथ विधिवत्॥
अथात्र त्रिद्रोणं जलमपि च सन्धातुमुचितं,
विशालास्यं दीर्घं भवति सुदृढं मार्दवघटम्।
ततश्चैकं नागं सकलमपि कृष्णाङ्गमतिच।
तथा गोधूमाभं बहुलनदितं पुष्टमपि च॥
तथावेध्यं हत्वा न भवति यथा तत्तनुगतं,
क्षतं तावत्तालं कुडवयुगलं पेषिततमम्।
विषं क्षुण्णं तद्वत्पलपरिमितं सर्पजठरे,
मुखद्वारा यत्नादथ च बहुधा पूर्वविधिना॥
विषं क्षुण्णं त्वेकं पलपरिमितं प्रस्थमथच,
तथाऽवल्गो भेल्ल्याः शतमखयवानामपि तथा
निधायाथो पूर्वं सगुडसुधया लिप्तजठरे,
घटे पश्चात्सर्वं तदुपरि फणीन्द्रं भृतमुखम्।
ततस्तस्य प्रायः परित उपरिष्टाच्च दिनकृत्,
सुपत्रं नालेन प्रतुलितशरावद्वयमितम्।
स्नुहीनालप्रस्थं वटभवजटारोहमपि च,
कुमारीप्रस्थैकं सकलमुपरिष्टाच्च सुदृढम्११३६
घटास्यं सम्मुद्र्य प्रथमगुडचूर्णोक्त मसकृत्,
मृदाक्तैः सद्वस्त्रै रथ च परितः शुष्कसुघटः।
ततश्चुल्यां स्थाप्यः प्रहरमितकालश्च तदधः,
कृशानुः संज्वाल्यः प्रपचति यथा तन्दुलचयम्
ततोऽग्निः सञ्ज्वाल्यो दृढमथ हठाद्यामदशर्कं,
पुनः पश्चाद्यामं प्रपचतितथातण्डुलचयं।
हृतंशीताद्यन्त्रात् तदनु च शरावत्रयमितम्।
घृतं गव्यं दत्वा दृढतरकटाहेऽथ सकलम् ११३८
घटस्थं यद् द्रव्यं तदपि च घृते क्षेप्यमुपरि,
हुताशः संज्वाल्यो यदवधिकटाहोत्थितमदः।
समस्तं यद्द्रव्यं दहति दहनश्चैवमपि तद्
भवेत्तावत्तस्मिन् पलयुगलभृष्टाऽत्र तुवरी॥
तथा भृष्टं तद्वत्पलयुगलकं टङ्कणमपि,
ततो यामं तस्मिन् हुतवहमतीव प्रददता।
प्रचाल्यं दर्व्याऽथो मिलति सकलं यावदपितत्
ततस्ताम्रं शीशं सकलमपि संमिश्र्य विधिवत्॥
रसोऽयं सम्प्रोक्तोऽप्यहिविषसमाख्योऽत्रनितरां
सुसेव्योगुञ्जैको यदि च मरिचैकेन तुलितः।
तथा गुञ्जायुग्मं मरिचयुगलेनापिच तथा,
त्रिगुञ्जं द्वे गुञ्जे युगमरिचयुग्मद्वय युते ११४१
क्रमाद्गुञ्जामाना प्रतिदिनमसौ वेददिवसैः
प्रवृद्धो गुञ्जातो मरिचनिचयेनापि च यदा
भवेद्गुञ्जावेदप्रमितमथ तावच्च यवजां,
प्रभुञ्जीत प्रायो लवणरहितां सप्तदिवसान्
नरो रोटीं पष्टिप्रभवमथवा भक्तमसकृ-
न्न चेच्यक्तुं कश्चिल्लवणमपि वा सैन्धवमलम्
समस्ताङ्गं कुष्ठं सकलमपि दोषत्रयगदम्
सयक्ष्माणं सद्यो हरति निखिलव्याधिनिचयम्

चि. क., यो. म., कुष्ठाधिकारे। यो. म., नागबध नाम तत्रैव च स्फटिकाटंकणयोः स्थाने टंकणंनास्ति।

भाषा—जिस मे ४ सेर पक्का पानी आसके ऐसे मिट्टी के ताजे घड़े को लेना और ६४ तोले गन्धक, ३२ तोले तांबे के पत्र और ३२ तोले सीसे के पत्र लेकर नीचे गन्धक का चूर्ण और

ऊपर ताम्रपत्र उस के ऊपर सीसे का पत्र, फिर उस के ऊपर गन्धक का चूर्ण इस प्रकार घड़े मे सबकी तह जमाकर ऊपर से १२ तोले पारे और गन्धक की कज्जली डालकर घड़े के मुख को कत्था, गुड़ और चूना (मिले हुए) से बंद करके सुखा कर घड़े को चुल्हे पर रख देना और नीचे से १२ पहर तक तेज आंच देना। जब वह स्वांगशीतल हो जावे तब निकाल कर पीस कर मोटे कपड़े से छान लेना। फिर जिस मे ४८ सेर पक्का पानी आसके ऐसे घड़े को लेना। उस के भीतर गुड़ और चूने को पानी मे पीस कर अच्छी तरह लेप करके सुखा लेना और जवान तथा खूब पुष्ट और जोर से शब्द करनेवाले एक काले अथवा गेंहूं के रंग के सांप को पकड़ कर इस प्रकार मारना जिससे कि उस के शरीर मे कोईभी घाव न आवे। (क्लोरोफार्म के सुंघाने से सांप मरजाता है) फिर उसके पेटमे मुखसे ३२ तोले खूब पीसी हुई हरताल डालकर ४ तोले पिसाहुआ बछनाग डालकर फिर ऊपर से खूब बारीक पिसी हुई ३२ तोले हरताल डालकर उपरोक्त घड़े मे ४ तोले पिसा हुआ बछनाग और एक १ सेर बाकुची, भिलांवा और इंद्रजव का चूर्ण डालकर ऊपर से उस सांप की गोल चक्री जैसी कर के रख देना। ऊपर से आक की टहनियें ६४ तो०, थूहर की टहनियें १ सेर, बड़ की जटाओं के अंकुर १ सेर और घी कुंआर १ सेर डाल कर घड़े के मुख को गुड़ और चूने से अच्छी तरह बंद कर के ऊपर से कपड़मिट्टी करके सुखा लेना। उस घड़ेको चूल्हेके ऊपर रखकर नीचे से चावलोंके पकने लायक आग एक पहर तक देना फिर दस पहर तक तेज अग्नि देना फिर अन्त मे एक पहर तक भात पकने लायक हल्की आग देना फिर ९६ (अथवा १९२) तोले घी लोहे की कड़ाही मे गरम करके घड़े की सभी चीज उसमे डालकर नीचे से तेज आंच देना, बीच मे ८ तोले सेकी हुई फटकरी और ८ तोले सुहागा लेकर दोनों का चूर्ण करके थोडा २ डालते रहना जब कड़ाही के ऊपर आग लगकर सब घी जल जावे तब उसमे उपरोक्त छाना हुआ तांवा और सीसा मिला देना यह अहिग्रध रस बन गया इसको १ रत्तीभर अथवा १ कालीमिर्च के बराबर लेना चाहिये, अथवा २ रत्ती या २ कालीमिर्च के बराबर लेना अथवा ३ रत्ती या ३ कालीमिर्च के बराबर लेना चाहिये। अथवा १ रत्ती या १ कालिमिर्च के बराबर से प्रारम्भ करना, चार दिन बाद दूना फिर ४ दिन बाद तिगुना फिर ४ दिन बाद चौगुना जब ४ रत्ती पर मात्रा आ जावे तब उतना ही लेते रहना। ७ दिन तक जवका दलिया खाना नमक बिलकुल छोड़ देना। यदि नमक बिलकुल छोड़ न सके तो सेंधानमक का उपयोग करना इस प्रकार यह रस सारे शरीर मे पैदा हुए कोढ़ को नष्ट कर डालता है। तीनों दोषों से होने वाले रोगों को तथा राजयक्ष्म को नष्ट कर डालता है ॥ २८१ ॥

२८२ अक्षीणनामा रसः

पातिते स्वेदिते सूते पूर्ववत्तत्र जारयेत् ।
सुवर्ण षोडशांशेन बीजीभूतं विधानतः ॥
ततश्च षोडशगुणं पूर्ववज्जारयेद्बलिम् ।
पादांशेन ततः कुर्याद्धेम्ना पिष्टिं विचक्षणः ॥
जम्बीराद्यम्लयोगेन लेशतः सुरभिं क्षिपेत् ।
पिष्टीभूतं रसं यन्त्रे कूर्माख्ये प्रक्षिपेद्बुधः ११४६
यद्वा सोमानले यन्त्रे पिष्टिं दद्याद्विचक्षणः ।
ऊर्ध्वाधोगन्धकं दत्वा द्विगुणं त्रिगुणञ्च वा ॥
चुल्लीमारोप्य तद्यन्त्रं मन्दाग्निं ज्वालयेत्क्रमात्॥
त्रिदिनं म्रियते सूतो हेम्ना सह न संशयः
मृतसूतस्य भागैकं मृतकान्तञ्च तत्समम् ।

अभ्रसत्त्वं मृतं शुल्वं गन्धकं च द्विभागिकम् ॥
एतत्सर्वं च सम्भारं खल्वे निःक्षिप्य मर्दयेत् ।
भृङ्गराजस्य नीरेण त्रिदिनं सततं ततः ११५०॥
तत्कल्कगोलकं कृत्वा यन्त्रे भूधरके क्षिपेत् ।
पुटयेद्दिनमेकं तु कारीषशिखियोगतः।११५१॥
तत उद्धृत्य यन्त्रात्तमक्षीणाख्यं रसेश्वरम् ।
[illegible] ष्यके ११५२
[illegible] जयेत् ।
माषमेकं रसस्यास्य गुडूचीसत्त्वकर्षकम्११५३
मधुयष्टिकसक्षौद्रत्वक्क्षीरीभिर्विमिश्रितम् ।
प्राशयेद्रोगिणं वैद्यो रोगराजनिवृत्तये ११५४॥
चतुर्मासान्तरे हन्ति रसेन्द्रोऽयं निषेवितः।
पथ्यसेवाविधानेन सर्वदैवात्मचिन्तया११५५॥
शाल्यन्नं गोघृतं तक्रं गोधूमांश्च यवांस्तथा ।
मांसादमांसपूर्वेण भोजयेन्मांसभोजिनम् ॥
हारिणं तैत्तिरं मांसं जाङ्गलं रौहितं तथा ।
निशीथिन्यां पिबेच्छ्वद्धारोष्णं गोभवं पयः॥
अजोद्भवं वा सेवेत क्रोधलोभविवर्जितः ।
श्रीखण्डमथ लामज्जं रक्तचन्दनमुत्तमम् ॥
एतत्सर्वं क्वाथयित्वा साष्टशेषं जलं पिबेत् ।
विदाहीनि च वस्तूनि सर्वाणि परिवर्जयेत् ॥
वल्यं वृष्यं सुमधुरं विपाके लघु यद्भवेत् ।
तत्सेव्यं यत्नतस्त्वन्यद्वर्जयेदहितं सदा ११६०
रसालं.,

भाषा—पातन और स्वेदन संस्कार किये हुए पारे मे संस्कार से बीज बनाया हुआ सुवर्ण षोडशांश जारण करना। इस के बाद १६ गुना गन्धक जारण करना। फिर उस पारे का चतुर्थांश सुवर्ण और १६ वां हिस्सा गन्धक डाल कर जम्भीरी के रस अथवा किसी और खटाई से मर्दन कर के टिकड़ी बना लेना फिर कच्छप यन्त्र में या सोमानल यन्त्र मे नीचे ऊपर पिट्टी से दूना या तिगुना गन्धक देकर पिट्टीको बीचमें दबाना फिर चूल्हेपर चढ़ाकर ३ दिन तक मन्द २ अग्नि देना इस प्रकार सुवर्ण के साथ पारे की भस्म हो जायगी।

उपरोक्त विधिसे मारा हुआ पारा १ भाग, कान्त पाषाण भस्म (अथवा कान्त पाषाण से निकाले हुए लोहे की भस्म) १ भाग, मारा हुआ अभ्रक सत्त्व, ताम्र भस्म, शुद्ध गन्धक दो दो भाग, यह सब खरलमे डालकर ३ दिन तक लगातार मर्दन करना फिर उस कल्कको टिकड़ी बनाकर छाया शुष्क करके एक दिन भूधरयन्त्र मे करीष की अग्नि देना। बस यह अक्षीण नामवाला रस तैयार हो गया। इस को निकालकर यथा सम्प्रदाय पूजन करके सोने या चांदीकी डिब्बी या इन के अभाव मे शीशी मे रखले फिर पञ्चकर्म से शुद्ध किये हुए क्षयवाले रोगी को एक माशा यह रस और १ तोला गुडूची सत्व तथा योग्यतानुसार मुलहठी और वंशलोचन मिलाकर शहद के साथ चटाना ४ महीने में यह रसेन्द्र पथ्यसेवी के क्षयको निर्मूल कर देता है परन्तु रोगी सर्वथा इन्द्रियों को हमेशः काबू मे रक्खे और पुराने चावल, गोघृत, तक्र, गेहूं और जव खावे। यदि मांस खानेवाला हो तो वह मांस खानेवाले जानवरोंका मांस, हरिण, तीतर और जंगली जानवर रोहू मछली इनको खावे रातको सोते समय तन्दुरुस्त गायका या बकरी का धारोष्ण दूध पीवे। क्रोध लोभ वगैरह से दूर रहे। चंदन, खस, लालचंदन इनका काढा अष्टमांशावशिष्ट यदि बन सके तो जल के स्थानमे नहीं तो एक दो वार दिनमे पीवे और जलन पैदा करनेवाली जितनी चीजें हैं सबका परित्याग करे। मोटे हिसाब से बलकारक, वृष्य और विपाक मे मधुर और हलकी जो हों उनका सेवन करे और सब चीज का त्याग करे॥ २८२॥

श्रीवासुदेवाभिधवर्णवीचिके प्रसिद्धनानारसरत्नसंस्तरे। हरिप्रपन्नेनकृतेक्रमान्विते वेलाविलासो रसयोगसागरे॥ ११६१ ॥

इति श्रीरसयोगसागरे अकारादि रसाः समाप्ताः

अथ आकारादि रसाः

२८३ आकल्लादिचूर्णम् ।

आकल्लं रसकर्पूरं हपुषां खुरकन्तथा ।
शिलाभेदमिदं सर्वं प्रत्येकं पलभागिकम् ११६२
खदिरं कर्षमात्रं स्याच्चूर्णयेत्सर्वमेकतः ।
चूर्णं शाणोन्मितं प्रातः प्रदद्यात्कदलीफलैः ॥
उपदंशविनाशः स्यात्पथ्यहीनस्य रोगिणः ।
रसायनसं. ॥ ११६३ ॥

भाषा—अकरकरा, रसकपूर, झाऊ (छोटी मांई,) खुरासानी अजवाइन, और पाषाणभेद इन सबको प्रत्येक ४ चार तोले और खैरसार १ तोले लेकर सबको मिलाकर चूर्ण करलेना । इस चूर्ण को ४ माशा भर केले के पके फलके भीतर कवलित कर के निगल जाने से उपदंशका नाश होता है। इसके खाने वाले के लिये पथ्य का कोई नियम नहीं है ॥२८३॥

२८४ आखुविषान्तक रसः

रसं गन्धं विषश्चैव त्र्यूषणं टङ्करोहिणी ।
पुनर्नवारसैर्मर्द्य गोमूत्रे च द्विगुञ्जकम् ११६४
पिबेदाखुविषार्तानां सर्वं हरति तद्विषम् ।
विषदष्टोद्भवानन्यान् हन्यादाखुविषान्तकः ॥
यो. र., रसायन सं. ॥ ११६५ ॥

भाषा—पारा, गन्धक, त्रिकटु, सुहागा और कुटकी इन सबको बराबर मिलाकर पुनर्नवाके रस और गोमूत्र में घोटकर २ रत्तीभर खाने से चूहे के काटे हुए के सब विषके उपद्रव दूर हो जाते हैं । तथा अन्य विषैले जीवों के काटने से चढ़ा हुआ विष इसका सेवन करने से दूर होजाता है ॥२८४॥

२८५ आगन्तुज्वरहरः

षोडशांशेन कनकं जारितोऽपि यदारसः ।
स्यान्मूर्च्छितः कषायेण सर्वागन्तु ज्वरापहः ॥
रसावतार, रसेन्द्रसं., (सिंहनादः) (गजेन्द्रः)

भाषा—पारे में उसका $\frac{1}{16}$ सोने का जारण किसी भी विधि से करके ज्वरहर कषायों से उसको मूर्च्छित करना । उचित मात्रामें २ रत्तीसे ३ रत्ती तक इस का सेवन करने से सभीआगन्तुज्वर नष्ट होते हैं ॥ २८५ ॥

२८६ आज्ञाचण्डेश्वरो रसः

द्वौ भागौ दरदस्य भागममृतमाज्ञादिचण्डेश्वरो
मर्द्यः स्यार्द्रकवारिणा यवमितस्तेनैव देयं पयो
छागं सोदनमिक्षुदाडिमयुतं पथ्यं विसृष्टानिलं,
सर्वान्हन्तिमृगानिवज्वरगणांश्छार्दूलविक्रीडितं
र. सं,

भाषा—बछनागसे दूना शिंगरिफ लेकर दोनों को अदरख के रस मे घोटना, यह आज्ञाचण्डेश्वर रस बनेगा । इसकी १ जव भरकी मात्रा अदरखके रस के साथ देना । और ऊपर से बकरी का दूध पिलाना । पथ्य में भात, ईख और अनार आदि देना । भोजन ऐसा कराना जिससे कि वायु छूटे । यह रस ज्वरों को ऐसा नष्ट करता है जैसा शेर मृगों को ॥२८६॥

२८७ आज्ञासिद्धरसः

आज्ञादिसिद्ध इति सूतबली तथैव,
कङ्कुष्ठशूकजमिदं समभागमात्रम् ।
तैलैर्विमर्द्य जयपालभवैश्च सद्यो,
गुञ्जाशितो गुडयुतः कुरुते विरेकम् ११६८।

भाषा—पारा, गन्धक, यवक्षार और रेवनचीनी अथवा शुद्ध मुर्दासङ्ग इन को बराबर लेकर जमालगोटे के तेल मे घोटकर इस को १ रत्ती गुड़ के साथ खाने से विरेचन हो जाता है॥२८७॥

टि. इसमे शुद्ध मुर्दासंग डालेंगे तो इससे उपदंश श्वास कासादिक कफ रोग नष्ट होंगे ।

२८८ आज्ञासिद्धरसायनः

लोहाभ्रेशबलीश्च भास्वरतले
खल्वे कुमार्या द्रवैः
पिष्ट्वैरण्डदले निबध्य सुदृढं
सद्धान्यराशौ त्र्यहम् ।

क्षिप्त्वोद्धृत्य विचूर्णितं मधुवरा
युक्तं तथा साग्निकं,
कृष्णात्रेयविनिर्मितं गदजरा-
ध्वंसीह सौख्यप्रदम् ॥ ११६९ ॥
आज्ञासिद्धमिदं रसायनवरं सर्वप्रमेहापहं
कासं पञ्चविधं तथा तनुरुजं पाण्डुञ्च हिक्काव्रणान्
यक्ष्माणं पवनं हलीमकमहाशूलञ्च मन्दानलं,
कण्डूकुष्ठविसर्पविद्रधिमुखा-
पस्मारमुख्याञ्जयेत् ॥ ११७० ॥

ना. वि.,

भाषा—लोहभस्म, अभ्रकभस्म, पारा और गन्धक सबको बराबर लेकर साफ खरल मे घीकुंआर के रस मे घोटकर एरण्ड के पत्तों से मजबूत लपेटकर और बांधकर अन्न के ढेर मे ३ दिनतक दबा रखना। फिर उसको निकालकर शहद, त्रिफला और चित्रक का चूर्ण रसके बराबर मिला देना। यह कृष्णात्रेय महाराजका बनाया हुआ आज्ञासिद्ध-रसायन, रोग और बुढापे का नाश करने वाला और सुख देनेवाला है। इस के सेवन करने से सभी प्रकार के प्रमेह, पांच प्रकारकी खांसी, बेचैनी पाण्डुरोग, हिचकी, व्रण, राजयक्ष्मा, वातरोग, हलीमक, भयंकर शूल, मन्दाग्नि, खुजली, कोढ़, विसर्प, विद्रधि और अपस्मार आदि रोग नष्ट होजाते हैं।

२८९ आतङ्कान्तकरसः

हिङ्गूलो रसगन्धकावथ समा
स्तिक्तारजः सप्तधा,
शेफाली सलिलैस्तथाऽऽर्द्रकरसैः
सम्भाव्य सम्पादितः।
पीतः शर्करया सहार्द्रकरसैर्वल्लप्रमाणो रसः
आतङ्कान्तक एष सत्यवचसानागार्जुनेनोदितः॥
पक्वापक्वमजीर्णजीर्णमथवा
हन्त्याशु तीव्रं ज्वरम् ॥ ११७१ ॥

र. प.,

भाषा—शिंगरिफ, पारा और गन्धक सब को बराबर लेना तथा कुटकी का चूर्ण पारे से ७ गुणा लेना। फिर सबको मिलाकर हारसिंगार और अदरख के रसों से पृथक् २ भावना देना। यह आतङ्कान्तक रस शक्कर और अदरख के साथ ३ रत्ती भर खाने से पक्व, अपक्व, जीर्ण और अजीर्ण सभी प्रकार के तीव्र ज्वरों को नष्ट करता है। यह रस महाराज नागार्जुन ने बताया है॥ २९९॥

२९० आदित्यरसः

दरदश्च विषं गन्धं त्रिकटुस्त्रिफला समम्।
जातीफलं लवङ्गञ्च लवणानि च पञ्च वै॥
सर्वमेकीकृतं चूर्णमम्लयोगेन सप्तधा।
भावयित्वा वटी कार्या गुञ्जार्धप्रमिता बुधैः॥
रसो ह्यादित्यसंज्ञोऽयमजीर्णक्षयकारकः।
भुक्तमात्रं पाचयति जठरानलदीपनः॥ ११७४॥

र. क. ल., व. रा., वै. चि., यो. र., नि. र., र. कु., र.का

भाषा—शिंगरिफ, वछनाग, गन्धक, त्रिकटु, त्रिफला, जायफल, लौंग और पांचों नमक सब को बराबर लेकर वारीक चूर्ण करके ७ बार अम्ल के योग से भावना देकर ½ रत्तीभर की गोलियें बना लेना। यह आदित्यरस अजीर्ण को नष्ट करता है। खाये हुए को तत्काल पचाता है। और जठराग्नि को प्रदीप्त करता है।

२९१ आनन्दभैरवोरसः प्रथमः

हिङ्गुलञ्च विषं व्योषं टङ्कणं मागधी समम्।
जम्बीरेण तु सम्पिष्य गुञ्जैकानन्दभैरवम्॥
मधुना लेहयेचानु कुटजस्य च त्वक्फलम्।
चूर्णितं कर्षमात्रञ्च त्रिदोषोत्थातिसारजित्॥
मध्याह्ने दापयेत्पथ्यं गव्याजं तक्रमेव च।
पिपासायां जलं शीतं विजयां निशि दापयेत्॥
कासे श्वासे क्षये गुल्मे ग्रहण्यां सन्निपातके।
अपस्मारे महाघोरे शस्तो ह्यानन्दभैरवः ११७८

चि. र., टी., र. कु., वा., पाइटे भावनाविनैव सम्पादितः

भाषा—शिंगरिफ, बछनाग, त्रिकटु, सुहागा और पीपल सब को बराबर लेकर जम्बीर के रस मे घोटकर एक एक रत्तीकी गोलियें बना लेना। इस को शहद के साथ चटाना और ऊपरसे कुरैया के फल (इन्द्रजव) तथा छाल का चूर्ण १ तोले खिला देना। यह त्रिदोष से होनेवाले अतिसार को नष्ट करता है। दोपहर के समय पथ्य मे गाय अथवा बकरी के दही की छाछ पिलाना। प्यास लगने पर ठंढा पानी पिलाना और रातको थोडीसी भांग देना। यह आनन्दभैरव रस दमा, क्षय, गुल्मरोग, संग्रहणी, सन्निपात, और घोरमिरगी मे बहुत हितकर है ॥ २९१ ॥

२९२ आनन्दभैरवो रसः (द्वितीयः)

हिङ्गुलश्च विषं व्योषं मरिचं टङ्कणं कणा।
जातीकोषः समं चूर्णं जम्बीरद्रवमर्दितम् ॥
रक्तिमात्रां वटीं कुर्यात्खादेदार्द्रकसंयुताम्।
वट्याद्वयं त्रयं वापि सन्निपाते सुदारुणे ११८०॥
ज्वरमष्टविधं हन्ति तथाऽतीसारनाशनः।
जीर्णज्वरहरश्चैव तथा सर्वाङ्गभेदकम् ॥
आमवातादिरोगश्च नाशयेदविकल्पतः ११८१॥

र. सं., टि० अत्र व्योषेणैव मरिचकणयोर्गतार्थत्वात्पुनरुक्त्या भागद्वयेऽभिप्रायो बोध्यः।

भाषा—शिंगरिफ, बछनाग, त्रिकटु, कालीमिर्च, सुहागा, पीपल, (कालीमिर्च और पीपल दो बार आये हैं इस लिये दो बार ही अलग २ डाल लेना) जायफल जावित्री इन सब को बराबर लेकर बारीक चूर्ण करके जम्भीरीके रस मे घोट लेना फिर एक एक रत्ती की गोलियें बना लेना। इस गोलीको अदरख के साथ खाना। घोर सन्निपात मे दो या तीन गोलियें भी खासक्ते हैं। यह रस आठ प्रकार के ज्वरों को, अतिसार, जीर्णज्वर, सर्वाङ्गभेदक ज्वर और आमवातादि रोगोंको अवश्य नष्ट करता है ॥ २९२ ॥

२९३ आनन्दभैरवो रसः (तृतीयः)

दरदं वत्सनाभश्च मरिचं टङ्कणं कणा।
चूर्णयेत्समभागेन रसो ह्यानन्दभैरवः ११८२॥

र. धा. १८

गुञ्जैकं वा द्विगुञ्जं वा बलं ज्ञात्वा प्रयोजयेत्
मधुना लेहयेच्चानु कुटजस्य फलं त्वचम् ॥
चूर्णितं कर्षमात्रं तु त्रिदोषोत्थातिसारनुत्।
दध्यन्नं दापयेत्पथ्यं गोघृतं तक्रमेव च ॥
पिपासायां जलं शीतं विजया च हिता निशि॥

रस. सं., र. सं.सि., र. क. ल.,नू.क., शा.,र. मं.,चि. र., र. र. स., यो. चि., र. चं., र. रा. सुं, चि. र. भ., वै. वि., वै. चि., र. ल., भै. सा., र.मा., र.चि., र. र. दी., यो. म., यो. र., र. का., नि. र., र. सु., भै. र., र. क., र. को., चि. सा.,

टि० चिकित्सासारे चूर्णयेत्समभागेनेत्यस्य स्थाने मर्दयेदहिफेनेनेत्यधिकोंऽशो दृश्यते, पुरातनातिसारे उचितश्च।

भाषा—शिंगरिफ, बछनाग, कालीमिर्च, सुहागा और पीपल सबको बराबर लेकर बारीक चूर्ण कर लेना (अदरख के अथवा जम्बीर के रस मे घोटकर १ रत्ती की गोलियें बना लेना अच्छा है) इस आनन्दभैरव रसको १ रत्ती या दो रत्ती भर बलके अनुसार शहद के साथ देना ऊपर से कुरैयाकी छाल और इन्द्रजव का चूर्ण १ तोलाभर खिलाना। यह त्रिदोष से पैदा हुए अतिसार का नाश करता है। पथ्य मे दही और भात के साथ गायका घी और छाछ देना, प्यास लगने पर ठंढा पानी देना। रात्रिको भुनी भांग देना हितकर है ॥ २९३ ॥

२९४ आनन्दभैरवो रसः (चतुर्थः)

हिङ्गुलश्च चतुर्भागं टङ्कणं वसुभागिकम्।
कणा च वत्सनाभश्च प्रत्येकं मुनिसङ्ख्यया॥
आर्द्रकस्वरसेनैव दिनानि त्रीणि मर्दयेत्।
सर्वेषु सन्निपातेषु रसश्चानन्दभैरवः ॥११८६॥

व. रा., र. क. यो.,

भाषा—शिंगरिफ ४ भाग, सुहागा ८ भाग, पीपल और बछनाग प्रत्येक ७ भाग सबको लेकर ३ दिन तक अदरखके रस मे घोटना। यह आनन्द भैरव रस सभी प्रकार के सन्निपातों मे हितकर है। इसकी मात्रा १ रत्ती की है ॥ २९४ ॥

२९५ आनन्दभैरवोरसः (पञ्चमः)

वङ्गभस्म मृतं स्वर्णं रसं क्षौद्रैर्विमर्दयेत् ।
द्विगुञ्जं भक्षयेन्नित्यं हन्ति मेहं चिरोद्भवम् ॥
गुञ्जामूलं तथा क्षौद्रैरनुपाने प्रशस्यते११८७॥

र. को., र. का., र. चि., र. सं., र. सु.,

टि० र. का., स्वर्णस्थाने सूतभस्म प्रकल्पितम्।

भाषा—वङ्गभस्म, स्वर्णभस्म और पारा सबको बराबर लेकर शहद मे घोटना। इस को २ रत्ती-भर रोज़ खानेसे दीर्घकालका भी प्रमेह नष्ट हो जाता है। इसका अनुपान गुञ्जाकी जड़ और शहद है॥ २९५॥

२९६ आनन्दभैरवो रसः (षष्ठः)

हिङ्गुलश्च विषं व्योषं टङ्कणं गन्धकं समम् ।
जम्बीररससंयुक्तं मर्दयेद्यामकद्वयम् ॥११८८॥
कासश्वासातिसारेषु ग्रहण्यां सान्निपातिके ॥
अपस्मारेऽनिले मेहेऽप्यजीर्णे वह्निमान्द्यके ॥
गुञ्जामात्रः प्रदातव्यो रस आनन्दभैरवः११८९

र. सं., भै. र., र. क., वै. क., र. चं., र. क. यो.,

भाषा—शिंगरिफ, बछनाग, त्रिकटु, सुहागा और गन्धक सबको बराबर लेकर २ पहर तक जम्भीरी के रस मे घोटकर १ रत्तीभर की गोलियें बना लेना। यह आनन्दभैरव रस, खांसी दमा, अतिसार, संग्रहणी, त्रिदोषज अपस्मार, वातरोग, प्रमेह, अजीर्ण और मन्दाग्नि मे हितकर है। उपरोक्त रोगों मे इस को देना चाहिये ॥२९६॥

२९७ आनन्दभैरवोरसः (सप्तमः)

पारदं गन्धकं लौहमभ्रकं विषमेव च ।
समांशं मरिचान्यष्टौ टङ्कणश्च चतुर्गुणम् ॥
भृङ्गराजरसैः सप्त भावनाश्चाम्लदाडिमैः ।
गुञ्जाद्वयं पर्णखण्डैः खादेत्सार्यं निहन्त्यमून् ॥
वातश्लेष्मोद्भवं रोगं मन्दाग्निग्रहणीज्वरान् ।
अरुचिं पाण्डुताञ्चैव जयेदचिरसेवनात्११९२॥

र. क.,

भाषा—पारा, गन्धक, लोहभस्म, अभ्रकभस्म और बछनाग यह सब बराबर, कालीमिर्चे पारे से अठगुनी, और सुहागा पारे से चौगुना लेकर सब को भांगरे के रस से ७ बार, और अनार के रस से भी ७ बार भावना देकर २ दो रत्ती की गोलियें बना लेना। पान के साथ इस आनन्दभैरव रस को खाने से वात और कफ से होनेवाले रोग मन्दाग्नि, संग्रहणी, अरुचि, ज्वर, और पाण्डुरोग, जल्दी नष्ट होते हैं ॥ २९७ ॥

२९८ आनन्दभैरवोरसः (अष्टमः)

शुद्धसूतं द्विधा गन्धं शिला च विषहिङ्गुलम् ।
मृतकान्ताभ्रताम्रायस्तालकं माक्षिकं समम् ॥
अम्लवेतसजम्बीरचाङ्गेरीणां रसेन च ।
निर्गुण्ड्या हस्तिशुण्ड्याश्च द्रवैर्मर्द्यं दिनद्वयम्॥
रुद्ध्वाऽथ भूधरे पक्त्वा दिनान्ते तं समुद्धरेत् ।
चित्रकस्य कषायेण मर्दयेत् प्रहरद्वयम् ॥
माषमात्रः प्रदातव्यो रसोह्यानन्दभैरवः ११९५

र. को., प्रलापकज्वरे । मन्दाग्नौ दृष्टप्रत्ययोऽयम् ।

भाषा—शुद्ध पारा, गन्धक, मैनसिल, बछनाग, शिंगरिफ, कान्तलोहभस्म, अभ्रकभस्म तांम्रभस्म, लोहभस्म, हरतालभस्म और सोनामाखी सब को बराबर परन्तु गन्धक को पारे से दूना लेना। इन सबको अमलबेत, जम्भीरी, तिपतिया, संभालू और हाथीशुण्डी के रसों से अलग २ दो दिन तक भावना देना फिर शीशी में बंद करके १ दिनभर भूधरयन्त्र मे पकाना। शामको उसको निकालकर दो पहर तक चित्रक के क्वाथ से घोटना। इस आनन्दभैरव रस की मात्रा १ माशा है (मन्दाग्नि मे यह बडा चमत्कार दिखाता है यह हमारा प्रत्यक्षानुभव है)॥२९८॥

२९९ आनन्दभैरवो रसः (नवमः)

त्रिकटु त्रिफला शम्भु विषं गन्धं च टङ्कणम् ।
एतच्चूर्णं समं युक्तं रसस्त्वानन्दभैरवः ११९६॥
कासश्वासावजीर्णञ्च ज्वरानर्शांसि नाशयेत् ।
गुल्मं शूलं हरत्याशु गुञ्जैकभक्षणादयम् ॥

र. क. उ.,

भाषा—त्रिकटु, त्रिफला, पारा, बछनाग, गन्धक और सुहागा इन सबको बराबर लेकर बारीक चूर्ण कर लेना। यह आनन्दभैरव रस खांसी, दमा, ज्वर, बवासीर गुल्म और शूलको जल्दी नष्ट करता है। इसकी मात्रा १ रत्ती की है ॥२९९॥

३०० आनन्दभैरवो रसः (दशमः)

पृथग्वेदगुणं पृथ्वीशुण्ठीमरिचटङ्कणम्।
चतुर्थांशो वत्सनागः वाते ह्यानन्दभैरवः ॥
भावना नागवल्याश्च तथा चार्द्रकभावना।
निम्बुकस्यापि दातव्या वारत्रयमनुक्रमात् ॥
सन्निपाते तथा वाते श्लेष्मरोगे महाज्वरे।
ग्रहणे मस्तकस्यापि पीडायामुदरस्य च ॥
दातव्योऽन्येषु रोगेषु रसो ह्यानन्दभैरवः।
गौर्यग्रे च समाख्यातः शम्भुनापुण्यहेतवे१२०१

र. सं.,

भाषा—बड़ी इलायची के बीज ४ भाग, सोंठ ४ भाग, काली मिर्च ४ भाग और सुहागा ४ भाग, बछनाग इलायची से ¼ लेकर क्रम से पान, अदरख और नींबू इनके रसकी तीन तीन भावना देना। सन्निपात, वात और श्लेष्म रोग, घोर ज्वर, मस्तकग्रह और उदरपीडा तथा अन्यान्य रोगों मे इस आनन्दभैरव रसको देना चाहिये। इस रस को शिवजी महाराजने पार्वती जी को बताया है। इसकी मात्रा ३ रत्ती की है ॥३००॥

३०१ आनन्दभैरवो रसः (एकादशः)

टङ्कणं हिङ्गुलं गन्धं हरवीर्यं च तालकम्।
तीक्ष्णं वङ्गं ताम्रनागं मर्दितं त्रिफलाद्रवैः ॥
पर्पटस्य कषायेण दोलायन्त्रे दिनं पचेत्।
फणिपित्तेन सम्भाव्य गुञ्जामात्रं प्रदापयेत् ॥
तत्क्षणं नाशयेच्चैव शीताङ्गं सन्निपातकम्।
तक्रपानं भवेत्पथ्यं रसो ह्यानन्दभैरवः१२०४

वै. चि.,

भाषा—सुहागा, शिंगरिफ, गन्धक, पारा और हरताल, फौलाद, बङ्ग, तांबा और सीसा (इन चारों की भस्में) सब को बराबर लेकर त्रिफला के क्वाथ से भावना देकर पित्तपापड़े के क्वाथ से दोलायन्त्र मे १ दिन पकाना फिर उस को सांप के पित्ते से भावना देना। यह आनन्दभैरव रस तत्कालही शीताङ्ग सान्निपात को नष्ट करता है। इसकी मात्रा १ रत्तीभर है इसके पथ्य मे छाछ देना ॥ ३०१॥

३०२ आनन्दभैरवो रसः (द्वादशः)

हिङ्गुलं च विषं व्योषं गन्धकं टङ्कणं समम्।
धूमसारं वचा यष्टी चित्रकं पत्रकं तथा ॥
सैन्धवं विजयावीजं धौस्तूरं बीजमेव च।
एतानि समभागानि रसो ह्यानन्दभैरवः १२०६
वाते पित्ते तथा श्लेष्मे गुल्मे चैव विशेषतः।
अतिसारे सन्निपाते वटी गुञ्जाप्रमाणिका ॥
आनन्दभैरवः ख्यातो रसो मन्दाग्निनाशनः।
अनुपानविशेषेण तत्तद्रोगविनाशनः ॥१२०८

र. क. यो.,

भाषा—शिंगरिफ, बछनाग, त्रिकटु, गन्धक, सुहागा, धूमसार(घरका धूंआ) बच, मुलहठी, चित्रक, तेजपात, सेंधानमक, भांग और धतूरे के बीज सब को बराबर लेकर बारीक चूर्ण कर लेना। यह आनन्दभैरव रस है। वात पित्त और कफ रोगों मे, विशेषतया गुल्मरोग मे तथा अतिसार और सन्निपात मे एक रत्तीभर की इसकी गोली बहुत हितकर है। यह आनन्दभैरव रस मन्दाग्नि को नष्ट करता है। उचित अनुपान के साथ लेने से यह सभी रोगों को दूर करता है ॥३०२॥

३०३ आनन्दभैरवी वटिका (प्रथमा)

विषं त्रिकटुकं गन्धं टङ्कणं मृतशुल्वकम्।
धुस्तूरस्य च बीजानि हिङ्गुलं नवमं स्मृतम् ॥
एतानि समभागानि दिनैकं विजयाद्रवैः।
मर्दयेच्चणकाभां तु वटीं चानन्दभैरवीम् १२१०
भक्षयेच्च पिबेच्चानु रविमूलकषायकम्।
सव्योषं हन्ति नो चित्रं सन्निपातं सुदारुणम् ॥

शीताङ्गे सन्निपाते वा सामान्ये वा त्रिदोषजे।
धान्याकं पिप्पली शुण्ठी कटुकी कण्टकारिका॥
पिप्पलीसंयुतं क्वाथं चतुर्गुञ्जा च पर्पटी।
सन्निपातज्वरं हन्ति वटिकाऽऽनन्दभैरवी॥
मूलं च कटुरोहिण्याः समं विल्वं सजीरकम्।
दध्ना पिष्टं पिबेच्चानुवर्टीं चानन्दभैरवीम्॥
सन्निपातातिसारघ्नीं पथ्यं शाकविवर्जितम्।
आनन्दभैरवीं पीत्वा क्वाथं वरुणसम्भवम्॥
पाययेदश्मरीं हन्ति सप्तरात्रान्न संशयः।
वाकुचीसम्भवैस्तैलै र्वटीं चानन्दभैरवीम्॥
लेहयेन्निष्कमात्रां तु गलत्कुष्ठञ्च नाशयेत्।
दधिमस्तुसितार्क्षौद्रै र्वटीं चानन्दभैरवीम्॥
भक्षयेन्मूत्रकृच्छ्रार्तो यवक्षारं सितान्वितम्।
गोदुग्धं क्वथितश्चानुशीतलं मधुना पिबेत्॥
गुञ्जामूलं पिबेत्क्षीरैरनुपानं प्रशस्यते।
अनेन चानुपानेन वटिकाऽऽनन्दभैरवी॥
देयारुद्रजटाक्षौद्रैः सर्वमेहप्रशान्तये॥१२१९॥

रसायन. सं., सूतप्रदीपिका, वृ. यो. त., र. को.. .र. सं., भा., र. सं., भै. र., र. क., र. मु., नि. र., र, चं., र. क. ल., यो. म., रस. सं., र. क. यो. (मृत-सञ्जीवन) भा. प्र.,

टि० अत्र रुद्रजटायाः परिचयो बहुदिना दूरादपास्तः परं प्रायःवल्मीकोपरिसञ्जातश्वेतवर्णैक दण्डाकारा दण्डिकासंलग्नपत्रत्वेन वेण्याकृतित्वान्मगधे जाङ्गलायामीश्वरजटेति नाम्ना प्रख्यापयंति, सैवौषधी ग्राह्येत्यस्माकं मतिः। आधुनिकवार्तिकास्तु रुद्रजटाशब्देनाऽऽकाशवल्लरी मसहायामपरपर्यायामामनन्ति।

भाषा—बछनाग, त्रिकटु, गन्धक, सुहागा, ताम्रभस्म, धतूरे के बीज और शिंगरिफ इन ९ चीजों को बराबर लेकर १ दिन भांग के रस मे घोटकर चने के बराबर गोलियें बना लेना। इस गोलीका नाम आनन्दभैरवी वटी है। इस गोलीको खाकर अर्कमूल और त्रिकटु का क्वाथ पीनेसे अवश्य घोर सन्निपात नष्ट होता है। शीताङ्ग अथवा सामान्य सन्निपात मे धनियां, पीपल, सोंठ, कुटकी और कंटकारीका क्वाथ अथवा पीपल का क्वाथ इस मे ४ रत्ती पित्तपापड़ा डालकर इस अनुपान के साथ खाने से उपरोक्त रोग दूर होते हैं। कुटकी की जड़ और इस के बराबर बेलकी गिरी और जीरा पीसकर दही मिलाकर इस के साथ खाने से सन्निपातातिसार नष्ट होता है। इस के पथ्य मे शाक न खाना। वरना (वरुण) के क्वाथ के साथ इसको खाने से ७ दिन मे पथरी वाले को आराम हो जाता है इस मे कुछ संदेह नहीं। इन गोलियों को ४ माशाभर बाकुची के तेल के साथ चटाने से गलितकुष्ठ दूर हो जाता है। दही का तोद, मिश्री और शहद के साथ इनको खानेसे और ऊपर से जवाखार और मिश्री खानेसे मूत्रकृच्छ्र नष्ट हो जाता है। सभी प्रमेहों मे गरम करके ठंढा किया हुआ गाय का दूध और शहद अथवा दूध मे उबाली हुई गुञ्जा की जड़ का क्वाथ अथवा रुद्रजटा (अभावमे आकाश बेल) और शहद के साथ इसको देने से रोग का नाश होता है॥२०३॥

२०४ आनन्दभैरवीवटिका (द्वितीया)

शुद्धसूतं समं गन्धं मृतताम्रं सटङ्कणम्।
जम्बीरफलमध्यस्थं दोलायन्त्रे पचेद्दिनम्॥
मर्दयेद्भावयेद् द्रावैः शिग्रुवासार्द्रनिम्बजैः।
सर्पाक्षी विजया ब्राह्मी मीनाक्षी हंसपादिका॥
हस्तिशुण्डी रुद्रजटा धूर्तवातारिवायसाः।
दिनैकं मर्दयेदेभि र्लोहसम्पुटगं पचेत्॥१२२२॥
दिनैकं वालुकायन्त्रे समुद्धृत्य विचूर्णयेत्।
तालकं दीप्यकं व्योषं विषजीरकचित्रकान्॥
सर्वान् समरसां श्वेतां स्त्रिगुञ्जं भक्षयेत्सदा।
सन्निपातज्वरं हन्ति वटी चानन्दभैरवी १२२४

रसायन सं.,यो. म., मुद्रयूषमनुपानत्वेन योजितम्।

भाषा—शुद्धपारा, गन्धक, ताम्रभस्म और सुहागा, इन सब को बराबर लेकर चूर्ण करके जम्बीर के फल के बीचमे रखकर १ दिनभर दोलायन्त्रमे पकाना।; फिर सहजना, अडूसा, अदरख

नीम, औंधाझली, भांग, ब्राह्मी, मछेछी, हंसराज, हाथीशुण्डी, आकाशबेल, धतूरे और एरण्ड के पत्ते और काकमाची (मकोय) इन के क्वाथ अथवा रस से भावनाएं देकर २ दिन खूब घोट लेना। फिर लोहे की मूषा मे बंद करके वालुकायन्त्र मे पकाना और निकाल कर बारीक चूर्ण कर लेना। फिर हरताल अजवाइन, त्रिकटु, बछनाग, जीरा और चित्रक इन सब को बराबर मिलाकर चूर्ण कर लेना यह आनन्दभैरवी गोली सन्निपात को नष्ट करती है। इसका प्रमाण ३ रत्तीभर है ॥३०४॥

३०५ आनन्दभैरवी वटिका (तृतीया)

सौभाग्यं वै हिङ्गुलोत्थं विषञ्च
मारीचं वै हेमबीजेन युक्तम्।
कृत्वा चूर्णं सर्वमेतत्समांशं
जम्बीरैस्तन्मर्दितं यामयुग्मम् ॥
गुञ्जामात्रा निर्मिता या वटी सा
भुक्ता हन्यात्सन्निपातातिसारम् ॥१२२५॥

र. प्र. सु.,

भाषा—सुहागा, शिंगरिफसे निकाला हुआ पारा, बछनाग, कालीमिर्च और धतूरे के बीज सबको बराबर लेकर चूर्ण करके जम्बीर के रस मे दोपहर तक घोटकर एक रत्ती भर की गोलियें बना लेना। इस गोली को खाने से सन्निपातातिसार नष्ट होता है। इस का नाम आनन्दभैरवी वटी है ॥ ३०५ ॥

३०६ आनन्दो रसः

शुद्धं रसं समविषं प्रहरं विमर्द्य
तद्गोलकं कनकचारुफले निवेश्य।
दोलागतं पच दिनं विषमुष्टितोये
प्रक्षाल्य तत्पुनरपीह तथा द्विवारम् १२२६
तं सूतकं गिरिशदृग्द्विगुणं सुगन्धं
युक्त्याऽवचार्य कुरु भस्मसमं च तस्य।
वैक्रान्तभस्मजयपाललवांशकार्धं
सर्वैर्विषं द्विगुणितं मृदितं च खल्वे॥१२२७॥
घस्रत्रयं कनकभृङ्गरसेन गाढ-
मालेप्यभाजनतले विषधूमभाजि।
भृङ्गद्रवेण शिथिलं लघुकाचकूपी-
मापूर्य रुद्धवदनां सिकताख्ययन्त्रे ॥१२२८
तां वासरार्धमवदीप्य सुशीतलां च
भित्त्वाऽवचूर्ण्य गदभाजिषु शालिमात्रम्।
आनन्दसूतमखिलामयकुम्भिसिंहं
गद्याणकार्द्धसितया सह देहि पथ्यम्१२२९
रोगानुरूपमनुपानमपि प्रकाशं
क्षोणीभुजां प्रचुरपूजनमाप्नुहि त्वम्।
कीर्त्या दिशो दश सुपूरय चन्द्रकान्त्या
वैद्येश्वरेति विरुदं भज वैद्यराज ॥ १२३०

यो. म., र. ल., र.शं., र. चं., र.म. मा., ज्वराधिकारे। वृ. यो. त., वाजीकरणे।

भाषा—शुद्धपारा और बछनाग बराबर लेकर एक पहर तक (धतूरे के रस मे) घोटकर उसका गोला बनाकर धतूरे के फल के भीतर रखकर जहर कुचिले के स्वरस अथवा क्वाथ से दोलायन्त्र मे दिनभर पकाकर और धोकर इसी प्रकार फिर दोबारह इसका संस्कार करना। उस पारे मे छै गुने शुद्धगन्धक का जारण करके उसकी भस्म कर लेना। फिर उस मे पारे के बराबर वैक्रान्तभस्म और उसके ½ शुद्ध जमालगोटा और सब से दूना बछनाग मिलाकर खरल मे तीन दिन तक धतूरे और भांगरे के रस से घोटना। फिर उस को कपडमिट्टी की हुई आतशी शीशी मे भर देना और शीशी का मुख बंद करके २ पहर तक वालुकायन्त्रमे तेज अग्नि से पकाना परन्तु जिस पात्र मे (मटके आदि मे) सिकता यन्त्र बनाना हो उसके भीतर के तले को बछनाग की धूप देकर भांगरे की पत्तियों को पीसकर लुगदी बनाकर गाढा पोता देना फिर बालू भरना। जब वह स्वाङ्गशीतल होजावे तब उसका चूर्ण करके, ३ माशे शक्कर के साथ ½ रत्ती भर इस रस को देना। इस मे पथ्य

और इस का अनुपान रोग और रोगी की अवस्थानुसार देना। जो वैद्य इस आनन्दसूत रस का प्रयोग करता है वह राजाओं मे पूज्यता और शरत् काल की चांदनी के सदृश कीर्ति को पाता है और वह वैद्येश्वर हो जाता है। यह रस सभी रोगों को ऐसा नाश करता है जैसे कि हाथी का सिंह नाश करता है ॥ ३०६ ॥

३०७ आनन्दो रसः

जातीफलं सैन्धवहिङ्गुलञ्च
वराटशुण्ठ्यौ विषहेमबीजम्।
सपिप्पलीकं वटिकां च कुर्या
द्गुञ्जाप्रमाणां जठरामयघ्नीम् ॥ १२३१ ॥
निहन्ति वातं कफशूलमात्र-
मामातिसारं ग्रहणीविकारम्।
निहन्ति शूलं सितया समेतो
रसोऽयमानन्द इति प्रदिष्टः ॥ १२३२ ॥

र. क. यो., व. रा., वै.चि., चि.,सा., नि. र., र. सु., रसायनसं., अतिसारे। र. क.यो., मुस्तकमधिकतया प्रक्षिप्तम्, जम्बीरधत्तूरविजयानाञ्च भावनां दत्वा ग्रहणीकपाट इति नाम स्थापितम्।

भाषा—जायफल, सेंधानमक, शिंगरफ, कौड़ी भस्म, सोंठ, बछनाग, धतूरे के बीज और पीपल इन सबको बराबर लेकर (नीबू अथवा अदरख के रस मे घोटकर) १ रत्ती की गोलियें बना लेना यह गोली पेटके रोगों को दूर करती है। तथा वातरोग, कफरोग, सब प्रकार के शूल, आमातिसार और सङ्ग्रहणीके विकारों को नष्ट करती है। शूल मे इसको मिश्रीके साथ देना चाहिये। इसका नाम आनन्द रस है॥ ३०७ ॥

३०८ आनन्दोरसः (प्रमदानन्दः)

कणा जातिजं हिङ्गुलं टङ्कणं च
वराटं विषं हेमबीजं सविश्वम्।
भृशं मर्दयेन्निम्बुनीरेण यामं
तथा धूर्ततोयेन भृङ्गीरसेन ॥१२३३॥
अदम्रे च मेहे विकारे ग्रहण्याः
कफे वातशूले सृतौ खण्डमेहे।
प्रशस्तः सितासेवितः शुक्रकारी
रसः सर्वदानन्द नामा प्रसिद्धः १२३४
चपला नवयौवनविभ्रमद-
प्रमदाशतदर्पहरः सहसा।
कथितो मुनिना भृगुणा शतशो
ऽनुमितो रसिकै रसराज परः ॥१२३५॥

रसायन सं., वै. चि., रसायने.

भाषा—पीपल, जायफल, शिंगरिफ, सुहागा, कौड़ीभस्म, बछनाग, धतूरे के बीज और सोंठ इन सबको बराबर लेकर नीबू, धतूरा और भांगरे के रसमे अलग २ खूब घोटलेना। यह प्रसिद्ध आनन्द रस घोर प्रमेह के विकारों मे, कफ रोग मे, वातशूल मे, अतिसार मे, मधुमेह मे, हितकारी है। इसका अनुपान मिश्री है। यह रस शुक्र को उत्पन्न करता है। अत्यन्त चपल नवीन यौवनवाली सौ स्त्रियोंके दर्प को नष्ट करने की शक्ति मनुष्यको तत्काल देता है मुनिवर भृगु महाराज ने इसको बनाया है और रसिक लोगोंने शतशः इस का मान किया है॥३०८॥

३०९ आनन्दवटिका

अग्निमन्थो वज्रवल्ली सूरणं वनसूरणम्।
चित्रकश्च द्रवैरेषां शुद्धसूतं दिनावधि ॥१२३६॥
मर्दयेत् तप्तखल्वे तु तं रसं पलमात्रकम्।
पलंपलं तालगन्धौ तत्सर्वं चाम्लवेतसैः १२३७
मर्दयेद्दिनमेकं तु कृत्वा तं गोलकं पुनः।
चतुष्पलां नागमूषां कृत्वा तस्यां तु तत्क्षिपेत् ॥
चतुष्पले शुद्धताम्रसम्पुटे तां निरोधयेत्।
मृन्मूषायां तु तां रुद्ध्वा आरण्योत्पलकैः पुटेत्॥
शतद्वयप्रमाणैस्तु स्वाङ्गशीतं समुद्धरेत्।
सर्वं दिव्यौषधद्रावै मर्दयेद्दिवसत्रयम्॥१२४०॥
चतुर्निष्कमिताकार्या वटिका शोषयेत्ततः।
एकैकां वज्रमूषायां रुद्ध्वातीव्राग्निना धमेत् ॥

आनन्दगुटिका ह्येषा वक्त्रस्था मृत्युनाशिनी ।
वत्सरान्नात्र संदेहो यावज्जीवं निरामयः१२४२
तैलं वातारिबीजोत्थं गोक्षीरे निष्कमात्रकम् ।
क्रामणार्थं पिबेन्नित्यं शीघ्रसिद्धिकरं परम् ॥

र. रां., रसायने । दिव्यौषध्योरसेन्द्रचूडामणिरसप्रकाशसुधाकरादावुक्ता स्तोमवल्ल्यादय स्तासयालाभे नियोजनीयाः ।

भाषा—अरणी, तिधारी हड़जोड़, सूरण, जङ्गली सूरण और चित्रक इन के रसों से १ दिन पारे को भावना देना । ऐसे ४ तोले पारे को तप्तखल्व मे घोटना, फिर हरताल और बङ्ग प्रत्येक ४ तोले मिलाकर १ दिन अम्लवेत के रस मे घोटना । फिर ४ तोले सीसे की मूषा बनाकर उसमे औषधी को रखना । मूषा को ४ तोले तांबे के सम्पुट मे रखकर बंद कर देना फिर २०० जङ्गली कंडों की पुट देना, जब स्वांगशीतल होजावे तब निकाल कर दिव्यौषधियों (सोमवल्ली इत्यादि यदि कुछ न मिले तो गिलोय) के रस मे ३ दिन घोटकर ९ माशे की गोलियें बना लेना । फिर एक एक गोलीको वज्रमूषा मे बंद करके तेज आग मे पकाना । यह आनन्द गुटिका मुख मे रखने से मृत्यु से बचाती है । एक वर्षतक इसका सेवन करने से आयुभर मनुष्य को रोग नहीं होते । साथ मे एरण्डका तेल ६ मासे लेकर गाय के दूध के साथ पीना चाहिये इस के पीने से इस रस का क्रामण हो जावेगा अर्थात् शरीरकी सब जगह उस का प्रभाव शीघ्र फैल जावेगा । और शीघ्र सिद्धि होगी ॥ २०९ ॥

३१० आनन्दोदयो रसः

पारदं गन्धकं लोहमभ्रकं विषमेव च ।
समांशं मरिचं चाष्टौ टङ्कणश्च चतुर्गुणम् ॥
भृङ्गराजरसैः सप्त भावना श्चाम्लदाडिमैः ।
गुञ्जाद्वयं पर्णखण्डै र्हन्ति सायं तु भक्षितः ॥
वातश्लेष्मोद्भवान् रोगान् मन्दाग्निग्रहणीज्वरान् ।
अरुचिं पाण्डुताश्चैव जयेदचिरसेवनात् १२४६

र. सं., भै. र., वै. क., र. चं., पाण्डुधिकारे । यो. म., र. सा. सं., (लम्बानन्द) र. का., (आनन्दभैरवः) रसायनसं. (आनन्दरसः) कुत्रचिदम्लदाडिमस्थाने अम्लवेतसभावना दृश्यते ।

भाषा—पारा, गन्धक, लोहभस्म, अभ्रक भस्म और बछनाग सब को बराबर और कालीमिर्चे पारे से अठगुनी और सुहागा कालीमिर्चका ½ लेकर भांगरा और खट्टे अनार के रस से सात ७ भावनाएं देना । इस रस को २ रत्तीभर पान के साथ सायंकाल खाने से वात और कफ से होने वाले रोग, मन्दाग्नि, संग्रहणी, ज्वर, अरुचि और पाण्डुरोग जल्दी नष्ट हो जाते हैं ॥ २१० ॥

३११ आमकुठाररसः

जातीफलं त्रिकटुकं टङ्कणं रसगन्धकम् ।
निर्यासं वत्सनाभं च मुस्ता कुटजचित्रकम् ॥
वरा चातिविषा सर्जनिर्यासं जीररामठम् ।
सर्वं संमर्द्य विजयास्वरसेन दिनत्रयम् ॥१२४८॥
वल्लप्रमाणां वटिकां शुण्ठीद्रावानुपानतः ।
आमशूलमतीसारं ग्रहणीश्च चिरन्तनाम् ॥
हन्यादामकुठाराख्यो रसस्त्रैलोक्यपूजितः ॥

व. रा,

भाषा—जायफल, त्रिकटु, सुहागा, पारा, गन्धक, मोचरस, बछनाग, नागरमोथा, कुरैया, चित्रक त्रिफला, अतीस, शालवृक्ष की राल, जीरा, और हींग सब को बराबर लेकर ३ दिन तक भांग के रस मे घोटना फिर ३ रत्ती की गोलियें बना लेना यह गोली अदरख के रस के साथ लेने से आमशूल, अतिसार और पुरानी संग्रहणी को नष्ट करती है । इसका नाम आमकुठार रस है तीन लोक मे इस की प्रशंसा की गई है ॥ ३११ ॥

३१२ आमलक्यादि लोहः

आमलकी कणा लोहं तुल्यया सितया सह ।
रक्तपित्तहरो लौहो योगराडिति विश्रुतः ॥

वृष्योऽग्निदीपनोबल्यो महाम्लपित्तनाशनः ।
पित्तोत्थान् वातपित्तोत्थान्
निहन्ति विविधान् गदान् ॥ १२५१ ॥

र. सि., रसायनसं., र. र., र. चि., र. सं., र. ध., घ., रक्तपित्ताधिकारे ।

भाषा—आंवला, पीपल और लोहभस्म ये सब बराबर और सब के बराबर मिश्री मिलाकर चूर्ण करलेना । यह आमलक्यादि लोह रक्तपित्तको नष्ट करनेवाला योगराज है । यह वृष्य, अग्निदीपन, बल्य, और अम्लपित्तका नाश करनेवाला है । पित्त तथा वातपित्त से हुए अनेक रोगों को नष्ट करता है॥३१२॥

३१३ आमवातगजकेसरी (प्रथमः)

जारितं पुटितं लोहं चूर्णं पञ्चपलं ततः ।
पलानि गुग्गुलोः पञ्च लौहार्धं मृतमभ्रकम् ॥
शुद्धं सूतं चाभ्रतुल्यं गन्धकञ्च तथा मतम् ।
त्रिगुणामयसश्चूर्णादभ्रान्तस्त्रिफलां नयेत् ॥
दत्त्वा द्विरष्टपानीय मष्टभागावशेषयेत् ।
तेन चाष्टावशेषेण पचेल्लोहाभ्रगुग्गुलुम्१२५४
घृतं तुल्यं शतावर्या रसं दत्त्वा तथा शुभम् ।
प्रस्थं प्रस्थं च दुग्धस्य शनैर्मृद्वग्निना भिषक् ॥
लौहमय्या पचेद्दर्व्या पात्रे चायसि मृन्मये ।
ततःपाकविधिज्ञस्तु पाकसिद्धे विनिःक्षिपेत् ॥
रसकज्जलिकां कृत्वा दत्त्वा चापि विमर्दयेत् ।
विडङ्गंनागरं धान्यं गुडूचीसत्वजीरकान् ॥
पञ्चकोलं त्रिवृद्दन्ती त्रिफलैला च मुस्तकम् ।
सुचूर्णितञ्च प्रत्येकं चूर्णमर्धपलं तथा। १२५८॥
उत्तार्य स्थापयेद्भाण्डे सिद्धे चापि सुरञ्जिते ।
घृतेन मधुना पश्चान्मर्दयित्वाऽनुपानतः ॥
भक्षयेच्छुद्धदेहस्तु शुभेऽहनि विपृच्छ्य च ।
आमवातमहाव्याधिविनाशाय महौषधम् ॥
सन्धिवातं कर्णशूलं कुक्षिशूलं सुदारुणम् ॥
जङ्घापादाङ्गुलीशूलं गृध्रसीमग्निमन्दताम् ॥
गुल्मं शोथं कामलाञ्च पाण्डुरोगं सुदुःसहम् ।
आमवातगजेन्द्रस्य केसरी मुनिनिर्मितः ॥

र. र. क., भै. र., घ., आमवाताधिकारे ।

भाषा—भस्म किया हुआ तथा आमवातनाशक दवाओंसे बहुत बखत पुट दिया हुआ लोहचूर्ण और गूगल प्रत्येक २० तोले, अभ्रकभस्म, शुद्ध पारा और गन्धक प्रत्येक १० तोले, इनको लेकर अलग २ रख लेना । फिर ८० तोले त्रिफला को ३२ गुने पानी मे उबालना जब पानी ⅛ रह जावे तब उस को छानकर उस पानी मे उपरोक्त लोह, अभ्रक और गुग्गुलु डालकर धीरे २ पकाना । पकते हुए उस मे लोहादि औषध के बराबर घी और १ सेर (१२८ तोला) शतावरीका रस और दूध १ सेर (१२८ तोला) उस मे डालना और लोहेकी कड़छी से हिलाते हुए मन्दअग्नि से पकाना । पाक की विधि को जाननेवाला वैद्य जब जाने कि पाक सिद्ध हो गया है तब उपरोक्त पारा और गन्धक की कज्जली बनाकर उस मे डाल देवे और उस को खूब घोटे फिर उस मे विडङ्ग, सोंठ, धनियां, गिलोयका सत्त्व, जीरा, पंचकोल, निसोत, दन्ती, त्रिफला, छोटी इलायची और नागरमोथा सब को २ दो तोले लेकर बारीक चूर्ण करके डाल देना । फिर उतार कर उस को वर्तन मे रखकर केसर इत्यादि से रुचिकारक रंगवाला बनाकर देह की शुद्धिकरके घी और शहद मिलाकर शुभदिन मे पूज्य लोगों से पूछकर असाध्यप्रायआमवात के नाश के लिये इस औषधि को खावे । इस के सेवन करने से सन्धिवात, कर्णशूल, कुक्षिशूल, गृध्रसी, मन्दाग्नि, गुल्म, सूजन, कामला और दारुण पाण्डुरोग ये भी नष्ट हो जाते हैं । यह आमवातगजेंद्रकेसरी रस ऋषियोंका बनाया हुआ है ॥ ३१३ ॥

३१४ आमवातगजकेसरी रसः(द्वितीयः)

अयसश्च पुरं तुल्यं पुरार्धं मृतताम्रकम् ।
भाषा—शुद्ध शिंगरिफ, शुद्ध गन्धक, हरिताल-भस्म या रसमाणिक्य, इनकी कज्जली बनाकर कड़ाहीमे डालकर द्रुत कर लेना। और फिरसे इसकी कज्जली बना लेना। फिर इस मे जायफल, जावित्री, जङ्गली सूरणकन्द, अफीम प्रत्येक शिंगरिफ के बराबर मिलाकर गोली बना लेना। और एक अधपका बड़ा कालेधतूरे का फल लेकर उसके बीच मे कोरक एक गर्त बनाकर गोली को भीतर रख उसकी डाट से बन्द करके कचे सूत से बांध देना और गेहूं के आटे की बाटीमे रखकर निर्धूम छाने की अग्निमे सेकना। जिसमे बाटीफूलकर फट जावे स्वाङ्गशीतल होनेपर निकाल के धतूरे के फल सहित पीसकर जायफल के क्वाथ तथा धतूरे के रस से पच्चीस २५ भावना देना। फिर इस मे मोचरस, मस्तगी, घीमे भूना हुआ हीराबोल, गूगल, कुचिला, अजमोद, समुद्रशोष (विधारे के बीज) चित्रक और सुहागा ये सब मिलाकर भावना दी हुई दवा के बराबर डालकर मधु से घोटकर दो दो माशे की गोली बना लेना। इस गोली का नाम उत्तरवाहिनी है। इसे नीचे लिखे हुए लेह के साथ देना। त्रिफला, हल्दी, दारुहल्दी, जामुन, आम, अर्जुन, अनार, इन की छाल, बहेड़ा, द्राक्ष, जंगली द्राक्ष, पलाश, पाकर, केवड़े का फूल, गन्धपसार, बड़हर, काकड़सींगी, कचनार की छाल, इमली, गोरख इमली, सुपारी, कटहर, नकछिकनी इन की यथासम्भव छाल के स्वरस अथवा अष्टभागावशिष्ट क्वाथ मे बराबरकी मिश्री डालकर चासनी बना लेना, इसमे जायफल, जावित्री, मोचरस, नागरमोथा, मिर्चे, बेलगिरी, आमकी, गुठली, इन्द्रजव, खस, अफीम, रसोत, आंवले की छाल अथवा आंवले, इनका चूर्ण चासनी से चतुर्थांश मिलाकर रख देना। यह केवल अवलेह ही अतिसार प्रभृति को नष्ट करता है। और इसके साथ उत्तरवाहिनी दी जाय तो फिर कहना ही क्या है। असाध्य से असाध्य अतीसार इस से नष्ट होते हैं ॥ ३५७ ॥

३५८ उदकमञ्जरीरसः (चन्द्रशेखरः) प्र०

सूतो गन्धष्टङ्कणः सोषणश्च
सर्वैस्तुल्या शर्करामत्स्यपित्तैः ।
भूयोभूयो मर्दयेच्चत्रिरात्रं
वल्लो देयः शृङ्गवेरद्रवेण ॥१४६२ ॥
तापे शीतं भोजयेत्तक्रभक्तं
वृन्ताकाढ्यं पथ्यमेतत्प्रदिष्टम् ।
अन्हैवोग्रं हन्ति सद्यो ज्वरन्तु
तापाधिक्ये मूर्ध्नि तोयं विदध्यात् ॥१४६३

र. प्र., वै. र., भै. र., वृ. यो. त., र. सं., भा. प्र., र. र. दी., रसावतार, चि. र. भ., र. सा., र. को., र. का., र. रा. शि., र. क., टो., रसायन सं., नि. र., र. सु., रस० सं., ज्वराधिकारे। र. चि., र. मं., र. र., यो. र., रस चिं., र. चं, र. शि., सु. प्र., र. क. यो., र. क, ल.,

टि०—अत्र केषुचित्पुस्तकेषु उदकमञ्जरीस्थाने चन्द्रशेखर इति नाम रक्षितं। तत्रोदकमञ्जरी न दृश्यते यथा योगरत्नाकरे, कुत्रचिच्च उदकमञ्जर्येव दृश्यते चन्द्रशेखरस्य दर्शनाभावो यथा भावप्रकाशे— कुत्रचिच्च महानुभावै रुभौ विन्यस्तौ यथा रसेन्द्रसारसङ्ग्रहे तत्रोभयत्रापि कुत्रचिच्छर्करागृहीता कुत्रचिच्च शिला गृहीता दृश्यते। तत्र शिलाघटितो योगोऽतीव तीक्ष्णः शर्कराघटितस्तु तदपेक्षया सौम्य इति व्यवस्था करणीया; कुत्रचित्—शर्करासहितःउदकमञ्जरी शिलायुक्त श्चन्द्रशेखरेति व्यवस्थापितं, परं तन्नैकान्तिकम्, उभयत्र तद्दर्शनादिति दिक्।

भाषा—पारा, गन्धक, सुहागा और कालीमिर्च इन सब को बराबर और सबके बराबर शक्कर लेकर तीन दिन तक कईबार मछली के पित्ते से भावना देना। इस रस को अदरख के रस के साथ ३ रत्ती भर देना। यदि इस को खाने से गरमी मालूम पड़े तो शीत उपचार करना। और पथ्य मे छाछ, भात और बैंगन का शाक देना। यह रस एक ही दिन के प्रयोग से घोर से घोर तत्कालजात ज्वर को नष्ट करता है। [illegible] गरमी

माळूम होवे तो शिर पर पानी की धारा देनी चाहिये ॥ ३५८ ॥

३५९ उदकमञ्जरीरसः (द्वितीयः)

शुद्धनागं शुद्धवङ्गं रसं शुद्धं समाहरेत् ।
प्रत्येकं समभागं तद्द्विगुणं शुल्वपत्रकम् १४६४
नागं वङ्गं रसं खल्वे निम्बुनीरैः प्रमर्दयेत् ।
तेन पत्राणि संलिम्पेच्छुल्वजानि भिषग्वरः ॥
शुद्धं दैत्येन्द्रमादाय शुल्वद्विगुणमात्रया ।
निम्बूरसेन सम्मर्द्य शुल्वपत्राणि लेपयेत् ॥
तुत्थं भागाष्टकं ग्राह्यं तावानेव हि गन्धकः ।
एकीकृत्याथ सञ्चूर्ण्य सम्पुटं दृढमानयेत् ॥
अधो भाण्डे त्वर्धचूर्णं प्रक्षिपेत्तदुपर्यथ ।
लिप्तपत्राणि निःक्षिप्य तदूर्ध्वं त्वर्धचूर्णकम् ॥
निक्षिप्योपरि तस्याथ शरावं सुदृढं क्षिपेत् ।
सन्धिलेपं दृढं कृत्वा भस्मना पूरयेत्ततः १४६९
सम्पुटं रचयेत्पश्चाद् दृढं लेपं प्रदापयेत् ।
चुल्यामारोप्य यत्नेन प्रहरत्रयमादतः॥१४७०॥
वैद्योऽग्निं ज्वालयेत्तीव्रं शुल्वं भस्मीभवेद् ध्रुवम् ।
तद्भस्मभाग एकः स्याद्भस्मीभूतो रसोऽपरः ॥
द्वयं समं गृहीत्वाऽथ विषं भागद्वयं क्षिपेत् ।
एकत्र मर्दयेन्नीरैर्मारिचैः सप्तवासरान् १४७२॥
पिप्पलीजैश्च शुण्ठीजै रार्द्रकस्य रसैस्तथा ।
चित्रजै र्माहिषैः पित्तै र्वाराहैः कुक्कुटोद्भवैः॥
पारावतोत्थै र्मायूरैः सप्तसप्त विभावयेत् ।
पूर्ववत्पाचितं कृत्वा भिषग्यन्त्रात्समुद्धरेत् ॥
आर्द्रकस्य रसेनैव वटीं कुर्याद्विचक्षणः ॥
सन्निपाते महाघोरे चित्रकार्द्ररसैर्युतम् १४७५
दद्यात्स्तं तद्द्वयं हि रसमात्रानुपानकम् ॥
उपचारस्तु पूर्वोक्तः कर्तव्यो रसकर्मणि ॥
सन्निपाते महाघोरे दीयतां पूर्ववद्रसः१४७६॥

रसाल., सन्निपाते ।

भाषा—शुद्ध सीसा, शुद्ध बङ्ग और शुद्ध पारा सबको बराबर लेकर नींबू के रसमे घोटकर गोला बना लेना। फिर सब से दूने प्रमाण मे ताम्रपत्र लेकर उससे उपरोक्त घोटे हुए कल्क के गोलेको बाहर से लपेट देना। फिर तांबेसे दूना गन्धक लेकर नींबूके रसमे घोटकर उपरोक्त तांबे के पत्र के बाहरसे पोत देना। फिर तांबेसे ८ गुणा गन्धक और उतनाही नीलाथोथा पीसना और एक अच्छी सी हांडी लेकर गन्धक और नीलेथोथे के चूर्णमेसे आधा नीचे और आधा ऊपर रखकर बीच मे ऊपर कहा हुआ गोला रखदेना। हांडी मे एक शराव उल्टा रखकर अच्छीतरह मिट्टीसे बंद करदेना और ऊपर से राख भर देना। फिर हांडी के मुखपर एक और शराव रखकर अच्छी तरहसे सम्पुट करके बाहर से कपड़मिट्टी करदेना। फिर उसको चूल्हेके ऊपर ३ पहर तक तेज़ अग्नि देना इस प्रकार उस तांबेकी भस्म हो जावेगी। इस प्रकार भस्म किया हुआ तांबा १ भाग, पारे की भस्म १ भाग (यह पारे की भस्म ऊपर कही हुई नहीं बल्कि और किसीभी प्रकारसे बनी हुई डालना) और बछनाग २ भाग लेकर १ दिन कालीमिर्च के क्वाथ से भावना देना। फिर पीपल का क्वाथ, सोंठ का क्वाथ, अदरखका रस, चित्रक का क्वाथ, भैंसा, सूअर, मुर्गा, कबूतर और मोर इन के पित्तों से (पृथक् २) ७ बार भावनाएं देना और पहिले कही हुई विधि से फिर उसको पकाकर अदरख के रसमे घोटकर एक एक रत्ती की गोलियें बना लेना। अतिदारुण सन्निपात मे चित्रक और अदरख के रसके साथ देना जहां कोईभी अनुपान नहीं कहा हुआहो वहां इन दोनों (चित्रक-अदरख) को देने से काम चल सक्ता है। इसके देने से दाहादि उत्पन्न होवें तो शीतोपचार करना ॥ ३५९ ॥

३६० उदग्रकुष्ठघ्नो रसः

रसगन्धक ताप्यभानुभिः
शिलयाऽथो जतुनाश्मजेन च ।
अपि पेष्य तथाम्लवेतसै
र्गुडमष्टांशकमाशु माक्षिकैः ॥

सघृतं परिसेव्य चैकक-
मुपहन्यादथ कुष्ठमुग्रकम् ॥ १४७७ ॥
नि॰ प्र॰, कुष्ठाधिकारे ।

भाषा—पारा, गन्धक, सोनामाखी, तांबा (भस्म), मैनसिल और शिलाजतु सबको बराबर लेकर अमलवेतके रस मे घोटकर आठवां हिस्सा गुड़ और शहद मिलाकर घीके साथ इस रसको खाने से सभी प्रकार के दारुण कुष्ठ नष्ट होते हैं ॥ ३६० ॥

३६१ उदयचन्द्रो रसः

शुद्धरौप्यस्य गद्याणौ द्वौ द्वौ शुद्धरसस्य च ।
खल्वे क्षिप्त्वा त्र्यहं पिष्ट्वा
पिष्टीकार्यातिसूक्ष्मिका ॥ १४७८ ॥
स्थूलैकमालिनीकन्दे कृत्वा गर्तं सुवर्तुलम् ।
चन्दनेनैव मूलानां पातालस्य गरुत्मतः १४७९
पिष्ट्वा गोलं च संवेष्ट्य कन्दगर्ते च विन्यसेत्।
श्रीखण्डवस्त्रमृत्कन्दे वारंवारञ्च नूतनैः १४८०
कन्दं वस्त्रमृदालिप्त्वा वेदैर्वेदैश्च च्छाणकैः ।
भूमावेव पुटान्येव दातव्यान्येकविंशतिः ॥
विष्णुक्रान्ता तथा लोणी काकमाची पुनर्नवा
सारिणी भृङ्गराजश्चकनकोऽपि हि सप्तमः १४८२
सप्तानामार्द्रपत्राणि निःसहायां च पेषयेत् ।
तत्पिण्डयन्तः क्षिपेद्गोलं पूर्वं श्रीखण्डवेष्टितम्॥
तत्पिण्डं भाण्डके क्षिप्त्वा शेषं पिण्डया प्रपूरयेत्
देयं मध्यकृतच्छिद्रं तत्र स्रावमधोमुखम्१४८४
तच वस्त्रमृदा लिप्त्वा भूमौ देयानि च्छाणकैः।
त्रिचत्वारिंशदेवंहि वारंवारं पुटानि च१४८५॥
श्रीखण्डवस्त्रमृत्पूर्णे वारंवारं च नूतनैः।
कुक्कुटाख्यानि देयानि भूमौ नान्यपुटानि च
स्वर्णमाक्षिकगद्याणो गद्याणः शुद्धगन्धकः ।
द्वयं पिष्ट्वा समं खल्वे यामार्धं मधुना सह ॥
पिष्ट्वा तद्गोलकं कृत्वा तत्र तद्गोलकं क्षिपेत् ।
अधो वस्त्रमृदा लिप्त्वा दातव्यं कौक्कुटं पुटम्
रौप्ययुक्तो मृतः सूतस्तच्चूर्णं कुम्भके क्षिपेत् ।
त्रिकटोः पयसा सार्धं भावयेदेकविंशतिम् ॥
वारान् वराम्भसाप्येवं तथैवार्द्रकजै रसैः ।
त्रिषष्टिं भावितं चूर्णं प्रक्षिपेत्काचभाजने१४९०
नाम्ना ह्युदयचन्द्रोऽभूत् तज्ज्ञैः निष्पादितो रसः
वल्लयुग्मं ततो ग्राह्यं पयः शीतं पिबेदनु ॥
श्लेष्मवातादिपित्तेषु बलक्षीणे क्षयेषु च ।
तैलक्षाराम्लवर्ज्यं च भोज्यं मधुरभोजनम् ॥
मासैकानन्तरं रोगा विलीयन्ते शनैर्ध्रुवम् ।
पूर्णिमाचन्द्रसङ्काशो जायते नात्र संशयः१४९३
र. कं., रस चि., क्षये ।

भाषा—शुद्ध चांदी के पत्र १२ माशे और शुद्ध पारा१२ मासे दोनों को मिलाकर ३ दिन तक खरल मे घोटकर बारीक पिष्टी बना लेना । एक मोटा कन्दमालती का लेकर उसमे गोल गड्ढा करके चन्दनकल्क से पातालगारुड़ी (हिं-जलजमनी) के मूल को पीसकर उस कल्क के भीतर ऊपरवाली गोलीको रखके गोला बनाके उस गर्तमें रखके ऊपर से चन्दन भर देना और डाट पातालगारुडी की ही लगाकर चन्दनसे लेप करके चन्दन पङ्कमे कपड़े को भिगोकर लगा देना। ऊपर से दो तीन कपड़मिट्टी लगाके सुखाकर चार चार अङ्गुली कण्डों मे फूंक देना इसी तरह बारंबार करना। अग्नि निर्धूम स्थान मे जमीनके ऊपर ही देना गर्त न खोदना । इसतरह २१ पुट देकर विष्णुक्रान्ता १ लोणी २, काकमाची ३, पुनर्नवा ४, प्रसारिणी ५, भृङ्गराज६ धतूरा ७ इन सातों के गीले पत्ते लेकर आकाशबेल के रस मे पीसना । इस के भीतर चन्दन का लेप दी हुई गोली को रखकर एक शराव या कुल्हड़ी मे रक्खैं बाकी का शरावांश उसी पत्रकल्क से भर देना। ऊपर से बीच मे छिद्र किया हुआ दूसरा शराव ऊंधा देकर उसपर कपड़मिट्टी देकर कुक्कुटपुट देदेना । इसतरह हरेक वक्त नवीन २ सकोरे लेवे और तेतालीस पुट देवै । सम्पुट को स्वाङ्गशीतल होने के बाद उघाड़ना चाहिये । इसमे शुद्ध स्वर्ण माक्षिक ६ माशे, शुद्ध गन्धक ६ माशे इन दोनों

का मधु के साथ आधे पहर तक पीसकर इसके भीतर उस गोली को रखकर उस के अर्ध भाग तक नीचे कपडमिट्टी देकर कुक्कुटपुट देना । इस तरह करने से रजत के साथ इस पारे की भस्म होगी । इसे काच के प्याले मे रखकर त्रिकटु के क्वाथ से २१ भावना देकर २१ त्रिफला के क्वाथ की और २१ अदरखके रस की देना। इस तरह ६३ भावना होने के बाद इसे काच की शीशी मे रख लेना। इसका-नाम " उदयचन्द्र " है। इसमे से ६ रत्ती लेकर ऊपर ठंढा दूध पीना, इसको श्लेष्म पित्त, वातपित्त, बलक्षीणता प्रभृति रोगों मे देने से १ महीने बाद समस्त रोग धीरे २ नष्ट होकर पौर्णिमा के चन्द्र जैसा पुष्ट हो जाता है। तैल, क्षार और खटास न देकर मधुर भोजन कराना ॥ ३६१ ॥

३६२ उदयभास्करो रसः (प्रथमः)

गन्धकेन मृतं ताम्रं दशभागं समुद्धरेत् ।
ऊषणं पञ्चभागं स्यादमृतञ्च द्विभागिकम् १४९४
श्लक्ष्णचूर्णीकृतं सर्वं रक्तिकैकप्रमाणतः ।
दातव्यं कुष्ठिने सम्यगनुपानस्ययोगतः १४९५।
गलिते स्फुटिते चैव विसूच्यां मण्डले तथा ॥
विचर्चिकादद्रुपामाकुष्ठरोगप्रशान्तये॥१४९६॥

भै. र., र. सु., वै. क., ध., रसायन सं., र. चं., र. मं., र. चि, र. का., र. क., र. सि., र. स., यो. म., कुष्ठाधिकारे ।

भाषा—गन्धक मे मारा हुआ तांबा १० भाग कालीमिर्च ५ भाग, बछनाग २ भाग, इन सब को खरल करके एक एक रत्ती बाकुची प्रभृति कुष्ठयोग्य अनुपान के साथ देने से गलित, स्फुटित, हैजा, मण्डलकुष्ठ, विचर्चिका, दद्रु पामादि कुष्ठ नष्ट होते हैं ॥ ३६२ ॥

३६३ उदयभास्करो रसः (द्वितीयः)

धान्याभ्रं सूतकं गन्धं श्वेतापामार्गजद्रवैः ।
तुल्यांशं मर्दयेचाह्नियन्त्रे लावणिके पचेत् ॥
ऊर्द्धलग्नं तु सङ्ग्राह्यं रसोऽयदयभास्करः ।
श्वासं पञ्चविधं हन्ति द्विगुञ्जमनुपानतः ॥
निष्कैकां लेहयेचानु क्षौद्रेण कटुरोहिणीम् ॥

र. र., नि. र., ध. रा., र. को., र म. मा., र. क. ल, र. सु., वै. चि., र. चं., यो. म., ना. वि., र. का., धा , श्वासकासाधिकारे ।

भाषा—धान्याभ्रक, पारा और गन्धक इनको सफेद अपामार्ग के पञ्चाङ्ग के स्वरस मे एक दिन खरल करके लवणयन्त्र में एकदिन भर पकाना। स्वाङ्गशीतल होनेपर ऊपर लगा हुआ रस धीरे से उतार के रखलेना। इसकी दो रत्ती की मात्रा देकर इस के ऊपर ४ माशा कुटकी का चूर्ण मधुके साथ चटाना और किसी भी श्वासघ्न अनुपान के साथ देने से पांच प्रकार के श्वासरोग को दूर करता है। और उपदंश के लिये यह उत्तम काम करेगा। उदयभास्कर इसका नाम है ॥ ३६३ ॥

३६४ उदयभास्करो रसः (तृतीयः)

पारदं भागमेकं तु गन्धकं टङ्कणं तथा ।
अभ्रकं लोहमेकं तु भागमेवं पृथक् पृथक् ॥
शिलाधातोस्तथा भागमम्लवेतसभागिकम् ।
कट्फलं भागमेकं तु पङ्केन सह योजयेत् १५००
रसकं पञ्चभागञ्च त्र्यहं मूत्रेण मर्दयेत् ॥
सर्वमेकत्र संयोज्य जम्बीररससंयुतम् १५०१॥
चतुर्दिनानि सम्मर्द्य खल्वके बुद्धिमान्भिषक् ।
मांसीगोक्षुरलिप्तायां मूषिकायां निधापयेत् ॥
मुद्रयेच यथायोग्यं दिनानामेकविंशतिम् ।
पुटमध्ये परिस्थाप्य कुक्कुटीमात्रके दहेत् ॥
शीतलं तं समादाय भावयेच यथाक्रमम् ।
कुमारीचित्रकव्योषजातीफलहियावली १५०४
विषमुष्टिनखैश्चाम्लवेतसैः परिमर्दयेत् ।
शोषं कृत्वा यथायोग्यं दिनमेकं पृथक्पृथक्॥
तं सूतं वल्लमात्रं तु दापयेद्बुद्धिमान्भिषक् ।
मेहे तु मधुना युक्तं प्रयोज्यं भिषजांवरैः ॥
शर्करार्द्रकसंयुक्तं रक्तपित्ते प्रयोजयेत् ।
त्रिंशद्दिनानि दातव्यं शूले च त्रिफलाजलैः ॥

मधुना चातिसारे तु श्वासे कासे तु शर्करा–
क्षीराभ्यामग्निमान्द्ये तु तैलकाञ्जिकसंयुतम् ॥
सिद्धनाथेन सम्प्रोक्तो नाम्नाह्युदयभास्करः ॥

र. स., र. को., र. र. कौमुद्यां टङ्कणस्थाने तगरं नियोजितम् ।

भाषा—पारा, गन्धक, सुहागा, अभ्रकभस्म, लोहभस्म, मैनसिल (शुद्ध), अमलवेत, कायफल और बङ्गभस्म ये सब बराबर और खपरीया पारे से पंचगुनी लेकर ३ दिनतक मनुष्य के मूत्र मे घोटना और उपरोक्त वस्तुओंमे मिला देना। फिर सबको मिलाकर ४ दिन तक खरल में जम्भीरी के रस से घोटना। फिर जटामांसी और गोखरू का कल्क जैसा बना कर मूषा के भीतर पोतकर उस मे औषध को रखकर बाहर से अच्छी तरह कपड़मिट्टी करके २१ दिन तक २१ बार (१ दिन मे १ बार) उसको कुक्कुटपुट देना। फिर यथाक्रम से घीकुआंर, चित्रक, त्रिकटु, जायफल, हृद्धात्री [यह अपरिचित होगई है इसे मराठी मे कहीं २ हिया वली नाम से पुकारा करते हैं वहभी जुदे २ प्रदेशों में जुदी २ लताएं हैं कहींपर पाठा कहीं पर पातालगारुडी कहीं पर त्रिवृत् ये चीजें हैं उसी का मूलशब्द हृद्वल्ली रसग्रन्थों मे आता है इसी को लोगों ने बदलकर हृद्धात्री करलिया है और हृद्धात्री शब्द से आजकल लोग मैनसिल का प्रयोग करते हैं पर यह उचित नहीं है क्योंकि हियावली यह शब्द हृद्वल्ली से अपभ्रष्ट हुआ माळूम पड़ता है पर यह अन्धकार किस तरह से नष्ट हो इस के लिये परमेश्वर से प्रार्थना करनी चाहिये। इस का निर्णय ग्रन्थ समाप्ति तक परमेश्वर के अनुग्रह से होगया तो परिशिष्टमे दिया जायगा इस के स्थान मे चाङ्गेरी (तिपतिया) से काम चलाया जाय तो कोई हर्ज नहीं। विषमुष्टि (जहर कुचिला) नख, अमलवेत इन प्रत्येकसे १ एक दिन मर्दन करके शोषण करना। यह उदयभास्कर रस सिद्ध हुआ इसको तीन गुञ्जा मधु के साथ प्रमेह मे देना चाहिये। रक्तपित मे शक्कर और अदरख के साथ, शूल मे त्रिफला के क्वाथ के साथ, अतीसार मे मधु के साथ, श्वास कास मे शक्कर और दूध के साथ, अग्निमांद्य मे तेल और काञ्जी के साथ देना। एक महीने का इसका प्रयोग है। सिद्धनाथ ने इसका आविष्कार किया है ॥ ३६४ ॥

३६५ उदयभास्करो रसः (चतुर्थः)

भागैकं रसतो बले द्विगुणितं शुल्वं च भागाष्टकं,
कौनटयास्त्रय एव तालवरतो भागद्वयं सज्जितम्
मर्द्यं व्योपजवेदभागसहितं भागद्वयं चामृतं,
निर्गुण्डयार्द्रकभृङ्गराजसहितं भाव्यं जयन्तीरसैः
प्रत्येकं दिनसप्तकं तु सुदृढं शोष्यं च सूर्यातपे,
योज्यं गुञ्जमितं रसार्द्रसहितं
व्योषेण सम्मिश्रितम् ॥
पाण्डुकामलरोगशोफदहने सन्ने त्रिदोषे ज्वरे,
मेहप्लीहजलोदरग्रहणिकाकुष्ठे धनुर्वातजे ॥
पथ्यं षष्टिकतण्डुलेन सहितं तक्रश्च शाल्योदनं,
देयं चोदयभास्करःक्षितितले सर्वान्धकाराञ्जयेत्

नि. र., वै. वि., र. क. यो., पाण्ड्वधिकारे ।

भाषा—पारा १ भाग, गन्धक २ भाग, ताम्रभस्म ८ भाग, मैनसिल ३ भाग, हरताल २ भाग, त्रिकटु ४ भाग, और बछनाग २ भाग, सब को लेकर सम्भाळु, अदरख, भांगरा और जैत इन के रस से पृथक् २ सात दिन तक भावना देकर धूप में सुखाकर बारीक चूर्ण कर लेना। इस रस को एक रत्तीभर अदरख के रस अथवा त्रिकटु के चूर्ण के साथ देना। यह रस पाण्डु, कामला, सूजन, दाह, सन्निपात, ज्वर, प्रमेह, पिलही, जलोदर, सङ्ग्रहणी कोढ़ और धनुर्वात को नष्ट करता है। साठी चावल, शालीचावल और छाछ इस मे पथ्य है यह उदयभास्कर रस संसार मे रोगरूपी अन्धकार को जीतता है ॥ ३६५ ॥

३६६ उदयभास्करो रसः (पञ्चमः)

भस्मसूतं मृतश्चाभ्रं शिलागन्धकतालकम् ।
हिङ्गुकङ्कुष्ठमुस्तञ्चतुल्यं चूर्णं विभावयेत् १५११
सुधार्कमत्तनिर्गुण्डीमहाराष्ट्रीद्रवैः पृथक् ।
प्रतिद्रवै दिनं भाव्यं शुष्कं तद्गोलकीकृतम् ॥
वस्त्रे बद्ध्वा मृदालेप्यंशुष्कं तुपपुटे पचेत् ।
चतुर्गुणं चार्कमूलं समादाय विचूर्णयेत् १५१३
द्वे गुञ्जे घृतशुण्ठीभ्यां लेह्यो ह्युदयभास्करः ।
वातशूलप्रशान्त्यर्थं तिलक्षारं सकुष्ठकम् ॥
मधुना लेहयेच्चानु मूलं वा काकतुण्डकम् ॥

रसायन सं., र. र., नि. र., वै. वि., व. रा., र. सं., र. को., शूलाधिकारे।

भाषा—पारे की भस्म (अभाव मे रससिंदूर), अभ्रकभस्म, मैनसिल, गन्धक, हरताल, हींग, कङ्कुष्ठ (मुर्दासङ्ग या रेवनचीनी का सीरा) और नागरमोथा इन सबको बराबर लेकर थूहर के दूध, आक के दूध, संभालूके रस और मराठीके रससे पृथक् २ भावना देकर गोला बनाकर बाहर से कपड़मिट्टी करके सुखाकर तुपपुटमें पका लेना। फिर उससे चौगुनी आककी जड़ लेकर उसके साथ पीसकर बारीक चूर्ण कर लेना। इस उदयभास्कर रसको २ रत्तीभर घी और सोंठके साथ चाटना चाहिये। यह वातरोग और शूलको नष्ट करता है। तिलक्षार और कूठ, शहद और काकनासाके साथभी यह खाया जा सक्ता है॥ ३६६॥

३६७ उदयभास्करो रसः (षष्ठः)

शुद्धाद्दरात्त्रिगुणितो दरदः सुपिष्टो,
गुञ्जार्धमस्य ससितं ज्वरहानिकृत्स्यात् ।
चेद्भावना झपजपित्तभवास्तु सप्त,
स्यात्सन्निपातदलनोदयभास्कराख्यः १५१५।

र. सं., सन्निपाते।

भाषा—शुद्ध बछनाग १ भाग और शिंगरिफ ३ भाग लेकर दोनों को खूब बारीक पीस लेना। इस रस की ½ रत्ती की मात्रा ज्वर मात्रको नष्ट करती है। यदि इस को ७ बार मछली के पित्ते से भावना देवें तो यह सन्निपातको समूल नष्ट करता है। इस रस का नाम उदयभास्कर रस है॥ ३६७॥

३६८ उदयभास्करो रसः (सप्तमः)

दरदं वत्सनाभेन तुल्यभागं विमर्दयेत् ।
सप्तवारं मत्स्यपित्तै र्भवेदुदयभास्करः१५१६॥
गुञ्जार्धमात्रो जयति शृङ्गवेराम्बुना प्लुतः ।
सन्निपातं दन्तबन्धं महाशीतान्सितायुतः ॥
शीतोपचारं कुर्वीत तक्रभक्ताशिनां तथा ।
विलेपिका तक्रयुता लाजामण्डस्तथैव च ॥
दाडिमीफलतोयं वा द्राक्षेक्षुररसोऽथवा ।
शीततोयावगाहश्च सिञ्चनं काञ्जिकेन तु१५१९

र., र. क. यो., रत्नाकरौषधयोगे मत्स्यपित्तस्थाने, वन्हिमूलरसेन भावना प्रदत्ता इति विशेषः।

भाषा—शिंगरिफ और शुद्ध बछनाग बराबर लेकर सात वार मछली के पित्ते से भावना देनेसे उदयभास्कर रस बन जाता है। यह रस ½ रत्ती अदरख के रस के साथ लिया जाय तो सन्निपात, तथा दन्तबन्ध को नष्ट करता है। मिश्री के साथ लेनेसे शीताङ्ग सन्निपात को नष्ट करता है। इस के खाने मे शीत उपचार करने चाहिये। छाछ, मठा और भात खाना चाहिये। लापसी (विलेपिका) लाईका मांड, अनार का रस, ईखका रस, ठंढे पानी से स्नान और शिर पर कांजी का सेचन इत्यादि मे से कोई या सभी प्रयोग अवस्थानुसार करने चाहिये ॥ ३६८॥

३६९ उदयभास्करो रसः (अष्टमः)

पारदं गन्धकं दिव्यं व्योषं त्रिलवणानि च ।
सिता धान्यश्च बृद्धैला रसकर्पूरमेव च१५२०
समानि सर्वतुल्यश्च शुद्धजैपालकं क्षिपेत् ।
बीजपूररसै र्भाव्यो रसो ह्युदयभास्करः१५२१
जलोदरे च गुल्मे च ह्यामवाते सुदुस्तरे ।
युक्तानुपानतो योज्यो द्विगुञ्जो भिषजां वरैः॥

रसायन सं. वि. र. म., जलोदरे।

भाषा—शुद्धपारा, शुद्धगन्धक, त्रिकटु, त्रिलवण (सेंधा, सामुद्र और काला) मिश्री, धनियां, बड़ी इलायची और रस कपूर इन सबको बराबर और सबके बराबर शुद्ध जमालगोटा मिलाकर विजोरे के रसमे खूब घोटना। यह उदयभास्कर रस है। इसको २ रत्ती की मात्रा मे खाने से जलोदर, गुल्म और आमवात नष्ट होते हैं। उचित अनुपान के साथ इसको देना चाहिये ॥ ३६९ ॥

३७० उदयभास्करो रसः (नवमः)

शुद्धताम्रस्य पत्राणि द्व्यङ्गुलैकाङ्गुलानि च।
कण्टवेध्यानि दीप्तानि भृशमच्छानि कारयेत् ॥
ताम्राच्चतुर्गुणेनैव गन्धकेन पुटद्वयम्।
उचितोत्पलमानेन यन्त्रे च भूधराभिधे १५२४
सूक्ष्मं विचूर्ण्य तत्खल्वे वाससा गालयेत्ततः।
मरिचं त्रिफलां वत्सनाभं भेषजपञ्चकम् १५२५
प्रत्यौषधं ताम्रतुल्यं सर्वं संचूर्णयेन्मुहुः।
ताम्रं निक्षिप्य सम्मर्द्य वाससा गालयेत्ततः ॥
निष्पन्नो विधिनाऽनेन रसो ह्युदयभास्करः।
रोगिभिः प्रातरुत्थाय ग्राह्यो वल्लचतुष्टयः ॥
शिरः कम्पे सन्धिशोफे समस्तानिलरोगिषु।
प्लीहोदरविकारेषु देयः सर्वज्वरेषु च १५२८
मन्दाग्नौ बद्धकोष्ठेषु श्लेष्मरोगेषु निश्चयम्।
रोगाणां नाशने शूरो रसो ह्युदयभास्करः ॥

र.चि., र.कं.ली., वातरोगे।

भाषा—शुद्ध तांबे के दो अथवा एक अंगुल विस्तार वाले बहुत बारीक और साफ पत्रे बनाकर तांबे से चौगुने प्रमाण मे गन्धक मिलाकर (गन्धक के चूर्ण को ऊपर और नीचे छिड़ककर) भूधरपुट मे उचित प्रमाण मे कण्डे जलाकर फूंक देना। और इसी प्रकार दूसरी बार फूंकना। फिर उसको खरल मे बारीक पीसकर कपड़े से छान लेना फिर कालीमिर्च, त्रिफला और बछनाग इन पांचों को प्रत्येक तांबे के बराबर उसके साथ पीसकर फिर कपड़ेसे छान लेना। फिर कालीमिर्च, त्रिफला और बछनाग इन पांचों को प्रत्येक तांबे के बराबर लेकर उसके साथ पीसकर कपड़छान कर लेना। इस प्रकार यह उदयभास्कर रस बनेगा। शिर का कांपना सन्धियों का सोजा, सभी वातरोग, प्लीहा, उदररोग, सभी ज्वर, मन्दाग्नि, बद्धकोष्ठ और श्लेष्मज रोगों को यह रस शान्त करता है। रोगियों को चाहिये कि प्रातःकाल उठकर १ ½ मासे की इसकी मात्रा उचित अनुपानों के साथ खावें। यह उदयभास्कर रस रोगों का नाश करने के लिये शूर है ॥ ३७० ॥

३७१ उदयभास्करोरसः (दशमः)

कर्षमेकं रसं शुद्धं गन्धकं तच्चतुर्गुणम्।
विधाय कज्जलीं श्लक्ष्णां ततो निम्बुकवारिणा ॥
कल्कं कुर्वीत खल्वेन यावद्यामचतुष्टयम्।
द्विकर्षमथ ताम्रस्य तनुपत्राणि सर्वशः १५३१॥
कल्केन तेन निम्बूकरसेनाऽऽप्लाव्य खल्वके।
स्थापयेदातपे तीव्रे पिण्डीकृत्य ततः परम् ॥
मूपामध्ये निरुद्ध्याथ कुक्कुटाख्यैस्त्रिभिः पुटैः।
पचेच्चुल्यां विनिःक्षिप्य शुष्कैरारण्यकोपलैः ॥
तत आकृष्य सम्मर्द्य करण्डे तं विनिःक्षिपेत्।
रसोऽयं सर्वरोगघ्नो नृणामुदयभास्करः १५३४
हन्ति सर्वाणि शूलानि तमांसीव दिवाकरः।
पर्णखण्डिकया सार्धं देयश्चेत्यपरे जगुः ॥
पथ्यं रोगोचितं देयं रसस्यानुचितं त्यजेत् ॥

र. र. स., र. सा., ध., शूलाधिकारे।

भाषा—शुद्ध पारा १ तोला और गन्धक चार तोले लेकर इनकी बारीक कज्जली बना लेना। फिर नीबूके रसके साथ ४ पहर तक घोटकर कज्जली का कल्क बना लेना। फिर २ तोले तांबे के बारीक पत्र लेकर उनको उस कल्क मे सानकर गोला बनाकर नीबू के रस मे डुबा देना और तेज़ धूप मे रख देना। फिर उसका गोला बनाकर दो मूषाओं के बीच मे रखकर बाहर से कपड़मिट्टी करके सुखाकर चूल्हे मे जङ्गली कण्डों से कुक्कुट पुट मे

तीन वार फूंक देना। फिर ठंढा हो जानेपर निकालकर खरल मे बारीक घोटकर शीशी मे रख देना। यह उदयभास्कर रस मनुष्योंके सभी रोगोंका नाश करनेवाला है। सभी प्रकार के शूलों को इस प्रकार नष्ट करता है जैसे सूर्य अन्धकार को। कोई आचार्य कहते हैं कि इस रस को पान की बीड़ी मे रखकर देना चाहिये। रोगोचित पथ्य देना चाहिये। रस के सेवन करने मे जो अपथ्य है उस को छोड़ देना चाहिये ॥ ३७१ ॥

३७२ उदयभास्करोरसः (एकादशः)

पारदं गन्धकं व्योषं द्वौ क्षारौ लवणानि च।
टङ्कणश्चेति तुल्यानि जैपालं सकलैः समम् ॥
भावना बीजपूरस्य सूक्ष्मचूर्णं विचूर्णयेत्।
सञ्ज्ञाख्यो रक्तिकायुग्मो वातं सामं विनाशयेत् ॥
गोदुग्धं केवलं पथ्यं देयमुष्ट्रीपयोऽथवा ॥
अन्नं च वर्जयेत्तावदामशोफं निवारयेत् १५३८॥

यो. चि., नि. र., र. क. ल., रसायन सं., वै. चि., आमवाते।

भाषा—पारा, गन्धक, त्रिकटु, सज्जीखार, जवाखार, पांचोंनमक और सुहागा ये सब बराबर और जमालगोटा सब के बराबर लेकर विजोरेके रसकी भावना देकर बारीक चूर्ण करलेना। इस रस को २ रत्तीभर खाना चाहिये। यह सामवातको नष्ट करता है। इस मे गाय अथवा ऊंटिनीका दूध पथ्य है। जब तक इस रसको खावे तब तक अन्न नहीं खाना चाहिये। यह रस आमशोथको भी नष्ट करता है ॥ ३७२ ॥

३७३ उदयभास्करो रसः (द्वादशः)

वातगुल्मजशूलस्य चिकित्सा सम्प्रकथ्यते।
अनुक्तमेव सूतेन्द्रं गृहीत्वा भसतां नयेत् १५३९
वज्रसभाग एकः स्याच्छिलातालकदानवाः।
व्याविद्धस्तकवाह्लीकं भस्म श्यामाभ्रकस्य च
रसतुल्यानि सर्वाणि प्रत्येकं तद्विचूर्णयेत्।
महाराष्ट्रीजलैः मेर्दः सिंधुवाररसैस्ततः १५४१
वज्रकण्टकदुग्धैश्च कृष्णधुत्तूरकद्रवैः।
एकैकेन दिनैकैकमातपे मर्दयेद्रसम् १५४२ ॥
अन्ते लघुपुटं दद्याद्गुचकं हिङ्गुनागरम्।
वातारितैलं कोष्णेन वारिणाऽऽलोड्य पाययेत्
सद्यः शूलं कुबेराक्षी मज्जयुक्तं हरेद् ध्रुवम्।
अथवा हेमकङ्कुष्ठं पुराणगुडसंयुतम् १५४४ ॥
स्नुहीदुग्धेन युक्तं वा मलरोधं विनाशयेत्।
तिलक्षारं समाक्षीकमनुपाने नियोजयेत् ॥
वातगुल्मभवं शूलं निहन्त्येष न संशयः।
उदयार्करसेन्द्रोऽयं वातगुल्मविनाशनः ॥
देवीशास्त्रानुसारेण विविच्य प्रतिपादितः ॥

रसालं., शूलादौ।

भाषा—अब वातगुल्म से होनेवाले शूल की चिकित्सा बताई जाती है। पीछे कही हुई विधिसे पारे की भस्म कर लेना (देखो सर्वसुंदर रस) एक भाग उस पारद भस्मका, मैनसिल, हरताल, गन्धक, कूठ, नागरमोथा, हींग और कृष्णाभ्रकभस्म ये सब प्रत्येक पारद भस्म के बराबर लेकर मराठीका रस, संभालूका रस, थूहर का दूध और काले धतूरे का रस इन प्रत्येक से एक दिन धूप मे घोटना। फिर अखीर मे कुक्कुटपुट देना। इस रस मे से दो रत्ती, भुनाहुआ हींग २ रत्ती, सोंठ ४ माशा, शुद्ध एरण्डतैल योग्यतानुसार (जिस से एक वा दो झाड़े खुलासे से आजावें, यह प्रमाण रोगी का कोष्ठ देखकर नियत करलेना) गरम किये हुए मे मिलाकर पिलादेना। ऊपर से थोड़ा गरम पानी पिला देना। चार माशे कंजे की गिरी के साथ इस (उदय–भास्कर) रस को देने से तुर्त का उत्पन्न शूल नष्ट होता है। शुद्ध मुर्दासङ्ग २ रत्ती अथवा रेवनचीनी एक माशा अथवा पुराना गुड़ ४ माशा और उदयभास्कर २ रत्ती मिलाकर खिलाना और ऊपर से गरमपानी पिलाना। शूल तुरन्त ही मिट जाता है। जिसको मलावरोध होगया हो उसे थूहर के दूध के साथ देने से झाड़े होकर तज्जन्यपीड़ा

निवृत्त होजाती है। तिलक्षार २ माशे के साथ मधु मे मिलाकर चटाने से वातगुल्मजन्य शूल निवृत्त होवै। देवीशास्त्रके अनुसार यह (उदयादित्य) रस कहा गया है। वातगुल्म को मिटाने के लिये यह अपूर्व औषध है॥ ३७३ ॥

३७४ उदयभास्करो रसः (त्रयोदशः)

ऊर्ध्वाधः पातितं सूतं स्विन्नं ग्रासमुखीकृतम्।
स्वरांशजीर्णकनकं जीर्णषड्गुणगन्धकम् १५४७
गृह्णीयात्पारदं तोलचतुष्कं दानवेश्वरम्।
चतुर्गुणं सूतराजाच्छुद्धं पूर्वोक्तमार्गतः १५४८
खल्वमध्ये द्वयं क्षिप्त्वा कज्जलीं रचयेद्बुधः।
एकनिम्बुकतोयेन कज्जलीं मर्दयेत्ततः १५४९
दिनत्रयं प्रयत्नेन यथा कल्कः समो भवेत्।
प्रागुक्तयुक्त्या संसाध्य शुल्वं दोषविवर्जितम्।
क्षीरे दध्नि घृते खण्डे माक्षिके गालितं रविः
पञ्चविंशतिवारांश्च प्रत्येकं वारपञ्चकम् १५५१
ततस्तेन प्रकुर्वीत पत्राणि रविणा पुनः।
यथा कण्टकवेध्यानि पारदेन समानि वै१५५२
पत्राणि तानि तत्कल्के निःक्षिपेत्सूतगन्धयोः।
आलोडयेत्पक्वनिम्बुरसैः कुर्याच्च कज्जलीम् ॥
पत्राण्यालिप्य कज्जल्या सर्वथा स्थापयेद्रवे ॥
आतपे सप्तवारांश्च हस्तेनालोडच यत्नतः१५५४
पक्वमूषां ततः कुर्यात्सुदृढां गोस्तनाकृतिम्॥
सपिधानां सपत्रं तं कल्कं तत्र विनिःक्षिपेत्॥
दत्वा पिधानीं संरुध्य मृदा कर्पटयुक्तया॥
मूषां तां चुल्लिकामध्ये क्षिप्त्वा दद्यात्पुटानि वै
त्रीणि कुक्कुटसंज्ञानि ततः सिध्येद्रसेश्वरः॥
सिद्धो रसेश्वरो ग्राह्यः पूजयित्वा यथाविधि॥
देवाग्निगुरुभूदेवान् कुमारीं योगिनीगणम्॥
भैरवं ब्रह्मविष्ण्वीशांस्ततः सूतं प्रयोजयेत्॥
चित्रकार्द्रकसिन्धूत्थैं र्नागवल्लीदलेन च॥
गुञ्जामानं ततः पेयमनुपानमिदं ततः १५५९
त्रिकटुक्वाथसंयुक्त मार्द्रकस्य रसं समम्॥
चुल्लुकत्रयमानं च दातव्यं भिषजा सदा१५६०
दृष्टप्रभावः सृष्टोऽत्र लोकोपकृतिहेतवे॥
देवीशास्त्रानुसारेण विविच्य प्रतिपादितः॥

रशाल.,

भाषा—ऊर्ध्व और अधःपातन किया हुआ और स्वेदन संस्कार से बुभुक्षित किया हुआ पारा लेकर उस मे षोडशांश सुवर्ण और षड्गुण गन्धक जारित करके ४ तोले लेना। उसमे चौगुना शुद्ध गन्धक डालकर दोनों की सूक्ष्म कज्जली करना। उस मे एक नीबू का रस देकर तीन दिन तक घोंटना जिसमे कि कल्क के बराबर हो जाय। फिर विशुद्ध ताम्रको तपाकर दूध, दही, घृत और शक्कर का शरबत तथा मधु इन मे पचीस २५ बार अथवा पांच ५ बार बुझाना। उसके बारीक पत्र बनाकर पारे के बराबर लेकर उस कल्क मे डालकर पके नीबू का रस देकर घोटे यहांतक कि उसकी भी कज्जली हो जाय कुछ पत्र बाकी रहजाँय तो उनपर उस कज्जलीके कल्क को चढ़ा देना और उसको अत्यन्तकड़ी धूप मे रखदेना। फिर दूसरे दिन उसको हाथ से खूब मिलाकर कड़ी धूप मे रखना इस तरह सातदिन तक करना। इस के बाद खूब मजबूत पक्की ढक्कन के सहित गोस्तनी मूषा बनाकर उसके भीतर ताम्रपत्र सहित कल्कको रखकर ढक्कन देकर कपड़मिट्टी ६ या ७ करके सुखालेना। फिर उसको चूल्हे मे तीन कुक्कुटपुट देना बस यह रस सिद्ध होजायगा, इसको अपने सम्प्रदायानुसार विधिपूर्वक देव,अग्नि, गुरु, ब्राह्मण, कुमारी और योगिनीगण, भैरव, ब्रह्मा, विष्णु और ईश इनकी पूजा करके प्रयोजित करे, इस के साथ चित्रक, अदरख और सेंधानमक मिलाकर अनुपान देवै अथवा नागरबेल के पान के साथ देवै और उसके उपर त्रिकटु का क्वाथ और अदरख का रस ३ चुल्लू पिलाना। इस रस की मात्रा १ रत्ती है यह रस बहुतही अजमाया हुआ है। देवीशास्त्र से लेकर लोगों के उपकार के लिये यहां प्रकट किया है ॥३७४ ॥

३७५ उदयभास्करो रसः (चतुर्दशः) (उदरारि, गौल्य, वमनी)

अच्छानां शुद्धताम्रस्य पत्राणां पलविंशतिम् ।
पलानि पञ्च सूतस्य मर्दयेन्निम्बुकद्रवैः १५६२॥
तावत्सम्मर्दनं कुर्याद्यावत्संलगते रसः ।
मृत्पात्रमध्ये निःक्षिप्य तस्योर्ध्वाधश्च गन्धकम्॥
धारयेच्चूर्णयित्वा तु सम्यग्दशपलोन्मितम् ।
चुल्हिकाग्नौ पचेत्सम्यङ्निरुद्ध्य घटिकात्रयम् ॥
स्वाङ्गशीतलमादाय चूर्णयित्वा पुनश्च तम् ।
त्रिभागान् कारयेत्तस्य भागमेकं पुनः पचेत् ॥
गोमूत्रे विंशतिं वारान् स भेदी जायते रसः ।
उदरारिः कृमीन् हन्यान्निहरे न्मलसञ्चयान् ॥
शाम्येच्छीतोपचारेण तस्मादुष्णां क्रियां चरेत्।
पुनर्द्वितीयभागं च गोक्षीरेण पचेच्छनैः १५६७
दशवारं तथा तोयै र्नालिकेरस्य पाचयेत् ।
अयं गौल्यो रसो नाम सर्वशूलविनाशनः ॥
नाभिकुक्षिभवं शूलं शिरःकर्णाक्षिजं तथा ॥
मुखरोगं पाण्डुरोगं गुदपाकं च दारुणम्१५६९।
वातपित्तज्वरं चान्यं द्वन्द्वजं सान्निपातिकम्॥
क्षयं कासं कृमींश्चैव निहन्यादीपनं तथा१५७०॥
पुनस्तृतीयं भागं तु कटुवल्लरिकारसैः ॥
भावयेद्विंशतिं वारान् वमनीजायते रसः ॥
देयः स्याद्वल्लमात्रस्तु ताम्बूलीदलसंयुतः ॥
वमनं सर्वदोषघ्नमुपचारास्तु पूर्ववत् ॥१५७२।
विसूचिकामम्लपित्तं शिरोजाड्यं च नाशयेत्॥
किं पुनर्बहुनोक्तेन सर्वशूलहरः स्मृतः १५७३॥
यस्मादुद्दीपयेच्चाग्निं तस्मादुदयभास्करः ॥
राजिकालवणं नाडीं कषायं कटुकं त्यजेत् ॥

र. प्र., र. का., र. क. यो., भै. सा. सं.,

टि०—एकस्यैव ताम्रस्य त्रिविधप्रयोगादुदरारि, गौल्य, वमनीति त्रीणि नामानि दत्तानीत्येतद्बोधनार्थं क्वचित्त्रिविक्रमरस इति नाम दत्तं दृश्यते, उदयभास्करस्तु मुख्यं नाम ।

